श्रीदोड्डयाचार्यापरनामधेयश्रीमहाचार्यविरचितः

# वेदान्तविजयः

## Vedāntavijaya of Śrī Mahācārya

**Prakashika Series**

**No. 54**

*General Editor*

**Pratapanand Jha**

# श्रीदोड्डयाचार्यापरनामधेयश्रीमहाचार्यविरचितः

# वेदान्तविजयः

## Vedāntavijaya of Śrī Mahācārya

*Editor*

**K.E. Madhusudanan**

NATIONAL MISSION FOR MANUSCRIPTS
New Delhi
and
NEW BHARATIYA BOOK CORPORATION
New Delhi

*Published by*
**National Mission for Manuscripts, IGNCA**
Janpath Building, Near Western Court
New Delhi-110 001
E-mail : director. namami @nic.in
www.namami.org

*Co Published by*
**New Bharatiya Book Corporation**
208, 2nd floor
4735/22, Prakashdeep Building,
Ansari Road, Daryaganj,
New Delhi-110002
Ph. 23280214, 23280209
E-mail : deepak.nbbc@yahoo.in
deepak.nbbc@gmail.com

© National Mission for Manuscripts

ISBN : 978-93-80829-02-9 (Series)
978-93-80829-83-8

First Published in India in 2021

Price : Rs.

# Key to Transliteration

| | | | | | |
|---|---|---|---|---|---|
| अ a | आ ā | इ i | ई ī | उ u | ऊ ū |
| (but) | (palm) | (it) | (beet) | (put) | (pool |
| ऋ* ṛ | ॠ* ṝ | ऌ* ḷ | ए e | ऐ ai | ओ o |
| | औ au | | | | |
| | (loud) | | | | |

**CONSONANTS**

| | | | | | |
|---|---|---|---|---|---|
| Guttual | क ka | ख kha | ग ga | घ gha | ङ ṅa |
| | (skate) | (blockhead) | (gate) | (ghot) | (sing) |
| Palatal | च ca | छ cha | ज ja | झ jha | ञ ña |
| | (chunk) | (catchhim) | (john) | (hedgehog) | (bunch) |
| Cerebral | ट ṭa | ठ ṭha | ड ḍa | ढ/ढ़ ḍha | ण ṇa |
| | (start) | (anthill) | (dart) | (godhead) | |
| Dental | त ta | थ tha | द da | ध dha | न na |
| | (path) | (thunder) | (that) | (breathe) | (numb) |
| Labial | प pa | फ pha | ब ba | भ bha | म ma |
| | (spin) | (philosophy) | (bin) | (abhor) | (much) |
| Semi-vowels | य ya | र ra | ल la | ळ* ḷ | व va |
| | (young) | (drama) | (luck) | | (vile) |
| Sibilants | श śa | ष ṣa | स sa | ह ha | |
| | (shove) | (bushel) | (sa) | (hum) | |

अं (—) *ṁ* or *ṃ amusūra* like *saṁskṛti/or soṃskṛti*

अः *visarga=ḥ*

ऽ *Avagraha* indicate elision of short vowel *a,* has no phonetic value.

* No exact English equivalents for these letters.

# विषयसूची

| | |
|---|---|
| Key to Transliteration | (v) |
| Foreword | (ix) |
| Introduction in English | (xii) |
| उपोद्घातः | (lxvi) |
| सङ्केताक्षरविवरणम् | (xciii) |
| गुरूपसदनविजयः | 1 |
| ब्रह्मविद्याविजयः | 178 |
| सद्विद्याविजयः | 313 |
| अद्वैतविद्याविजयः | 400 |
| परिकरविजयः | 426 |

# Foreword

Vedānta, which is the spirit of the Vedas is described in a nutshell by Maharshi Bādarāyaṇa in the Brahmasūtra. The Brahmasūtra is interpreted by several Ācāryas in various ways and it resulted in establishing various schools of Vedānta in Indian Philosophy . Śrī Rāmānujācārya is the propounder of the Viśiṣṭādvaitavāda school of Vedānta Philosophy though the concept of this philosophical school was somehow existed long before him. The concept grew out of the Vaiṣṇava movement led by Ācāryas like Nammāzhwār, Nāthamuni and Yāmunācārya. Yāmunācārya's successor Rāmānujācārya in the "Śrī Bhāṣya", the commentary on Bādarāyaṇa's Brahmasūtra had established Brahman as Absolute Reality possessing only of all good qualities and the Universe, which is also real is connected to Brahman just like Body is connected to the Soul. Thus both being inseparable from each other exist as one.

The present book 'Vedāntavijaya', one such work on Viśiṣṭādvaitavāda was written in 16$^{th}$ Century C.E. by Śrī Vādhula Rāmanujācārya, popularly known as Mahācārya or Doḍḍayācārya. He was the twelfth descendant of Śrī Rāmānujācārya's nephew Śrī Dāśarathī. In this work, the Ācārya strongly establishes the tenets of Viśiṣṭādvaitavāda while refuting the theories of Advaitavādins with reasonings and dialectics. A thorough study of this work will make one understand the development of philosophical thoughts and evolution of dialectical methods used therein post Vedanta Desika period. The text will also facilitate a clear understanding of various issues having a bearing on epistemological, metaphysical, religious and ethical problem in Indian Philosophy.

Prof. K.E. Madhusudanan has worked hard to prepare the critical edition of this text on the basis of important unpublished manuscripts. National Mission for Manuscripts (NMM) is pleased to present this work to the scholarly world with the hope that researchers will be benefitted by this publication.

**Prof. Pratapanand Jha**
Director
National Mission for Manuscripts

# Śrīḥ

## Śrīmate Rāmānujāya Namaḥ

# Introduction

It is indeed a cause for great pleasure that this book titled Vedāntavijaya, composed by Śrī Mahācārya who is popular by the name Doḍḍayācārya and is the author of the magnificent Caṇḍamāruta, is being published. Śrī Mahācārya, a great scholar and preceptor, was the 12th descendent of Bhagavad Rāmānuja's dear nephew Śrī Dāśarathi, also known fondly as Mudaliyāṇḍān. He was born as Śrīnivāsa in the small village of Erumbi close to Cholasimhapuram as the grandson of Śrī Tozhapparappai and the second son of Śrī Devarājācārya. His birth was in the Uttarāṣāḍhā asterism and mīna lagna of the kumbha month of the Śubhakṛt year (1543) as told in the śloka –

*sarvasiddhitrayodaśyāṁ lagne vedapradāhvaye /*
*jātaṁ kumbhottarāṣāḍhe mahāgurum ahaṁ bhaje //*



He was adopted by his paternal uncle, Śrī Śrīnivāsācārya, who did not have any progeny. He received all the proper saṁskāras including Upanayanam (ceremony of investiture with the sacred thread) at the appropriate times and mastered the Vedas and the Śāstrams under the tutelage of his adoptive father. Śrīnivāsa had great devotion and reverence for his adoptive father, Śrī Śrīnivāsācārya, having received all knowledge by his compassion. He considered him equal to God and was forever engaged in serving him. This devotion to his Acharya and his keen intellect made him a lion ruling the metaphorical forest of the saṁskṛta and drāviḍa vedāntas.

## The Genealogy of Mahācārya

### Mahācārya's devotion to Arcā Deities

Mahācārya was an ardent devotee of Lord Nṛsimha. In the invocatory verse of his magnum opus, the Caṇḍamāruta, a commentary to Vedānta Deśika's Śatadūṣaṇī, he emulates the Śrī Nṛsimha Mantra as follows:

*viśvaṁ bibhrati vīryakhaṇḍitamahādaitye samastātmani*
*jyotirmaṇḍalabhāsitatribhuvane sarvaṁ svato draṣṭari/*
*astu śrīnṛharau svabhītivihatasvājñānilārkānale*
*śrīmatyāśritamṛtyubhaṅgacature dhīrme sadā brahmaṇi//*

Ghaṭikācala, also known as Cholasimhapuram, is a small town in the northern part of present day Tamil Nadu. Śrī Yoga Nṛsimha is the presiding deity of this land. Long ago, the processional idol (utsavamūrti) of this deity, lovingly called Bhaktocita, was hidden secretively, owing to fear of desecration by Turks and Greeks. Over time, this location was lost from memory and the temple continued without a processional idol. Deeply troubled by the loss of this deity, the residents of Ghaṭikācala requested Śrī Mahācārya to somehow locate the idol. Having been pondering over this misfortune himself, Mahācārya received in his sleep the divine instruction of Śrī Sudarśana, the divine discus of Srīman Nārāyaṇa, as to the whereabouts of the missing idol. Following the path shown by Śrī Sudarśana, Mahācārya arrived at the secret location and found the idols of Bhaktocita and his divine consorts, Śrīdevī and Bhūdevī. His mind filled with immense joy and gratitude towards the Lord,

Mahācārya re-consecrated the idols following appropriate methods detailed in the Agamas. Even today, on the path followed by devotees to climb to the Bigger Mountain to pray to Lord Yoga Nṛsimha, there is a pillar in the second manḍapa with an idol of Mahācārya standing with folded hands and another pillar in front of it with a self-manifested idol of Śrī Sudarśana, both testifying to the great service done by Mahācārya to the presiding deity of Ghaṭikācala.

Enthralled by the glory of Śrī Mahācārya, the then King of the Kanchipuram province, Śrī Acyuta Deva, gifted the village of Cholasimhapuram to him. Śrī Mahācārya established a beautiful temple for Lord Śrī Keśava there. This is the very place that is celebrated in the Purāṇas as Ghaṭikācala and was extolled by the Divyasūris (āzhvārs).

Lord Varadarāja, the presiding processional idol of the holy land of Kanchipuram, manifested amidst the sacred flames of the Ashvamedha yajña performed by Lord Brahmā. Subsequently, Lord Brahma arranged for the conducting of the aptly named annual Brahmotsava for Lord Varadarāja. As described in the verse –

> *"turagavihagarājasyandanāndolikādiṣuadhikamadhikamanyāmātmaśobhāṁ dadhānam /*
> *anavadhikavibhūtiṁ hastiśaileśvaraṁ tvām anudinamanimeṣairlocanairnirviśeyam //*

Śrī Mahācārya would attend the grand Brahmotsava every year to blissfully behold Lord Varadarāja in all His glory. One year during his dotage, he was unable to come to Kāncīpuram during the Brahmotsava and was deeply saddened by this. On the third day of the Brahmotsava, Mahācārya woke up during the Brāhma muhūrta, bathed in the waters of the Brahmatīrtha in Cholasimhapuram and was engrossed in thoughts of Lord Varadarāja observing the grand Garuḍotsava at that very moment in Kāncīpuram and his misfortune for not being able to witness the same in person. And Lo! Unable to bear the sorrow that Mahācārya was feeling, Lord Varadarāja immediately granted him the sight of His glorious form as He was on the Garuda Vāhana. Overwhelmed by the compassion of Lord

Varadarāja, Mahācārya immediately offered his humble benedictions and adulations for Lord Varadarāja in the form of five ślokas, known as Devarāja Pañcakam. Even today, on the third day of the annual Brahmotsava, when Lord Varadarāja exits the temple through the western gate-tower (gopura) atop his Garuda Vāhana before the first light of dawn, He stands there for a few moments as if bestowing his sight to Śrī Mahācārya who is waiting on the banks of Brahmatīrtha in Cholasimhapuram. This symbolic gesture witnessed by countess Bhaktas to this day is a reminder of Mahācāryas devotion and Lord Varadarāja's compassion towards his devotees.

## An Introduction to the Works of Śrī Mahācārya

Śrī Mahācārya possessed unfettered devotion towards Kavitārkikasiṁha Sarvatantrasvatantra Śrī Vedānta Deśika. Accordingly, he authored an extensive commentary titled Caṇḍamāruta to the Śatadūṣaṇī of Śrī Vedānta Deśika, a text capable of single-handedly decimating the arguments of the Śānkara School of the Advaita philosophy. To this day, the lineage of Śrī Mahācārya is called with the title Caṇḍamāruta.

Another text written by Śrī Mahācārya is the Pārāśaryavijaya. In this text, which is a commentary to the Brahmasūtras of Sage Veda Vyāsa, he refutes the claims that the Brahma mīmāṁsā śāstram advocates Dvaita or shuddhādvaita and establishes without a shadow of doubt that Viśiṣṭādvaita is indeed the purport intended.

Śrī Mahācārya also authored a text titled Upaniṣanmaṅgaladīpikā which is a commentary to the Upanishads. This texts remain unpublished to this day.

As an outpouring of his reverence to Śrī Vedanta Deśika, Mahācārya authored the poem titled Vedanta Deśika Vaibhava Prakāśikā. In that he says:

*deśiko nigamāntāryāt tadbhāktātsāttviko janaḥ /*
*tatsūkteśca prabandho yaḥ nāsti nāsti mahītale //*

Finally, the Vedāntavijaya is an elaborate text written by

Mahācārya to strongly establish the tenets of Svāmi Rāmānuja's Viśiṣṭādvaita philosophy. It consists of five parts and is filled with complex reasoning and dialectics. The five parts are (1) Gurūpasadanavijaya (2) Brahmavidyāvijaya (3) Sadvidyāvijaya (4) Advaitavidyāvijaya and (5) Parikaravijaya.

## The Synopsis of Vedāntavijaya

**Gurūpasadanavijaya** - The Vedic injunction "svādhyāyodhye-tavyaḥ" enjoins a person with all the necessary qualifications to engage in adhyayana, which is nothing but the reiterated utterance of Vedic passages by a pupil following the utterance of the same by a teacher. The purpose of this adhyayana is for the pupil to grasp and etch into memory the Vedic passages themselves. Once the pupil masters the svādhyāya, i.e., the Vedic passages adhered to by his forefathers, he starts to make sense of the passages, although superficially, and sees that the deeds detailed in the Vedas are capable of fetching attractive fruits. Therefore, to make complete sense of the Vedic passages beyond doubt and to understand which deeds are the primary ones and which are subsidiary to those, the pupil engages in the critical study of Vedic passages, also known as mīmāṁsā, out of his own eagerness and desire, even without a Vedic injunction commanding him to do so.

For such a person with a thirst for Vedic knowledge, the Vedic injunction "parīkṣya lokān karmacitān brāhmaṇo nirvedamāyāt nāstyakṛitaḥ kṛtena, tadvijñānārthaṁ sa gurumevābhigacchet samitpāṇiḥ śrotriyaṁ brahmaniṣṭham" orders that he must, without fail, approach and seek the guidance of a Guru who is well versed in the Vedas and has directly perceived Brahman. It is this Vedic injunction and the act of seeking guidance from a Guru that are elaborately discussed about in the text Gurūpasadanavijaya.

In order to form a conclusion on the above subject, several other points of contention have also been dealt with in this text and resolved logically. A few of the conclusions made are – (1) the impossibility to enjoin śravaṇa, i.e., learning from a Guru by listening (2) the inability of words to cause direct perception (aparokṣa) (3) the impracticality

of the sādhanacatuṣṭaya, namely nityānityavastuvivekaḥ, ihāmutraphalabhogavirāgaḥ, śamadamādisādhanasampat and mumukṣā, being the precursor of the inquiry into Brahman (4) the Karma and Brahma mīmāṁsā śāstrams together forming a single text, starting with the aphorism "athāto dharmajijñāsā" and ending with "anāvṛttiśśabdādanāvṛttiśśabdāt" (5) the fallacy in the argument that after the critical study of Karma, a person whose mind is purified by the repeated performance of Vedic deeds indulges in analysis of whether the fruits of said deeds are eternal or limited (6) the impossibility of Brahman being beyond cognition (7) the irreconcilability of an object devoid of attributes being the object of a desire to cognize (jijñāsā) (8) the ineligibility of Gods other than Srīman Nārāyaṇa to be worshipped by one who desires salvation and (9) the impossibility of Brahman being beyond words since Brahman is denoted by every word. All these have been concluded as derivatives of the Vedic injunction which commands a pupil seeking knowledge of Brahman to approach a Guru and undergo tutelage under him.

**Brahmavidyāvijaya** – In this text, Mahācārya establishes that no deity other than Srīman Nārāyaṇa can be the object of supreme knowledge (paravidyā) in general, and especially of the Antarādityavidyā, Antarakṣividyā and Daharavidyā.

**Sadvidyāvijaya** – This text aims to expose fallacies in the Advaita philosophy. It consists of 7 chapters:

(1) **bhāvarūpājñānapramāṇabhaṅgaḥ** – refutation of means of valid knowledge (pramāṇa) of avidyā which is in the form of an existing (bhava) entity

(2) **tirodhānabhaṅgaḥ** – refutation of the concealment of Brahman by avidyā

(3) **avidyāśrayabhaṅgaḥ** – refutation of avidyā having a substrate

(4) **avidyālakṣaṇabhaṅgaḥ** – refutation of the definition of avidyā

(5) **avidyāprakāśabhaṅgaḥ** – refutation of the manifestation of avidyā

(6) **avidyānivartakabhaṅgaḥ** – refutation of the remover of avidyā and

(7) **avidyānivṛttibhaṅgaḥ** – refutation of the removal or dispelling of avidyā.

**Advaitavidyāvijaya** – In this fourth part of the Vedāntavijaya, Mahācārya shows with distinction the meanings of the passages of the Vedas that talk about dualism (bheda) and non-dualism (abheda) and the reconciliatory (ghaṭaka) passages. The purpose of this exercise is to prove that the intent of all the Upanishads is indeed in propounding a Brahman which possesses as its attributes all sentient and non-sentient objects in the world. Once it is established using Vedic passages such as "pṛthagātmānaṁ preritāraṁ ca matvā", "nityo nityānāṁ cetanaścetanānāmeko bahūnāṁ yo vidadhāti kāmān" and "dvā suparṇā sayujā sakhāyā" that sentient entities, non-sentient entities and God The Controller are indeed distinct, then it automatically follows that passages in the Vedas that talk about non-duality, such as "sadeva somyedamagra āsīdekamevādvitīyam", "neha nānāsti kiñcana" and "tattvamasi", are actually talking about the non-duality of a Brahman that possesses as its form all sentient and non-sentient entities, in order to avoid contradiction with the third set of passages in the Vedas known as reconciliatory (ghaṭaka) ones, such as "yasya pṛthivī śarīram", "yasyāpaḥ śarīram" and "yasyātmā śarīram" which preach that all sentient and non-sentient entities in this universe are the form of Brahman. This is evident also from Mahācāryas declaration at the beginning of the text which reads–

*"dvaitopaniṣadā sārdhaṁ śrutayodvaitagocarāḥ /*
*ghaṭakaśrutisaṁyukāḥ sadvidyāmanurundhate //"*

**Parikaravijaya –** This last part of the Vedāntavijaya deals with the identification of pious souls by establishing the right indicators of piety. As summarized in the verse

*"dhṛtordhvapuṇḍraḥ kṛtacakradhārī viṣṇuṁ paraṁ dhyāyati yo mahātmā /*
*svareṇa mantreṇa sadā hṛdi sthitaṁ parātparaṁ yanmahato mahāntam//",*

Mahācārya concludes that only those who bear the brandings of the divine conch and discus of Srīman Nārāyaṇa, as preached by the Vedas, are pious. He goes on to show evidence corroborating the validity of the branding with the divine conch and discus and also clarifies that bearing vertical sectarian marks (ūrdhvapuṇḍra) has been practiced by followers of the Vedas since time immemorial. Similarly, he also elucidates the validity of the Bhagavat śāstram, also known as the Pāñcarātra, and the glory of pious souls who follow the above mentioned practices.

I will summarize to the best of my ability the concepts explained by Sri Mahācārya in the Vedāntavijaya text which is being published presently.

## A Summary of Gurūpasadanavijaya

The Vedic injunction "svādhyāyodhyetavyaḥ" orders that one should take up adhyayana, i.e. the reiterated utterance of Vedic passages by a pupil following the utterance of the same by a teacher, in order grasp and memorize the Vedas. This too is only for a person who has undergone the Upanayana saṁskāra and strictly adheres to a set of vows, customs and restrictions detailed in the Vedas. Once such a pupil has memorized the Veda that his forefathers have been adhering to for generations, along with it's 6 ancillaries namely śīkṣā, vyākaraṇam, chandaḥ, niruktam, jyotiṣaṁ and kalpaḥ, he understands superficially that all deeds (karma) spoken of in the Vedas give lowly and temporary fruits while the knowledge of Brahman gives supreme and eternal fruits. Therefore, he naturally engages in the critical study of Vedic passages, also known as mīmāṁsā, urged by his own desire. There too, having first completed the study of the former part (pūrva bhāga) of the Vedas that deals with deeds (karma), he concludes definitively that all Vedic deeds are only capable of providing commonplace and short-lived fruits such as svarga, cows, progeny, wealth, etc. This clear understanding of the meaning of the former part of the Vedas, coupled with a superficial understanding of the meaning of the latter part (Uttara bhāga) of the Vedas which

speak about Brahman, gives rise to a desire in him to understand Brahman fully. It is towards a person in this special situation that the Vedas command seeking guidance from a Guru, in the passage –

*"parīkṣya lokān karmacitān brāhmaṇo nirvedamāyāt nāstyakṛitaḥ kṛtena/*
*tadvijñānārthaṁ sa gurumevābhigacchet samitpāṇiḥ śrotriyaṁ brahmaniṣṭham//"*

In this verse, since the person who has attained disregard (nirveda) for fruits of Karma is said to be seeking knowledge, it can be concluded that one engages in the study of Brahman by listening to a Guru (śravaṇa) out of his own desire. Therefore, in the Vedic verse "ātmā vā are draṣṭavyaḥ śrotavyo mantavyo nididhyāsitavyaḥ", the portion 'śrotavyaḥ' is not an originative rule (apūrvavidhi) that instructs an otherwise idle person to engage in śravaṇa. It is not a restrictive rule (niyamavidhi) either, since it is naturally understandable that one with disregard for the fruits of Karma develops a yearning to understand Brahman by listening to a Guru preach the meaning of the Vedas and not of the Purāṇas, etc. Finally, it is not a prohibitive rule (parisaṁkhyā vidhi) too, since both the known types of parisaṁkhyā, śeṣāntaraparisaṁkhyā and śeṣyantaraparisaṁkhyā, are not possible here. Since the Vedic passage in question talks about a Brāhmaṇa, it follows that he has completed the adhyayana of the Vedas, and so 'śrotavyaḥ' here cannot enjoin śeṣāntaraparisaṁkhyā of the form 'the Vedāntas are only to be heard, not grasped by adhyayana'. Similarly, since the word 'parīkṣya' implies that this person has completed the critical study of the former part (pūrva bhāga) of the Vedas, 'śrotavyaḥ' cannot enjoin śeṣyantaraparisaṁkhyā of the form 'Only the Vedāntas are to be listened to, not the pūrva bhāga' either. Hence, it can be concluded that śravaṇa cannot be enjoined at all. Therefore, one engages in śravaṇa purely out of his own desire.

However, since meditation that is similar to direct perception in its clarity (darśanasamānākāradhyāna) is hitherto unknown to be the cause for salvation, the portions 'draṣṭavyaḥ' and 'nididhyā-

sitavyaḥ', coming together as a single sentence, enjoin that one must engage in said meditation in order to attain salvation. 'śrotavyaḥ' is therefore merely a recounting (anuvāda) of śravaṇa in which said person is engaged out of his own desire. Since reflection or deliberation naturally follows śravaṇa in order to establish well the concepts that have been learnt from a Guru, the portion 'mantavyaḥ' too is merely a recollection (anuvāda). This is the conclusion as per Viśiṣṭādvaita philosophy.

Of those who hold that śravaṇa can be enjoined, some say that 'śrotavyaḥ' is an originative rule, while some others hold that it is a restrictive rule. However, since both these factions expose fallacies in the other's claim, both arguments are destroyed by mutual conflict, paving way for the true conclusion of Viśiṣṭādvaitins that śravaṇa cannot be enjoined.

Here, the Advaitins pose the a question that since the causality that 'all means of valid knowledge (pramāṇa) about a perceptible (aparokṣa) entity are indeed causes of direct perception or realisation (sākṣātkāra)' is pre-established, it automatically follows that the Vedāntas which are means of valid knowledge about Brahman which is a perceptible entity are also the cause of direct perception of Brahman, and so Meditation that is similar to direct perception need not be enjoined by the phrase 'draṣṭavyo nididhyāsitavyaḥ'.

The retort to this question is that sentences do not have the ability to cause direct perception (sākṣātkāra) since only the sensory organs are seen to cause it.

Here, one may ask – the senses cause direct perception only because they are means of valid knowledge of a perceptible entity. Brahman too is known to be perceptible from Vedic passages such as "yatsākṣādaparokṣādbrahma". We also agree that the inference of the Ātman is also infact direct perception . However, since passages such as "tasya tāvadeva ciram yāvanna vimokṣye" and "vedāntavijñānasuniścitārthāḥ" preach that only knowledge of Brahman born from the Vedas is the cause for salvation, there is no question of the removal of avidyā by just the inference of Ātman.

Therefore, by inference of the form - ‘knowledge born from Vedic passages such as “tattvamasi” is not indirect perception (parokṣa) since it has as its object a perceptible entity, similar to knowledge born from the eyes’, it can be established that direct perception is born from sentences too.

This however is not consistent. As per the Advaita philosophy, an object such as a pot is said to be perceptible (aparokṣa) when Consciousness limited by the object (viṣayāvacchinnacaitanyam or viṣayacaitanyam) is the same as Consciousness limited by the mind (antaḥkaraṇāvacchinnacaitanyam or pramātṛcaitanyam). When this condition is satisfied, a knowledge which has as its object such a pot is said to be direct perception (aparokṣa). However, when this condition is satisfied, since the enshrouding cover (āvaraṇa) is already removed, direct perception (aparokṣa) will no more be the cause for the removal of avidyā, which is not acceptable in their philosophy.

In addition to the above fallacy, since meditation (nididhyāsana) too has as its object the same Brahman which is a perceptible entity, it too should be direct perception and thus capable of removing avidyā. Even if you hold that only direct perception born from Vedic passages is capable of removing avidyā and so the question of meditation removing avidyā does not arise, it would still imply that merely śravaṇa, which is listening to the preachings of a Guru, could remove avidyā, which is against your own philosophy. Similarly, inference of the Ātman would also have to be direct perception . Even though the Ātman in its true form is devoid of attributes, it is indeed possible to infer the Ātman as possessing certain attributes which are purely practical (vyāvahārika).

Finally, since śravaṇa, manana, nididhysana and darśana all are about the same Brahman which is a perceptible entity, each one these four is individually capable of removing avidyā, rendering the sentence that enjoins all four of them pointless.

Therefore, direct perception is not that which has as its object an entity that is perceptible, but in fact that which is born from the

sensory organs. Therefore, since knowledge born from Vedic passages such as "tattvamasi" is not direct perception, it can be concluded that it is not capable of removing avidyā and therefore being a means of salvation.

In the Vedic injuction "parīkṣya lokān" which orders that a teacher must be sought out by a pupil wishing to know Brahman, the words 'parīkṣya' and 'tadvijñānārtham' refer to arriving at a firm conclusion about the nature of Karma and Brahman respectively. Also, since the phrase "nirvedamāyāt nāstyakṛitaḥ kṛtena" denotes that a pupil critically analysing the nature of Karma would eventually understand that no eternal fruit can be attained from deeds accomplished by him and therefore attain disregard for all Karma, the latter part 'tadvijñānārtham' indicates that the pupil realises the ability of the Knowledge about Brahman (brahmajñāna) to cause the Attainment of Brahman (brahmaprāpti), which is the only supreme and eternal fruit. Therefore, it is evident that the pupils superficial understanding that brahmajñāna can give a supreme and eternal fruit, coupled with his firm conclusion that all Karma can give only simple and impermanent fruits, is what urges him to pursue a critical study of Brahman and hence is the immediate predecessor of the inquiry into Brahman (Brahmavicāra or brahmamimāṁsā). Therefore, the argument that the sādhanacatuṣṭaya is the immediate predecessor of Brahmavicāra does not hold water.

The word 'atha' in 'athāto brahmajijñāsā', the first aphorism of the Brahma sūtras, means immediate succession (ānantarya). Since any succession must have a counterapart (pratiyogi), a suitable counterpart must be identified here that preceeds Brahmavicāra. Advaitins claim that there are four causes (sādhanacatuṣṭaya) that urge one to study the Brahman, namely (1) nityānityavastuvivekaḥ - distinguishing between eternal and transient entities, (2) ihāmutraphalabhogavirāgaḥ - an aversion to material pleasures both in this word and others, (3) śamadamādisādhanasampat – the possession of control over the internal and external senses, etc. and (4) mumukṣutva – the desire to attain salvation. This argument has

been rendered unsound by establishing that the superficial understanding that brahmajñāna can give a supreme and eternal fruit, coupled with a firm conclusion that all Karma can give only simple and impermanent fruits, is what urges one to purse Brahmavicāra.

This is also evident from the sequence in the section "brāhmaṇo parīkṣya nirvedamāyāt, tadvijñānārtham", which shows that the adhyayana of the Vedas is the predecessor of both karmamimāṁsā and brahmamimāṁsā and that karmamimāṁsā is the immediate predecessor of brahmamimāṁsā. Furthermore, the sādhanacatuṣṭaya referred to by Advaitins cannot be a predecessor to Brahmavicāra. Nityānityavastuvivekaḥ, which is distinguishing between eternal and transient entities, can truly be attained only after a critical study of both the formar and latter parts of the Vedas. When this distinction is itself not understood, there is no way a person can develop ihāmutraphalabhogavirāgaḥ , which is an aversion to material pleasures, and without that, śamadamādisādhanasampat, which is the control of one's internal and external sensory organs, etc is indeed impossible. Similarly, without a firm conclusion that brahmajñāna can yield supreme and eternal fruits, mumukṣutva itself is hard to attain.

Similarly, it can also be established that Karmamimāṁsā and Brahmamimāṁsā together actuallly form a single text. Since karmamimāṁsā and brahmamimāṁsā are both aimed at concluding upon the nature of something that is fruitful and not pointless, and since the phrase "parīkṣya... vijñānārtham" reveals the order of succcession between them, it can be easily concluded that the Karmamimāṁsā and Brahmamimāṁsā, which are actually the inquiries into the former and latter parts of a single text called the Vedas, together make up a single text. The logics by which these two mimāṁsās are considered together as one śāstram is summarized in the śloka –

*" jijñāsāvṛttiyuktīnāmaikyamakṣaralakṣmaṇoḥ/*
*sāmyāt tajjñopadeśāśca taduktādyavirodhataḥ//"*

They are

1. the desire of the pupil to know the meaning of the whole Veda, consisting of both the former and the latter parts
2. the existence of a sequence and continuity between the two mimāṁsās
3. the fact that they are in fact commentaries of two parts of the same text
4. the authorship of the two mimāṁsās by different people not harming their being a single text since the two benevolent authors, Sage Veda Vyāsa and Sage Jaimini, were in fact teacher and pupil themselves and their abstinence from commenting on the other part of the Vedas can be explained as an act of respect for the others' work
5. the word 'dharma' in 'athāto dharmajijñāsā' referring to meditation of Brahman (upāsana) also
6. the similarity in the logic of the two arguing parties in whether this śāstram should be studied or not
7. the definition of dharma, as given by the aphorism 'codanālakṣaṇortho dharmaḥ', being applicable to Meditation of the Brahman as well
8. the preaching by the learned Sage Bodhāyana that 'saṁhitametacchārīrakaṁ jaiminīyena ṣoḍaśalakṣaṇeneti śāstraikatvasiddhiḥ'
9. the non-conflicting nature of the two mimāṁsās which is evident from the references in the Brahma sūtras to Sage Jaimini's preaching of certain concepts, as in the aphorisms 'saṁjñātaścet taduktamasti tu tadapi', 'akṣaradhiyāṁ tvavarodhaḥ sāmānyatadbhāvābhyāmaupasadavat taduktam' and 'pradhānavadeva hi taduktam'.

The contention of Advaitins that the Brahman is beyond cognition is also disproved by the Vedas themselves by the use of phrases such as 'tadvijñānārtham' and 'yena veda brahmavidyām.' This can also be concluded from the Vedic injunction "ātmā vā are draṣṭavyaḥ śrotavyo mantavyo nididhyāsitavyaḥ" which recounts and enjoins śravaṇa, manana, nididhysana and darśana, which would be impractical if Brahman was beyond cognition. Even if these

inconsistencies were to be resolved by holding that the incognizability of Brahman is merely Brahman not being the object of knowledge born from the modifications of the mind (vṛtti), there would still be the trouble that the knowledge of Brahman could not be the means for salvation, which goes against the Vedic injunctions 'brahma veda brahmaiva bhavati', 'brahmavidāpnoti param', etc.

At this juncture, some raise the following question – an entity which is self—manifesting (svaprakāśa or ajaḍa) does not depend upon another for its manifestation as seen in the case of a lamp. Therefore, since the contrapositive must also be true, if Brahman was congnizable, i.e., dependent on an external knowledge for its manifestation, then it could not be self-manifesting and hence would be jaḍa, which is contradictory to Viśiṣṭādvaita philosophy.

However, this argument is not based on sound logic. We see in the world that even objects cognized by one means of valid knowledge (pramāṇa) can be cognized by another pramāṇa. Therefore, the Brahman being cognized by another pramāṇa does not negate its self-manifesting nature. That is why self-manifestation is defined as manifesting without depending upon an external aid, and not as manifesting without being the object of another pramāṇa.

Also, if Brahman was beyond cognition, it could not be the object of direct perception born from sentences (śābdāparokṣa) also. It cannot be said that Brahman is the object of modifications of the mind (vṛtti) either, since the very Vedic verse which is quoted to establish that Brahman is beyond cognition and that it cannot be denoted by words, 'yato vāco nivartante aprāpya manasā saha', also says that Brahman is not graspable by the mind. If vṛtti is cognition itself, then it follows that Brahman is cognizable. If vṛtti is distinct from cognition, then this contradicts with the experience of the form 'jānāmi'. It is for the same reason that the argument that Consciousness mixed with vṛtti (vṛttyupahitacaitanyam) is cognition is also debunked – since the upādhi is distinct from cognition, this contradicts with the universal experience of the form 'jānāmi'.

Therefore Brahman is indeed cognizable. Therefore, verses in the Vedas such as “yattadadreśyam”, “yasyāmataṁ tasya matam”, “avijñātaṁ vijānatāṁ vijñātamavijānatām”, “vijñātāramare kena vijānīyāt”, “yenedaṁ vijānāti taṁ kena vijānīyāt” and “agṛhyo na gṛhyate” are to be interpreted without contradicting with the verses that propound the cognizability of Brahman.

We also cannot conclude that there is no deciding factor (vinigamaka) between the two opposing theories or that the converse, i.e. the non-cognizability of Brahman, is only valid. If the verses indicating the cognizability of Brahman only intend that it is the object of vṛtti, then lakṣaṇā is inevitable. If the verses refuting the cognizability of Brahman only intend that Brahman is not the object of certain specific cognitions, then this is possible merely by accepting restrictions (saṅkoca) of the meaning of words. Since lakṣaṇā is a heavier burden to carry than saṅkoca, it is easier to logically conclude that Brahman is indeed cognizable. Moreover, also according to the tenet ‘bhūyasāṁ syāt sadharmakatvam’, the verses preaching the cognizability of Brahman are more powerful being more in number. Upon further analysis, if Brahman was beyond cognition, the same dṛśidhātu would have to denote knowledge in the verse ‘yattadreśyam’ and vṛtti in the verse ‘yadbhūtayoniṁ paripaśyanti dhīrāḥ’, giving rise to non-uniformity. Also, the verse ‘yasyāmataṁ tasya matam’ directly spells out that Brahman is cognizable.

The Advaitins try to establish that Brahman is avedya using the following inference – ‘Cognition (anubhūtiḥ) is avedya by virtue of being cognition, just as the contrapositive is true in the case of a pot, i.e. a pot is not avedya and is not cognition too’. Here, they say that by ‘avedya’ they only refer to ‘that which cannot be the object of any cognition’ and so even though Brahman is the object of vṛtti, there is no question of contradiction (bādhaḥ). This is not true. When Yajñadatta talks about Devadatta, he must have possessed some knowledge about Devadatta just prior to said speech, be it of the form of inference or something else. This knowledge is nothing but

vṛttyavacchinnacaitanya. Therefore, Devadatta is very much the object of Yajñadatta's vṛttyavacchinnacaitanya which is the form of inference. Similarly, Yajñadatta's too would be the object of Devadattta's vṛttyavacchinnacaitanya when he is being spoken about. In the same way, Brahman too is indeed the object of the reflection of Consciousness on a vṛtti. Therefore, by these examples, the inference put forth by the Advaitin is contradicted. Therefore, Brahman is very much cognizable.

The very same Vedic injunction which enjoins that a pupil approach a teacher to learn about the Brahman, also says "akṣaraṁ puruṣaṁ satyaṁ brahma vidyām", clearly showing that the object that the pupil desires to understand is one which possesses attributes, and not one devoid of all attributes. How can an entity which is eternally self-manifest and devoid of all attributes be the object of the desire to understand (jijñāsā)? If it is conceeded that the jīva has not cognized the Brahman till now, then it is inevitable that the jīva and the Brahman are distinct. If the distinction between jīva and Brahman is also conceeded by accepting a conditional distinction (aupādhikabheda) or the reflection of Brahman, even then the destruction of that would result in the destruction of the Brahman itself.

There are several schools of thought in reconciling the desire to understand Brahman.

1. Some say that verbal cognition exists prior to jijñāsā too but it is one which cognizes only one attribute among conflicting ones and is not in the form of a firm conclusion.
2. Some others say that jijñāsā is possible due to an erroneous understanding or the doubt that Brahman possesses attributes and that this misunderstanding or doubt is removed upon listening to the preaching of the Vedas that Brahman is devoid of attributes.
3. Few others claim that only unobstructed direct perception (apratibandhāparokṣajñānam) is capable of removing avidyā and that is the one that is desired. However, all knowledge that is born now, is obstructed (sapratibandha).

4. Others hold that prior knowledge cognizes the presence of the attribute sattva in Brahman while the knowledge that is desired is unfragmented (akhaṇḍagocarajñānam).

All these arguments are invalidated by mutual conflict itself.

The same Vedic injunction indicates which specific deity is to be sought after through the phrase - "yena akṣaraṁ puruṣaṁ veda". Through repeated usage in the the Vedas and the Itihāsa Purāṇas and also as per the rules of grammer (vyākaraṇa), it is known that the word 'puruṣa' refers only to Sriman Nārāyaṇa. Therefore, it can be concluded beyond doubt that Nararayana is alone the object of Supreme Knowledge (paravidyā). For instance, the Veda while extolling God in His Tortoise form gives the etymology of the word 'puruṣa' as - "pūrvamevāhamihāsamiti tatpuruṣasya puruṣatvam". Since the purpose of giving the etymology of a word is always to show that a particular object is denoted by that word, and since this etymology is preesnt in the vicinity of the verse "antarataḥ kūrmabhūtaṁ sarpantam", we can determine that the meaning of the word 'puruṣa' is He who has the form of a tortoise. Now, it is common knowledge that Nārāyaṇa is the one who took up the form of a tortoise in one of his avatārs. Therefore, it is safe to conclude that the word 'puruṣa' refers to Nārāyaṇa and none other.

The verse in the Padma Purāṇa which elaborates on the aforesaid Vedic verse also says –

*"yadi vā pūrvamevāhamiheti puruṣaṁ viduḥ/*
*yadi vā bahudānādvai viṣṇuḥ puruṣa ucyate//",*

clearly indicating that Nārāyaṇa is denoted by the word puruṣa.

Even though the Vedic verse "tepaśyan puroḍāśaṁ kūrmaṁ bhūtaṁ sarpantam" describes the form of a tortoise for an object other than Nārāyaṇa, the only entity that possesses the form of a Tortoise, is beginningless and is also the Creator of the Universe is none other than Nārāyaṇa. Similarly, the verse "tadviṣṇoḥ paramaṁ padaṁ sadā paśyanti sūrayaḥ" which talks about Nārāyaṇa being the object of sight reminds us of the verse "parātparaṁ puruṣamīkṣate" in the fifth section (khaṇḍa) of the Tāpanīya Upaniṣad, which states

that Puruṣa is the object of sight (īkṣaṇam). Therefore Puruṣa is none other than Nārāyaṇa.

The smṛtis also show that Puruṣa is Nārāyaṇa. For example, the yājñavalkya smṛti says – "īśvaraṁ puruṣākhyantu satyadharmāṇamacyutam"; the yamasmṛti says – "eṣa vai puruṣo viṣṇuḥ vyaktāvyaktaḥ sanātanaḥ" and the sahasranāma says – "avyayaḥ puruṣaḥ sākṣī nārasiṁhavapuḥ śrīmān keśavaḥ puruṣottamaḥ". Similar passages are found in the Viṣṇu Purāṇa too. Therefore it is established that Narayana is the One to be meditated upon to attain salvation.

In the verse under scrutiny, while the phrase "tāṁ vidyāṁ" would have been sufficient, the word "brahma" has been introduced to indicate that Brahman too is the subject of the preaching by the Guru. However, it is not the preached as the vākyārtha but in fact as the dhātvartha, since only the association among entities can be the vākyārtha. It is also evident that Brahman is the important part of the preaching from the upasarga 'pra' in the word 'provāca', which denotes importance. By way of this, the argument that Brahman is beyond words (avācya) is refuted. It is indeed not possible to make a declaration that 'Brahman is beyond words', since it would essentially mean that 'the entity which is denoted by the word Brahman cannot be denoted by words', which is an internal-inconsistency by itself. Without such a declaration, it is not possible to establish that Brahman is beyond words. Therefore Brahman can very much be indicated by words.

Also, the Cāndogya Upaniṣad says "anupraviśya nāmarūpe vyākaravāṇi" which means that Brahman entered the worldly objects after creating them in order to differentiate them by name. Therefore it follows that Brahman is denoted by names. Similarly, Vedic passages such as "vacasāṁ vācyamuttamam", "tasyoditi nāma", "yannāma tannāma" and "brahmaiva vācaḥ paramaṁ vyoma" clearly state that Brahman can be cognized through words. Sage Parāśara too reinforces Brahman's vācyatvam by saying—

*"tatra pūjyapadārthoktiḥ paribhāṣāsamanvitaḥ/*
*śabdoyaṁ nopacāreṇa tvanyatra hyupacārataḥ//".*

The verse "yato vāco nivartante" also does not imply that the Brahman is beyond words. Since the passage starts with the verse "saiṣānandasya mīmāṁsā bhavati", it is evident that it deals with quantifying the bliss of Brahman and so the word 'yat' in the verse in question could not possibly refer to Brahman.

Similarly, the verse "ākāśo ha vai nāmarūpayornirvahitā te yadantarā tadbrahma" too does not mean that Brahman is devoid of names and forms. Since the phrase 'ha vai' denotes recollection (anuvāda) of something, and any recollection requires a prior cognition (purovāda), this verse is dependent upon the verses in Sadvidyā. In the Sadvidyā, the verse "anupraviśya nāmarūpe vyākaravāṇi" clearly states that the Brahman enters the created objects in order to differentiate them by name and form and thereby is denoted by all names. Therefore, to avoid conflict with that verse, the phrase 'te yadantarā' is taken to mean that Brahman is not subject to blemishes that come from being associated with names and forms, not that Brahman is devoid of names and forms.

The verse "yadvācā anabhyuditam" too does not refute Brahman's vācyatva, since in the remainder of the passage the phrase "yena vāgabhyudyate" states that Brahman promotes or causes speech. Therefore, "yadvācānabhyuditam" could only mean that Brahman is not promoted by speech.

Therefore, the claim that Brahman can be denoted by words is firmly established by the presence of sound logic and several Vedic verses in support of the claim and the absence of any to the contrary.

This is a short overview of the contents of the Gurūpasadanavijaya.

## A Summary of the Brahmavidyāvijaya

This text begins by first establishing that meditation of Śrīman Nārāyaṇa alone and not of any other deity can cause salvation. The following reasonings have been used here:

1. Puruṣaśrutyabhyāsaḥ - The unqualified word Puruṣa refers to Nārāyaṇa by its rūḍhiśakti in verses such as "upāsate

puruṣaṁ ye hyakāmāḥ" and "puruṣa evedaṁ sarvam", as established earlier in the summary of Gurūpasadanavijaya. Therefore, to avoid non-uniformity in meaning, the word Puruṣa refers to Nārāyaṇa even when qualified, since reiteration (abhyāsa), one of the six indicators of intent (tātparyaliṅgam), supports this.

2. Akṣaraśabdasāmānādhikaraṇyam – congruence (sāmānādhikaraṇyam) with the word Akṣara also establishes that the word Puruṣa refers to Nārāyaṇa.

3. Amṛtaśabdaḥ - In the verse "nityam nirañjanaṁ nirvikalpaṁ parañjyotiramṛtākhyaṁ paraṁ brahmasvarūpaṁ dhyātvā tasminneva layamāpa" which is present in the pūrvopakrānta of the Nārasiṁhapurāṇa, the congruence (sāmānādhikaraṇyam) with the word amṛta also indicates that the word Puruṣa refers to Nārāyaṇa. The Brahmāṇḍa purāṇa verse "viṣṇvākhyamamṛtaṁ sākṣāt vijñāya parimucyate" with the word 'sākṣāt' indicating that the primary meaning should be taken for the word amṛta, the verse "ānandatṛptamacalamamṛtamacyutaṁ dhruvaṁ viṣṇusaṁjñaṁ sarvādhāraṁ dhāma" in the maitrāyaṇīya, the verse "tadeva śukramamṛtam" in the abhyasyanuvāka, the verse "ajaramamṛtamabhayamaśokamanantam" repeated fourteen times in the subālopaniṣad, and the passage in the Nārāyaṇīya which begins with the praise of Viṣṇu in the verse "amṛtavyoman sanātanaḥ" and goes to to iterate the word amṛta in the verses "evaṁ stutaḥ sa bhagavān guhyaiḥ svāyaiśca nāmabhiḥÖ yatrāmṛtaḥ sa puruṣovyayātmā" – all these show that amṛta is none other than Nārāyaṇa. Therefore, the word Puruṣa, which is in congruence (sāmānādhikaraṇyam) with the word amṛta, must also refer to Him. The preaching of "amṛtatvaṁ" in the śatarudrīya does not mean that Rudra is amṛta. It merely shows the Rudra through his favour grants knowledge to a devotee who performs japa.

4. Ekarṣiśabdaḥ - the verses "ekarṣiṁ śraddhayantaḥ" and "bhāgavatene cetasā" have the same meaning and the word bhāgavata here refers to 'one fixed on Bhagavān' as per the commentary of Śrī Śaṅkarācārya. Therefore, the word ekarṣi which is used in the place of the word Bhagavān in this verse

must be synonymous to it and hence refers to Bhagavān alone.

5. Pratyabhijñā - The verses "ya imā viśvā bhuvanāni juhvadṛṣir-hotā niṣasādāpitā naḥ" and "yo devānāṁ nāmadhā eka eva" in the taittirīyānuvāka use the words ṛṣi and eka to refer to Nārāyaṇa respectively and so the word ekarṣi in the verse in question must also refer to Nārāyaṇa.
6. Liṅgam - The anuvāka "ya imā viśvā" is especially known to talk about Nārāyaṇa since it talks about the One who possesses the navel lotus in which the creator of all the worlds in born in the verse "ajasya nābhāvadhyekamarpitam yasminnidaṁ viśvaṁ bhuvanamadhiśrita".
7. Upabṛṁhaṇam - This is further elaborated in the ānuśāsanika parva of the mahābhārata in the verse –

*" ajasya nābhāvadhyekaṁ yasmin viśvaṁ samarpitam/*
*puṣkaraṁ puṣkarākṣasya tasmai padmātmane namaḥ// ".*

A question arises here that, since in the beginning of the vājasaneyaka, the verse "īśāvāsyamidaṁ sarvam" refers to Rudra by the word īśa and says that He enters and resides in every entity, therefore, in the concluding verse "pūṣannekarṣe" too, the word Ekarṣi must refer to Rudra. However, the solution to this is simple as the verse in the beginning itself does not talk about Rudra. If the word īśāvāsyam was generated as "īśena rudreṇa āvāsyamiti īśāvāsyam", meaning 'resided within by īśa (Rudra)', then instrumentality (karaṇatvam) of Rudra would have to be informed by lakṣaṇā and it has to be assumed that the case-ending that is seen in the verse disappears. On the other hand, if the word īśāvāsyam was generated as "īṣṭa iti īṭ, tena īśā sarvaniyantrā puruṣottamena āvāsyam", meaning 'resided within by the Nārāyaṇa the controller of all entities', none of these hardships arise. Therefore, since the opening verse itself talks about Nārāyaṇa, the word Ekarṣi in the concluding verse too refers to Him alone. Śrī Śaṅkarācārya too explains the meaning of the phrase 'īśāvāsyam' in the same way as shown above.

The Antarādityavidyā also talks about Nārāyaṇa. In the passage "ya eṣontarāditye hiranmayaḥ puruṣo dṛśyate hiraṇyaśmaśrurhiraṇya-keśa āpraṇakhātsarva eva suvarṇaḥ/ tasya yathā kapyāsaṁ puṇḍarīkamevamakṣiṇī tasyoditi nāma sa eṣaḥ sarvebhyaḥ

pāpmabhya udita udeti ha vai sarvebhyaḥ pāpmabhyo ya evaṁ veda", the phrase 'eṣa dṛśyate' is a recollection (anuvāda) of a direct perception of the Upāsaka and the phrase 'ya eṣontarāditye' preaches the presence of a Puruṣa inside the Sun, since this is previously unknown. The word Puruṣa here denotes Nārāyaṇa since there are several unique characteristics of Nārāyaṇa mentioned in the passage. Possessing eyes that are beautiful as a lotus (puṇḍarīkākṣatvam), possing two eyes (akṣidvitvam), being devoid of sins (apahatapāpmatvam), the capability to destroy the sins of devotees (sarpāpanāśakatvam) and being the object of meditation that causes salvation (mumukṣūpāsyatvam) are indeed the unique characteristics of Nārāyaṇa and none other. Since Rudra has three eyes, the preaching of the similarity with a lotus regarding two eyes cannot be related to Rudra.

In addition, the verse "ya eṣontarāditye hiraṇmayaḥ puruṣaḥ" in the taittirīyamahopaniṣad clearly states that Nārāyaṇa is the one residing within the Sun. Since the preceding anuvāka talks about Nārāyaṇa, it can be concluded that the whole of taittirīyamahopaniṣad is in praise of Nārāyaṇa. The Ānandavalli too reads "sa yaścāyaṁ puruṣe/ yaścāsāvāditye/ sa ekaḥ". Since the Nārāyaṇānuvāka clearly states that the One residing within the Ātman (puruṣa) is Nārāyaṇa and the Ānandavalli verse preaches that the Ones residing within the Ātman and the Sun are one and the same, the verse 'ya eṣontarāditye hiraṇmayaḥ puruṣaḥ' too talks about Nārāyaṇa and no other. Although the verse "ṛtaṁ satyaṁ paraṁ brahma puruṣaṁ kṛṣṇapiṅgalam/ ūrdhvaretaṁ virūpākṣam" seems to be about Rudra due to the presence of the word virūpākṣa, it actually is about Nārāyaṇa the One being spoken about is said to be "Kṛṣṇapiṅgala". The fact that Nārāyaṇa is the one who is Kṛṣṇapiṅgala is evident form the verse—

*"tanmadhye daharākāśaṁ tanmadhye sūryamaṇḍalam/*
*tanmadhye paramānandaṁ vapuṣā kṛṣṇapiṅgalam //*
*nārāyaṇaṁ jagannāthaṁ vāsudevamanāmayam/"*

*from the yogārṇava. The verse "tasya cintayato netrāt tejaḥ samabhavat mahat/*

*dakṣiṇaṁ vahnisaṅkāśaṁ vāmaṁ tuhinasannibham //"*

from the vārāha purāṇa says that Nārāyaṇa is both hot and cold, thereby making him the possessor of two conflicting attributes and hence fit to be denoted by the word virūpākṣa.

While commenting on the Sāvitrī Mantra too, the fact that Nārāyaṇa resides within the Sun is shown in the verse—

*"savitustadvareṇyantu satyadharmāṇamīśvaram/*

*hiraṇyavarṇaṁ puruṣaṁ vyoma tadviṣṇusaṁjñitam//".*

At this juncture, the Brahmavidyāvijaya elaborately explains, using several passages from the Vedas and smṛtis, that Nārāyaṇa who resides within the Sun is the one spoken of in the Gāyatrī Mantra.

The antarakṣividyā too is about Nārāyaṇa. Since the principal verse of this passage - "ya eṣontarakṣiṇi puruṣo dṛśyate saivark tatsāma tadatharva tadyajustadbrahma tasyaitasya tadeva rūpaṁ yadamuṣya rūpaṁ yāvamuṣya geṣṇau tau geṣṇau yannāma tannāma" - mentions the word 'puruṣaḥ', it is indeed about Nārāyaṇa. The bṛhadāraṇyaka too says "tadyatsatyamasau sa āditye ya eva etasmin maṇḍale puruṣaḥ yaścāyaṁ dakṣiṇe akṣan" meaning that the One residing within the eye is none other than the One residing within the Sun, who has already been established as Nārāyaṇa. After praising the person residing within the eyes as Indra in the verse "indho ha vai nāmaiṣa yoyaṁ dakṣiṇe akṣan puruṣastaṁ evamindhaṁ santamindra ityācakṣate parokṣeṇa athaitadvāme akṣiṇi puruṣarūpameṣāsya patnī virāṭ", the Upaniṣad goes on to talk about the Wife of Indra as "rāḍasi bṛhatī śrīrasi indrapatnī dharmapatnī", identifying her as Śrīdevī and therefore confirming that the deity residing within the eyes in indeed Nārāyaṇa.

The Daharavidyā too speaks about Nārāyaṇa alone. The verse in the Chandogya Upaniṣad that reveals the Daharavidyā is as follows - "atha yadidamasmin brahmapure daharaṁ puṇḍarīkaṁ veśma daharosminnantara ākāśastasmin yadantastadanveṣṭavyaṁ tadvāva vijijñāsitavyam". The daharākāsha mentioned here is indeed

Nārāyaṇa, since qualities unique to Him such as being devoid of sins (apahatapāpmatvam) are mentioned here. The bṛhadāraṇyaka too says "ya eṣontarhṛdaya ākāśaḥ" meaning that the One residing within the space in the heart is none other than Nārāyaṇa, the consort of of Lakshmī, who resides within the eye.

There are several verses in the Jābālopaniṣad such as "hṛdyākāśe pare kośe divyoyamātmā svapiti", "yaḥ prāṇe yo vijñāne yaḥ ānande yo hṛdyākāśe ya atasmin sarvasminnantare sañcarati soyamātmā tamātmānamupāsīta ajaramamṛtamaśokamanantam", "antaśśarīre nihito guhāyāmaja eko nityo yasya pṛthivī śarīram", "antaśśarīre nihito guhāyāṁ śuddhaḥ soyamātmā" and "sarveśvaramacintyamaśarīraṁ nihitaṁ guhāyāmamṛtam" which bolster the above conclusions.

The ātmaprabodhopaniṣad reads "atha yadidaṁ brahmapuramidaṁ puṇḍarīkam", The kaṭhavallī contains the verse -

*"taṁ durdarśaṁ gūḍhamanupraviṣṭaṁ guhāhitaṁ gahvareṣṭhaṁ purāṇam/*
*adhātmayogādhigamena devaṁ mattvā dhīro harṣaśokau jahāti//".*

There are similar passages in the muṇḍakopaniṣad too which praise Nārāyaṇa as the one residing within the heart. The verse "sa uttamaḥ puruṣaḥ" states that the object of meditation of one who follows the daharavidyā is the Supreme Being, helping draw the conclusion that He is none other than Nārāyaṇa.

There are several passages in the Upaniṣads that contain the word ākāśa, such as "sarvāṇi ha vā imāni bhūtāni ākāśādeva samutpadyante ākāśo ha vai ebhyo jyāyān ākāśaḥ parāyaṇam", "daharosminnantara ākāśaḥ", "tatrāpi dahraṁ gaganaṁ viśokaḥ", "ākāśo ha vai nāparūpayornirvahitā" and "yadeṣa ākāśa ānando na syāt". To avoid non-uniformity in all these places, it is esssential that the word ākāśa has the same meaning in all these verses. Now, the quality of being superior than everyone, which is stated in the phrase "ākāśo ha vai ebhyo jyāyān", is told to be an attribute of Nārāyaṇa in the Puruṣasūkta verse "ato jyāyāṁśca pūruṣaḥ". Similarly, the quality of being the creator of the whole universe, which is mentioned in the phrase "ākāśādeva samutpadyante", is praised as the glory of Nārāyaṇa in

the verse "eko ha vai nārāyaṇa āsīt na brahmā neśāno neme dyāvāpṛthivī nārāyaṇāt brahmā jāyate nārāyaṇāt rudro jāyate". Therefore, the word ākāśa in all the passages quoted above must refer to Nārāyaṇa alone.

Although the phrase "śambhurākāśamadhye" seems to be about Rudra superficially, the word śambhuḥ here is actually generated as "śaṁ sukhaṁ bhāvayati iti śambhuḥ", meaning 'that which generates pleasure'. Therefore, it refers to the innumerous holy attributes of Nārāyaṇa. If the word śambhuḥ was taken to refer to Rudra, then this would contradict with the verse "asmin kāmāssamāhitāḥ". Alternatively, the word śambhuḥ could be considered as referring to Nārāyaṇa Himself. In no way can it refer to Rudra since Rudra being the antaryāmi (Controller who resides within) of Nārāyaṇa goes squarely against the Vedic verse "nārāyaṇāt rudro jāyate". The word ākāśa is the aforementioned verse refers to the common space within the heart, as there is nothing wrong in accepting non-uniformity in meaning of the same word in different passages to avoid a contradiction (bādha). The fact that the word śambhuḥ refers to Nārāyaṇa can also be understood from the verse "svayambhūś-śambhurādityaḥ" in the sahasranāma. Therefore it is safe to conclude that the daharākāśa is none other than Nārāyaṇa.

This is the summary of the contents of the Brahmavidyāvijaya**.**

## A Summary of the Sadvidyāvijaya

The Supreme Being Brahman is the One who is to be meditated upon by one who desires salvation. This meditation is known as vidyā and is of many types. However, Brahman is the object of all the vidyās. Next, to ascertain Brahman rightly, the Upaniṣads state that the Creator of the Universe is Brahman, through the verse "yato vā imāni bhūtāni jāyanteÖ". This Creatorship of the Brahman is explained in detail in the Sadvidyā. The first segment (khaṇḍa) therein gives an introduction to the purport of the whole Sadvidyā. The next six segments explain the intended concepts clearly and the final nine segments establish these concepts beyong doubt.

The first segment contains the story of a father and his son. Uddālaka out of love for his son desires to preach to him about the Brahman. In order to kindle his interest in the subject, he questions him whether he has learnt from his Gurus about that entity which when known makes everything known, in the verse "uta tamādeśam aprākṣyaḥ yenāśrutaṁ śrutaṁ bhavati amataṁ matam avijñātaṁ vijñātam". The word 'ādeśa' here refers to the Controller. Following the axiom "vivakṣātaḥ kārakāṇi bhavanti", the doer (kartā) here is considered to be the instrumental cause (karaṇa). The phrases 'yenāśrutaṁ śrutaṁ bhavati' etc mean 'that entity by hearing of which everything unheard of becomes heard of', 'that entity by pondering which everything not pondered hitherto becomes pondered' and 'that entity by meditating upon which everything not meditated upon becomes meditated upon'. This must be understood from the similar passage in the Maitrāyaṇīya Upaniṣad which says "ātmani khalvare dṛṣṭe śrute mate vijñāte idaṁ sarvaṁ vijñātaṁ bhavati" and also from the fact that this portion of the Sadvidyā aims to preach that the Brahman is the material cause (upādānakāraṇam) of this universe. The word 'vijñānaṁ' in this verse refers to meditation (nididhyāsanam). The word 'aśrutaṁ' refers to the entity not being heard of in the gross form while the word 'śrutaṁ' refers to the entity being heard of in the subtle form. Therefore, there is no conflict in the verse. The purpose of talking about learning, pondering and meditation separately is to firmly establish that all objects are cognized. To resolve the contradiction that the knowledge of one cannot become the knowledge of other objects, the examples of the pot and so on are shown by the Upaniṣad. The word 'mṛt' here refers to mud in the form of a ball (piṇḍa).

The pot that is created from the ball of mud should not be considered a separate entity just because its form and name have changed. For the purpose of verbal indication and to perform certain activities like the fetching of water, the ball of mud undergoes a transformation to attain the form of a pot and also attains a new name. However, the entity is one and the same since we are able to

recollect that 'the ball of mud which was seen by me here in the morning has now become a pot, it is in fact not distinct from the mud'.

After this, the next six segments talk about Gross (samaṣṭi) and Distinguishing (vyaṣṭi) creation. The act of mixing of the elements (trivitkaraṇam) has also been shown to explain Gross Creation. In order to show that the transformation and the new names attained by the universe extend upto the Brahman, it is shown that this distinction of the universe by name and form is caused by the Brahman entering each and every object created by It. The instrumentality of the Jīva when the Brahman enters into non-sentient objects is also detailed, to establish that the Jīvas too are a product or effect (kārya) of Brahman. The plausibility of trivitkaraṇam is also shown here. Also, to show that the Jīva too is an effect of the Brahman through its body, the Upaniṣad shows that our bodies are made up of three elements and that it is nurtured by them.

In the second segment, Gross Creation (samaṣṭi sṛṣṭi) has been explained. The verse "sadeva somyedamagra āsīdekamevādvitīyam" says that 'idam' - this universe in the product state (kāryāvasthā) that we perceive and is made up of sentient and non-sentient entities that are distinct by name and form, 'agre' - before creation during the great deluge, 'advitīyam' - without depending on a separate doer, 'ekam' - without distinction by name and form and therefore devoid of the plurality that exists in the product state, 'sat āsīt' – existed. Therefore, the phrase 'idam sat āsīt' means - that which possesses at its attributes the sentient and non-sentient entities in their gross state (sthūlacetanācetanaviśiṣṭam) existed earlier as one which possesses as its attributes the sentient and non-sentient entities in their subtle state (sūkṣmacetanācetanaviśiṣṭam). The phrase "tadaikṣata" says that Brahman willed the universe into existence indicating that Brahman is the efficient cause (nimittakāraṇam) of the Universe; the phrase "bahu syām" says that the Brahman itself became many indicating that Brahman is the material cause (upādānakāraṇam) too for this Universe.

The third segment talks about Individual Creation (vyaṣṭi sṛṣṭi). For the distinction of worldly objects by name and form to extend upto Brahman, it is shown that the Brahman enters the objects that are created. The instrumentality of the Jīva when the Brahman enters in non-sentient objects is also detailed to establish that the Jīvas too are a product or effect (kārya) of Brahman. Since the gross elements in their pure form are not fit to create the universe, it is shown that Brahman vows to do trivitkaraṇam in order to achieve distinction by name and form. Since the Brahman enters are the created objects, it indirectly becomes the bearer of states of transformation (avasthā), thereby making it the material cause (upādānakāraṇam). The non-sentient entities becomes products through their states of transformation (avasthā). The sentient entities become products through the bearers of the states of transformation (avasthāvat). The Supreme Being becomes a product through both the sentient and non-sentient entities. Just as causality can be indirect, the bearing of something (āshrayatvam) can also be indirect, as in the case of a person who is sleeping on a cot being referred to as one who is sleeping on the terrace. Therefore the material cause and the product are both Viśiṣṭa entities (the Supreme Being possessing sentient and non-sentient entities as His attributes).

A question arises here - when we say that the Viśiṣṭa Brahman is the material cause, if both the collection of sentient and non-sentient entities (viśeṣaṇam) and the Brahman (viśeṣyam) are the material cause, or if the Brahman (viśeṣyam) alone is the material cause, then it would contradict with vedic verses that say that Brahman is non-changing (nirvikāra). If the sentient and non-sentient entities (viśeṣaṇam) alone were the material cause then it would mean that Brahman is not the cause. So how can this be explained?

The answer is that both the viśeṣaṇam and viśeṣyam are material causes but there is the distinction that the viśeṣaṇam in the Viśiṣṭa Brahman in the causal state is the material cause of the viśeṣaṇam in the Viśiṣṭa Brahman in the caused state and similarly the viśeṣyam is the material cause of the viśeṣyam. As said earlier, Brahman is the

indirect bearer of transformations and so it can be said that the Viśiṣṭa Brahman is the material cause.

The fourth segment shows evidence to support trivitkaraṇam and the absence of any other effect. To show that the Jīva too is an effect of the Brahman through its body, the fifth segment preaches that our bodies are made up of three elements – fire, water and earth. The sixth segment explains sūkṣmanirgama.

Thus having given his son śvetaketu the knowledge that Brahman is material cause for this universe, the father uddālaka, out of love for his son, fears that someone might confuse his son again and steal this great knowledge from him. Therefore, he himself raises doubts in the aforementioned subject and clears them, so that the knowledge that the Brahman is the material cause becomes firm in śvetaketus mind. This is the aim of the next nine segments in the Sadvidyā.

It must be shown that all six indicators of the intent (ṣaḍvidhatātparyaliṅga) of the Sadvidyā point to the fact that the Viśiṣṭa Brahman is the material cause of the universe. The upakrama (beginning) of the Sadvidyā has the phrases "ādeśam" and "yenāśrutam"; The upasamhāra (conclusion) says "aitadātmyamidaṁ sarvaṁ sa ātmā"; this verse is repeated several times in the Sadvidyā , showing abhyāsa (reiteration); the novelty of this concept is common knowledge; the fruit (phalam) is declared in the phrase "atha sampatsye"; there is eulogy (arthavāda) of this concept also in the form of the story about a father and his son; the citing of examples and the mention of Brahman entering the created entities shows plausibility (upapattiḥ); therefore, all six indicators of intent in the Sadvidyā point to the Viśiṣṭa Brahman being the material cause. This way, other Vedic verses too are not contradicted.

The Dvaitins interpret this passage as follows - the declaration (pratijñā) and citing of examples (dṛṣṭānta) are based on similarity (sāḍṛśyam) and significance (prādhānyam). The verse "yenāśrutaṁ śrutaṁ bhavati" means that, since Brahman is the bestower of all fruits, once He is own, everything else is as good as known. This is similar to how knowledge of the word mṛt (Mud) makes all words

that are mṛṇmaya (corrupt forms of the word Mud in other languages) as good as known. The words in the other languages are indeed non-pervasive. Sanskrit pervades all regions. Therefore, since the practical applications that are done in each individual region using corrupt forms of the word 'mṛt' can all be done by knowing the word 'mṛt' in Sanskrit, the corrupt words are said to be as good as known. This is explained in the verse "vācārambhaṇamÖ" whose meaning is that - the corrupt words are initiated by speech and hence are transient; only the word mṛt is eternal.

The Advaitins' interpretation is as follows – The material cause for this universe which is illusory must also be illusory and this is called māyā, just as the mud which is imagined on the Brahman is the cause for a pot. The cause and effect are said to be one since they reside in the same substrate. Once this distinction is known, the universe indeed becomes known, since an illusory object is nothing but the substrate (adhiṣṭānam) on which it is fabricated. This is evident from the example where once the ball of mud is known, its effects like the pot are also known, since they are all imagined on Brahman. The word vācārambhaṇam means that speech is the basis of these entities, thereby making them vyāvahārika, i.e. entities that merely have a practical existence. 'mṛttiketyeva satyam' means that effects such as the pot truly exist in the form of mud only since there is no separate existence of the illusory pot.

In the Dvaita stand explained above, since the Brahman is not taken as the material cause of this Universe, contradictions with many verses from the Vedas and smṛtis would arise. The meaning of the verse in question is implausible too, since similarity is common to all entities and not unique to Brahman, making the unique refernce to Brahman in the phrase "tamādeśamaprākṣyaḥ" impossible. The citing of examples is pointless too. Moreover, it is not established that knowledge of one entity will cause the knowledge of other similar entities. If it is merely said the knowledge is based on the previous knowledge, then that can be true even without similarity, making the passage useless.

In the Advaita interpretation, since the word upādāna (material cause) is taken to mean exactly the opposite of that, since the substrate cannot become the material cause, there is some inauthenticity. The oneness of the substrate with the illusory objects is also unestablished since there is no evidence to support it. Therefore only an illusory object can be one with an illusory object. Moreover, the words aśruta amata and avijñāta would have to be taken to mean something else by lakṣaṇā. Moreover, since the illusory nature of the universe is not known prior to this preaching, the concept that the mud and the pot are none other than the Brahman is itself not established. Since the example itself is unknown, its explanation in the verse "vācārambhaṇamÖ" is also useless. The meaning of the sentence that they desire cannot be understood unless the illusory nature of the universe is already known.

In addition to these fallacies, the words mṛpiṇḍa, mṛṇmaya, lohamaṇi, lohamaya, nakhanikṛntana and kārṣṇāyasa would all have to mean something else by lakṣaṇā. Also, since the phrase "vācārambhaṇam" is sufficient to preach that these objects are illusory, the parts "mṛttiketyeva satyam" and so on are useless. There is some inauthenticity too when the word vācārambhaṇam is taken to mean vyāvahārika. The interpretation that 'once the Brahman is known, everything else is known to be illusory' is also not sound since the knowledge of pot etc are also in reality about Brahman as per the Advaita philosophy but this does not cause the knowledge that all the universe is illusory. Finally, there is the fallacy of self-reliance (ātmāshraya) if they say that the uniqueness of Brahman must be known in order to know that the universe is illusory. There are many more fallacies too in their interpretation.

The claim that everything other than Brahman in this Universe is illusory, since it is fabricated by the influence of avidyā, is also not logical since there is no evidence to support the entity avidyā as defined by you. If avidyā is to be accepted just because the illusory nature of the universe cannot be explained otherwise, then we are stuck in self-reliance (ātmāshraya) again. It also cannot be said that

the cognition 'ahamajñaḥ' is evidence of the existence of avidyā since it cannot be a cognition of the absence of knowledge since the substrate (dharmī) and the counterpart (pratiyogī) of the absence are very much cognized at that very instant. This is because the avidyā that you claim to be an existent (bhāva) entity too cannot be the object of the cognition 'ahamajñaḥ' since there is cognition of the substrate and the counterpart of avidyā at that instant. Accepting a separate avidyā that is an abhāva is also a complex fabrication that can be avoided. Moreover, several attributes like the quality of possessing parts and transformations have to be conceeded for this avidyā causing further complexity in the argument.

In the Viśiṣṭādvaita philosophy, since all absence (abhāva) is considered as the existence (bhāva) of some other entity according to the adage "bhāvāntaramabhāvo hi kayācittu vyapekṣayā", the cognition 'ahamajñaḥ' grasps the substrate and its attributes and nothing else new. Therefore this argument is simple to comprehend.

The recollection of the form 'I did not cognize anything all this while' by one who just woke up from sleep also cannot be evidence of an avidyā that is a bhāva entity, since this cognition could very well be about the absence of knowledge rather than a separate avidyā entity. Moreover, since Advaitins hold that the Mind (antaḥkaraṇam) is destroyed during deep sleep, avidyā cannot be cognized with the antaḥkaraṇam as its substrate during deep sleep and definitely not with the Soul as its substrate after having woken up. Since such a person also recollects 'I didn't cognize even the duration of my sleep', it is impossible for him to have experienced avidyā while sleeping. Therefore, this recollection is very much an inference and is about the absence of knowledge. The rejuvination of the sensory organs (indriyaprasāda) is perceivable after sleep. This indicates that the sensory organs had stopped functioning (indriyavyāpāra-uparama) which would lead to an absence of knowledge. Thus the absence of knowledge can be inferred from the rejuvination of the sensory organs.

The Advaitins put forth the following inference to establish avidyā as an existent entity – "vivādādhyāsitaṁ pramāṇajñānam svaprāgabhāvavyatirikta-svaviṣayāvaraṇa-svanivartya-svadeśagata-vastvantarapūrvakam aprakāśitārthaprakāśakatvāt andhakāre prathamotpannapradīpaprabhāvat" meaning "That knowledge, which is obtained with the help of the acccepted means of proof and which is the subject of dispute has, for its antecedent in time, another existent thing which is different from the antecedent non-existence of that knowledge itself, and veils the objects of that knowledge, and is capable of being removed by that very knowledge, and is existent in the same place as that knowledge; because it brings to light objects which were unknown before, and is thus like the light of the lamp-flame first lit up in the midst of darkness". This too is easily disproved. If by pramāṇajñānam they refer to vṛtti, then the inference is contradicted since vṛtti cannot remove avidyā. If it refers to Consciousness (caitanyam), then too the inference is contradicted since Consciousness does not have a prāgabhāva (antecedent non-existence). If Consciousness limited by vṛtti is what is referred to, then, since vṛtti itself could be remover of avidyā, it befalls that Consciousness is not the remover of avidyā. Similarly, avidyā can never stop the production of knowledge about itself and thereby be a veil, since when avidyā which is an obstacle exists, knowledge can never be born and so there is no way out.

It also cannot be said that avidyā as an existent entity is established since, without it, an illusory universe cannot exist; since the illusory nature of the universe itself cannot been established.

Vedic verses such as "anṛtena hi pratyūḍhāḥ", "teṣāṁ satyānāmamṛtamapidhānam", "nāsadāsīnno sadāsīt tadānīṁ tama āsīt tamasā gūḍhamagre praketam", "indro māyābhiḥ pururūpa īyate", "avidyāyāmantare vartamānaḥ", "ajāmekāṁ lohitaśuklakṛṣṇām" and "nīhāreṇa prāvṛtā" too don't help establish an existent entity known as avidyā. The word 'anṛta' refers to sinful deeds; the word 'tamas' refers to prakṛti which transforms into this universe during creation; the word 'māyā' in "indro māyābhiḥ pururūpa īyate" also refers to

prakṛti in accordance to the the verse "māyāntu prakṛtim vidyāt"; the words 'avidyā' and 'nīhāra' too refer to either deeds or prakṛti; therefore none of these are evidence of an existent entity known as avidyā'.

The fabrication of avidyā is useless too. It also cannot be said that the non-manifestation of the Brahman is the purpose of avidyā, since Brahman being manifestation itself would not exist anymore if its manifestation was hindered. If manifestation is conceeded to be a quality distinct from the entity Brahman, then it goes against the Advaita philosophy. Since the manifestation of Brahman does not have a beginning, hindering it cannot mean stopping its production. Therefore, avidyā hindering the manifestation of Brahman can only mean the destruction of Brahman. Therefore, Brahman should not manifest itself once salvation is attained. The manifestation of Brahman cannot have a beginning since it is Brahmans nature to self-manifest without a beginning. Moreover, if the manifestation is real, then it would mean that there are two real entities in the universe, which is againt the Advaita philosophy. If the manifestation itself is illusory, then, since it continues to exist after salvation too, everything other than the one real entity, Brahman, has not been destroyed and such a state cannot hence be called salvation at all. If manifestation ceases to exist once salvation is attained, then Brahman could not be self-manifesting by nature. Therefore, the fabrication of avidyā is pointless.

This avidyā is not capable of enshrouding (tirodhānam) anything either. If it were to enshroud Brahman, then Brahman would have to posses ignorance (ajñāna), which goes against several vedic passages that state that Brahman is omniscient. Moreover, ajñāna is experienced to reside on the ahamartha through congnitions such as 'aham ajñāḥ' and so cannot reside on the Brahman. It also cannot be said that avidyā enshrouds an entity other than Brahman since there is no true manifesting entity other Brahman which can be enshrouded. Although Consciousness limited by the Mind is self-manifesting, it cannot be enshrouded. If this manifestation is the

entity itself, then its enshrouding would mean the destruction of the entity. If it is distinct from the entity, then it could not be an effect of the self-manifesting nature at all.

Some say that the ineligibility to be called 'existing' or 'manifested' or the elibility to be called 'non-existing' or 'unmanifested' is what is meant by tirodhānam, and so, Consciousness can be enshrouded in its nature as bliss, and non enshrouded as consciousness at the same time. This is not possible since Consciousness is self-manifesting and so is always eligible to be called as 'existing' or 'manifested'. When there is vṛtti causing joy, it cannot be enshrouded. When there is no such modification, there is no question of enshrouding it. Also, if this bliss is a vṛtti and hence distinct from the entity, then the claim that ajñāna enshrouds Brahman is lost. It also cannot be said that enshrouding and its absence are because of the fabrication (adhyāsa) of distinction from the bliss of consciousness because then, since the non-manifestation of joy can be explained by the fabrication of distinction itself, the activity of enshrouding is no longer required.

This avidyā which is in the form of an existent entity does not have a bearer or substrate too. It obviously cannot have as its bearer the self-manifesting Consciousness. It also cannot be said the the joint consciousness is the bearer; if it rests in the attribute then the claim that it resides on consciousness is lost; if it resides on the attribute and the entity then it would lead to the same fallacy explained before and also cause the omniscient Brahman to be shrouded by ignorance. If it is said that although avidyā resides on Brahman, it acts upon the Mind only, then there is no use in postulating that it resides on Brahman since it might as well reside on the Mind itself. It also cannot be said that Brahman itself is eternally the bearer of avidyā, since accepting that it is pravāha anādi is simpler. If the Mind which is non self-manifesting cannot be the bearer of avidyā, then it is simpler to acccept that avidyā, like the sky, has no bearer, rather than concocting that Brahman is the bearer.

Moreover, if anything other than Consciousness is the bearer of

avidyā, then it goes against the Advaita philosophy. Since there is no scope of manifestation of such an entity, there is no question of enshrouding it and so the postulation of avidyā would be useless. Therefore, some consciousness other than the self-manifesting consciousness called Brahman must be the bearer of avidyā. Thus, the distinction between Brahman and jīva is established.

The entity called avidyā is itself impractical. If it really exists, then the philosophy of non-dualism is lost. It also cannot be the material cause of the universe since it possesses a different degree of reality than the universe. If avidyā only has a practical existence, then it cannnot be the material cause of things that exist only in appearance and vice versa. If an object possessing a different degree of realism can also be the material cause of the Universe, then there is no need to accept the existence of avidyā since Brahman itself can be the material cause of the illusory Universe.

The definition of avidyā too is fragile. It cannot be said that the quality of being eternal coupled with the quality of being removed by knowledge that is born independent of anything born from avidyā itself is the definition of avidyā, since avidyā cannot be the counterpart of the removal caused by knowledge. This is because the removal of avidyā is none other than Brahman itself which is not born from knowledge.

It also cannot be said that the quality of existing without fail before the knowledge which has the same object as itself, coupled with the quality of being destroyed by said knowledge, is the definition of avidyā, since this would hold true for every preceding knowledge that is destroyed by the succeeding knowledge and since the existence of the previous cognitions is none other than Brahman and so the quality of existing without fail in the previous moment is also true. Also, this holds true for enshrouding Brahman too and the usage of the term 'knowledge' twice is also useless.

It also cannot be said that the quality of being the counterpart of the destruction that is caused without any delay by jñāna, by virtue of

it being jñāna alone, is the definition of avidyā, since the removal of avidyā is nothing but the removal of the association with avidyā and this born only from the removal of avidyā and hence is not born from jñāna. Moreover, this defition holds true for all cognition which is capable of causing its own destruction.

It also cannot be said that the quality of being destroyed by jñāna without the requirement of any transient other than cognition itself is the definition of avidyā, since the removal of association with avidyā is dependent on the removal of avidyā which is none other than Brahman itself which is not transient. Therefore, the definition would hold true for the association with avidyā too. Even if causality here includes the quality of causing the continued existence of something, the removal of the association with avidyā is none other than the removal of avidyā which in turn is Brahman itself, this definition would hold true for the association with avidyā also. Similarly, other definitions put forth by the Advaitins are also defective.

Moreover, it must be clearly stated that what is meant by the manifestation of avidyā. If manifestation is the avidyā entity itself, then it would become non-self-manifesting. If it is distinct from the avidyā entity, then if it is distinct from Brahman too, then again it would have to be non self-manifesting. If it was not distinct from Brahman, then avidyā would have to be eternal.

It also cannot be said that the manifestation of avidyā is nothing but consciousness limited by the modificaiton of the mind in the form of avidyā, since that would mean that Consciousness is the manifestation of avidyā since vṛtti are non self-manifesting. This would lead to the problem that since Consciousness is eternal, avidyā too would have to be eternal.

The remover of avidyā cannot be proven too. If Consciousness alone was the remover, then the avidyā entity should never have existed and the injunction of śravaṇa and so on would be useless. It also cannot be said Consciousness reflected in the vṛtti is the remover, since in that case too Consciousness itself should be the remover as

this knowledge cognizes nothing more than Consciousness itself. The ability of the sensory perception of the white colour to stop the cognition of a conch as a yellow one, while the inference of white colour cannot do the same, is because that is the quality of sensory perception. In the present situation however, the quality of being reflected in the vṛtti does not have a bearing on whether Consiousness can remove avidyā and so it is not the same as the example. This is exactly why neither Consciousness with it's instrumental causality limited by vṛtti nor Consciousness that it infuenced by vṛtti can be the remover of avidyā. If Consciousness coupled with vṛtti is the remover, then it effectively means that vṛtti is the remover, since Consciosuness alone has been rejected as the remover. However, this is not possible since vṛtti is non self-manifesting and hence cannot be the remover. Moreover, if this vṛtti cognizes nothing more than the Consciousness, then the previously mentioned defect that Consciousness too should be the remover resufaces. If vṛtti cognizes more than the Consciousness, then that which is cognized newly must be accepted as illusory in order to preserve non-dualism. This in turn would mean that knowledge of an illusory object is the means of salvation, breaking the established axiom that cognition of the one true entity as it is is the remover of avidyā.

It also cannot be said that cognition of Brahman's matchlessness (advitīyatvam) is the remover of avidyā and that this matchlessness is nothing but Brahman itself; if avidyā was to enshroud this Brahman, the world would become blind. If avidyā did not enshroud this Brahman, then, since avidyā does not have matchlessness as its object, avidyā cannot be removed by cognition of this matchlessness. This is because only that cognition which has the same object as an ajñāna can be the remover of said ajñāna. Moreover, if cognition of Brahman is capable of removing the primordial avidyā, then cognitions of objects such as a pot must also be capable of removing avidyā, since they too cognize the very same Brahman.

It also cannot be said that, in accordance with the vedic verse "śrotavyaḥ śrutivākyebhyaḥ", only that cognition of Brahman which

arises from the verses in the Vedas coupled with the niyamādṛṣṭa (an adṛṣṭa born from the adherence to a restriction) is capable of removing the ajñānam of Brahman; a niyamādṛṣṭa is conceived only where the effect follows the existence and non-existence of the niyamādṛṣṭa. In the present situation however, the effect that is the removal of ajñānam can be produced even without such a niyamādṛṣṭa and so there is no necessity to conceive one. Therefore the remover of avidyā cannot be recognised clearly in the Advaita philosophy.

Similarly, it is impossible to describe what the removal of avidyā actually means. If this removal of avidyā is illusory, then the material cause of this illusion must also co-exist with this and so there is no prospect of true salvation. If the removal of avidyā is real and none other than Brahman itself, then it would have to be eternal and avidyā could not have existed in the first place. Also, since Brahman is not born from the cognition of truth, the axiom that salvation is caused by tattvajñāna would also be falsified. Moreover, Brahman which exists simultaneously with avidyā cannot be the removal of avidyā, since there is no contradiction between them. The Brahman that exists after the birth of tattvajñāna cannot be said to be the removal of avidyā; as there is no joint entity that is distinct from the constituent entities, this would effectively mean that the constituents of the joint entity are the removal of avidyā. However, the fallacies in this argument have already been shown.

Moreover, since the verse "māyāntu prakṛtiṁ vidyāt" says that avidyā and prakṛti are one and the verse "gauranādyantavatī" says that prakṛti is eternal, there can be no such thing as the removal of avidyā. Even if we were to accept the karmadhāraya samāsa here and say that this verse shows that avidyā is destroyable (antavatī), the conflicts with verses such as "nityā satatavikriyā" and "ajāmekām" cannot be resolved.

Therefore, there is no evidence to support an existent avidyā entity since it is not capable of enshrouding Brahman, its substrate cannot be shown, its definition is flawed, its manifestation itself is impossible, it has no clear agent to cause its removal and since its

removal itself cannot be described realistically. Therefore, there is no point in fabricating such an avidyā entity and so there is no evidence to prove that this universe that we behold is illusory.

## A Summary of the Advaitavidyāvijaya

This text aims to refute important concepts in the Advaita philosophy by showing Vedic passages and sound logic that contradict them. A few of the concepts disproved here are - the illusory nature or non-existence of the universe, the oneness or identity of Jīva and Brahman, the Ātman being distinct from the ahamartha i.e. the object of the cognition of the form 'aham', and the capability of Vedic verses such as 'tattvamasi' to cause non-fragmented cognition (akhanḍārtha-bodha).

## (1) The real existence of the Universe

The Advaitins hold that the Brahman alone is real and that everything else is illusory (mithyā). This is not true as there is no pramāṇa to support it. The illusory nature (mithyātvam) of the universe cannot be cognized by the senses as mithyātvam is made of up components that are beyond the senses.

Some say that mithyātvam is established by inferences and Vedic testimony. The inferences are of the form – the universe is illusory since it is (a) perceivable (dṛśya) (b) transitory (vyāvartamāna) (c) distinct from Brahman (brahmavyatirikta) (d) limited (paricchinna) or (e) non self-manifesting (jaḍa), just as the śuktirūpya (silver cognized in place of a seashell). The Vedic passages that support these are "neha nānāsti kiñcana", "ekamevādvittīyam", and so on.

However, this argument is not infallible since bādhitatvam (being contradicted) and avikāritvam (being unchanging) are limitations (upādhi) in the said inferences. After cognizing an object, we can say that it was illusory only if we cognize later that the object does not exist (bādhajñānam). However, this does not happen in the case of objects in the world such as a pot or a cloth. Therefore they cannot be illusory. It should also not be questioned that even though there

is no contradiction by sensory perception (pratyakṣa), there is contradiction by Vedic verses such as "neha nānāsti kiñcana" because, in that case, even Brahman would have to be illusory since there is the Vedic verse "nāsadāsīnno sadāsīttadānīm, tama āsīt" saying nothing existed. If one were to say that since the Vedas talk about the existence of Brahman in the verse "satyam jñānamanantaṁ brahma", the verse "nāsadāsīnnoÖ" only refutes the existence of objects other than the Brahman, then, by the same logic, since the Vedas talk about the existence of the Universe also by stating that they are the form of Nārāyaṇa in verses such as "yasyātmā śarīram" and "yasya pṛthivī śarīram", the verse "neha nānāsti kiñcana" only refutes the existence of several independent Brahmans. The inferences mentioned above are also plagued by contrariety (satpratipakṣa) since the fact that the universe is the object of knowledge born from a pramāṇa (a valid means of cognition) can be used to establish that the Universe is real and not illusory.

Also, if the middle term or reason (hetu) dṛśyatvam refers to the quality of being perceivable by the senses, then the invariable concomitance between the major term and the minor term itself fails in the Brahman since it is the object of sensory perceptions such as 'The pot exists (ghaṭaḥ san)' and of direct perception born from Vedic passages (śābdāparokṣa). If dṛśyatvam refers to the quality of being the object of any cognition of potentiality (śakti), then too the invariable concomitance fails. If you hold that the Brahman is beyond cognition and so it never possesses dṛśyatvam, whatever be its definition, then Brahman would be non-existing just as the horns of a hare. If any form of dṛśyatvam is accepted in Brahman, then it would become illusory like silver seen in place of a seashell.

If dṛśyatvam refers to being the object of Consciousness that is limited by modifications of the mind (vṛtti), then it would never cease as vṛtti, which is non self-manifesting, cannot cause the manifestation of Brahman. If vṛtti was capable of causing manifestation then, since it can directly cause the manifestation of the Universe, there is no need to accept that it is the object of Consciousness and hence the

above inference would be rendered unsound since the middle term (hetu) itself is not present in the minor term (pakṣa) causing svarūpāsiddhi. Also, since the Universe being the object of cognition is sufficient for all practical purposes, there is no pramāṇa to establish the existence of vṛtti. If dṛśyatvam merely refers to the quality of being imagined (adhyasta) on Brahman (dṛk) then, since this is true for all object in the Universe at all times, they should all manifest always which is not the case in reality. If this argument was refined saying that the connection of being cognition and cognized (viṣayaviṣayibhāva) requires a special instrumental cause then, since it is no more the cause for imagination (adhyāsa), it cannot establish the major term anymore. Also, since the viṣayaviṣayibhāva can be explained by the connection between the senses and the object, there is no evidence to support the assumption of imagination (adhyāsa).

In addition to this, the inferences mentioned above lack a sound example (dṛṣṭānta) too since it can be said that real silver present elsewhere is cognized in place of a seashell due to a defect (doṣa) and so there is no need to accept the existence of an imagined (anirvacanīya) silver in this situation. It cannot be questioned how silver that is not in connection with the senses is the object of sensory perception since, to avoid complexity of the argument, it is accepted that a connection (sannikarṣa) between the substrate (viśeṣya) and the senses is sufficient for sensory perception and that the connection between the attribute (viśeṣaṇa) and the senses is not required. The perception of a person wearing earrings that are hidden by a turban can be avoided by stating that the earring too is a substrate (viśeṣya) in this case and there is no connection of the senses with it or that the connection between the senses and the substrate limited by the attribute (viśeṣaṇāvacchinnaviśeṣya), which is not present here, is required for wordly sensory perception. This does not raise the possibility that fire atop a mountain could be cognized by sensory perception too, as the causes (sāmagrī) for inference are more powerful than those of sensory perception and so inference surely arises. If the connection between the senses and attributes was also

required then even colourful pots present far off would have to be cognized since the connection exists with them too. Therefore, there is no such object known as 'imagined silver' (anirvacanīyarajata) or śuktirūpya.

The illusory nature of the Universe cannot be established using Vedic passages too, since that would cause numerous Vedic passages that talk about dualism to be invalid. Therefore, since some Vedic verses show that all sentient and non-sentient entities in this universe are the form (śarīram) of Brahman, verses such as "neha nānāsti kiñcana" can only intend to refute the existence of sentient or non-sentient entities that are not the form of Brahman, i.e. that don't have Brahman residing within them as the controller. Therefore, it is evident that the Universe is indeed real.

## (2) Real distinction between the Jīva and Brahman

Advaitins say that the Jīva and Brahman are one and the same. This too is false as there is no evidence to support it. Firstly, none in this Universe possesses sensory perception that he is Brahman ('aham īśvaraḥ'). Also, there is no indicator (liṅgam) that can establish that the Jīva is Brahman. Even the Vedic verse "idaṁ brahma idaṁ kṣatram ime lokāḥ ime devā imāni bhūtāni idaṁ sarvaṁ yadayamātmā" does not propound the oneness of Jīva and Brahman. If the congruence (sāmānādhikaraṇyam) here intends to refute the existince of the imagined object and show that only the substrate is true (bādārthasāmānādhikaraṇyam), then the existence of the Jīva too would be refuted just as that of the non-sentient objects and there would be no Jīva to establish as being one with Brahman. If the congruence here intends to show oneness (abhedārthasāmānādhikaraṇyam), then non-sentient entities too would have to be one with Brahman, which is against the Advaita philosophy. Therefore, it must be accepted that the words here denoting sentient and non-sentient entities actually refer to the Supreme Being who possesses these as His form and so the congruence here intends to show the association between the universe and Brahman as the one between a body and a

soul. Other similar Vedic passages too must be interpreted in the same way. Therefore, the distinction between the Jīva and Brahman, which is evident from several pramāṇas like sensory perception, cannot be disproved. The perception 'I am not Brahman' indeed has as its object the distinction between Jīva and Brahman. Since the absence of cognition (anupalabdhi), that possesses the eligibility (yogyatā) that it has as its counterpart something that can be assumed by the assumption that its counterpart exists (pratiyogisattvaprasañjanaprasañjitapratiyogikatvam), is the cause for the cognition of a negation, it does not matter even if the counterpart itself, which is Brahman here, is not perceivable by the senses.

The Vedas too preach the distinction between Jīva and Brahman in verses such as —

*"dvā suparṇā sayujā sakhāyā samānaṁ vṛkṣaṁ pariṣasvajāte/*
*tayoranyaḥ pippalaṁ svādvatti anaśnannanyo abhicākaśīti// ".*

## (3) Distinction between the Soul and the Ahamartha

The Advaitins claim that the ahamartha, i.e., the object of the cognition 'aham', is the Mind (antaḥkaraṇam) and not the Soul, since the ahamartha is absent during the states of deep sleep (suṣupti) and salvation (mukti) but the Soul continues to exist. If ahamartha was the Soul, then it would have to continue always since the Soul is eternal. This too is unsound as this would contradict with cognitions of the forms "aham jānāmi", "aham karomi" and "aham sukhāmanubhavāmi" that grasp the Soul as the knower (jñātā), doer (kartā) and enjoyer (bhoktā), since the Mind which is non-sentient cannot be the abode of knowledge. It also cannot be said that Consciousness limited by the antaḥkaraṇam (antaḥkaraṇāvacchinnacaitanyam) is the ahamartha, since conceiving (kalpanam) this quality in the viśeṣya (consciousness or caitanya) alone is easier than conceiving it in a joint entity (viśiṣṭa). Therefore the Soul is indeed the object of cognition of the form 'aham'. The continuance of the ahamartha during deep sleep and salvation is also desirable to us. Without this, the recollection of the self of the form 'I slept soundly

(sukhamahamasvāpsam)' by one who just woke up would not be possible. Also, in the Vedic verse "nāha khalvayamevaṁ sampratyātmānaṁ jānāti ayamahamasmīti", the word 'ayam' could not be used if the ahamartha did not continue to manifest during deep sleep (suṣupti). Therefore, this verse means that, during sleep, a person does not perceive himself as one possessing attributes such at manuṣyatva, but just as 'aham' or 'I'. Similarly, manifestation of the ahamartha after salvation is also evident from Vedic verses such as "kaściddhavā asmāllokāt pretya, ātmānaṁ veda, ayamahamasmīti, atha yo hai vaitamagniṁ sāvitraṁ veda, sa evāsmāllokāt pretya ātmani veda, ayamahamasmīti".

The argument that the ahamartha (object of cognition of the form 'aham' or 'I') is none other than the ahaṅkāra-tattva since they are both denoted by the same word is flawed too because, by the same logic, Consciousness (caitanyam) too would be none other than the mahat-tattva since they are both denoted by the word 'buddhi'. If a question is raised that the mahat-tattva is known as 'buddhi' just because it is the cause for 'resolve' (adhyavasāya) and so cannot be one with caitanyam, then similarly, the ahaṅkāra-tattva too is called so by its nature to cause the erroneous perception that things other than the self, like the body, are the self itself, and so need not be one with the ahamartha. The conception (kalpanam) of the distinction between the Soul and the ahaṅkāra—tattva too is not a great burden, since it is supported by the strong evidence that the Soul is capable of producing a variety of effects such as pleasure and sorrow while the ahaṅkāra-tattva isn't. In truth, a heavy burden lies in the Advaita philosophy due to the baseless conceptions of concepts such as the Soul and antaḥkaraṇam both being the ahamartha, the non-distinction of the Souls, distinction being due to the antaḥkaraṇam and the invalidity of the perception of distinction.

However, when the Soul is taken as the ahamartha, then the cognition 'I perceive myself (māmahaṁ jānāmi)' can be easily explained using the self-manifesting nature of the Soul or by it being the object of another perception, since the association of

viṣayaviṣayibhāva can exist without the need for distinction also.

The Vedic verse "svamapīto bhavati" too refers to the shrinking of the Soul's knowledge alone and not destruction of the Soul during deep sleep, since the Soul is said to be eternal. The Advaitins' claim that the antaḥkaraṇam continues in a subtle form during deep sleep deosn't hold water either. If it manifests during deep sleep, then one should be able to recolllect it after waking up. If it doesn't manifest at all, then it follows that it is not imagined (adhyasta) at all and hence cannot exist. The verse "asadvā idamagra āsīt" too does not indicate that the antaḥkaraṇam continues in a subtle form as it merely refers to the absence of the caused state (kāryāvasthā). Moreover, if the Soul isnt the ahamartha, then emancipated souls and God should not have consciousness of themselves (ahambuddhi). Therefore is can be concluded that the Soul is indeed the ahamartha

### (4) Incapability of sentences to cause non-fragmented perception (akhaṇḍārthabodha)

The claim of the Advaitins that verses such as "satyaṁ jñānamanantaṁ brahma" and "tattvamasi" are capable of producing non-fragmented cognition (akhaṇḍārthabodha) of Consciousness alone is defective too, since all sentences in the world and in the Vedas have been seen to cause cognition of the association (saṁsarga) between the meanings of the individual words present in the sentence. If this law is disregarded, then even verses preaching Karma like jyotiṣṭoma could also be about the entity (svarūpam) alone causing the undoing of all vedic rituals. It also cannot be said that only sentences containing congruence (sāmānādhikaraṇyam) are about the entity alone and not others, since there is no logic to make such a distinction. Therefore, only this much is understood by study of worldly experiences that in sentences involving congruence (sāmānādhikaraṇyam), the association (saṁsarga) between the meanings of the individual words is oneness (abheda) and in other sentences it could be any association.

The intent of sāmānādhikaraṇyam is in just preaching the oneness of the entity (viśeṣya) which is associated with many attributes (viśeṣaṇa). Otherwise, since a single word is sufficient to preach an entity (svarūpam) alone, other words in the sentence would be rendered useless. The Advaitins argue that even though the entity can be preached by a single word, each word in a sentence denotes the object as being distinct from objects that do not posses the quality that that word is known to refer to, i.e. the word 'satya' in "satyaṁ jñānamanantaṁ brahma" denotes the entity Brahman as one that is distinct from everything that is 'asatya' or 'transient' and so on. However, this isnt a way out as the word 'ananta' alone is capable of preaching Brahman's distinction from all other entities in this universe, rendering other words still useless. Similarly, if sentences created non-fragmented cognition (akhaṇḍārthabodha), then they would lose their yogyatā (eligibility), which is nothing but the absence of contradiction (bādha) to the association (saṁsarga) that they preach, since they don't preach an association anymore. Moreover, there would no more be a distinction between what is referred to (uddeśya) and what is enjoined (vidheya) in the sentence since that which is prior known becomes the uddeśya and that which is prior unknown become the vidheya and the single pure entity (svarūpam) that is preached by this sentence cannot be both known and unknown prior to this verbal testimony.

As a last resort, the Advaitins put forth the following inference to establish that sentences can cause non-fragmented cognition (akhaṇḍārthabodha) – The sentence "satyaṁ jñānamanantaṁ brahma" is capable of causing akhaṇḍārthabodha since it is a sentence which defines something (lakṣaṇavākyam), just like the sentence 'prakṛṣṭaprakāśaścandraḥ' (the one that is greatly luminous is the moon).

Here we must ask – what do you mean by the phrase 'a sentence that defines' (lakṣaṇavākyam)? If it means that the sentence creates cognition of an entity (svarūpam) along with its unique distinguishing attribute, then it immediately follows that the perception born from

the sentence is fragmented (sakhaṇḍa) since it has as its object the entity and its unique attribute and not the entity alone. If it means that the sentence creates cognition of the entity (svarūpam) alone, then the middle term (reason) is no different from the major term (sādhya) as it has not been established before. This fallacy in inference is known as sādhyāviśeṣa. If it means that the sentence creates cognition of the unique distinguishing attribute alone, then it is no more about the entity at all, which is unacceptable.

In addition to this, the example cited by the Advaitin is baseless too. The sentence 'prakṛṣṭaprakāśaścandraḥ' is the response to the question 'Which among these luminous objects in the sky is the moon?'. Therefore, this question is not about the entity (svarūpam) itself, since the entity has already been perceived by the senses (eyes in this case). It may be argued that the sensory perception of the moon is not a resolve (avadhāraṇa) and so is incapable of removing doubt and so this question can be about the entity (svarūpam) itself, but this too is illogical as sensory perception beholds the moon as the one with a round shape, a blemish and great luminosity and so cannot not be firm resolve (avadhāraṇa). Otherwise, since the cognition born from hearing the answer 'prakṛṣṭaprakāśaścandraḥ' would also not be a resolve as it cognizes nothing additional from the initial sensory perception. Therefore, as the moon entity (svarūpam) has been cognized, the question here is about which of these stars is denoted by the word 'Moon'. That is exactly why a follow up question of the form 'Who is Soma (kaḥ somaḥ)' is also possible.

Furthermore, congruence (sāmānādhikaraṇyam) is the nature of words which denote different attributes to refer to one entity ("bhinnapravṛttinimittānāṁ śabdānām ekasmin arthe vṛttiḥ sāmānādhikaraṇyam"). This is possible only when the words constituting a sentence denote different attributes.

In the phrase 'tattvamasi', both the words 'tat' and 'tvam' refer to the Supreme Being and so congruence is possible. The word 'tvam' refers to the Brahman by the law that all words that denote a form (śarīram) denote the soul within (śarīri) also. The Jīva is indeed the

form of Brahman as preached in the verses such as "yasyātmA śarīram". The speech in the second person (madhyamapuruṣa) can also be reconciled using the grammatical rule "yuṣmadyupapade samānādhikaraṇe sthāninyapi madhyamaḥ". Therefore, sentences are capable of causing fragmented cognition (saviśeṣavastubodha) only and not non-fragmented cognition (akhaṇḍārthabodha).

This is the summary of the Advaitavidyāvijaya.

## A Summary of the Parikaravijaya

The first part of this text deals with establishing that bearing the brands of the divine conch and discus (taptamudrādhāraṇa) is Dharma, i.e. sanctioned by the Vedas. This is established using pramāṇas such as the Vedas, Smṛtis, Purāṇas and Pāñcarātra.

Of the Vedas that are available to us today, the śatapatha mentions taptamudrādhāraṇa in the passage *"atha kātyāyanaḥ papraccha/ yājñavalkya iti hovācca - paraṁ brahmetyeko devo viśvataścakṣuruta viśvātmā viśvatobāhuruta eṣa puruṣontaryāmontaryāmassa viśvatomukhassarvātmā viśvataspāditi/ nārāyaṇādbrahmā jāyate nārāyaṇādrudro jāyate iti/ saṁ bāhubhyāṁ namati saṁ patatrairdyāvāpṛthivī janayandeva ekaḥ/ puruṣontaryāmontaryāmiḥ/ sa ādityatejo bhavati/ taptaṁ cakraṁ dvibhuje dhāryamityagnihotrameva loko bhavatyūrdhvapuṇḍramālikhet tasmāt dvirekhaṁ bhavati/ bhūssvayaṁbhūrbrahmaṇassāyujyaṁ salokatāṁ jayati ya evaṁ veda".*

The verse – "pavitraṁ te vitataṁ brahmaṇaspate prabhurgātrāṇi paryeṣi viśvataḥ ataptatanūrna tadāmo aśnute śṛtāsa idvahantastatsamāśata" is present in all the three Vedas and testifies to the validity of this practice. In this verse, the word 'pavitra' denotes the cleanser and rescuer by its avayavaśakti and denotes sudarśana by its rūḍhiśakti. Therefore it is a yogarūḍha word. The nighaṇṭu also supports this by the verse—

*"sudarśanam sahasrāraṁ pavitraṁ caraṇaṁ paviḥ/*
*sudarśanaṁ hareścakram pavitraṁ caraṇaṁ paviḥ //".*

That is why the word 'caraṇa' also refers to Sudarśana.

The kāṭhaka of the yajurveda contains the verse —

*"caraṇaṁ pavitraṁ vitataṁ purāṇam/*
*yena pūtastarati duṣkṛtāni/*
*tena pavitreṇa śuddhena pūtāḥ/*
*ati pāpmānamaratiṁ tarema/*
*lokasya dvāramarcimatpavitram/*
*jyotiṣmadbhrājamānaṁ mahasvat/*
*amṛtasya dhārā bahudhā dohamānam/*
*caraṇaṁ no loke sudhitāṁ dadhātu//".*

The ṛgveda and sāmaveda read – "camūṣacchyenaśśakuno bibhṛtvā govindurdrapsa āyudhāni bibhrat/ apāmūrmiṁ sacamānassamudraṁ turīraṁ dhāma mahiṣo vivakti".

In the khila portions of the ṛgveda is present the verse "cakraṁ bibharti vapuṣā abhitaptaṁ balaṁ devānāmamṛtasya viṣṇoḥ/ sa eti nākaṁ duritā vidhūya prayānti yadyatayo vītarāgāḥ".

Similarly, in the pratiṣṭhādhyāya of the pārameśvarasaṁhitā, the portion about cakrapratiṣṭhā reads –

*"tattatsthāpanakāle tu tattatsaṁjñān manan japet/*
*vidyāṅgatāmityādyaṁ yat pāṭhayet tadvido janān//*
*camūṣacchyena iti ca prate viṣṇo iti tṛcau/*
*pāṭhayet bahvṛcān paścāt śākunaṁ sūktameva ca//*
*dhṛtordhvapuṇḍraḥ kṛtacakreti mantraṁ tataḥ param/*
*pavitraṁ te vitatamityetanmantraṁ yajurmayān//*
*kṣurohareti sāmajñān pavitramityagnirityapi/*
*ebhirayamurukramasya ityātharvaṇān dvijān//*
*evaṁ sambhāṣya vidhivat navabhiḥ kalaśaistataḥ/*
*snāpayet brahmasūktasthairmantrairaṣṭābhireva ca//"*

This clearly shows that these mantras talk about sudarśana.

Similarly, the mahābhārata reads —

*"nānyadevaṁ namaskuryāt nānyaṁ devaṁ nirīkṣayet/*
*cakrāṅkitassadā tiṣṭhet madbhaktaḥ pāṇḍunandana//";*

the āgneya purāṇa reads —

*"pañcāyudhāni dhāryāṇi bhaktiśraddhopabṛṁhitaiḥ/*

*lalāṭe mūrdhni hṛdbāhorekaikañca pṛthak pṛthak//";*

the vārāha purāṇa reads —

*"maccakrāṅkitadeho yo madbhakto bhuvi durlabhaḥ/*
*māmupaiṣyati dharmātmā madekāntena cetasā//";*

the skānda purāṇa reads —

*"yeṣāṁ cakrāṅkitaṁ gātraṁ lokeṣu paridṛśyate/*
*te vai svargasya netāro brāhmaṇā bhuvi devatāḥ//";*

All these show the validity of bearing the brands of Nārāyaṇā's divine conch and discus.

The next part of the Parikaravijaya text establishes the sanctity and validity of bearing vertical sectarian marks (ūrdhvapuṇḍra) by quoting passages from the Vedas and Smṛtis.

The mahopaniṣad says —

*"dhṛtordhvapuṇḍraḥ parameśitāraṁ nārāyaṇaṁ sāṅkhyayogādigamyam/*
*jñātvā vimucyeta narassamastaiḥ saṁsārabhārairiha ceti viṣṇum//";*

the ātharvaṇa reads —

"hareḥ pādākṛtimātmane hitāya madhyecchviḍhramūrdhvapuṇḍraṁ yo dhārayati sa parasya priyo bhavati sa puṇyavān bhavati sa muktibhāgbhavati";

the bodhāyanasmṛti contains the verse—

*"pūjādisamaye sāyamprātaḥ samāhitaḥ/*
*ūrdhvapuṇḍradharo vipro bhavet śūdro na cānyathā//";*

similarly the śātātapasmṛti reads —

*"yaccharīraṁ manuṣyāṇāmūrdhvapuṇḍravinākṛtam/*
*draṣṭavyo naiva taddehaḥ śmaśānasadṛśo hi saḥ//";*

the parāśarasmṛti contains—

*"nirūrdhvapuṇḍrastu bhavet na kadācidapi dvijaḥ/*
*vaiṣṇavaścet viśeṣeṇa sarvakarmāṇi sorhati//";*

Thus, it is evident that bearing vertical sectarian marks is enjoined by the Vedas.

Those passages that superficially seem to be opposing the bearing of vertical sectarian marks actually intend to preach that ūrdhvapuṇḍra in the shape of a triśūla should not be born or that the ūrdhvapuṇḍra should never be borne by a traivarṇika without reciting the Vedic mantra "uddhṛtāsiḥ".

However there could arise the question that when the Pāñcarātra itself cannot be considered as a means of valid knowledge (pramāṇa), how could the bearing of the conch and discus brands that it preaches be valid?

The answer to this is as follows – Since the Pāñcarātra was authored by Nārāyaṇa Himself who is beyond any delusion and is omniscient, the Pāñcarātra is indeed the work of a well-wisher (āpta) and hence is pramāṇa. The facts that Nārāyaṇa is beyond delusions and that He is omniscient are evident in passages such as "kāraṇarūpamekākāraṁ parabrahma śokamohavinirmuktaṁ viṣṇuṁ dhyāyanna sīdati" and *"vedāhaṁ samatītāni vartamānāni cārjuna / bhaviṣyāṇi ca bhūtāni māṁ tu veda na kaścana//"*. The verse "pañcarātrasya kṛtsnasya vaktā nārāyaṇaḥ svayam" establishes that it was indeed Nārāyaṇa who preached the Pāñcarātra.

Just as the eternal Vedas are something referred to by names such as kāṭhaka, and just as from the Mahābhārata composed entirely by Veda Vyāsa, a specific portion is titled vaiśaṁpāyanasaṁhitā, so is the Pāñcarātra said to be composed by ṛṣis in the text mokṣadharma, simply because they were great advocates of the Pāñcarātra. This does not negate the fact that the Pāñcarātra was first composed and preached by Nārāyaṇa.

Questions of validity of the Pāñcarātra that arise due to it preaching certain concepts that contradict the Vedas such as the creation of a jīvātman have been elaborately answered in Svāmi Rāmānuja's commentary on the Brahma sūtras, titled Śrībhāṣyam, and in this text.

The validity of the Pāñcarātra is evident from other Smṛtis, Itihāsas and Purāṇas.

For example, yājñavalkya quotes the Pāñcarātra to bolster an argument of his—

*"oṅkārarathamāruhya manaḥ kṛtvā tu sārathim/*
*brahmalokapadānveṣī yāti viṣṇoḥ paraṁ padam//*
*pāñcarātre tathā hyeṣa bhagavadvācakassmṛtaḥ/*
*jñānaiśvarye tathā tejastrimātreti ca saṁjñitaḥ//*
*jñānaiśvaryaṁ tathā śaktistrisvabhāva iti smṛtaḥ/*
*saṅkarṣaṇotha pradyumno hyaniruddhastathaiva ca//*
*te vyūha iti nirdiṣṭa oṅkāro viṣṇuravyayaḥ/".*

The jamadagnismṛti reads —

*"vaidikena vidhānena pūjāṁ kuryāddharestataḥ/*
*alābhe vedamantrāṇāṁ pāñcarātroditena vā//";*

the uttararāmāyaṇa contains the verse—

*"purāṇaiśca vedaiśca pāñcarātraistathaiva ca/*
*dhyāyanti yogino nityaṁ kratubhiśca yajanti tam//";*

the mahābhārata contains the passage—

*"brāhmaṇaiḥ kṣatriyairvaiśyaiḥ śūdraiśca kṛtalakṣaṇaiḥ/*
*arcanīyaśca sevyaśca nityayuktaissvakarmasu//*
*sāttvataṁ vidhimāsthāya gītaḥ............ya/";*

the akrūrapancamāṁśa of the Viṣṇupurāṇa reads—

*"yajvābhiryajñapuruṣo vāsudevaśca sāttvataiḥ/*
*vedāntavedibhirviṣṇuḥ procyate yo natosmi tam//";*

Therefore, it is established beyond doubt that the Pāñcarātra is indeed a pramāṇa.

The final part of Parikaravijaya elaborately shows the glory of the devotees of Nārāyaṇa (Bhāgavatas).

The Parāśarasmṛti says —

*"sahasravārṣikī pūjā viṣṇorbhagavato hareḥ/*
*sakṛdbhāgavatārcāyāḥ kalāṁ nārhati ṣoḍaśīm//*
*yathā tuṣyati deveśo mahābhāgavatārcanāt/*
*tathā ca tuṣyati hariḥ vidhivatsvārcanādapi//*
*sakṛtsampūjite puṇye mahābhāgavate gṛhe/*

*ākalpakoṭipitaraḥ paritṛptā na saṁśayaḥ//";*

The Śāṇḍilyasmṛti reads—

*"tathā svārādhanenāpi na prīto bhagavān hariḥ/*
*yathā bhāgavataśreṣṭhapādāmburuhasevanāt//*
*suvarṇāṅgāṁ guṇavatīṁ bhūmiṁ vṛddhikarīmapi/*
*dadyāt bhāgavatāgryebhyo bhogamokṣāptaye sudhīḥ//";*

The Mahābhārata contains the verse—

*"patraṁ vāpyathavā puṣpaṁ phalaṁ vāpyanyadeva vā/*
*dadāti mama śūdropi śirasā dhārayāmi tam//";*

Lord Kṛṣṇa himself says in the Bhagavadgītā—

*"bahūnāṁ janmanāmante jñānavān māṁ prapadyate/*
*vāsudevaḥ sarvamiti sa mahātmā sudurlabhaḥ//".*

All these passages proclaim the glory of great Bhāgavatas.

Thus, the contents of the Parikaravijaya were summarized succinctly.

I express deep sense of gratitude to Vidwan Shri Velukkudi K. Ranganathan for this wonderful English version of the Introduction.

**॥श्रीः॥**

**॥श्रीमते रामानुजाय नमः॥**

# उपोद्घातः

समोदमद्येदमावेद्यते यत् दोड्डयाचार्यापरनामधेयेन 'चण्डमारुत'श्रीमहाचार्येन विरचितो वेदान्तविजयो नाम ग्रन्थतल्लजः सम्मुद्र्य प्राकाश्यं नीयते। आचार्यवयोऽयं भगवद्रामानुजप्रियभागिनेयस्य 'मुदलियाण्डान्' इति प्रसिद्धिं गतस्य श्रीदाशरथेः वंशे द्वादशः पुरुषः। 'तोळप्परप्पै' नाम्नः आचार्यस्य पौत्रः देवराजाचार्यस्य च द्वितीयस्तनयोऽसौ चोलसिंहपुरक्षेत्रसमीपवर्तिनि 'एरुम्बि' नामके ग्रामे शुभकृद्वर्षे (1543) कुम्भमासि मीनलग्ने उत्तराषाढानक्षत्रे जनिं लेभे। यदुक्तम्-

**सर्वसिद्धित्रयोदश्यां लग्ने वेदप्रदाह्वये।**
**जातं कुम्भोत्तराषाढे महाचार्यमहं भजे॥** इति।

निजवंशाभिवृद्धिं कामयमानस्य पितृव्यस्य श्रीनिवासाचार्यस्य स्वीकृतपुत्रः संवृत्तोऽसौ महाचार्यः काले उपनीतः तत्सकाशादधिगतसकलवेदशास्त्रार्थः, तत्कृपालब्धसर्वस्वः तदेकदैवतः, तच्चरणपरिचरणपरायणः, उभयवेदान्तकाननसञ्चरणनिपुणपञ्चाननो बभौ।

**महाचार्यस्य अर्चानुभवपरायणता**

आचार्योऽसौ श्रीनृसिंहभक्तो बभूव। श्रीशतदूषण्याः व्याख्याने चण्डमारुताख्ये श्रीनृसिंहमन्त्रार्थानुसन्धानरूपं मङ्गलपद्यं व्यरचि। तद्यथा-

**विश्वं विभ्रति वीर्यखण्डितमहादैत्ये समस्तात्मनि**
**ज्योतिर्मण्डलभासितत्रिभुवने सर्वं स्वतो द्रष्टरि।**
**अस्तु श्रीनृहरौ स्वभीतिविहितस्वाज्ञानिलार्कानले**
**श्रीमत्याश्रितमृत्युभङ्गचतुरे धीर्मे सदा ब्रह्मणि॥** इति।

पुरा घटिकाचलक्षेत्रे लक्ष्मीतीर्थस्योत्तरे भागे वराहतीर्थस्य पश्चिमे भागे अद्य गोपुरमात्रावशेषे शिथिले मन्दिरे विराजमानस्य श्रीयोगनृसिंहस्य उत्सवमूर्तिः श्रीभक्तोचितस्वामी तुरुष्कयवनादिभीत्या

तादात्विकैरास्तिकैःक्वाप्यन्तरधापि। गच्छता कालेन तं स्थलविशेषमजानद्भिः उत्सवमूर्त्या चिरविरहितं देवालयमायमालोक्य खिन्नमानसैः महद्भिः प्रार्थितः दोड्डयाचार्यः स्वयं च दुर्दशामिमां दूरीकर्तुकामः श्रीसुदर्शनानुग्रहबलेन स्वप्ने सन्दृष्टोत्सवमूर्तिस्थलविशेषः परेद्यवि तदादर्शितपथसञ्चरणेन तं देशमभ्येत्य श्रीभूसमेतं भक्तोचितं समीक्ष्य अलभ्यलाभेनानेन आनन्दभरितान्तरङ्गः पुनस्तं देवालये यथाविधि प्रत्यतिष्ठिपदिति श्रूयते। चोलसिंहपुरस्थिते बृहत्पर्वताधिरोहणार्थोपकल्पितसोपानमार्गे द्वितीये मण्डपे एकस्यां स्थूणायां साञ्जलिबन्धं स्थितो महाचार्यविग्रहः, तत्पुरस्स्थितशिलायां श्रीसुदर्शनस्य स्वयंव्यक्तविग्रहश्चाद्यापि परिदृश्यमानौ वृत्तान्तेऽस्मिन् साक्ष्यमावहत इव।

काञ्चीमण्डलस्य तदातनशासकेन अच्युतदेवेन महाचार्यप्रभावाकृष्टेन दत्ते ग्रामे श्रीकेशवस्य देवालयं सगोपुरविमानमण्डपप्राकारं सुन्दरं निरमिमीत। तदेव क्षेत्रं घटिकाचलनाम्ना पुराणप्रथितं दिव्यसूरिभिरीडितमाचार्यवरैश्च बहुभिरध्युषितं चोलसिंहपुरमित्याख्यं सकललोकसेव्यं वरीवर्ति।

काञ्चीक्षेत्रे पद्मयोनिना निजकृततुरगसवनवेद्यामाविर्भूतस्य द्विरदशिखरिनाथस्य परिकल्पिते अत एव चान्वर्थनामधेये ब्रह्मोत्सवे 'तुरगविहगराजस्यन्दनान्दोलिकादिष्वधिकमधिकमन्यामात्मशोभां दधानम्।

अनवधिकविभूतिं हस्तिशैलेश्वरं त्वाम् अनुदिनमनिमेषैर्लोचनैर्निर्विशेयम्?' इत्युक्तरीत्या प्रतिसंवत्सरमन्वित्य भगवदनुभवपरीवाहपरम्परापरवशीकृतस्वान्ते आचार्ये सति, हायने कस्मिंश्चित् कुतश्चित्कारणतः तत्रोत्सवे गन्तुमशक्तस्याचार्यस्य मनो भृशमभवत् खिन्नम्। तृतीये ब्रह्मोत्सवदिवसे ब्राह्मे मुहूर्ते उत्थाय चोलसिंहपुरस्थे ब्रह्मतीर्थे स्नानं विदधदाचार्यो देवाधिराजस्य गरुडवाहनारूढस्य सेवासौभाग्यरहितस्यात्मनः मन्दभाग्यतानुसन्धानेन सुदुःखितो देवराजस्योत्सवमेवाध्यायत्। हन्त ! वरदोऽप्याश्रितपरतन्त्रः तटाकतीरे स्थितमाचार्यं गरुडवाहनस्थितस्य स्वस्य साक्षात्कारप्रदानेन कृतार्थमकरोत्। महाचार्येण भक्तिपारवश्येन देवराजस्य मङ्गलाशासनं श्लोकपञ्चकेन कृतमिति सर्वजनविदितोऽयं वृत्तान्तः। यदद्यापि ब्रह्मोत्सवे तृतीयदिने अरुणोदयकाले काञ्च्यां वरदो गरुडारूढो गोपुरद्वारं प्रविशन् कञ्चित्कालं तत्रैवावस्थाय चोलसिंहपुरस्थाय दोड्डयाचार्याय सेवाभाग्यं कल्पयन्निव भक्तजनौघसेव्यो विलसति, तन्नूनमैतिह्यमदसीयमिदं पुष्यति।

**महाचार्यग्रन्थपरिचयः**

कवितार्किकसिंहेषु सर्वतन्त्रस्वतन्त्रेषु श्रीमद्वेदान्तदेशिकचरणेषु अप्रकम्प्यां भक्तिं बिभ्राणः महाचार्यः शाङ्कराद्वैतसिद्धान्तशातनपटीयस्याः शतदूषण्याः चण्डमारुतनाम्ना विस्तृतं व्याख्यानं प्राणैषीद्येन चण्डमारुतेत्युपनाम्ना स आचार्यः प्रथतेऽद्यापि। पाराशर्यविजये - ब्रह्ममीमांसाशास्त्रस्य द्वैतविषयत्वम्, शुद्धाद्वैतविषयत्वं च तत्तद्वाद्यभिमतं निरस्य विशिष्टाद्वैतविषयत्वं वेदान्त्यभिप्रेतं व्यवस्थापितम्।

उपनिषन्मङ्गलदीपिका - उपनिषदां व्याख्या न प्रकाशिता।

वेदान्तदेशिकवैभवप्रकाशिकाख्यः पद्यमयग्रन्थः महाचार्यस्य श्रीवेदान्तदेशिकचरणेषु स्थितां भक्तिं प्रकटयति। अभिहितं हि तत्र —

**देशिको निगमान्तार्यात् तद्भक्तात्सात्त्विको जनः।**
**तत्सूक्तेश्च प्रबन्धो यो नास्ति नास्ति महीतले॥** इति।

वेदान्तविजयाभिधानः गुरुशरीरो ग्रन्थः भगवद्रामानुजसिद्धान्तप्रतिष्ठापनपरः प्रौढयुक्तिजालगर्भः पञ्चाध्यायघटितः चकास्ति। ते च पञ्च (1) गुरूपसदनविजयः, (2) ब्रह्मविद्याविजयः, (3) सद्विद्याविजयः, (4) अद्वैतविद्याविजयः, (5) परिकरविजयश्चेति।

**वेदान्तविजयप्रमेयसङ्ग्रहः**

गुरूपसदनविजयः, ब्रह्मविद्याविजयः, अद्वैतविद्याविजयः, सद्विद्याविजयः, परिकरविजयः इति पञ्चभिः भागैः ग्रथितोऽयं वेदान्तविजयो नाम ग्रन्थतल्लजः। तत्र आद्ये गुरूपसदनविजये 'स्वाध्यायोऽध्येतव्यः' इत्यध्ययनविधिविहितेन अक्षरराशिविशेषग्रहणात्मकाध्ययनेन गृहीतात् स्वाध्यायात् आपततः अवगम्यमानान् प्रयोजनवतोऽर्थान् दृष्ट्वा अङ्गाङ्गिनिर्णयाय अधीतवेदस्य पुरुषस्य वेदवाक्यविचाररूपमीमांसाश्रवणे विधिमन्तरेण स्वयं प्रवर्तमानस्य गुरूपसदननियमविधायकं यत् 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन, तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इति वचनम् तदर्थविचारः प्राधान्येन कृतः। तदर्थनिर्णयोपयोगितया श्रवणस्य विधेयत्वासम्भवः, शब्दस्यापरोक्षज्ञानहेतुत्वायोगः, नित्यानित्यवस्तुविवेकः इहामुत्रफलभोगविरागः शमदमादिसाधनसम्पत् मुमुक्षा चेति साधनचतुष्टयस्य ब्रह्मविचारपूर्ववृत्तत्वासम्भवः, 'अथातो धर्मजिज्ञासे'त्यारभ्य 'अनावृत्तिश्शब्दादनावृत्तिश्शब्दात्' इत्येवमन्तस्य कर्मब्रह्ममीमांसाशास्त्रस्यैकप्रबन्ध्यम्, कर्मविचारानन्तरं कर्मानुष्ठानेन शुद्धान्तःकरणस्य पुरुषस्य कर्मफलानित्यत्वपरीक्षा भवतीति वादस्यायुक्तत्वम्, ब्रह्मणोऽवेद्यत्वासम्भवः, निर्विशेषस्य जिज्ञासाविषयतादौर्घट्यम्, देवतान्तराणामुपास्यत्वासम्भवः, सर्वशब्दवाच्यब्रह्मणोऽवाच्यत्वायोगश्च निरूपिताः। सर्वमिदं गुरूपसदननियमविधिलभ्यमिति च निरणायि।

द्वितीये ब्रह्मविद्याविजये श्रीमन्नारायणातिरिक्तायाः देवतायाः परविद्यावेद्यत्वं सामान्यतो निषिध्य अन्तरादित्यविद्यायाम्, अन्तरक्षिविद्यायाम्, दहरविद्यायाम् च विशेषतोऽपि वेद्यत्वाभावः स्थापितः।

तृतीये सद्विद्याविजये सप्तभिः परिच्छेदैः अद्वैतमते दूषणानि अभ्यधायिषत। भावरूपाज्ञानप्रमाणभङ्गः, तिरोधानभङ्गः, अविद्याश्रयभङ्गः, अविद्यालक्षणभङ्गः, अविद्याप्रकाशभङ्गः, अविद्यानिवर्तकभङ्गः, अविद्यानिवृत्तभिङ्गः इत्येवमन्वर्थसमाख्यावन्तस्ते परिच्छेदाः।

तुरीये अद्वैतविद्याविजये सर्वेषामौपनिषदवचनानां चिदचित्प्रकारे ब्रह्मणि तात्पर्यव्यवस्थापनाय द्वैताद्वैतघटकश्रुतीनां प्रतिपाद्यविवेचनं कृतम्। 'पृथगात्मानं प्रेरितारं च मत्वा,' 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्', 'द्वा सुपर्णा सयुजा सखाया' इत्यादिश्रुत्तिभिः चिदचिदीश्वरभेदप्रतिपादनेन भेदे सिद्धे 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्', 'नेह नानास्ति किञ्चन', 'तत्त्वमसि' इत्यादीनामद्वैतश्रुतीनाम् 'यस्य पृथिवी शरीरम्', 'यस्यापः शरीरम्', 'यस्यात्मा शरीरम्' इत्यादिघटकश्रुत्यवगतशरीरशरीरिभावाविरोधेन समस्तचेतनाचेतनशरीरब्रह्मैक्यपरत्वमेव एष्टव्यम् इति। प्रत्यज्ञायि चादौ

'द्वैतोपनिषदा सार्धं श्रुतयोऽद्वैतगोचराः। घटकश्रुतिसंयुक्ताः सद्विद्यामनुरुन्धते।।'इति।।

पञ्चमे परिकरविजये च सतां लक्षणमभिहितम्—

**धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुं परं ध्यायति यो महात्मा।**
**स्वरेण मन्त्रेण सदा हृदि स्थितम् परात्परं यन्महतो महान्तम्।।**

इति श्रुतिबोधितभगवल्लाञ्छनविशिष्टा एव सन्तः इत्युक्त्वा तप्तशङ्खचक्राङ्कने प्रमाणानि प्रदर्श्य, ऊर्ध्वपुण्ड्रधारणस्य वैदिकाचारत्वं प्रत्यपादि। एवं भगवच्छास्त्रस्य पञ्चरात्रस्य प्रामाण्यम्, भागवतानां माहात्म्यं च सप्रमाणं व्यवस्थापितम्।

प्रकाश्यमानेऽत्र ग्रन्थे महाचार्योक्तं प्रमेयजातं सञ्जिघृक्षामि यथामति। 'स्वाध्यायोऽध्येतव्यः' इति विधिना वेदाख्याक्षरराशिग्रहणार्थमध्ययनं विधीयते। तच्च उपनीतस्य व्रतनियमयुक्तविशेषस्यैव। अध्ययनेन गृहीतसाङ्गस्वाध्यायस्य कर्मणि अल्पास्थिरफलकत्वज्ञानं ब्रह्मविज्ञाने च अनन्ताक्षयफलकत्वज्ञानं च जायते। ततश्च वेदवाक्यविचाररूपमीमांसाश्रवणे अधीतवेदस्य पुरुषस्य रागत एव प्रवृत्तिर्भवति। मीमांसितपूर्वभागस्य तस्य तत्सम्पादिताल्पास्थिरस्वर्गपश्वादिफलकर्मावबोधस्य ब्रह्मजिज्ञासा पूर्वभागार्थनिर्णयसहितापरभागार्थापातप्रतीत्या जन्यते। तस्य च पुरुषस्य गुरूपसदनं विधीयते -

**'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन।**
**तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्।।'** इति।

अत्र निर्वेदवतः विज्ञानार्थित्वानुवादात् श्रवणे रागतः प्रवृत्तिरित्यवगमात् 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यत्र 'श्रोतव्य' इत्यस्य नापूर्वविधित्वम्। नापि नियमविधित्वम्, निर्वेदवान् नियमतः वेदजन्यज्ञानरूपश्रवणार्थी भवतीति स्वरसतोऽवगमेन पुराणादौ प्रवृत्त्यभावसिद्धेः। नापि परिसङ्ख्या। सा हि शेषान्तरनिवृत्तिफला वा शेष्यन्तरनिवृत्तिफला वा भवेत्। उभयथापि न सम्भवति। 'ब्राह्मण' इत्यनेन अधीतवेदत्वावगमेन 'वेदान्ताः श्रोतव्याः एव, नाध्येतव्याः' इति शेषान्तरनिवृत्तिफलकपरिसङ्ख्याया असम्भवात्। 'परीक्ष्य' इति पूर्वभागविचारावगमेन 'वेदान्ता एव श्रोतव्याः, न पूर्वभागः' इति शेष्यन्तरनिवृत्तिफलकपरिसङ्ख्यायाश्चासम्भवात्।

तस्मात् श्रवणं न विधेयम्। तत्र प्रवृत्तिश्च रागादेव। दर्शनसमानाकारकध्यानस्य मोक्षसाधनत्वेनाप्राप्तत्वात् 'द्रष्टव्यो निदिध्यासितव्यः' इत्येकवाक्यतया दर्शनसमानाकारक-ध्यानविधिरयम्। तदर्थतया रागतः प्राप्तस्य श्रवणस्यानुवादः। 'मन्तव्य' इत्यपि श्रुतार्थप्रतिष्ठार्थत्वेन मननस्य प्राप्तस्यानुवाद एव इति सिद्धान्तः।

अत्र श्रवणस्य विधेयत्ववादिषु केचन अपूर्वविधित्वं मन्यन्ते। अन्ये च नियमविधित्वं मन्यन्ते। तत्र नियमविधिवादिभिः अपूर्वविधिपक्षाः निरस्ताः। अपूर्वविधिवादिभिश्च नियमविधिपक्षाः निरस्ता इति स्वयमेव ते परस्परप्रहारनिरताः त्रय्यन्तमहोत्सवमङ्गलतूर्यमुद्घोषयन्ति इति ग्रन्थकारा आहुः।

अत्राद्वैतिनः - अपरोक्षवस्तुविषयकप्रमाणसामान्यं साक्षात्कारहेतुरिति कार्यकारणभावस्य क्लृप्तत्वात् अपरोक्षब्रह्मगोचरवेदान्तस्यापि ब्रह्मसाक्षात्कारजनकत्वं प्राप्तमेवेति न निदिध्यासनस्य दर्शनसमानाकारताविशिष्टस्य विधेयत्वसम्भव इति वदन्ति।

तत्रोच्यते - शब्दस्यापरोक्षजनने न सामर्थ्यम्, इन्द्रियाणामेव साक्षात्कारहेतुतायाः दर्शनात्। न च तेषामपरोक्षवस्तुगोचरप्रमाणत्वावच्छिन्नं तज्जनकत्वम्, ब्रह्मणः अपरोक्षत्वं च 'यत्साक्षादपरोक्षाद्ब्रह्मे'ति श्रुतिसिद्धम्। आत्मानुमितेरपरोक्षत्वञ्चेष्टमेव। 'तस्य तावदेव चिरं यावन्न विमेक्ष्ये', 'वेदान्तविज्ञानसुनिश्चितार्था' इत्यादिना श्रुतिजन्यज्ञानस्यैव मोक्षहेतुतावबोधनात् न आत्मानुमित्या अविद्यानिवृत्तिप्रसङ्गः। तस्मात् तत्त्वमस्यादिवाक्यजन्यज्ञानं न परोक्षम् अपरोक्षार्थविषयकत्वात्, चाक्षुषज्ञानवत् इत्यनुमानेन शाब्दापरोक्षसिद्धिरिति वाच्यम्।

घटाद्यर्थगतापरोक्ष्ये तदवच्छिन्नचैतन्यनिष्ठप्रमातृचैतन्याभेदरूपे सति घटादिविषयकत्वेन ज्ञानस्यापरोक्ष्यम्, तस्मिन् सति आवरणनिवृत्त्या विषयावच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदे अर्थगतापरोक्ष्यमित्यन्योन्याश्रयेण अपरोक्षज्ञानस्य अविद्यानिवर्तकत्वाभावप्रसङ्गात्।

किञ्च निदिध्यासनस्यापरोक्षब्रह्मविषयकस्यापरोक्षत्वापत्त्या अविद्यानिवर्तकत्वं स्यात्। श्रुतिजन्यज्ञानस्यैवाविद्यानिवर्तकत्वाङ्गीकारे श्रवणस्य तथात्वापत्तिः।

एवमात्मानुमितेरपि अपरोक्षत्वं स्यात्, शुद्धेऽपि आत्मनि व्यावहारिकसाध्यलिङ्गवैशिष्ट्यज्ञानस्य सम्भवेन अनुमितौ बाधकाभावात्।

किञ्च श्रवणादीनां चतुर्णामप्यपरोक्षवस्तुविषयकत्वस्य तुल्यत्वात् अन्यतमेनैव अविद्यानिवृत्तिसम्भवात् चतुर्णामपि विधानं व्यर्थं भवन्मते। तस्मात् न ज्ञानगतमापरोक्ष्यम-परोक्षार्थविषयकत्वरूपम्। किन्तु इन्द्रियजन्यत्वादिकमेव। अत एव न तत्त्वमस्यादिवाक्य-जन्यज्ञानस्यापरोक्षत्वमिति न ततोऽविद्यानिवृत्तिः सम्भवति।

गुरूपसदनविधायकश्रुतौ 'परीक्ष्य' इति, 'तद्विज्ञानार्थम्' इति च क्रमेण कर्मनिर्धारणं

ब्रह्मनिर्धारणं च प्रतीयते। 'नास्त्यकृतः कृतेन' इति 'निर्वेदमायात्', 'तद्विज्ञानार्थम्' इति च ब्रह्मज्ञाने अनन्तस्थिरफलरूपब्रह्मप्राप्तिसाधनतावगमप्रतीतेः कर्मणामल्पास्थिरफलत्वनिर्णयसहित-ब्रह्मज्ञानानन्तस्थिरफलत्वापातप्रतीतिः ब्रह्मविचारपूर्ववृत्ता इति अवसीयते। अत एव 'अथातो ब्रह्मजिज्ञासा' इत्यत्र अथशब्दोक्तानन्तर्यप्रतियोगि साधनचतुष्टयम् - नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमादिसाधनसम्पत्, मुमुक्षुत्वञ्चेति इत्यपि मतं निरस्तम्। 'ब्राह्मणः परीक्ष्य निर्वेदमायात्, तद्विज्ञानार्थम्' इत्यनेन स्वाध्यायाध्ययनस्य कृत्स्नमीमांसां प्रति पूर्ववृत्तत्वम्, कर्ममीमांसायाः ब्रह्ममीमांसां प्रति पूर्ववृत्तत्वमिति स्वरसतः प्रतीयमानत्वात्। न हि साधनचतुष्टयं तदुक्तं वेदान्तार्थविचारात् प्राक् सम्भवति। नित्यानित्यवस्तुविवेकस्य भागद्वयविचाराधीनत्वात्। तदभावे च इहामुत्रफलभोगविरागासम्भवात्, तदभावे च शमदमादेरप्यसम्भवात्। ब्रह्मज्ञानस्य अनन्तस्थिरफलत्वनिर्णयाभावे मुमुक्षाया अप्यसम्भवाच्च।

एवं पूर्वोत्तरमीमांसयोरैकप्रबन्ध्यमपि सिद्ध्यति। कर्मब्रह्मविचारयोः प्रयोजनवदर्थपरत्वेन 'परीक्ष्य, विज्ञानार्थम्' इति पौर्वापर्यस्य सङ्गतेरभिधानाच्च पूर्वोत्तरभागात्मकैकग्रन्थविचाररूपतायाः शास्त्रस्य प्रतीतेः। ऐकशास्त्र्ये हेतवश्चेत्थं पर्यगणिषत —

**जिज्ञासावृत्तियुक्तीनामैक्यमक्षरलक्ष्मणोः।**
**साम्यात् तज्ज्ञोपदेशाच्च तदुक्ताद्यविरोधतः॥ इति।**

जिज्ञासायाः कृत्स्नवेदार्थविषयिण्या अविशेषात्, क्रमसङ्गत्योः सद्भावात्, एकव्याख्यान-रूपत्वात्, आचार्यान्तेवासिनोः बादरायणजैमिन्योः जगदनुग्रहप्रवणयोरन्यतरभागाकरणस्य अन्यसमवेतैकैकभागकरणात् उपपत्त्या प्रमेयगौरवानुसारेण आचार्यान्तेवासिनोर्भागद्वयव्यवस्थोपपत्त्या च कर्तृभेदस्य शास्त्रभेदानापादकत्वात्, 'अथातो धर्मजिज्ञासा' इत्यत्र धर्मपदस्योपासनेऽपि वृत्त्या अक्षराणां साम्यात्, शास्त्रारम्भः कर्तव्यो न वेत्यत्र पूर्वोत्तरपक्षयुक्तीनां भागद्वये साम्यात्, 'चोदनालक्षणोऽर्थो धर्मः' इति चोदनालक्षणत्वरूपस्य धर्मलक्षणस्य परमात्मोपासनसाधारणत्वात्, तज्ज्ञस्य भगवतो बोधायनस्य 'संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिः' इत्युपदेशात् 'संज्ञातश्चेत् तदुक्तमस्ति तु तदपि', 'अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत् तदुक्तम्', 'प्रधानवदेव हि तदुक्तम्' इति सूत्रेषु तदुक्तग्रहणात् पूर्वोत्तरभागयोः विरुद्धार्थप्र-पादनाभावाच्च शास्त्रैकत्वं सिद्ध्यति इति।

'तद्विज्ञानार्थम्' इति 'येन वेद ब्रह्मविद्यामि'ति च श्रवणात् ब्रह्मणोऽवेद्यत्वं निराकृतम्। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति परमात्मनः श्रवणादीनां विधानानर्थक्यप्रसङ्गाच्च। वृत्तिविषयत्वस्य ब्रह्मण्यसिद्ध्या तत्सार्थक्यमित्युक्तौ च 'ब्रह्म वेद ब्रह्मैव भवति', 'ब्रह्मविदाप्नोति परम्' इत्यादिश्रुतिविहितब्रह्मवेदनस्य मोक्षहेतुता न स्यात्। न च ब्रह्मणो वेद्यत्वे (दृश्यत्वे) जडत्वापत्तिः, स्वप्रकाशस्य प्रदीपवत् प्रकाशान्तरनिरपेक्षत्वादिति

वाच्यम्। एकप्रमाणावगते प्रमाणान्तरजन्यज्ञानविषयत्वस्य दर्शनेन ब्रह्मणो प्रमाणान्तरवेद्यत्वेऽपि स्वप्रकाशताविरोधविरहात्। स्वप्रकाशव्यवहारे प्रकाशान्तरनैरपेक्ष्यस्यैव स्वीकारात्।

किञ्चावेद्यत्वे ब्रह्मणः शाब्दापरोक्षविषयतापि न स्यात्। वृत्तिविषयत्वाङ्गीकारोऽपि न युक्तः, अवेद्यत्वावाच्यत्वसाधकत्वेन अभिमतया 'अप्राप्य मनसा सह' इति श्रुत्या मनोवृत्तिनिषेधात्। वृत्तेश्च ज्ञानत्वे वेद्यत्वसिद्धेः, तदन्यत्वे च 'जानामी'त्यनुभवविषयतोक्तिविरोधात्।

अत एव वृत्त्युपहितचैतन्यं ज्ञानमिति पक्षोऽपि निरस्तः, उपाधेः ज्ञानान्यत्वेन दर्शितोक्तिविरोधस्य वारयितुमशक्यत्वात्। तस्मात् ब्रह्म वेद्यमेव। 'यत्तदद्रेश्यम्', 'यस्यामतं तस्य मतम्', 'अविज्ञातं विजानतां विज्ञातमविजानताम्', 'विज्ञातारमरे केन विजानीयात्', 'येनेदं विजानाति तं केन विजानीयात्', 'अगृह्यो न गृह्यते' इत्यादिश्रुतयश्च वेद्यत्वश्रुत्यनुरोधेन नेतव्याः। न च विनिगमनाविरहः वैपरीत्यं वा शङ्क्यम्। वेद्यत्वश्रुतीनां वृत्तिपरत्वे लक्षणाया आवश्यकत्वात् तन्निषेधश्रुतीनां ज्ञानविशेषनिषेधपरत्वे च सङ्कोचस्यैव आश्रयणीयत्वात् सङ्कोचस्यैव श्रुतार्थपरित्यागापेक्षया अन्तरङ्गत्वेन ज्यायस्त्वात्। 'भूयसां स्यात् सधर्मकत्वमि'ति न्यायेन वेद्यत्वश्रुतीनां प्राबल्यात्। निपुणतरपर्यालोचने 'यत्तदद्रेश्यम्' इत्यत्र 'यद्भूतयोनिं परिपश्यन्ति धीराः' इत्यत्र च दृशिधातोरेकत्र ज्ञानपरत्वमन्यत्र वृत्तिपरत्वमिति वैरूप्यप्रसङ्गात्, 'यस्यामतं तस्य मतम्' इति मतत्वस्यैवोक्तेश्च।

अनुभूतिरवेद्या अनुभूतित्वात् व्यतिरेकेण घटवत् इत्यनुमानेन चैतन्याविषयत्वरूपमवेद्यत्वं सिषाधयिषितम्, अतो न वृत्तिविषयत्वमादाय बाधः इत्यपि न युक्तम्। देवदत्तचैतन्यस्य देवदत्तव्यवहारहेतुभूतयज्ञदत्तीयानुमितिरूपवृत्त्यवच्छिन्नचैतन्यविषयत्वेन, यज्ञदत्तस्यापि देवदत्तीयानुमितिरूपवृत्त्यवच्छिन्नचैतन्यविषयत्वेन, ब्रह्मणोऽपि वृत्तिप्रतिफलितचैतन्यविषयत्वेन च बाधापरिहारात्। तस्मात् ब्रह्म वेद्यमेव।

एवमेव 'तद्विज्ञानार्थम्', 'अक्षरं पुरुषं सत्यं ब्रह्म विद्याम्' इति सविशेषस्यैव जिज्ञास्यत्वश्रवणेन निर्विशेषस्य जिज्ञास्यत्वं निराकृतम्। न हि स्वप्रकाशतया नित्यबुद्धस्य निर्विशेषस्य जिज्ञास्यत्वसम्भवः। जीवेन तस्याबुद्धत्वाङ्गीकारे आत्मभेदोऽभ्युपगतः स्यात्। औपाधिकभेदेन प्रतिबिम्बभावेन वा ब्रह्मणो भेदमङ्गीकृत्य सप्रकारत्वनाशाङ्गीकारे स्वरूपनाशप्रसङ्गः। अत्र जिज्ञासोपपादने बहवः पक्षाः। ते यथा -

(1) प्राक् विद्यमानमपि शाब्दज्ञानमेककोटिकानवधारणात्मकमिति जिज्ञासोपपत्तिरिति केचित्।

(2) सविशेषत्वभ्रमात् तत्सन्देहाद्वा जिज्ञासा भवति। तन्निवृत्तिश्च निर्विशेषोपदेशात् इत्यन्ये।

(3) अप्रतिबन्धापरोक्षज्ञानमविद्यानिवर्तकम्। तदेव च इष्यते। इदानीं विद्यमानं स्वरूपापरोक्षं वृत्तिज्ञानं वा सप्रतिबन्धमेवेति अपरे।

(4) सत्त्वविशिष्टज्ञानं पूर्वमखण्डगोचरज्ञानमिष्यते इतीतरे।

**इमे च पक्षाः परस्परविरोधेन निरस्ताः।**

'येनाक्षरं परुषं वेद' इति वेद्यदेवताविशेषस्य निर्धारणेन नारायणेतरस्य परविद्यावेदद्यत्वं प्रतिक्षिप्यते। पुरुषशब्दस्य श्रुतिस्मृतिप्रयोगानुशासनैः भगवदेकवाचकत्वात्। श्रुतिस्तावत् कूर्मरूपिणं भगवन्तं प्रस्तुत्य 'पूर्वमेवाहमिहासमिति। तत्पुरुषस्य पुरुषत्वम्' इति। अस्याः श्रुतेः पुरुषशब्दनिर्वचनतया पुरुषशब्दवाच्यत्वं प्रतीयते। निर्वचनस्य सर्वस्य वाच्यत्वपरतायाः सर्वसम्प्रतिपन्नत्वात्। 'अन्तरतः कूर्मं भूतं सर्पन्तम्' इति प्रकृतवाक्यात् पुरुषशब्दवाच्यस्य कूर्मरूपित्वावगमात् कूर्माकृतियोगश्च नारायणस्यैवेति बहुप्रमाणसिद्धत्वात् पुरुषो नारायण इति सिद्ध्यति।

**यदि वा पूर्वमेवाहमिहेति पुरुषं विदुः।**
**यदि वा बहुदानाद्वै विष्णुः पुरुष उच्यते॥**

इत्येतच्छ्रुत्युपबृह्मणपद्मपुराणवचनादपि नारायणस्य पुरुषशब्दवाच्यत्वं सिद्धम्। अनादित्वस्रष्टृत्वादिलिङ्गसहचरितं कूर्माकृतिमत्त्वं नारायणासाधारणमिति 'तेऽपश्यन् पुरोडाशं कूर्मं भूतं सर्पन्तम्' इति नारायणादन्यत्र कूर्माकृतियोगश्रवणेन न प्रकृते अन्यपरत्वशङ्का युक्ता।

एवं तापनीये पञ्चमखण्डे 'परात्परं पुरिशयं पुरुषमीक्षते' इति पुरुषस्य ईक्षतिकर्मत्वश्रवणात् तत्रत्यभिज्ञापितया 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः' इति श्रुत्यापि नारायणस्य पुरुषशब्दार्थत्वसिद्धिः।

स्मृतिभिरपि पुरुषस्य नारायणत्वसिद्धिः। यथा याज्ञवल्क्ये - 'ईश्वरं पुरुषाख्यन्तु सत्यधर्माणमच्युतम्' इति। यमस्मृतौ - 'एष वै पुरुषो विष्णुः व्यक्ताव्यक्तः सनातनः' इति। तथा सहस्रनामसु - 'अव्ययः पुरुषः साक्षी' इत्युपक्रम्य 'नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः' इति पठ्यते। एवं श्रीविष्णुपुराणादिष्वपि। तस्मात् नारायणस्यैव उपास्यत्वमिति सिद्धम्।

एवं 'तां विद्याम्' इत्येतावतैव चारितार्थ्ये 'तां ब्रह्मविद्याम्' इति ब्रह्मपदं ब्रह्मणोऽपि उपदेश्यत्वसिद्ध्यर्थम्। उपदेश्यत्वं न वाक्यार्थतया संसर्गत्वात् किन्तु धात्वर्थतया। तत्र च मुख्यत्वं 'प्रोवाच' इति प्रकर्षद्योतकप्रशब्देन विवक्षितम्। अतः ब्रह्मणः अवाच्यत्वमतं निराकृतम्। न हि ब्रह्मावाच्यम् इति प्रतिज्ञा कर्तुं शक्या, ब्रह्मपदवाच्यस्यावाच्यत्वसाधने व्याघातात्। तदप्रतिज्ञाने च तत्साधनासम्भवः।

किञ्च 'अनुप्रविश्य नामरूपे व्याकरवाणि' इति श्रुत्या अनुप्रवेशस्य नामव्याकरणनिमित्ततोक्तिः

नामवाच्यत्वसिद्ध्यर्थमेव। एवं 'वचसां वाच्यमुत्तमम्', 'तस्योदिति नाम', 'यन्नाम तन्नाम', 'ब्रह्मैव वाचः परमं व्योम' इत्यादिभ्योऽपि ब्रह्मणो वाच्यत्वसिद्धिः।

**तत्र पूज्यपदार्थोक्तिः परिभाषासमन्वितः।**
**शब्दोऽयं नोपचारेण त्वन्यत्र ह्युपचारत॥**

इत्याद्यनुगृह्णन् भगवान् पराशरः वाच्यतां दृढीकरोति।

'यतो वाचो निवर्तन्ते' इति श्रुतेः 'सैषानन्दस्य मीमांसा भवति' इत्यानन्दस्य प्रक्रमानुरोधेन आनन्दापरिच्छेदतात्पर्यकत्वात् न वाच्यत्वे बाधकत्वम्, यतः इति यच्छब्देन ब्रह्मणोऽभिधानविरोधाच्च। 'आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्मे'ति वाक्यस्य न नामरूपासङ्गित्वप्रतिपादकत्वम्। 'ह वै' इत्यनुवादस्य पुरोवादसद्विद्यासापेक्षतायां सिद्धायां तत्र 'अनुप्रविश्य नामरूपे व्याकरवाणी'ति अनुप्रवेशस्य नामरूपव्याकरणार्थतया नामवाच्यत्वोक्त्या तदविरोधेन नयनस्याऽऽवश्यकतया 'ते यदन्तरा' इति श्रुतेः कर्माभावेन नामरूपसंसर्गकृतदोषा-सङ्गित्वप्रतिपादनपरत्वस्यैव आश्रयणीयत्वात्। 'यद्वाचानभ्युदितमि'त्यपि न वाच्यत्वनिषेधपरम्। 'येन वागभ्युद्यते' इति वाक्यशेषेण वाक्प्रवर्तकत्वस्य प्रतिपादनेन तस्य वाक्प्रेर्यत्वनिषेधपरत्वस्यैव युक्तत्वात्। अतः बाधकाभावात् बहुतरसाधकसत्त्वाच्च ब्रह्मणो वाच्यत्वं सिद्धमित्ययं गुरूपसदनविजयस्य प्रतिपाद्यसङ्ग्रहः।

अथ ब्रह्मविद्याविजयविषयसङ्ग्रहः। तत्रादौ देवतान्तरस्य परविद्यावेद्यत्वाभावः प्रसाध्यते। परविद्यायास्तावत् पुरुषश्रुत्यभ्यासात् अक्षरपुरुषसामानाधिकरण्यात् अमृतशब्दात् एकर्षिशब्दात् प्रत्यभिज्ञानात् लिङ्गात् उपबृह्मणाच्च भगवन्निष्ठत्वम्। पुरुषशब्दस्य नारायणपरत्वम्, ततोऽन्यत्रामुख्यत्वञ्चाधस्तादुपपादितम्। 'उपासते पुरुषं ये ह्यकामाः', 'पुरुष एवेदं सर्वम्' इति निरुपपदे पुरुषपदे भगवद्रूढ्युन्मेषेण तदवैरूप्याय तत्समानार्थत्वमेव सविशेषणपुरुषशब्दानाम्; अभ्यासरूपतात्पर्यलिङ्गस्य सत्त्वात्, 'येनाक्षरं पुरुषं वेद' इति सामानाधिकरण्याच्च।

अमृतशब्दाच्च नारायणस्य परविद्यावेद्यत्वं प्रतीयते। 'नित्यं निरञ्जनं निर्विकल्पं परञ्ज्योतिरमृताख्यं परं ब्रह्मस्वरूपं ध्यात्वा तस्मिन्नेव लयमाप' इति नारसिंहपुराणे पूर्वोपक्रान्ते नारायणे अमृताख्यत्वकथनात्। 'विष्ण्वाख्यममृतं साक्षात् विज्ञाय परिमुच्यते' इति ब्रह्माण्डवचनात् साक्षाच्छब्दस्वारस्यबलेन अमृतशब्दस्य मुख्यार्थपरत्वसिद्धिः। एवं मैत्रायणीयश्रुतौ आनन्दतृप्तमचलममृतमच्युतं ध्रुवं विष्णुसंज्ञं सर्वाधारं धाम' इति, अम्भस्यनुवाके 'तदेव शुक्रममृतम्' इति, सुबालोपनिषदि 'अजरममृतमभयमशोकमनन्तम्' इति चतुर्दशकृत्वः, नारायणीये 'अमृतव्योमन् सनातन' इत्यादिना विष्णुस्तुत्यनन्तरम् 'एवं स्तुतः स भगवान् गुह्यैः स्तव्यैश्च नामभिः' इति, 'यत्रामृतः स पुरुषोऽव्ययात्मा' इति च अमृतशब्दाभ्यासात् विष्णुपरतासिद्धिः। शतरुद्रीये 'अमृतत्वमि'त्युपदेशस्तु न रुद्रपरः, किन्तु प्रसादद्वारा जप्यस्य ज्ञानसाधनत्वमित्येतत्परः।

एकर्षिशब्दादपि भगवत्परत्वमवगम्यते। 'एकर्षिं श्रद्धयन्त' इत्युक्तार्थस्य 'भागवतेन चेतसा' इत्यस्यामेव श्रुतौ भागवतशब्दस्य भगवत्परत्वपरतया शङ्कराचार्यैर्व्याख्याततत्वात्, भगवच्छब्दस्थानाभिषिक्तैकर्षिशब्दस्य भगवत्परत्वौचित्यात्। 'य इमा विश्वा भुवनानि जुह्वदृषिर्होता निषसादापिता नः' इति तैत्तिरीयानुवाके 'ऋषिर्होते'ति ऋषित्वस्य, तस्मिन्नेवानुवाके 'यो देवानां नामधा एक एव' इत्येकत्वस्य च नारायणे एवोक्तत्वेन अत्रत्यैकर्षिशब्दस्य नारायणपरत्वौचित्याच्च। 'य इमा विश्वा' इत्यनुवाकस्य विश्वभुवनस्रष्टृकमलासनप्रसूतिनाभिपद्म-त्वलिङ्गात् नारायणपरत्वं ज्ञायते। श्रूयते हि तत्र 'अजस्य नाभावध्येकमर्पितम् यस्मिन्निदं विश्वं भुवनमधिश्रितम्' इति। तच्चोपबृह्मितमानुशासनिकपर्वणि -

**'अजस्य नाभावध्येकं यस्मिन् विश्वं समर्पितम्।**
**पुष्करं पुष्कराक्षस्य तस्मै पद्मात्मने नमः।।इति।**

न च वाजसनेयके 'ईशावास्यमिदं सर्वम्' इति सर्वान्तःप्रवेष्टृत्वेन उपक्रान्तस्य ईशशब्दोक्तस्य रुद्रस्य उपसंहारे 'पूषन्नेकर्षे' इत्येकर्षिशब्देन प्रतिपादनात् रुद्रपरत्वमेव एकर्षिशब्दस्य प्रकृतेऽपि इति वाच्यम्। उपक्रमे रुद्रस्य प्रसङ्गाभावेन उपसंहारे सुतरां तस्य एकर्षिशब्देन अभिधानासम्भवात्। न हि ईशेन रुद्रेण आवास्यमिति ईशावास्यमित्यस्यार्थः, किन्तु ईष्ट इति ईट्, तेन ईशा सर्वनियन्त्रा पुरुषोत्तमेन आवास्यं व्याप्यमित्येवार्थः। अन्यथा तृतीयासमासार्थकरणत्वे लक्षणापत्तेः, विभक्तिलोपकल्पनापत्तेश्च। अतो उपक्रमस्य नारायणपरत्वेन उपसंहारस्थस्य एकर्षिशब्दस्यापि तत्परतैव। व्याख्यातं च 'ईशावास्यमि'त्येतत् एवमेव शङ्कराचार्यैरपि।

एवमेव अन्तरादित्यविद्यापि नारायणपरैव। श्रूयते तावत् छान्दोग्ये 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते, हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः। तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम, स एषः सर्वेभ्यः पाप्मभ्य उदित, उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद' इति। अत्र 'य एषोन्तरादित्ये' इत्यादित्यमण्डलान्तर्वर्तिपुरुषस्य अप्राप्तत्वात् विधिः। 'एष दृश्यते' इत्युपासकदर्शनमनूद्यते। अत्र पुरुषश्रुतेः भगवत्परत्वं भगवदसाधारणलिङ्गश्रवणात् सिद्धम्। श्रूयन्ते हि अत्र भगवदसाधारणानि पुण्डरीकाक्षत्व-अक्षिद्वित्व-अपहतपाप्मत्व-सर्वपापविनाशकत्व-उपास्यत्वानि लिङ्गानि। रुद्रस्य त्र्यक्षत्वेन अक्षिद्वयानुवादेन पुण्डरीकसादृश्यविधानासम्भवात्।

किञ्च तैत्तिरीयमहोपनिषदि 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषः' इति भगवतः एवादित्यान्तर्वर्तित्वमाम्नायते। पूर्वस्मिन् नारायणानुवाके नारायणस्यैव प्रकृतत्वात् तस्या उपनिषदः नारायणपरत्वावसायात्। एवमानन्दवल्ल्यां 'स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः' इति यच्छब्दद्वयेन पुरुषान्तर्वर्तिनारायणपरतया निर्णीतनारायणानुवाकतदुत्तरानुवाकप्रसिद्धयोरेव निर्दिष्टत्वात् तयोरभेदाभिधानेन वाक्यस्य नारायणपरत्वं सिद्धम्। 'ऋतं सत्यं परं ब्रह्म पुरुषं

कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षम्' इति मन्त्रस्य विरूपाक्षपदसमभिव्याहारेण रुद्रपरत्वशङ्का च न युज्यते। कृष्णपिङ्गलपदसमभिव्याहारेण नारायणपरत्वस्यैव युक्तत्वात्। कृष्णपिङ्गलस्य नारायणत्वम्—

**तन्मध्ये दहराकाशं तन्मध्ये सूर्यमण्डलम्।**
**तन्मध्ये परमानन्दं वपुषा कृष्णपिङ्गलम्॥**

नारायणं जगन्नाथं वासुदेवमनामयम्। इति योगार्णववचनादवगम्यते।

**'तस्य चिन्तयतो नेत्रात्तेजः समभवन्महत्।**
**दक्षिणं वह्निसङ्काशं वामं तुहिनसन्निभम्॥'**

इति शीतोष्णत्वेन वैरूप्यस्य वाराहे अभिहितत्वात् विरूपाक्षत्वं भगवतो न विरुद्ध्यते।

सावित्रीव्याख्यानावसरे—

**सवितुस्तद्वरेण्यन्तु सत्यधर्माणमीश्वरम्।**
**हिरण्यवर्णं पुरुषं व्योम तद्विष्णुसंज्ञितम्॥**

इति विष्णोः सवितृमण्डलान्तर्वर्तित्वं स्पष्टमुक्तम्।

यथा च गायत्रीप्रतिपाद्यत्वमादित्यमण्डलान्तर्वर्तिनारायणस्यैवेति बहुश्रुतिस्मृतिभ्यः सिद्ध्यति तथा व्यक्तं ब्रह्मविद्याविजये।

एवमेवान्तरक्षिविद्यापि नारायणपरा। 'य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैवर्क् तत्साम तदथर्व तद्यजुस्तद्ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम' इति छान्दोग्यश्रुतौ पुरुषशब्दश्रवणात् नारायणः एव प्रतिपाद्यः। बृहदारण्यके 'तद्यत्सत्यमसौ स आदित्यो य एष एतस्मिन् मण्डले पुरुषः यश्चायं दक्षिणेऽक्षन्' इति सूर्यमण्डलान्तर्वर्तिपुरुषेण अक्षिपुरुषाभेदावगमात्, 'इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषस्तं वा एवमिन्धं सन्तमिन्द्र इत्याचक्षते परोक्षेण, अथैतद्वामेऽक्षिणि पुरुषरूपमेषास्य पत्नी विराट्' इत्यक्षिपुरुषस्य इन्द्रत्वं प्रतिपाद्य इन्द्रपत्न्या 'राडसि बृहती श्रीरसीन्द्रपत्नी'ति लक्ष्म्यभेदप्रतिपादनेनाक्षिपुरुषस्य लक्ष्मीपतित्वसिद्धेश्च।

छान्दोग्ये श्रुताया दहरविद्याया अपि नारायणपरत्वमेव। 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्' इति श्रूयते। तत्र दहराकाशो भगवानेव, अपहतपाप्मत्वादीनां तदसाधारणानां श्रवणात्। ब्रहदारण्यके 'य एषोऽन्तर्हृदय आकाशः' इति हृदयसुषिरात्मकभूताकाशे अक्ष्यन्तर्वर्तिनो लक्ष्मीपतेरेवावस्थानावगमात्। सुबालोपनिषदि 'हृद्याकाशे परे कोशे दिव्योऽयमात्मा स्वपिति' इति, 'यः प्राणे यो विज्ञाने य आनन्दे यो हृदाकाशे य एतस्मिन् सर्वस्मिन्नन्तरे सञ्चरति

सोऽयमात्मा तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम्' इति, 'अन्तश्शरीरे निहितो गुहायामज एको नित्यो यस्य पृथिवी शरीरम्' इति, 'अन्तश्शरीरे निहितो गुहायां शुद्धः सोऽयमात्मा' इति, 'सर्वेश्वरमचिन्त्यमशरीरं निहितं गुहायाममृतम्' इति च श्रवणात्, आत्मप्रबोधोपनिषदि 'अथ यदिदं ब्रह्मपुरमिदं पुण्डरीकम्' इति श्रवणात्, कठवल्ल्याम् -

**'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।**
**अध्यात्मयोगाधिगमेन देवं मत्त्वा धीरो हर्षशोकौ जहाति॥' इति,**

**तथा मुण्डकादिषु अपि गुहान्तर्वर्तित्वस्य श्रवणाच्च।**

'स उत्तमः पुरुषः' इति दहरोपासकोपास्यस्य पुरुषोत्तमत्वनिर्धारणादपि दहराकाशः नारायण एवेति सिद्ध्यति।

आकाशपदचिह्नितानि वाक्यानि बहूनि श्रूयन्ते - 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम्', 'दहरोऽस्मिन्नन्तर आकाशः', 'तत्रापि दह्रं गगनं विशोकः', 'आकाशो ह वै नामरूपयोर्निर्वहिता', 'यदेष आकाश आनन्दो न स्यादि'त्यादीनि। अत्र सर्वत्राप्याकाशशब्दस्य वैरूप्यपरिहाराय एकविषयत्वस्यावश्यकत्वे 'अतो ज्यायांश्च पूरुष' इति पुरुषसूक्तोक्तस्य सर्वेभ्यो ज्यायस्त्वस्य 'आकाशो ह्येवैभ्यो ज्यायानि'त्यत्र प्रत्यभिज्ञानात्, 'आकाशादेव समुत्पद्यन्ते' इत्युक्तस्य जगत्कारणत्वस्य 'एको ह वै नारायण आसीत् न ब्रह्मा नेशानो नेमे द्यावापृथिवी', 'नारायणात् ब्रह्मा जायते, नारायणात् रुद्रो जायते' इत्यादिना नारायणे प्रतिपादनाच्चायमाकाशो नारायण एव। 'शम्भुराकाशमध्ये' इत्यत्र शं सुखं भावयतीति व्युत्पत्त्या शम्भुपदं गुणजातपरम्, अन्यथा 'अस्मिन् कामास्समाहिताः' इति श्रुत्यन्तरविरोधात्। अथवा शम्भुशब्दो नारायणपरः, 'नारायणाद्रुद्रो जायते' इत्यादिश्रुतिविरोधप्रसङ्गेन रुद्रस्य नारायणान्तर्यामित्वासम्भवात्। आकाशशब्दश्च हृदयाकाशपरः, सति बाधके वैरूप्यस्वीकारे क्षतिविरहात्। शम्भुशब्दस्य नारायणपरत्वं च 'स्वयम्भूश्शम्भुरादित्यः' इति सहस्रनामपाठादवगम्यते। तस्मात् दहराकाशो नारायण एवेति ब्रह्मविद्याविजयप्रतिपाद्यसङ्ग्रहः।

### अथ सद्विद्याविजयसारांशः

सर्वविद्यावेद्यः जिज्ञास्यः परमपुरुष एवेत्युक्तम्। तस्य जगत्कारणत्वं लक्षणमभिहितं 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुत्या। तच्च सद्विद्यायां प्रतिपन्नम्। तत्र प्रथमखण्डः प्रतिपिपादयिषितार्थस्य अवतारिकारूपः। तदुत्तरैः षड्भिः खण्डैः प्रतिपिपादयिषितार्थप्रतिपादनम्, ततः नवभिः खण्डैः तस्यैव स्थापनम् इति विभागः अवसेयः।

प्रथमखण्डे पितापुत्राख्यायिका कथ्यते। उद्दालकः पुत्रस्नेहेन ब्रह्म उपदिदिक्षुः तस्य

ब्रह्मजिज्ञासामुत्पादयितुमाह – श्वेतकेतो इत्यादि। 'उत तमादेशमप्राक्ष्य' इत्यत्रादेशशब्दः नियन्तृवाची। 'विवक्षातः कारकाणि भवन्ति' इति कर्तुः करणत्वस्य विवक्षितत्वात्। 'येनाश्रुतमि'त्यस्य येन श्रुतेनाश्रुतं श्रुतं भवति, येन मतेनामतं मतं भवति, येन विज्ञातेनाविज्ञातं विज्ञातं भवतीत्यर्थः, 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विज्ञातं भवति' इति मैत्रायणीयश्रुत्यनुसारात्, उपादानप्रकरणानुगुण्याच्च। विज्ञानं चात्र निदिध्यासनम्। अश्रुतत्वं स्थूलकारणविशिष्टरूपेण, श्रुतत्वं च सूक्ष्मरूपेणेति न विरोधः। आवृत्त्या ज्ञाततां दृढीकर्तुं श्रवणादित्रयमुक्तम्। अन्यज्ञानेनान्यस्य ज्ञातत्वासम्भवशङ्कापरिहाराय मृदादिदृष्टान्तकथनम्। मृत्पिण्डादेः ज्ञातत्वं विवक्षितम्। न च रूपभेदात् नामधेयभेदाच्च कार्यद्रव्यभेदात् दृष्टान्तेऽप्यसम्भव इति वाच्यम्। यतः वाग्व्यवहारार्थं जलाहरणादिव्यवहारार्थं च पृथुबुध्नोदराकारादिः विकारः, घटादि नामधेयं च मृत्पिण्डेन आरम्भणम् - आरभ्यते स्पृश्यते, प्रातर्या मृत्तिका इहोपलब्धा सैवेदानीं घटादिरभूत् (मृत्तिकेत्येव सत्यम्) इत्यबाधितप्रत्यभिज्ञादर्शनात्।

अथ षड्भिः खण्डैः समष्टिव्यष्टिसर्गौ अभिहितौ। व्यष्टिसर्गार्थं त्रिवृत्करणमुपपादितम्। विकारस्य नामधेयस्य च स्वपर्यन्तत्वसिद्धये नामरूपव्याकरणयोरनुप्रवेशाधीनत्वमुक्तम्। जीवस्य कार्यत्वसिद्धये अनुप्रवेशस्य जीवद्वारकता निरूपिता। त्रिवृत्करणोपपत्तिः प्रदर्शिता। जीवस्य शरीरद्वारकसत्कार्यत्वसिद्धये शरीरस्य भूतत्रयमयत्वं सूक्ष्मनिर्गमः आप्यायकत्वं चोपपादितम्।

द्वितीयखण्डेन समष्टिसृष्टिरुक्ता। इदं परिदृश्यमानं चेतनाचेतनात्मकं विभक्तनामरूपं स्थूलं कार्यम् अग्रे - सर्गात् प्राचीने प्रलयकाले, अद्वितीयम् - कर्त्रन्तरनिरपेक्षम्, एकम् - अविभक्तनामरूपतया कार्यावस्थानिबन्धबहुत्वशून्यं सत् आसीत् (सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्)। ततश्च 'इदं सदासीत्' इत्यस्य स्थूलचिदचिद्विशिष्टं सूक्ष्मचिदचिद्विशिष्टमासीदिति पर्यवसितोऽर्थः। 'तदैक्षते'ति ईक्षणात् 'बहुस्यामि'ति बहुभवनाच्च कर्तृत्वमुपादानत्वं च सिद्धम्।

अथ तृतीयखण्डेन व्यष्टिसृष्टिरुक्ता। नामरूपयोः स्वपर्यन्तत्वसिद्धये अनुप्रवेशकीर्तनम्। जीवस्यापि कार्यत्वसिद्धये तद्द्वारकोऽनुप्रवेशः उक्तः। त्रिवृत्करणं विना भूतानां कार्याक्षमत्वात् नामरूपव्याकरणार्थं त्रिवृत्करणसङ्कल्प उक्तः। अनुप्रवेशकथनात् सद्वारकावस्थाश्रयतया उपादानत्वं ब्रह्मणः प्रतिपादितम्। अचितः कार्यत्वमवस्थाद्वारकम्। चितः कार्यत्वमवस्थावद्द्वारकम्। परमचेतनस्य तदुभयद्वारकं सद्वारककारणत्ववत् सद्वारकमाश्रयत्वमपि अस्त्येव खट्वायां शयानेऽपि प्रासादे शेते इति प्रयोगात्। एवं विशिष्टस्योपादानत्वमुपादेयत्वं चोक्तम्।

न च विशिष्टोपादानत्वमिति उभयोरुपादानत्वविवक्षणे निर्विकारत्वश्रुतिविरोधः, अत एव न विशेष्यमात्रस्य। विशेषणमात्रस्य तथात्वे ब्रह्मणोऽनुपादानत्वप्रसङ्गः इति वाच्यम्। उभयोपादानत्वस्यैव विवक्षितत्वात्। विशेषणं विशेषणोपादानं विशेष्यं विशेष्योपादानमिति उक्तरीत्या ब्रह्मणि विकाराश्रयत्वस्य द्वारसापेक्षत्वात् विशिष्टोपादानत्वव्यपदेशः।

चतुर्थखण्डेन त्रिवृत्करणे, अन्यस्य कार्यस्याभावे च संवादो दर्शितः। जीवस्य शरीरद्वारककार्यत्वाभिप्रायेण तस्य सत्कार्यत्वसिद्ध्यर्थं शरीरस्य भूतत्रयमयत्वमुक्तं पञ्चमखण्डेन। षष्ठखण्डेन सूक्ष्मनिर्गमो वर्णितः।

ततश्च श्वेतकेतोः स्वेनोत्पादितां भगवतः सर्वोपादानत्वबुद्धिं परे अपहरेयुरिति पुत्रस्नेहेन अपायमाशङ्क्य विशिष्टोपादानत्वं सोपपत्तिकं नवकृत्वोऽभ्यस्य दृढीचकार नवभिः खण्डैः।

विशिष्टोपादानत्वाभिप्रायेणैव 'आदेशम्', 'येनाश्रुतमि'त्युपक्रमः। 'ऐतदात्म्यमिदं सर्वम्, स आत्मा' इत्युपसंहारः। तस्यैव अभ्यासः। अपूर्वत्वं च प्रसिद्धम्। 'अथ सम्पत्स्ये' इति फलम्। अर्थवादश्च पितापुत्राख्यायिका। दृष्टान्तप्रदर्शनानुप्रवेशकथानदिरुपपत्तिः। एवं षड्विधतात्पर्यलिङ्गोपेतया सद्विद्यया कर्तुः विशिष्टोपादानत्वं समर्थितं श्रुत्यन्तराण्यपि अनुरुन्धते इति सिद्धान्तः।

माध्वास्तु - सादृश्यप्राधान्याभ्यां प्रतिज्ञादृष्टान्तौ। ब्रह्मज्ञानेन कृत्स्नफलसिद्धेरितरत् सर्वं ज्ञातप्रायमिति 'येनाश्रुतमि'त्यादेरर्थः। यथा मृदित्येतस्मिन् पदे ज्ञाते सर्वं मृन्मयम् - मृत्पदापभ्रंशभाषापदानि ज्ञातप्रायाणि। भाषापदानि हि अव्यापकानि। संस्कृतन्तु सर्वदेशव्यापकम्। अतः तत्तद्देशे तेन तेनापभ्रंशेन यो यो व्यवहारः भवति तस्य सर्वस्यापि संस्कृतेनैव करणसम्भवात् अपभ्रंशो ज्ञातप्रायः। तदुपपाद्यते - वाचारम्भणमिति। अप्रभ्रंशरूपं नामधेयं वाचा आरभ्यते, तस्मादनित्यम्। मृत्तिकेति पदं तु नित्यम् इति तदर्थादिति वदन्ति।

अद्वैतिनस्तु - मिथ्याभूतस्य जगतः मिथ्याभूतमाया उपादानम्, सालक्ष्यण्यात्। यथा घटस्य ब्रह्माधिष्ठानकतया मृदुपादानम्। कार्यकारणयोः सामानाधिकरण्यनिमित्तं तादात्म्यम्। तच्च भिन्नत्वे सति अभिन्नसत्ताकत्वम्। सद्विद्यायामादेशशब्दः उपदेश्यपरः। ब्रह्मस्वरूपे ज्ञाते प्रपञ्चस्वरूपं ज्ञातमेव। मिथ्याभूतस्याधिष्ठानमेव हि स्वरूपम्, तदतिरिक्तस्वरूपाभावात्। दृष्टान्तेऽपि मृत्पिण्डमृन्मयादीनामपि ब्रह्मणि अध्यस्ततया मृदादिस्वरूपे ज्ञाते तत्कार्यस्वरूपं ज्ञातमेव। वाचारम्भणमित्यस्य वागालम्बनं व्यावहारिकमित्यर्थः। मृत्तिकेत्येव सत्यमित्यस्य मृत्तिका स्वरूपेणैव सत्यमित्यर्थः, तद्व्यतिरेकेण सत्ताविरहादिति कथयन्ति।

तत्र माध्वमते ब्रह्मणोऽनुपादानत्वेन बहुश्रुतिस्मृतिविरोधप्रसङ्गः। वाक्यार्थोऽप्यनुपपन्नः, सादृश्यस्य साधारण्येन ब्रह्मणि विशेषाभावात् 'तमादेशमप्राक्ष्य' इत्यसाधारण्येन ब्रह्मनिर्देशायोगात्। दृष्टान्तो व्यर्थश्च। सदृशज्ञानात् सदृशज्ञाननियमोऽप्यसिद्धः। ज्ञानस्य तादधीन्यमात्रविवक्षायां विसदृश इति ज्ञानस्यापि तादधीन्येन सादृश्ये विशेषाभावात्।

अद्वैतिपक्षे च उपादानपदेन अनुपादानत्वस्यैव प्रतिपादनादस्वारस्यं स्पष्टम्, अधिष्ठानस्यानुपादानत्वात्। येनाश्रुतमिति अधिष्ठानस्य मिथ्यावस्तुस्वरूपत्वं चासिद्धम्, मानाभावात्। मिथ्यावस्तुनः एव मिथ्यावस्तुस्वरूपत्वात्। अश्रुतामताविज्ञातपदानां लक्षणापत्तिश्च।

किञ्च प्रपञ्चमिथ्यात्वस्य उपदेशात् प्रागनवगमात् दृष्टान्ते मृत्पिण्डघटयोः ब्रह्मैव स्वरूपमित्यनवगमात् दृष्टान्तो न घटते। दृष्टान्तस्याज्ञानादेव वाचारम्भणमित्युपपादनमित्यपि न सत्, प्रपञ्चमिथ्यात्वज्ञानात् प्राक् तद्वाक्यार्थस्यापि भवदभिमतस्यापरिज्ञानात्। मृत्पिण्डमृन्मयलोहमणिलोहमयनखनिकृन्तनकार्ष्णायसपदानां लक्षणाप्रसङ्गः। मिथ्यात्वप्रतिपादनाय वाचारम्भणमित्येव अलमिति 'मृत्तिकेत्येव सत्यमि'ति वाक्यत्रयस्य वैयर्थ्यापत्तिर्दुर्वारा। वाचारम्भणपदस्य व्यावहारिकत्वपरत्वे अस्वारस्यं च। ब्रह्मणि ज्ञाते सर्वं कार्यं मिथ्यात्वेन ज्ञातं भवतीत्यर्थवर्णनमपि न सम्यक्। घटादिज्ञानानामपि ब्रह्मविषयकत्वात् तेषु सत्स्वपि मिथ्यात्वज्ञानासिद्धेः। ब्रह्मणोऽद्वितीयत्वज्ञानविवक्षायामात्माश्रयः इत्यादिकं बहु द्रष्टव्यम्।

ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य प्रपञ्चस्याविद्यापरिकल्पितत्वात् मिथ्यात्वमित्यपि न युक्तम्, अविद्यायां भवदभिमतायां मानाभावात्। मिथ्यात्वान्यथानुपपत्त्यैव तत्कल्पने च अन्योन्याश्रयात्। न च अहमज्ञ इत्यादिप्रत्यक्षं तत्र मानम्, धर्मिज्ञानप्रतियोगिज्ञानयोरभावज्ञानकारणयोस्सत्त्वेन ज्ञानाभावासम्भवादिति वाच्यम्। भावरूपाज्ञानस्यापि धर्मिज्ञानप्रतियोगिज्ञानयोः सत्त्वेन प्रतीत्यसम्भवस्य तुल्यत्वात्। अतिरिक्तभावरूपाज्ञानकल्पेन गौरवात्। तस्य सावयवत्वपरिणामित्वाद्यनेकधर्मकल्पनाप्रसङ्गाच्च।

सिद्धान्ते तु 'भावान्तरमभावो हि कयाचित्तु व्यपेक्षया' इत्युक्तरीत्या भावान्तरस्यैवाभावतया 'अहमज्ञ' इत्यादिप्रतीतेरधिकरणतद्धर्मविषयत्वोपपत्तौ अतिरिक्तकल्पनाविरहेण लाघवम्।

नापि 'एतावन्तं कालं न किञ्चिदवेदिषम्' इति सुप्तोत्थितपरामर्शेन भावरूपाज्ञानसिद्धिः, साक्षिणा भावरूपाज्ञानस्येव ज्ञानाभावस्यापि भानसम्भवेन तद्विषयकत्वेनैवोपपत्तेः। सुषुप्तिकाले लयाङ्गीकारेण अन्तःकरणाश्रयतया अज्ञानानुभवासम्भवात्, सुतरां च सुप्तोत्थितस्य स्वात्मनि परामर्शासम्भवात्। 'सुषुप्तिकालमपि नावेदिषम्' इति सुषुप्तिकालाज्ञानपरामर्शेन सुषुप्तिकाले अज्ञानानुभवासम्भवात्। तस्मादानुमानिकः एवायं परामर्शः। स च ज्ञानाभावविषयः। इन्द्रियप्रसादविशेषादेः तल्लिङ्गस्य इन्द्रियव्यापारोपरमद्वारा ज्ञानाभावानुमापकस्य अनुभवसिद्धत्वात्।

नापि विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम् अप्रकाशितार्थप्रकाशकत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत् इत्यनुमानेन तत्सिद्धिः शङ्कनीया। प्रमाणज्ञानपदेन वृत्तेः विवक्षणे जडायास्तस्याः अज्ञानानिवर्तकतया बाधात्, चैतन्यविवक्षायामपि प्रागभावाद्यभावेन बाधात्। वृत्त्यवच्छिन्नचैतन्यविवक्षणे च वृत्तेरेव निवर्तकत्वसम्भवेन चैतन्यस्याज्ञानानिवर्तकत्वप्रसङ्गात्। एवमज्ञानस्य स्वविषयज्ञानोत्पत्तिप्रतिबन्धकत्वरूपं स्वविषयावरणत्वं न सम्भवति प्रतिबन्धकाज्ञानसत्त्वे कदाचिदपि ज्ञानानुत्पत्त्या अनिर्मोक्षप्रसङ्गात्।

न च मिथ्याप्रपञ्चोत्पत्त्यनुपपत्त्या भावरूपाज्ञानसिद्धिः। प्रपञ्चमिथ्यात्वस्यैवासिद्धेः।

न च 'अनृतेन हि प्रत्यूढाः', 'तेषां सत्यानामनृतमपिधानम्', 'नासदासीन्नो सदासीत् तदानीम्', 'तम आसीत् तमसा गूढमग्रे प्रकेतम्', 'इन्द्रो मायाभिः पुरुरूप ईयते', 'अविद्यायामन्तरे वर्तमानाः', 'अजामेकां लोहितशुक्लकृष्णाम्', 'नीहारेण प्रावृता' इत्यादयः श्रुतय एव भावरूपाज्ञाने प्रमाणमिति वाच्यम्। अनृतशब्दस्य पापकर्मपरतया, तमश्शब्दस्य प्रकृतिपरतया, 'इन्द्रो मायाभिरि'त्यत्र 'मायान्तु प्रकृतिं विद्यात्' इति श्रुत्यनुसारेण मायाशब्दस्यापि प्रकृतिपरतया, अविद्यानीहारादिशब्दानामपि कर्मप्रकृत्यन्यतरपरतया च भावरूपाज्ञानबोधकत्वाभावात्।

प्रयोजनाभावाच्च नाविद्याकल्पनं युक्तम्। ब्रह्मस्वरूपप्रकाशाभावस्तत्प्रयोजनमिति तु न सत्। प्रकाशस्य स्वरूपत्वे ब्रह्मस्वरूपस्यैवोच्छेदप्रसङ्गात्। स्वरूपातिरिक्तत्वे च अपसिद्धान्तापातात्। प्रकाशस्य अनादित्वे तदुत्पत्तिप्रतिबन्धासम्भवेन तदभावस्तन्नाश एव स्यादिति मोक्षकाले तत्प्रकाशानुपपत्तेः। सादित्वस्य च अनादिस्वप्रकाशब्रह्मणि असम्भवात्। प्रकाशस्य सत्यत्वे सद्वितीयतापत्तेः। मिथ्यात्वे च मोक्षकालसत्त्वे ब्रह्मव्यतिरिक्तसकलनिवृत्तेरभावात् मोक्षत्वाभावप्रसङ्गात्। तत्रासत्त्वे च तस्य स्वप्रकाशत्वप्रयोजकत्वाभावापत्तेश्च। तस्मान्नाविद्याकल्पनं सम्भवति।

तिरोधानमप्यविद्यया न सम्भवति। ब्रह्मणस्तिरोधाने तस्य अज्ञानवत्त्वप्रसङ्गेन सर्वज्ञत्वादिश्रुतिस्मृतिव्याकोपापत्तेः। अहमज्ञ इत्यहमर्थनिष्ठत्वेन अज्ञानानुभवाच्च तदनुपपत्तेश्च। ब्रह्माभिन्नस्य च प्रकाशप्रसक्त्यभावेन तन्निवृत्त्यर्थयास्तिरोधानकल्पनाया वैयर्थ्यात्। अन्तःकरणावच्छिन्नचैतन्यस्यापि स्वप्रकाशतया प्रसक्तप्रकाशस्य स्वरूपत्वे नाशप्रसङ्गात्, तदतिरिक्त्वे तस्य स्वप्रकाशत्वाप्रयोज्यत्वापत्तेश्च।

अथ 'अस्ति', 'प्रकाशते' इति व्यवहारयोग्यताविरहः, 'नास्ति', 'न प्रकाशते' इति व्यवहारयोग्यता वा तिरोधानम्। तथा च चैतन्यस्य आनन्दरूपेण तिरोधानं चैतन्यरूपेण अतिरोधानं चोपपद्यते इति चेन्न, स्वप्रकाशस्य चैतन्यस्य 'अस्ति', 'प्रकाशते' इति व्यवहारयोग्यतायाः सर्वदा सत्त्वेन तदभावासम्भवात्। आनन्दवृत्तिदशायां तिरोधानासम्भवात् तद्विरहदशायान्तु अप्रसक्त्यैव तिरोधानकल्पनावैयर्थ्यात्। आनन्दस्य स्वरूपातिरिक्तवृत्तिरूपत्वे ब्रह्मावरणमज्ञानमिति सिद्धान्तभङ्गापत्तेश्च। चिदानन्दभेदाध्यासात् तिरोधानातिरोधानोपपत्तिरित्यपि न, भेदाध्यासादेव अनन्दस्वरूपाप्रकाशोपपत्तेः तिरोधानकल्पनावैयर्थ्यस्य दुर्वारत्वात्।

भावरूपाज्ञानस्याश्रयोऽपि दुर्वचः। न तावत् चैतन्यस्य स्वप्रकाशस्य तदाश्रयत्वसम्भवः। विशिष्टे तत्सम्भवोऽपि न, विशेषणमात्रगतत्वे चैतन्यगतत्वभङ्गापत्तेः, विशेष्यविशेषणोभयगतत्वे च प्रागुक्तासम्भवात् ब्रह्मणोऽज्ञत्वप्रसङ्गाच्च। अज्ञानस्य ब्रह्मगतत्वेऽपि तत्कार्यमन्तःकरणस्यैवेति स्वीकारे तत्राज्ञानाङ्गीकारवैयर्थ्यम्, अन्तःकरणे एव तदङ्गीकारस्य युक्तत्वात्। अनादित्वात् ब्रह्मण एव अज्ञानाश्रयत्वमिति तु न शङ्क्यम्। तावता प्रवाहानादित्वस्य स्वीकर्तुं युक्तत्वात्। न च जडत्वात् नान्तःकरणमाश्रय इति वाच्यम्। तावता आकाशादिवत् निरधिकरणस्यैव अज्ञानस्य स्वीकर्तुं युक्तत्वात्।

चैतन्येतरस्य अज्ञानाश्रयत्वे च अपसिद्धान्तापातः, प्रकाशप्रसक्तेरेवाभावेन अज्ञानाङ्गीकारवैयर्थ्यं च। तस्मात् स्वप्रकाशब्रह्मचैतन्यभिन्नं चैतन्यं किञ्चिदज्ञानाश्रयत्वेन अङ्गीकरणीयमिति सिद्धः जीवब्रह्मभेदः।

किञ्च अविद्यास्वरूपमपि दुर्घटम्। तस्याः पारमार्थिकत्वे अद्वैतहानिप्रसङ्गात्, भिन्नसत्ताकत्वेन प्रपञ्चोपादानानुपपत्तेश्च। व्यावहारिकत्वे प्रातिभासिकोपादानत्वानुपपत्तेः। प्रातिभासिकत्वे च व्यावहारिकोपादानत्वानुपपत्तेः। यदि भिन्नसत्ताकस्यापि उपादानत्वमिष्यते तर्हि ब्रह्मण एव प्रपञ्चोपादानत्वसम्भवेन अविद्याकल्पनं व्यर्थम्।

लक्षणमपि तस्याः दुर्निरूपम्। न चानादित्वे सति स्वजन्यानपेक्षज्ञाननिवर्त्यत्वमविद्यात्वम् इति वाच्यम्। ज्ञानजन्यनिवृत्तिप्रतियोगित्वरूपस्य ज्ञाननिवर्त्यत्वस्याविद्यायामभावेन असम्भवात्। ब्रह्मण एवाविद्यानिवृत्तित्वेन ज्ञानजन्यत्वाभावात्।

नापि स्वसमानविषयकज्ञानप्राक्कालनियतसत्ताकत्वे सति तादृशज्ञाननिवर्त्यत्वं तत्। पूर्वपूर्वज्ञाने उत्तरोत्तरज्ञाननिवर्त्येऽतिव्याप्तेः, पूर्वपूर्वज्ञानसत्तायाः परब्रह्मस्वरूपत्वेन उत्तरोत्तरज्ञानप्राक्काल-नियतत्वाच्च, ब्रह्मावरणेऽतिव्याप्तेः, ज्ञानपदद्वयवैयर्थ्याच्च।

नापि अव्यवधानेन ज्ञानत्वेन ज्ञानसाध्यनिवृत्तिप्रतियोगित्वं तत्। अविद्यासम्बन्धनिवृत्तेरेव अविद्यानिवृत्तित्वात् तस्याश्च अविद्यानिवृत्तिसाध्यत्वोक्त्या ज्ञानसाध्यत्वाभावात् असम्भवप्रसङ्गात्। सर्वस्यापि ज्ञानस्य स्वध्वंसजनकत्वेनातिव्याप्तेश्च।

नापि ज्ञानातिरिक्तागन्तुकानपेक्षज्ञाननिवर्त्यत्वं तत्। अविद्यासम्बन्धनिवृत्तेरविद्यानिवृत्तिसापेक्षत्वेऽपि ब्रह्मस्वरूपायास्तस्या आगन्तुकत्वाभावेन अविद्यासम्बन्धेऽतिव्याप्तेः। क्षेमसाधारणसाध्यत्वनिवेशे च अविद्यासम्बन्धनिवृत्तेरविद्यानिवृत्तिरूपब्रह्मस्वरूपतया तस्य तदनपेक्षत्वेन तत्रैवातिव्याप्तेः। एवमन्यान्यपि लक्षणानि तदुक्तानि दुष्टानि वेदितव्यानि।

किञ्च कोऽयमविद्याप्रकाशः - अविद्यास्वरूपं वा तदतिरिक्तो वा ? नाद्यः, जडत्वादिप्रसङ्गात्। न द्वितीयः, तस्य ब्रह्मव्यतिरिक्तत्वे उक्तदोषतादवस्थ्यात्। ब्रह्मस्वरूपत्वे अविद्यायाः नित्यत्वप्रसङ्गात्।

न चाविद्याकारवृत्त्यवच्छिन्नचैतन्यमविद्याप्रकाश इति वाच्यम्। वृत्तेः जडत्वेन चैतन्यस्यैव तत्प्रकाशतया तस्य नित्यत्वेनाविद्याया अपि नित्यत्वप्रसङ्गात्।

किञ्चाविद्याया निवर्तकम्? यदि चैतन्यमात्रं तर्हि अविद्यास्वरूपस्यैवाभावप्रसङ्गः, श्रवणादिविधिवैयर्थ्यञ्च। न च वृत्तिप्रतिबिम्बितचैतन्यम्, चैतन्यानधिकविषयत्वेन चैतन्यस्यैवानिवर्तकत्वात्। श्वैत्यानिमित्यनधिकविषयस्य तत्प्रत्यक्षस्य शङ्खपीतत्वभ्रमनिवर्तकत्वन्तु प्रत्यक्षत्वस्य तत्प्रयोजकस्य सत्त्वात्। प्रकृते तु वृत्तिप्रतिबिम्बितत्वादेः निवर्तकतायां प्रयोजकतायाः अक्लृप्तत्वेन वैषम्यात्। अत एव न वृत्त्यवच्छिन्नकरणताकचैतन्यं वृत्त्युपहितचैतन्यं वा निवर्तकम्। वृत्तिविशिष्टचैतन्यस्य निवर्तकत्वे तु अन्वयव्यतिरेकाभ्यां वृत्तावेव निवर्तकत्वं पर्यवस्यति।

वृत्तेरेव तर्हि निवर्तकत्वमस्तु इति चेन्न, जडत्वेनानिवर्तकत्वात्। किञ्च वृत्तेः चैतन्यानधिकविषयकत्वे प्रागुक्तदोषप्रसङ्गः। तदधिकविषयकत्वे च अधिकस्य अद्वैतभङ्गप्रसङ्गभयेन मिथ्यात्वस्य वाच्यतया मिथ्याज्ञानस्य मोक्षसाधनत्वापत्त्या तत्त्वज्ञानस्याविद्यानिवर्तकत्वसिद्धान्तविरोधः।

नाप्यद्वितीयत्वप्रकारकज्ञानं निवर्तकम्, अद्वितीयत्वं च स्वरूपमेवेति वक्तुं युक्तम्। अज्ञानेन तत्स्वरूपस्य आवरणे जगदान्ध्यप्रसङ्गात्। तदनावरणे च अज्ञानस्य तद्विषयत्वाभावेन तज्ज्ञाननिवर्त्यत्वानुपपत्तेः, अज्ञानसमानविषयकज्ञानस्यैवाज्ञाननिवर्तकत्वात्। किञ्च ब्रह्मज्ञानस्य मूलाज्ञाननिवर्तकत्वे घटादिज्ञानानामपि तन्निवर्तकत्वप्रसङ्गः। तेषामपि ब्रह्मविषयकत्वात्। अद्वितीयब्रह्मज्ञाननिवर्त्यत्वे दोष उक्त एव।

न च 'श्रोतव्यः श्रुतिवाक्येभ्यः' इति विध्यनुसारेण नियमादृष्टसहितं वेदान्तवाक्यजन्य-ब्रह्मज्ञानमेव ब्रह्माज्ञानं निवर्तयति इति वाच्यम्। स्वान्वयव्यतिरेकानुगतकार्यसिद्ध्यर्थमेव व्रीह्यवहननादौ नियमादृष्टस्य कल्पनेन प्रकृते अविद्यानिवृत्तिरूपतदन्वयव्यतिरेकसिद्धकार्यस्य सत्त्वात् नियमादृष्टकल्पनस्यान्याय्यत्वात्। तस्मात् न किञ्चिदविद्यानिवर्तकं भवन्मते।

एवमविद्यानिवृत्तिरपि दुर्वचा। तस्याः मिथ्यात्वे निवृत्त्युपादानभूतस्याज्ञानस्य निवृत्त्या सहावस्थानस्य आवष्यकतया अनिर्मोक्षापत्तिः। अविद्यानिवृत्तेः सत्यत्वेऽपि ब्रह्मस्वरूपायास्तस्याः नित्यत्वेनानिर्मोक्षप्रसङ्गो दुर्वारः। तत्त्वज्ञानसाध्यत्वाभावश्च। किञ्च अविद्यासमानकालीनब्रह्मस्वरूपस्य अविद्यानिवृत्तित्वं न सम्भवति , विरोधविरहात्। नापि तत्त्वज्ञानोत्तरकालीनब्रह्मस्वरूपस्य निवृत्तित्वम्। विशेषणविशेष्यस्वरूपातिरिक्तेण विशिष्टस्वरूपाभावेन प्रागुक्तदोषावारणात्।

किञ्च 'मायान्तु प्रकृतिं विद्यात्' इति श्रुत्या प्रकृत्यविद्ययोरभेदे सिद्धे प्रकृतेः 'गौरनाद्यन्तवती' इत्यविनाशित्वस्य श्रवणात् अविद्यानिवृत्तेरसम्भवः। कर्मधारायश्रयणेन अन्तवत्त्वाङ्गीकारश्च न घटते, 'नित्या सततविक्रिया', 'अजामेकामि'त्यादिश्रुतिविरोधस्य दुष्परिहरत्वात्।

तस्मात् भावरूपाज्ञाने प्रमाणाभावात्। तेन तिरोधानासम्भवात्, तदाश्रयस्य दुर्वचत्वात्, तल्लक्षणस्य दुर्निरूपत्वात्, तत्प्रकाशासम्भवात्, तन्निवर्तकदौर्बल्यात्, तन्निवृत्तेः निरूपयितुमशक्यत्वाच्च न तत्कल्पनसम्भव इति न प्रपञ्चस्याध्यस्तत्वं प्रमाणवत् इति।

### अथाद्वैतविद्याविजयार्थसङ्ग्रहः

अत्र प्रपञ्चमिथ्यात्वम्, जीवब्रह्मैक्यम्, आत्मनः अहमर्थभिन्नत्वम्, तत्त्वमस्यादिवाक्यानाम-खण्डार्थबोधकत्वं च अद्वैतिभिः परिकल्पितं बहुश्रुत्यादिप्रमाणविरोधेन सत्तर्कैश्च खण्डितम्।

यदाहुरद्वैतिनः - ब्रह्मैव परमार्थः, तद्व्यतिरिक्तं सर्वं मिथ्या इति, तदयुक्तम्। प्रपञ्चमिथ्यात्वे प्रमाणाभावात्। न हि तत्र प्रत्यक्षं प्रमाणम्, मिथ्यात्वस्य अतीन्द्रियपदार्थघटितत्त्वेन प्रत्यक्षायोगात्। न चानुमानेन श्रुत्या च तन्मिथ्यात्वसिद्धिः, अनुमानानि च प्रपञ्चो मिथ्या दृश्यत्वात्, व्यावर्तमानत्वात्,

ब्रह्मव्यतिरिक्तत्वात्, परिच्छिन्नत्वात्, जडत्वाच्च शुक्तिरूप्यवदित्येवम्। श्रुतयश्च 'नेह नानास्ति किञ्चन', 'मृत्योस्समृत्युमाप्नोति य इह नानेव पश्यति', 'सर्वं खल्विदं ब्रह्म', 'आत्मैवेदं सर्वम्', 'एकमेवाद्वितीयम्' इत्याद्याः इति वाच्यम्। उक्तानुमानानां बाधितत्वाविकारित्वादिभिः सोपाधिकत्वात्। न हि 'घटः' इत्यादिप्रतीत्यनन्तरं 'नायं घटः' इत्यादिः बाधकप्रतीतिर्जायते। न च प्रात्यक्षिकबाधविरहेऽपि 'नेह नानास्ति किञ्चन' इत्यादिश्रुतिभिः बाधोऽस्त्येव इति वाच्यम्। एवं तर्हि 'नासदासीन्नो सदासीत्तदानीम्, तम आसीत्' इत्यादिभिः बाधात् ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गात्। यदि च 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादिभिः तस्य सत्यत्वावगमेन 'नासदासीदि'त्यीनामन्यपरत्वमित्युच्यते, तर्हि 'यस्यात्मा शरीरम्, यस्य पृथिवी शरीरम्' इत्यादिभिः चिदचिदात्मकप्रपञ्चस्य ब्रह्मशरीरत्वप्रतिपादनेन सत्यत्वसिद्ध्या 'नेह नानास्ती'त्यादेः स्वतन्त्रब्रह्मनानात्वनिषेधपरत्वस्वीकार एवोचितः।

किञ्च प्रमाणजन्यज्ञानविषयत्वेन सत्प्रतिपक्षता दुर्वारा। हेतूकृतं च दृश्यत्वं यदि प्रत्यक्षविषयत्वं तर्हि 'घटः सन्' इत्यादिप्रत्यक्षविषये शाब्दापरोक्षविषये च ब्रह्मणि व्यभिचारः। यदि ज्ञानसामान्यविषयत्वं तर्ह्यपि स एव दोषः। अवेद्यत्वेन तदुभयानङ्गीकारे च ब्रह्मणः शशविषाणवत् मिथ्यात्वापत्तिः। तदुभयाङ्गीकारे च शुक्तिरूप्यवत् मिथ्यात्वापत्तिः। यदि च वृत्त्यवच्छिन्नचैतन्यविषयत्वरूपं तत्, तर्हि अनिर्मोक्षप्रसङ्गः, जडरूपया वृत्त्या ब्रह्मप्रकाशासम्भवात्। तस्याः प्रकाशकत्वे तु तयैव प्रपञ्चप्रकाशसम्भवात् चैतन्यविषयत्वे मानाभावात् स्वरूपासिद्धिः।

किञ्च ज्ञानविषयत्वेनैव सर्वव्यवहारोपपत्तौ वृत्तौ न किञ्चित्प्रमाणमस्ति। यदि च दृश्यध्यस्तत्वमेव दृश्यत्वं विवक्षितम्, तर्हि तस्य सार्वदिकत्वात् सर्वेषां सर्वदा सर्वप्रकाशप्रसङ्गः। विषयविषयिभावस्य करणविशेषाधीनत्वोपगमे तु तस्य अध्यासाप्रयोज्यत्वेन तत्साधकत्वाभावापत्तिः, इन्द्रियसन्निकर्षादेरेव तत्प्रयोजकत्वोपपत्तौ अध्यासकल्पनस्य निर्युक्तिकता च।

दृष्टान्तरहितानि चोक्तानुमानानि, सत्यरजतस्यैव दोषवशेन भानोपगमसम्भवेन शुक्तिरूप्यस्यैवासिद्धेः, अतिरिक्तरजतकल्पने प्रमाणाभावात्। न च सिद्धरजतस्यासन्निकृष्टत्वात् प्रत्यक्षासम्भव इति वाच्यम्। यतः विशेष्यसन्निकर्ष एव विशिष्टप्रत्यक्षहेतुः, लाघवात्, न तु विशेषणसन्निकर्षोऽपि, गौरवात्। उष्णीषाच्छन्नकुण्डलविशिष्टपुरुषप्रत्यक्षापत्तिस्तु कुण्डलस्यापि विशेष्यतया तत्सन्निकर्षाभावात्, विशेषणावच्छिन्नविशेष्यसन्निकर्षस्य लौकिकप्रत्यक्षहेतुत्वाद्वा वारणीया। न चैवं सर्वत्र सन्निकर्षे वह्निविशिष्टप्रत्यक्षापत्तिरिति वाच्यम्। तत्रानुमितिसामग्रीप्राबल्येन तदभावात्। अन्यथा विशेषणसन्निकर्षहेतुत्वोपगमेऽपि व्यवहितरूपविशिष्टघटादिप्रत्यक्षापत्तेः दुर्वारत्वात्, संयुक्तसमवायस्य विशेषणसन्निकर्षस्याक्षतत्वात्। तस्मात् शुक्तिविशेष्यकरजत-प्रत्यक्षानुपपत्त्या शुक्तिरूप्यसिद्धिरित्ययुक्तम्। तत्र रजतत्वस्य शुक्त्यंशे प्रकारत्वात्।

नापि श्रुत्या प्रपञ्चमिथ्यात्वसिद्धिः। भेदश्रुतीनां बह्वीनामप्रामाण्यप्रसङ्गात्। तस्मात् चेतनाचेतनानां

ब्रह्मशरीरत्वप्रतिपादकश्रुतीनां सद्भावाच्च 'नेह नानास्ति' इत्यादिश्रुतीनाम् अब्रह्मात्मकचेत-नाचेतनारूपप्रपञ्चनिषेधे एव तात्पर्यवर्णनं न्याय्यम्। तस्मात् सत्यः प्रपञ्चोऽपि।

जीवब्रह्मणोरैक्यमप्यनुपपन्नम्, प्रमाणाभावात्। न तावत् कस्यचिदस्ति प्रत्यक्षम् 'अहमीश्वर' इति। नापि तद्व्याप्यलिङ्गं दृश्यते। नापि 'इदं ब्रह्मेदं क्षत्रमिमे लोकाः इमे देवा इमानि भूतानि, इदं सर्वं यदयमात्मा' इत्यादिश्रुतिस्तत्र प्रमाणम्। तत्र सामानाधिकरण्यस्य बाधार्थत्वे अचेतनवत् सर्वेषामपि चेतनानां बाधप्रसङ्गेन ईश्वरस्य केनाभेदः साधनीयः इति। तस्य अभेदार्थत्वे च अचेतनानामपीश्वराभेदप्रसङ्गः। तस्मात् चिदचिद्वाचकपदानां तत्प्रकारकपरमात्म-परत्वेनैव शरीरात्मभावनिबन्धनं सामानाधिकरण्यं युक्तम्। श्रुत्यन्तराण्यप्येवञ्जातीयानि इत्थमेव व्याख्येयानि। अतः प्रत्यक्षादिप्रमाणसिद्धः जीवेश्वरभेदः अनपलप्यः। 'नाहमीश्वर' इति प्रत्यक्षेण हि जीवेशभेदो विषयीक्रियते, प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपयोग्यताविशिष्टायाः अनुपलब्धेरेव अभावप्रत्यक्षहेतुतया प्रतियोगियोग्यत्वस्यातन्त्रत्वात्। श्रुतिश्च—

**'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति॥'**

इत्याद्या भूयसी तत्र प्रमाणम्।

यदुक्तम् अहमर्थो नात्मा, किन्तु अन्तःकरणमेव, अहमर्थस्य सुषुप्तिमुक्त्योरननुवृत्तेः। अहमर्थस्य आत्मत्वे तस्य नित्यत्वेन तदाप्यनुवृत्तिप्रसङ्गात् इति, तदप्ययुक्तम्। तथा सति 'अहं जानामि', 'अहं करोमि', 'अहं सुखी', 'अहं दुःखी' इति ज्ञातृत्वकर्तृत्वभोक्तृत्वाद्यनु-भवविरोधात्, जडस्यान्तःकरणस्य ज्ञानाद्याश्रयत्वासम्भवात्। अन्तःकरणावच्छिन्नचैतन्यस्य अहमर्थत्वकल्पना च न कार्या, विशिष्टे तत्कल्पनापेक्षया विशेष्ये चैतन्ये एव तत्कल्पनायाः लाघवेनौचित्यात्। तस्मादहमर्थ आत्मैव। सुषुप्तिमुक्त्यवस्थयोरपि तस्यानुवृत्तिरिष्टैव। अत एव सुप्तोत्थितस्य 'सुखमहमस्वाप्सम्' इत्यहमर्थप्रत्यवमर्शः। श्रूयते च सुषुप्तिकाले विशिष्याज्ञानानुवादः 'नाह खल्वयमेवं सम्प्रत्यात्मानं जानाति अयमहमस्मीति' इति। अहमर्थस्याप्यप्रकाशे अयमितिपदवैयर्थ्यापत्तेः। तेन हि मनुष्यत्वादिधर्मानुवादेन मनुष्यत्वादिधर्मविशिष्टोऽहमिति न जानाति, किन्तु अहमित्येव इति प्रतीयते। एवं मुक्त्यवस्थायामपि अहमर्थानुभवः श्रुतिप्रसिद्धः 'कश्चिद्ध वा अस्माल्लोकात् प्रेत्य। आत्मानं वेद। अयमहमस्मीति। अथ यो हैवैतमग्निं सावित्रं वेद। स एवास्माल्लोकात्प्रेत्य। आत्मनं वेद। अयमहमस्मीति' इति।

न चाहङ्कार एवाहमर्थः प्रत्यभिज्ञानादिति वाच्यम्। बुद्धिशब्दप्रत्यभिज्ञानेन संविदोऽपि बुद्धिशब्दवाच्यमहत्तत्त्वानतिरेकप्रसङ्गात्। अध्यवसायहेतुत्वमात्रेण बुद्धिशब्दाभिधेयत्वं महत्तत्त्वस्येति चेत्, तर्हि अनात्मनि देहादावहमभिमानकरत्वेन अहङ्कारपदाभिधेयत्वं न तु अहमर्थत्वमिति

तुल्यम्। न चात्मभेदकल्पने गौरवं बाधकम्, तस्य प्रामाणिकत्वेन अदोषत्वात्। सुखदुःखादिविचित्रकार्यस्यैव तद्भेदे मानत्वात्। अन्यथा भवन्मते औपाधिकचैतन्यभेदस्याप्युच्छेदप्रसङ्गात्। अन्तःकरणचैतन्ययोरुभयोरप्यप्रामाणिकाहमर्थत्वकल्पनेन अप्रामाणिकचैतन्याभेदकल्पनेन भेदस्यान्तःकरणाधीनत्वकल्पनेन भेदप्रतीतेः भ्रमत्वकल्पनेन च विपरीतमेव गौरवं भवन्मते। अहमर्थस्य आत्मत्वे 'मामहं जानामी'ति ज्ञानविषयत्वं स्वप्रकाशत्वेन वा ज्ञानान्तरेण वा उपपद्यते। अभेदेऽपि विषयविषयिभावसमर्थनात्। 'स्वमपीतो भवति' इति श्रूयमाणोऽपि सुषुप्तौ लयः ज्ञानसङ्कोच एव, न तु स्वरूपविनाशः, आत्मनः नित्यत्वश्रवणात्। अन्तःकरणस्य सुषुप्तौ अपि सूक्ष्मरूपेणावस्थानमित्युक्तिस्तु न घटते, तदा तस्य प्रकाशमानत्वे सुप्तोत्थितस्य तत्परामर्शापत्तेः, अप्रकाशमानत्वे च तदध्यासाभावेन तदवस्थानासम्भवात्। 'असद्वा इदमग्र आसीत्' इति श्रुतिश्च न तस्य सूक्ष्मरूपेणावस्थाने प्रमाणम्। तस्याः कार्यावस्थाप्रहाणपरत्वोपपत्तेः।

किञ्चाहमर्थस्यात्मत्वाभावे मुक्तानामीश्वरस्य च अहम्बुद्ध्यभावप्रसङ्गः। तस्मादहमर्थः आत्मैवेति सिद्धम्। यदपि 'सत्यं ज्ञानमनन्तं ब्रह्म', 'तत्त्वमसि' इत्यादिवाक्यानामखण्डचैतन्यमात्रबोधकत्वमिति, तदपि न, लोके वेदे च सर्वस्यापि वाक्यस्य स्वघटकपदार्थसंसर्गपरत्वस्यावधारणात्। व्युत्पत्त्यनादरे ज्योतिष्टोमादिवाक्यानामपि स्वरूपमात्रपरत्वेन वैदिककर्ममात्रोच्छेदापत्तिः। समानाधिकरणवाक्यानामेव स्वरूपपरत्वमित्यत्र विनिगमनाविरहात्। वैपरीत्यस्यापि सम्भवात्। तस्मात् समानाधिकरणवाक्ये पदार्थानामभेदः संसर्गः, तदितरवाक्ये च सम्बन्धमात्रमिति अनुभवबलात् स्वीकार्यम्। अनेकविशेषणविशिष्टविशेष्याभेदस्यैव च समानाधिकरणवाक्यार्थत्वम्। अन्यथा एकेनैव पदेन स्वरूपे बोधिते पदान्तरवैयर्थ्यप्रसङ्गः। न चासत्यादिव्यावृत्त्यर्थं सत्यादिपदमिति वाच्यम्। अनन्तपदेन इतराभेदमात्रस्य निषेधेन असत्याद्यभेदस्यापि निषिद्धत्वात्। एवं पदार्थसंसर्गाबाधरूपयोग्यतायाः अभावेन सत्यज्ञानादिवाक्यस्य अयोग्यतापत्तिः। एवमुद्देश्यविधेयभावोऽप्यनुपपन्नः, ज्ञातस्य उद्देश्यत्वात् अज्ञातस्य च विधेयत्वात्, एकस्य स्वरूपस्य ज्ञाताज्ञातत्वानुपपत्तेः।

न च लक्षणवाक्यत्वेन हेतुना 'प्रकृष्टप्रकाशश्चन्द्र' इति वाक्यदृष्टान्तेन अखण्डार्थत्वसिद्धिरिति वाच्यम्। लक्षणवाक्यत्वस्य असाधारणधर्मविशिष्टप्रतिपादकत्वरूपत्वे असाधारणधर्मवैशिष्ट्यज्ञानजनकस्य तदविषयकज्ञानजनकत्वासम्भवेन विरुद्धत्वात्। स्वरूपमात्रप्रतिपादकत्वरूपत्वे साध्याविशेषात्। असाधारणधर्ममात्रप्रतिपादकत्वरूपत्वे ब्रह्मस्वरूपपरत्वव्याघातात्। अन्यादृशस्य च तस्य निर्वक्तुमशक्यत्वात्। दृष्टान्तासिद्धिश्च। अस्मिन् ज्योतिर्मण्डले कश्चन्द्र इति प्रश्नस्य हि तदुत्तरम्। प्रश्नश्च सः न स्वरूपपरः, ज्योतिर्मण्डलान्तर्गतचन्द्रस्वरूपस्यापि प्रत्यक्षदृष्टत्वात्। प्रत्यक्षेण उत्पन्नमपि ज्ञानमनवधारणात्मकमिति तस्य अज्ञानसंशयनिवर्तकत्वाभावात् स्वरूपप्रश्नः उपपद्यते इति तु न, वर्तुलत्वसकलङ्कत्वप्रकृष्टप्रकाशत्वादिविशिष्टतया चन्द्रस्वरूपस्य अवधृतत्वेन

अनवधारणात्मकत्वासिद्धेः। अन्यथा प्रकृष्टप्रकाशश्चन्द्र इत्युत्तरवाक्यजन्यज्ञानस्यापि अनधिकविषयकत्वेन अवधारणात्मकत्वानुपपत्तेः। तस्मात् चन्द्रस्वरूपस्यावधृतत्वात् कश्चन्द्र इति प्रश्नस्य चन्द्रपदवाच्यत्वविषयत्वमेव युक्तम्। अत एव कः सोमः इति पुनः प्रश्नोऽप्युपपद्यते। किञ्च भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम्। तच्च प्रवृत्तिनिमित्तभेदे सत्येव उपपन्नं भवति। तस्मात् वाक्यं नाखण्डार्थबोधकम्।

तत्त्वमस्यादिवाक्ये तत्त्वम्पदयोरुभयोरपि ब्रह्मपरत्वेन सामानाधिकरण्योपपत्तिः। त्वम्पदस्य ब्रह्मवाचित्वं च शरीरवाचिशब्दस्य शरीरिपर्यन्तत्वस्य व्युत्पत्तिसिद्धत्वात्। जीवस्य ब्रह्मशरीरत्वं च 'यस्यात्मा शरीरम्' इत्यादिश्रुतिसिद्धम्। 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' इत्यनुशासनात् मध्यमपुरुषपदप्रयोगोऽपि उपपद्यते। तस्मान्नाखण्डार्थबोधकत्वं वाक्यानाम्, किन्तु सविशेषवस्तुबोधकत्वमेवेति सिद्धम्। इति अद्वैतविद्याविजयसङ्ग्रहः।

**अथ परिकरविजयार्थसारः**

तप्तमुद्राधारणस्य धर्मत्वं व्यवस्थाप्यते। तच्च श्रुतिस्मृतिपुराणपञ्चरात्रप्रमाणकम्। पठ्यमानश्रुतिषु शतपथे तावत्, 'अथ कात्यायनः पप्रच्छ। याज्ञवल्क्य इति होवाच – परं ब्रह्मेत्येको देवो विश्वतश्चक्षुरुत विश्वात्मा विश्वतोबाहुरुत एष पुरुषोन्तर्यामोऽन्तर्यामस्स विश्वतोमुखस्सर्वात्मा विश्वतस्पादि'ति। 'नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायत' इति। 'सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयन्देव एकः। पुरुषोऽन्तर्यामोऽन्तर्यामः। स आदित्यतेजो भवति, स आदित्यलोको भवति, स विष्णुरेव भवति। तप्तं चक्रं द्विभुजे धार्यमित्यग्निहोत्रमेव लोको भवत्यूर्ध्वपुण्ड्रमालिखेत् तस्मात् द्विरेखं भवति। भूस्स्वयम्भूर्ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद ?' इति।

त्रिष्वपि वेदेषु - 'पवित्रं ते विततं ब्रह्मणस्पते। प्रभुर्गात्राणि पर्येषि विश्वतः। अतप्ततनूर्न तदामो अश्नुते। शृतास इद्वहन्तस्तत्समाशते'ति।

यजुषि काठके - 'चरणं पवित्रं विततं पुराणम्। येन पूतस्तरति दुष्कृतानि। तेन पवित्रेण शुद्धेन पूताः। अति पाप्मानमरातिं तरेम। लोकस्य द्वारमर्चिमत्पवित्रम्। ज्योतिष्मद्भ्राजमानं महस्वत्। अमृतस्य धारा बहुधा दोहमानम्। चरणं नो लोके सुधितां दधातु।' इति।

'पवित्रं ते' इत्यादिश्रुतौ पवित्रशब्दस्य परिशुद्धित्राणकर्तृत्वावच्छिन्ने योगशक्तिः, सुदर्शनत्वावच्छिन्ने रूढिरिति स योगरूढः। 'सुदर्शनं सहस्रारं पवित्रं चरणं पविः', 'सुदर्शनं हरेश्चक्रं पवित्रं चरणं पविः' इति निघण्टुवचनात्। अत एव चरणशब्दोऽपि सुदर्शनपरः।

ऋचि साम्नि च—

'चमूषच्छ्येनश्शकुनो बिभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत्।
अपामूर्मिं सचमानस्समुद्रं तुरीयं धाम महिषो विवक्ति ? इति।

ऋग्वेदे खिले—

'चक्रं बिभर्ति वपुषाऽभितप्तं बलं देवानाममृतस्य विष्णोः।
स एति नाकं दुरिता विधूय प्रयान्ति यद्यतयो वीतरागाः'॥ इति।

एवं पारमेश्वरसंहितायां प्रतिष्ठाध्याये चक्रप्रतिष्ठायाम्—

तत्तत्स्थापनकाले तु तत्तत्संज्ञान् मनून् जपेत्।
विद्याङ्गतामित्याद्यं यत् पाठयेत् तद्विदो जनान्॥
चमूषच्छ्येन इति च प्रते विष्णो इति तृचौ ( त्वृचौ? )।
पाठयेत् बह्वृचान् पश्चात् शाकुनं सूक्तमेव च॥
धृतोर्ध्वपुण्ड्रः कृतचक्रेति मन्त्रं ततः परम्।
पवित्रं ते विततमित्येतन्मन्त्रं यजुर्मयान्॥
क्षुरोहरेति सामज्ञान् पवित्रमित्यग्निरित्यपि।
एभिर्वयमुरुक्रमस्य इत्याथर्वणान् द्विजान्॥
एवं संस्थाप्य विधिवत् नवभिः कलशैस्ततः।
स्नापयेत् ब्रह्मसूक्तस्थैर्मन्त्रैरष्टाभिरेव च॥

इति। अनेन सुदर्शनपरत्वं स्पष्टं ज्ञापितं तेषां मन्त्राणाम्।

एवं भारते—

नान्यदेवं नमस्कुर्यात् नान्यं देवं निरीक्षयेत्।
चक्राङ्कितस्सदा तिष्ठेत् मद्भक्तः पाण्डुनन्दन॥ इति,

आग्नेये—

पञ्चायुधानि धार्याणि भक्तिश्रद्धोपबृह्मितैः।
ललाटे मूर्ध्नि हृद्बाह्वोरेकैकञ्च पृथक् पृथक्॥ इति,

श्रीवाराहे—

मच्चक्राङ्कितदेहो यो मद्भक्तो भुवि दुर्लभः।
मामुपैष्यति धर्मात्मा मदेकान्तेन चेतसा॥ इति,

स्कान्दे—

येषां चक्राङ्कितं गात्रं लोकेषु परिदृश्यते।
ते वै स्वर्गस्य नेतारो ब्राह्मणा भुवि देवताः॥

इति च चक्रादिधारणे प्रमाणम्।

एवमूर्ध्वपुण्ड्रधारणमपि श्रुत्यादिसिद्धम्। महोपनिषदि—

**धृतोर्ध्वपुण्ड्रः परमेशितारं नारायणं साङ्ख्ययोगाधिगम्यम्।**
**ज्ञात्वा विमुच्येत नरस्समस्तैः संसारभारैरिह चेति विष्णुम्।। इति,**

आथर्वणे—

'हरेः पादाकृतिमात्मनो हिताय मध्येच्छिद्रमूर्ध्वपुण्ड्रं यो धारयति स परस्य प्रियो भवति स पुण्यवान् भवति स मुक्तिभाग्भवती'ति च श्रूयते।

स्मृतिश्चापि तत्र प्रमाणम्, यथा बोधायनस्मृतौ —

**'पूजादिसमये सायम्प्रातः समाहितः।**
**ऊर्ध्वपुण्ड्रधरो विप्रो भवेत् शूद्रो न चान्यथा।। इति,**

शातातपस्मृतौ—

**यच्छरीरं मनुष्याणामूर्ध्वपुण्ड्रविनाकृतम्।**
**द्रष्टव्यो नैव तद्देहः श्मशानसदृशो हि सः।। इति,**

पराशरस्मृतौ—

**निरूर्ध्वपुण्ड्रस्तु भवेन्न कदाचिदपि द्विजः।**
**वैष्णवश्चेत् विशेषेण सर्वकर्माणि सोऽर्हति।। इति च।**

यानि चापाततः ऊर्ध्वपुण्ड्रविरोधीनि वचनानि दृश्यन्ते, तानि त्रिशूलाकारोर्ध्वपुण्ड्रविषयाणि मन्तव्यानि। अथवा उद्धृतासीत्यादिश्रौतमन्त्रविधुरोर्ध्वपुण्ड्रधारणस्य त्रैवर्णिकानर्हत्वपराणीति। पारमेश्वरसनत्कुमारसंहितादिषु सुदर्शनधारणोर्ध्वपुण्ड्रधारणविधानानि द्रष्टव्यानि।

ननु पाञ्चरात्रस्यैवाप्रमाणत्वात् कथं तद्विहितसुदर्शनधारणादेः धर्मत्वमिति चेत् न, तत्प्रणेतुः नारायणस्य भगवतः मोहाद्यभावस्य सार्वज्ञ्यस्य च 'कारणरूपमेकाकारं परब्रह्म शोकमोहविनिर्मुक्तं विष्णुं ध्यायन्न सीदति' इति -

**वेदाहं समतीतानि वर्तमानानि चार्जुन।**
**भविष्याणि च भूतानि मां तु वेद न कश्चन।।**

इत्यादिश्रुतिस्मृतिसिद्धत्वेन तच्छास्त्रस्य आप्ततमप्रमाणितत्वात्। तस्य नारायणप्रणीतत्वे च मानम् 'पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्' इत्यादिवचनम्। नित्ये वेदे काठकादिव्यवहारवद्व्यासप्रोक्ते महाभारते संहिताविशेषे वैशम्पायनसंहितादिव्यवहारवच्च अशेषतः भगवत्प्रणीते एव पञ्चरात्रे ब्रह्मादिप्रवक्तृकत्वमादाय मुनिप्रणीतत्वव्यवहारः मोक्षधर्मे।

श्रुत्यादिविरुद्धजीवोत्पत्तिप्रतिपादकत्वेनाप्रामाण्यमिति शङ्का च विरोधाभावप्रतिपादनेन ब्रह्मसूत्रभाष्यप्रभृतिषु अत्र च विस्तरेण परिहृता।

इदञ्च पञ्चरात्रप्रामाण्यं स्मृतीतिहासपुराणसिद्धम्। तथाहि - याज्ञवल्क्यः स्वोक्तार्थे भगवच्छास्त्रं साक्षीकुर्वन् आह—

**'ओङ्काररथमारुह्य मनः कृत्वा तु सारथिम्।**
**ब्रह्मलोकपदान्वेषी याति विष्णोः परं पदम्॥**
**पाञ्चरात्रे तथा ह्येष भगवद्वाचकस्स्मृतः।**
**बलं वीर्यं तथा तेजस्त्रिमात्रेति च संज्ञितः॥**
**ज्ञानैश्वर्ये तथा शक्तिस्त्रिस्वभाव इति स्मृतः।**
**सङ्कर्षणोऽथ प्रद्युम्नो ह्यनिरुद्धस्तथैव च॥**
**ते व्यूह इति निर्दिष्ट ओङ्कारो विष्णुरव्ययः।' इति,**

जमदग्निस्मृतौ—

**'वैदिकेन विधानेन पूजां कुर्याद्धरेस्ततः।**
**अलाभे वेदमन्त्राणां पाञ्चरात्रोदितेन वा॥' इति,**

उत्तररामायणे—

**'पुराणैश्च वेदैश्च पाञ्चरात्रैस्तथैव च।**
**ध्यायन्ति योगिनो नित्यं क्रतुभिश्च यजन्ति तम्॥' इति।**

महाभारते—

**'ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः।**
**अर्चनीयश्च सेव्यश्च नित्ययुक्तैस्स्वकर्मसु॥**
**सात्त्वतं विधिमास्थाय गीतस्सङ्कर्षणेन यः।' इति।**

विष्णुपुराणे अक्रूरः पञ्चमांशे—

**'यज्वभिर्यज्ञपुरुषो वासुदेवश्च सात्त्वतैः।**
**वेदान्तवेदिभिर्विष्णुः प्रोच्यते यो नतोऽस्मि तम्॥'**

इति च। एवं सुबहुप्रमाणसिद्धं पञ्चरात्रप्रामाण्यम्।

अथ भागवतमाहात्म्यमुपवर्णितम्। पराशरस्मृतौ —

**सहस्त्रवार्षिकी पूजा विष्णोर्भगवतो हरेः।**
**सकृद्भागवतार्चायाः कलां नार्हति षोडशीम्॥**

**यथा तुष्यति देवेशो महाभागवतार्चनात्।**
**तथा न तुष्यति हरिः विधिवत्स्वार्चनादपि॥**

**सकृत्सम्पूजिते पुण्ये महाभागवते गृहे।**
**आकल्पकोटि पितरः परितृप्ता न संशयः॥ इति,**

शाण्डिल्यस्मृतौ च—

**तथा स्वाराधनेनापि न प्रीतो भगवान् हरिः।**
**यथा भागवतश्रेष्ठपादाम्बुरुहसेवनात्॥**
**सुवर्णां गां गुणवतीं भूमिं वृद्धिकरीमपि।**
**दद्यात् भागवताग्र्येभ्यो भोगमोक्षाप्तये सुधीः॥ इति,**

महाभारते -

**पत्रं वाप्यथवा पुष्पं फलं वाऽप्यन्यदेव वा।**
**ददाति मम शूद्रोऽपि शिरसा धरयामि तम्॥ इति,**

श्रीगीतायाम् -

**बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।**
**वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥**

इत्यादीनि सुबहूनि प्रमाणानि भागवतमाहात्म्यमुद्घोषयन्ति।

सोऽयमतिसङ्क्षेपः वेदान्तविजयप्रतिपाद्यानाम्। विस्तरस्य ग्रन्थसेवनैकवेद्यत्वात्। सुबहोः कालात्प्राक्प्रणीतस्याप्यस्य ग्रन्थस्य सामस्त्येन प्रकाशनमद्यावधि न जातम्। यद्यपि सद्विद्याविजयादि प्रकाशितम्, तथापि पञ्चानामेषां विजयानामेकत्रोपलब्धिसौकर्यमुद्दिश्य ग्रन्थोऽयं प्रकाशनीय इति निरचैषम्। अस्य ग्रन्थस्य सम्पादनाय बह्व्यः मातृकाः सङ्गृहीताः। मद्रास्-विश्वविद्यालयीयात् सर्वकारीयप्राच्यविद्यामातृकाभाण्डागारात्, अडयार्-ग्रन्थालयात्, तिरुपतिस्थायाः श्रीवेङ्कटेश्वरप्राच्य-विद्यानुसन्धानसंस्थायाश्च अपेक्षिताः मातृकाः तालपत्ररूपाः कर्गजपत्ररूपाश्च लब्धाः। तासामध्ययनपरिशीलनादिना सम्पादनकर्मेदं निर्वर्तितम्। अद्वैतविद्याविजयस्य मातृकाद्वयं स्पष्टाक्षरमपि असम्पूर्णं दोषबहुलं च आसीत्। या च तृतीया मातृका ग्रन्थलिपिनिबद्धा लब्धा तस्यां यद्यपि अक्षराणि प्रायो निर्दुष्टानि तथापि कश्चन भागः कीटजग्धो दृश्यते। तस्य सम्पादनं दुष्करम् इति मन्वानेन मया सुस्थस्य भागस्यैव प्रकाशनमधुना क्रियते। सन्दर्भेऽस्मिन् प्राङ्निर्दिष्टग्रन्थालयाधिकारिभ्यः सर्वेभ्योऽपि धन्यवादान् व्याहर्तुकामोऽस्मि। जटिलस्यास्य ग्रन्थस्य सम्पादने अपेक्षितं ज्ञानं येषां निस्सीमकृपया मया अवाप्तं तेषामस्मद्गुरुचरणानां तथा भ्रातृपादानां न्यायमीमांसावेदान्तपारङ्गतानां विद्वदग्रगण्यानां प्रातस्स्मरणीयानां तिरुपतिस्थश्रीवेङ्कटेश्वरवेदविश्वविद्यालयस्य कुलपतिचराणां सम्प्रति

कर्णाटकसंस्कृतविश्वविद्यालयस्य कुलपतिपदमलङ्कुर्वाणानां प्रो. का. ई. देवनाथाचार्यवर्याणां चरणपरिसरे प्रणतिततीः समर्पयामि। भागशः ग्रन्थस्यास्य प्रकाशनेन बहूपकारमाहितवद्भ्यः ग्रन्थकारवंश्येभ्यो मदीयमाधमर्ण्यं सप्रणामं प्रकटयामि। प्राङ्मुद्रितं परिकरविजयं प्रदाय उपकृतवते न्यायवेदान्तविद्वन्मणये मत्सतीर्थ्याय श्रीमणिवण्णन् महोदयाय कृतज्ञतामावेदयामि। पदसाधुत्वादिनिर्णये उपकारमातन्वन् आलङ्कारिकमूर्धन्याः न्यायवेदान्तविद्वांसः श्रीपुरुषोत्तममहोदयाः (उमेश नेपाल) इति तेभ्यो बहु धारयामि।

एवं टङ्कणकर्म साधु निर्वर्तितवद्भ्यः डॉ. तपन – महोदयेभ्यः, श्री ईश्वरमूर्तिमहोदयाय, तथा सप्तमी, श्रीविद्या, आदित्यः, मयूरेशः, हितेशभट्टः इत्याख्येभ्यः राष्ट्रियसंस्कृतसंस्थानीय-राजीवगान्धीपरिसरस्य छात्रेभ्यश्च मदीयां धन्यतामाविष्करोमि। आङ्गले प्रास्ताविकं विलिख्य ग्रन्थमिमं संस्कृतभाषानभिज्ञानामपि उपादेयं कृतवते पूर्वोत्तरमीमांसानिष्णाताय श्री. वेळुक्कुडि रङ्गनाथमहोदयाय मदीयं कार्तज्ञ्यं विनिवेदयामि। टङ्कणे पाठसंशोधनपूर्वकमुचितपाठनिवेशने च प्रभूतं साहाय्यं न्यायवेदान्तविदुषा डॉ. राघवेन्द्र अरोळिळमहोदयेनाचरितमविस्मरणीयम्। तस्मै मदीयां कृतवेदितामावेदयामि। एवं परिकरविजये पाठशोधने उचितपाठनिर्णये च न्यायवेदान्तयोः कृतभूरिपरिश्रमः श्री. के. इ. गोपलदेशिकः (मम भ्रातुष्पुत्रः) व्यधात्। अतः सोऽपि धन्यवादमर्हति। टङ्कणव्यवस्थाकरणेन सुबहूपकृतवते सङ्गणकविद्याभिज्ञाय श्री रवीशभट्टमहोदयाय कार्तज्ञ्यं प्रकटयामि।

अस्य ग्रन्थस्य सम्पादनोचितद्रव्यसाहाय्यं यावदपेक्षं विधाय प्रकाशनभरमप्यात्मनि विन्यस्य सम्पादनकर्मणि अवर्जनीयतया प्रसक्तं विलम्बमपि सोढवद्भ्यो 'राष्ट्रियपाण्डुलिपिमिशन्' संस्थायाः आधिकारिभ्यः विशेषतः डा. सङ्घमित्रा बसु महोदयाभ्यो भूयो भूयो धन्यवादान् व्याहरामि। आशासे च ग्रन्थोऽयं वेदान्तविचारकुतूहलिनां विदुषां शोधकर्मणि प्रवृत्तानां च महते उपकाराय कल्पेतेति। महता श्रमेण सम्पादितेऽपि अत्र ग्रन्थे ममानवधानात् बुद्धिमान्द्यात् च सम्भूताः दोषाः सद्भिः विपश्चिद्भिः शोधनीयाः इति सम्प्रार्थये।

**आचार्यः का.इ. मधुसूदनः**
न्यायविभागाध्यक्षः
केन्द्रीयसंस्कृतविश्वविद्यालयः,
गुरुवायूर् परिसरः

# सङ्केताक्षरविवरणम्

| | | |
|---|---|---|
| 1. | तै.आ. | तैत्तिरीयारण्यकम् |
| 2. | मु.उ. | मुण्डकोपनिषत् |
| 3. | तै.ब्रा. | तैत्तिरीयब्राह्मणम् |
| 4. | तै.सं. | तैत्तिरीयसंहिता |
| 5. | बृ. उ. | बृहदारण्यकोपनिषत् |
| 6. | पा.सू. | पाणिनिसूत्रम् |
| 7. | आप.श्रौ.सू. | आपस्तम्बश्रौतसूत्रम् |
| 8. | काठक | काठकम् |
| 9. | वि.प्र.सं. | विवरणप्रमेयसंग्रहः |
| 10. | तै.उ. | तैत्तिरीयोपनिषत् |
| 11. | छा.उ. | छान्दोग्योपनिषत् |
| 12. | जै.सू. | जैमिनिसूत्रम् |
| 13. | क.उ. | कठोपनिषत् |
| 14. | भ.गी. | श्रीमद्भगवद्गीता |
| 15. | म.भाष्य | महाभाष्यम् |
| 16. | म.ना.उ. | महानारायणोपनिषत् |
| 17. | पु.सू. | पुरुषसूक्तम् |
| 18. | श्वे.उ. | श्वेताश्वतरोपनिषत् |
| 19. | आप.गृ.सू. | आपस्तम्बगृह्यसूत्रम् |

| | |
|---|---|
| 20. बौ.गृ.सू. | बौधायनगृह्यसूत्रम् |
| 21. वि.कोशः | विशिष्टाद्वैतकोशः |
| 22. मी.कोशः | मीमांसाकोशः |
| 23. या.स्मृ. | याज्ञवल्क्यस्मृतिः |
| 24. ब्र.सू. | ब्रह्मसूत्रम् |
| 25. श्री.भा. | श्रीभाष्यम् |
| 26. मी.सू.संकर्षः | मीमांसासूत्रम्-सङ्कर्षकाण्डः |
| 27. ता.ब्रा. | ताण्ड्यब्राह्मणम् |
| 28. अथर्व.सं. | अथर्वसंहिता |
| 29. भा.दीपिका | भाट्टदीपिका |
| 30. कौ.ब्रा. | कौषीतकिब्राह्मणम् |
| 31. श.ब्रा. | शतपथब्राह्मणम् |
| 32. ऋग्वेद | ऋग्वेदः |
| 33. उ.सू. | उणादिसूत्रम् |
| 34. के.उ. | केनोपनिषत् |
| 35. पा.पु. | पाद्मपुराणम् |
| 36. पा.स्मृ. | पाद्मस्मृतिः |
| 37. महा.शा.पर्व. | महाभारते शान्तिपर्व |
| 38. म.पु. | मत्स्यपुराणम् |
| 39. भा.पु. | भागवतपुराणम् |
| 40. परा.पु. | पराशरपुराणम् |
| 41. वि.पु. | विष्णुपुराणम् |
| 42. वा.पु. | वाराहपुराणम् |
| 43. ह.वं. | हरिवंशपुराणम् |
| 44. कू.पु. | कूर्मपुराणम् |
| 45. शं.स्मृ. | शंखस्मृतिः |

| | | |
|---|---|---|
| 46. | वि.ध.उ.पु. | विष्णुधर्मोत्तरपुराणम् |
| 47. | वि.सू. | विष्णुसूक्तम् |
| 48. | महा.आ.पर्व. | महाभारते आदिपर्व |
| 49. | महा.स.पर्व. | महाभारते सभापर्व |
| 50. | रामा. | रामायणम् |
| 51. | लि.पु. | लिङ्गपुराणम् |
| 52. | वै.को. | वैजयन्तीकोशः |
| 53. | महा.अनु.पर्व. | महाभारते अनुशासनपर्व |
| 54. | सा.सं. | सामवेदसंहिता |
| 55. | लक्ष्मीतन्त्र | लक्ष्मीतन्त्रम् |
| 56. | श्री.सू. | श्रीसूक्तम् |
| 57. | आ.सू | आयुष्यसूक्तम् |
| 58. | महा.वन.पर्व. | महाभारते वनपर्व |
| 59. | नृ.पू.ता.उ. | नृसिंहपूर्वतापनीयोपनिषत् |
| 60. | मा.पु. | मार्कण्डेयपुराणम् |
| 61. | महा.उ.पर्व. | महाभारते उद्योगपर्व |
| 62. | सु.उ. | सुबालोपनिषत् |
| 63. | ना.पु. | नारायणपुराणम् |
| 64. | ना.सं. | नारदीयसंहिता |
| 65. | यजुर्वेद | यजुर्वेदः |
| 66. | महा.भी.पर्व. | महाभारते भीष्मपर्व |
| 67. | म.स्मृ. | मनुस्मृतिः |
| 68. | वा.स्मृ. | वाधूलस्मृतिः |
| 69. | पद्म.पु. | पद्मपुराणम् |
| 70. | व्या.स्मृ. | व्यासस्मृतिः |
| 71. | वि.स्मृ. | विष्णुस्मृतिः |

| | | |
|---|---|---|
| 72. | ई.उ. | ईशावास्योपनिषत् |
| 73. | महा.मो.पर्व. | महाभारते मोक्षपर्व |
| 74. | सा.उ. | सावित्र्युपनिषत् |
| 75. | सू.सि. | सूर्यसिद्धान्तः |
| 76. | वा.उ. | वासुदेवोपनिषत् |
| 77. | क्षु.उ. | क्षुरिकोपनिषत् |
| 78. | आ.प्र.उ. | आत्मप्रबोधोपनिषत् |
| 79. | कै.उ. | कैवल्योपनिषत् |
| 80. | अ.शिखा. | अथर्वशिखा |
| 81. | अ.कोशः | अमरकोशः |
| 82. | मै.उ. | मैत्रेयोपनिषत् |
| 83. | ऐ.उ. | ऐतरेयोपनिषत् |
| 84. | परि.वि. | परिकरविजयः |
| 85. | नै.चरि. | नैषधीयचरितम् |
| 86. | कौषी.उ. | कौषीतक्युपनिषत् |
| 87. | शा.मी.सू. | शारीरकमीमांसासूत्रम् |
| 88. | प्र.उ. | प्रश्नोपनिषत् |
| 89. | मन्त्र.उ. | मन्त्रोपनिषत् |
| 90. | स्क.पु. | स्कन्दपुराणम् |
| 91. | अ.शिरः | अथर्वशिरः |
| 92. | अ.शि.उ. | अथर्वशिर उपनिषत् |
| 93. | ऐ.ब्रा. | ऐतरेयब्राह्मणम् |
| 94. | अ.सं. | अगस्त्यसंहिता |
| 95. | रा.उ. | रामोपनिषत् |
| 96. | स्क.पु.का.खण्ड | स्कन्दपुराणे काशीखण्डः |
| 97. | नृ.उ.ता.उ. | नृसिंहोत्तरतापनीयोपनिषत् |

।।श्रीः।।

।। श्रीमते रामानुजाय नमः।।

## श्रीदोड्डयाचार्यापरनामधेयश्रीमहाचार्यविरचितः

# वेदान्तविजयः

## 1

## गुरूपसदनविजयः

वक्त्राम्भोजान्मुरारेरुदयमधिगतां सम्यगद्वैतविद्यां
दिव्यां सिन्धुं ध्रुवाद्या इव पदसरितं व्यस्तृणन् ये धरायाम्।
व्यासो नाथो यतीन्द्रः श्रुतिशिखरगुरुः श्रीमहाचार्यवर्यो
वाधूलश्रीनिवासो गुरुरिति महितांस्तानिमानाश्रयामः।।

त्रैविक्रमं दितिजनिर्जयमाप्तहर्षः
सूनुर्यथाम्बुजभुवः प्रथयाम्बभूव।
सानन्दमौपनिषदं तदुदारभाव-
प्रत्यर्थिनिर्जयमहं प्रथयामि तद्वत्।।

त्रिविक्रमजयो यथा जलजजन्मनः सूनुना
जितं भगवता जगन्निखिलमित्यजोघुष्यत।
तथोपनिषदामिदं कुमतिगर्वमर्मच्छिदां
विनिर्जययशो रमानिधिसुतेन जोघुष्यते।।

परस्परविरोधेन निरस्ताः प्रतिवादिनः।
तेन वेदान्तसिद्धान्तः सम्पन्नो निरुपद्रवः।।

'**स्वाध्यायोऽध्येतव्यः**[1]' इत्यध्ययनविधेरध्ययनगृहीताङ्गपरिकर्मितस्वाध्यायस्य समधिगतानन्तस्थिरफलब्रह्मावबोधस्य तत्प्रसूतवेदान्तार्थश्रवणाभिलाषस्य मीमांसितपूर्वभागस्य तत्सम्पादिताल्पास्थिरस्वर्गपश्वादिफलकर्मावबोधस्य ब्रह्मजिज्ञासोत्पत्तिं पूर्वभागार्थनिर्णयसहितापरभागार्थापातप्रतीतिप्रसूतां समीक्ष्य ब्रह्मजिज्ञासोः गुरूपसदननियमं विदधाति—

---

1. तै.आ. - 2.15

**'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो**
**निर्वेदमायात् नास्त्यकृतः कृतेन।**
**तद्विज्ञानार्थं सगुरुमेवाभिगच्छेत्'[1] इति।**

अर्थश्रवणस्याविधेयत्वं तत्प्रवृत्तेः रागाधीनत्वं मीमांसामात्रं प्रति स्वाध्यायाध्ययनस्य ब्रह्ममीमांसां प्रति कर्ममीमांसायाश्च पूर्ववृत्तत्वं ब्रह्मणो वेद्यत्वं सविशेषस्यैव जिज्ञास्यत्वं भगवतः पुरुषोत्तमस्यैव विज्ञानविषयतां वाच्यत्वं च प्रतिपाद्य तस्यैव सर्वविद्यावेद्यत्वं ब्रूते भगवतीयमुपनिषत्।

### सिद्धान्ते श्रुत्यर्थनिरूपणम्

अत्र ब्राह्मणशब्दः अधीतवेदोपलक्षकः सन् त्रैवर्णिकपरः, कर्मपरीक्षायोग्यत्रैवर्णिकमात्रस्य निर्वेदविद्ययोः सत्त्वेन विशिष्य ब्राह्मणोक्त्ययोगात्; **मन्त्रेषु कर्माणी**ति विद्याङ्गतया विहितस्यानभिसंहितकर्मणो विधास्यमानानामुपासनतत्स्थानगुणादीनां च विशेषश्रवणात् सन्दंशन्यायादयं विधिस्त्रैवर्णिकविषयः।

किञ्च न ब्राह्मण्यस्य निमित्ततयान्वयः, विज्ञानार्थमिति कामनाधिकारलाभात्। न च जातेष्टिवत् संवलिताधिकारः, निमित्तत्वे निमित्तसप्तमीयच्छब्दाद्यभावात्। यत्पदाभावेऽपि प्रकृतत्वात् तच्छब्देन परामर्शः **'स्योनं ते सदनं करोमि, घृतस्य धारया सुशेवं कल्पयामि, तस्मिन् सीदामृते प्रतितिष्ठ'[2]** इत्यत्र तच्छब्देनेवाविरुद्धः।

न च तच्छब्देन ब्राह्मणपरामर्शात् विशिष्टविधिः 'राजा राजसूयेन स्वाराज्यकामो यजेते'त्यत्रेवेति वाच्यम्। विशिष्टविधौ गौरवात्। राजसूयवाक्ये राजपदवैयर्थ्यप्रसङ्गात् तथा। इह तु विज्ञानार्थितानिमित्तनिर्वेदप्रयोजकाध्ययनोपस्थापकत्वसम्भवात् न वैयर्थ्यम्। तस्मादवदानशेषभूतवाक्ये **'ब्राह्मणस्त्रिभिर्ऋणवा जायते'[3]** इतिवत् **'ब्राह्मणः पाण्डित्यं निर्विद्य'[4]** इतिवच्च ब्राह्मणशब्दः त्रैवर्णिकपरः, हेतूपस्थापनेन सप्रयोजनत्वसिद्धये अधीतवेदपरः, न द्विजातिपरः।

यद्वा अणति - पठतीति व्युत्पत्तौ पचाद्यजन्तः अणशब्दः। ब्रह्मणो वेदस्याणो ब्राह्मणः। षष्ठी च सम्बन्धसामान्ये। शकन्ध्वादिः प्रज्ञादित्वात् स्वार्थिकाणन्तः।

यद्वा आदित्यं पश्यतीत्यत्रेवानभिधानात् अणोऽप्रवृत्तेः पचाद्यच्। ततश्च कर्मत्वविवक्षायामपि न दोषः।

यद्वा अण्येव 'संज्ञापूर्वको विधिरनित्य'[5] इति वृद्ध्यभावः।

यद्वा ब्रह्म अणं यस्य स ब्राह्मणः इति बहुव्रीहिः। घञर्थे कः इति कर्मणि कः।

---

1. मुण्डक. – 1.2.12
2. तै.ब्रा. – 3.7.5
3. तै.सं. – 6.3.10
4. बृ.उ. – 5.5.21
5. तनादिभ्यस्तथासोः (पा.सू. - 2.4.79) इत्यत्र वार्तिकमिदम् ।

आचार्यैस्तु टिलोपाभावस्य छान्दसत्वाभिप्रायेण **'तदधीते'**[1] इत्यण्' इत्यनुगृहीतम्। अधीतवेदः पुरुषः **'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति'**[2], **'अपाम सोमममृता अभूम'**[3], **'अनन्तम् ( ह वा ) अपारमक्षय्यं लोकं जयति, योऽग्निंनाचिकेतं चिनुते'**[4], **'ब्रह्म वेद ब्रह्मैव भवति'**[5], **'ब्रह्मविदाप्नोति परम्'**[6], **'स एको ब्रह्मण आनन्दः'**[7], **'यतो वाचो निवर्तन्ते'**[8], **'परमं साम्यमुपैति'**[9], **'न च पुनरावर्तते'**[10] इत्यादिभिः अनन्तस्थिरफलापातप्रतीत्या वेदविचारोन्मुखः, पाठक्रमात् त्रिवर्गे प्रथमप्रावण्याच्च पूर्वभागविचारे प्रवृत्तः, श्रुतिलिङ्गाद्यवगतैः विनियोगैः सिद्धाभ्यां तत्तत्कर्मविशेषेषु अङ्गभूयस्त्वाल्पत्वाभ्यां क्वचित् प्रकृतिविकृतिभावावगतया उत्तरक्रतुषु सोमावृत्त्या **'अयनेषु चोदनान्तरम्'**[11] इत्यत्राधिकरणे **'दाक्षायणयज्ञेन स्वर्गकाम'**[12] इत्यत्र विधेयत्वेन निर्णीतयाऽऽवृत्त्या च सिद्धाभ्यां प्रधानभूयस्त्वाल्पत्वाभ्यां च एकस्मिन् स्वर्गाख्ये फले साधनतयावगतेषु कर्मसु गुरुलघुविकल्पासम्भवेन फले तारतम्यं' **फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलविशेषः स्यात्'**[13] इत्यर्थवादाधिकरणोक्तरीत्या कालस्वरूपाभ्यामवगम्य कर्मसाध्येषु दुःखोदर्कत्वं दुःखसम्भिन्नत्वं चावधार्य कर्मणानेन किं मया प्रयोजनं लभ्यते, स्वर्गादिकमनन्तस्थिरफलकामस्य न मे पुरुषार्थः, यश्च पुरुषार्थोऽनन्तस्थिरफलरूपः प्राप्यतया उत्तरभागात् आपाततोऽवसितः स कृतेन कर्मणा न लभ्यत इति निर्वेदं प्राप्तः, ब्रह्मभागावगतानन्तस्थिरफलप्राप्तये 'यदीदमनन्तस्थिरफलं भवति, यदि चावगतेन साधनेन तत्प्राप्येत तदा तदेव तेन मया साधनीयम्, अतः तदिदानीं मीमांसितव्यमि'ति न्यायोपेतवाक्येन सोपायं ब्रह्म निर्दिधारयिषुः गुरुमुखादेव तथा निर्धारयेत्, न तु स्वातन्त्र्येणेत्यर्थः; गुरूपसदनस्य दृष्टार्थत्वे सम्भवति अदृष्टार्थत्वायोगात्। 'फलस्य कर्मनिष्पत्तेरि'ति सूत्रविवक्षितन्यायस्तु यदि

1. पा.सू. – 4.2.59
2. आप.श्रौ.सू. – 8.1.1; 22.8.1
3. तै.सं. – 3.2.5
4. काठक. – 2.7
5. मुण्डक. – 3.2.9
6. तै.उ. – 2.1.1
7. तै.उ. – 2.8.1
8. तै.उ. – 2.4.1; 2.9.1
9. मुण्डक. – 3.1.3
10. छा.उ. – 8.15.1
11. जै.सू. – 1.3.5
12. आप.श्रौ.सू. – 3.17.4
13. जै.सू. – 1.2.17

ह्यल्पात् महतश्च समं फलं जायेत ततः **'अत्के चेन्मधु विन्देत'**[1] इत्यनेन न्यायेनाल्पेन सिद्धे महति न कश्चित्प्रवर्तेत, तत्र विधिशक्तिबाधः स्यादिति।

इदं **त्वयनेष्वि**त्याद्यधिकरणशरीरम्। **'दाक्षायणयज्ञेन स्वर्गकामो यजेत'**[2] इत्यत्र सन्देहः, किं प्रकृतदर्शपूर्णमासयागात् कर्मान्तरमिदम् उत तत्रैव गुणविधिरिति। तत्रैवंसंज्ञकस्य गुणस्याप्रसिद्धत्वात् कर्मनामधेयं दाक्षायणशब्दः। अतो नामधेयात् कर्मान्तरमिति पूर्वपक्षे, राद्धान्तः - दक्ष उत्साहीय जमानः तस्यर्त्विजो दाक्षाः। तेषामयनमावृत्तिः। अयनशब्दस्य गवामयनमित्यादिष्वावृत्तिवाचित्वदर्शनात्। अतः अवयवप्रसिद्ध्या तत्रैवावृत्तिलक्षणस्य गुणस्य विधेः न कर्मान्तरमिति। एतत्सर्वमभिप्रेत्यैव आचार्यैः **'आवृत्तिविधानादिभिः'** इत्यनुगृहीतम्। अत्र निर्वेदवतो विज्ञानार्थित्वानुवादात् श्रवणे रागतः प्रवृत्तिरित्यवगम्यते। तेन श्रोतव्य इत्यस्यापूर्वविधित्वाभावः सिद्धः। निर्वेदवतः श्रवणरूपवेदजन्यज्ञानार्थितानियमस्य स्वरसतोऽवगमेन पुराणादौ प्रवृत्त्यभावावगमात् नियमविधिरित्यपि सिद्धम्।

**परीक्ष्ये**ति प्रागभिधानेन औचित्यादुपसर्गाच्च विज्ञानशब्दः श्रवणपरः। **ब्राह्मण** इत्यधीतवेदत्वाभिधानात् वेदान्ताः श्रोतव्या एव नाध्येतव्या इति शेषान्तरनिवृत्तिफलक-परिसङ्ख्याविधेः,**परीक्ष्ये**ति पूर्वभागविचारावगमात् वेदान्ता एव श्रोतव्याः न पूर्वभाग इति शेष्यन्तरनिवृत्तिफलकपरिसंख्याविधेश्चाभावः अवगम्यते। प्रकारान्तराभावात् परिसङ्ख्याभावोऽपि सिद्धः। निर्वेदाधीनरागप्रवृत्त्युपपादनादेव श्रवणस्य अध्ययनविध्यधीनत्वमपि निरस्तम्। एवं श्रवणस्य विधेयत्वाभावो रागात्तत्प्रवृत्तिश्च **त्रय्यन्तराद्धान्तः**।

## 1. श्रवणस्य विधेयत्वभङ्गः

### मतान्तराणामनुवादः

तमिमम् असहमानाः केचित् श्रवणविध्यादि वर्णयन्तः स्वयमेव परस्परप्रहारनिहताः त्रय्यन्तमहोत्सवमङ्गलतूर्यमुद्घोषयन्ति।

तथाहि - **केचिदाहुर्माध्वाः** - आपातदर्शनभिन्नं प्रतिवाक्यम् 'अयमस्य वाक्यस्यार्थ' इति सिद्धार्थोक्तिरूपेण गुरूपदेशेन अनेकशाखास्थवाक्यार्थग्रहणं **श्रवणम्।** तच्चाज्ञानमात्रविरोधि, न तु मननवत् संशयविरोधि। मननं तु 'अयमेव वाक्यार्थो युक्तः, नान्य' इति निर्णयहेतुः युक्त्यनुसन्धानम्। निरन्तरध्यानं निदिध्यासनम्। इत्थमेव श्रवणादीनां भेदः। विचारादिविधिस्त्वपूर्वविधिः, ब्रह्मज्ञाने वेदविचारहेतुताया अत्यन्ताप्राप्तत्वात्। यद्यपि ब्रह्मपरवेदविचार

1. शा.भा. – 1.2.4
2. आप.श्रौ.सू. – 3.17.4

एव ब्रह्मविचारः, स च प्राप्तः, तथापि न ब्रह्मविचाररूपेणविधानम्। किन्तु वेदविचाररूपेण। एवं च यथा घटादावितरभेदे सिद्धेऽपि पृथिवीत्वोपहिते तदसिद्धेः पृथिवी इतरेभ्यो भिद्यत इत्यत्र न सिद्धसाधनता, यथा वा स्थानप्रकरणाधिकरणोक्तरीत्या राजसूयान्तर्गतेष्टिपशूसोमेषु प्रातिस्विकरूपचोदकतः इतिकर्तव्यताप्राप्तावपि राजसूये तदप्राप्तिः, तथा वेदविचारत्वोपहिते ब्रह्मज्ञानहेतुताया अप्राप्तेरपूर्वविधिता। नहि कर्मकाण्डेन ब्रह्मकाण्डेऽप्यवान्तरकारणादिवाक्येन चापाततोऽपि ब्रह्मधीरस्ति।

यद्वा निदिध्यासनस्याव्यक्तस्वभावब्रह्मसाक्षात्कारहेतुता नान्यतः प्राप्तेति स तावदपूर्वविधिः। श्रवणमननयोः निदिध्यासितव्यगुणविषयेवस्तुसामर्थ्यरूपलिङ्गात् प्राप्तावपि तदन्यगुणविषये अप्राप्तेः तद्विधिरप्यपूर्वविधिः। एवञ्च श्रवणमननयोः निदिध्यासितव्यगुणांशे दृष्टद्वारेण अन्यत्रादृष्टद्वारेण निदिध्यासनाङ्गतेति।

**अपरे तु तदेवकदेशिनः** प्राहुः – **'द्रष्टव्यः श्रोतव्य'**[1] इत्यादयो मोक्षोद्देशेन दर्शनादीनां विधायकाः। **'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्'**[2] इत्युपक्रम्य तदुपसंहारे च **'एतावदरे खल्वमृतत्वम्'**[3] इत्येतावच्छब्देन प्रकृतदर्शनादिचतुष्टयं परामृश्य तस्य लाङ्गलं जीवनमितिवत् उपचारेणाविशेषेण अमृतत्वसाधनत्वप्रतिपादनात्। ते च **'दर्शपूर्णमासाभ्यामि'ति** द्वन्द्वेनेव एतावच्छब्देन परामृश्य तुल्यवत्फलसम्बन्धप्रतिपादनात् समप्रधानाः। तेषाञ्च उत्तरोत्तरद्वारा मोक्षसाधनत्वम्। तथापि उत्तरोत्तरं प्रति शेषत्वाभावात् क्रतूपकारकाधानवत् प्राधान्याविरोधः। ध्यानस्याव्यक्तस्वभावब्रह्मसाक्षात्कारहेतुताया लोकसिद्धत्वाभावेऽपि दृष्टत्वेन मोक्षे जनयितव्ये ब्रह्मदर्शनस्यैव ध्यानं प्रति द्वारत्वं कल्प्यते। यद्यपि मुमुक्षोः श्रवणमननेध्यानविधिनैवध्येयगुणेषु प्राप्ते, तथापि तदन्यगुणविषये अत्यन्ताप्राप्तेः **'श्रोतव्यो मन्तव्य'**[4] इत्यपूर्वविधिः। अत्र च श्रवणस्य दृष्टं मननमेव द्वारम्। मननस्य तु ध्येयांशे दृष्टमन्यत्रादृष्टमिति।

**मायिनां तु केचित् –** अपूर्वविधिरेवायम्, अप्राप्तत्वात्। वेदान्तश्रवणं ब्रह्मसाक्षात्कारहेतुरिति, मानान्तरादनवगमात्। कृतेऽपि श्रवणे तदनुत्पत्त्या वामदेवस्य श्रवणं विनापि गर्भस्थस्यैव तदुत्पत्तेरुभयतो व्यभिचारादन्वयव्यतिरेकाभ्यां गृहीतुमशक्यत्वादिति।

**अन्ये तु–**नायमपूर्वविधिः, अपरोक्षवस्तुगोचरप्रमाणत्वावच्छेदेन साक्षात्कारहेतुत्वस्य विचारमात्रस्य विचार्यनिर्णयहेतुत्वस्य च प्राप्तत्वेन विचारितवेदान्तस्य निर्णयरूपब्रह्मसाक्षात्कारहेतुतायाः प्राप्तेः। सहकारिवैकल्यजन्मान्तरीयश्रवणसम्भवात् नोभयतो व्यभिचारः।

1. बृ.उ. – 6.5.6
2. बृ.उ. – 6.5.6
3. बृ.उ. – 6.5.15
4. बृ.उ. – 4.4.5; 6.5.6

अन्यथा साधनत्वबाधे अपूर्वविधिरपि न स्यादिति नियमविधिरेवायमिति नियमविधिवादिनोऽपि परस्परं निघ्नन्ति।

**केचिदाहुर्माध्वाः – 'श्रोतव्यो मन्तव्य'** इति नियमविधिः। सम्भवति च शब्दयुक्तिजन्यज्ञानवाचिभ्यां श्रोतव्यमन्तव्यपदाभ्यां दुरागमरूपशब्दाभासतदनुग्राहकन्याया-भासजन्यज्ञानव्यावर्तनमिति।

**मायिनां तु केचिदाहुः** - यथा किञ्चिद्वस्तु चक्षुषा वीक्षमाणः तत्र स्वागृहीते सूक्ष्मविशेषान्तरे केनचित् कथिते तदवगमाय तस्यैव चक्षुषः सप्रणिधानव्यापारे प्रवर्तते, तथा मनसा ग्राह्यमाणे आत्मनि वेदान्तरैरापाततो निर्विशेषरूपमाकर्ण्यतदवगमाय मनसः एव सप्रणिधानं तत्र निधाने कदाचित् प्रवर्तेतेति वेदान्तश्रवणे प्रवृत्तिः पाक्षिकी स्यादितिनियमविधिरिति।

**अपरे तु – 'जुष्टं यदा पश्यत्यन्यमीशम्'**[1] इति श्रवणात् भिन्नात्मज्ञानस्य मोक्षसाधनत्वभ्रमसम्भवात् मुक्तिसाधनज्ञानाय भिन्नात्मविचाररूपशास्त्रान्तरश्रवणेऽपि कदाचित् प्रवर्तेतेति अद्वितीयार्थश्रवणविधिरयम्, इहात्मशब्दस्य **'इदं सर्वं यदयमात्मा,'**[2] **'आत्मनि**[3]**विज्ञाते सर्वमिदं विज्ञातम्'** इत्यादिप्रकरणपर्यालोचनया अद्वितीयात्मपरत्वात्। नहि वस्तुसत्साधनान्तरप्राप्तावेव नियमविधिरिति नियमः, किन्तु यत्र विधित्सितस्य साधनस्य पाक्षिक्यप्राप्तिर्विधिना विना निवारयितुं न शक्यते तत्र नियमः। तच्चासाधनस्यापि साधनत्वेन सम्भाव्यमानस्य पक्षे प्राप्त्या भवतीति।

**अपरे तु** गुरुमुखानधीनस्वतन्त्रविचारो व्यावर्त्य इति नियमविधिरिति।

**श्रोतव्य** इति श्रुतैरेव वेदान्तैरात्मा ज्ञातव्य इति श्रुतवेदान्तानां नियम्यमानत्वात् इतिहासपुराणाद्यनुमितं वेदान्तवाक्यमेव व्यावर्त्यमस्त्विति मतान्तरम्।

**'श्रोतव्यः श्रुतिवाक्येभ्यः'**[4] इति स्मृत्यनुसारात् पुराणवाक्यमेव स्वातन्त्र्येण व्यावर्त्यमस्त्वित्यपरं मतम्।

रण्डागीतादिकं व्यावर्त्यमिति केचित्।

**श्रोतव्य** इति विचारितवेदान्तैरेव ज्ञातव्य इति वेदान्तांशे नियमः। मनः प्रमाणं व्यावर्त्यम्। एवं च निदिध्यासनानन्तरं ब्रह्मसाक्षात्कारार्थिनो मनःप्रमाणसद्भावबुद्ध्या अद्वैतवाक्यप्रतिसन्धाना-प्रवृत्त्या तत्पाक्षिकताप्रसङ्गे तत्पुराणार्थनियमविधिना पुनस्तत्प्रतिसन्धाने प्रवृत्तिः भवेदिति नियमविधिबलाच्च अन्यत्र प्रमाणस्यापि मनसो निर्विशेषात्मसाक्षात्कारे न जनकत्वमिति मतान्तरम्।

---

1. मुण्डक. – 3.1.2, श्वे.उ. – 3.4.7
2. बृ.उ. – 3.5.7; 4.4.6
3. मुण्डक. - 1.1.3
4. वि.प्र.सं.

**केचित्तु -** ब्रह्मज्ञानार्थवेदान्तश्रवणे प्रवृत्तस्य चिकित्साज्ञानार्थं चरकसुश्रुतादिश्रवणे प्रवृत्तस्येव मध्ये व्यापारान्तरेऽपि प्रवृत्तिः प्रसज्यत इति तन्निवृत्त्यर्थं श्रोतव्य इति परिसंख्याविधिरिति वदन्ति।

एवं श्रवणविधिफलेऽपि विवदन्ते। तत्रापूर्वविधिपक्षे केचिन्माध्वाः श्रवणविधेः मोक्षं फलमाहुः। अपरे माध्वा मायिनश्च ब्रह्मसाक्षात्कारम्। नियमविधिपक्षे केचिच्छाब्दापरोक्षज्ञानं फलमित्याहुः।

अपरे तु शब्दस्यापरोक्षज्ञानजनकत्वमनङ्गीकृत्य साक्षात्कारकरणमनस्सहकारितया मानससाक्षात्कार एव फलमित्याहुः।

अपरे तु अपरोक्षज्ञानगताविद्यानिवर्तनशक्तिः फलमित्याहुः।

केचित्तु अविद्यानिवर्तको मानससाक्षात्कारः निर्विचिकित्स(कित्सा?)परोक्षनिर्णयः फलमित्याहुः।

इतरे तु तात्पर्यार्थनिर्णयानुकूलन्यायविचारात्मकचेतोवृत्तिविशेषः श्रवणम्। तस्य च न ब्रह्मणि परोक्षमपरोक्षं ज्ञानं च फलम्, किन्तु तात्पर्यनिर्णयद्वारा तात्पर्यभ्रमादिरूपपुरुषापराधवनिवृत्तिः। अतः तादर्थ्येनैव नियमविधिः। न च तदुभयान्यतरद्वारा ब्रह्मज्ञानं फलमस्तु इति वाच्यम्, तात्पर्यनिश्चयस्य शाब्दज्ञानाहेतुत्वात् प्रतिबन्धकाभावस्य च क्वाप्यहेतुत्वात् द्वारत्वानुपपत्तेः। **द्रष्टव्य** इति दर्शनार्हत्वेन स्तुतिमात्रम्, न तु फलमित्याहुः।

एवं प्राप्तावपि अपरोक्षवस्तुविषयकप्रमाणत्वावच्छेदेन अपरोक्षवस्तुत्वस्य विचारमात्रे विचार्यनिर्णयहेतुत्वस्य च क्लृप्तत्वाद्विचारितवेदान्तानां ब्रह्मापरोक्षे प्राप्तिरि**त्येके**।

अन्ये तु यद्यपि शब्दस्य स्वभावतो नापरोक्षज्ञानजनकत्वम्, अथापि विधुरपरिभावितकामिनीसाक्षात्कारस्थले भावनाप्रचयसहकृतज्ञानकरणत्वावच्छेदेनापरोक्षज्ञानजनकत्वस्य क्लृप्तत्वात् ब्रह्मसाक्षात्कारे प्राप्तिः। युक्तं चैतत्। स्वतोऽसमर्थस्यापि इन्द्रियस्य संस्कारसाहित्यात् तत्तत्साक्षात्कारहेतुत्वदर्शनादित्याहुः।

आगमाचार्योपदेशजमात्मज्ञानमेव श्रवणम्। तच्च ज्ञानत्वादविधेयम्। अस्तु वा तात्पर्यनिर्णयानुकूलविचारश्रवणम्। तथापि तस्य तात्पर्यनिर्णयद्वारा तद्भ्रमसंशयरूपप्रतिबन्धकनिरास एव फलम्, न ब्रह्मावगमः। तत्र च लोकत एव तत्प्राप्तं साधनान्तरं च प्राप्तमिति न तत्र कोऽपि विधिः। एवं श्रवणविध्यभावात् कर्मकाण्डविचारवत् ब्रह्मकाण्डविचारोऽप्यर्थावबोधपर्यन्ताध्ययनविध्याक्षिप्त इति केचिदाहुः।

**मतान्तरनिरासः**

तत्र प्रथमपक्षस्तावदनुपपन्नः – तथाहि श्रवणविधौ तावत् गुरुशाखयोर्नान्तर्भावः। **श्रोतव्य** इत्यत्र तद्वाचकपदाभावात् श्रोत्रग्राह्यत्वार्थकेन श्रोतव्यपदेन शब्दादन्यस्यात्मनः श्रोत्रग्राह्यत्वासम्भवात् शब्दग्राह्यत्वमात्रमेव हि विवक्ष्यते। युज्यते हि श्रोत्रजन्यज्ञानवाचिना श्रृणोतिना तद्योग्यशब्दजन्यज्ञानलक्षणा।

यच्च विचारविध्यात्मकस्वाभिमतमननविधिसमर्थनम्, तत्र ब्रह्मज्ञानाय वेदविचारः कर्तव्य इति वचनव्यक्तिरनुपपन्ना। '**आत्मा मन्तव्य**' इति हि विधिः। तत्रात्मविचारः कर्तव्य इति वचनव्यक्तिः सिद्ध्यति, न तु वेदविचारः कर्तव्य इति। अर्थात्तु वेदान्तविचारः सिद्ध्यति, तस्यात्मप्रमाणत्वात्।

यदि वेदस्यात्मप्रमाणत्वात् वेदविचारसिद्धिः तदा वाक्यस्यात्मनि प्रामाण्यात् वाक्यविचारः सिद्ध्येत्। तथा च पूर्वभागवत् लौकिकवाक्यस्यापि विचारार्यत्वप्रसङ्गः। सर्ववेदानामाराध्यब्रह्मपरत्वेन ब्रह्मणि प्रमाणत्वविवक्षायां न विधेयता, रागादेव प्रवृत्तेः।

**श्रोतव्य** इत्यत्र श्रुतिपदेनैकधातूत्पन्नत्वरूपसाधर्म्यलक्षणस्य भ्रमनिदानस्य सत्त्वात् चाकचक्यसाधर्म्यनिबन्धनभ्रम इव तद्गोचरभ्रमे न विस्मयामहे। **मन्तव्य** इत्यत्र तु तादृशनिबन्धनादर्शनात् तद्गोचरभ्रमः कथं सञ्जात इति भृशं विस्मयामहे।

किञ्च मनने विहिते श्रवणस्य तादर्थ्यं लोकत एव पक्षे प्राप्तमिति तद्विधिः नियमविधिरेव स्यात्, न तु अपूर्वविधिः।

किञ्च पूर्वभागार्थस्य मन्तव्यत्ववत् निदिध्यासितव्यत्वमपि स्यात्। न चेष्टापत्तिः, इतोऽतिरिक्ताशनिपातासिद्धेः। तेषामतिबाहुल्येन तद्ध्यानस्य ब्रह्मध्यानस्य चानवकाशप्रसङ्गात् विद्याभेदविरहप्रसङ्गाच्च। सर्वविषयत्वहेत्वभावो मननेऽपि तुल्यः। यदि श्रवणसमानविषयत्वं मननस्य वाच्यं तर्हि तत् निदिध्यासनेऽपि।

अपि चैवमेकदेशेऽनुवादः एकदेशे विधिरिति स्यात्। तच्चायुक्तम्। अत एव '**तत्प्रकृत्यर्थं यथान्येऽनारभ्यवादा**'[1] इत्यधिकरणे पर्णताया जुहूद्वारेणेव आधानस्याग्निद्वारा क्रत्वर्थत्वे पूर्वपक्षिते '**वसन्ते ब्राह्मणोऽग्निमादधीत**'[2] इत्याधाने वसन्तविधेः सोमाङ्गेऽनुवादत्वम्, तत्र वसन्तविधेरन्यत्र विधित्वम्, दर्शपूर्णमासयोश्च वसन्तानुष्ठाने अनुवादत्वम्, कालान्तरे प्रयोगे विधित्वमिति विध्यनुवादवैरूप्यप्रसङ्गात् तन्निरासः कृतः।

अत एव च '**अनुप्रसर्पिषु सामान्यात्**'[3] इत्यधिकरणे दशपेये राजसूयान्तर्गते क्रतौ राजाधिकारिके '**दशदशैकैकं चमसमनुसर्पन्ति**' इत्यत्र चमसभक्षकतृविधिः '**शतं ब्राह्मणाः पिबन्ति**'[4] इत्यनुवादः। अन्यथा स्वामिचमसे विधिरन्यत्रानुवाद इति वैरूप्यप्रसङ्गः। तस्मात् राज्ञोऽपि चमसभक्ष इति पूर्वपक्षिते '**शतं ब्राह्मणा**' इत्यत्र लक्षणाप्रसङ्गात् विधिरेव। तथा च

1. जै.सू. – 3.6.14
2. तै.ब्रा. – 1.1.2.6
3. जै.सू. – 3.5.52
4. तै.सं. – 1.8.16

वचनाद्यजमानबाधः, प्राकृतभक्षकार्ये सङ्ख्याविशिष्टकर्तृविशिष्टभक्षणान्तरविधेर्न वैरूप्यमिति विशिष्टविधिस्वीकारेण राद्धान्त उक्तः।

यच्च मन्यसे ब्रह्मविचारस्यापि वेदविचारत्वेन वेषेण ब्रह्मज्ञानहेतुत्वाप्राप्तेः तदवच्छिन्नविधिरिति, तत्र किं सर्ववेदविचारत्वं विवक्षितम् उत वेदविचारत्वमेव? नाद्यः, सर्वत्वबोधकपदाभावात्। किञ्च सर्वत्वं वेदविशेषणं विचारविशेषणं वा? नाद्यः, प्रामाण्यविचारादेरेव विधेयत्वप्रसङ्गात्। न द्वितीयः। सर्वविचाराणां यौगपद्यासम्भवेनातीतानां कारणत्वायोगान्न सर्वत्वं कारणतावच्छेदकम्। अतीतानामदृष्टद्वारकत्वे च विचारस्य मननशब्दार्थत्वकल्पनाव्यर्था, ब्रह्मविचारेणैवातीतेनापूर्वविधित्वोपपादनसम्भवात्। नापि द्वितीयः, एकेनैव विचारेण चारितार्थ्यात्। नहि ज्योतिष्टोमस्य विधाने सर्वव्यक्तयः उपसंहार्याः। उक्तानुमानदृष्टान्तश्च विषमः। पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिपक्षे तादृशोद्देश्यप्रतीतिजननसामर्थ्यं हेतोरस्त्येव। इह तु तदुद्देश्यप्रतीतिजननसमर्थं किमपि वाक्यं न पश्यामः। राजसूयदृष्टान्तश्च विषमः। इदं हि तदधिकरणशरीरम् - राजसूये बहव इष्टिपशुसोमयागाः, सर्वे फलवन्तः समप्रधानाः। तत्राभिषेचनीयो नाम सोमयागः। तत्सन्निधौ विदेवनादयः समाम्नाताः। ते किं सर्वस्य राजसूयस्याङ्गम् उत अभिषेचनीयस्यैवेति। यदि सन्निधिः बलीयान् अभिषेचनीयाङ्गम्, अथ प्रकरणम्, ततो राजसूयस्येति। तत्र सन्निधिविशेषादभिषेचनीयाङ्गत्वे प्राप्तेऽभिधीयते - प्रकरणाविशेषात्सर्वार्थता। नन्वभिषेचनीयस्याप्यस्त्येव फलवत्त्वात् प्रकरणम्। यदप्यस्ति तदप्यन्येषामस्तीति तादर्थ्यमपि युक्तम्। यदि परमविशेषतः सर्वेषामाकाङ्क्षायामपि यागसन्निधिविशेषादभिषेचनीयस्य विशेषतः आकाङ्क्षां कल्पयित्वा तादर्थ्यं स्यात्। ततश्च विप्रकर्षः। सर्वार्थता हि क्लृप्ताकाङ्क्षातः सुखं गम्यते। अभिषेचनीयस्य विशेषतः आकाङ्क्षा तु कल्पनीयेति। इह सन्निधेः प्रकरणस्य बलवत्त्वं व्युत्पाद्यते, न तु तत्राकारान्तरेणाकाङ्क्षानिवृत्तावपि आकारान्तरेण आकाङ्क्षा व्युत्पाद्या।

यदपि **शास्त्रदीपिकायामु**क्तम् – 'अपिच नास्त्यभिषेचनीयस्य प्रकरणं प्राकृतेनेत्थम्भावेन कथमाकाङ्क्षापूरणात्। नन्वन्येषामपि इष्टिपशुसोमानां विकृतित्वात् नास्त्येव प्रकरणम्। सत्यम्, प्रातिस्विकरूपेण नास्ति। राजसूयात्मना त्वस्त्येव। कथं श्रुत्यादिविहिताङ्गसन्दंशात् तद्वशेन निवृत्ताप्याकाङ्क्षा पुनरुत्थाप्यते। पवित्रादारभ्य क्षत्रस्य धृतिं यावदङ्गविधिषु प्रायेण '**राजसूयाय ह्येना उत्पुनाति**'[1], '**राजसूयेनेजानः सर्वमायुरेति**'[2] इति राजसूयपरामर्शात् तावन्तं देशमनुवृत्तो राजसूयकथम्भावः शक्नोति तन्मध्यपतितानि विदेवनादीनि गृहीतुमि'ति।

तत्रापि राजसूये प्रकरणाभावमाशङ्क्य सन्दंशन्यायात् तत्समर्थने तात्पर्यम्, न तु आकारान्तरेण

---

1. तै.ब्रा. – 1.7.6
2. तै.सं. – 5.6.3

धर्मप्राप्तावपि आकारान्तरेणाप्राप्तेराकाङ्क्षाप्रतिपादने तात्पर्यम्। तथा सति किमुत्थापिताकाङ्क्षो-पयोगित्वेनाकारान्तरोपन्यासः, किं वा स्वारसिकाकाङ्क्षाप्रयोजकत्वेन? नाद्यः - आतिदेशिकाङ्गान्वयेन निराकाङ्क्षत्वेऽपि औपदेशिकाङ्गान्वयार्थं तेनैवाकारेण आकाङ्क्षोत्थापनस्य बहुशो दर्शनात्। न द्वितीयः, सन्दंशवशेन निवृत्ताप्याकाङ्क्षा पुनरुत्थाप्यत इत्युक्तिविरोधात्। राजसूयात्मना त्वस्त्येवेति तु विदेवनादीनां समुदायान्वयरूपसिद्धान्तसिद्ध्यर्थं समुदायाकाङ्क्षाप्रतिपादनपरम्। अन्यथा सोमाङ्गत्वादिना प्राप्तावपि आधानत्वेनाप्राप्तेः तथैव विधिरिति विध्यनुवादवैरूप्याभावात् तत्प्रकृत्यर्थाद्यधिकरणोच्छेदः।

किञ्च वेदान्तविचारांशे लोकत एव प्रवृत्तिसिद्धेः तदंशे न विधेः प्रयोजकत्वम्, किन्तु पूर्वभागविचारांश एवेति विधेः विधेयैकदेशप्रयोजकत्वम् अस्वरसमापद्येत। एतेन **यद्वे**त्यादिकमपि दत्तोत्तरम्। एतेनैव **अपरे त्वि**त्युक्तपक्षोऽपि दत्तोत्तरः।

किञ्च श्रवणस्य दृष्टं मननमेव द्वारमिति वदता स्वयमेव श्रवणविध्यसम्भवे हेतुरुपन्यस्तः। मोक्षार्थताया अप्राप्तत्वात् तादर्थ्येन विधिसम्भवे मननस्य ध्येयेतरगुणविषयत्वकल्पनं व्यर्थम्। तत्कल्पनं हि विवक्षिताधिकारिणः तद्विधिं विनापि तदनुष्ठानसिद्धेः विधिवैयर्थ्यात्। तथा च श्रवणविध्यसम्भवो दुर्वारः, आपातदर्शनादपि मननसम्भवात्, तद्व्यावृत्त्यर्थत्वेनापूर्वविधिता।

किञ्च आत्मा श्रोतव्य इत्यत्र सकलगुणविशिष्ट आत्मा ज्ञातव्य इत्यर्थो वाच्यः, आप्नोतीति व्युत्पत्त्या सकलगुणवैशिष्ट्यविवक्षासम्भवात्। तथैव मन्तव्य इत्यत्रापि। अन्यथा श्रवणमननयोः सकलगुणविषयत्वालाभात्। एवं चास्यैवात्मशब्दस्य निदिध्यासितव्यः द्रष्टव्य इत्यत्रापि अन्वयात् तस्य तत्रार्थान्तरकल्पनानुपपत्तेः सकलगुणविशिष्टदर्शननिदिध्यासनयोः विधिरिति वाच्यम्। ततश्च विद्याभेदोच्छेदः। तादर्थ्यस्य लोकत एव प्राप्तत्वात् श्रवणमननयोरविधेयत्वञ्च। दर्शनस्याविधेयत्वादेव न द्रष्टव्य इति विधिः। तत्साधनविधौ च ध्यानविधिरेव स्यात्।

यदुक्तम् **'एतावदरे खल्वमृतत्वम्'**[1] इत्यादिना चतुर्णां मोक्षसाधनत्वेन विधानमिति, तन्न, प्रयोजकत्वमात्रेण तत्र सामानाधिकरण्योपपत्तेः लाङ्गलं जीवनमितिवत्। नहि लाङ्गलं साक्षाज्जीवनहेतुः अपि तु कर्षणादिबहुव्यापारव्यवधानेनैव। किञ्च एतावदिति वाक्यं न नियोज्यसमर्पकं कमिपदाभावात् **अरे खल्वि**ति प्रयोगाच्चार्थवादः। ततश्च यत्रैव नियोज्याकाङ्क्षा तत्रैव कमिपदं कल्पयितुमुचितमिति **दृष्टव्यो निदिध्यासितव्य** इत्यत्रैव तत् कल्प्येत, **न तु श्रोतव्यो मन्तव्य** इत्यनयोः, तयोर्ध्यानफलकत्वस्य लोकत एवावगमेन निराकाङ्क्षत्वात्, निदिध्यासने मोक्षार्थविहिते लोकसिद्धतत्साधनभावयोः श्रवणमननयोः लोकत एव प्रवृत्त्युपपत्तौ तत्राप्यकस्मादेव गुरुभूतविधिव्यापारकल्पनानुपपत्तेः।

1. बृ.उ. - 6.5.15

यदुक्तं निदिध्यासनस्य दृष्टपरमात्मदर्शनद्वारत्वं कल्प्यत इति। तन्न, '**स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः**'[1], '**तस्मिन् दृष्टे परावरे**'[2], '**भिद्यते हृदयग्रन्थिः**'[3] इत्युभयत्रापि तुल्यवन्मोक्षसाधनत्वप्रतिपादनात्। दृष्टद्वारत्वसम्भवे तद्ग्राह्यमिति चेन्न, त्वयैव तदसम्भवस्य उक्तत्वात्। ध्यानस्य अव्यक्तस्वभावब्रह्मसाक्षात्कारहेतुताया लोकसिद्धत्वाभावेऽपीति ह्यवोचः। तज्जन्यत्वस्यादृष्टत्वेऽपि तत्स्वरूपं दृष्टमिति चेन्न, यत्र तज्जन्यत्वं तत्फलज-नस्वरूपयोग्यत्वं च दृश्यते तत्र ह्येतन्न्यायप्रवृत्तिः। दृष्टमेवावहननस्य तुषविमोकसाधनत्वम्। तुषविमोकश्च योग्य एव। पुरोडाशादिषु अन्यत्र न तन्न्यायप्रवृत्तिसम्भवः। अदृष्टकल्पनाभीत्या दृष्टद्वारं कल्पयतः तदर्थं पुनरदृष्टकल्पनापातात्। दृष्टद्वारकल्पनादशायां न तदुपस्थितिरिति चेन्न, दृष्टं हि द्वारत्वेन कल्प्यते, न स्वरूपेण। तथा कल्पनायां च तज्जनकादृष्टोपस्थितिरनिवार्या। तस्मात् ध्यानभक्तिप्रत्यक्षात्मकमेकमेव ज्ञानं मोक्षसाधनमित्यनुगृह्णन्ति **वेदान्तरहस्यवेदिनः**।

तथाहि न तावत् द्रष्टव्य इति दृशिधातुः मुख्यार्थस्य चाक्षुषज्ञानस्य विधिः, तस्य विध्यनर्हत्वात् ब्रह्मणः तदयोग्यत्वाच्। नापि प्रत्यक्षलक्षणया मानसापरोक्षस्य विधिः, तस्यापि विध्यनर्हत्वादेव। न च दर्शनफलोद्देशेन ध्यानविधिः, दर्शनस्यापुरुषार्थत्वात् कमिपदसाध्यसाधन-प्रतीत्योरसिद्धेश्च। '**अमृतत्वस्य तु नाशास्ति वितेन**'[4], '**एतावदरे खल्वमृतत्वम्**'[5] इति प्रकरणपर्यालोचनया परमपुरुषार्थभूतस्यामृतत्वस्यैवेह साध्यतया प्रतीयमानस्य फलतया अमृतत्वकामस्यैवेह नियोज्यतया कल्पनस्योचितत्वाच्च।

एवं च **द्रष्टव्य** इति दर्शनसमानाकारत्वपरम्, तस्य विशेष्याकाङ्क्षायां सन्निहितनिदि-ध्यासनमेव विशेष्यतार्हमिति '**द्रष्टव्यो निदिध्यासितव्य**' इति दर्शनसमानाकारता-विशिष्टध्यानविधिः।

दहरादिविद्यानामपि मोक्षसाधनतया विधानात् ततो भिन्नस्यैव दर्शनसमानाकारस्य ध्यानस्य विधाने गुरुलघुविकल्पप्रसङ्गात् सर्वासामपि विद्यानां दर्शनसमानाकारध्यानरूपतासम्भवेन ग्रहणाग्रहणयोरिव शक्ताशक्तव्यवस्थितविकल्पाश्रयणस्यान्याय्यत्वाच्च दहरादिविद्यानां निदिध्यासनरूपता अवगम्यते। तव्यप्रत्ययद्वयस्वारस्यानुरोधे तु ध्यानदर्शनयोः गुरुलघुभूतयोः विकल्पप्रसङ्गात् तयोः पृथग्विधानासम्भवात् दहरादिविद्यासु गुणद्वयविधी स्याताम्। प्रत्यक्षसमानाकारश्च(रत्वञ्च?) वैशद्यम्, कामिनीभावनायां चक्षुषा पश्यामिति चाक्षुषत्वारोपो यादृशसादृश्यदर्शनेन तदेव सादृश्यं वैशद्यम्।

---

1. छा.उ. – 7.26.2
2. मुण्डक. – 2.2.9
3. मुण्डक. – 2.2.9
4. बृ.उ. – 4.4.2
5. बृ.उ – 6.5.15

ननु मानसे कामिनीभावनया जन्यप्रत्यक्ष एव वैशद्यम्, तत्रैव चाक्षुषत्वारोप इति चेन्न, सन्निकर्षासम्भवेन मानससाक्षात्कारासम्भवात्। न चोपनयनः सन्निकर्षः, समानविषये ज्ञानप्रत्यासत्तिघटितप्रत्यक्षसामग्र्याः तदघटितज्ञानसामग्रीमात्रस्य बलवत्त्वात्। अन्यथा स्मृतिसन्तानात्मकध्यानानुपपात्तिः, द्वितीयादिज्ञानानां प्रत्यक्षत्वापातात्, अनुमितिशाब्दज्ञानादिस्थले तत्प्रसङ्गश्च। प्रत्यभिज्ञायां तु समानविशेष्ये बलवत्या लौकिकप्रत्यक्षसामग्र्या प्रतिबन्धात् स्मृतिसामग्री नेति ज्ञानप्रत्यासत्तिघटितसामग्र्या तत्ताप्रत्यक्षमुपपद्यते।

भक्तिरूपत्वं च '**यमेवैष वृणुते तेन लभ्यः**'[1] इति वाक्येन 'प्रियतम एव हि वरणीयो भवति, यस्यायं निरतिशयप्रियः स एवास्य प्रियतमो भवती'ति न्याससहकृतेन '**भक्त्या लभ्यस्त्वनन्यया**'[2], 'प्रियो हि **ज्ञानिनोऽत्यर्थमहं स च मम प्रियः**'[3] इत्यादिवचनोपबृंहितेनावगम्यते; यमित्यनेन वरणीयताहेतुगुणपरामर्शात्, तत्रापि गुरुलघुविकल्पानुपपत्तेः, भक्त्येकलभ्यत्वानुपपत्तेश्च, ध्यानस्यैव भक्तिरूपत्वसिद्धेश्च।

ननु भगवद्ध्यानस्य विषयस्वारस्येन सुखरूपत्वात् तत्रापि रागत एव प्रवृत्तेः न विधिर्युक्त इति चेन्न, क्षीरपाने रागतः प्रवृत्तावपि पित्तरोगं निराचिकीर्षोः तन्निवृत्तिसाधनताज्ञानं विना तादर्थ्येन प्रवृत्तिवत् निदिध्यासनस्य मोक्षसाधताज्ञानं विना मुमुक्षोः मोक्षार्थितया तत्र नियतप्रवृत्त्यनुपपत्तेः।

ननु विशदानुभवप्रयोज्याया भावनाया एव प्रचयमाहात्म्येन तादृशरागसहकारात् वैशद्यं दृष्टम्, इह कथं तदुपपत्तिः पूर्वविशदानुभवासिद्धेरिति चेन्न, उपासनप्रीतभगवत्प्रसादादेव वैशद्योपपत्तेः। अत एव —

**तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।**
**ददामि बुद्धियोगं तं येन मामुपयान्ति ते।।**[4] इति भगवतैवानुगृहीतम्।

ननु विहितकर्माङ्गतया विहिताचमनादिप्राप्त्यर्थो विधिरस्तु, प्राप्तेऽप्यर्थे प्रयोजनवशात् विधिदर्शनात्। तथाहि – '**अथातोऽग्निमग्निष्टोमेनानुयजति**' इत्यग्निष्टोमाङ्गतया अग्निनामकं स्थण्डिलविशेषं विधाय आम्नातस्य '**तमुक्थ्येन**'[5], '**तं द्विरात्रेण**' इत्यादिवाक्यस्य उक्थ्यादिषतिदेशतः प्राप्तिसम्भवेऽप्यग्निविधायकत्वं प्रयोजनवशात् उक्तम्, अतिदेशतः प्राप्तौ अग्न्याश्रितानां फलार्थाकृतिविशेषरूपगुणानामनङ्गत्वात्, अप्राप्तेः तत्राप्यग्निविधौ तु उपदेशादेव प्राप्तेरिति।

---

1. कठ.उ. – 1.2.23
2. भ.गी – 8.22
3. भ.गी – 7.17
4. भ.गी. – 10.10
5. आप.श्रौ.सू. – 14.19.8

उच्यते - चोदकतः प्रागेव विधेः शीघ्रप्रवृत्तेः, प्रवृत्तस्य तस्य चोदकत एव विधित्सितार्थस्य प्राप्तिसम्भवे किमर्थो विधिरिति प्रयोजनाकाङ्क्षायां नियमपरिसङ्ख्ययोरिवात्रापि इदं प्रयोजनमित्यवगम्यते, न तु प्रयोजनबलाद्विधिः कल्प्यते। तथा सत्याचमनादिसिद्धय एव **'कृषिमत् कृषिस्व'** इत्यादौ कृष्यादेरपि विधिप्रसङ्गात्। तथा च अत्र स्वाध्यायाध्ययनापातप्रतीत्यैव परमपुरुषार्थतत्साधननिर्णिनीषया विचारकर्तव्यताबुद्धौ सञ्जातायामर्थनिर्णयार्थं न्यायापेक्षया विलम्बितम् अलब्धाधिकारं च **श्रोतव्य** इति वाक्यं कुतो विदध्यात्। विधेरेवासिद्धौ कुतः प्रयोजनाकाङ्क्षा। कुतस्तमां विहितकर्माङ्गतया विहिताचमनादिप्राप्तिः। यदि विचारदशायामाचमनाद्यनुष्ठानस्य शिष्टैः प्रवर्त्यमानस्य किं निबन्धनमिति प्रच्छ्येत, तदा तदेव तन्निबन्धनमित्युत्तरम्। कथमन्यथा **'प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य सूत्राणि प्रणयति स्म'**[1] इत्यादिभाष्योपपत्तिः। न हीदं वाक्य तद्विषयम्, गुरूपसदनविधानाच्च शौचं सिद्धम्। किञ्च अशुचिना मनसापि वेदोच्चारणस्य निषिद्धत्वात् कथं तद्विषयविचारे शौचाप्राप्तिः। निदिध्यासनं न ज्ञानं विधेयत्वात्, अतः कथं तत्र ज्ञानधर्मवैशद्यस्योपपत्तिः? मैवम्, होमादौ क्रियात्वयत्नसाध्यत्वयोरिव निदिध्यासनेऽपि ज्ञानत्वयत्नसाध्यत्वयोर्दुरपह्नवत्वात् कस्यचित् ज्ञानस्य यत्नसाध्यत्वस्य कस्यचित् ज्ञानस्यायत्नसाध्यत्वस्य च अनुभवे सति यत्नसाध्यत्वात् ज्ञानत्वनिरासे तदभावाद्वा तन्निरासोऽन्यत्र कथं न स्यात्। तस्मात् ज्ञानमेव विधेयं चेति। अन्यथा स्वत्वत्यागात्मकबुद्धिविशेषस्य यागस्याप्यविधेयत्वप्रसङ्गात्।

माध्वो(क्तः?) नियमविधिरप्यनुपपन्नः, शब्दन्यायाभासत्वज्ञाने तत एव ततो निवृत्त्या विधिवैयर्थ्यात्। तदज्ञानेन च विधिनापि निवृत्त्यसम्भवात्।

मायिनामपूर्वविधिस्तु नियमवादिना निरस्त एव। निदिध्यासनविधाने श्रवणमननयोः रागादेव प्रवृत्त्युपपत्तेः न विधिगौरवं युक्तमित्युक्तयुक्तेश्च नियमपरिसङ्ख्ये अप्यनुपपन्ने। न्यायानुसन्धानस्याप्रमाणत्वात्। तत्सहकारिकामनाप्रवृत्त्या च ज्ञानहेतुताया अप्राप्तेः। तत्सहकृतशब्दस्यापि परोक्षनिर्णयहेतुत्वमेव, न त्वपरोक्षज्ञानजनकत्वम्, तत्र तस्यायोग्यत्वात्।

**॥ इति श्रवणस्य विधेयत्वभङ्गः॥**

## 2. शब्दापरोक्षभङ्गः

शब्दादपरोक्षं जायते इति वादिनां मतानामनुवादः अत्रापि शाब्दापरोक्ष्योपपादने मुष्टामुष्ट्याचरन्ति। केचिदाहुः – आत्मा तावत्स्वतोऽपरोक्षः, **'यत्साक्षादपरोक्षात्'**[2] इति

1. महाभाष्यम् – 1.1.1
2. बृ.उ. – 5.4.1

श्रुतेः। घटादिकं चापरोक्षात्मनि अध्यस्तमिति आत्मा एव तदपरोक्षता, तदपरोक्षत्वानुभवस्य तत्सत्तानुभवस्येव तदधिष्ठानात्मगोचरत्वात्।

न च घटादेः जडस्य सर्वदा अपरोक्षत्वप्रसङ्ग इति वाच्यम्। प्रमातृचैतन्यतादात्म्यस्य सदा असत्त्वात्। अत एव देवदत्तस्य घटापरोक्षतादशायां तं प्रति रसगुरुत्वादिः नापरोक्षः। चाक्षुषवृत्तेः रसाद्यनभिव्यञ्जकतया आवृतस्य रसचैतन्यस्य प्रमातृचैतन्यात् भिन्नत्वात्। सुखादिकं चानावृतसाक्ष्यध्यासात् वृत्तिं विनैव अभिव्यक्तमिति तदपरोक्षम्। धर्मादिकं साक्ष्यध्यस्तमपि अनुद्भूतत्वात् अप्रत्यक्षम्। तस्मात् यज्जडमुद्भूतं यदा यदभिन्नचैतन्याभिन्नम्, तत् तदा तस्यापरोक्षतादात्म्यात् भवत्यपरोक्षम्। ज्ञानापरोक्षत्वं च चैतन्यस्य स्वस्मिन् स्वरूपेण, अनात्मनि तु अपरोक्षार्थविषयत्वम्। वृत्तेस्तु अपरोक्षार्थविषयत्वमेव सर्वत्र। न चेदं चैतन्येऽप्यस्त्विति वाच्यम्। तस्य सुखसाक्षात्कारत्वाभावप्रसङ्गादिति।

ननु अपरोक्षार्थविषयानुमितेरापरोक्ष्यं स्यादिति चेन्न, इष्टापत्तेः। अत एव पर्वतांशे अनुमितिः साक्षात्करोमीत्यनुभूयते।

नन्वेवमहङ्काराद्यतिरिक्तात्मानुमितिरप्यपरोक्षा स्यादिति चेत्, यद्यपरोक्षार्थविषयत्वमापाद्यते, तर्ह्यद्धा। अथानुमितिविषयस्य तस्य साक्षात्करोमीत्यनुभवविषयत्वम्, तदस्त्येव, चैतन्यं साक्षात्करोमीत्यनुभवात्। न चैवमनुमितेरपि साक्षात्कारतयानुभवप्रसङ्गः। अपरोक्षार्थविषयज्ञानत्वस्याप्यनुभूयमानत्वात् घटादिविषयेन्द्रियजन्यज्ञाने इतोऽतिरिक्तसाक्षात्कारताननुभवात्। न चैवमनुमित्याप्यविद्यानिवृत्तिप्रसङ्गः। देहातिरिक्तात्मानुमितिगोचरसाक्षिविषयाज्ञानाभावात् पूर्णब्रह्मविषयज्ञानस्य भिन्नविषयानुमित्या निवृत्त्यसम्भवात्। शुद्धे सत्यज्ञानानन्दात्मनि ब्रह्मणि पक्षसाध्यादिवैशिष्ट्यगोचरानुमितिः न सम्भवत्येव। **'तत्त्वमस्या'**[1] दिवाक्यसन्निधावेव **'तस्य तावदेव चिरं यावन्न विमोक्ष्ये'**[2] इति श्रवणात् **'वेदान्तविज्ञानसुनिश्चितार्थाः'**[3] इति वचनाच्च श्रुतिजन्यज्ञानस्यैव मुक्तिसाधनत्वावगमाच्च। न चैवमात्मानुमितेरपि प्रत्यक्षप्रमात्वेन व्यवहारप्रसङ्गः। प्रत्यक्षव्यवहारस्य इन्द्रियजन्यमात्रगोचरत्वात्।

न चानुमाने चक्षुरादाविव अपरोक्षप्रमाणव्यवहारापत्तिः। आत्मानुमानं हि अन्यतस्सिद्धापरोक्षताविशिष्टार्थविषयतया दैवादपरोक्षम्, न तु अर्थस्यापरोक्षताया निमित्तम्, चक्षुरादिकं तु अपरोक्षतायां प्रयोजकमित्यनेनैव विशेषेण तन्मात्रगोचरः अपरोक्षव्यवहारः। एवं च सर्वदा सर्वपुरुषचैतन्याभिन्नत्वात् स्वत एवापरोक्षं ब्रह्म। तस्मात् तत्त्वमस्यादिवाक्यजन्यज्ञानं न परोक्षम्, अपरोक्षार्थविषयत्वात् चाक्षुषज्ञानवत्।

---

1. छा.उ. – 6.8.7; 6.9.4; 6.10.3; 6.11.3; 6.12.3; 6.13.3; 6.14.3; 6.15.3
2. छा.उ. – 6.14.2
3. म.ना.उ. – 10.6, मुण्डक. – 3.2.6

न चेन्द्रियजन्यत्वमुपाधिः। त्वदभिमताजन्यप्रत्यक्षे सुखादिप्रत्यक्षे दशमस्त्वमसीति ज्ञाने च साध्याव्यापकत्वात्। न च जन्यज्ञानस्य परोक्षत्वाभावे इन्द्रियजन्यत्वमुपाधिः। जन्यज्ञानपरोक्षत्वे लिङ्गजन्यत्ववत् तस्याप्यप्रयोजकत्वात्। अपरोक्षार्थविषयत्वस्यैव वृत्तौ अपरोक्षतारूपत्वेन तस्य परोक्षत्वाभावव्याप्तेश्च। अत एव न शब्दजन्यत्वमुपाधिः, अन्यथा तत्त्वमसिवाक्यात् परोक्षज्ञाने अविद्यानिवृत्त्याभावात् अनिर्मोक्षप्रसङ्गाच्चेति।

**इतरे तु** अपरोक्षार्थविषयत्वं यदि ज्ञानस्यापरोक्ष्यं तदा स्वरूपज्ञाने स्वसुखापरोक्षात्मकेऽव्याप्तिः, स्वप्रकाशस्य चिद्विषयत्वविरोधात्। किन्तु अर्थस्य स्वव्यवहारानुकूलचैतन्याभेद आपरोक्ष्यम्। तत्तदर्थव्यवहारानुकूलचैतन्यस्य तत्तदर्थाभेदो ज्ञानापरोक्ष्यम्। तथा चेदं चैतन्यस्यैव धर्मो नान्तःकरणवृत्तेः। अत एव सुखादिप्रकाशात्मकसाक्षिणि स्वरूपसुखप्रकाशरूपचैतन्ये चापरोक्ष्यम्। न च वृत्तावापरोक्ष्यानुभवविरोधः, तस्य तदवच्छिन्नचिद्विषयत्वात्।

ननूक्तं ज्ञानार्थयोरापरोक्ष्यं हृदयादिगोचरशाब्दज्ञानतद्विषययोरतिप्रसक्तम्। तत्र दैवात् कदाचित् वृत्तिविषयसंसर्गे वृत्त्यवच्छिन्नविषयावच्छिन्नचैतन्ययोरभेदाभिव्यक्तेरवर्जनीयत्वादिति चेन्न, परोक्षवृत्तेः विषयावच्छिन्नचैतन्यगताज्ञाननिवर्तनाक्षमतया तत्राज्ञानावृतविषयचैतन्यस्य अनावृतवृत्त्यवच्छिन्न-चैतन्येनाभेदाभिव्यक्तेरभावात्। अत एव जीवस्य संसारदशायां न ब्रह्मापरोक्ष्यम्। अज्ञानावरणकृतभेदसत्त्वात्। ईश्वरं प्रत्यज्ञानस्यानावारकत्वेन तं प्रति जीवभेदानापादकत्वात् न तस्य जीवापरोक्ष्यासम्भवः। यं प्रति यदज्ञानमावारकं तस्य तं प्रत्येव स्वाश्रयभेदापादकत्वात्। अत एव चैत्रज्ञानेन तस्य घटाज्ञाने निवृत्ते अनिवृत्तं मैत्राज्ञानं मैत्रं प्रत्येव विषयचैतन्यस्य भेदापादकमिति न चैत्रस्य घटापरोक्ष्यानुपपत्तिरपि।

नन्वेवं वृत्तिविषयावच्छिन्नचैतन्यभेदाभिव्यक्तिलक्षणापरोक्ष्यस्य विषयचैतन्यगताज्ञान-निवृत्तिप्रयोज्यत्वे तस्याज्ञाननिवृत्तिप्रयोजकत्वायोगात् ज्ञानमात्रमज्ञाननिवर्तकं स्यादिति चेन्न, यत् ज्ञानमुत्पद्यमानं स्वकारणमहिम्ना विषयसंसृष्टमेवोत्पद्यते तदेवाज्ञाननिवर्तकमिति विशेषणात् ऐन्द्रियकज्ञानानां तथात्वात्। एवं च शब्दादुत्पद्यमानमपि ब्रह्मज्ञानं सर्वोपादानभूतस्वविषयब्रह्म-चैतन्यसंसृष्टमेवोत्पद्यत इति तस्याज्ञाननिवर्तकत्वम्, अज्ञाननिवृत्तौ तन्मूलभेदप्रविलयादापरोक्ष्यं चेत्युपपद्यते।

नन्वेवमध्ययनजन्यब्रह्मज्ञानेऽपि मूलाज्ञाननिवृत्त्या आपरोक्ष्यं किं न स्यात्। न च तत्समाननिश्चयरूपत्वाभावात् अनिवर्तकमिति वाच्यम्। तथापि कृतश्रवणस्य निर्विचिकित्सशाब्दज्ञानादेव निवृत्तिप्रसङ्गादिति चेन्न, चित्तविक्षेपदोषेण प्रतिबन्धात् निर्विचिकित्सज्ञानेनाप्यज्ञानानिवृत्तेः, मनननिदिध्यासननियमविध्यनुष्ठानस्यार्थवत्त्वात् भवान्तरीयमननाद्यनुष्ठाननिरस्तचित्तविक्षेपस्य उपदेशमात्रादेव ब्रह्मापरोक्ष्यस्य इष्यमाणत्वाच्चेत्याहुः।

**परे तु** वृत्त्यवच्छिन्नचैतन्यस्य विषयावच्छिन्नचैतन्यादभेदो ज्ञानापरोक्ष्यम्। न च

स्वकीयधर्माधर्मयोः शब्दादिना ज्ञाने धर्मतद्विषयवृत्त्योरेकदेशस्थत्वात् तदवच्छिन्नचैतन्ययोरभेदादतिव्याप्तिः, योग्यत्वस्यापि विषयविशेषणत्वात्। पर्वतो वह्निमानित्यादौ च पर्वतांशे वह्न्यंशे चान्तःकरणवृत्तिभेदात् प्रत्यक्षत्वपरोक्षत्वयोरविरोधः। अत एव 'पर्वतं पश्यामि, वह्निमनुमिनोमि' इत्यनुभवः। विषयस्यापरोक्षत्वं तु प्रमात्रभिन्नत्वम्। तच्च प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः। अतो न 'अहमिदं पश्यामि' इत्यनुभवविरोधः। न च धर्माधर्मयोः प्रत्यक्षतापत्तिः। योग्यत्वेन विशेषणात्। न च रूपप्रत्यक्षकाले परिमाणप्रत्यक्षतापत्तिः तदुभयावच्छिन्नचैतन्यैक्यादिति वाच्यम्। तदाकारवृत्त्युपहितत्वस्य प्रमातृविशेषणत्वात्। वृत्तौ चानवस्थाभयात् व्यक्त्यन्तरानङ्गीकारेऽपि स्वविषयत्वाङ्गीकारात् तद्विषयकत्वस्यैव तदाकारशब्देन विवक्षितत्वान्नाव्याप्तिः। अन्तःकरणतद्धर्मशुक्तिरजतादिषु च वृत्त्यभ्युपगमान्नाव्याप्तिः।

न च केवलसाक्षिविषयत्वाभ्युपगमविरोधः। इन्द्रियानुमानादिप्रमाणनैरपेक्ष्यस्य तत्र विवक्षितत्वात्। एवं च तद्विषयवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताशून्यत्वे सति योग्यत्वं विषयस्यापरोक्ष्यम्। तत्तदिन्द्रिययोग्यविषयावच्छिन्नचैतन्याभिन्नत्वं ज्ञानापरोक्षत्वमिति।

**अपरे तु** मूलाज्ञानमेव ब्रह्मावारकम्। अवस्थाज्ञानानां तु तत्तदवच्छिन्नचैतन्याश्रितानां तत्तज्जडमेव विषयः। एवं च तं प्रत्यनावृतत्वे सति तद्व्यवहारानुकूलसंविदभेदोऽर्थापरोक्ष्यम्। घटसाक्षात्कारदशायां तु रसस्यावृतत्वात् नापरोक्ष्यमिति।

**एके तु** तिष्ठन्तु एताः पण्डितम्मन्यानामपूर्वकुसृष्टयः। इदं तु स्यात्। **'तरति शोकमात्मवित्'**[1] इत्यादिशास्त्रात् आत्मज्ञानं मोक्षसाधनत्वेनावगतम्। अपरोक्षस्य च कर्तृत्वाध्यासाविद्यादेरपरोक्षज्ञानं विना निवृत्तिः न युज्यते। औपनिषदे ब्रह्मणि न मानान्तरमस्ति। अतः शब्द एव तत्र हेतुः। स च स्वतोऽसमर्थोऽप्यन्यथानुपपत्त्या शास्त्रीयश्रवणमननपूर्वकप्रत्ययाभ्यां सञ्जनितसंस्कारप्रचयलब्धचित्तैकाग्र्यानुगृहीतः अपरोक्षसाधनमिति कल्पनीयम्। ततश्चापरोक्षज्ञानविषयत्वमेवापरोक्षत्वमिति।

कश्चित्तु भावनाप्रचयसहकृतज्ञानकरणत्वावच्छेदेन पथिकपरिक्षावितप्रियतमसाक्षात्कारस्थले मनसः करणत्वावधारणात् तच्छब्दस्यापि तादृशस्य दृष्टानुरोधादेव साक्षात्कारजनकत्वमित्याह।

### उपदर्शितमतानां निरासेन शाब्दापरोक्षासम्भवनिरूपणम्

अत्रोच्यते - यद्यर्थगतमेवापरोक्ष्यं तर्हि अपरोक्षज्ञानस्याविद्यानिवर्तकत्वं न स्यात्, अन्योन्याश्रयात्। आवरणनिवृत्तौ हि विषयावच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदः। तस्मिन् सति तद्विषयकत्वेनापरोक्षात् ज्ञानात् आवरणनिवृत्तिरिति।

1. छा.उ. – 7.1.3

किञ्च पर्वतघटादिषु वृत्त्यवच्छिन्नविषयावच्छिन्नचैतन्ययोरभेदो दुर्वचः। नैरन्तर्ये सत्यपि निरन्तराङ्गुलिद्वयावच्छिन्नचैतन्ययोरिव अवकुञ्चनपटघटावच्छिन्नचैतन्ययोरिव च भिन्नत्वात्।

किञ्च घटप्रत्यक्षदशायां तत्स्पर्शगोचरशाब्दादिज्ञानस्य आपरोक्ष्यप्रसङ्गः। अज्ञायमानरसादेरपि तदापरोक्ष्यप्रसङ्गः। अन्तःकरणसन्देशात् हृदयादौ चातिप्रसङ्गः।

न च तद्दशायामावृतस्य स्पर्शाद्यवच्छिन्नचैतन्यस्य अनावृतसाक्षिचैतन्येन नाभेद इति वाच्यम्। निर्गतान्तःकरणैकोपाध्यवच्छेदात् ऐक्यस्यावर्जनीयत्वात्। अन्यथा घटस्यापि भेदकत्वेनाप्रत्यक्षत्वप्रसङ्गात्। घटावच्छिन्नचैतन्यस्य च प्रमातृभेदे स्पर्शरसाद्यपरोक्षता दुर्वारा, तस्यैव रसाद्यधिष्ठानचैतन्यत्वात्। घटावच्छिन्नरसाद्यवच्छिन्नचैतन्ययोर्भेदे च गुणगुणिनोस्तादात्म्यानुपपत्तिः, भिन्नत्वे सत्यभिन्नसत्ताकत्वं हि तादात्म्यमुक्तम्। आवरणस्य प्रमातृचैतन्यात् भेदकत्वे च ब्रह्मापरोक्ष्यं न स्यात्। अतः कश्चन्द्र इति प्रश्नकालीनानवधारणात्मकचन्द्रप्रत्यक्षानभ्यासदशापन्नजलजलादिज्ञानानां प्रत्यक्षता न स्यात्। श्रवणात्पूर्वभाविब्रह्मज्ञानस्य अनवधारणत्वप्रतिबन्धत्वादिकल्पनं च व्यर्थं स्यात्, आवरणकृतभेदेन तस्याप्रत्यक्षत्वात्।

किञ्च अस्ति लौकिकानामपि घटप्रत्यक्षं जातम् इदमिदानीं मम प्रत्यक्षमिति प्रतीतिः व्यवहारश्च। न च प्रमातृचैतन्याभिन्नत्वं घटादौ ज्ञायते। प्रत्युत भेदः ज्ञायते। न च प्रमातृचैतन्यतादात्म्यस्यैवाभेदत्वात् तादात्म्यस्य च भिन्नत्वे सत्यभिन्नसत्ताकत्वात्मकत्वात् भेदज्ञानेऽपि न दोष इति वाच्यम्। तथाप्यभिन्नसत्ताकत्वाज्ञानात् ज्ञाने च समानाधिकरणव्यवहारापत्तेः।

नन्विन्द्रियजन्यज्ञानविषय एव लौकिकानां प्रत्यक्षत्वव्यवहार इति चेत्, तर्हि ब्रह्मण्येव वैदिकानां प्रत्यक्षत्वव्यवहार इति जडे प्रकारान्तरेण प्रत्यक्षत्वोपपादनं व्यर्थम्।

किञ्च लौकिकानां प्रत्यक्षव्यवहारस्येन्द्रियजन्यज्ञानविषयगोचरत्वे तत्रैवापरोक्षादिपदव्युत्पत्तेः **'यत्साक्षादपरोक्षात्'**[1] इत्यत्रापि इन्द्रियजन्यज्ञानविषयत्वमेवार्थः स्यात्। ततश्चेन्द्रियजन्यपदज्ञानसाध्यार्थज्ञानगोचरधर्मादेरिव न परम्परयेन्द्रियजन्यज्ञानविषयता, किन्तु साक्षादेवेति साक्षात्पदप्रयोजनं स्यात्।

किञ्चैवं चैतन्यस्यापरोक्षव्यवहारो न स्यात्। न च तत्र प्रमातृचैतन्याभेदात् आपरोक्ष्यव्यवहारः, अननुगमात्। अपरोक्षज्ञानत्वेनाविद्यानिवृतकताग्रहश्च न स्यात्। ब्रह्मघटज्ञानयोरनुगतापरोक्ष्यासिद्धेः। धर्मादेश्चापरोक्षत्वप्रसङ्गः। न चोद्भूतत्वेन विशेषणात्परिहारः। ईश्वरं प्रत्यपि तस्यापरोक्षत्वाभावापत्तेः।

ननु धर्मादिकमीश्वरं प्रत्युद्भूतमिति चेत्, तथा सति तं प्रत्यनावृतत्वात् तत्प्रत्यक्षविषयत्वं तद्योग्यतावच्छेदकं चोद्भूतत्वमिति पर्यवस्यति, अन्यस्य सप्रतियोगिकस्यानिरुक्तेः। तत्र चाद्ये

1. बृ.उ. – 5.4.1

पक्षे धर्मादेरुद्भूतत्वे अनुद्भूतत्वे च तद्विशेषणवैयर्थ्यम् इतरयोरन्योन्याश्रयः, ज्ञाननिबन्धनार्थापरोक्ष्यप्रसङ्गो वा। किञ्च प्रत्यययोग्यत्वं प्रत्यक्षजननयोग्यत्वम्। तदवच्छेदकं च धर्मादावप्यस्ति। विषयतायाः प्रत्यक्षजनकतावच्छेदकं ब्रह्मण्यपि नास्तीति तस्य प्रत्यक्षता न स्यात्।

किञ्चापरोक्षविषयानुमितेरपि अपरोक्षत्वप्रसङ्गः।

यदुक्तं पर्वतांशेऽनुमितेः साक्षात्कारत्वानुभवात् अत्रेष्टापत्तिरिति तन्न, अव्यवहितेन्द्रियकप्रत्यक्ष एव तथानुभवात्, पर्वतं पश्यामीति चाक्षुषत्वानुभववत्। अन्यथा भूतले रज्जुं घटे च तद्व्याप्यं पश्यतः घटे तदनुमितौ तत्र तदंशे आपरोक्ष्यानुभवप्रसङ्गः। रजतमणिं रजततया लाक्षानुलिप्तचर्मासक्तरजतं स्वर्णतया रजतत्वव्याप्यवत्तया च पश्यतः तत्र रजतत्वानुमितौ रजतत्वांशे आपरोक्ष्यानुभवप्रसङ्गः।

किञ्चात्मानुमितेरपरोक्षत्वप्रसङ्गः।

यदुक्तं शुद्धेऽनुमितिर्न सम्भवतीति तत् वेदान्ततात्पर्यगोचरो ब्रह्म न तद्वाक्यस्थपदशक्यमित्यवाच्यत्वानुमानस्य स्वयमेव निर्धर्मकब्रह्मविषयत्वोपपादनात् विरुद्धम्।

किञ्च निदिध्यासनस्यापरोक्षार्थविषयकत्वात् आपरोक्ष्यप्रसङ्गः। तत एव चाविद्यानिवृत्तिप्रसङ्गः, असम्भावनादिप्रतिबन्धकानामपि निवृत्तत्वात्। न च ध्यानस्य ज्ञानभिन्नत्वादनिवर्तकत्वम्। तथाप्यपरोक्षत्वस्य निवर्तकताप्रयोजकस्याक्षतेः, ज्ञानत्वस्यापि प्रवेशे गौरवात्। अविच्छिन्नस्मृतिरूपत्वेन ज्ञानत्वाच्च निदिध्यासनानन्तरं स्मृतेरेव निवर्तकत्वप्रसङ्गः।

ननु श्रुतिजन्यज्ञानस्यैव मुक्तिसाधनत्वस्योक्तत्वात् नानुमितिः निदिध्यासनं तदनन्तरस्मृतिर्वा अविद्यानिवृत्तिहेतुरिति चेत्, तर्हि अद्वैतश्रुतिजन्यज्ञानत्वेन निवर्तकत्वस्यैव श्रुत्यावबोधितत्वात्। तथा निवर्त्यत्वस्य शुक्तिरजतादिष्वभावात्, ज्ञाननिवर्त्यत्वस्यान्यथानुपपत्या मिथ्यात्वकल्पनं न स्यात्। ज्ञाननिवर्त्यत्वमात्रस्य पुरुषोत्तमदर्शननिवर्त्यपातकेऽपि सत्त्वेन रूपान्तरेण निवर्त्यत्वस्यैव मिथ्यात्वकल्पकत्वात्, श्रुत्या च तदबोधनात्।

किञ्च तत् रूपान्तरं न तत्त्वसाक्षात्कारत्वम्, तस्य घटादिसाक्षात्कारेष्वतिप्रसक्ततया निवर्तकतानवच्छेदकत्वात्। नहि घटसाक्षात्कारः पटाज्ञाननिवर्तकः। नाप्यधिष्ठानतत्त्वसाक्षात्कारत्वम्। तदधिष्ठानं हि तत्कल्पनाधर्मितदधिकरणत्वे सति तदत्यन्ताभाववत् वाच्यमिति मिथ्यात्वघटितम्। तथा च न मिथ्यात्वकल्पकम्, आत्माश्रयात्। ततश्च शक्तिविशेषाद्यनपेक्षापरोक्षज्ञाननिवर्त्यत्वमेव मिथ्यात्वप्रयुक्ततया तत्कल्पकं वाच्यम्। दृष्टं चैतत् शुक्तिरजतादौ। एवं च श्रुतिजन्यज्ञानस्यैवाविद्यानिवर्तकत्वे तस्य शक्तिविशेषविशिष्टतया निवर्तकत्वात् मिथ्यात्वे च तदनुपपत्तेः सत्यत्वपर्यवसानं स्यात्, पुरुषोत्तदर्शननिवर्त्यपापवत्।

ननु स्वातिरिक्तकारणानपेक्षज्ञाननिवर्त्यत्वमेव मिथ्यात्वकल्पकम्। न च निवर्त्यसापेक्षत्वात्

प्रपञ्चनिवृत्तौ अविद्यानिवृत्तेरप्यपेक्षितत्वाच्च तदसम्भवः, निवर्त्यातिरिक्तस्वसाध्यानपेक्षत्वस्य विवक्षितत्वात्, प्रपञ्चनिवृत्त्यात्मकमुक्तौ च **'नान्यः पन्था'**[1] इति श्रुतेः तत्सिद्धेः। अत एव कालोऽपि न कारणम्। प्रपञ्चेनैव सहैव निवर्त्यस्य कालस्याधिकरणत्वानुपपत्तेश्च, अधिकरणत्वेन तस्य हेतुत्वात्। तत्र च व्यभिचारेणाकारणस्य कालस्य मिथ्यार्थनिवृत्तिमात्रे न हेतुत्वमिति मिथ्यारजतेऽपि तत्सिद्धमिति चेन्न, अन्योन्याश्रयात्, प्रपञ्चमिथ्यात्वे सिद्धे मिथ्यार्थनिवृत्तित्वावच्छेदेन कालजन्यत्वग्रहः, तद्ग्रहे च शुक्तिरजतेऽपि तत्सिद्धेः, तस्य मिथ्यात्वव्यापकत्वग्रहात् प्रपञ्चेऽपि मिथ्यात्वकल्पनमिति।

किञ्च शुक्तिरजते दृष्टत्वाविशेषात् शक्तिविशेषानपेक्षज्ञाननिवर्त्यत्वस्यापि मिथ्यात्वव्यापकत्वात् तन्निवृत्तौ प्रपञ्चः कथं मिथ्या स्यात्।

किञ्च **'वेदान्तविज्ञाने'**[2]**ति 'तस्य तावदेव चिरम्'**[3] इति च न साक्षात्साधन-त्वमवगम्यते। प्रत्युत ब्रह्मलोके तु तावच्चिरमिति विलम्बश्रवणात् शाब्दज्ञानस्य उपयोगमात्रम् अन्यस्य कस्यचित् साक्षात्साधनत्वं च गम्यते।

यच्च किञ्चिदुच्यते **तत्त्वमस्या**दिवाक्यार्थज्ञानं मोक्षस्य साधनमिति स्मर्यत इति, तदपि न, परिकरमात्रेऽपि प्रयुज्यमानस्य साधनशब्दस्य लोकसिद्धसाध्यसाधनभावभञ्जकत्वायोगात्। विलम्बश्च त्वदुदाहृतश्रुतिभ्यामेव सिद्धः। अतः साधनशब्दस्य साक्षात्साधनत्वैकान्त्येऽपि न तत्परता। अस्तु वा साक्षात्साधनत्वप्रतिपादनं पूर्वोत्पन्नशाब्दज्ञानात् अतिरिक्तस्य अविद्यानिवृत्त्यव्यवहितकालीनस्य शाब्दज्ञानस्य, अथापि परोक्षज्ञानस्य शाब्दस्य लोकसिद्धनिवर्तकेनापरोक्षज्ञानेन सह विकल्पेन विधानं स्यात्। न ह्यन्वयव्यतिरेकमूलम् औषधस्य व्याधिनिवर्तकत्वं व्याधिनिवर्तकजपादिविधिभिः अपह्रियते। वस्तुतस्तु अपरोक्षब्रह्मणि शब्देनाप्यपरोक्षमेव जायत इति तस्यैवानुवादः स्यात्। अस्तु तर्हि नियमविधिः, मैवम्, शक्तिविशेषापेक्षायां दोषस्योक्तत्वात्।

किञ्च शाब्दापरोक्षस्य मोक्षसाधनताबोधमात्रात् न विधित्वसम्भवः, प्राप्तत्वात् अपि तु शाब्दापरोक्षत्वेन मोक्षत्वेन कार्यकारणभावबोधनादेव। तथा बोधने च लक्षणाप्रसङ्गः। तस्मादनुवाद एव स्यात्। तस्मात् अनुमित्यादिभिः अविद्यानिवृत्तिः दुर्वारा। तस्मात् उक्तप्रकारमापरोक्ष्यं परित्यज्य तत्त्वमस्यादिवाक्योत्थज्ञानस्य परोक्षस्यैव मोक्षसाधनत्वं विधीयत इत्यङ्गीकार्यमिति विध्यभिनिवेशे सिद्ध्यति।

---

1. पु.सू. - 17
2. म.ना.उ – 10.6, मुण्डक. – 3.2.6
3. छा.उ. – 6.14.2

किञ्च अधिष्ठानमेवापरोक्षत्वम्, घटादौ तत्तादात्म्याध्यासात् अपरोक्षव्यवहार इत्युक्तौ सत्तावत् अपरोक्षत्वमपि सप्रतियोगिकं न स्यात्। नहि घटः कञ्चित् प्रति सन्। तत्प्रमातृचैतन्याभिन्नचैतन्यतादात्म्यम् आपरोक्ष्यमित्यादिरूपेण सप्रतियोगिकत्वात् तद्बुद्ध्योः लोकसिद्धयोरुपपादने हि प्रमातृभिन्नसत्तादात्म्यम् सत्त्वम् इत्येवं सत्तायाः सप्रतियोगिकत्वतद्बुद्धि-व्यवहाराः अर्जनीयाः।

किञ्च सदादिस्वरूपे ब्रह्मणि यथा बाध्यायोग्यत्वादिसदादिशब्दप्रवृत्तिनिमित्तं तथा अपरोक्षस्वरूपे अपरोक्षशब्दप्रवृत्तिनिमित्तं किञ्चिद्वाच्यम्। तच्च दुर्निरूपम्।

किञ्च अत्र वृत्त्यवच्छिन्नचैतन्ये ज्ञानापरोक्ष्यं न स्यात्, घटस्यापरोक्षार्थत्वाभावात् चैतन्यस्याविषयत्वात्। न चापरोक्षतादात्म्यापन्नार्थविषयत्वं ज्ञानापरोक्ष्यम्, वृत्तेः चैतन्यापरोक्षत्वाभावापत्तेः। न च वृत्तेः चैतन्ये अपरोक्षार्थत्वे तस्य विषयत्वं ज्ञानापरोक्ष्यम्। एवं हि चैतन्ये वृत्तेः इदं तत्रैव चैतन्यस्य तदभेदः। द्वयोरपि जडे अपरोक्षतादात्म्यापरोक्षविषयत्वम् अपरोक्षत्वम् इत्यननुगमात् अनुगतबुद्ध्यनुपपत्तेः। तस्मात् नार्थनिबन्धनं ज्ञानापरोक्ष्यम्। अपि तु ज्ञाननिबन्धनमेव अर्थापरोक्ष्यम्।

ननु यद्यपरोक्षज्ञानविषयत्वमर्थस्यापरोक्ष्यम्, तदा सामान्यप्रत्यासत्तिजन्यज्ञानविषयत्वात् **'परमाणुरपरोक्ष'** इति व्यवहारापत्तिः। शब्देन काशीस्थं पदार्थं ज्ञानतः काशीस्थं पदार्थं जानामीत्यनुभवतः 'काशीस्थः पदार्थोऽपरोक्ष' इत्यनुभवप्रसङ्गः। ज्ञानप्रत्यासत्तिजन्यज्ञान-विषयत्वादन्धस्य शाब्दं शौक्ल्यानुभवम् अनुभवतः 'शौक्ल्यमपरोक्षमि'ति अनुभवापातः। तथा 'दण्डययमासादि'त्यनुभवे 'देवदत्ते दण्डो ममेदानीमपरोक्ष' इति व्यवहारप्रसङ्ग इति चेत्, न तावत् परमाणौ आपरोक्ष्यव्यवहारापत्तिः, लौकिकैः तज्ज्ञानस्य सन्निहितव्यक्त्यतिरिक्तपरमाण्वा-दिविषयत्वापरिज्ञानात्। तत्परिज्ञातृणां तु विदुषां भवत्येव व्यवहारः। नापि 'काशीस्थः पदार्थः अपरोक्ष' इति वा 'शौक्ल्यमपरोक्षम्' इति वा अनुभवप्रसङ्गः। स्वरूपतः तदंशप्रत्यक्षत्वव्यञ्जकस्य तदंशे लौकिकप्रत्यासत्तिजन्यत्वस्य अभावात्। अत एव दण्डांशेऽपि न प्रत्यक्षत्वव्यवहारः।

न चैवं रजतभ्रमे साक्षात्कारत्वानुभवो न स्यादिति चेत् न, यद्दर्शनाभावजन्यः भ्रमः तद्ग्रहजनकलौकिकसन्निकर्षस्यापि अभिव्यञ्जकत्वात्। एवं च लौकिकसन्निकर्षजन्यत्वं प्रमायां स्वरूपसदेव प्रत्यक्षत्वाभिव्यञ्जकं लौकिकसन्निकृष्टगोचरप्रत्यक्षाभावजन्यत्वं तादृशभ्रमे तद्व्यञ्जकम्। दण्डित्वभ्रममूले 'दण्डययमासीदि'ति भ्रमरूपप्रत्यभिज्ञाने दण्डव्यतिरेकप्रत्यक्षाभावः न प्रयोजकः। किन्तु परोक्षापरोक्षसाधारण्येन दण्डव्यतिरेकज्ञानाभाव एव, 'नायं दण्डयासीदि'ति शाब्दज्ञाने सत्यपि निरुक्तभ्रमानुदयात्।

किञ्च तवापि 'दण्डं प्रत्यक्षेण जानामि', 'दण्डश्चक्षुषा दृष्टः', 'प्रत्यक्षेण ज्ञायत' इति इत्यनुभवः स्यात्। यदि चेष्टापत्तिः तदा अस्माकमपि तुल्यम्।

किञ्च चाक्षुषत्वं यदि चक्षुर्जन्यज्ञानविषयत्वं स्यात् तदा दण्डेऽपि तत्सत्त्वात् 'दण्डो ममेदानीं चाक्षुष' इति व्यभिचारापत्तेः चाक्षुषत्वमपि अपरोक्षत्ववत् ज्ञाननिबन्धनमेव अर्थगतं स्वीकार्यं स्यात्।

किञ्च वह्निमनुमिनोमीतिवत् पर्वतमनुमिनोमीत्यव्यवहारात् अनुमेयत्वमपि अनुमितिविषयत्वात् अन्यत् स्यात्।

वस्तुतस्तु आपरोक्ष्यं हि स्पाष्ट्यरूपः ज्ञानगतातिशयः विषयनिरूप्यः नित्यज्ञानसाधारणः। अनित्यज्ञाने च यथानुभवं लौकिकप्रत्यासत्तिदोषविशेषादिजन्यरागानुरक्तभावनादौ व्यवस्थाप्यः। तस्मात् अलौकिकप्रत्यासन्नस्य आपरोक्ष्यानिरूपकत्वात् न दण्डादौ आपरोक्ष्यानिरूपकत्वानुभवः। देवदत्तादौ तु तत्सत्त्वात् तदनुभवः। प्रत्यक्षत्वमिन्द्रियजन्यत्वम्। विषये तु तादृशज्ञानविषयत्वात् प्रत्यक्षत्वव्यवहारः। दण्डादाविदं ये जानन्ति तेषां तत्र तद्व्यवहारः अस्त्येव। अतो दण्डादीनां प्रत्यक्षविषयत्वेऽपि आपरोक्ष्यानिरूपकत्वात् पारोक्ष्यमेवेति। **'यत्साक्षात्'**[1] इति श्रुतिस्तु स्वप्रकाशतादिपरत्वेनाप्युपपन्ना।

**साक्षादि**ति घटादाविव ज्ञानान्तराधीनापरोक्षप्रकाशस्य निषेधात् अनुमानमप्ययुक्तम्, न परोक्षमित्यस्य प्रमातृचेतन्यभिन्नार्थगोचरत्वाभावपरत्वे घटसाक्षात्कारे व्यभिचारात्। घटस्य हि तादात्म्यम्, न त्वभेदः। तादात्म्यानापन्नार्थगोचरत्वाभावपरत्वे बाधः। नहि ब्रह्मणो भेदगर्भं तादात्म्यम्। व्यावहारिकभेदाङ्गीकारे च कथम् अभिन्नसत्ताकत्वम्। 'दण्डयमासीदि'त्यादिज्ञाने व्यभिचाश्च।

यत् ब्रह्मणः सर्वपुरुषचैतन्याभिन्नत्वात् स्वतोऽपरोक्षत्वमुक्तम्, तदयुक्तम्, आवृतत्वेन ततो भिन्नत्वात्। आवृतस्याप्यभेदे घटप्रत्यक्षसमये रसस्याप्यपरोक्षतापत्तेः।

द्वितीयपक्षे पाञ्चभौतिकशरीरे भूतानां व्यापकत्वात् तद्गोचरशाब्दज्ञानतद्विषययोरुभयविधम् आपरोक्ष्यम् अतिप्रसक्तम्। नहि तत्र हृदय इव दैवात् तद्विषयसंसर्गः, येन वृत्तिविषयावच्छिन्नचैतन्ययोः अभेदाभिव्यक्तिः न स्यात्। एवं मनो न प्रमाणम्। **'चोदनालक्षणोऽर्थो धर्मः'**,[2] **'प्रकृतिर्जगदुपादानम्'**, **'मायां तु प्रकृतिं विद्यात्'**[3] इत्यादिशाब्दज्ञानादिष्वतिप्रसङ्गः।

किञ्च तत्तदर्थव्यवहारानुकूलचैतन्याभेदो यद्यर्थापरोक्ष्यं तदा सर्वस्य सर्वं सर्वदा अपरोक्षं

---

1. बृ.उ. – 5.4.1, 5.4.2
2. जै.सू. – 1.1.2
3. श्वे.उ. – 4.10

स्यात्, तादृशस्वाधिष्ठानचैतन्याभेदात्। तत्कर्तृकव्यवहारासाधारणानुकूलचैतन्याभेदः तं प्रति आपरोक्ष्यमिति चेत्, एवमपि स्वाश्रयं प्रतिधर्मादेः सर्वदा आपरोक्ष्यप्रसङ्गः। तदधिष्ठा-प्रमातृचैतन्यस्यासाधारणत्वात्। तत्तदर्थमात्रव्यवहारानुकूलत्वमपि विवक्षितमिति चेत् न, घटप्रकाशस्य स्वावच्छेदकवृत्तिव्यवहारानुकूलत्वेनासम्भवप्रसङ्गात्। स्वरूपप्रकाशस्य अविद्यादिव्यवहारसाधारण्येन उक्तरूपासिद्ध्या स्वरूपस्यापरोक्ष्यानुपपत्तिश्च। घटव्यवहारानुकूलघटाधिष्ठानचैतन्यस्य नानापुरुषवृत्त्यवच्छिन्नत्वेन असाधारण्यासिद्धेश्च। न च वृत्तिभेदात् तदवच्छिन्नचैतन्यभेदः। एकदेशस्थयोः भेदकत्वासम्भवात्। अन्यथा घटतद्वृत्त्यवच्छिन्नचैतन्ययोरप्यभेदानुपपत्तेः।

**एतेन** तद्व्यवहारानुकूलानावृतचैतन्याभेदः अर्थापरोक्ष्यम्, तेन न सर्वेषां सर्वदा आपरोक्ष्यप्रसङ्ग इति **निरस्तम्,** घटे ज्ञायमाने रसादेरापरोक्ष्यप्रसङ्गात्, घटावच्छिन्नचैतन्यस्य घटज्ञानेन निवृत्तावरणकतया अनावृतचैतन्याभेदात्।

न च रसावच्छिन्नघटावच्छिन्नचैतन्ययोः भेदात् रसावच्छिन्नचैतन्यं तत्रावृतमिति वाच्यम्। एकदेशस्थत्वेन चैतन्यभेदकत्वासम्भवात्। यदि च घटावच्छिन्नचैतन्यात् रसावच्छिन्नचैतन्यं भिद्येत, तदा क्वाप्यावरणकल्पनमेव न स्यात्। घटाकारवृत्त्या घटावच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदात् तं प्रति तद्भानेऽपि रसादेरभानात् तदुपपादनार्थं अज्ञानावरणं कल्प्यते घटावच्छिन्नात् रसावच्छिन्नचैतन्यस्य भेदे च घटाकारवृत्त्या प्रमातुः घटावच्छिन्नचैतन्याभेदे सत्यपि रसावच्छिन्नचैतन्याभेदाभावात् तस्य प्रमातृसम्बन्धादेव अप्रकाशोपपत्तेः तत्कल्पनवैयर्थ्यात्।

ननु घटावच्छिन्नचैतन्यमेव रसावच्छिन्नचैतन्यम्। तत्र घटरसादिकं भिन्नभिन्नाज्ञान-विषयतावच्छेदकम्। एवञ्च स्वावच्छिन्नावरणशून्यचैतन्याभेदः अर्थापरोक्ष्यम्। अतो घटसाक्षात्कारेण तत्र रसावरणानिवृत्तेः न रसस्यापरोक्ष्यमिति चेन्न, ब्रह्मणः सर्वदापरोक्ष्यप्रसङ्गात्, तस्य स्वयमज्ञानविषयतयानवच्छेदकत्वात्। वस्तुतस्तु ब्रह्मणः आपरोक्ष्यं न स्यात्, तदवच्छिन्नावरणाप्रसिद्धेः। एवं शुक्तिरजतसुखादावपि द्रष्टव्यम्।

किञ्च यावदावरणशून्यत्वमसम्भवि सर्वैरेकस्यानुपलम्भात्। यत्किञ्चिदावरणशून्यत्वे तुविवक्षिते घटस्य देवदत्तं प्रति आपरोक्ष्यकाले रसमात्रं जानानं यज्ञदत्तं प्रति आपरोक्ष्यप्रसङ्गात्। तं प्रत्यावृतत्वाभावविवक्षायाम् ईश्वरं प्रति किमप्यपरोक्षन्न स्यात् तं प्रति आवरणाप्रसिद्धेः, तं प्रत्यावरणावच्छेदकत्वाभावस्यैव लाघवेन तं प्रति अपरोक्षत्वरूपत्वसम्भवाच्च।

किञ्च प्रकाशमानचैतन्याभेदात् प्रकाशे प्रसक्ते अप्रकाशार्थमावरणं कल्प्यते। प्रकाशमानचैतन्याभेदाभावादप्रकाशो यथा स्यादिति। एवञ्च रसावच्छिन्नाज्ञानेन चैतन्यस्याप्रकाशे घटोऽपि न प्रकाशेत। नहि घटस्यावच्छेदकत्वाभावमात्रात् तत्प्रकाशकचैतन्यस्याप्रकाशमानत्वम् अपगच्छति। अन्यथा रसादेरपि प्रकाशमानाभेदात् प्रकाशापत्तेः।

**यच्चोक्तम् -** यं प्रत्यज्ञानमावारकं तं प्रत्येवावृतस्य भेदापादकम्। अतो नेश्वरस्य

जीवापरोक्ष्याभावापत्तिरिति, तन्न, नहि भेदः कञ्चित् प्रत्यस्ति कञ्चित् प्रति नास्तीति वा कञ्चित् प्रति भेदः कञ्चित् प्रति नेति वा वक्तुं शक्यं घटादिवत्। न च जीवप्रतियोगिकभेद ईश्वरेऽस्ति, जीवे तु नेश्वरप्रतियोगिकभेदोऽस्तीत्यपि वक्तुं शक्यम्। बिम्बप्रतिबिम्बयोः द्वयोरपि भेददर्शनात्, जीवगतदुःखादिदोषाणामीश्वरे प्रसङ्गाच्च।

न च यं प्रत्यावरणं तत्कृतो भेदः तं प्रत्येव आपरोक्ष्यविरोधी, नान्यं प्रति इति वाच्यम्। अभेदो ह्यापरोक्ष्यम्। न च भेदे सति सोऽस्ति इति। न च वाच्यं तं प्रति आवृतत्वविशिष्टाभेदाभावः तं प्रत्यापरोक्ष्यम्, ईश्वरं प्रति जीवस्यावृतत्वाभावात् विशिष्टाभावसत्त्वात् जीवस्यापरोक्ष्यमिति। ईश्वरं प्रत्यावरणाप्रसिद्धेः आवृतत्वाभावमात्रस्यापरोक्ष्यत्वोपपत्तेश्च आवृतानावृतभेदकल्पनावैयर्थ्यात्।

न चानावृतत्वमेव आपरोक्ष्यमस्त्विति वाच्यम्। जडावरणस्य दूषितत्वेन सर्वदा आपराक्ष्यप्रसङ्गात्। अनावृतचैतन्याभेदस्य चानवधारणविषयजलादौ अव्याप्तेरुक्तत्वात्।

यदुक्तं चित्तविक्षेपदोषेण प्रतिबन्धात् न निर्विचिकित्सज्ञानेनापि अज्ञाननिवृत्तिरिति, तन्न, सत्यपि चित्तविक्षेपे घटादिज्ञानेन अज्ञाननिवृत्तिदर्शनेन तस्य अज्ञाननिवृत्तिप्रतिबन्धकत्वासिद्धेः।

किञ्च 'दशमोऽहमि'ति शाब्दज्ञाने यादृशमापरोक्ष्यमनुभूयते तादृशमेव 'ब्रह्माहमस्मी'ति निर्विचिकित्सशाब्दज्ञानेऽप्यनुभूयते। अतः तत्रापरोक्ष्याभावोऽनुपपन्नः।

तृतीयपक्षे ब्रह्मज्ञानस्य आपरोक्ष्याभावः प्रसज्यते तत्र विषयावच्छिन्नचैतन्यासिद्धेः। चैतन्यस्य स्वप्रकाशस्य द्विविधापरोक्ष्याभावप्रसङ्गश्च, तत्र वृत्तिविषयावच्छिन्नचैतन्ययोरसिद्धेः।

यच्च योग्यत्वं विषयविशेषणमिति, तन्न, योग्यत्वमिन्द्रिययोग्यत्वम्। ततश्च ब्रह्माहमर्थसुखादेरज्ञानस्य चापरोक्ष्याभावप्रसङ्गः। इन्द्रिययोग्यत्वञ्च इन्द्रियजन्यज्ञानविषयत्वयोग्यत्वमेव। ततश्च तावदेवापरोक्ष्यमस्तु। तथा च ज्ञानविषयत्वमेवार्थापरोक्ष्यं पर्यवस्यति।

ननु इन्द्रियजन्यवृत्त्यभिव्यक्तचैतन्याभिन्नत्वं योग्यत्वम्। रूपप्रत्यक्षसमये रसापरोक्ष्यवारणाय तदाकारेतीतरांशः। तथा चेन्द्रियजन्यतदाकारवृत्त्यभिव्यक्तचैतन्याभिन्नत्वं समुदायार्थः पर्यवस्यतीति चेन्न, शुक्तिरजते वृत्तिकृतावरणाभिभवस्य इन्द्रियजन्यवृत्तेश्च अभावेनाव्याप्तेः, अविद्यावृत्तेरिन्द्रियाजन्यत्वात्। परोक्षवृत्तौ चेन्द्रियजन्यवृत्तिकृतावरणाभिभवाभावादव्याप्तेः। अविद्यादिषु चाव्याप्तिः प्रागेवोक्ता। तस्मात् ज्ञानगतमेवापरोक्ष्यम्। तत्सम्बन्धादर्थे तद्व्यवहारः। **'यत्साक्षादपरोक्षाद्ब्रह्म'** इति च इममेवार्थं स्पष्टमाह। ब्रह्मण आपरोक्ष्यम्, साक्षादव्यवधानेन स्वप्रकाशत्वात्। घटादेस्तु तद्विषयकज्ञानव्यवधानेन अस्वप्रकाशत्वादित्यर्थः। ब्रह्मण आपरोक्ष्यं स्वतः। घटादेरापरोक्ष्यं न स्वतः, किन्तु वृत्तिव्यवधानादिति परोक्तार्थः अनुपपन्नः, वृत्तेरापरोक्ष्यहेतुत्वेऽपि व्यवधायकत्वासिद्धेः। नहि वृत्तिगतमापरोक्ष्यं येन व्यवधायकता स्यात्।

चतुर्थपक्षोऽप्यनुपपन्नः – विशेष्यवैयर्थ्यात्। अस्तु तं प्रत्यनावृतत्वं तं प्रत्यपरोक्षत्वमिति चेत्, न, तथा सत्यनभ्यासदशापन्नजलाद्यनवधारणस्थले जलादेरापरोक्ष्याभावप्रसङ्गात्। न चात्रेष्टापत्तिः। तादृशार्थाभेदस्यैव ज्ञाने आपरोक्ष्यरूपत्वात्। तस्यैव इन्द्रियजन्यतावच्छेदकत्वात्।

तदभावे इन्द्रियजन्यत्वानुपपत्तेः।

किञ्च जडस्य अप्रसक्तप्रकाशत्वेन प्रयोजनाभावात् नावरणं कल्पनीयम्।

ननु चैतन्यसम्बन्धात् प्रसक्तप्रकाशस्य जडस्याप्रकाशार्थमावरणं कल्पनीयमिति चेत्, प्रकाशः किं चैतन्यसम्बन्ध एव उत तद्विषयता ? नाद्यः, आवरणे सत्यपि तस्यानपायात्। न द्वितीयः, चैतन्यसम्बन्धस्य चैतन्यविषयतायां प्रयोजकत्वात्। असत्यपि सम्बन्धे वह्न्यादेः अनुमित्याद्यवच्छिन्नचैतन्यविषयत्वात्। अतः तदाकारवृत्त्यवच्छेदतदभावाभ्यां तद्विषयत्वतदभावौ किञ्च आवरणस्य अविषयत्वप्रयोजकत्वे अनुमित्यादिविषयता क्वचिदपि न स्यात्। न च सम्बन्धचैतन्याविषयत्वम् आवरणप्रयोज्यं धर्मादेः शाब्दज्ञानाद्यविषयत्वापातात् धर्मतद्विषय-वृत्त्योरेकदेशस्थत्वात्।

पञ्चमपक्षोऽप्यनुपपन्नः, अन्यथानुपपत्त्या स्वतोऽसमर्थस्यापि शब्दस्य साक्षात्कारजनकत्ववत् अद्वैतशास्त्रजन्यपरोक्षज्ञानस्य निवर्तकत्वकल्पनसम्भवात्।

ननु अधिष्ठानतत्त्वसाक्षात्कारत्वेन अध्यासनिवर्तकत्वम् अध्यासनिवृत्तित्वेन तज्जन्यत्वं चावगतम्। अतः तदभावेऽध्यासनिवृत्तिरनुपपन्ना। वाक्यत्वेन परोक्षज्ञानत्वेन जन्यजनकभावो नावगतः। अतः शब्दस्यापरोक्षज्ञानजनकत्वं युक्तमेवेति चेन्न, इन्द्रियत्वेन जन्यप्रत्यक्षत्वेन कार्यकारणभावग्रहात् तदभावे तदयोगात्।

ननु एवमपि परोक्षज्ञानेन अविद्यानिवृत्तिकल्पने किं विनिगमकमिति चेत्, परोक्षज्ञानस्य अध्यासनिवृत्तिजनकत्वे अध्यासनिवृत्तौ अद्वैतज्ञानाजन्याविद्यानिवृत्तित्वं कार्यतावच्छेदकमिति अविद्यानिवृत्तित्वस्य कार्यतावच्छेदकस्य सङ्कोचमात्रम्। शब्दस्यापरोक्षज्ञानजनकत्वे इन्द्रियजन्यतावच्छेदकं शब्दाजन्यसाक्षात्कारत्वमिति कार्यतावच्छेदकसङ्कोचो विशिष्टः। साक्षात्कारस्य विषयसन्निकर्षजन्यत्वावच्छेदकसङ्कोचोऽधिकः। आपरोक्ष्यस्य श्रवणाद्यनन्तरभावित्वे श्रवणादीनां साक्षात्कारहेतुत्वक्लृप्तिश्चाधिका।

किञ्च श्रुतिबलादन्यतरनियमभङ्गे कार्ये नहि शब्दस्यापरोक्षज्ञानजनकत्वं कल्पयित्वा स कार्यः, गौरवात् किन्तु श्रुतमात्रानुरोधादेव।

षष्ठे पक्षे सन्निकर्षाभावान्न भावनायामपि कामिन्या ब्रह्मणश्च साक्षात्कारः, जन्यप्रत्यक्षत्वावच्छिन्ने तद्धेतुत्वात्। अतः स्मृतावेव विशदायां चाक्षुषत्वारोपः।।

**॥ इति शब्दापरोक्षभङ्गः ॥**

## 3. श्रवणस्य नियमविधिः

नियमविधिषु आद्यपक्षः तावन्न सम्भवति। **'ज्ञानप्रसादेन विशुद्धसत्व'** इति ज्ञानाधीनत्वात् मनश्शुद्धेः। इदानीं विशुद्धमनसो लाभात् न तत्प्रणिधाने प्रवृत्तिसम्भवः।

किञ्च विधिं विना पाक्षिकाप्राप्तिवारणाशक्यत्वे हि नियमविधिः। इह तु कृतेऽपि प्रणिधाने ज्ञानादर्शनादेव ततो निवृत्तिरिति न नियमविधिः। प्रत्यक्षमूलात् तदुपदेशादेवान्यस्याप्रवृत्त्युपपत्तेः। नापि भेदशास्त्रप्रवृत्तिव्यावृत्त्यर्थो नियम इति पक्षः सम्भवति। तथाहि - न तावदापातप्रतिपन्नवेदार्थपुरुषं प्रति नियमः। तदा हि भेदाभेदतत्त्वसन्देहात् तत्त्वजिज्ञासैव जायेत, न तु 'भेदनिर्णयो मे भूयादि'तीच्छा। भेदनिर्णयस्य मोक्षसाधनत्वेन ज्ञानात् तदिच्छा जायत इति चेन्न, तत्रापि सन्देहात्।

ननु माभूत्तदंशेऽपि निश्चयः। सन्देहादेव 'यदि न स्यादि'ति न्यायेन प्रवृत्तिः स्यादिति चेन्न, तत्सन्देहे विद्यमाने तत्त्वजिज्ञासां विना 'एतन्निश्चयो मे भूयादि'त्यन्यतरकोटाविच्छानुदयात्। नापि गृहीतभेदतात्पर्यकवेदान्तं प्रति नियमः, तेनास्यापि भेदतात्पर्यस्यैव ग्रहेण तं प्रति अस्य वाक्यस्य त्वदुक्तार्थबोधकत्वासिद्धेः।

न च गृहीताभेदतात्पर्यकवेदान्तं प्रति, विचारादेव तात्पर्यावधारणेन निर्वृत्तविचारं प्रति विचारविधिवैयर्थ्यात्।

किञ्च न्यायवशादेव ह्यस्याः श्रुतेरद्वैतार्थपरत्वं ज्ञायते, न तु वाक्येनैव, अद्वैतं श्रोतव्यमिति वाक्यादर्शनात्। तस्मादिहेव भेदवाक्येऽपि न्यायेनैवाद्वैतपरत्वस्य ज्ञानान्न तन्मूलभ्रान्ति-प्रसक्तसाधनान्तरव्यावृत्तिसम्भवः।

ननु एतद्वाक्यप्रवृत्तेः प्राक् आपातप्रतीत्या भेदवाक्यात् प्रसक्तसाधनान्तरव्यावृत्तिः न्यायावधारिताद्वैततात्पर्येण अनेन वाक्येन भवतीति नियमविध्युपपत्तिरिति चेन्न, तथापि विधिपरत्वाभावेऽप्यस्य तन्न्यायात् अद्वैततात्पर्यावधारणादेव द्वैतपरत्वेन प्रतीयमानवाक्यस्यापि अद्वैतपरत्वनिश्चयेन तन्मूलभ्रमाभावात् विध्यानर्थक्यात्।

किञ्चैवं वाक्यार्थभ्रमं निमित्तीकृत्य[1] विध्युत्पत्तौ श्रवणविधेः सङ्केतभ्रमाधीनार्थान्तरभ्रमे सति द्वैतात्मविचारप्रवृत्तिव्यावृत्त्यर्थं विध्यन्तरमपेक्षणीयम्। तत्रापि सङ्केतभ्रमसम्भवात् विध्यनवस्था।

किञ्चैवं पुरुषदशाविशेषमवलम्ब्य विधिप्रवृत्तौ वैतुष्यस्य अवहननसाध्यत्वानवबोधदशामवलम्ब्य **'व्रीहीनवहन्ति'** इत्यस्याप्यपूर्वविधित्वप्रसङ्गात्।

किञ्च आत्मदर्शनाय हि **आत्मा श्रोतव्य** इति नियम्यते। स च प्रकरणात् अद्वैतात्मैवेति **आत्मा द्रष्टव्य** इत्यनूदितात्मदर्शने भेदविचारस्याप्राप्तेर्न नियमः।

यदुक्तं भ्रमगृहीतसाधनव्यावृत्त्यर्थः नियम इति। अस्त्वेवम्। अथापि यदि नियमेन विना भ्रमनिवृत्तिर्न स्यात् तदा हि नियमः स्यात्। न च नियमेन विना साधनत्वभ्रमः विदलनादेः निवर्तते। इह तु नियमाभावेऽपि न्यायानुगृहीतैः ज्ञानस्य मोक्षसाधनताप्रतिपादकवाक्यैः अद्वैतविषयज्ञानस्यैव मोक्षसाधनताप्रतिपत्तौ कथं द्वैतज्ञानस्य मोक्षसाधनत्वभ्रमः।

1. निवृत्तीकृत्य - पाठान्तरम्

वस्तुतस्तु यदि भ्रमगृहीतसाधनव्यावृत्त्यर्थो नियमः स्यात् तदा '**उरु प्रथस्व**'[1] इति मन्त्रस्य प्रथनप्रकाशकत्वलिङ्गेन पुरोडाशप्रथने विनियोगे मन्त्रान्तरेऽपि प्रथनप्रकाशकत्वलक्षण-लिङ्गभ्रमात् तस्यापि तत्रैव विनियोगभ्रमे अनुष्ठेयार्थप्रकाशलक्षणकार्यस्य एकेनैव मन्त्रेण सिद्धौ मन्त्रद्वयं वैकल्पिकमेवेति बुद्धौ सत्याम् '**उरु प्रथस्व इति पुरोडाशं प्रथयति**' इति तदर्थशास्त्रं मन्त्रान्तरनिवृत्त्यर्थं नियमविधिरेव स्यात्, न अनुवादः। तस्मान्न भ्रमगृहीतव्यावृत्त्यर्थः नियमः। किन्तु वस्तुसत्साधनान्तरव्यावृत्त्यर्थः।

एवञ्च यदि तृणारण्यादिरूपाननुगतकारणेषु अनुगता शक्तिः कारणतावच्छेदकतया इष्यते, तदा नियोगीयव्रीहिष्वपि अवहननसाध्यतुषविमोकं प्रति नखविदलनादेः साधनत्वमस्त्येव, तुषविमोकत्वस्य कार्यतावच्छेदकत्वात्। न च तदनुष्ठानेऽपि रागनिवृत्तिप्रसङ्गः नियमादृष्टाभावात्। यदि च कारणाननुगमे कार्यवैजात्यमेव कल्प्यते, तदा उद्देश्यतावच्छेदकधर्माधिकरणे यत् वस्तुतः[2] साधनं तदेव नियमनिवर्त्यम्, नियमेन विना ततः निवृत्त्यसम्भवात्। उद्देश्यतावच्छेदकीभूततुषविमोकत्वाधिकरणे क्वचित् विदलनस्यापि साधनत्वमस्त्येव। न च मोक्षसाधनज्ञानत्वरूपोद्देश्यतावच्छेदकाधिकरणे भेदविचारस्य साधनत्वमस्ति।

ननु नियोगीयतुषविमोकत्वमेवोद्देश्यतावच्छेदकमिति चेन्न, उद्देश्यपदेन प्रवृत्तिद्वयोद्देश्यस्य विवक्षितत्वात्। तथा च नियमाप्रवृत्तिदशायाम् एतदधिकारिणः प्रवृत्तिद्वयप्रयोजकेष्टतावच्छेदकधर्मे तात्पर्यम्। स च धर्मः तुषविमोकत्वमेव, नियमात् प्राक् तथैव साधनताज्ञानात्। स च तुषविमोकः सुखत्वेनेष्टत्वेऽपि यथा सुखं स्वसम्बन्धितया काम्यते। तथा स्वकीयनियोगीयव्रीहिगततया काम्यत इति।

तथा गुरुमुखानधीनः स्वतन्त्रविचारो व्यावर्त्य इति पक्षोऽप्यनुपपन्नः, गुरोः श्रोतव्यशब्दार्थानन्तर्भावस्य प्रागेवोक्तत्वात्, गुरूपसदनविधिना सिद्धत्वाच्च।

**यदत्र कैश्चिदुक्तम् -** एवं सत्यध्ययननियमोऽपि न स्यात्, '**अष्टवर्षं ब्राह्मणमुपनयीत**' इति वाक्यविपरिणामेन '**अष्टवर्षो ब्राह्मण उपगच्छेत्**' इति विधेरेव लिखितपाठव्यावृत्तिसिद्धेः। ननु अध्ययनविध्यभावे तदङ्गोपगमविधेरेवाभावात् न तेन लिखितपाठव्यावृत्तिसिद्धिरिति चेन्न, श्रवणविध्यभावे तदङ्गगुर्वभिगमनविधिर्नास्तीति तुल्यत्वात्।

ननु गुरूपसदनस्य '**तद्विज्ञानार्थम्**' इति ज्ञानोद्देशेन स्वतन्त्रविधिरेव, न श्रवणाङ्गतयेति चेत्, तर्हि '**अष्टवर्षमुपनयीत**' इत्यत्रापि ज्ञानोद्देशेन स्वतन्त्रोपगमविधिः स्यात्। '**सम्मानना**'

---

1. तै.सं.1.1.8
2. वस्तुतः - पाठान्तरम्

दिसूत्रेण नयतेः ज्ञानार्थे आत्मनेपदस्मरणेन ज्ञानोद्देशसम्भवात्। तस्मात् उभयत्रापि वाक्यद्वयवैयर्थ्यपरिहाराय एकः प्रधानविधिः अपरः अङ्गविधिः। फलश्रवणं तु पर्णतादिफलश्रुतिवदर्थवाद इति स्वीकार्यम्।

किञ्च विधीयमानगुरूपसदनस्यादृष्टद्वारत्वे स्वतन्त्रविचारव्यावृत्त्यसम्भवात् श्रवणद्वारा ज्ञानसाधनत्वं वाच्यम्। तथा च श्रवणद्वारकं साधनान्तरमेव व्यावर्त्यं स्यात्, न स्वतन्त्रविचार इति तदर्थः नियमविधिः युज्यते।

किञ्च ज्ञानसाधनत्वेन विधौ अदृष्टमेव द्वारं स्यात्, न तु श्रवणम्। तस्य प्रागेव ज्ञानसाधनत्वेन क्लृप्तस्य पश्चात् द्वारत्वेन कल्प्यत्वे कुलालपितृवत् अन्यथासिद्ध्यापादकत्वेन श्रुतसाधनत्वप्रतिकूलत्वादिति।

उच्यते - ज्ञानोद्देशेनैव गुरूपसदनं विधीयते, न तु श्रवणार्थतया। गुरूपसदनस्य दृष्टलोभादेव श्रवणद्वारकतालाभः, न तु आत्मनेपदमहिम्ना ज्ञानार्थतयोपगमनविधाने दृष्टलोभात् अध्ययनद्वारकत्वलाभः, सम्माननाद्यनेकार्थेषु आत्मनेपदविधाने ज्ञानार्थत्वनिर्धारणाभावात्, निर्धारितार्थस्वाध्यायाध्ययनविधेरेव विधायकत्वात्।

किञ्चोपनयनस्य याजनवत् रागप्राप्तस्य विधानासम्भवात् प्रयोज्यव्यापारोपगमनविधिः कल्प्यः। तच्च आत्मनेपदस्य आचार्यकरणार्थत्वे तत्र कथं ज्ञानार्थविधिलाभः।

किञ्च ज्ञानं धात्वर्थ एव, न धात्वर्थफलम्, तथैवोदाहृतत्वात् - नयते चार्वी लोकायते। चार्वी बुद्धिः। तत्सम्बन्धादाचार्योऽपि। चार्वी ज्ञानं प्रमेयनिश्चयः। 'तत्र प्रमेयं निश्चिनोतीत्यर्थ' इति **वृत्तिकारः।** 'तेषामेव धात्वर्थत्वादि'ति **दत्तः।** तच्छब्देन उत्सञ्जनज्ञानविगणनव्ययाः गृह्यन्ते। 'परिशिष्टानि तु नयत्यर्थः स्वभावानी' इति **न्यासकारः।** 'अन्ये तु धात्वर्था' इति **धातुवृत्तिकारः।** अन्यशब्देन उत्सञ्जनज्ञानविगणनव्ययाः गृह्यन्ते।

किञ्च उपगमनस्य व्यर्थतामङ्गीकृत्य ज्ञानस्य फलत्वधात्वर्थत्वात्मनेपदार्थत्वान्यतमाङ्गीकारेऽपि न उद्देश्यविधिसम्भवः। प्रथमपक्षे पदाभावात्। इतरयोरेकपदे विध्युद्देशयोरसम्भवात् **'वषट्कर्तुः प्रथमभक्ष'** इतिवत्।

किञ्च ज्ञानोद्देशेन विधौ कथमध्ययनविधिः वेदस्य तदर्थस्यान्यस्य वा ज्ञानस्याध्ययननिरपेक्षत्वात्।

यच्चोक्तम् - स्वतन्त्रविचारव्यावृत्तिर्न स्यादिति, तन्न, गुरूपसदनं हि ज्ञानार्थतयैव विधीयते, न तु श्रवणार्थतया। तस्य च नियमविधित्वाज्ज्ञाने साधनान्तरं व्यावृत्तमेवेति कथं न स्वतन्त्रविचारव्यावृत्तिः। तर्हि पश्चत् द्वाराकाङ्क्षायां दृष्टलाभेन कल्प्यमानं श्रवणरूपद्वारं नियमविधिसामर्थ्यं विहन्यात्। अवहननमपि हि व्रीह्यर्थतयैव विधीयते, न तु तुषविमुक्त्यर्थतया। दृष्टलोभात्तु तद्द्वारत्वं कल्प्यते।

इयांस्तु विशेषः व्रीहीणां स्वरूपतः साध्यत्वाभावात् रूपान्तराप्रतीतेः विधेयावहननसामर्थ्याच्च विमुक्ततुषत्वेनैव साध्यतावगमात् तत्साधनस्यैव व्यावर्त्यतया दैवात् द्वारसाधनव्यावृत्तिसिद्धिः। इह तु ज्ञानस्य स्वरूपेणैव साध्यतावगमात् तत्साधनस्यैव व्यावर्तकतया न द्वारसाधनव्यावृत्तिसम्भवः। अन्यथा ऋत्विगानयनार्थं दक्षिणादानं प्रीतिद्वारा न हेतुरिति प्रीतिद्वारकसामाद्युपायान्तरव्यावृत्तिः स्यात्, न तु भीतिद्वारा कार्योन्मुख्यात्मकानतिहेतुतो दण्डनादेः।

यच्चोक्तम् - अदृष्टमेव द्वारं स्यादिति तन्न, श्रुत्या अन्यपूर्ववर्तित्वग्रहं विनैव साधनताबोधनात्। अन्यथा '**साम्ना स्तुवीत**' इति गुणाभिधानलक्षणज्ञानविशेषात्मकस्तोत्रसाधनतयापि विधिर्न स्यात्। ऋगक्षराभिव्यक्तिद्वारत्वे उक्तरीत्या श्रुतसाधनत्वविरोधापत्तेः।

किञ्चायं हि नियमविधिः, स च साक्षात् परम्परया वा यथालोकं प्राप्यतस्य तथैव अप्राप्तांशपरिपूरणफलक इति न तत्रान्यथासिद्धिदोषः। अन्यथा तात्पर्यावधारणानुकूल-चेतोवृत्तिविशेषात्मकत्वदभिमतश्रवणस्यापि क्लृप्तशाब्दज्ञानहेतुताकतात्पर्यावधारणद्वारकत्वे कुलालपितृवदन्यथासिद्धेः अदृष्टार्थताप्रसङ्गात्।

इतिहासाद्यनुमितवेदान्तव्यावृत्त्यर्थो नियम इत्यपि तेनैवोक्तं दुरुक्तम्। **श्रोतव्य** इत्यत्र श्रुतिशाब्दान्तर्भावं परिकल्प्य तस्य रूढ्यर्थविवक्षायां वेदमात्रस्यैव श्रुतिशब्दार्थत्वात् अनुमितश्रुतेः व्यावृत्त्यसिद्धेः। योगविवक्षायां श्रोत्रग्राह्यत्वमात्रलाभात् शब्दलाभेऽपि वेदान्तानां तत्राप्रवेशात् मूलशैथिल्यपरिहाराय अनुमितवेदस्य पदार्थस्मृत्यनुपयुक्तस्य अर्थप्रत्यायकत्वाभावेन अप्रसक्तेः न तद्व्यावृत्त्यर्थतासम्भवः। **श्रोतव्य** इत्यत्र श्रुतिशब्दान्तर्भावात् स्वातन्त्र्येण पुराणवाक्यं व्यावर्त्यमिति तदुक्तं निरस्तम्। रण्डागीतादिव्यावृत्तिफलम् इत्यप्यत एव निरस्तम्। मनःप्रमाणव्यावृत्त्यर्थो वेदान्तनियम इति पक्षोऽनुपपन्नः, श्रुत्यनन्तर्भावस्य प्रागेवाभिधानात्। किञ्च आत्मा द्रष्टव्यः तदर्थं श्रोतव्य इत्युक्तेः दर्शनोद्देशेन शाब्दज्ञानविधिरेव प्रतीयेत।

ननु दर्शनोद्देशेन शब्दविधिः यूपोद्देशेन साप्तदश्यविधिवत् देवतोद्देशेन शब्दविध्यङ्गीकारेऽप्य-रत्नीनामिव ज्ञानस्य सम्बन्धद्वारता प्रतीयेत। ततश्च न मनोव्यावृत्तिसिद्धिः। अपि चायं नियमविधिः अप्रवृत्तप्रवर्तनात्मको वाच्यः, तव्यप्रत्ययानुरोधात्। नियमविधेरप्रवृत्तप्रवर्तकता च प्रयोगान्तरे साधनान्तरप्रवृत्तिव्यवच्छेदेन स्वविषयसाधने प्रवर्तकत्वात्। तेन अनेन विधिना मनःप्रमाणे प्रवृत्तिरेव व्यवच्छिद्येत, न तु मनसो ब्रह्मसाक्षात्कारकारणत्वम्। नहि नखादीनां तण्डुलसाधनत्वम् अवहननविधिना व्यवच्छिद्यते।

नापि परिसङ्ख्यापक्षः सम्भवति, आवश्यकदेहयात्रानिमित्तस्य विद्योपयोगिनित्यनैमित्तिकादेश्च व्यापारस्य अनिवर्तनीयत्वात्। रागद्वेषादिमूलव्यापारस्य श्रवणे शमदमाद्यङ्गत्वविधानादेव निवृत्तेः परिसङ्ख्याविधिनिवर्त्यं न किञ्चित् परिशिष्यते।

किञ्च द्विविधो हि परिसङ्ख्याविधिः। एकस्य शेषस्य शेषिद्वयप्राप्तौ एकशेषिनिवृत्तिफलक

एकः। यथा अग्निचयने लिङ्गात् ‘**इमामगृभ्णन्**’ इति मन्त्रे अश्वगर्दभरशनयोः प्रसक्ते गर्दभरशनातो निवृत्त्यर्थम् ‘**इमामगृह्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते**’ इति विधिः। एकस्मिन् अन्यशेषिणि शेषद्वयप्राप्तौ शेषान्तरनिवृत्तिफलकोऽपरः। यथा गृहमेधीये पञ्चमे पक्षे प्रकृतितः प्राप्तेषु प्रयाजाज्यभागादिषु प्रयाजादिनिवृत्त्यर्थ ‘**आज्यभागौ यजति**’ इति विधिः। इह द्विविधोऽपि न सम्भवति। ब्रह्मदर्शनार्थिनः तदन्यविषये श्रवणस्य तत्र श्रवणव्यतिरिक्तस्य च प्राप्त्यभावात्। एकस्मिन् शेषिणि समुच्चित्य प्राप्त्यभावेऽपि अन्यनिवृत्तिफलकपरिसङ्ख्याभ्युपगमे ‘**आज्यभागौ यजति**’ इत्यत्रापि अनुपयोगिव्यापारान्तरनिवृत्तिफलकपरिसङ्ख्याप्रसङ्गात्।

किञ्च यथा ‘**शंय्वन्ता प्रायणीया सन्तिष्ठते आज्यभागौ यजति**’ इत्यादौ शंय्वन्ताङ्गकलापविधाने तदितराङ्गजातनिवृत्तिरर्थाद्भवति। तेनैव क्लृप्तोपकारेण कथमाकाङ्क्षापूरणात् चोदकाप्रवृत्तेः, यथा च अश्वरशनाग्रहणे मन्त्रविधेः गर्दभरशनातोऽर्थात् निवृत्तिः, नैराकाङ्क्ष्यात् विनियोजकलिङ्गप्रतिबन्धात्। न तथेह ब्रह्मदर्शनाय श्रवणविधिबलात् कार्यान्तरार्थं रागतः प्रसक्तव्यापारान्तरनिवृत्तिः सम्भवति। एवञ्च आत्मा श्रोतव्य इत्यस्य अन्यविषयव्यापारो न कार्य इत्यर्थे लक्षणाऽऽश्रयणीया। तथा च सैव दोषः। अन्यथा ‘**उद्भिदा यजेत**’ इत्यादौ मत्वर्थलक्षणया गुणविधित्वसम्भवात् नामत्वं न स्यात्। किञ्चैवं न श्रवणस्य विधिः अपि, तु अन्यनिवृत्तेः। किञ्च ब्रह्मदर्शनार्थम् अन्यत् न कर्तव्यमिति अमत्यविधिनं सम्भवति ब्रह्मदर्शनार्थं चरकादिश्रवणाप्रसक्तेः।

न च ब्रह्मदर्शनसाधनतया अन्यव्यापारनिवृत्तिसिद्धिः। स्वत एव्रान्यव्यापाररहितस्य श्रवणादपि ब्रह्मदर्शनासिद्धिप्रसङ्गात्। अप्रसक्तान्यव्यापाराणां निवृत्त्यसम्भवात्। न च प्रसक्तोऽधिकारी ब्रह्मदर्शनकामाधिकारताविरोधात्।

न च व्यापारान्तरप्रसक्तिब्रह्मदर्शनात् न अर्थिता विशिष्टाधिकारः। तथा सति ‘**परस्त्रीकामः प्रायश्चित्तं कुर्यात्**’ इतिवत् विशिष्टनिमित्तकविधित्वप्रसङ्गेन ब्रह्मज्ञानानुपयोगितापत्तेः। किञ्च ‘**नानृतं वदेत्**’ इत्यादावनृतं वदेदित्यंशेन निमित्तं न इत्यनेन विषयः समर्थ्यत इति प्रसक्तिनिमित्तकतास्तु। इह तु श्रोतव्य इत्येकेन पदेन इतरव्यापारनिवृत्तिलक्षणात् न निमित्तसमर्पकमन्यदस्ति। श्रोतव्यपदञ्च विषयसमर्पकम् इति नैमित्तिकतायां मानाभावात्। स्वतोऽप्रसक्तस्य श्रवणादपि ब्रह्मदर्शनासिद्धिस्स्यात्। एतेन इतरव्यापारप्रसक्तब्रह्मदर्शनकामाधिकारकतया संवलिताधिकारताशङ्कापि निरस्ता।

एवं फलेऽपि श्रवणादीनां चतुर्णामपि मोक्षः फलमिति माध्वपक्षोऽनुपपन्नः। एकस्य अधिकारकल्पनेनैव उपपत्तौ सर्वेषाम् अधिकारकल्पनानुपपत्तेः। न च दर्शपर्णमासशब्देनेव एतावच्छब्देन सर्वेषां परामर्शात् समुदितानां फलसम्बन्धः, तस्यार्थवादत्वेन फलवाक्यत्वाभावार्थवादस्य च साक्षाद्वा परम्परया वा फलसम्बन्धेनाप्युपपत्तेः। अत्र च

निदिध्यासनस्य अमृतत्वाय विधौ श्रवणमननयोरपि तदर्थतयोपपत्तेः। दुन्दुभेस्तु ग्रहणेनेत्यादिनेन्द्रियनिग्रहस्यापि पूर्वमुपदेशात् एतावदिति तस्यापि परामर्शादेवमेव युक्तम्।

एवं दर्शनश्रवणादीनां त्रयाणां फलमिति पक्षोऽपि निरस्तः। दर्शनार्थं निदिध्यासनविधिः श्रवणमननयोः तदङ्गतेति पक्षोऽप्यनुपपन्नः। दर्शनस्य विधेयताया उक्तत्वात्। शाब्दापरोक्षनिरासादेवापरोक्षज्ञानं नियमफलमिति पक्षो निरस्तः। **द्रष्टव्य** इति मानससाक्षात्कारो नोच्यत इत्युक्तत्वात् तत्फलत्वपक्षोऽपि निरस्तः। स्वतलन्त्रविचारो व्यावर्त्य इति मते शक्तिः फलम्। स एवमाह - अपरोक्षशास्त्रार्थविचारत्वेन विचारयोग्यसाक्षात्कारत्वेन वा विचार्यशास्त्रार्थसाक्षात्कारप्रतिबन्धकासम्भावनादिषु अलीकशास्त्रविचारत्वेनासंभावनादिनिवृत्तिद्वारक-विचार्यार्थसाक्षात्कारत्वेन वा गान्धर्वशास्त्रविचारस्य षड्जादिसाक्षात्कारं प्रति अन्वयव्यतिरेकाभ्यां हेतुत्वकल्पनात् वेदान्तश्रवणस्यापि ब्रह्मापरोक्षावगमं प्रति साधनतायाः सिद्धत्वात् **श्रोतव्य** इति निरामविधिः। न च नियमात् अदृष्टसाध्यसम्भवः प्रतिबन्धककल्पनिवृत्त्या मोक्षजननसमर्थस्य श्रवणसाध्यज्ञानस्य तत्साध्यत्वात्। तच्च श्रवणमङ्गीकार्यमानकरणत्वादविद्यानिवर्तनशक्तं हि ज्ञानं काम्यते। तत्रापि न ज्ञानांशे श्रवणं कारणम्, अन्योऽन्याश्रयात् श्रवणस्य प्रमाणान्तरतापत्तेश्च परतःप्रामाण्यापत्तेश्च। किन्तु तद्गताविद्यानिवर्तनशक्तौ। सा हि श्रवणात् प्राक् असम्भावनादिप्रतिबन्धात् अनुत्पन्ना। तन्निवृत्तिद्वारा श्रवणेनोत्पद्यत इत्युच्यते। अस्तु तावत् षड्जादिस्थले साक्षात्कारं प्रति शास्त्रविचारस्य प्राप्तिः। तथापि शक्तिं तद्विशिष्टं प्रति वा हेतुत्वेनाप्राप्तत्वात् न तदर्थतया श्रवणनियमः सम्भवति।

न च तत्रापि शक्तिं प्रत्येव साधनत्वं क्लृप्तमिति वाच्यम्, असिद्धेः। यदि हि विचारात् प्राक् अविद्यानिवृत्त्यनुपयुक्तं साक्षात्कारमात्रं सिद्धं स्यात् विचारे चाविद्यानिवृत्तिसमर्थसाक्षात्कारः तदा हि तथा स्यात्। तादृशसाक्षात्कारश्च न स्वरूपसाक्षात्कारः। तदज्ञानस्यापि प्रागेव निवृत्तेः। नापि भेदसाक्षात्कारः तस्य प्रागसिद्धेः। सिद्धौ तदज्ञानस्यापि प्रागेव निवृत्तेः। अनिवृत्तावपि परोक्ष इव भेदव्यवहारप्रसङ्गः। इष्टापत्तौ शास्त्रविचारवैयर्थ्यम्। किञ्च शक्तितात्पर्यावधारणस्य चाक्षुषज्ञाने व्यभिचारात् न अविद्यानिवर्तनशक्तिमात्रे कारणता। किन्तु अन्वयव्यतिरेकाभ्यां तात्पर्यभ्रमनिवृत्तौ। तच्च त्वयाप्यङ्गीकृतमेव। तथा च तावन्मात्रेण पर्याप्तौ न विशेषकार्यकारणभावो युक्तः।

न च श्रुतिबलात् वेदान्तश्रवणमोक्षजननशक्त्योः विशेषतः साध्यसाधनभावसिद्धेः नान्यथासिद्धिरिति वाच्यम्। तथा सति गुरूपसदनस्य विज्ञानार्थत्वेन विधानात् विशेषतः कार्यकारणभावावबोधनात् श्रवणद्वारकत्वे अन्यथासिध्युपन्यासानुपपत्तेः। अपूर्वविधित्वप्रसङ्गश्च, नियमादृष्टोपयोगोऽपि दुर्वचः, श्रवणात् प्राचीनज्ञानस्य परोक्षावधारणात्मकत्वे तत एवाविद्यानिवृत्तेः

न च कल्मषनिवृत्तिरपि तादृशज्ञानेऽपेक्षितेति वाच्यम्। मनननिदिध्यासनाभ्याम्

असम्भावनाविपरीतभावनानिरासे सति तादृशज्ञानोत्पत्तेरवर्जनीयत्वात्। न चासम्भावनाविपरीत-भावनानिरास एव कल्मषनिवृत्तेरुपयोगः। तथा सति नियमादृष्टमुखेन व्रीहिसाध्योपयोगिनोऽवहननस्य व्रीहिष्विव नियमादृष्टमुखेन मननादिसाध्यासम्भावनाविपरीतभावनानिरासोपयोगिनो मननादावङ्गत्वप्रसङ्गात्। शब्दस्य ज्ञानकरणत्वेऽपि श्रवणस्य तदसिध्या तेनाङ्गित्वसाधनासम्भवात्। शक्तितात्पर्यविशिष्टशब्दज्ञानस्य श्रवणत्वविवक्षायां श्रवणस्य प्रमाणान्तरत्वापादनमसङ्गतम्।

किञ्च विषयफलस्यैव नियमादृष्टफलत्वोक्तावपूर्वविधित्वमनिवार्यम्, लोकसिद्धत्वात्। तदनुपपत्तौ विधिरेव न स्यादिति न नियमविधेरप्युपपत्तिः। नियमादृष्टस्य विषयसाध्यफलोपयोगे हि नियमविध्युपपत्तिः। अवहननसाध्यनियमादृष्टेनहि परम्परया व्रीहिसाध्यं परमापूर्वमेव साध्यते। न चात्र तत्सम्भवः। विषयफलदर्शनसाध्यमोक्षस्य कर्मसाध्यतया अनित्यत्वस्य अदृष्टनिवर्त्यतया[1] प्रपञ्चसत्यत्वस्य च प्रसङ्गात्। कल्मषनिवृत्तेः साध्यतायामप्यपूर्वविधिता दुर्वारा, अप्राप्तत्वात्। -निर्विचिकित्सपरोक्षनिर्णयः फलमिति [2]अनुपपन्नम्। **'द्रष्टव्य'** इत्यपरोक्षस्यैव श्रवणात्। न च तत्र परोक्षनिर्णयो विवक्षित इति वाच्यम्। तत्र निदिध्यासनस्यानपेक्षितत्वात्। वक्ष्यते च विपरीतभावनाया अवधारणप्रतिबन्धकत्वाभावः।

किञ्च यथाश्रुति दर्शनोद्देशेनैव विधिसम्भवात् न परोक्षनिर्णयलक्षणा युक्ता। न च शब्दस्यापरोक्षज्ञानजनकत्वानुपपत्तेः सा। शब्दस्य तदनुपपत्तावपि विधीयमानश्रवणस्यादृष्टद्वारा [3]अपरोक्षज्ञानजनकत्वसम्भवात्। न च दर्शनं चाक्षुषज्ञानम्, तद्ब्रह्मणि नेति लक्षणावश्यकीति वाच्यम्। तथापि [4]**'तस्मिन् दृष्टे परावर'** इत्यादिषु बहुशस्तत्र दृष्टप्रयोगत्वात्। अन्तरङ्गलक्षणया चापरोक्षस्यैव लक्ष्यत्वात्, अन्तरङ्गलक्षणानुरोधादेव **'प्रोद्गातृणां चमसभक्ष'** इत्यत्र न[5] ऋत्विङ्मात्रलक्षणा अपितु प्रवचनविशेषलक्षणा।

पुरुषापराधरूपतात्पर्यभ्रमसंशयनिवृत्तिः फलमिति पक्षोऽप्यनुपपन्नः। उपबृंहणस्वतन्त्र-विचारादिना भ्रमनिवृत्तौ निवृत्तस्य[6] पुनर्निवृत्त्ययोगेन पश्चात्कृतश्रवणस्यापि मोक्षाभावप्रसङ्गात्। किञ्चाकारणस्यापि परम्परया प्रयोजकस्य तथा प्राप्तसाधनान्तरपक्षपरिपूरणफलको नियमविधिः युज्यते, यथा अर्थज्ञानपक्षेऽध्ययननियमः, यथा च [7]होमक्रियासु मन्त्रनियमः।तदिहापि

---

1. निवृत्तितया; निवर्त्यतया; निवर्त्ततया - पाठभेदः
2. अनुपपन्नम्; अप्यनुपपन्नम् - पाठभेदः
3. अपरोक्ष - पाठभेदः
4. मुण्डक – 2.2.9
5. अपि तु - पाठभेदः
6. निवृत्त्यस्य; निवृत्तस्य - पाठभेदः
7. होमादि; होम - पाठभेदः

[1]‘**द्रष्टव्य**’ इति श्रुतोद्देशेन श्रवणविधिसम्भवेऽर्थलभ्यपुरुषापराधनिवृत्त्यर्थं नियमविधित्वम्, [2]‘**द्रष्टव्य**’ इत्यस्य स्तुतिमात्रत्वञ्च न कल्पयितुं युक्तम्। अर्थलभ्यफलार्थतया[3] विधानेऽप्यन्तरङ्गत्वात् तात्पर्यनिर्णयार्थतयैव नियमविधिः स्यात्।

किञ्च ‘**द्रष्टव्य**’ इति श्रुतं परित्यज्यार्थलभ्योद्देशेन विधानेऽवघातादिवच्छ्रवणस्य कर्मनिष्ठत्वाद्वेदान्तानां कर्मत्वात् संस्कारकर्मता स्यात्। निदिध्यासनस्य च दर्शनोद्देशेन विधेयतया तदीयसाधनवेदान्तशेषतया निदिध्यासनशेषतापत्तेः। प्राप्तावप्याद्ये पक्षे किमपरोक्षवस्तुविषय-प्रमाणत्वावच्छिन्नस्य साक्षात्कारत्वावच्छिन्नं प्रति हेतुत्वेन प्राप्तिरुत तद्विशेषावच्छिन्नं प्रति। आद्येऽप्यर्थगतमेवापरोक्ष्यं तद्विषयत्वं ज्ञाने आपरोक्ष्यमिति [4]अभ्युपगमे अपरोक्षवस्तुविषय-कज्ञानजनकत्वावच्छेदेनापरोक्षवस्तुविषयकज्ञानजनकत्वमिति स्यात्। तत्र चात्माश्रयः। ज्ञानगतमापरोक्ष्यम्, तद्विषयत्वमर्थे आपरोक्ष्यमित्यभ्युपगमे आद्यघटसाक्षात्कारो न स्यात्। तदा तस्यापरोक्षविषयत्वाभावात्। अव्यवहितापरोक्षज्ञानविषयीभविष्यद्वस्तुविषयकत्वविवक्षाया-मद्वैतवाक्ये कारणतावच्छेदकानिर्धारणात् न प्राप्तिसम्भवः।

अस्तु तर्हि द्वितीयः - ‘दशमस्त्वमसि’ इति वाक्ये चक्षुषा गृह्यमाणविषये ‘अयं घट’ इति वाक्ये चेन्द्रियाजन्यसाक्षात्कारत्वावच्छेदेनेन्द्रियान्यापरोक्षज्ञानविषयीभवद्गोचरप्रमाणत्वावच्छिन्नस्य हेतुत्वावधारणादिति चेन्न। शबरसंवर्धितराजकुमारस्य ‘दशमो राजकुमार’ इति वाक्यजन्यज्ञाने [5]साक्षात्कारत्वाभावेन तत्र व्यभिचारेणानवच्छेदकत्वात्। तथा च जपासन्निधानात् स्फटिकलौहित्यवदपरोक्षज्ञानसन्निधानात् ‘दशमस्त्वमसी’त्यादौ [6]तत्र भेदाग्रहनिमित्तभ्रममात्रम्। अन्यथा चाक्षुषघटगोचरवाक्येन[7] जनिते ज्ञाने चाक्षुषत्वानुभवात् तदपि स्यात्।

यच्चेदमुच्यते - श्रावणेषु षड्जादिषु समारोपितपरस्पराविवेकनिवृत्त्यर्थगान्धर्वशास्त्रश्रवण-सहकृतश्रोत्रेण परस्परासङ्कीर्णतद्याथात्म्यापरोक्ष्यदर्शनेन प्रकाशमाने वस्तुनि आरोपिता-विवेकनिवृत्त्यर्थशास्त्रसद्भावे तच्छ्रवणं तत्साक्षात्कारजनकेन्द्रियसहकारिभावेनैवोपयुज्यत इत्यस्य क्लृप्तत्वादिति,

तन्न। गान्धर्वशास्त्रस्य षड्जादिपदसङ्केतग्रहार्थत्वात् भेदग्रहार्थत्वाभावात्। अत एव

---

1. द्रष्टव्य - पाठभेदः
2. द्रष्टव्यम् - पाठभेदः
3. पदार्थतया; फलार्थतया - पाठभेदः
4. अभ्युपगतमेव - पाठभेदः
5. साक्षिभावेन; साक्षात्वाभावेन; साक्षात्कारत्वाभावेन - पाठभेदः
6. तद्भेदाग्रह - पाठभेदः
7. वाक्येन - पाठभेदः

भूयः श्रुतरागस्य 'रागभेदं तु जानामि, संज्ञाभेदं तु न जानामी'ति 'पूर्वरागादयं रागोऽन्य' इत्यादिव्यवहारः, तच्छास्त्रापरिचये उपदेशात् सङ्केताग्रहे च।

किञ्च यदि पूर्वं भेदग्रहो न स्यात् तदा षड्जादिपदशक्तिरूपसम्बन्धार्थकस्य गन्धर्वशास्त्रस्य[1] अयमितिवैलक्षण्यानुवादेन षड्ज इति पदसम्बन्धं बोधयतः कथ'मयं षड्ज' इति श्रौत्रज्ञानजनकत्वम्। वैलक्षण्यविशिष्टोद्देशेन पदसम्बन्धविधानाद्वाक्येन प्राक्परोक्षज्ञाने जनिते पश्चात् तादृशवैलक्षण्यं श्रोत्रेण पश्यतः[2] सङ्केतवाक्यार्थस्मरणात् श्रोत्रेणैव शब्दविधिषु प्रत्यक्षाङ्गीकारे व्यवधानान्न शब्दस्य हेतुता। भावनाप्रचयसहकृतज्ञानकरणत्वावच्छेदेनापरोक्षज्ञान-जनकत्वं प्राप्तमिति तु प्रागेव निरस्तम्।

यत्तु केनचिदुक्तम् - [3]**'श्रोतव्य'** इति [4]विचारविध्यभावे [5]**'तरति शोकमात्मवित्'** इत्यादेः विषनिर्हरणादिमन्त्रवदर्थपरत्वाभावाज्ज्ञानस्य मोक्षसाधनत्वासिद्धेः तदर्थं विचाराक्षेपो न स्यात्। अध्ययनविधेरप्यक्षरग्रहणमात्रपर्यवसायित्वात्। न च कर्मकाण्डेऽप्येवं प्रसङ्गः। तत्र शब्दसामर्थ्यप्रतीतार्थपरत्वे बाधकाभावात्, **'तरति शोकम्'** इत्यादिश्रुतीनाञ्च प्रत्यक्षविरुद्धार्थत्वेन स्वतःप्रतीतार्थपरत्वायोगात् विचारासिद्धेः **'श्रोतव्य'** इति विधिरावश्यक इति।

तदयुक्तम् - तथा सति **'श्रोतव्य'**[6] इत्यस्याप्यद्वैतपरत्वे प्रत्यक्षविरुद्धार्थपरत्वेन[7] अविवक्षितार्थत्वस्य वा सद्वितीयत्वश्रवणपरत्वस्य वा प्रसङ्गात्।।

ननु **'तरति शोकमात्मवित्'** इत्यात्मज्ञानमात्रस्य मोक्षसाधनत्वं प्रतीयते। अध्ययनमात्रवतः आत्मज्ञानेऽपि [8]प्रयोजनादर्शनात् इदमविवक्षितार्थमिति शङ्का स्यात्। श्रवणादिविधौ तु श्रवणादिद्वारोत्पन्नदर्शनस्य विवक्षितत्वान्न प्रत्यक्षविरोधशङ्कावकाश इति चेन्न, निदिध्यासनविधिमात्रेणापि तादृशशङ्कानुदयाच्छ्रवणादेरनुवादत्वोपपत्तेः।

यच्च भामत्युक्तं काण्डद्वयविचारोऽप्यर्थावबोधपर्यन्ताध्ययनविध्याक्षिप्त इति, तदप्यनुपपन्नम्। [9]अर्थावबोधार्थत्वस्य वाक्यादप्रतीतेः, स्वाध्यायार्थताया एवाध्ययनस्य तव्यप्रत्ययेन स्वरसतः

---

1. शास्त्र; शास्त्रस्य - पाठभेदः
2. श्रोत्रेणापश्यत; श्रोत्रेणापश्यतः - पाठभेदः
3. शब्दविशिष्टप्रत्यत्त्वाङ्गीकारे; शब्दविधिषु प्रत्यक्षाङ्गीकारे - पाठभेदः
4. विचारविध्यभावे; विचारसिद्ध्यभावे - पाठभेदः
5. छा.उ – 7.1.3
6. प्रत्यक्षविरुद्धार्थत्वेन - पाठभेदः
7. सद्वितीय
8. प्रयोजनाभावादिदर्शनात्; प्रयोजनादर्शनात्; प्रयोजनादिदर्शनात् - पाठभेदः
9. अर्थावबोधार्थत्वस्य - पाठभेदः

प्रतीतेः। सम्भवति च प्राप्तेस्साक्षादध्ययनफलत्वेन स्वाध्यायस्य प्राप्यतया साध्यता। न च तत्प्राप्तेरपुरुषार्थत्वादर्थज्ञानार्थता। अर्थज्ञानस्यापि तादृशत्वात्। प्रणाड्य प्रयोजनपर्यवसानमुभयत्र तुल्यम्। न चाध्ययनविधेरर्थज्ञानपर्यन्तत्वाभावे वेदस्यार्थबोधकत्वे मानाभावः। इन्द्रियाद्यध्ययन-विधायकमानस्यैवात्रापि मानत्वात्। नहि तत्र किञ्चिद्वाक्यान्तरमपेक्ष्यते। तथा सत्यनवस्थाप्रसङ्गात्। किन्त्वन्वयव्यतिरेकदर्शनमेव तत्र मानम्। तदेवेहापि।

एतेन बोधकत्वेऽपि तात्पर्ये मानाभाव इति शङ्कापि निरस्ता। स्वतःप्राप्तार्थपरत्वस्याध्य-यनविधिवदेवोपपत्तेः।

किञ्च अध्ययनस्य स्वर्गार्थतया विधानेनार्थकर्मत्वे प्रयोजनान्तरस्य लब्धत्वात् अर्थपरत्वाभावशङ्का स्यादपि। इह तु तव्यप्रत्ययेन गुणकर्मत्वात् प्रयोजनपर्यवसानार्थमध्य-यनगृहीतस्वाध्यायेनैव स्वाध्यायकार्यं जपक्रत्वानुष्ठानादिकं[1] कुर्यादित्यर्थपर्यवसानान्ना-विवक्षितार्थताप्रसङ्गः[2]।

ननु वाक्यस्य विवक्षया [3]ह्यर्थपरत्वम्। अत एव करणापाटवजन्यविवक्षितान्यानुपूर्वीक[4] दैववशसम्पन्नवाक्यस्यार्थपरत्वाभावः। 'श्वेतो धावती'त्यश्वविषयवाक्यस्य श्वगोचरत्वाभावश्च। अतो विवक्षास्थानीयं वेदे किञ्चिदर्थपरत्वप्रयोजकं वाच्यम्। तादृशस्यान्यस्यालाभादर्थ-ज्ञानोद्देशेनाध्ययनविधिरेव वाच्य इति चेन्न; उक्तोत्तरत्वादध्ययनविधिवदेवोपपत्तेरिति। तस्माद्वाक्यस्यार्थपरत्वं स्वाभाविकम्। तद्विशेषपरत्वं लोके विवक्षया। वेदे तु न्यायेन। कथं च वेदान्तिनोऽस्मान् प्रति विवक्षाभाव उद्भाव्यते। ईश्वरविवक्षायाः सत्त्वात्। अत एव '**श्रुतिस्मृती ममैवाज्ञा**' इत्युक्तम्।

किञ्च प्रमाणानुसारी हि प्रयोजनाङ्गीकारः, न तु विपरीतम्[5]। तदनुसारि प्रयोजनं च परम्परया पुरुषार्थपर्यवसायिन्याप्तिरेवेति।

अथ स्यात् - वाक्यस्यैकमेव प्रयोजनमुत्सर्गः। क्वचिच्छ्लेषादौ विवक्षावशादनेकार्थपरत्वम्। अतो जपविनियोजकवाक्येन तत्र विनियुक्तस्य स्वाध्यायस्य तेनैव प्रयोजननेनावर्जनीयेन चरितार्थस्य विधिं विना नार्थपरत्वसम्भवः। जपविनियोजकवाक्यस्य तु स्वप्रवृत्तेः प्राक् स्वस्य विनियोगाभावेन नार्थपरत्वक्षतिः। अनन्तरमपि न स्वात्मन एव अर्थपरत्वं हन्तीति चेन्न; दत्तोत्तरत्वादेव अध्ययनविधिवदेवोपपत्तेरिति। तस्माद्वाक्यस्यैकार्थपरत्वमेवौत्सर्गिकं न त्वेकप्रयोजनकत्वम्।

---

1. कार्यं जपं कृत्वानुष्ठानादिकम्; कार्यजपक्रत्वनुष्ठानादिकम् - पाठभेदः
2. अविवक्षितार्थताप्रसङ्गः - पाठभेदः
3. विवक्षया; विवक्षाया - पाठभेदः
4. विवक्षितान्यानुपूर्विक - पाठभेदः
5. विपरीतम्; विहितम् - पाठभेदः

किञ्च [1]जपविधावेव **'यं यं क्रतुमधीते तेन तेनास्येष्टं भवती'**त्यर्थवादे तत्तत्क्रतुफलं [2]तत्तत्प्रतिपादकभागाध्ययनेन सिध्यतीति प्रतीतेः विवक्षितार्थत्वं वेदस्यावगम्यते। व्याकरणादीनां वेदाङ्गानां दृष्टार्थत्वानुरोधाच्च वेदस्यार्थपरत्वमवर्जनीयम्। तस्मान्न्यायावगम्यार्थविशेषपरत्वं परमेश्वरविवक्षावतः स्वाध्यायेन साधयितुं योग्यार्थावबोधजपद्वारा पुरुषार्थपर्यवसाय्यध्ययनविषयस्य स्वाध्यायस्य व्याकरणाद्यङ्गकस्य न कथञ्चिदप्यर्थपरत्वाभावशङ्कावकाशः।

किञ्च अर्थज्ञानकामनाधिकारत्वे अन्योन्याश्रयः। यागादेः स्वर्गसाधनत्वे सिद्धे हि तदुपयोग्यर्थज्ञानकामानुवादेनाध्ययनविधिः। तत्सिद्धौ च यागादेः स्वर्गसाधानत्वसिद्धिः।

किञ्च अर्थज्ञानकामनाधिकारकत्वे बालस्य हितैषिभिरनुष्ठापितमध्ययनं तस्यार्थज्ञानकामनाविरहादनधिकारिणा कृतत्वात्फलार्थं न स्यात्। तथाच नियमादृष्टासिद्धिः। नित्यनैमित्तिकेषु हितैषिवचनात् प्रवृत्तौ फलं सम्भवत्येवाधिकारसत्त्वात्।

ननु नियमविधिः हि अयमध्ययनविधिः। स च प्राप्तावेव। प्राप्तिश्चार्थज्ञानकामनया [3]अध्ययने अन्यत्र च प्रवृत्तावेव। अतोऽर्थज्ञानकामं प्रत्येवाध्ययनविधिप्रवृत्तेरर्थज्ञानकामाधिकारकत्वमवर्जनीयम्। अतो हितैषिवचनात् प्रवर्तमानो नाध्ययनविध्यधिकारीति चेन्न; अध्ययननियमविधेः प्राप्त्यर्थमर्थज्ञानोपजीवनेऽपि अधिकारार्थं तदुपजीवनाभावात् क्वचिदधिकारिणि प्राप्तिमात्रादेव सर्वाधिकारिषु नियमविधिप्रवृत्तेः[4] हितैषिवचनात्प्रवर्तमानमध्ययनविधिरधिकरोत्येव। अत एव नखादेर्वैतुष्यसाधनताज्ञानविधुरम् अवहन्तिविधिरधिकरोति।

कस्तर्ह्यध्ययनविधेरधिकारः यो हितैषिवचनात्प्रवर्तमानेऽपि स्यात्। जीवनमेवेति ब्रूमः। तल्लाभश्च [5]नित्यविधीनां जीवनाधिकारकत्वात्। तदनुष्ठानस्याध्ययनाधीनार्थज्ञानसाध्यत्वाच्च।न च जीवनाधिकारत्वे सर्वदानुष्ठानप्रसङ्गः। संस्कारकर्मत्वात् तत्सिध्या तन्निवृत्तेः, आधानवत्।

अपिच अध्ययनजन्यार्थज्ञानमूलानुष्ठानस्यैव सप्रयोजनत्वस्य नियमविधिसिद्धत्वादध्ययनस्याधीताध्ययनविधिमूलत्वाभावेनाध्ययनमात्रमनर्थकमेव स्यात्। न च सिद्धान्तेऽपि साम्यं शङ्क्यम्। स्वाध्यायस्याध्ययनविधिनाध्ययनसंस्कार्यत्वे स्वरसतोऽवगते[6] संस्कृतस्य तस्योत्तरत्रोपयोगाकाङ्क्षायां यत्रार्थज्ञानमुखेनोपयोगः सम्भवति तत्र तथोपयोगे यत्र जपोपयोगः

1. जपविधावेव; जपविधौ - पाठभेदः
2. तत्तत्प्रतिपादक; ततस्तुतिवादक - पाठभेदः
3. अध्ययनेऽन्यत्र; अध्ययनेऽप्यत्र - पाठभेदः
4. प्रवृत्तेः; प्रवृत्ते - पाठभेदः
5. नित्यविधीनाम्; नित्यविधिना - पाठभेदः
6. स्वरसतोऽवगते; स्वरसतोऽवगतेः - पाठभेदः

सम्भवति तत्र जपोपयोगे चाङ्गीकार्ये होमादेरध्ययनविधेश्च संस्कृतस्य स्वाध्यायस्य जप एवोपयोगसम्भवात् अर्थज्ञानमुखेनानुष्ठेये असम्भवात्।

न च पूर्वपक्षेऽपि साम्यं शङ्क्यम्। तत्र हि येन यत्साधयितुं शक्यते जपोऽर्थावबोधो वा तत्कामस्तदधीयीतेत्यर्थः। ततश्चाध्ययनविधिनार्थावबोधः साधयितुं शक्यत एवेति। तत्कामस्यैव तदध्ययनाधिकारितया नियमाधीनः पूर्वोक्तदोषो दुर्वारः।

अथ विध्यन्तरोपयोगि यदनेन कर्तुं शक्यं न तेन कुर्यादित्यर्थः। अध्ययनविधिवाक्याध्ययनेनापि जपविध्युपयोग्यक्षरग्रहणं कर्तुं शक्यमेवेति चेत्तत्र [1]किं तद्वाक्यापेक्षया भिन्नविधित्वं विवक्षितम्; उत स्वाध्यायविध्यपेक्षया। नाद्यः, क्रतुविध्यर्थज्ञानस्य तदपेक्षया विध्यन्तरोपयोगित्वाभावात्। द्वितीये स्वाध्यायविध्यपेक्षया भिन्ननिषेधविध्यर्थनिवृत्त्यनुष्ठानोपयोग्यर्थज्ञानस्य निषेधवाक्याध्ययन-शक्यतया तदर्थज्ञानं तद्वाक्याध्ययनेन कुर्यादिति पर्यवसानादनधीततद्वाक्यस्य निषिद्धनिवृत्त्या प्रत्यवायपरिहारो न स्यात्। न चेष्टापत्तिः। निषेधवाक्य एवार्थादपगोरणाद्यर्थानुष्ठानस्य प्रत्यवायसाधनतावगमात्। तदभावे प्रत्यवायासम्भवात्।

ननु सिद्धान्तेऽपि दूषणं समानमेव, अधीतेन निषेधविधिनार्थज्ञानस्य साधयितुं शक्यत्वादिति चेन्न; यत्र नियमः सम्भवति तत्रैव विधिप्रवृत्त्यङ्गीकारात्। न च तथा त्वया वक्तुं शक्यम्। त्वन्मते नियमविधेरसम्भवात्। अर्थज्ञानोद्देशेन विधेः प्राग्विवक्षितार्थत्वज्ञानाभावाद्विधेः प्राक्प्रवृत्तेरेवासिध्या नियमविध्यसम्भवात्।

ननु चैतद्वाक्यं विनापि कस्यचिद्धेत्वन्तरेण विवक्षितार्थताज्ञाने सति तादृशं पुरुषमादाय विधिसम्भवात् न [2]नियमविध्यसम्भव इति चेत्, तर्ह्यन्यतः सिद्धविवक्षितार्थत्वस्य एतद्विधिनोपजीवने एतद्विधिबलादेव विवक्षितार्थतेत्यनुपपन्नम्। तद्वदेव पुरुषान्तरस्यापि तज्ज्ञानसम्भवात् न तदर्थो विधिः।

ननु पुरुषविशेषं प्रति विवक्षितार्थत्वज्ञानार्थं विधिरिति न [3]ब्रूमः। किं तर्हि, विवक्षितार्थत्वस्य प्रामाणिकत्वसिद्धये इति चेन्मैवम्। नहि प्रामाणिकत्वसिद्धये प्रमाणकल्पनमस्ति। किन्तु प्रमाणानुसारात् प्रमेयाङ्गीकारः।

ननु न वयमर्थसिद्धये प्रमाणं कल्पयामः। किन्तु अध्ययनविधेः प्रयोजनाकाङ्क्षायां दृष्टलोभेनार्थज्ञानकामाधिकारकत्व एव विधेस्तात्पर्येण प्रमाणसत्त्वात् विवक्षास्तीति, त्वन्मते त्वेतदनङ्गीकारान्न विवक्षायां प्रमाणमस्तीति चेन्न। आप्तेरेव फलत्वादित्युक्तत्वात्।

---

1. चेत्तत्र किम् - पाठभेदः
2. नियमविध्यसम्भवः; नियमविधिसम्भवः - पाठभेदः
3. ब्रूमः; न ब्रूमः - पाठभेदः

प्रयोजनसन्निकर्षादर्थज्ञानस्य फलत्वे व्यापित्वात् सन्निकर्षाच्च जपादिरूपोच्चारणस्यैव फलत्वप्रसङ्गात्। तस्मादध्ययनविधिवाक्यमयोग्यार्थमेव स्यात्।

यद्वा स्तोभादिव्यापकत्वात् जपादिरूपोच्चारणमेव स्वाध्यायसिद्धेः(विधेः ?) फलम्, नार्थज्ञानम्। एवं चास्मिन् पक्षे अधीतो मन्त्रः पयोज्यः। क्रतुषु स एव च जप्यः इति सिद्ध्यति। अधीतविधिजन्यार्थज्ञानमेव क्रत्वनुष्ठानोपयोगीति न सिद्ध्यति।

यच्च दृष्टत्वादर्थज्ञानं फलमिति तन्न। व्यापकेन विधानात् आवश्यकेन जपादिरूपोच्चारणेनैव चारितार्थ्येनार्थज्ञानफलत्वाकल्पनात्।

ननु स्वाध्यायस्योद्देश्यत्वे स्वत्वविशेषणमविवक्षितं स्यात्। ततश्च कृत्स्नशाखाध्ययनविधिः प्रसज्यत इति चेन्न; तत एव स्वत्वविशेषणविवक्षालाभात्।

ननु उपयोक्ष्यमाणाध्यायस्यैव संस्कारविधानान्न सर्वशाखाध्ययनप्रसङ्गः। इत्यशक्यविधानाभावात् न विशेषणविवक्षेति चेन्न; सर्वासामपि स्वशाखानामुपयोगयोग्यत्वात्। वेदपारायणस्याभ्युदयहेतुत्वात्।

नन्वध्ययनानन्तर[1] **'मधीत्य स्नायादि'ति** स्नानविधानात् तत्काले मीमांसाया नावकाशः। क्रमबाधप्रसङ्गात्। नापि स्नानानन्तरम्, [2]दारग्रहणस्य एवं[3] कर्तव्यत्वात्। नापि तदनन्तरम्, अग्निहोत्राद्युपरोधप्रसङ्गात्। अतोऽर्थज्ञानोद्देशेन विधिः स्वीकार्य इति चेन्न; यदि सर्वदा नावकाशस्तदा क्रतुविधिप्रसादलभ्योऽवकाशः। स चानियतः सामग्र्यैव नियाम्यः। क्रमस्य पदार्थधर्मत्वात् तावन्मात्रबोधेन स्नानात्प्रागेवावकाशः।

वस्तुतस्तु न तस्यापि बाधः कल्प्यः तस्यैवासिद्धेः। क्रमो ह्येकप्रयोगान्तर्गतपदार्थधर्मोऽङ्गम्। एकप्रयोगश्चैकप्रयोजनवशीकारात्। सोऽप्यङ्गाङ्गिभावापन्नानाम् एकानुबन्धान्तर्गतानां च। अध्ययनस्नानयो[4] रेतदभावात् न क्रमसम्भवः। अतः क्रमस्याविवक्षितत्वात् न तद्रूपाङ्गबाधः, आनन्तर्यमात्रस्य विवक्षितत्वात्। न चाव्यवहितानन्तर्यमर्थः, पूर्वकालत्वमात्रे विधानात् गार्हस्थ्येऽपि नावकाशाभावः, प्रवक्तुरवकाशस्यैव श्रोतुरवकाशत्वात्। अन्यथा अर्थज्ञानोद्देशेन विधावपि कथं क्रमाविरोधः[5]। न ह्यर्थज्ञानमाप्तिकर्मव्यवहितं कर्मसमवेतमेकफलावच्छिन्नानेकक्रियाक्षणनिचय-रूपधात्वर्थावच्छेदकं फलमिति वक्तुं शक्यम्, येन तत्सिद्धावेवाध्ययननिर्वृत्तिः स्यात्। किन्तु स्वर्गादिवत् साङ्गप्रधानानुष्ठानफलम्।

---

1. आप.गृ.सू- 5.12.1; बो.गृ.सू – 2.3.1
2. दार; वार – पाठभेदः
3. एव - पाठभेदः
4. एतदभावात्; एतद्भावात् - पाठभेदः
5. क्रमविरोधः; क्रमाविरोधः - पाठभेदः

ननु फलार्थत्वाद्विचारस्य स्वफलसिद्धये विधिरेव विचारप्रयुक्त इति चेन्न; न ह्यत्रानुष्ठापकत्वं करौ प्रगृह्य कारयितृत्वम्। किन्तु चिकीर्षाप्रयोजकेच्छाविषयत्वम्। तच्च[1] वाक्यस्यैव साधनं प्रति स्यात्। आरादुपकारकस्यापि परमापूर्वमेव तत्साध्यत्वादनुष्ठापकम्। अतोऽर्थज्ञानस्यैव विचारप्रयोजकत्वम्, न त्वध्ययनस्य तद्विधेर्वा।

ननु गुणकर्मणोर्यत्फलं तदसिद्धौ न तद्विध्यर्थनिर्वृत्तिः। अतः तत्फलनिर्वर्तकेऽपि तद्विधेस्तात्पर्यमस्त्येव। अत एवावहननविधेः फलीभूतवैतुष्यनिर्वर्तकावहननावृत्त्यनुष्ठापकत्वमिष्यते। एवं चाध्ययनविधेः स्वारसिकगुणकर्मत्वानुसारेणै'वार्थज्ञानकामोऽध्ययनेनैव स्वाध्यायं प्राप्नुयादि'त्यर्थाङ्गीकारात् गुणकर्माध्ययनफलभूतार्थज्ञाननिर्वर्तकविचारानुष्ठापकत्वं युज्यत एवेति चेन्न; कर्मणां व्रीहीणां साध्यतोपयोगिवैतुष्यनिर्वर्तकावृत्तितात्पर्यकत्वं[2] व्रीहिविधेर्युज्यत एव। अर्थज्ञानं तु न कर्मसाध्यतोपयोगि। साक्षात्स्वाध्यायसम्बन्धिप्राप्त्यैव हि तत्सिद्धिः। अपिच अयं प्राप्तगोचरः नियमविधित्वात्। अतो न प्रयोजकः। अप्राप्तांशपरिपूरणफलत्वेऽपि क्वचिदेव प्रयोजकता स्यात्। निष्कर्षे तदपि न स्यात्। अप्राप्तांशपरिपूरणेन क्रत्वाद्यर्थमपक्षितार्थज्ञानमात्रे अध्ययनस्य साधनत्वावगमात् नियमादृष्टस्याध्ययनसाध्यत्वावगमाच्च। अन्यत्र क्रत्वाद्यपेक्षितार्थज्ञानसाधनताबुद्धिनिवृत्तेरध्ययनस्य लोकसिद्धसाधनताग्रहादेव प्रवृत्तेर्नाध्ययनस्याप्य-ध्ययनविधिरनुष्ठापकः। विचारानुष्ठापकत्वं तु दूरे। एवं च नियमविध्यधीनव्याप्तिबुध्यैवेतरेषां साधनत्वबुद्धिनिवृत्त्या लोकतः साधनताग्रहस्य[3] सर्वत्र प्रवर्तकत्वमितीमामेव कथञ्चित्प्रयोजकतामध्यापनविधिव्यावृत्तामभिप्रेत्याध्ययनस्य स्वविधिप्रयुक्तत्वानुग्रहो भगवतः, लिङ्गादपि श्रुतेः शीघ्रतया तत एव तात्पर्यावगमात् लिङ्गमनुवाद इत्यभिप्रायेण वा। अस्मिन् पक्षे अध्ययनविध्यभावप्रयुक्तमननुष्ठानमध्ययनेऽपि नास्ति। कुतो विचारे। स्वव्यतिरेकप्रयोज्य-व्यतिरेकप्रतियोगिविचारानुष्ठापकत्वं तु रागस्यैवेति बोध्यम्।

एतेनार्थकर्मत्वेऽपि [4]प्रयोजनाभावात् तव्यप्रत्ययस्वारस्यभङ्गेनार्थकर्मत्वाङ्गीकारोऽपि निरस्तः। नहि सक्तुवत् विनियोगाभावो वा तुलाभारादिहिरण्यानां भरणवदशक्तिर्वा अस्ति, येन '**सक्तून् जुहोति**', '**हिरण्यं भार्यमि**'तिवत् स्वारस्यभङ्गेनार्थकर्मता स्यात्। अस्ति हि स्वाध्यायस्य जपार्थज्ञानयोरुपयोगः। शक्यं च स्वाध्यायाध्ययनम्।

एवं '**श्रोतव्य**' इति न विधिः। विचारप्रवृत्तिश्च रागादेवेति स्थितम्। एवं श्रोतव्यपदस्य

1. साध्यस्यैव; वाक्यस्यैव - पाठभेदः
2. तात्पर्यकत्वम्; तात्पर्यकत्वात् - पाठभेदः
3. साधनताग्रहस्य; साधनताग्राह्यस्य - पाठभेदः
4. प्रयोजनाभावात्; प्रयोजनाभावः - पाठभेदः

श्रवणशब्दसमानार्थतां मन्वानाः श्रोतव्यशब्दार्थेऽपि विवदन्ते। अयमस्य वाक्यस्यार्थ इति प्रतिवाक्यं गुरुमुखाद्वाक्यार्थावधारणमर्थ इति **केचित्।**

**अन्ये तु शक्तितात्पर्यावधारणमिति।**

**अपरे तु गुरुमुखानधीनमेतदेवाहुः।**

**परे तु तदनुकूलचेतोवृत्तिरिति।**

तत्त्वविदस्तु[1] – 'अयमर्थः श्रुत' इत्यादिप्रयोगात् शाब्दज्ञानमेव श्रोतव्यशब्दार्थः आपातप्रतीतः[2]। विधेयनिदिध्यासनं प्रत्यन्तरङ्गत्वात् [3]विचार्यनिर्धार्यत्वरूपगुणमुखेन स्तुत्युपपत्तेश्च श्रोतव्य इति शाब्दनिर्धारणमनूद्यते। निर्धारणस्य विचाराधीनत्वात्। आर्थिको विचारलाभः। तस्माच्छाब्दज्ञानमात्रं श्रोतव्यशब्दार्थः। गुरुमुखश्रुतिशक्तितात्पर्यतन्निर्धारणानुकूलमनो-व्यापाराणामशब्दार्थत्वात्। गुरुमुखात् न्याययुक्तवेदार्थावधारणं लक्षणया श्रवणशब्दार्थः। अनुवादे यथाप्राप्त्यनुवाद इति विधिरागाधीनस्य गुरुमुखान्न्याययुक्तवाक्यार्थनिर्धारणस्यानुवादेऽपि न कोऽपि दोष इत्यप्यनुगृह्णन्ति।

'मन्तव्य' इति च ज्ञानमात्रवाचित्वेन विशेषणवाचित्वाभावात् श्रवणप्रतिष्ठार्थं श्रवणदशाभाविगुरुमुखाधीनविचारैः स्वमनीषासिद्धतर्कसहितैस्तैर्वा पुनः पुनश्चिन्तनेन स्वयमेव 'एवमेव युक्तमि'ति यन्निर्धारणं प्राप्तं तदनूद्यते। अनुवादस्य च प्रयोजनं विषयमुखेन विधेयनिदिध्यासनस्तुतिः।

शक्तितात्पर्यावधारणाधीनो वाक्यादर्थनिर्णयः श्रवणम्, अर्थानुपपत्तिपरिहारेण श्रुतार्थप्रतिष्ठापनं द्वितीयाध्याये क्रियमाणं मननमित्यपि विभजन्ते।

**॥ इति श्रवणस्य नियमविधिभङ्गः॥**

## 4. साधनचतुष्टयपूर्ववृत्तत्वभङ्गः

[4]**'परीक्ष्ये'**त्युक्त्या **'तद्विज्ञानार्थमि'**त्युक्त्या च कर्मनिर्धारणस्य ब्रह्मनिर्धारणस्य च प्रतीतेः **'नास्त्यकृतः कृतेन'** इति **'निर्वेदमायात्' 'तद्विज्ञानार्थम्'** इत्युक्त्या ब्रह्मज्ञाने अनन्तस्थिरफलरूब्रह्मप्राप्तिसाधनतावगमप्रतीतेश्च कर्मणामल्पास्थिरफलत्वनिर्णय-सहितब्रह्मज्ञानानन्तस्थिरफल-त्वापातप्रतीतिः ब्रह्मविचारपूर्ववृत्तेत्यवगमात् साधनचतुष्टयपूर्ववृत्तत्वं

1. तत्वविदस्तु; तत्वभेदस्तु - पाठभेदः
2. आपातप्रतीतोऽपि - पाठभेदः
3. विचार्य; विध्यर्थ - पाठभेदः
4. मुण्डक – 1.2.12

निरस्तम्। '**ब्राह्मणः परीक्ष्य निर्वेदमायात्तद्विज्ञानार्थमि**'ति स्वाध्यायाध्ययनस्य कृत्स्नमीमांसां प्रति पूर्ववृत्तत्वं कर्ममीमांसायाः ब्रह्ममीमांसां प्रति पूर्ववृत्तत्वम् तस्यास्तां प्रति हेतुभावे द्वारम् इति हि स्वरसतोऽवगम्यते। अत्र मुमुक्षा अधिकारिविशेषणम्। तत्र हेतुः शमदमादिः। तत्र इहामुत्रार्थफलभोगविरागः। तत्र नित्यानित्यवस्तुविवेक इति। तत्र वेदान्तार्थस्य विचारात्प्रागनिर्णयान्न मुमुक्षा समीचीना सम्भवति। किन्तु यदि ब्रह्मज्ञानादनन्तस्थिरफलं लभ्येत तदा मया तेन तत्साधनीयमिति बुद्धिः परमपुरुषार्थनिर्णयात् एव। न शमादिः इहामुत्रार्थविरागो वा सम्भवति।

यदत्राह नवीनः - न तावन्नित्यानित्यवस्तुविवेकासम्भवः। आमनुष्यादाब्रह्मलोकं कर्म कार्यं च सर्वमनित्यम्, घटादिवत्, [1]'**तद्यथेह कर्मचितो लोकः क्षीयत**' इति श्रुतेश्चेति न्यायानुगृहीतस्पष्टश्रुत्यैव विचारात्प्रागेव कर्मफलस्यानित्यत्वावधारणसम्भवात्। आत्मा च नित्य इत्यवगम्यते। अन्यथा कस्यापि मते मोक्षाय प्रवृत्त्यसम्भवात्। तस्यानन्दरूपत्वमपि परमप्रेमास्पदत्वात्। [2]'**आनन्दाद्ध्येव खल्विमानि**', [3]'**एषोऽस्य परमानन्द**' इत्यादिवाक्याच्च निश्चीयते। एष परमात्मा अस्य जीवस्यानन्द इत्यर्थः।

न च एवं विचारानारम्भप्रसङ्गः, अन्यस्याप्येवं निश्चेतुं शक्यत्वादिति वाच्यम्। यत्र हि मानान्तरविरोधो वर्तते तद्धि शब्दश्रवणमात्रान्न निश्चेतुं शक्यम्। अद्वैतसमन्वयश्च[4] तत्तत्पूर्वपक्षन्यायमानान्तरादिना प्रथमं विरुद्धतया प्रतीयत इति न वाक्यमात्रान्निश्चेतुं शक्यते। ब्रह्मणो नित्यानन्दरूपत्वं तु न मानान्तरेण विरुद्धतया प्रतिसन्धीयत इति तच्छब्दादेव निश्चेतुं शक्यते। न हि परमात्मनः सुखाभेदे प्रत्यक्षविरोधोऽस्ति। न चानित्यसुखस्य नित्यार्थाभेदविरोधः। अनुकूलतर्काभावेन सुखमात्रे अनित्यत्वाधारणायोगात्। सौषुप्तिकसुखावमर्शदर्शनेन जीवसुखस्यापि नित्यतया तद्विनाशबुद्धेरन्यविषयत्वावधारणसम्भवात्।

किञ्च येन यदेकं न्यायेन निश्चितं तेन इतरदपि न्यायेन निश्चेतव्यमिति न नियमः। पुरुषाणां च विचित्रबुद्धितया न्यायानां चालौकिकविषयतयातिसूक्ष्मत्वात् तन्नियमानुपपत्तेः। अन्यथा धूमाग्न्योर्व्याप्तिः सर्वैरेव गृहीतेति सर्वापि व्याप्तिरेवं ग्राह्येति[5] वैशेषिकादिग्रन्थान्तरसंरम्भो व्यर्थ एव स्यात्। एतादृश एव पुरुषोऽस्मिन् शास्त्रेऽधिकारी। तदुक्तम् - '**नात्यन्तमज्ञो नोतज्ञः सोऽस्मिन् शास्त्रेऽधिकारवान्**' इति। एवञ्च ब्रह्मसुखस्य जीवसुखस्य च नित्यतत्वं

---

1. छा.उ – 8.1.6
2. तै.उ – 3.6
3. बृ.उ – 6.3.32
4. समन्वयश्च; समानधिश्च - पाठभेदः
5. गृह्येति - पाठभेदः

तदितरभोगानां चानित्यत्वं सुनिरूपणम्। ततो वैराग्यम्। ततः शरीरेन्द्रियचेष्टाया मनोवृत्तेश्च निमित्ताभावात् चित्तेन्द्रिययोर्व्यापारोपरमरूपौ शमदमौ भवतः। ताभ्यां च तितिक्षादिः। ततश्चाविक्षिप्तचित्तो निरस्तानर्थप्रतानानतिशयानन्दगलिताखिलभेदमात्मानं वेदान्तवाक्येभ्योऽधिगम्य मुमुक्षुर्भवति। ततः [1]'**ब्रह्मविदाप्नोति परम्**', [2]'**तरति शोकमि**'त्यादिश्रुतितो ज्ञानस्य मोक्षहेतुतां निश्चित्य जिज्ञासत इति।

अत्रोच्यते - यदि न्यायोपबृंहितवाक्येन नित्यानित्यवस्तुविवेकः तदा ज्ञातव्यान्तरपरिशेषाभावप्रसङ्गात् विचारविधेरेवोच्छेदः। तथाहि मुमुक्षासिद्धये हि नित्यानित्यवस्तुविवेकादेः पूर्ववृत्तत्वमिष्यते। तत्र यद्यद्वैतनिश्चयाभावेऽपि मुमुक्षा जायेत तर्ह्यानन्दत्वनित्यत्वयोर्निर्धारणं किमर्थमपेक्ष्यते। नित्यपुरुषार्थनिर्धारणाभावे अनित्यसुखवैराग्याभावेन कथं मुमुक्षेत्यादि। तदा प्राप्तियोग्यताज्ञानाभावेन कथं सा, कथञ्चाद्वितीयत्वज्ञानं विना भेदलक्षणप्राप्तियोग्यताज्ञानमित्यपि पश्य।

किञ्च यद्यद्वैतनिश्चयः विचारात्प्राङ्नास्तीत्यभिमतं तदा परमप्रेमास्पदत्वेन आनन्दरूपताज्ञानं ब्रह्मणि कथमुपपाद्यते।

ननु जीवे एव तदुपपाद्यत इति चेत्, किं तस्य प्रयोजनम्। तत्स्वरूपस्य पुरुषार्थताबुद्धिरिति चेत्, तर्हि तत्स्वरूपस्य सिद्धताज्ञानादेव न साध्यताबुद्धिरिति न तादर्थ्येन विचारप्रवृत्तिसम्भवः।

किञ्च स्वयमेव [3]'**ब्रह्मविदाप्नोति परमि**'ति ज्ञानस्य मोक्षसाधनताज्ञानम् आनन्दरूपताज्ञानं च उपपादयता परब्रह्मण एव प्राप्यताबुद्ध्युपपादनात् ब्रह्मणा सह स्वस्याभेदज्ञानाभावे स्वस्वरूपस्यानन्दरूपताबुद्धेः उपयोगः।

किञ्च अभेदबुद्ध्यभावे कार्यानित्यताज्ञानवतो नित्यपुरुषार्थज्ञानमसम्भवि। यच्च सूक्ष्मत्वादनिर्धारणमुक्तम्; तदनुपपन्नम्। सुखी स्यामित्येवं सुखे प्रेमदर्शनेन प्रेमास्पदतामात्रस्य सुखरूपतासाधकत्वं कस्यापि बुद्धिमनुपारूढं कार्यं सर्वमनित्यमेवेति बुद्धौ विद्यमानायामपि अभेदमबुध्वापि नित्यसुखस्य साध्यतां सुखविनाशप्रत्यक्षस्य अन्यविषयतां कृत्स्नसुखस्याप्येकतां जगत्कारणे प्रकृतिपुरुषसन्देहे विद्यमान एवानन्दरूपतां च परमसूक्ष्मैरतिदुर्गैरपन्न्यायैः पश्यतो दुर्मेधसः कुबुद्ध्यगोचरं किमपि सौक्ष्म्यं [4]'जलचन्द्र' [5]'घटाकाशादि'न्यायेषु अभेदसाधकतयाभिमतेषु लेशतोऽपि (न?) पश्यामः। मानान्तरविरोधः सुखनित्यत्वेऽपि तुल्यः। तस्माद्यदनिर्धारितमित्युक्तं तन्निर्धारणमवर्जनीयमेव। यन्निर्धारितमित्युच्यते तदेव तु सन्दिग्धम्।

---

1. तै.उ – 2.1
2. छा.उ – 7.1.3
3. तै.उ – 2.1
4. मी.कोशः - 5
5. याज्ञ.स्मृ – 3.144; श्री.भा -3.2.18; वि.कोशः -4

तथाहि - आनन्दत्वं तावत् जगत्कारणे सन्दिग्धम्। कारणत्वस्य प्रधानचेतनगतत्वसन्देहे नानन्दपदस्यापि मुख्यगौणार्थत्वसन्देहात्। [1]'**अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशत**' इति मोक्षदशायामानन्दाभावप्रतीतेः मुक्तिकाले प्राप्यतया विद्यमानस्य तस्यानन्दस्वरूपत्वात् सम्भावनया [2]'**आनन्दाद्ध्येवे**'ति वाक्यार्थनिर्णयाभावात्। परमप्रेमास्पदत्वेन नानन्दरूपतानिर्धारणसम्भवोऽपि। अहन्त्वस्यैवाहमर्थप्रेम्णि प्रयोजकत्वात्। सुखत्वस्य प्रेमप्रयोजकत्वं स्वसमवायान्तर्भावेनैव, अहं सुखी स्यामित्येवेच्छादर्शनात् परसमवेततया ज्ञाते निरुपाधिकेच्छाया अदर्शनात् शत्रुगततया ज्ञाते द्वेषदर्शनात् कुत्राप्यसमवेतो निरतिशयानन्दः कश्चिदस्तीति केनचिदुक्ते सिद्धताज्ञानविरहदशायामपि इच्छाया अदर्शनाच्च। तस्मादहन्त्वमपि प्रेमप्रयोजकमेव। अथवा अहं सुखी स्यामिति प्रेम्णो दर्शनात्सुखविशिष्टात्मन्येव प्रेम। न स्वात्ममात्रे। नापि सुखमात्रे। अहं स्यामिति तु प्रेम चन्दनादाविव सुखसाधनताप्रयुक्तम्।

तथा नित्यत्वमपि सन्दिग्धमेव। '**नात्माश्रुतेरि**'त्यादिना तस्यापि विचारात्, [3]'**विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यती**'[4]**त्यादिना** विनाशप्रतीतेस्तस्य विचार्यत्वाच्च।

न च कर्मविचारदशायामेव शरीरवियोगानन्तरमपि स्थायित्वनिश्चयात् नित्यत्वं निश्चितमेवेति वाच्यम्। सर्वभूतामोक्षानन्तरस्थायित्वस्यानिश्चयादेतच्छरीरानन्तरं शरीरान्तरसम्बन्धस्यैव ग्रहात्।

यदुक्तम्- आत्मा च नित्य इत्यवगम्यते। अन्यथा कस्यापि मते मोक्षाय प्रवृत्तिर्न स्यादिति। तत्र किं नित्यत्वं स्वप्रकाशमित्यभिमतम् उत शास्त्रेण ज्ञातमिति। आद्यमुपहास्यम्। द्वितीये तत्तच्छास्त्रेण तत्त्वहितपुरुषार्थान्निश्चित्य स्वहिते प्रवर्तत इति तत्तच्छास्त्रश्रवणात् प्रागात्मनित्यत्वज्ञानाभावे तवेव न कस्यापि मते दोषः।

यच्च नित्यत्वप्रतीत्युपपादनम्, तद्यदि जीवानन्दविषये (तर्हि?) ब्रह्मानन्दस्य कुतो नित्यतावगमोपपादनम्। आत्मत्वहेतुना तत्रापि नित्यत्वावगमविवक्षायामीक्षत्याद्यधिकरणजातं दत्तजलाञ्जलि स्यात्।

किञ्च एवं नित्यानन्दनिर्धारणाभावात्तन्मूलवैराग्यमसम्भवि। तन्निश्चयेऽपि न वैराग्यसम्भवः। त्वयैव प्रतिरुद्धत्वात्। सौषुप्तिकपरामर्शानुसारात् जीवसुखस्यापि नित्यत्वं ह्यवोचः। विनाशबुद्धेरन्यविषयत्वोपपादनेन सर्वं सुखं नित्येमेवेत्यवगमेन कथमितरभोगेष्वनित्यताबुद्ध्या

1. छा.उ – 8.12.1
2. तै.उ – 2.6
3. बृ.उ – 4.4.12
4. नोदेऽतुम्; भेदे तु - पाठभेदः

तत्र वैराग्यम्। अवच्छेदकानित्यताज्ञानं (न?) वैराग्यप्रयोजकम्। तथा सति ग्रामे स्थिरतया ज्ञाते गृहारामक्षेत्रावच्छेदानामनित्यताज्ञानात् ग्रामे वैराग्यापत्तेः।

न चावच्छेदकवैराग्यमेवेह विवक्षितमिति वाच्यम्। तत्र भोग्यताबुद्धिविरहे नित्यसिद्धवैराग्यस्यानित्यताज्ञानं न, नैरपेक्ष्यात् भोग्यताबुद्धौ चानित्यताज्ञानादपि न वैराग्यम्। सार्वभौमस्य सहस्रसंवत्सरान् राजसुखमनुभवतोऽपि क्षणमात्रं कन्दुकक्रीडादर्शनात्। यदि तस्य नित्यसुखविरोधिता ज्ञायेत तदा परं ततो वैराग्यं स्यात्। तज्ज्ञानं च त्वयैवापह?तम् अच्छेदकताबुद्ध्युपपादनेन समानकालीनत्वबुद्ध्युपपादनात्।

किञ्च स्वरूपानन्दापेक्षया वैषयिकसुखानामल्पाल्पानामपि उत्कर्षस्य नित्यानन्दाविरोधस्य च ज्ञानमानत्वात् न वैराग्यसम्भवः। इदानीमानन्दस्वरूपमावृतं विषयसम्बन्धाधीनवृत्तितारतम्येन आवरणवृत्तितारतम्यात् प्रकाशतारतम्यं मोक्षे अत्यन्तावरणनिवृत्तौ चानवच्छिन्नानन्दप्रकाश इति बुद्धिः सम्भवतीति चेन्न; स्वरूपस्यैव प्रकाशरूपतया तत्र तरतमभावनिश्चयासम्भवात्। न ह्यावरणतरतमभावः सम्भवति स्वरूप एव तरतमभावसम्पादनक्षमः।

किञ्च आवरणनिवृत्तितारतम्यस्य प्रकाशतारतम्यप्रयोजकत्वे सुखवृत्त्यभावदशायां स्वरूपसुखप्रकाशो न स्यात्। ततश्च परमप्रेमास्पदत्वं न स्यात्। निरवयवे निर्धर्मके स्वरूपे ईषदनावृतमिति शङ्का नोत्थानमर्हति। आवरणनिवृत्तितारतम्यमप्यनुपपन्नम्। तदपि ह्यबाध्यस्य सावयवत्वे सधर्मकत्वे वा भूयोऽवयवावच्छिन्नाल्पावयवावच्छिन्ननिवृत्तौ वा किञ्चिद्धर्मावच्छिन्नभूयोधर्मावच्छिन्ननिवृत्तौ वा स्यात्। न चैतत्सम्भवः।

किञ्च 'नास्ति', 'न प्रकाशत' इति व्यवहारयोग्यता आवरणमित्युच्यते। को नाम तन्निवृत्तौ तरतमभावः। उत्कृष्टसुखगोचरं नास्तीति व्यवहारयोग्यताप्रतियोगित्वं निवृत्तेरुत्कर्ष इति शङ्का नोदेतुं समर्था। सुखतदावरणनिवृत्त्युत्कर्षयोः परस्परनिरूप्यतया अन्योन्याश्रयात्। आवरणनिवृत्तितारतम्यस्यैव सुखतारतम्यरूपतया आत्माश्रयाद्वा।

किञ्च शमादेः कथं मुमुक्षाहेतुता। न च अविक्षिप्तचित्ततया वेदान्तादात्मावगमे मुमुक्षेति वाच्यम्। मुमुक्षायाः प्रागेव तादृशात्मावगमे ततः श्रवणेऽप्यवृत्त्यनुपपत्तेः। यद्यापातप्रतीतिरेव मुमुक्षाहेतुः सा तर्हि नित्यानित्यविवेकदशायामेव सिद्धेति न तस्याः शमदमाद्यपेक्षा। निरीश्वरद्वारबहिर्वितर्दिकादुरासिकाविक्षिप्तचिन्तानिरनन्तररसिकविलासिनीचर्वितसारं गद्गदकण्ठा अपि ह्यद्वैतं निर्धार्य तत्रैव प्रगल्भवाचः त्रिचतुरान्धवराटिकालिप्सया चातुर्वर्ण्यबहिष्कृतपञ्चषपल्लीपालकदुरीश्वरनामाङ्कितग्रन्थानपि रचयन्तः परश्शता मिथ्यावादिनः उपलभ्यन्ते। तस्मादद्वैतस्य निर्धारणेऽपि न शमाद्यपेक्षा। किं पुनरापातप्रतीतौ।

श्रुतिस्तु [1]**'शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदि'**ति शमादेरुपासनार्थतामाह। न च [2]**'प्रशान्तचित्ताये'**ति वाक्यमन्यार्थानुवादरूपमङ्गत्वबोधन-समर्थनरूपम्। ग्रहणोपयोगिचित्तावधानं पूर्वकाण्डादिसाधारणं लोकसिद्धमेव हितत्रानूद्यते। नहि शमदमाद्युपेतः स्यादिति ब्रह्मविचारान्ते निरूपयिष्यमाणं शमादि ब्रह्मविचाराधिकारिविशेषणं भवितुमर्हम्। विपर्यस्तश्चैषां साध्यसाधनभावः। तथाहि - वैषयिकसुखविरागो नानित्यताज्ञानमात्रात्, तज्ज्ञाने सत्यपि प्रेम्णोऽदर्शनात्। किन्तु मोक्षोपायं कामयमानस्य शमादेस्तदङ्गताज्ञानादेव। मुमुक्षयैव च मोक्षोपायकामनेति मुमुक्षयैव शमादिः साध्यते। मुमुक्षापि न सम्भवति। ब्रह्मस्वरूपानन्दस्य नित्यमनुभूयमानत्वात्।

न च भेदज्ञानदशायां दुःखसम्भिन्नतया स्वरूपानन्दस्यासत्कल्पतया मुमुक्षासम्भव इति वाच्यम्। असत्कल्पता किं द्युमणिसन्निधौ खद्योतादेरिवाप्रकाशः, किं वा प्रबलव्यसनाभिभूत-सुहृद्दर्शनादेरिव यथापूर्वं सुखानुत्पादकत्वम्, किं वा प्रबलानर्थसंवलितविषयसम्पृक्तमधुभक्षणजन्य-सुखस्येव स्वविषयकामनानुत्पादकत्वम्। नाद्यः, तथा सति प्रेमानुत्पत्तेः। न द्वितीयः, स्वतः पुरुषार्थतया सुखोत्पादकत्वेन पुरुषार्थत्वासिद्धेः। न तृतीयः, सर्वदा प्रेमदर्शनात्। त्वया तदभ्युपगमाच्च।

अथ स्यात् - ब्रह्मानन्दो हि परमपुरुषार्थः स्वस्वभाविकाभेदात् यद्यपि प्राप्त एव, तथाप्यौपाधिकभेदेनाप्राप्तत्वभ्रमात् कामना सम्भवत्येव [3]कण्ठचामीकरन्यायादिति।

उच्यते। स्वाभाविकाभेदो यद्यगृहीतस्तदा प्राप्तियोग्यताभावात् न काम्यता। नहि भिन्नस्याभेदः कालान्तरे सम्भवति। यदि ज्ञातः कुतो प्राप्तताभ्रमः। कुतो मुमुक्षा। कुतो जिज्ञासा। कण्ठचामीकरन्यायश्च विषमः, तद्धि न प्राप्तत्वबुद्ध्यनन्तरं काम्यते, किन्तु प्रागेवेति।

किञ्च यद्यपरोक्षज्ञानं मोक्षसाधनत्वेन निर्णीतं स्यात् तदा मुमुक्षा ज्ञानकामनाद्वारा अधिकारः स्यात्। तच्च विचारारम्भात् प्राक्सन्दिग्धमेव, प्रपञ्चमिथ्यात्वज्ञानं विना ज्ञाननिवर्त्यत्वग्रहणासम्भवात्। यदि कश्चित् स्वाधीनन्यायावधारितसमस्तवेदान्तार्थस्य साधनचतुष्टयसम्पन्नस्याधिकारिणः श्रवणविधिबलात् श्रवणे प्रवृत्तिं कल्पयेत्, सोऽपि [4]**'सोऽहं मन्त्रविदेवास्मि नात्मवदि'**ति श्रवणाधिकारिणः आत्मज्ञानभावोक्त्याप्यात्मानं प्रतिवक्तव्यः। न च मोक्षसाधनज्ञानाभाव एव तत्रोच्यत इति वाच्यम्। 'मन्त्रविदेवास्मी'त्युक्त्या ज्ञानस्वरूपस्यैव निषेधावगमात्।

---

1. बृ.उ - पाठभेदः
2. मुण्डक – 1.2.13
3. मी.कोश
4. छा.उ – 7.1.3

वस्तुतस्तु पूर्वकाण्डे विचार इवात्रापि जिज्ञासुरेवाधिकारी। न च तदर्थमेव साधनचतुष्टयापेक्षा। प्रकारान्तरेण जिज्ञासोत्पत्तेः प्रागभिधानात्।

**॥ इति साधनचतुष्टयपूर्ववृत्तत्वभङ्गः॥**

## 5. शास्त्रभेदभङ्गः

[1]'**कर्मचितान्**', '**तद्विज्ञानार्थमि**'ति विचारयोः प्रयोजनवदर्थपरत्वेनैकत्वस्य, '**परीक्ष्य विज्ञानार्थमि**'ति पौर्वापर्यस्य, '**नास्त्यकृतः कृतेन तद्विज्ञानार्थमि**'ति सङ्गतेः '**ब्राह्मणः परीक्ष्य तद्विज्ञानार्थमि**'ति पूर्वोत्तरभागात्मकैकग्रन्थविचाररूपतायाश्च प्रतीयमानत्वात् भागद्वयात्मकमीमांसाग्रन्थस्यैकत्वसम्भवोऽवगम्यते।

अत्रास्मदाचार्याः -

[2]**जिज्ञासावृत्तियुक्तीनामैक्यमक्षरलक्ष्मणोः।**
**साम्यात्तज्ज्ञोपदेशाच्च तदुक्ताद्यविरोधतः॥**इत्यनुगृह्णन्ति।

जिज्ञासा तावदविशिष्टा। अधीतसाङ्गसशिरस्कस्वाध्यायप्रतिपन्नानन्तस्थिरफलकर्मब्रह्मावबोधः पुरुषः परिनिष्पन्नज्ञानस्यापातरूपत्वात् संशयानः कृत्स्नमेव वेदार्थंजिज्ञासते तदनुजिघृक्षतया प्रवर्त्यमानो ग्रन्थः क्रमसङ्गत्या एकव्याख्यानरूपत्वे सत्स्वपि कथं भिद्येत। कर्तृभेदात् परं शङ्कातङ्कावकाशः।

तमपि विचारयामः - किं जैमिनेः ब्रह्ममीमांसाग्रन्थाकरणं तदर्थापरिज्ञानात् उतानुग्रहविरहात्। नाद्यः। भगवद्बादरायणशिष्यस्य तदयोगात्। तस्य ब्रह्मविदग्रेसरत्वस्य भगवतैव [3]'**परं जैमिनिर्मुख्यत्वादि**'त्यादिभिः प्रतिपाद्यमानत्वाच्च। नापि द्वितीयः। पूर्वमीमांसाग्रन्थस्याप्यकरण-प्रसङ्गात्। परमपुरुषार्थिजनेष्वनुजिघृक्षाविरहस्तु ब्रह्मप्राप्तेः अपुरुषार्थत्वात् पुरुषार्थत्वेऽपि तदज्ञानाद्वा स्यात्। न चोभयं शङ्कामपि लभते।

एवमाचार्यबादरायणस्यापि ब्रह्मज्ञानाङ्गभूतस्यापि कर्मणः अनिरूपणं न तदज्ञानात्। तस्मादाचार्यान्तेवासिनोर्जगदनुग्रहप्रवणयोरन्यतरभागाकरणमन्योन्य[4] समवेतैकैकभाग-करणादित्यनाग्रहचित्तैरवगन्तव्यम्। प्रमेयगौरवानुसारात् आचार्यान्तेवासिनोर्भागद्वयव्यवस्था।

---

1. मुण्डक – 1.2.12
2. पा.वि.- पृ.सं - 111
3. ब्र.सू – 4.3.11
4. समयेनैकैक; समवेतैकैक - पाठभेदः

अत एव '**ह्याचार्यस्तु ते गतिं वक्ते**'त्युक्तमग्निभिः। आचार्यस्य जैमिनिमुखेन पूर्वभागकरणं शिष्यस्यानुग्रहशीलताप्रदर्शनार्थं[1] स्वस्य[2] शिष्येषु स्निग्धतातिशयप्रदर्शनार्थं च। वृत्तं च मानम्। [3]'**अथातो धर्मजिज्ञासा**' इत्यत्राथशब्दोक्तवेदाध्ययनलक्षणपूर्ववृत्तसाक्षाद्युक्तिश्च समाना। अध्ययनविधेरक्षरग्रहणपर्यन्तत्वेऽर्थज्ञानपर्यन्तत्वाभावेन स्वाध्यायस्य विवक्षितार्थत्वे मानाभावात् मीमांसानारम्भणीयेति पूर्वपक्षयुक्तेः, अर्थपरत्वस्य स्वतः प्राप्तस्याध्ययनविधाविव बाधकाभावेन स्वाध्यायस्य विवक्षितार्थत्वात् मीमांसारम्भणीयेति राद्धान्तयुक्तेः, अध्ययनस्य स्वर्गार्थतया विधेः स्वाध्यायस्याविवक्षितार्थत्वमिति पराभिमतपूर्वपक्षयुक्तेः '**अध्येतव्य**' इत्यक्षरग्रहणपरंपरया जायमानवाक्यार्थज्ञानार्थं नियमविधेः विवक्षितार्थत्वमिति सिद्धान्तयुक्तेश्च समानत्वात्। अक्षराणि च समानानि। '**धर्मजिज्ञासा**' इत्यत्र धर्मपदस्योपासनेऽपि वृत्तेः। यदि साक्षात्फलसाधनमपूर्वधर्मः तदेहाप्युपासन-साध्यभूतमपूर्वधर्मः। यद्युत्तरविचारोऽपि धर्मविचारस्तर्हि तत्रापि ब्रह्मणः प्राधान्यं भज्येतेति चेन्न; तत्प्रसादस्य तद्धेतुव्यापारस्य वा धर्मशब्दार्थत्वेन भृत्योपचारेण राज्ञ इव द्रव्यस्तुतौ कर्मण इव च प्राधान्याविरोधात्, प्रत्युत तत्रैव प्राधान्येऽप्यतिशय एव स्यात्।

किञ्च प्राप्यत्वमेव हि ब्रह्मणः प्राधान्यं फलप्रदत्वञ्च। इदञ्च कुतो हीयेत। [4]'**नास्त्यकृतः कृतेन**' इत्यनेन विचारं प्रति प्राप्यतया प्राधान्यमेव ह्युच्यते।

यदिह शङ्क्यते - एकशास्त्रे सामान्यप्रतिज्ञया भवितव्यम्। धर्मजिज्ञासासूत्रस्यैव सामान्यप्रतिज्ञारूपत्वे ब्रह्मविचारोऽपि जैमिनिना क्रियेत सङ्कर्षवदिति।

तत्र न ह्ययमथशब्दः '**अथ शब्दानुशासनमि**'[5]त्यादिष्विवारम्भार्थस्सन् स्वकर्तव्यतापरः येनैवमाशङ्क्येत, किन्त्वध्ययनानन्तर्यपरः। स धर्मविचारकर्तव्यताप्रसाधनपरः। यद्यपि कर्तव्यताप्रसाधनस्य स्वकृतिवैयर्थ्यपरिहारार्थत्वात् साधितकर्तव्यभावस्य विचारस्य स्वकर्तव्यत्वमात्रं सिद्ध्यति, तथापि कृत्स्नस्य स्वकर्तव्यतानियमः। एवञ्चोभाभ्यां सम्भूय चिकीर्षितस्य ग्रन्थस्यादौ कृत्स्नस्य शास्त्रस्य कर्तव्यता प्रसाधितेति मन्तव्यम्।

एवं परस्परसंविदाकरणादेव कर्मदेवताकाण्डयोराद्यन्तसूत्राणि वेदाचार्येणैव प्रणीतानि।मध्यमसूत्राणि तन्नियमनेन तच्छिष्येणेत्यपि वदन्ति। लक्षणञ्च समानम्। उपासनस्यापि

---

1. प्रदर्शनार्थम्; प्रदर्शनन्तु - पाठभेदः
2. स्वस्य; अस्य - पाठभेदः
3. मी.सू – 1.1.1
4. मुण्डक – 1.2.12
5. पा.सू – 1.1.2

चोदनालक्षणत्वात्। उपासनस्य धर्मत्वाभावे लक्षणमतिव्यापकं स्यात्। अत इदं लक्षणमेव कृत्स्नस्यापि कर्तव्यताबुद्धिं प्रतिज्ञासूत्रविषयतां च साधयति। तज्ज्ञोपदेशश्च भवति।

आह हि भगवान् बोधायनः – [1]**'संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिः'** इति। संहितमिति सङ्गत्यभिधानादेकग्रन्थत्वसिद्धिः। एकस्य व्याख्येयस्य खण्डशः अनेकैरपि व्याख्यानं सम्भवति, एकेनापि। तथैकेनाप्येकग्रन्थस्य करणं सम्भवति। अनेकैरप्यैकग्रन्थस्य करणं समस्यापूरणादिवत्। ऐक्यन्त्र (ऐक्यञ्च?) कर्तृसङ्कल्पनिबन्धनम्। तथा च ऋत्विक्सहितेन यजमानेन याग इव सशिष्येण बादरायणेन**' अयमेको वेदमीमांसाख्यो ग्रन्थो निर्वर्त्यते'**इति तदभिज्ञस्य भगवतो बोधायनस्य महर्षेर्वचनादवगच्छामः।

यद्येवं प्रतिज्ञालक्षणविषयत्वं ब्रह्ममीमांसायास्तदा 'अथात उपासनजिज्ञासा' इति भवितव्यम्, न तु ब्रह्मजिज्ञासेति। तस्यैव सामान्यप्रतिज्ञाविषयत्वादिति चेन्न। उपासनविषयतया तत्फलतया तत्प्रदातृतया चापेक्षितस्य ब्रह्मणश्शास्त्रभेदशेषत्वादेरिव निरूपणसम्भवात्। तर्हि ब्रह्मणि जिज्ञासाप्रतिज्ञा ब्रह्मस्वरूपनिरूपणमात्रविषया स्यादिति चेन्न। तत्सम्बन्धिनिरूपणस्यापि तत्रविवक्षितत्वात्।।

ननु तर्हि सिद्धे व्युत्पत्त्यभावेनारम्भाक्षेपरूपपूर्वपक्षोऽनुपपन्नः वेदान्तभागस्याप्युपासनपरतया कार्यपरत्वादिति चेन्न। सद्विद्यादावुपासनविधानाभावेन तत्र केवलब्रह्मस्वरूपपरत्वस्य वाच्यतया कार्यपरत्वस्य तत्रासम्भवेनाध्ययनविधेस्तदंश विषनिर्हरणमन्त्रादेरिव जपमात्रविनियोगतात्पर्ये निश्चिते तत्प्राप्तिफलकोपासनविधेरपि प्रमाणलक्षणे गुरुमते एकदेशमुखेन सर्वाक्षेपन्यायेनाविवक्षितार्थत्वशङ्कया कृत्स्नब्रह्मविचाराक्षेपरूपपूर्वपक्षसम्भवात्।

अथवा धर्मशब्दो वेदार्थमात्रपरः। 'सिद्धसाध्यपरावरकृत्स्नधृतिहेतुसङ्ग्रहो वा धारणाद्धर्म इत्याहुः' इति भारतोक्तेः। लक्षणं पूर्वकाण्डार्थस्यैवास्तु।

अथवा [2]**'अथातो ब्रह्मजिज्ञासा'**इत्येव प्रतिज्ञा। कोऽर्थः, धर्मशब्दो ब्रह्मपर इत्यर्थः। समाराधनविशिष्टं ब्रह्म कृत्स्नवेदार्थः, तस्यैवालौकिकश्रेयस्साधनत्वात् तेन रूपेण तदभिधानात्। [3]**'सर्वे वेदा यत्पदमामनन्ति'**, [4]**'वेदैश्च सर्वेरहमेव वेद्य'**इति कृत्स्नस्यापि वेदस्य ब्रह्मपरत्वावगमात् ब्रह्मैव कृत्स्नवेदार्थः। लक्षणमपि तस्यैव युज्यते। शाब्दत्वं हि नापूर्वस्यापि। इष्टसाधनत्वान्यथानुपपत्तिगम्यत्वमिहापि। प्रीतः परमपुरुष एव हि फलप्रदाता। तत्र पूवभागे प्रीतिकारणं कर्म चिन्त्यते। पुरुषाणां त्रिवर्गे प्रथमप्रावण्यात् पाठक्रमानुरोधाच्च। कर्मसाध्यभगवत्प्रसादस्यैव वा प्रतिज्ञालक्षणे स्ताम्।

---

1. श्रीभाष्ये – 1.1.1; पृ - 4
2. ब्र.सू – 1.1.1
3. क्ठ.उ – 2.15
4. महा.भीष्म – 39.15; भ.गी – 15.15

अथवा अत्रालौकिकश्रेयस्साधनपरो धर्मशब्दः। अत एव 'द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते' इत्युक्तम्। अतो ब्रह्मणोऽपि फलप्रदतया श्रेयस्साधनत्वात् तदपि धर्मशब्दार्थः। अत्र कृत्स्नवेदार्थविचार्यत्वप्रतिज्ञायाश्चिकीर्षितत्वेन वेदार्थजिज्ञासेत्येव वक्तव्ये 'श्रेयस्साधनजिज्ञासे'त्युक्ती रागादेव मीमांसायां प्रवृत्तिरिति द्योतनार्था। कृत्स्नवेदार्थविचारप्रतिज्ञा परेषामपि समाना। धर्मस्यैव कृत्स्नवेदार्थत्वमुत्तरभागस्यापि जीवद्वारा कर्मशेषत्वञ्च तैरुच्यत इत्ययमेव विशेषः। तथा च धर्मशब्दतात्पर्यं सर्वैरप्येवमेव वर्णनीयम्।

एवञ्च धर्मशब्देनाध्ययनविधेरक्षरग्रहणमात्रपर्यवसितत्वेनार्थज्ञानपर्यन्तत्वासम्भवात् प्रवर्तकाभावात् 'मीमांसा नारम्भणीया' इति पूर्वपक्षः। 'राग एव प्रवर्तक' इति राद्धान्त इत्यधिकरणशरीरं सूचितं भवति।

एवं धर्मजिज्ञासासूत्रस्य साधारण्ये सति पूर्वकाण्डमात्रासाधारण्येनादौ कर्तव्यत्वासमर्थनम्, उत्तरकाण्ड इवासाधारण्येनाकर्तव्यत्वपूर्वपक्षानुत्थानात्। ब्रह्ममीमांसायां तु पूर्वपक्षहेतुभिरकर्तव्यत्व-शङ्कायां चतुस्सूत्र्या सा निराक्रियते। तदुक्तम् -

**[1]व्युत्पत्त्यभावः प्रतिपत्तिदौस्थ्यमन्येन सिद्धत्वमथाफलत्वम्।**
**एतानि वै सूत्रचतुष्टयेनानारम्भमूलानि निराकृतानि॥**

इति चतुस्सूत्र्या आरम्भार्थत्वं शब्दसामर्थ्यादर्थसामर्थ्याच्चावगम्यते। शब्दसामर्थ्यं तावत् [2]**'अथातो धर्मजिज्ञासा'** इत्यनन्तरं [3]**'चोदनालक्षणोऽर्थो धर्म'** इतिवदिह [4]**'अथातो ब्रह्मजिज्ञासा'** इत्यनन्तरं **'जन्मादिकारणं ब्रह्म'** इति नोक्तम्। अपि तु [5]'जन्माद्यस्य यत' इति। अतः सूत्रद्वयस्यापि भिन्नवाक्यताया अभिमतत्वात् तत्र पुनर्धर्मशब्दः। इह त्वेकवाक्यताया अभिमतत्वात् पूर्वसूत्राध्याहृतकर्तव्यत्वसाध्यान्वयार्थं 'यत' इति निर्दिष्टम्। ततश्च यतोऽस्य जन्मादि तद्ब्रह्मजिज्ञासा कार्येत्यवगम्यते। [6]**'शास्त्रयोनित्वात्'** इत्यपि साध्यानुक्तेः पूर्वसाध्येनैवान्वेति। [7]**'तत्तु समन्वयात्'** इति तृतीयं (तुरीयं?) सूत्रम्। शेषं स्पष्टमेव। तस्मात्समन्वयेन शास्त्रप्रमाणकत्वाज्जन्मादिकारणं ब्रह्म विचारयोग्यमिति शब्दस्वरससिद्धो महावाक्यार्थः। सूत्रभेदो न्यायभेदनिबन्धनः। उक्तं शब्दसामर्थ्यम्। अर्थसामर्थ्यमपि -

---

1. ब्र.सू – 1.1.4
2. मी.सू – 1.1.1
3. मी.सू – 1.1.2
4. ब्र.सू – 1.1.1
5. ब्र.सू – 1.1.2
6. ब्र.सू – 1.1.3
7. ब्र.सू – 1.1.4

चिदचिद्व्यावृत्तलक्षणाभावे ततो भेदासिद्ध्या जीवान्तर्भाविन वेदान्तभागस्याधिकारिप्रशंसार्थतया कर्मशेषत्वे वेदान्तविचारो न कर्तव्यः स्यात्। धर्मलक्षणाभावेऽपि ज्योतिष्टोमादिवाक्यप्रतिपन्नार्थ [1]गोचरविचारस्यानारम्भहेत्वभावान्नैकवाक्यता कृता। तृतीये पूर्वपक्षस्यानारम्भहेतुत्वं स्पष्टमेव। चतुर्थस्य पूर्वशेषत्वान्न पृथग्वाच्यम्।

किञ्च तदुक्तग्रहणञ्च दृश्यते – [2]**'संज्ञातश्चेत्तदुक्तमस्ति तु तदपि', [3]'अक्षरधियां त्ववरोधःसामान्यतद्भावाभ्यामौपसदवत् तदुक्तम्', [4]'प्रदानवदेव तदुक्तम्'** इति सूत्रेषु जैमिनेः ग्रहणमन्तरेणैव पूर्वकाण्डोक्तार्थविवक्षया **'तदुक्तम्'** 'इत्युच्यते। अयञ्च निर्देशोऽस्मिन्नेव ग्रन्थे पूर्वमुक्ततां स्वरसतोऽवगमयति, [5]**'अल्पश्रुतेरिति चेत्तदुक्तम्'**, [6]**'जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम्'**, [7]**'उक्तं समाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात्'** इत्यादिवत्। यदि हि ग्रन्थान्तरं स्यात् कर्तृनिर्देशो वा स्यात् अधिकरणनिर्देशो वा। जैमिनीयसूत्रानन्तर्गतार्थविषये जैमिनिग्रहणमेव क्रियते [8]**'परं जैमिनिर्मुख्यत्वात्'** इति। अतः **तदुक्तम्'** इत्युक्त्याप्यैकग्रन्थ्यं सुस्थम्।

अयमेषां सूत्राणामर्थः - छन्दोगानां वाजिनाञ्च उद्गीथविद्याया ऐक्यं पूर्वपक्षीकृत्य निरस्य संज्ञात ऐक्यमाशङ्क्योक्तम् – [9]**'संज्ञातश्चेत्तदुक्तमस्ति तु तदपि'** इति। संज्ञैक्येऽपि भेद उक्तः। यथा [10]**'प्रकरणान्तरे प्रयोजनान्यत्वम्'** इत्यत्र नैयमिकाग्निहोत्रयोरित्यर्थः।

[11]**'अक्षरधियां त्ववरोध'** इति - [12]**'यत्तदद्रेश्यम्'** इत्याद्युक्तास्थूलत्वादिविषयाणामक्षरधियां सर्वत्रावरोधः। सर्वत्र ब्रह्मण एकत्वात् तैर्विना इतरव्यावृत्तब्रह्मानुसन्धानानुपपत्तेश्च। अतः प्रधानब्रह्मानुसन्धाने तद्गुणानामप्यवरोधः। औपसदवत् – (यथा?) जामदग्न्यचतूरात्रे

---

1. प्रतिपन्नार्थ; प्रतिपत्तौ तदर्थ - पाठभेदः
2. ब्र.सू – 3.3.8
3. ब्र.सू – 3.3.33
4. ब्र.सू – 3.3.42
5. ब्र.सू – 1.3.20
6. ब्र.सू – 1.4.17
7. मी.सू – 1.4.1
8. ब्र.सू – 4.3.11
9. ब्र.सू – 3.3.8
10. मी.सू – 2.3.24
11. ब्र.सू – 3.3.33
12. मुण्डक – 1.1.6

पुरोडाश्युपसद्गुणभूतस्य मन्त्रस्योपसदनुवर्तित्वेन उपांशुगुणकत्वमुक्तं [1]**'गुणमुख्यव्यतिक्रमे तदर्थत्वात् मुख्येन वेदसंयोग'** इत्यत्र इति। प्रदानवदिति - दहरविद्यायामपहतपाप्मत्वादिगु-विशिष्टोपासने तत्तद्गुणविशिष्टस्वरूपभेदात् प्रतिगुणं गुण्यावृत्तिः। यथा [2]**'इन्द्राय राज्ञे'** इत्यादिषु विशिष्टस्वरूपभेदात् प्रदानावृत्तिः। तदुक्तं सङ्कर्षे [3]**'नाना वा देवतापृथक्त्वात्'** इति। [4]**'इन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञे'** इति विहितायां त्रिपरोडाशिन्यामिष्टौ हविर्भेदाद्भेदेनावदानप्राप्तौ [5]**'वचनात् सर्वेषां सहावदीयेरन्'** इति सूत्रेण **'सर्वेषामभिगमयन्नवद्यती'**ति वचनात् सहावदाने स्थापिते ततोऽवदानसाहित्यात प्रदानसाहित्यं [6]**'तेषां सहप्रदानमवदानैकत्वात्'** इति सूत्रेण पूर्वपक्षीकृत्य [7]**'नाना वा देवतापृथक्त्वात्'** इत्यधिराजत्वादिविशिष्टदेवताभेदात् प्रदानं नानैवेत्युक्तमित्यर्थः।

आदिग्रहणञ्च दृश्यते – [8]**'सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्'**, [9]**'श्रुत्यादिबलीयस्त्वाच्च न बाध'** इति। न ह्यत्र व्याकरण इव गणपाठोऽस्ति। न च श्रुतिषु चोदनादीनां पाठोऽस्ति, येन [10]**'एष भूतपतिरेषभूतपाल एष सेतुर्विधरणः'**, [11]**'यस्मिन् द्यौः पृथिवी चान्तरिक्षम्'** इत्यादिषु पठितानां [12]**'पत्यादिशब्देभ्यः'**, [13]**'द्युभ्वाद्यायतनं स्वशब्दात्'** इत्यादिष्विवादिशब्देन ग्रहणं स्यात्। आदिग्रहणादेकग्रन्थत्वेन सन्निहितानां संयोगरूपादीनामेव प्रतीतिर्भविष्यतीत्यभिप्राय इति स्वरसतोऽवगम्यते।

किञ्च [14]**'सर्ववेदान्तप्रत्ययम्'** इत्यत्र साध्यानुपादानमधिकाशङ्कानिराकरणेन सूत्रस्य शाखान्तराधिकरणन्यायातिदेशकतया तदीयमेव साध्यं लप्स्यत इत्यभिप्रायमेव। तदप्यैकग्रन्थ्ये स्वरसम्।

---

1. मी.सू – 3.3.9
2. तै.सं – 2.3.6.2
3. मी.सू.सङ्कर्ष – 2.2.36
4. तै.सं - 2.3.6.2
5. मी.सू.सङ्कर्ष – 2.3.34
6. मी.सू.सङ्कर्ष – 2.3.35
7. मी.सू.सङ्कर्ष - 2.3.36
8. ब्र.सू – 3.3.1
9. ब्र.सू – 3.3.47
10. बृ.उ – 6.4.22
11. मुण्डक – 2.2.5
12. ब्र.सू – 1.3.44
13. ब्र.सू – 1.3.1
14. ब्र.सू – 3.3.1

एवं [1]'**भेदान्नेति चेत्**' इत्यत्र हेत्वनुक्तिरपि द्रष्टव्या। पूर्वकाण्डोक्तहेतूनामन्वयो ह्यभिप्रेतः। आचार्यश्लोके आदिपदेन तन्त्रन्यायादर्थपरेण चरमहेतुद्वयसङ्ग्रहाविरोधश्च। यदि हि मीमांसाग्रन्थभागयोः परस्परविरुद्धता स्यादपि तदा भेदशङ्का। न चास्ति विरोधः। अत एव जैमिनिना – [2]'**आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्**' इति पूर्वपक्षं कृत्वा कृत्स्नस्यापि स्वाध्यायस्य [3]'**विधिना त्वेकवाक्यत्वात्**' इत्यादिना क्रियार्थत्वेनैव प्रामाण्यमुक्तम्। इह तु समन्वयसूत्रे सिद्धपराणामपि प्रामाण्यमुक्तम्।

तथाष्टमे '**विप्रतिपत्तौ हविषा नियम्येत** [4]**कर्मणस्तदुपाख्यत्वात्**' इति सूत्रेण ऐन्द्रपुरोडाशे औषधहविस्सामान्यादाग्नेयविध्यन्तः, न त्विन्द्रदेवतासामान्यात् सान्नाय्यविध्यन्तः, कर्मणो हविस्त्यागरूपस्य तस्मिन् हविष्युपलभ्यमानत्वात्। हविर्हि त्यज्यमानं दृश्यते। देवता त्वप्रत्यक्षैव, परं यागोद्देश्येति प्रतिपाद्य यागस्य देवताराधनरूपत्वाद्देवतैव प्रसन्ना [5]फलदा आत्मप्रधानभूतेति तत्सामान्यं हविस्सामान्याद्बलीय इति शङ्कानिराकरणार्थमिदं सूत्रम् – [6]'**गुणत्वेन देवताश्रुतिः**' इति। अपूर्वद्वारा कर्मण एव फलप्रदत्वात् प्राधान्यम्। देवतायास्तद्गुणत्वेन श्रुतिरिति न प्राधान्यमित्युक्तम्। इह च [7]'**फलमत उपपत्तेः**' इत्यत्र कर्माराधिताया देवतायाः फलप्रदतया प्राधान्यमुक्तम्।

तथा च नवमे [8]'**देवता वा प्रयोजयेदतिथिवद् भोजनस्य तदर्थत्वात्**' इत्यादिसूत्रैर्देवता निराकृता। तत्र हि किमाराधितायाः देवतायाः फलमुत देवतागुणत्वात् कर्मण एवापूर्वद्वारा फलमिति संशय्य कर्मकारकं क्रियेप्सिततत्वात् प्रधानम्। तेनापि व्याप्यमानत्वात् सम्प्रदानं ततोऽपि प्रधानम्। देवता च सम्प्रदानम्। यागश्च देवतापूजा। सा च लोके पूज्यमानातिथिभोजनवत्। सा चाराधिता फलमाराधयित्रे ददातीति युक्तम्। एवञ्च लोकप्रसिद्धपदार्थस्वभावो नातिक्रान्तो भवति। अवश्यं च यागस्यापि फलसाधनत्वं केनचित् द्वारेणाश्रयितव्यम्। तत्र रात्रिसत्रन्यायेन वाक्यशेषमन्त्रवर्णाद्यवगतदेवतातृप्तिरेव द्वारमिति कल्पयितुं युक्तम्। नात्यन्ताप्रतीतमपूर्वं कल्पयितुमिति पूर्वपक्षं कृत्वा राद्धान्तितम्। प्रत्ययाभिहितभावना पुरुषार्थं भाव्यमपेक्षमाणा पदगतमपि

---

1. ब्र.सू – 3.3.1
2. मी.सू – 1.2.1
3. मी.सू – 1.2.7
4. मी.सू – 8.1.32
5. प्रसन्ना फलदा – पाठभेदः
6. मी.सू – 8.1.34
7. ब्र.सू – 3.2.37
8. मी.सू – 9.1.6

यागमयोग्यत्वादुपेक्ष्य वाक्याद्युपनीतस्वर्गादि गृहीत्वा तस्य साधनमाकाङ्क्षन्ती समानपदश्रुत्युपनीतयागविरोध्यत्करणं गृहीत्वा, इत्थंभावापेक्षायां द्रव्यं देवतां भूतभव्यं यागनिर्वहणक्षमं तादर्थ्येन गृह्णन्ती देवतां [1]यागार्थां करोति। न च प्रागवगतं देवतायाः फलार्थत्वं येन तदाराधनाय यागविधिः स्यात्। एवञ्च शब्देन यागादेव फलं गम्यते इति। इह तु देवताधिकरणे देवताविग्रहादिकं समर्थितम्।

तथा नवम एव [2]**'असंयोगात्तदर्थेषु तद्विशिष्टशब्दः प्रतीयेत'** इत्यधिकरणे देवतानिरासः प्रतीयते। तथाहि ज्योतिष्टोमे देवताप्रकाशनार्थः सुब्रह्मण्यानिगदः [3]**'इन्द्र आगच्छ हरिव आगच्छ'** इत्यादिः। सोऽग्निष्टुत्यतिदिष्टः। त**'त्राग्नेयी सुब्रह्मण्या'** इति वचनादिन्द्रपदस्थानेऽग्निपदं प्रक्षिप्यते। हरिव आदिपदेषु किमूहितव्या न वेति संशयः। तदर्थञ्च किं समवेतवचनं न वेति। तत्र **'इन्द्र हरिव'** इत्यादिभिरिन्द्रे एते गुणास्सन्तीति गम्यते। ततश्च स्वगुणद्वारेणेन्द्रं प्रकाशयितुममीषामुच्चारणं दृष्टार्थत्वात्, तेनाग्निरपि तथा प्रकाश्यत इति। हरिव आदिपदस्थाने रोहितवदादिशब्दोहः कार्य इति पूर्वपक्षे, सिद्धान्तः - वाक्यशेषाणां स्तुतिमात्रपरत्वादिन्द्रे नैतेषां गुणानां सद्भावे किञ्चित्प्रमाणमस्ति। तस्मादसमवेतार्थत्वादविद्यमानैरेव गुणैः सम्बन्धी अदृष्टार्थमिन्द्रः प्रकाश्यत इति। अग्निरपि तथैव प्रकाश्यत इत्यनूह इति। तदपि शारीरकदेवताधिकरणविरुद्धम्।

तथा दशमे – [4]**'विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदना'** इत्यनेनाग्नेययागे **'यदाग्नेयोऽष्टाकपालो भवति'** इति विहिते हविषस्त्यागवेलायामग्निशब्दसमानार्थेन शुच्यादिशब्देनापि देवतोद्देशे प्राप्ते विधिगतशब्देनाग्निशब्देनैव हविषस्सम्बन्धचोदना। तस्मात्तस्यैव मन्त्रत्वेनोपादानमित्युक्तम्।

तथा [5]**'तथोत्तरस्यां ततौ तत्प्रकृतित्वात्'** इत्यत्र सौर्यचरावतिदेशप्राप्तेषु [6]**'अग्नेरहमुज्जितिमनूज्जेषम्'** इत्यादिमन्त्रेष्वप्यविशेषात् सूर्यसवित्रादिष्वन्यतम ऊहितव्य इति प्राप्ते, सूर्यशब्दस्यैव[7] देवतात्वेन तस्यैवोह इति परिहृतम्।

एवमाधाने [8]**'अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेत्, [9]अग्नये पावकाय,**

---

1. यागार्थाम्; यागार्थम् - पाठभेदः
2. मी.सू – 9.1.42
3. तै.आ – 1.1.12.3
4. मी.सू – 10.4.23
5. मी.सू – 9.3.1
6. तै.सं -1.6.4. 1-2
7. शब्दस्येव; शब्दस्यैव - पाठभेदः
8. तै.ब्रा – 1.1.6.2; तै.सं – 2.4.1.2
9. तै.ब्रा – 1.1.5.10; आ.श्रौ.सू – 5.20.5

**अग्नये शुचये'** इति विहितपवमानेष्टौ [1]**'अविकारो वार्थ शब्दानपायात्'** इति सूत्रेणाग्नेययागादतिदेशप्राप्तेषु [2]मन्त्रेष्वविकारो निर्गुणमभिधानं स्यात्, [3]विधिशब्दस्य तदर्थदेवतायाश्च तथाप्यनपायात्। यथा **'सा वा एषा सर्वदेवत्या यदजा वशा, वायव्यामालभेत'** इत्यजावशाचोदितमपि द्रव्यं विकृतौ **'छागस्य वपाया मेदस'** इत्यविकृतेनैव मन्त्रेणाभिधीयते, अर्थशब्दयोरनपायादिति पूर्वपक्षमुक्त्वा, शब्दस्वरूपमेव क्रतुसमवायि नार्थ इत्युक्तम् - [4]**'आरम्भासमवायाद्वा चोदितेनाभिधानं स्यात्'** इत्यादिसूत्रेण। आरम्भेण स्वरूपेणासमवायाद्देवताया इत्यर्थः।

द्रव्यदृष्टान्तवैषम्यं चोक्तम् – [5]**'द्रव्येष्वारम्भभागित्वादर्थे विकारःसामर्थ्यात्'** इति द्रव्याणां स्वरूपेण कर्मान्वयित्वात्तस्य छागशब्देन निर्गुणेनाभिधानमुपपद्यते। देवता तु श्रुतिसमवायिनीति तस्या विकारः कर्तव्य इत्यर्थः। एतदपि शारीरकदेवताधिकरणविरुद्धम्।

किञ्चैकशास्त्रे सर्ववेदान्तप्रत्ययन्यायेन सर्वशाखाप्रत्ययन्यायस्य पौनरुक्त्यप्रसङ्गः। काण्डद्वयस्थयोरपशूद्राधिकरणयोश्च पौनरुक्त्यप्रसङ्गः। अतः कथमैकशास्त्र्यमिति।

उच्यते - न तावदर्थवादाधिकरणसमन्वयाधिकरणयोर्विरोध उत्सर्गापवादरूपत्वात्। न चापवादत्वे तत्सादेश्यप्रसङ्गः। पाणिनीये द्वैतीयस्य लुकः षाष्ठलुकः अपवाददर्शनात्। कर्मविचारे अपवादस्यानपेक्षितत्वात्, तत्रोत्तरपदाधिकारसम्बन्धादिवत् इहापि ब्रह्मविचारसम्बन्धा-दुत्सर्गवैदेश्योपपत्तेः।

यद्वा - अनुष्ठानापर्यवसाने प्रयोजनाभावादविवक्षितार्थत्वशङ्कायां विध्येकवाक्यत्वेनार्थवादस्य प्रामाण्यमुक्तम्। समन्वयसूत्रे त्वनुपासनाशेषसिद्धपरवाक्यानां विध्येकवाक्यत्वाभावेऽपि प्रत्यक्षादेरिव पुरुषार्थोपस्थापकतया तत्र कामनोत्पादनमुखेन तत्साधनप्रवर्तकतयानुष्ठानपर्यवसायित्वमुपपद्यत इति। देवतायाः [6]सम्प्रदानत्वेन कर्मभूतेन द्रव्येणापि व्याप्यते, न ततोऽपि प्राधान्यात् तत्साम्यमप्रधानद्रव्यसाम्याद्बलीय इति शङ्कानिराकरणार्थं [7]**'गुणत्वेन देवताश्रुतिः'** इति सूत्रम्।

तस्यार्थः - यद्यप्यार्थप्राधान्यशालिनी देवता, तथाप्यनुष्ठेयपरे विधिवाक्ये द्रव्यदेवते द्वे

---

1. मी.सू – 10.5.27
2. मी.सू – 10.4.31
3. मी.सू – 10.4.23
4. मी.सू – 10.4.28
5. मी.सू – 10.4.29
6. सम्प्रदातृत्वेन; सम्प्रदानत्वेन - पाठभेदः
7. मी.सू – 8.1.34

अपि गुणत्वेनैव श्रूयेते, न ततस्तयोर्विशेषः। किञ्च [1]**'ऐन्द्राग्नम्'** इत्यत्र द्रव्यं विशेष्यत्वेन प्रधानम्, देवता विशेषणत्वेन गुणभूता। देवताया अपि यद्यप्यार्थप्राधान्यमस्ति तथापि [2]**'ऐन्द्राग्नमेकादशकपालं निर्वपेत्'** इति वाक्यार्थप्रतिपत्तिसमये कथम्भावस्याकाङ्क्षितत्वात् तद्दशायाञ्चार्थप्राधान्यस्याप्रतीतेः तदवस्थायां प्रतीतशाब्दप्राधान्यानुरोधेनातिदेशस्य कर्तव्यत्वादाग्नेयादिविध्यन्तनियमस्सिद्ध्यति।

[3]**'देवता वा प्रयोजयेदतिथिवत् भोजनस्य तदर्थत्वात्'**, [4]**'आर्थापत्याच्च'**, [5]**'ततश्च तेन संबन्ध'** इति नवमे पूर्वपक्षसूत्राणामयमर्थः - क्रियाप्रधानवाक्येऽन्यत् भूतापि देवता आर्थप्राधान्यात् स्वाराधनार्थं द्रव्यं प्रयोजयेदतिथिवत्। तस्याश्चाराध्यत्वं विभूतिमत्त्वाद्युक्तम्। सा च निरपेक्षापि परिचरणेन प्रसन्ना भवतीति। ततः फलसम्बन्धस्सम्भवतीति। [6]**'अपि वा शब्दपूर्वत्वाद्यज्ञकर्मप्रधानं स्यात्'**, **'गुणत्वे देवताश्रुतिः'**, [7]**'अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात्तस्य प्रीतिप्रधानत्वात्'** इति चतुर्णां सिद्धान्तसूत्राणामयमर्थः-

यद्यप्यार्थप्राधान्यमस्ति तथापि कर्तव्योपदेशपरे वाक्ये फलकामप्रवर्तिका शाब्दप्रधानभूता पूर्वं कर्तव्यतया बुद्ध्यारूढा क्रियैव स्वसिद्ध्यर्थं द्रव्यदेवतादि प्रयुङ्क्ते। अतो गुणत्वेन श्रुता देवता न प्रयोजिका। अतिथेस्त्वप्रयोजकत्वे कर्मण एवाभावस्स्यात्। आतिथ्यकर्म ह्यागतातिथिनिमित्तकमेव विधीयते। न ह्यन्यप्रयुक्तातिथ्यकर्मनिर्वर्तनाय अतिथिरानीयत इति अत्र न किञ्चिद्देवताविरोधि दृश्यते।

[8]**'फलदेवतयोश्चे'**ति पूर्वाधिकरणे पूर्वत्रहि ह्यनादेर्व्रीह्यादि स्वरूपान्वयित्वे आनर्थक्याद्यतस्य पूर्वीयत्वरूपं तदन्वयित्वेन [9]नैवारचरवद्वादाद्यूहस्योक्तत्वात् तद्वैषम्येण देवतास्वरूपार्थत्वेऽपि तस्या एव फलप्रदातृत्वेन तद्वदानर्थक्याभावाद्वैकृतदेवतान्तरे न मन्त्रोह इति पूर्वपक्षमाशङ्क्य तस्या अपि मंत्रेण याचनमात्रात् फलदातृत्वे मानाभावात् क्रियागुणत्वेनैव फलोपयोग्यत्वात् सिद्ध्यत्यूह इत्युक्तम्। तच्चेदमधिकरणं **'सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम'** इति श्रुतम्।

1. मी.सू – 3.2.41
2. तै सं – 2.2.1
3. मी.सू – 9.1.6
4. मी.सू – 9.1.7
5. मी.सू – 9.1.8
6. मी.सू – 9.1.9
7. मी.सू – 9.1.10
8. मी.सू – 9.1.4
9. नैवारचरावघाताद्यूहस्योक्तत्वात् – पाठभेदः

प्रकृतौ च फलप्रकाशकः [1]'**अगन्म सुवः सुवरगन्मे**'ति मन्त्रः। देवताप्रकाशकश्च [2]'**अग्नेरहमुज्जितिमनूज्जेषमि**'त्यादिः। तौ च सौर्ये चोदकतः प्राप्तौ। किं तयोरविकारेण प्रयोगः उत वैकृतापूर्वीयफलदेवतापदं प्रक्षिप्य विकारेणेति। तदर्थं च किं तौ फलदेवतास्वरूपप्रयुक्तौ, उतापूर्वीयरूपप्रयुक्ताविति चिन्ता। तत्र फलस्य प्रधानत्वं स्यात्। देवताया अपि फलप्रदातृत्वेन प्रधानत्वात् तत्स्वरूपार्थत्वेऽप्यानर्थक्याभावात् स्वरूपार्थत्वमेवेति पूर्वपक्षः।

सिद्धान्तस्तु - प्रधानमपि फलं न प्रकाशितमात्रं सिद्ध्यति। देवतापि न प्रकाशनमात्रा सिद्ध्यति। देवतापि न प्रकाशनमात्राद्याचमनमात्राच्च फलं ददाति, मानाभावात्। किन्तु क्रियागुणत्वेनैव तयोः फलोपयोगित्वात् स्वरूपान्वयित्वे आनर्थक्यादपूर्वीयस्वरूपान्वितमेव फलदैवतम्। अतस्तत्रापि मन्त्रस्योह इति। इह तु क्रियागुणत्वमेव देवतायाः कुतः, येन क्रियाप्रयुक्तता तस्याः स्यात्। अतिथिवत् सैव क्रियाप्रयोजिका। तां प्रति प्रधानभूता चेत्याक्षिप्य समाधीयत इति।

एवं च पूर्वाधिकरण एव देवतामभ्युपगम्य गुणत्वस्योक्तत्वात् अस्याधिकरणस्य पौनरुक्त्यमिति शङ्का निरस्ता। [3]'**असंयोगात्तदर्थेष्वि**'त्यत्रापि [4]सुब्रह्मण्यायामिन्द्रपदं कर्मसमवेतदेवता-प्रकाशकत्वात् न स्तुत्युपयोगि। हरिव आदिपदं तु तेषां गुणानां कर्मसमवायाद्देवतास्तुत्यर्थतया उपयुज्यते। स्तुतिश्च सता असता च भवतीति विद्यमानेनेन्द्र इवाविद्यमानेनाग्नावपि नविरुध्यते। उत्कृष्टदेवतागुणेन चापकृष्टदेवतास्तुतिः प्रीत्यतिशयकरी, सेनापतौ राजगुणैः स्तुतिवत्। अग्निप्रकाशनार्थमग्निपदोहे न्यायादेव सिद्धेऽ'**प्याग्नेयी**'ति वचनं विशेषणे ऊहपरिसङ्ख्यार्थमेव।

वस्तुतस्त्वाग्नेयीति निर्वचनमेव देवतां साधयति। देवतासत्त्वे हि गुणानामूहप्रसङ्गेन न परिसङ्ख्यात्वसिद्धिः। न चेयं परिसङ्ख्या नभवतीति वाच्यम्। तथा सति'**आग्नयी**'ति वचनवैयर्थ्यप्रसङ्गात्। ततश्चेन्द्रगुणप्रकाशकैरेव पदैर्लक्षणया अग्निगुणप्रकाशनं द्रष्टव्यम्।

[5]'**विधिशब्दस्य मन्त्रत्वे भावःस्यादि**'ति सूत्रस्यायमर्थः - विधिवाक्यगतशब्द एव मन्त्रेऽपि प्रयोक्तव्यः। येन शब्देनाग्नेर्हविस्सम्बन्धचोदना। यतः यच्छब्दकृतो देवतायाः द्रव्यसम्बन्धः यष्टुश्च यष्टव्यभूतस्वसम्बन्धः, तेन शब्देनाभिधाने प्रीत्यतिरेकात् उपस्थितत्वाच्च देवतोद्देशार्थं शब्दापेक्षायां स एव गृह्यते। दृश्यते लोके सम्बन्धद्योतकोपाध्यायमातुलादिशब्देनाभिधाने प्रीत्यतिरेकः तदन्योच्चारणे कोपश्च। युक्तं चानियतशब्दोपादाने विकल्पप्रसङ्गात् विधिपाठक्रमस्येव

---

1. तै.सं – 1.6.6.1
2. तै.सं – 1.6.4.1-2
3. मी.सू – 9.1.42
4. तै.आ - 1.1.12.3
5. मी.सू – 10.4.23

चोदनोपस्थितस्यैव ग्रहणम्। द्रव्यदेवतासम्बन्धहेतुव्यापारानुष्ठाने तद्विधायकवाक्यगतश्शब्दः सन्निहित इति तस्योपादानमस्तु। सौर्यचरावतिदेशप्रा [1]**प्तोज्जित्या**दिमन्त्राणां सौर्यवाक्यविहितत्वाभावेन सन्निहितत्वाविशेषाद्द्वयस्य कस्यापि उपादानं स्यादिति शङ्कानिरासार्थं [2]**'तथोत्तरस्याम्'** इति सूत्रम्। प्रकृता**वुज्जित्या**दिनिगमेषु विधिगतशब्दस्य दर्शनात् तथैव विकृतावपि युक्तमिति सूत्राक्षरयोजना।

[3]**'आरम्भसमवायादि'**त्यादिसूत्रद्वयस्या[4]यमर्थः - देवतायाः स्वरूपेण यागानिर्वर्तकत्वात् शब्देनोद्दिश्यमानतया निर्वर्तकत्वात् शब्देऽपेक्षिते विनिगमकाभावात् शब्दद्वयोपादनं युक्तम्। अन्यथा विधावपि पदद्वयमनर्थकं स्यात्। द्रव्यस्य तु स्वरूपेण यागनिर्वर्तकत्वादनपेक्षितः शब्दः न शास्त्रार्थ इति न तद्वशेनानाशब्दोहः। अविकारेणापि मन्त्रस्य द्रव्याभिधानसामर्थ्यात्।

किञ्च—

[5]**पावकः पावमानश्च शुचिरग्निश्च ते स्मृताः।**
**निर्मन्थ्यः पवमानस्तु वैद्युतः पावकः स्मृतः॥**
[6]**शुचिः सौरस्तु विज्ञेयः स्वाहापुत्रास्त्रयस्तु ते॥**

इति लैङ्गाद्युक्तरीत्या देवतानां हि भिन्नत्वात् तदसाधारण्यार्थं [7]**'अग्नये पावकाय'** इति निर्देशो युक्तः। इदानीमितरव्यावृत्तस्वरूपपरोऽयमारम्भशब्दः। अतो न तत्रापि विरोधः।

सूत्रविरोधं वदद्भिरपि न्यायविरोधस्यानिष्टत्वात् उक्तरीत्यैव देवताङ्गीकारिभिर्न्याया वाच्याः। अन्यथा देवतावादिनां तन्निराकरणेन सिद्धान्तसमर्थनासम्भवादनुष्ठान[8] वैपरीत्यप्रसङ्गात्। उक्तरीत्या न्यायप्रतिपादने च सूत्राण्यपि न विरुध्यन्ते। यद्येषां सूत्राणां परोक्तार्थ एव स्यात्तदा देवतासद्भावनिबन्धनपूर्वपक्षे कस्मिंश्चित् तदभावेन निरस्ते पुनस्तन्निबन्धनपूर्वपक्षानुत्थानादितरेषामधिकरणानामुत्साह एव स्यात्।

ननु यदि जैमिनिबादरायणयोरैककण्ठ्यं तर्हि [9]**'मध्वादिष्वसम्भवात् अनधिकारं**

---

1. तै.सं – 1.6.4.1-2
2. मी.सू – 10.4.25 ; मी.सू – 9.3.1
3. मी.सू – 10.4.28
4. मी.सू – 10.4.18; मी.सू – 10.4.19
5. लिङ्ग.पु – 1.6.1
6. लिङ्ग.पु – 1.6.2
7. तै.ब्रा – 1.1.5.10; 1.1.6.2
8. वैपरीत्याप्रसङ्गात् – पाठभेदः
9. ब्र.सू – 1.3.30

**जैमिनिः'**, [1]**'धर्मं जैमिनिरत एव'**, [2]**'शेषत्वात् पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः'**, [3]**'परामर्शं जैमिनिरचोदनाच्चापवदति हि'**, [4]**'परं जैमिनिर्मुख्यत्वात्'**, [5]**'ब्राह्मेण जैमिनिरुपन्यासादिभ्यः'**, [6]**'भावं जैमिनिर्विकल्पामननात्'** इत्यादिषु जैमिनिमतनिरासः कथमिति चेत् उच्यते - गुरुशिष्यभावात् [7]**'तत्प्रमाणं बादरायणस्यानपेक्षत्वादि'**ति शिष्येणाचार्यपुरस्कारात्। आचार्येण च [8]**'साक्षादप्यविरोधं जैमिनिः'**, [9]**'सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति'**, [10]**'अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके'**, [11]**'तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात् तद्रूपाभावेभ्यः'** इत्यादिभिः स्वाभिमतार्थस्य जैमिनिमतत्वेनोपन्यासाच्च ऐककण्ठ्ये सिद्धे हयशिरउपाख्यानादिषु जैमिनेर्भगवद्बादरायणोपदिष्टब्रह्मविद्याकत्वावगमाच्छ्रवणवेलायां जैमिनिना कृतानि चोद्यानि शिष्यानुग्रहातिरेकात् तद्बुद्धिप्रचिख्यापयिषया तदुक्ततयोपन्यस्य निरासः कृत इति।

शूद्रेत्यामन्त्रणनिमित्ताधिकाशङ्कानिराकरणार्थत्वान्न शारीरकापशूद्राधिकरणस्य पौनरुक्त्यम्। सर्ववेदान्तप्रत्यये पौनरुक्त्यशङ्का तदर्थानवबोधविलसिता। नहि तत्र सर्ववेदान्तप्रत्ययमेकमनेकं वेति संशयः। न चानेकमिति पूर्वः पक्षः, नाप्येकमिति राद्धान्तः। किन्तु सर्वशाखाप्रत्ययन्यायोऽत्र प्रवर्तते न वेति संशयः। न प्रवर्तत इति पूर्वपक्षः, प्रवर्तत इति राद्धान्तः।

कुतोऽयमर्थस्समधिगतः? साध्यानिर्देशादिति ब्रूमः। तदनिर्देशो हि तत्प्रवृत्तिप्रतिपादनपरेऽस्मिन् सूत्रे तत्साध्यस्यैवान्वयात्। शाखान्तराधिकरणसिद्धान्तहेतूनामैक्यसाधकानां संयोगरूपचोदनाख्याविशेषाणां सत्त्वेऽप्यक्षरविद्यायां [12]**'तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम्'** इत्याथर्वणिकासाधारणशिरोव्रतस्य मुण्डकेऽक्षरविद्याङ्गत्वदर्शनेन वाजसनेयकाक्षरविद्यातो भेदावश्यम्भावात् सारस्वतसत्रलिङ्गदर्शनवत् तस्य सामान्यतो

1. ब्र.सू – 3.2.39
2. ब्र.सू – 3.4.2
3. ब्र.सू – 3.4.18
4. ब्र.सू – 4.3.11
5. ब्र.सू – 3.4.5
6. ब्र.सू – 4.4.11
7. मी.सू – 1.1.5
8. ब्र.सू – 1.2.29
9. ब्र.सू – 1.2.32
10. ब्र.सू – 1.4.18
11. ब्र.सू – 3.4.40
12. मुण्डक – 3.2.10

वेदान्तविहितविद्यासु शाखान्तराधिकरणन्यायाप्रवृत्तौ लिङ्गदर्शनत्वात् तन्निमित्ताशङ्कानिराकरणार्थत्वान्न पौनरुक्त्यम्।

सारस्वतसत्रे हि श्रूयते – **'ये पुरोडाशिनस्त उपवसन्ति ये सान्नायिनस्ते वत्सं धारयन्ति'** इति। सान्नाय्यधिष्टप्रथमयज्ञास्सोमयाजिन एव सान्नाय्यविधानात् अन्ये पुरोडाशिनः **'पुरोडाशाभ्यामेवासोमयाजिनं याजयेत्'** इति श्रुतेः। तत्र ताण्ड्यकशाखायां [1]**'एष वाव प्रथमो यज्ञो यज्ञानां यत् ज्योतिष्टोम'** इति क्रत्वन्तराणां ज्योतिष्टोमपूर्वकत्वावगमात् सारस्वतसत्रे पुरोडाशिदर्शनं सर्वशाखागतसारस्वतसत्रभेदेनोपपद्यते। भेदे तु ताण्ड्यशाखागतस्यैव सारस्वतसत्रस्य ज्योतिष्टोमपूर्वकत्वम्। शाखान्तरे तदनुक्तेः तद्विहितसारस्वतसत्रे पुरोडाशिदर्शनम् उपपन्नम्[2]। अतो नानाशाखागतानां सारस्वतसत्राणां मिथो भेद इति सारस्वतसत्रमात्रे लिङ्गदर्शनं सामान्यत उक्तम्।

निरुक्ताक्षेपपरिहारार्थमिदं सूत्रं [3]**'स्वाध्यायस्य तथात्वे हि समाचारेऽधिकाराच्च सववच्च तन्नियम'**इति। अयमर्थः- तथात्वं सप्रकारत्वं साङ्गत्वमिति यावत्। स्वाध्यायाध्ययनस्य साङ्गत्वसिध्यर्थं शिरोव्रतनियम इत्यर्थः। कुत एतत्। [4]**'नैतदपि चीर्णव्रतोऽधीते'** इति तस्य अध्ययनसंयोगात् समाचारेऽधिकाराच्च समाचाराख्ये ग्रन्थे इदमपि वेदव्रतेन व्याख्यातमित्यतिदेशात्।

अस्यायमर्थः - इदमिति प्रस्तुतं व्रतान्तरं परामृश्यते। वेदव्रतेन शिरोव्रतेन शिरोव्रतपुष्कलोपदेशं कृत्वा व्रतान्तरं प्रस्तुत्य तत्र शिरोव्रतोक्तक्रममतिदिशत् वाक्यं शिरोव्रतं वेदव्रतशब्देन निर्दिदेश। सववच्च तन्नियमः – यथा हि सवहोमाः सप्तसूर्यादयः शतौदनपर्यन्ता आथर्वणिकैकाग्निसम्बन्धिनः तत्रैव भवन्ति, न त्रेताग्निषु।

[5]**तेषामेवे**त्यस्यायमर्थः - शिरोव्रतवतामेव एतामक्षरविद्यावदेव उपदिशेदिति। उपदेशश्चोपस्थितोपनिषद्वाक्येनैवेति लभ्यते। सन्निहितपरित्यागे नियामकाभावात्, **'नैतदचीर्णव्रतोऽधीत'** इत्युत्तरवाक्यानुगुण्याच्च। शिरोव्रतं नाम शिरस्यङ्गारपात्रधारणप्रधानः कश्चिद्व्रतविशेषः।

यदाह कश्चित् - शिरोव्रतं नामाथर्वशिरस्युपदिष्टं भस्मधारणमेव। तदेवात्र सर्वविद्याङ्गतया विधीयत इति। तन्न। शिरोव्रतशब्दस्य पूर्वोक्तव्रतपरत्व एव समुदायावयवयोः स्वारस्यात्।

---

1. ताण्ड्य.ब्रा – 6.3.1
2. उपपन्नम् – पाठभेदः
3. ब्र.सू – 3.3.3
4. मुण्डक – 3.2.11
5. मुण्डक – 3.2.10

समुदायो हि तत्रैव सुप्रसिद्धः। [1]शिरश्शब्दोऽपि शरीरावयवविशेषे। न हि अनथर्वोपपदः शिरश्शब्दो ग्रन्थविशेषोपस्थापनसमर्थः।

किञ्च [2]'**तेषामेवैतां ब्रह्मविद्यां वदेत**'ेति उपदिशेदिति व्रतनियमः श्रूयते। न विद्यायां नाध्ययनेनापि स्वाध्याये, अथापि विद्याङ्गत्वमध्ययनाङ्गत्वं वा कल्प्यते। ततश्च [3]'नैतदचीर्णव्रतोऽधीत' इत्युत्तरवाक्यानुसारात् चरितव्रतायैवेदमुपदेष्टव्यम्, अध्ययनस्य तदङ्गत्वादित्यभिप्रायकल्पनमेव वरम्। न तु विद्याङ्गत्वाभिप्रायकल्पनम्, कल्पकाभावात्। न हि चरितव्रतमनुष्ठापयेदिति श्रूयते, येनैवं कल्प्येत। उपदेशात् प्राक्कालीनतया श्रूयमाणस्य उपदिष्टार्थानुष्ठानाङ्गत्वं कस्यापि बुद्धिं कथमिव समारोहेत्। कथं च वेदाचार्यद्रोहकर्तव्यता। सर्वेऽपि भाष्यकाराः सूत्रकारमेवानुरुन्धते। तथैव परभाष्यकारोऽपि। एतत्सूत्रविरोधादेव तामसपुराणवचनानुसारेण अत्रत्यशिरोव्रतपदस्य यत्किञ्चित्परत्ववर्णनं यत्किञ्चिदेव।

किञ्च नहि तत्र पुराणे एतद्वाक्यस्थं शिरोव्रतपदमन्यपरमित्युक्तम्। किन्तु शिरोव्रतशब्दस्यार्थान्तरकीर्तनमात्रं कृतम्। अतः तावन्मात्रावलम्बनेन नाचार्यद्रोहः कार्यः।

यदुक्तं शिरोव्रत [4]स्याध्ययनाङ्गत्वे बह्वृचाय शौनकाय कथमुपदेश इति। तन्न। अध्ययनं हि नाम अक्षरग्रहणपर्यन्तमनूच्चारणम्। नहि शौनकेन तत्क्रियते। किन्तु गुरुमुखतो मोक्षसाधनविशेषो ज्ञायते। एवं च शिरोव्रतस्याथर्वणाध्ययनार्थताया अन्यतः प्राप्तत्वात् विद्याङ्गत्वविधानसामर्थ्याभावात् उत्तरवाक्यानुसाराच्च मुण्डके शिरोव्रताङ्गत्वानुवादमुखेन विद्याप्रशंसार्थमिदं वाक्यमिति।

यदप्युक्तम् - आचार्येणेह कृत्वाचिन्ता क्रियते। यदि शिरोव्रतशब्दस्याथर्वणिकशिरोव्रता-तिरिक्तमर्थान्तरं न स्यात् तदा यथाकथञ्चित् शिरोव्रतस्य स्वाध्यायधर्मत्वप्रतिपादन एव [5]'**शिरोव्रतं विधिवद्यैस्तु चीर्ण**'मित्यस्यास्तात्पर्यं वक्तव्यम्। अन्यथा [6]चोदनाद्यविशेषप्राप्ताभेदप्रत्यभिज्ञान-विरोधात्[7], तद्भेदकल्पने गौरवाच्च।

एवमर्थान्तरपरस्यापि वाक्यस्य न्यायव्युत्पादनार्थं कृत्वाचिन्तयार्थान्तरश्रवणेन सिद्धान्तवर्णनमन्यत्रापि दृश्यते। तद्यथा - अत्रैव शास्त्रे [8]'**प्राणादयो वाक्यशेषादि**'ति।

1. शिरश्शब्दोऽपि – पाठभेदः
2. मुण्डक – 3.2.10
3. मुण्डक – 3.2.11
4. अध्ययनार्हत्वे; अध्ययनाङ्गत्वे - पाठभेदः
5. मुण्डक – 3.2.10
6. ब्र.सू – 3.3.1
7. भेदप्रत्यभिज्ञानविरोधात् - पाठभेदः
8. ब्र.सू – 1.4.12

नहि [1]**'यस्मिन् पञ्च पञ्चजना'** इति मन्त्रे पञ्चजनशब्दः क्लिष्टगत्या वाक्यशेषगतप्राणादिपरः। तस्य मन्त्रान्तरानुसारेण चेतनविशेषपरत्वात्। अथर्ववेदे हि तृतीयकाण्डे पञ्चमानुवाके स आम्नायते—

[2]**यं त्वा होतारं मनसाभिसंविदुः त्रयोदशभौवनाः पञ्च मानवाः।**
**वर्चोधसे यशसे सूनृतावते तेभ्योऽग्निभ्यो हुतमस्त्वेतत्।**।इति।

अस्यार्थो वेदभाष्ये दर्शितः - **अग्ने, त्वा** – त्वां **होतारं** – देवानामाध्यातारं **मनसाभिसंविदुः** - सम्यक् जानन्ति, **ये त्रयोदश भौवनाः – 'विश्वकर्मा भौवना स्वात्मनि सर्वाणि भूतानि जुहावाञ्चकारे'**त्यादिश्रुत्यन्तरप्रसिद्धाः विश्वकर्मप्रभृतयो भुवनस्य महर्षेः पुत्रास्त्रयोदशसंख्याकाः, **पञ्च मानवाः** - निषादपञ्चमाश्चत्वारो वर्णा गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके, तस्मिन् **वर्चोधसे** - तेजो धारयते **यशसे** – यशस्विने, सूनृतावते – प्रियहितवचनयुक्ताय तुभ्यं **तेभ्यः** - प्रागुक्तेभ्यः अग्निभ्यश्च **हुतमेव** तद्धविरस्त्विति। **'यथा यमाय हार्म्यमवमं पञ्च मानवाः, वैवस्वतो न तृप्यति पञ्चभिर्मानवैर्यम'** इत्यादिरपीहोदाहरणम्। तत्रापि निषादपञ्चमाश्चत्वारो वर्णाः पञ्च मानवा इति भासकरादिभिर्व्याख्यातम्। वर्णानां पञ्चमत्वेन निषादग्रहणमग्निसम्बन्धसाम्यात्। अत एव मन्त्रवर्णे **'जना यदग्निमयजन्त पञ्च'**। एवं मन्त्रान्तरानुरोधेन पञ्चजनशब्दस्यार्थान्तरपरत्वादेव शारीरकभाष्य तस्य यथासूत्रं प्राणादिपरत्वं [3]वर्णितवतापि शङ्करेण ब्रह्मदारण्यकभाष्ये **'पञ्च पञ्चजनाः गन्धर्वाः पितरो देवा असुरा रक्षांसि निषादपञ्चमा वर्णा'** इति व्याख्यातमिति। तदिदमाचार्यद्रोहसन्धुक्षितान्धतमसविजृम्भितम्। अभ्युपगम्यवादे हि किञ्चित्प्रयोजनं वाच्यम्। न चेह लेशतोऽपि तत्पश्यामः।

किञ्च [4]**'तेषामेवैतामि'**ति वाक्यं किं विद्याङ्गत्वबोधने स्वरसमुत न। आद्ये वाक्येन प्रत्यभिज्ञारूपं लिङ्गं बाध्यमेव। द्वितीये अर्थान्तरबोधेऽपि कथं विद्याङ्गत्वसिद्धिः।

यच्चोक्तं [5]**'प्राणादयो वाक्यशेषादि'**त्यभ्युपगम्यवाद इति। तन्न। [6]यस्मिन् पञ्च पञ्चजना इत्यत्र पञ्चजनशब्दस्य समाहारपरत्वे अतिप्रसङ्गेन[7] **'दिक्सङ्ख्ये संज्ञायामि'**ति

---

1. बृ.उ – 6.4.17
2. अथर्व – 3.21.5
3. प्राणादिपरत्वं वर्णितवतापि - पाठभेदः
4. मुण्डक – 3.2.10
5. ब्र.सू – 1.4.12
6. ब्रृ.उ – 6.4.18
7. अतिप्रसङ्गेन - पाठभेदः

विहितसमासत्वेन संज्ञात्वात्। ततश्च वाक्यशेषेण नात्रार्थनिर्णयः क्रियते। किन्तु **'यूपे पशुं नियुञ्जीते'**त्यत्र यूपशब्दस्य **'यूपं तक्षती'**त्यादिवाक्येनैव [1]**'प्राणस्य प्राणमुत चक्षुषश्चक्षुःश्रौत्रस्य श्रोत्रमन्नस्यान्नं मनसो मन'**इति वाक्यशेषेण इन्द्रियेषु पञ्चजनशब्दस्य शक्तिरवधार्यते। अन्यथा प्राथमिकपञ्चन्-शब्दत्रयस्य प्रयोजनाभावात्। व्यवच्छेदकत्वे त्वयोग्यार्थता।

वेदाचार्यपक्षे तु सङ्ख्याप्रत्यभिज्ञानेन प्राणादिपरिग्रहः प्रयोजनम्।

एतेन क्लृप्तशक्त्यैवोपपत्तावपूर्वशक्तिकल्पना न युक्तेति शङ्का दूरोत्सारिता। पदातिरेकस्यैव तत्कल्पकत्वात्।

वस्तुतस्तु न शक्तिः कल्पनीयैवेति निर्बन्धः, प्राथमिकेन पञ्चन्-शब्देन प्रत्यभिज्ञया प्रकरणोपस्थितानां प्राणादीनां परिग्राह्यत्वे सिद्धे मनुष्ये व्युत्पन्नस्यैव पञ्चजनशब्दस्य प्राणादिषूपचारात् प्रवृत्त्युपपत्तेः। वाक्यशेषे प्राणशब्देन स्पर्शनेन्द्रियं गृह्यते, वायुसम्बन्धित्वात् तस्य। अन्नशब्देनाप्यायनादन्नसम्बन्धाभ्यां प्राणरसनयोस्तन्त्रेण ग्रहणम्। तत एव पञ्चत्वमप्यविरुद्धम्।

त्वदुदाहृतमन्त्रे च पञ्चजनशब्दाभावा[2] द्यथेष्टमर्थं वर्णयन्तु। शङ्करेण तु बृहदारण्यकभाष्ये अर्थान्तरवर्णनं विस्मरणादेव। अत एव तद्वार्तिके भाष्योक्तार्थद्वयेऽप्यस्वरसेन वाक्यशेषलब्धार्थो वर्णितः।

यच्चोदाहरणान्तरमुक्तं पूर्वस्मिन् तन्त्रे – [3]**'अपितु वाक्यशेषत्वादितरपर्युदासः स्यात् प्रतिषेधे विकल्पः स्यात्'** इति सूत्रम्। ज्योतिष्टोमे श्रूयते – **'दीक्षितो न ददाति न जुहोति न पचती'**ति। तत्र संशयः - क्रत्वर्थपुरुषार्थसाधारण्येन सर्वेषामपि होमानां प्रतिषेधः, उतादिष्टानां पुरुषार्थानां च, अथवा पुरुषार्थानाम् अग्निहोत्रादीनां पर्युदास इति। त[4] त्राविशेषात् सर्वनिषेध इत्येकः पक्षः। आहत्य विहितानां **'ग्रहैः जुहोती'**त्येवमादानां बलवत्त्वादतिदिष्टानां पुरुषार्थानाञ्चेत्यपरः।

सिद्धान्तस्तु - अग्निहोत्रादिहोमानां स्वस्वविधिभिः कर्तव्यत्वेन [5]'नदीक्षित'वचनेन कर्तव्यत्वेन च विकल्पप्रसङ्गात् 'न दीक्षित' इति वाक्यं पर्युदासः। तस्य च अग्निहोत्रादिवाक्येना-न्वयः। तेनादीक्षितो यावज्जीवमग्निहोत्रं जुहोतीति अग्निहोत्रादिवाक्यानामर्थः सम्पद्यत इति। इदं चाधिकरणं कृत्वाचिन्तया प्रवृत्तम्। यदि प्रतिषेधाश्रयणे पर्युदासाधिकरणपूर्वपक्षरीत्या विकल्पः

---

1. बृ.उ – 6.4.18
2. यथेष्टमर्थम् – पाठभेदः
3. मी.सू – 10.8.15
4. मी.सू – 10.8.12
5. भट्टदीपिका.पृ - 558

प्रसज्यते, तदा तत्परिहाराय 'न दीक्षित' इत्यग्निहोत्रादिवाक्यशेषत्वमङ्गीकृत्यापि विकल्पः परिहरणीयः, 'किञ्चित्प्रकरणाम्नातस्य एकशब्दस्य प्रदेशान्तराम्नातानेकवाक्यशेषभावादपि पापीयान् विकल्प'[1] इति न्यायं व्युत्पादयितुम्। कृत्वचिन्तारूपता च प्रतिषेधाश्रयणेऽपि विकल्पाप्रसङ्गात्। होमनिषेधः क्रत्वर्थः, होमः पुरुषार्थ इति विधिनिषेधयोः विषयभेदात्। उभयोरपि क्रत्वर्थत्वेन विषयैक्ये हि षोडशिग्रहणाग्रहणरीत्या तयोरन्यतरस्य यस्य कस्यचित् परिग्रहेऽपि क्रतोः साद्गुण्याद्विकल्पो भवेत्। इह तु होमनिषेध एव क्रत्वर्थ इति होमपक्षे क्रतोर्वैगुण्याद्वस्तुतो विकल्पस्य न प्रसङ्ग इति।

अत्राभ्युपगमवादस्य प्रयोजनं न्यायविशेषव्युत्पादनमिति स्वयमेवाभिहितम्। अत्र चाभ्युपगमवादस्य न किञ्चित्प्रयोजनमिति प्रागेवाभिहितम्।

वस्तुतस्तु नेदमधिकरणमभ्युपगम्यवादः। सूत्रे पर्युदासशब्दस्य प्रतिषेधपरत्वात् सूत्रस्य चायमर्थः।

'नदीक्षित'वाक्यस्य ज्योतिष्टोमप्रकरणाधीतत्वेन ज्योतिष्टोमवाक्यशेषतया पुरुषार्थानामेवायं क्रत्वर्थो निषेधः। न च क्रत्वर्थानामेव क्रत्वर्थो निषेधः, विकल्पप्रसङ्गादिति। प्रतिषेधे पर्युदासपदप्रयोगस्तु 'नदीक्षित'वाक्यस्य पुरुषार्थहोमविध्यन्वये यो वाक्यार्थो लभ्यते अदीक्षितो जुहुयादिति, अस्यैवार्थस्य क्रत्वर्थतया पुरुषार्थनिषेधेऽपि पर्यवसानात्। क्रत्वर्थे हि निषेधे सति आहवनीयन्यायेन '**यावज्जीवमि**'त्यस्य दीक्षितकालातिरिक्तकालविषयतया सङ्कोचो वाच्यः। ततश्चादीक्षितो जुहुयादित्ययमेवार्थः पर्यवसितः। इममर्थं व्यञ्जयितुमेव च पर्युदासपदप्रयोग इति।

किञ्च किं जैमिनेः देवतानिराकरणे भ्रमो निबन्धनमुत विप्रलम्भः। नाद्यः। ब्रह्मविदग्रेसरतायाः स्थापनात्। अत एव न द्वितीयः। नहि ब्रह्मवित् परानर्थे प्रवर्तेत। प्रयोजनाभावाच्च विप्रलम्भार्थप्रवृत्तिसम्भवः। अतः सूत्राणामुक्तरीत्या देवतानिरासपरत्वाभावः वाक्यात् जैमिनेरभ्यपगम्यवादो वा स्यात्। अश्रुतवेदान्तानां कर्मण्यश्रद्धावारणार्थं युक्तो ह्यभ्युपगम्यवादः। श्रुतवेदान्तानामेव हि सर्वदेवतान्तरात्मनः अनादिनिधनस्य परमात्मनः स्वपर्यन्तयजनेन कञ्चुकपर्यवसायिजनेन वा

**[2]येप्यन्यदेवताभक्ताः यजन्ते श्रद्धयान्विताः।**
**तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्॥**

इति प्रीतेन परमात्मनेष्टस्य प्रापणात् तदाराधनात्मकर्मसु श्रद्धा न स्यात्। अश्रुतवेदान्तानां

---

1. अल्प; पापीयान् विकल्प - पाठभेदः
2. महा.भीष्म – 33.23; भ.गी – 9.23

तु प्रतिसञ्चरे देवतानां याज्यानामिन्द्रादीनां विलयात् तत्सर्गप्रवृत्तफलानां कर्मणां सर्गान्तरे फलजनकत्वासम्भवेन तत्कृतविप्रणाशाकृताभ्यागमौ स्याताम्। तस्मान्न देवताराधनात्मकं कर्म फलव्याप्तम्। तद्विनापि च पुरुषार्थसिद्धिर्भवतीति कर्मण्यश्रद्धा स्यात्। अतस्तद्वारणाय देवताभावमभ्युपगम्य कर्मण एव फलप्रदत्वं समर्थितं भगवता जैमिनिना।

**अभीष्टार्थव्ययेनापि जयति क्षेत्रहारिणम्।**
**लब्धक्षेत्रैः न दुष्प्रापः स्यादर्थ इति निश्चयात्॥**

इति न्यायेन परमाभीष्टदेवताभ्युपगमेनापि पूर्वभागार्थे ग्रन्थोत्पादने तद्बलादेव तुल्यन्यायात् क्रमेण वेदान्तेऽपि ग्रन्थोत्पत्त्या ततो देवतापारमार्थ्यज्ञानं भविष्यतीति अभिसन्धिना युक्त एवाभ्युपगम्यवादः।

सूचितश्चायं वादो भाष्यकारेण शबरस्वामिना। [1]'**विधिशब्दस्य मन्त्रत्वे भावः स्यात् तेन चोदने**'त्यत्र तदिदं (तदीयं?) भाष्यम् - नन्वेवं शब्द एव देवता प्राप्नोति। अत्रोच्यते- नैतदस्माभिः परिहर्तव्यम्। न हीदमुच्यमानमस्मत्पक्षं बाधते सुतरां शुच्यादीनामप्रसङ्ग इति। अत्र ह्यस्मद्ग्रहणेनान्यकर्तव्यताव्यञ्जनात तत्त्वतो देवतासद्भावः सूच्यते। सुतराम्-ग्रहणेन च देवतासद्भावे वाचकशब्दान्तरेषु सत्स्वपि विधिवाक्योपस्थितत्वात् अग्निशब्द एव प्रयोक्तव्य इति सिद्ध्यति। देवताविरहे शब्दस्यैव देवतात्वात् शब्दान्तरस्य नैव प्रसङ्ग इत्येवमर्थपरेण देवताङ्गीकारेऽपि न हानिरिति सूचनात् यथाकथञ्चित्परमप्रयोजनभूतकर्मानुष्ठानावैकल्य एव तात्पर्यम्, न तु देवतासद्भावासद्भावयोरिति गम्यते। तस्मात्परस्परविरोधेन भेदसाधनाशा मरीचिकाभिलाषतुल्येति।

ऐकग्रन्थ्यप्रयोजकाकाङ्क्षासिद्धये पूर्वभागोपयोगप्रकाराश्च वेदान्ताचार्यैर्दिक्प्रदर्शनेनानुगृहीताः। ते इमे प्रकाराः - प्रमाणलक्षणोपयोगस्तावत्स्पष्टः। भेदलक्षणोपयोगश्च – [2]'**एकं वा संयोगरूपचोदनाख्याविशेषादि**'ति शाखान्तराधिकरणन्यायव्युत्पादनं [3]'**सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषादि**'त्यत्रोपजीव्यते। न चेदमेव तद्व्युत्पादनमिति वाच्यम्। '**चोदनाद्यविशेषात्**' इत्यादिशब्दस्य '**संयोगरूपचोदनाख्याविशेषात्**' इति प्रागपेक्षत्वात्। किञ्च एकमिति साध्यानिर्देशश्च तन्न्यायोपजीवनेन तत्साध्यलाभादेव। तथा [4]'**गुणश्चापूर्वस्योगे वाक्ययोः समत्वादि**'त्यधिकरणव्युत्पादितो गुणभेदो '**न वा प्रकरणभेदात्** [5]**परोवरीयस्त्वादिवदि**'ति

1. मी.सू – 10.4.23
2. मी.सू – 2.4.9
3. ब्र.सू – 3.3.1
4. मी.सू – 2.2.23
5. छा.उ – 1.9.2; छा.उ – 1.9.4; छा.उ – 2.7.1; बृ.उ – 3.3.23

छान्दोग्यबृहदारण्यकोद्गीथविद्ययोर्भेदार्थमुपजीव्यते। तथा [1]'**नानाशब्दादिभेदादि**'त्यत्र शब्दान्तराभ्यासादिसिद्धेः भेदव्युत्पादनोपजीवनमादिशब्दात् प्रतीयते। [2]श्रुत्यादिबलीयस्त्वाच्च न बाधः। [3]'**लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपी**'त्यादिना तार्तीयन्यायानामुपजीवनं गम्यते। [4]'**विहितत्वाच्चाश्रमकर्मापी**'त्यधिकरणेन विद्याङ्गत्वाश्रमाङ्गत्वनिर्णये कृते प्रयुक्तिश्चातुर्थन्यायेन सिद्ध्यति। [5]'**वायुमब्दादविशेषविशेषाभ्यामि**'त्यधिकरणेन पाञ्चमिकन्याय उपजीव्यते। तथाहि - कौषीतकिनः [6]'**स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापिलोकं स ब्रह्मलोकमि**'ति अग्निलोकस्यानन्तरं वायुलोकमधीयते। वाजसनेयिनस्तु [7]'**यदेव पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति, तस्मै तत्र विजिहीषते, यथा रथचक्रस्य खम्, तेन स ऊर्ध्वमाक्रमते, स आदित्यमागच्छती**'ति आदित्यात्पूर्वं वायुमधीयते। तत्र कौषीतकिनां पाठक्रमेणाग्निलोकशब्दोक्तादर्चिषः परत्वेन वायुः प्राप्तः। उक्तवाजसनेयश्रौतक्रमेण पाठक्रमात् बलीयसा तद्बाधेनादित्यात्पूर्वं वायुर्निविशते। संवत्सरस्तु छान्दोग्ये मासात्परं श्रूयते। [8]'**तेऽर्चिषमभिसंविशन्ति अर्चिषोऽहः अह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान्मासेभ्यस्संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः। स एनान् ब्रह्म गमयती**'ति वाजसनेयके तु '**अर्चिषोऽहरि**' त्यादिमासान्तं पठित्वा '**मासेभ्यो देवलोकं देवलोकादादित्यमि**'ति मासात् परतो देवलोकः श्रूयते। तत्र द्वयोः श्रुतित्वेऽपि अधिककालानां न्यूनकालोत्तरत्वेनाहःपक्षादिषु दर्शनादर्थक्रमेण संवत्सरस्य मासात्परत्र निवेशः सिद्ध्यति।

तथा चार्थस्य क्रमनियामकत्वं श्रौतक्रमस्य पाठक्रमात् बलीयस्त्वं च पञ्चमसिद्धमुपजीव्य अब्दादित्ययोरन्तराले वायुदेवलोकशब्दार्थनिवेशं सिद्धं कृत्वा [9]'**वायुमब्दादि**'त्यधिकरणे वायुदेवलोकशब्दयोर्भिन्नार्थत्वं पूर्वपक्षीकृत्य ऐकार्थ्यं प्रसाध्यते।

---

1. ब्र.सू – 3.3.56
2. ब्र.सू – 3.3.47
3. ब्र.सू – 3.3.43
4. ब्र.सू – 3.4.32
5. ब्र.सू – 4.3.2
6. कौषी.ब्रा. – 1.3
7. बृ.उ – 7.10.1
8. छा.उ – 4.15.5; छा.उ – 4.15.6
9. ब्र.सू – 4.3.2

एवं [1]‘**तटितोऽधि वरुणः सम्बन्धादि**’त्यधिकरणेऽपि पाञ्चमिकन्याय उपजीव्यते। तत्र च वरुणस्य कौषीतकिपाठक्रमादादित्यात् पूर्वत्वे प्राप्ते मेघोदरवर्तित्वलक्षणविद्युत्सम्बन्धादर्थ-क्रमाद्विद्युत ऊर्ध्वं निवेश उक्तः। अर्थक्रमस्य बलीयस्त्वं च पञ्चमसिद्धं तत्रोपजीव्यम्। षष्ठे [2]‘**फलार्थत्वात् कर्मणः शास्त्रं सर्वाधिकारं स्यादि**’त्यधिकरणे समर्थानामेवाधिकारः नान्येषां शक्याङ्गमात्रोपसंहारेणेति निर्णयमुपजीव्यात्र विधुरादीनां देवादीनां च किं सामर्थ्यमस्ति, उत नेत्यादिचिन्तया अधिकारिविशेषनिर्णयः क्रियते। नैष्ठिकादिभ्रष्टानां च पातित्यस्मरणेन वैदिककर्ममात्रानधिकारिणामसामर्थ्यात् ब्रह्मविद्यानधिकारञ्च प्रतिपाद्य तैरेवं स्वर्गकामाधिकरणेन फलकामस्याधिकारे सिद्धे मोक्षकामना देवादीनामप्यधिकारोऽस्ति न वेति चिन्त्यते। अतिदेशाध्यायश्चोपजीव्यते।

तथाहि – [3]‘**अन्तस्तद्धर्मोपदेशादि**’त्यत्र भाष्ये ‘अन्तरादित्ये अन्तरक्षिणि च यः पुरुषः प्रतीयते स जीवादन्यः परमात्मा। कुतः? । तद्धर्मोपदेशात् जीवेऽसम्भवन् तदतिरिक्तस्यैव परमात्मनो धर्मोऽयमपहतपाप्मत्वादिः[4]। ‘[5]**स एषः सर्वेभ्यः पाप्मभ्यः**’ इत्यादिनोपदिश्यत’ इत्युक्तम्। अनन्तरं हिरण्मयपुण्डरीकाक्षत्वादिविशिष्टाप्राकृतदिव्यविग्रहयोगं च परमात्मनः प्रसाध्य ‘अतः परस्यैव ब्रह्मणः एवंरूपरूपवत्त्वादयमपि तस्यैव धर्मः। अतः आदित्यमण्डलाक्ष्यधिकरणादित्यादिजीवव्यतिरिक्तः परमात्मैवे’त्युपसंहृतम्। तच्चाक्षिपुरुषे अपहतपाप्मत्वविलक्षणविग्रहयोरतिदेशतः प्राप्तिमुपजीव्य। तत्र विग्रहप्राप्तिः [6]‘**तदेव रूपं यदमुष्य रूपमि**’त्यतिदेशात्। अत्र रूपशब्दस्य वर्णपरत्वविग्रहपरत्वसंशये [7]‘**एककपालानां वैश्वदेविकः प्रकृतिरि**’ति सूत्रोक्तन्यायेन विग्रहस्यातिदेश इति निर्णयः। तथाहि - वैश्वदेवे [8]‘**द्यावापृथिव्य एककपाल**’ इति श्रुतम्। अनन्तरं वरुणप्रघासे [9]‘**काय एककपाल**’ इति श्रुतम्। अनन्तरं साकमेधे ‘**एतद्ब्राह्मण एककपाल**’ इति श्रुतम्। तत्र किं वैश्वदेविकस्य

---

1. ब्र.सू – 4.3.3
2. मी.सू – 6.1.4
3. मी.सू – 6.1.4
4. छा.उ – 1.2.9; 8.1.6; 8.4.1; 8.7.3
5. छा.उ – 1.6.7
6. छा.उ – 1.7.5
7. मी.सू - 7.1.23
8. शत.ब्रा – 2.5.1.17; आप.श्रौ.सू – 6.29.10; आप.श्रौ.सू – 23.3.37; आप.श्रौ.सू – 23.3.38
9. शत.ब्रा – 2.5.13

एककपालस्य ब्राह्मणमतिदिश्यते, किंवा वारुणप्रघासिकस्येति संशये वारुणप्रघासिकेऽल्पं प्राकृतं वैश्वदेविके बहुश्रुतो भूयोधर्मलाभाद्वैश्वदेविकस्यातिदेश इत्युक्तम्। तत्रापि रूपशब्देन वर्णविशेषाभिधाने अल्पातिदेशाद्विग्रहपरत्वे तच्छब्देन प्रकृतपुण्डरीकाक्षत्वहिरण्यश्मश्रुत्वादिपराम-र्शाद्भूयोधर्मलाभात् विलक्षणविग्रहस्यात्रातिदेश इति निर्णयः।

यद्यपि अयं पूर्वः पक्षः अव्यवहितत्वात् एतच्छब्देन वारुणप्रघासिकस्यातिदेश इति हि सिद्धान्तितम्, तथाप्यत्र तादृशबाधकाभावात् तत्पूर्वपक्षन्यायेनैवार्थनिर्णयः।

[1]'**सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदि**'त्यत्र यज्ञादीनां विद्याङ्गत्वं प्रतीयते। यज्ञानां चाग्नेयसौर्यादीनामङ्गत्वं साङ्गानामेव। अतो यज्ञाङ्गभूतस्य [2]'**अगन्म सुवः सुवरगन्मे**'त्यादिमन्त्रस्य स्वर्गरूपफलप्रकाशकस्य विद्यार्थयज्ञाङ्गत्वम् 'अगन्म विद्यामगन्मे'त्यूहसापेक्षम्। अतः साङ्गयज्ञस्य[3] विद्यार्थत्वरूपणमूहसापेक्षम्। ऊहश्च नावमिकन्यायाधीनः। तत्र हि [4]'फलदेवतयोश्चे'त्यधिकरणे सौर्यादिष्वतिदेशतः प्राप्तस्य 'अगन्म ब्रह्मवर्चसमि'ति सौर्यफलप्रकाशकपदप्रक्षेपेणोह उक्तः।

तथा [5]'**हानौ तूपायनशब्दशेषत्वात् कुशाश्छन्दस्तुत्युपगानवत्तदुक्तमि**'ति शाखान्तराम्नातोपायनवाक्यस्य हानिवाक्यशेषत्वं कुशादिदृष्टान्तेनोपपाद्य एकवाक्यत्वसम्भवे हान्युपायनयोश्चिन्तने विकल्पापादकवाक्यभेदो न न्याय्य इत्यत्र 'तदुक्तमि'ति सूत्रखण्डेन दाशमिकपर्युदासाधिकरणसम्मतिप्रदर्शनेन तन्न्याय उपजीव्यते।

तत्र हि '**नार्षेयं वृणीत**' इति महापितृयज्ञाम्नातं '**यज्ञेषु ( यजतिषु? ) येयजामहं करोति नानूयाजेष्वि**'ति अनारभ्याधीतं च वाक्यमधिकृत्य विचार्यते। किं वरणयेयजामहाभ्यां प्रतिषेधस्य विकल्प उत तयोर्निवृत्तिरिति। तत्र प्रतिषेधेन तु मुख्यार्थलाभात्पर्युदासे कात्यायनमते समासप्रसङ्गाच्च प्रतिषेधः। तथा च विकल्प इति [6]'**प्रतिषेधः प्रदेशेऽनारभ्यविधाने च प्राप्तप्रतिषेधत्वात् विकल्पः स्यादि**'ति सूत्रेण पूर्वपक्षं कृत्वा सिद्धान्तितम् [7]'**अपि तु वाक्यशेषः स्यात् अन्याय्यत्वात् विकल्पस्य विधीनामेकदेशः स्यादि**'ति सूत्रेण।

तस्यार्थः - एकवाक्यत्वलाभात् नामान्वयेऽपि समासविकल्पस्य पाणिनिस्मरणादष्टदोषदुष्ट-विकल्पस्यान्याय्यत्वाच्च पर्युदासः। तथाच वरणयेयजामहयोर्निवृत्तिरिति। तथा [8]'**न**

1. ब्र.सू – 3.4.26
2. तै.सं – 1.6.6.1
3. यज्ञस्य; पक्षस्य – पाठभेदः
4. मी.सू – 9.1.4
5. ब्र.सू – 3.3.23
6. मी.सू -10.8.1
7. मी.सू – 10.8.4
8. ब्र.सू – 3.2.12

**स्थानतोऽपी**'त्यधिकरणे [1]**'दर्शयति चाथो अपि स्मर्यत'** इत्यादिसूत्रेषु श्रुतिर्दर्शयति। 'गुणमि'त्युक्तिः 'यदाहवनीय'न्यायेन विशेषनिषेधस्य विहितविशेषेतरविषयत्वमभिप्रेत्य। स च न्यायो दाशमिकः।

तथाहि – न सत्रयोःलक्षणतो भेदे तदुपजीवनेन [2]**'द्वादशाहवदुभयविधं बादरायण'** इत्युक्तम्। एवं [3]**'पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवदि'**ति विद्यामयमनश्चिदादीनां विद्यामयक्रत्वङ्गत्वसाधनार्थेऽधिकरणे पूर्वपक्षे विद्यामयस्यापि क्रियामयक्रत्वङ्गत्वे मानसग्रहो निर्णीतः[4]। तस्य च द्वादशाहाङ्गत्वं दाशमिकमानसमहरन्तरं स्यात्। [5]द्वादशाहव्यपदेशादित्यधिकरणसिद्धमुपजीव्यते।

एवं तत्रत्यन्यायो [6]**'विहितत्वाच्चाश्रमकर्मापी'**त्यत्रोपजीव्यते। तत्र हि कर्मणामाश्रमाङ्गत्वविद्याङ्गत्वसाधनपूर्वकमुभयार्थकर्मणामैक्यसाधनस्य तन्त्रेणानुष्ठानं फलमित्युक्तम्। पृथक्प्रयुक्तिमदुभयगोचरत्वे देशकालाद्यैक्ये च सकृत्करणम् तन्त्रम्। तच्चैकादशे स्थापितम्। **'विद्यार्थकर्मणैव प्रसङ्गात् नित्यविधिरि'**त्याचार्यमेघनादारिसूरयः। तेषामेतद्विचारस्य प्रसङ्गः फलम्।

**एवं विद्याङ्गभूतयज्ञादिस्वरूपशिक्षणेनापि कृत्स्नस्यापि पूर्वभागस्योपयोगः।**
**किञ्च यज्ञादिकल्पनं च तत्र तत्र क्रियते। तदपि यज्ञादिस्वरूपनिरूपणसापेक्षम्॥**

अपिच कर्मणामल्पास्थिरफलत्वनिर्णयरूपाधिकारिविशेषणसम्पादकत्वेनोपयोगश्च स्पष्टः। अतः सिद्धमैकशास्त्र्यमेकग्रन्थत्वं च।

एवमैकग्रन्थ्यात् पूर्ववाक्यलब्धतया स्वाध्यायाध्ययनविधिं प्रक्रम्य प्रवृत्तेन वैदिकमहापथेन सञ्चरमाणाधिकारिविशेषणसम्पादकत्वेनोपयोगनिष्ठतयोपस्थितम् अर्थस्वभावाद्योग्यञ्च कर्मज्ञान'मथात' इति परामृश्य पूर्वोत्तरग्रन्थयोरुपजीव्योपजीवकभावरूपसङ्गत्यभिप्रायेण वृत्तवर्तिष्यमाणावर्थौ प्रदर्श्य स्वकर्तव्यप्रतिज्ञामर्थादारचय्य ब्रह्ममीमांसायाः कर्तव्यतां समर्थयमानेन बादरायणेन [7]**'परीक्ष्य'** इति वाक्याभिप्रेतोऽर्थः [8]**'अथातो ब्रह्मजिज्ञासा'** इति मीमांसितः। अस्यार्थः - कर्मविचारानन्तरं तत एव हेतोर्ब्रह्मविचारः कर्तव्यः इति।

---

1. ब्र.सू – 3.2.17
2. ब्र.सू – 4.4.12
3. ब्र.सू – 3.3.44
4. निर्णीतः; निन्दितः - पाठभेदः
5. मी.सू – 2.4.24
6. ब्र.सू – 3.4.32
7. मुण्डक – 1.2.12
8. ब्र.सू – 1.1.1

केचित् - अत्र भवतीत्येवाध्याहारः। जिज्ञासाशब्दश्च न विचारपरः, लक्षणाप्रसङ्गात्। किन्तु ज्ञानेच्छापर एवेत्याहुः। तन्न। साङ्गवेदाध्ययनादेवापातप्रतीत्या पूर्वोत्तरभागसाधारण्येन जिज्ञासोदयेन तस्याः कर्मविचारानन्तर्यस्य कर्मानन्तर्यस्य साधनचतुष्टयानन्तर्यस्य चासम्भवात्। अतो लक्षणापि न दोषाय।

वस्तुतस्तु न लक्षणा, 'सविशेषणे ही'तिन्यायेन ज्ञान एव कर्तव्यतान्वयात्। किन्तु विशेषणान्वयोऽस्वरस इत्येतावत्। तच्च स्वरसार्थान्तराभावात् अङ्गीकार्यम्। न चास्वारस्यमपि, जिज्ञासानिदिध्यासनादिपदानां प्रकृतार्थप्राधान्येनैव बहुशः प्रयोगात् कर्तव्य इत्यत्रार्हार्थः तव्यः भवति।

क्रियाध्याहारादिनापि विचारकर्तव्यतासमर्थन एव सूत्रतात्पर्यमिष्यते। तस्यैव शाब्दत्वे सम्भवति तत्परित्यागो न न्याय्यः। अत्र विशिष्टाधिकार्यभावात् विचाराकर्तव्यतां पूर्वपक्षीकृत्य तल्लाभोपपादनेन कर्तव्यता समर्थ्यते।

कैश्चिद्विषयप्रयोजनाभावात् अनारम्भं पूर्वपक्षीकृत्य तत्समर्थनेन राद्धान्त उक्तः। तत्पक्षे व्यर्थाविव अथातश्शब्दौ, इतरांशेनैवोक्तन्यायसूचनसिद्धेः।

नन्वधिकारोऽपि प्रदर्शनीय इति चेन्न, यदि तज्ज्ञानाभावे प्रवृत्त्यभावः तदा च प्रवृत्तिः, तादृशं हि प्रदर्शनीयम्। यथा वाल्पशास्त्राभ्यासे स्वस्यासामर्थ्यं पश्यतोऽधिकारिणस्तत्सामान्यात् इहाप्यसामर्थ्यं पश्यतः प्रवृत्तिर्न स्यादिति तत्सिद्धये हि बाल्यं प्रदर्श्यते बालोऽपीति। इह कर्मफलानित्यत्वबुद्धितदभावाभ्यामेव विचारप्रवृत्तितदभावयोः सिद्धत्वात् तत्तज्ज्ञानस्य[1] अनपेक्षितत्वात् तत्तत्प्रदर्शनवैयर्थ्यमनिवार्यम्।

अत्राथशब्दः [2]'**परीक्ष्ये**'ति प्रतिपन्नकर्मविचारानन्तर्यपरः। अतश्शब्दः कर्मणामल्पास्थिरफलत्वनिर्णयसहितानन्तस्थिरफलब्रह्मापातज्ञानरूपविशिष्टाधिकारपरः सन् [3]'**निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थम्**' इत्युक्ततात्पर्येण अथशब्दोक्तानन्तर्योपपादनपरः। साधनचतुष्टयपूर्ववृत्ततायाः कर्मविचारस्य कर्मानुष्ठानद्वारतायाश्चासम्भवात्। एवमथातश्शब्दयोरुक्तार्थपरत्वानङ्गीकारे तयोर्वैयर्थ्यमेव स्यात्। तत्सूचनीयन्यायाभावात्। नहि तत्पक्षे शमदमादेः पूर्ववृत्तत्वेन कर्मणामनुष्ठितत्वेन वा ब्रह्मविचारकर्तव्यता समर्थ्यते। किन्तु विषयप्रयोजनसत्त्वात्। तच्च ब्रह्मजिज्ञासापदेनैव सूचनीयम्।

---

1. तत्तदर्शनस्य; तत्तज्ज्ञानस्य - पाठभेदः
2. मुण्डक – 1.2.12
3. मुण्डक – 1.2.12

सिद्धान्ते तु- सिद्धे व्युत्पत्त्यभावेन विशिष्टाधिकार्यभावात् अनारम्भे पूर्वपक्षिते अथातश्शब्दाभ्यां विशिष्टाधिकारिसमर्थनमुखेनारम्भस्समर्थ्यत इति न्यायसूचकत्वात् सफलावथातश्शब्दौ। यथा [1]‘**अथातो धर्मजिज्ञासे**’त्यत्र अथातश्शब्दयोरध्ययनानन्तर्याध्ययनद्वारभूतज्ञानपरयोर्विवक्षितत्वन्यायसूचनमुखेन चारितार्थ्यम्, तद्वदिहापि न्यायसूचकतयैव अथातश्शब्दयोश्चारितार्थ्यं युक्तम्।

किञ्च ‘**धर्मजिज्ञासे**’तिवत् ‘**ब्रह्मजिज्ञासे**’तिप्रतिज्ञामात्रपरम्। तत्रत्याथातश्शब्दवत् पारिशेष्यात् हेतूपपादनतात्पर्यकयोरथातश्शब्दयोरेव हेतुपरत्वं च युक्तम्। न च परमतहेतुपरत्वे पूर्वपक्षनिरासः सम्भवति।

एवञ्च परपक्षे पारिशेष्यादवश्यम्भाविहेतुतात्पर्यादथातश्शब्दसमभिव्याहृतप्रतिज्ञापदस्य न्यायसूचकत्वासम्भवात् अथातश्शब्दयोस्तदसम्भवाच्चाखण्डमेव सूत्रं व्यर्थम्। तदुक्ताधिकरणार्थासम्भवश्च पाराशर्यविजये द्रष्टव्यः।

**॥ इति शास्त्रभेदभङ्गः॥**

## 6. कर्मज्ञानस्यानुष्ठानद्वारकत्वभङ्गः

[2]‘**ब्राह्मणः परीक्ष्ये**’ति परीक्षाया अध्ययनानन्तर्यस्य स्वरसतोऽवगमात् कर्मविचारानन्तरं कर्मानुष्ठानेन शुद्धान्तःकरणस्य कर्मानित्यत्वपरीक्षा भवतीति वदन्तो निरस्ताः।

त एवमाहुः - कर्मविचारमात्रान्न कर्मफलानित्यत्वनिश्चयः सम्भवति। तत्राहृत्य कर्मफलनित्यत्वानित्यत्वविचारादर्शनात्। रात्रिसत्रार्थवादगतप्रतिष्ठाफलवत् सूक्तवाकमन्त्रगतायुरादि-फलवच्च [3]‘**अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति**’, [4]‘**अपाम सोमममृता अभूमे**’त्यादिमन्त्रार्थवादगतफलस्यापि तैरेव न्यायैर्ग्रहणेन नित्यफलस्यैव निश्चयप्राप्तेश्च, विध्युद्देशे फलश्रवणेऽपि मन्त्रार्थवादसमर्पितनित्यत्वात्मकविशेषस्य तत्र ग्राह्यत्वात्, ‘**सप्तर्षीणां सुकृतां यत्र लोकास्तत्रेमं यज्ञं यजमानं च धेही**’ति मन्त्रसमर्पितलोकविशेषभोग्यत्वरूपविशेषवत्।

एवं च कर्मविचारस्य तदनुष्ठानचित्तशुद्धिद्वारा कर्मफलनित्यत्वानित्यत्वविचारप्रवर्तनेन कर्मफलानित्यत्वविवेकवैराग्यशमदमादिः मुमुक्षाजिज्ञासाहेतुतया ब्रह्मविचारोपयोगित्वात् पूर्ववृत्तत्वम्।

---

1. मी.सू – 1.1.1
2. मुण्डक – 1.2.12
3. शत.ब्रा – 2.6.3.1; आप.श्रौ.सू – 8.1.1; 22.8.1
4. ऋग्वेद – 8.48.3; तै.सं – 3.2.7

विशुद्धचित्तस्य च '**तद्यथेह [1]कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते**',

[2]**प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम्।**
**तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे॥**

इत्यादिश्रुतिभिः कर्मफलानित्यत्वव्याप्तिज्ञापनादिलक्षणोपपत्त्यादितात्पर्यलिङ्गोपबृह्मितार्थ-सर्गप्रलयाद्यर्थवादसहिताभिः स्वर्गाद्यनित्यत्वसिद्धेः नित्यत्वावबोधिमन्त्रार्थवादानां प्रशंसामात्रपर-त्वसिद्धेः कर्मफलानित्यत्वनिश्चय उत्पद्यते, ततो वैराग्यादिकमिति।

अत्रोच्यते - अग्निहोत्रज्योतिष्टोमदर्शपूर्णमासप्रभृतीनां कर्मणां गुरुलघुभावः फलसम्बन्धश्च न्यायेनैवावगम्यते। कर्मभेदस्तावत् द्वैतीयीकन्यायावगम्यः। अङ्गभूयस्त्वाल्पत्वे च तार्तीयवि-नियोगावगम्ये। द्वादशाहादिषु च सान्नाय्यापेक्षसाङ्गसोमयागरूपप्रधानावृत्त्या भूयस्त्वन्यायाधी-नातिदेशबलादेवावगम्यते। फलसम्बन्धश्च न्यायेनैवावसेयः। श्रवणमात्रात्फलसम्बन्धे अपापश्लोकश्रवणस्य पर्णताफलत्वप्रसङ्गात् विश्वजिदादेरफलत्वप्रसङ्गाच्च। षष्ठैकादशाद्यपूर्वपक्ष-निरासमन्तरेण च कथं फलत्वम्। आचार्यैरावृत्तिविधानशब्देन निर्दिष्टया [3]'**दाक्षायणयज्ञेन स्वर्गकामो यजेत**' इति विहितावृत्त्या च केवलदर्शपूर्णमासापेक्षया गौरवमवगम्यते।

ननु '**सर्वेभ्यः कामेभ्यो दर्शपूर्णमासावि**'ति अनेकफलार्थतया विहितदर्शपूर्णमासयागस्य पश्चाद्यर्थप्रयोगे स्वर्गाद्यर्थतया आवृत्तिगुणविधानसम्भवात् आवृत्तानावृत्तयागजन्यस्वर्गयोर्नगुरु-लघुभावसिद्धिरिति चेन्न, यत्र शास्त्रादृते न क्रतोर्गुणान्वयसिद्धिः तत्र तद्विशिष्टक्रतुरेव फलाय चोद्यते। यथा दाक्षायणयज्ञ इति। गुरुक्तरीत्या [4]'**दाक्षायणयज्ञेन स्वर्गकामो यजेते**'त्यस्याधिकारविध्यन्तरत्वे पश्चाद्यर्थप्रयोगे आवृत्तिगुणविधिशङ्कानुत्थानात् पक्षान्तरेऽपि फलान्तरार्थप्रयोगविषयत्वे नियामकाभावात् स्वर्गार्थे प्रयोगविषयत्वमप्यावश्यकम्।

ननु [5]'**अपाम सोमममृता अभूम**', '**दिवि ज्योतिरजरमारभेतामि**'त्यादिमन्त्रार्थवादबलात् विध्युद्देशेन प्रतिपन्नस्य स्वर्गस्य नित्यतावगतौ तदनुसारात्पश्चाद्यर्थप्रयोगविषयत्वं कल्पनीयम्। न चैवं निबन्धनरीत्या शब्दबलात् गुणमात्रस्य स्वर्गसाधनत्वे स्वर्गार्थप्रयोगाल्लाघवम्, विवरणरीत्या अर्थबलात् गणविशिष्टस्य साधनत्वे गौरवमिति वाच्यम्। साध्यद्वयार्थिनो गुणविशिष्टप्रयोगस्य एकैकसाध्यार्थिनस्तदविशिष्टप्रयोगस्य च सम्भवादिति चेन्न, स्वरसतो दर्शपूर्णमासमात्रगोचरतया

1. छा.उ – 8.1.6
2. बृ.उ – 6.4.6
3. आप.श्रौ.सू – 3.17.4
4. आप.श्रौ.सू – 3.17.4
5. ऋ.वेद – 8.48.3; तै.सं – 3.2.7

प्रतीयमानस्य विधेर्मन्त्रार्थवादमात्रेण सङ्कोचायोगात्। '**दाक्षायणयज्ञेने**'ति यज्ञशब्दस्य पश्वर्थप्रयोगे लक्षणाप्रसङ्गाच्च। न ह्यत्र '**न प्रथमयज्ञे प्रवृञ्ज्यादि**'त्यत्र यज्ञपदेन प्रयोगलक्षणायां प्रयोगान्वयिप्रथमश्रुतप्रथमयज्ञशब्दानुरोधवत् किञ्चिल्लक्षणाकारणमस्ति।

'**पशुना यजेते**'त्यत्र तद्विशेषाणां नियमेनोपस्थित्या उपादानाय विशेषस्य नियमेनाकाङ्क्षितत्वात् मन्त्रवर्णात्सङ्कोचो युक्तः। इह तु दर्शपूर्णमासोपस्थितिदशायां प्रयोगविशेषानुपस्थितेरनुपादेयत्वाच्च न विशेषाकाङ्क्षेति न मन्त्रबलात्सङ्कोचो युक्तः।

किञ्च पशुशब्दस्य व्यक्तिवाचित्वात् सन्निहितव्यक्तिविशेषे पर्यवसानं युक्तम्। इह व्यक्तिवाचित्वेऽपि दर्शपूर्णमासयागस्यैव सन्निहिततया पश्वर्थप्रयोगासाधारणसन्निधानाभावेन न तन्मात्रपरत्वं युक्तम्।

किञ्चायमावृत्तिलक्षणगुणो यदि पश्वर्थप्रयोगस्तदा स्वर्गार्थतया गुणफलविध्यन्तरवादस्य का गतिः। यदि स्वर्गार्थप्रयोगो यदि वा पश्वर्थप्रयोगः उभयथापि साधनतारतम्यमवर्जनीयम्। उदाहृता [1]'**चतुर्होत्रा पौर्णमास्यां हवींष्यासन्नान्यभिमृशेत् प्रजाकामः पञ्चहोत्रामावास्यायां स्वर्गकाम**' इति श्रुतिर्ह्यापस्तम्बेन।

एतेन [2]'**यो वृष्टिकामो योऽन्नाद्यकामः यः स्वर्गकामः स सौभरेण स्तुवीते**'ति विध्युपस्थापितवृष्टिकामादेरिव [3]'**हीषिति वृष्टिकामाय निधनं कुर्यात्, ऊर्गित्यन्नाद्यकामाय ऊ इति स्वर्गकामाये**'ति परामर्शेन तत्तत्प्रयोग एव हीषादिनिधनविधिवदिहापि स्वर्गार्थतया विहितदर्शपूर्णमासयोरेवावृत्तिलक्षणगुणविधिरिति किं न स्यादिति निरस्तम्। तत्र [4]'**यो वृष्टिकाम**' इति पूर्वोक्तानामेव वृष्ट्यादीनां बुद्धौ विपरिवृत्त्या प्रत्यभिज्ञानात् फलान्तरानवगमात्।

किञ्च हीषादीनां फलाय विधौ निधनानन्वयप्रसङ्गः। न चाश्रयतयान्वयः। हीषादीनां निधनान्वयस्याप्राप्ततया तदनुवादायोगात्। तदन्वयस्य विधौ वाक्यभेदप्रसङ्गात्। इह तु तादृशबाधकाभावेन गुणफलविधित्वमेव कामपदस्वारस्यानुरोधान्न्याय्यम्। विध्युद्देशस्थकामपदस्वारस्यानुरोधादेव हि षष्ठाद्ये कामनाविधिपरत्वम् उपादानप्रयोजककामनाविषयस्वर्गपश्वादिद्रव्यविधिपरत्वं च पूर्वपक्षीकृत्य निरस्तम्। एकादशाद्यर्चननिमित्तपरत्वम्। एवं '**श्येनचितं चिन्वीत स्वर्गकाम**' इत्यादावपि श्येनाकृतिगुणकयागजन्यस्वर्गात्तदगुणकयागजन्यस्वर्गस्यान्यूनत्वं द्रष्टव्यम्। उक्तरीत्या स्वर्गाद्यर्थप्रयोगविषये आकृतिविशेषरूपाङ्गविध्यसम्भवात्।

---

1. आप.श्रौ.सू - 4.8.7
2. ताण्ड्य.ब्रा – 8.8.18
3. ताण्ड्य.ब्रा – 8.8.19
4. ताण्ड्य.ब्रा – 8.8.17

किञ्च अनारभ्याधीतं स्थलरूपमग्निं प्रकृत्य सुपर्णाद्याकृतिविशेषा विधीयन्ते। तदानीं चानुयागीयस्वर्गकामप्रयोगोपस्थितिः। ततः परमेव '**अथातोऽग्निमग्निष्टोमेनानुयजन्ति, तमुवथ्येन तं द्विरात्रेणे**'त्यादिवाक्येन यागसम्बन्धकरणात्।

एतेन पश्वादिफलान्तरार्थप्रयोगे गुणविधिशङ्कापि निरस्ता। प्रयोगानुपस्थितेः। तथापि तादृशप्रयोगविषयस्यैव [1]'**यः स्वर्गकामः स सौभरेण स्तुवीते**'ति लघुभूतसौभरगुणस्य गुरुभूताग्न्याश्रितश्येनाद्याकृतिगुणापेक्षया न्यूनफलतावश्यम्भावाच्च। तस्मात्साधनतारतम्यात् [2]फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलविशेषः स्यादित्यर्थवादाधिकरणोक्तन्यायेन स्वर्गतारतम्यसिद्धिः।

नन्वेवं गुरुलघुविकल्पासम्भवेन फलतारतम्ये ब्रह्मज्ञानावृत्तेराप्रयाणमनुवर्तनीयतया प्रयाणकालस्याव्यवस्थिततत्वात् तत्तारतम्येन फलतारतम्यं स्यात्। न स्यात्, तत्र शास्त्रीयस्य साधनतारतम्यस्याभावात्। न हि साधनतारतम्यं तत्त्वादेव फलतारतम्यापादकम्। किन्तु भूयश्रमसाध्ये प्रवृत्तिप्रतिबन्धात्। न हि दैववशसम्पन्नसाधनलाघवं तादृशगुरुसाधने प्रवृत्तिं प्रतिरोद्धुं क्षमते।

किञ्च दर्शनसमानाकारज्ञानं हि साधनम्। तन्निष्पत्तिश्च सत्त्वशुद्धिविलम्बाविलम्बानुरोधेनी। तौ च विलम्बाविलम्बौ रजस्तमोबाहुल्यवैरत्यनिबन्धनैः। अतो न साधनतारतम्यम्। यदि च दर्शनसमानाकारज्ञानोत्पत्त्यनन्तरमपि प्रारब्धानुसाराद्विलम्बः, न ततोऽपि साधनतारतम्यसिद्धिः। प्रतिबन्धकासमानकालीनध्यानस्यैव हेतुत्वात्। तच्च सर्वत्र तुल्यमेव।

न चोपास्यगुणभूयस्त्वाल्पत्वाभ्यां गुरुलघुभावः शङ्कनीयः। यत्नगौरवं हि श्रमाधिक्यमापादयत् फलाधिक्याभावे तत्सहनानुपपत्तेः फलाधिक्यमापादयति। इह तु तादात्विकब्रह्मानुभवसुखातिरेकादेव श्रमाधिक्यसहनान्न फलतारतम्यापत्तिः। तथा च तादृशसुखे यस्योत्कटो रागः स तदर्थमधिकश्रमं सोढ्वा अधिकगुणविद्यासु प्रवर्तते। यस्त्वधिकश्रमभीरुः स तादृशाधिकसुखमप्यनादृत्य अल्पयत्नसाध्याल्पगुणविद्यासु प्रवर्तते। एतत्प्रवृत्तिवैचित्र्यञ्चोपासनोपक्रमकालीनभक्तितारत-म्यनिबन्धनमिति अनुसन्धेयम्।

एवमुक्तन्यायोपेतात् [3]'**तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते**' इत्यादिवाक्यात्कर्मफलानित्यत्वनिर्धारणसिद्धिः। एवं न्यायैरेव कर्मभेदः फलसम्बन्धः साधनतारतम्यम् तेन फलतारतम्यञ्च कर्मविचारदशायामेवावगम्यत इति तदर्थं किमर्था कर्मानुष्ठानापेक्षा।

---

1. ताण्ड्य.ब्रा – 8.8.18
2. मी.सू – 1.2.17
3. छा.उ – 8.1.6

एतेन ब्राह्मणपदेन [1]मीमांसितानुष्ठितकर्मैवोच्यत इति निरस्तम्। मीमांसामात्रेणैवानित्यत्वप्रतीत्युपपादनात्।

किञ्च कर्मतत्फलविचारात् प्राक् कर्मफलानित्यत्वविचाराप्रवृत्तेः चित्तशुद्धिसापेक्षत्वप्रयोजकं वैलक्षण्यं किमपि न पश्यामः। नापि कर्मप्रतिपादकवाक्यार्थज्ञानात्, कर्मफलानित्यत्वप्रतिपादकवाक्यार्थज्ञानेन हि देहात्मभ्रमादिदार्ढ्येन तद्विवेकादिज्ञानस्येव कर्मफलस्यानित्यत्वमेव नियमेन पश्यतो यागादिफलनित्यत्वे विचिकित्सावतस्तदनित्यत्वग्रहचित्तशुद्ध्यपेक्षानुष्ठितकर्मणामपि '**तद्यथेहे**'त्यादिवाक्ये आवृत्तिविधानादिन्यायसहकाराभावे 'नहिनिन्दा'न्यायेन ब्रह्मज्ञानार्थवादताप्रतीतिः सामान्यविषयतया चातुर्मास्यफलस्वर्गान्यविषयताप्रतीतिश्च न निवारयितुं शक्या। चित्तशुद्धेस्तन्निवारकत्वे न्यायापेक्षापि न स्यात्। न्यायस्फूरणे एव चित्तशुद्धेरुपयोग इति चेत्, कर्मविचारेऽपि तदपेक्षाप्रसङ्गात्। सूक्ष्मन्यायस्य तदपेक्षत्वे कर्मविचार एव तदपेक्षा स्यात्। तन्न्यायानामेव सूक्ष्मत्वात्। फलानित्यत्वव्याप्तिस्तु लोकै सर्वैरपि स्पष्टमेवावगम्यते। श्रुतिवशादेव हि नित्यत्वशङ्का। सा च वेदान्तन्यायेषु वाक्यनिबन्धनपूर्वपक्षशङ्कावत् न अशुद्धिसापेक्षा। तत्राप्यशुध्यपेक्षाङ्गीकारे विचारस्य कर्मानुष्ठानापेक्षा भज्येत।

किञ्च कर्मफलानित्यताज्ञानस्य चित्तशुद्धिसापेक्षत्वे कर्मानुष्ठानानन्तर्यमेवाथशब्दार्थो युक्तः। अन्यथा ध्यानानन्तर्यस्यैव अथशब्दार्थत्वेन विचारादेः शुद्धिपर्यन्तस्य द्वारत्वकल्पनाप्रसङ्गात्। व्यवधानं तु कर्मविचारस्याव्यविशिष्टम्। ततोऽस्य सन्निकर्षे इतोऽपि कर्मानुष्ठानं सन्निकृष्टम्। तस्मात् यदनुष्ठेयान्तरं द्वारमपेक्ष्यैव हेतुः तदेव पूर्ववृत्तं वाच्यम्। अतः पूर्वविचारस्य अर्थज्ञानद्वारकाध्ययनवत् उत्तरविचारस्यानित्यताज्ञानद्वारकपूर्वविचार एव पूर्ववृत्तो वाच्यः।

किञ्च किमत्र पूर्ववृत्तज्ञापने प्रयोजनम्। अधिकारिविशेषसूचनमिति चेत्, तस्य वा किं प्रयोजनम्। यदि तज्ज्ञानं विना प्रवृत्तिर्न स्यात्, तदानीं हि तत् प्रदर्शनीयम्। अत एव हि शास्त्रपाठासमर्थो बालः शास्त्रसामान्यात् इहाप्यसामर्थ्यं बुद्ध्वा न प्रवर्तेतेति बालोऽधिकारी प्रदर्श्यते बालोऽपीति। इह त्वनित्यताबुद्धौ सत्यां पूर्ववृत्तज्ञानं विनैव प्रवर्तते। तदभावे पूर्वत्तज्ञाने सत्यपि न प्रवर्तत इति व्यर्था पूर्ववृत्तकथा।

सिद्धान्ते तु पूर्वसूत्रे विवक्षितार्थत्वाभावेन विषयप्रयोजनसम्बन्धाक्षेपस्य विवक्षितार्थत्वसमर्थनेन निराकरणवदिहापि सिद्धे व्युत्पत्त्यभावेन विषयप्रयोजनसम्बन्धाधिकारिणां चतुर्णामाक्षेपस्य सिद्धे व्युत्पत्तिसमर्थनमुखेन निराकरणं क्रियते।

**॥ इति कर्मज्ञानस्यानुष्ठानद्वारकत्वभङ्गः॥**

---

1. मीमांसितानुष्टित; मीमांसानुष्टित – पाठभेदः

## 7. अवेद्यत्वभङ्गः ॥

[1]**'तद्विज्ञानार्थं'**, [2]**'येन वेद ब्रह्मविद्यामि'**त्यवेद्यत्वं ब्रह्मणो निराचकार। तथाहि - दृश्यत्वे मिथ्यात्वप्रसङ्गः अद्वैतविद्याविजये निराकरिष्यते।

यच्च दृश्यत्वे जडत्वप्रसञ्जनं स्वप्रकाशस्य प्रदीपवत् प्रकाशान्तरनिरपेक्षत्वादिति। तन्न। एकस्मिन्नपि प्रमाणसंस्तवदर्शनात्। प्रदीपस्य ज्ञानजनकस्य प्रदीपान्तरनैरपेक्ष्यं युक्तम्, स्वेनैव प्रकाशोपपत्तेः। तन्न्यायस्य कथमिहानिष्टता। न हि वयं स्वप्रकाशेन व्यवहारे जनयितव्ये प्रकाशान्तरसापेक्षत्वं ब्रूमः। किन्तु नैरपेक्ष्यमेव।

किञ्च ब्रह्मणः शब्दापरोक्षविषयतापि न स्यात्। वृत्तिविषयत्वमिष्यत एवेति चेत्, अवेद्यत्वावाच्यत्वसाधकतयाभिमतया [3]**'अप्राप्य मनसा सह'** इतिश्रुत्या मनोवृत्तिनिषेधात् कथं वृत्तिविषयताभ्युपगमः।

किञ्च किं सा वृत्तिः ज्ञानमुत न। आद्ये वेद्यत्वसिद्धिः। द्वितीये 'जानामी'त्यनुभवविषयत्वं वृत्तेः कथम्, आत्मचैतन्यस्य विषयत्वासिद्धेः वृत्तिरेव विषय इति ह्यर्थः। ततश्च वृत्तेरज्ञानत्वे 'जानामी'त्यनुभवविषयतोक्तिविरोधः। वृत्तिशबलं चैतन्यं हि ज्ञानम्। अतो न विरोध इति चेत्, ज्ञानत्वस्य व्यासज्यवृत्तित्वविवक्षायां विरोध एव। उभयोरपि प्रत्येकं परिसमाप्य ज्ञानत्वं वर्तत इति विवक्षायां वृत्तिविषयस्य ब्रह्मणो वेद्यत्वमनिवार्यम्। ज्ञानादिपदानामक्षादिपदवन्नानार्थत्वप्रसङ्गो वा । वृत्त्युपहितं चैतन्यं ज्ञानमिति पक्षेऽप्युपाधेरज्ञानत्वात् 'जानामी'त्यनुभवविषयतोक्तिविरोधः।

ननु विषयत्वेन भासमानायां वृत्तौ चैतन्याभेदाध्यासात् वृत्तौ ज्ञानत्वप्रतीतिरप्युपपद्यते। न च वृत्तिचैतन्ययोरभेदेन प्रतीतौ चैतन्येऽपि विषयताप्रतीतिरनिवार्येति वाच्यम्। विषयत्वं वृत्तिगतं भासते, चैतन्यं तदभेदेन भासत इति तत्प्रयुक्तविषयताप्रतीतिः न हि [4]चैतन्ये विषयतां साधयतीति चेत्, किं तत्र ज्ञानत्वेन भासमानाभेदाध्यासात् वृत्तौ ज्ञानत्वप्रतीतिरुच्यते, उत स्वरूपेण भासमानाभेदाध्यासात्। नाद्यः, असिद्धेः। द्वितीये गमनेऽपि 'जानामी'तिप्रतीतिप्रसङ्गः। वृत्त्युपहिताज्ञानमित्येतच्च सत्यज्ञानादिश्रुतिर्निराचष्टे।

---

1. मुण्डक – 1.2.12
2. मुण्डक – 1.2.13
3. तै.उ – 2.4.2.9
4. चैतन्यविषयताम् - पाठभेदः

किञ्च [1]'**तदात्मानमेवावेत्**', [2]'**ब्रह्मवित्**', [3]'**ब्रह्म वेदे**'त्यादीनां का गतिः। का गतिस्तर्हि तन्निषेधानाम् – [4]'**यत्तदद्रेश्यमग्राह्यम्**'

[5]'**यस्यामतं तस्य मतं मतं यस्य न वेद सः।**
**अविज्ञातं विजानतां विज्ञातमविजानताम्॥**

[6]'**विज्ञातारमरे केन विजानीयात्**', '**येनेदं सर्वविजानाति तं केन विजानीयात्**'[7], '**अगृह्यो न हि गृह्यत**' इत्यादीनाम्? [8]'**तदात्मानमेवावेत्**', [9]'**ब्रह्म वेदे**'त्यादिवेद्यत्वश्रुत्यनुरोध एवेति ब्रूमः। वेद्यत्वश्रुतीनां वृत्तिपरत्वे लक्षणानिषेधेन ज्ञानविशेषनिषेधपरत्वे सङ्कोचः। विशेषाकारलक्षणायामपि धर्मपरित्यागात्सङ्कोच एव ज्यायान्। अन्तरङ्गलक्षणात्वात् भूयस्त्वाच्च वेद्यत्वश्रुतयः एव बलवत्यः। न हि बह्वीनां लक्षणा न्याय्या।

किञ्च [10]'यत्तदद्रेश्यमि'त्यत्रैव 'यद्भूतयोनिं परिपश्यन्ति धीरा' इति श्रूयते। तत्रैकस्यैव दृशिधातोरेकत्र ज्ञानपरत्वमितरत्र वृत्तिपरत्वमिति वैरूप्यमनुपपन्नम्। दयावती भगवती श्रुतिरेव धीरा इति पदेन निषेधस्याधीरविषयत्वं वदन्ती बोद्धृणां वैयाकुलीन्निराचकार। धीरशब्देन धीमतामग्रेसरत्वप्रतीतेः। उणादौ दशपाद्यां [11]'**सुसूधागृधिभ्यः क्रन्**' इति सूत्रेण क्रन्प्रत्ययः। तद्वृत्तौ च '**दधात्यादिचित्तमिति धीर**' इति व्युत्पादितम्।

[12]'**यस्यामतमि**'त्यत्र '**तस्य मतमि**'ति ब्रह्मणो मतत्वमुच्यते। किञ्च यस्य ब्रह्मामतमिति मतम्, तस्य मतमेव मतम्। तदेव मतं तदेव समीचीनं मतम्। यस्य ब्रह्म मतमिति मतम्, स न ब्रह्म वेदेति हि परेषां योजना। तत्र 'नैयायिकस्य वायुरप्रत्यक्ष' इत्यत्र षष्ठ्यामतद्द्वारकसम्बन्धस्येव '**यस्यामतम्**', '**मतं यस्ये**'त्यत्रापि षष्ठ्यामतद्द्वारकसम्बन्धलाभात् मतमिति पदाध्याहाराभावेऽपि 'तस्य मतमि'त्यत्र समीचीन्यपरमतपदान्तरमध्याहर्तव्यम्।

---

1. बृ.उ – 3.4.10
2. मुण्डक – 1.1.4
3. मुण्डक – 3.2.9
4. मुण्डक – 1.1.6
5. केन.उ – 2.3
6. बृ.उ – 4.4.14, 6.5.15
7. बृ.उ – 5.9.26; 6.2.4; 6.4.22; 6.5.15
8. बृ.उ – 3.4.10
9. मुण्डक – 3.2.9
10. मुण्डक – 1.1.6
11. उणादि.सू – 7.40
12. केन.उ – 2.3

किञ्च **'यस्यामतम्'**, **'मतं यस्ये'**त्यत्रामतपदस्य मतपदस्य च ब्रह्मपरत्वात् सन्दंशन्यायेन मध्यस्थमतपदस्यापि ब्रह्मपरत्वमेव युक्तम्।

अपि चोत्तरवाक्ये ब्रह्मणि अधिकारिविशेषवेदनविषयत्वस्य निषेधात् पूर्वत्राप्यधिकारिविशेषनिर्देशात् तदधिकारिवेदनविषयत्वविधिरेव स्वरसतः अवगम्यते।

ननु **'यस्यामतम्'**, **'मतं यस्ये'**त्युभयत्रापि व्याघात इत्याशंक्य विवृणोति – **'अविज्ञातमि'**ति। विशब्देन कात्स्न्र्यलक्षणसामीचीन्यरूपो विशेषो विवक्षितः। 'ब्रह्म सम्यक् जानामी'ति मन्यमानानां ब्रह्माविज्ञातम् - याथार्थ्येन ज्ञातं न भवति। 'ब्रह्म सम्यक् न जानामी'ति मन्यमानानां ब्रह्म सम्यक् ज्ञातम् - याथार्थ्येन ज्ञातमित्यर्थः।

एवं [1]**'यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे'**तिश्रुत्यनुसारात्तु परिच्छिन्नतया ज्ञानमेव निषिध्यते। प्रकरणबलात् तत्र परिच्छेदनिषेध एव हि स्वरसतः प्रतीयते। [2]आनन्दस्य मीमांसा भवतीत्युपक्रम्य शतगुणितोत्तरक्रमेणोत्कर्षः न्याय्यः 'यतो वाचो निवर्तन्ते' इत्यभिधानात्।

किञ्च [3]**'केनेषितम्'** इत्यादिना परमात्मनः प्रेरकत्वमभिधाय राजादिवत्स कथं नोपलभ्यत इत्याकाङ्क्षायां तस्य लौकिकप्रमाणागोचरत्वाभिप्रायेण [4]**'न तत्र चक्षुर्गच्छती'**त्याद्युक्त-वाङ्मनसयोरपि निषेधात् अप्रामाणिकत्वं मा प्रसाङ्क्षीदिति [5]**'अन्यदेव तद्विदितादथोऽविदितादधि'** इत्युक्तम्। लौकिकप्रमाणगम्यादन्यत् अलौकिकप्रमाणगम्येषु धर्मादिषु प्रमाणमिति यावत्।

एवमलौकिकप्रमाणवेद्यत्वमुक्तम्। अनन्तरं च [6]**'यद्वाचानभ्युदितमि'**त्यादिभिः [7]पञ्चभिर्मन्त्रैः [8]**'तदेव ब्रह्मत्वं विद्धी'**ति वेद्यत्वं पञ्चकृत्वोऽभ्यस्तम्। मनःप्राणचक्षुरादीनां प्रेरकत्वस्य तत्तत्कार्यसामर्थ्याधायकत्वस्य च ब्रह्मण्युपदिष्टत्वात् तावता ब्रह्म कृत्स्नशो ज्ञातमिति मन्यमानं शिष्यं प्रत्याह [9]**'यदि मन्यस'** इत्यादि। दभ्रमेव कृत्स्नमित्यर्थः। सूपसर्गेण वेदनविषयत्वं सुष्ठुवेदनायोग्यत्वं चेत्युक्तम् [10]**'सुवेदे'**ति। भ्रन्तिनिवृत्त्यर्थं ब्रह्मरूपं त्वया मीमांस्यमिति[11]

1. तै.उ – 2.4; 2.9
2. तै.उ – 2.7; तै.उ – 2.9
3. तै.उ – 2.9
4. केन. उ – 1.1
5. केन.उ – 1.3
6. के.उ – 1.3
7. केन.उ -1.4
8. केन.उ – 1.5-8
9. केन.उ – 1.4-8
10. केन.उ – 2.1
11. केन.उ – 2.1

गुरुणोक्ते मीमांसित्वा शिष्य आह [1]**'मन्ये विदितम्'** इति। विदितत्वहेतुमाह- [2]**'नाहं मन्ये सुवेदेति नो न वेदे'**ति। अस्यार्थः – 'अहं सुवेदेति मन्ये, न वेदेति च नो मन्य' इत्यर्थः। नो न वेदेत्यनन्तरमनुषक्तेन 'मन्य' इति पदेन नो शब्दस्यान्वयः। सुवेदत्व(दित्व?)भ्रमः अवेद्यत्वभ्रमश्च नास्तीत्युक्तम्। किं तर्हि, सन्देह एवेत्यत आह –**'वेद चे'**ति। उपदिष्टाकारेण ब्रह्मावधारयामि चेत्यर्थः। यद्यपि **'नो न वेदे'**ति 'वेद चे'त्येकवाक्यत्वमेव स्वरसतः प्रतीयये, मन्य इत्यप्यनुषङ्गो न कार्यः, न वेदेति नो वेदेत्यन्वयात्; तथापि शङ्करानुसारादेवमुक्तम्। पदान्तरेणापि वेद्यत्वसिद्धेः।

यथोक्तज्ञानवानेव ब्रह्मविदित्याह- [3]**'यो न स्तद्वेद तद्वेद नो न वेदेति वेद चे'**ति। यो नः - अस्माकं मध्ये। सब्रह्मचार्यपेक्षया बहुवचनम्। तत् - यथोक्तं सुष्ठुवेदनाशक्यत्वम्, वेद - स एव तत् ब्रह्म वेद, यश्च नो न वेदेति वेद च - स एव च तद्वेदेत्यनुषङ्गः। यो नस्तद्वेद इत्यत्र तच्छब्देनैवात्यन्तवेद्यत्वाभावसङ्ग्रहे शक्येऽपि तस्य पृथक् कीर्तनं ब्राह्मणपरिव्राजकन्यायेन तात्पर्यातिरेकेण प्राधान्यात्। तात्पर्यहेतुश्च सर्ववस्तुविषयकज्ञानेऽपि ब्रह्मणो विशेष्यतया ग्रहणयोग्यतयैव पूर्वत्र वेद्यत्वं बहुशोऽभ्यस्तम्। उत्तरत्रापि [4]**'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः'** इति वेदनात् परमपुरुषार्थप्राप्तिमवेदनान्महानर्थप्राप्तिञ्च वदति।

एवं दुर्विज्ञानत्वं [5]**'ब्रह्म ह देवेभ्यो विजिग्य'** इत्युत्तरखण्डे प्रतिपाद्य चतुर्थखण्डे इन्द्रस्य [6]**'ततो हैव विदाञ्चकार ब्रह्म'** इति ब्रह्मवेदनमुक्त्वा इन्द्राच्चाग्निवाय्वोः ब्रह्मवेदनमभिप्रेत्य इन्द्रवाय्वग्नीनां प्रथमं ब्रह्मवेदनादन्यदेवताभ्य उत्कर्षं तेष्वपीन्द्रस्य प्रथमं ब्रह्मवेदनादग्निवायुभ्यामपि श्रेयस्त्वमुक्तम्। एवं पूर्वोत्तरयोर्वेद्यत्वस्यैवाभिधानात् कथमत्र तन्निषेधः, **'येनेदं सर्वम्'** इत्यत्र कारणाक्षेपोऽप्यवगम्यते। ततश्च येन परमात्मना [7]**'मत्तः स्मृतिर्ज्ञानमपोहनञ्च'** इत्युक्तरीत्या सर्वं ज्ञायते, तं तस्मादृते केन विजानीयादित्यर्थः। [8]**'तस्यैष आत्मा विवृणुते तनूं स्वाम्'** इत्यर्थोऽभिप्रेतः। तस्माच्छ्रुतिरवेद्यत्वे न प्रमाणं। वेद्यत्वश्रुत्या बाधितविषयत्वादनुमानमपि तत्र न प्रमाणम्।

---

1. केन.उ – 2.1
2. केन.उ – 2.2
3. केन.उ – 2.2
4. केन.उ – 2.5
5. केन.उ – 3.1
6. केन.उ – 4.1
7. महा.भीष्म – 39.15; भ.गी – 15.15
8. क्ठ.उ – 1.2.23; मुण्डक – 3.2.3

यदेतन्नवीनोक्तम् - अनुभूतिरवेद्या अनुभूतित्वात्, व्यतिरेकेण घटवदित्यनुमानं मानम्। अवेद्यत्वञ्चेह चिदविषयत्वमभिमतम्। अतो वृत्तिविषयत्वमादाय न बाध इति, तन्न। देवदत्तयज्ञदत्तादेः परस्परव्यवहारार्थमनुमित्यादिवृत्त्यवच्छिन्नचैतन्यविषयत्वस्यावश्यकत्वात्। न हि तत्राभेदस्सम्भवति। वास्तवाभेदस्यातिप्रसञ्जकत्वात्। केवलवृत्तेर्व्यवहारहेतुत्वस्य त्वयाप्यङ्गीकारात्। ब्रह्मणोऽपि वृत्तिप्रतिबिम्बितचैतन्यविषयत्वात् बिम्बप्रतिबिम्बभावेनतयोर्भेदाल्लाघवेन भेदमात्रस्यैव विषयत्वप्रयोजकत्वात्, धर्मिसमसत्ताकभेदस्य तत्राप्रयोजकत्वात् सुखित्वदुःखित्वाज्ञत्वसर्वज्ञत्व-व्यवस्थावत्। आह च सर्वमेव जानीयामिति जिज्ञासायाः विषयित्वप्रयोजकधर्मभेदेन कल्पितभेदसत्त्वात् स्वविषयत्वमिति।

ननु स्वसमानसत्ताकचिद्विषयत्वस्याभावस्साध्य इति चेत्, (न?) तथा सति तादृशवृत्तिविषयत्वस्याप्यभावेन बाधपरिहाराय विशिष्य चिद्घटितनिर्वचनायोगात्, कारणत्वसत्यत्वानन्दत्वादीनामपि समानसत्ताकानामभावेन तेषां विधौ वेद्यत्वस्य निषेधे च हेत्वभावाच्च।

न च स्वप्रकाशत्वसिद्ध्यर्थं विशिष्य वेद्यत्वनिषेध इति वाच्यम्। स्वव्यवहारहेतुप्रकाशत्वं हि स्वप्रकाशत्वम्। न च चिद्विषयत्वं स्वव्यवहारहेतुप्रकाशत्वविरोधि। घटादेः स्वव्यवहारहेतु-प्रकाशत्वाभावस्याचित्त्वप्रयुक्तत्वात्। अतो वेद्यत्वनिषेधस्य स्वप्रकाशत्वे न कथञ्चिदप्युपयोगः

अनुभूतिर्वेद्या वस्तुत्वादिति प्रत्यनुमानञ्च, स्वविषयप्रकाशाभावे व्यवहारानुपपत्तेः। मोक्षे आनन्दप्रकाशाभावेऽपुरुषार्थत्वप्रसङ्गाच्च। तर्कसाचिव्यादस्यानुमानस्य प्राबल्यादनेन बाधश्च।

न च संविदन्तराभावात् स्वस्य स्वविषयत्वानुपपत्तेश्च अवेद्यत्वानुमानेऽप्यनुकूलतर्कोऽस्तीति वाच्यम्। स्वस्य विषयत्वे बाधकाभावात्। न च भेदप्रयोज्यसम्बन्धः कथं भेदं विनेति वाच्यम्। संयोगस्यैव तथात्वात्। स्वरूपसम्बन्धे तन्नियमाभावात्। शब्दशशब्दस्य स्वेनैव वाच्यवाचकसम्बन्धस्यावश्यकत्वात् सर्वमित्यादिपदजन्यवृत्तेः स्वविषयत्वाच्च।

यदत्राह नवीनः - तद्विषयप्रत्यक्षे तत्सन्निकर्षस्य हेतुत्वाज्जन्यप्रत्यक्षस्य स्वविषयत्वं विरुद्धम्। प्रकाशविषयत्वे जडत्वापत्तेश्च। विषयविषयिभावात्मकस्वरूपसम्बन्धस्य भेदनिष्ठत्वाच्च। अत एव जन्यज्ञानस्यापि स्वविषयत्वमयुक्तम्। सर्वं जानीयामिति जिज्ञासायाः विषयत्वविषयित्वप्रयोज-कधर्मभेदेन कल्पितभेदसत्त्वात् स्वविषयत्वम्। माऽभूद्वा स्वविषयत्वम्। तस्या विशिष्यज्ञातत्वात्। प्रमेयत्वाकारिका वृत्तिश्च न स्वविषया मानाभावात्। घटादिवृत्तिविषयकव्यवहारस्यापि तदभिव्यक्तचैतन्यादेवोपपत्तिरिति।

अत्रोच्यते - वृत्तेरपरोक्षत्वं न स्वाभाविकम्। अपि त्वपरोक्षार्थविषयत्वनिबन्धनमिति त्वयैवोक्तम्। तथा चापरोक्षतदर्थविषयवृत्तित्वावच्छेदेन तत्सन्निकर्षः कारणमिति पर्यवसितम्। तच्चापरोक्षघटाद्यर्थविषयानुमितिशाब्दवृत्त्यादिष्वतिप्रसक्तम्। 'दशमस्त्वमसि'

इत्यादिवाक्यजन्यज्ञानेष्वप्यतिप्रसक्तम्। तस्मात्तवापि न विषयमात्रस्य सन्निकर्षनियमः। तस्मात् ज्ञानातिरिक्तविषयप्रत्यक्षे तत्सन्निकर्षः कारणम्। तच्च त्वयापि वाच्यम्। अन्यथा एतत्कालवर्तिशाब्दज्ञानवांस्त्वमिति वाक्यजन्यज्ञाने व्यभिचारात्। तद्धि स्वविषयमेव तत्काले शाब्दज्ञानान्तराभावात्, अपरोक्षञ्चापरोक्षविषयत्वात्।

नन्विन्द्रियातिरिक्तमानान्तराजन्यत्वं विशेषणम्। अत एव न पूर्वोक्तातिप्रसक्तिरपीति चेत्, एवमपि गौरवमपरिहार्यम्।अस्मन्मते तु ज्ञानातिरिक्तत्वं विशेषणमिति लाघवम्।

यच्च प्रकाशविषयत्वे जडत्वापादनं तदकस्मादप्रयोजकत्वात्। विषयविषयिभावस्य भेदाधीनत्वनिर्बन्धोऽपि निर्निबन्धनः। एतत्कालवर्तिविशिष्टज्ञानवांस्त्वमिति पूर्वोक्तविषये स्वविषयकत्वस्यावश्यकत्वात्। वृत्तिरनित्या जडेत्यादिवृत्तेः स्वविषयत्वमपरिहार्यम्। स्वविषयत्वा-भावेऽन्यविषयत्वेऽपि न मानं पश्यामः। वृत्तिशब्दार्थत्वमेव ह्यन्यस्य विषयत्वे मानम्। तदिहापि तुल्यमेव। स्वविषयत्वे चायोग्यत्वादिबाधकञ्च न किञ्चिदस्ति। स्वविषयत्वाभावे च ज्ञानव्यवहारो न स्यात्। व्यवहर्तव्यप्रकाशस्य व्यवहारहेतुत्वात्।

ननु व्यवहारमात्रे प्रकाशः प्रकाशत्वेन हेतुः, न तु व्यवहर्तव्यप्रकाशत्वेन, गौरवात्। अनात्मव्यवहारे व्यवहर्तव्यप्रकाशो विशेषहेतुः। आत्मव्यवहारे आत्माभिन्नप्रकाशः। यत्सामान्ये यत्समान्यस्य हेतुत्वं तद्विशेषे तद्विशेषस्य हेतुत्वमिति चेत, किमनात्मगोचरप्रकाशत्वेन अनात्मगोचरव्यवहारत्वेन हेतुहेतुमद्भावोऽभिमतः, उतानात्मगोचरतद्विषयकप्रकाशत्वेन अनात्मगोचरतद्विषयकव्यवहारत्वेन हेतुहेतुमद्भावः।

नाद्यः, तथा कल्पनस्यानपेक्षितत्वात्। अन्यथा अघटप्रकाशत्वादिनापि कल्पनापत्तेः। न द्वितीयः, अनात्मविशेषणप्रवेशे गौरवात्। अस्तु वा अनात्मगोचरप्रकाशत्वेनानात्मगोचरव्यवहारत्वेन कार्यकारणभावः। अनात्मगोचरतद्विषयकप्रकाशत्वेन अनात्मगोचरतद्विषयकव्यवहारत्वेन कार्यकारणभावश्च। तथापि त्वदृक्तन्यायेनैव तद्विषयप्रकाशस्य तद्विषयव्यवहारे कारणत्वं तथापि सिध्यत् केन वार्यते।

नन्ववच्छेदकानुप्रवेशो माऽभूत्। तथाप्यतिप्रसङ्गवारणार्थमनात्मसु प्रकाशव्यवहारयोः समानविषयत्वेन कार्यकारणभावो वाच्यः। आत्मनि तु लाघवात् तदभिन्नप्रकाशत्वेन सामान्यसामग्र्यैव वा तद्व्यवहार इति चेन्न। घटादिप्रकाशव्यवहारयोः कार्यकारणभावकल्पनादशायां गौरवेणात्मत्वस्याननुप्रवेशेन समानविषयत्वेन कार्यकारणभावकल्पनायामात्मप्रकाशव्यवहारयोरप्यनु-प्रवेशात्। अन्यथा तत्प्रत्यक्षे तत्सन्निकर्षस्य हेतुतया ज्ञाने सन्निकर्षाभावात् प्रत्यक्षमनुपपन्नमित्युक्तं विरुध्यते।

किञ्चात्मव्यवहारे व्यवहर्तव्याभिन्नप्रकाशो हेतुः, अन्यत्र तद्विषयप्रकाश इत्युक्तिश्च परकीयन्यायकुलिशदर्शनसन्धुक्षितभीत्याहितस्वमतविस्मरणनिबन्धना। घटादेरपि न चैतन्यविषयता,

किन्त्वाध्यासिकतदभेद एव, प्रवृत्तेः परं घटादिर्विषय इति हि तव मतम्। ततश्च वृत्तिविषयत्वं चैतन्याविषयत्वञ्च सर्वत्राविशिष्टमिति इष्टमिति कथं व्यवस्थया वेद्यत्वविधिनिषेधौ। न चाध्यासिकाभेद एव विषयत्वमिति शक्यं वक्तुम्, वृत्तेः घटविषयत्वाभावप्रसङ्गात्। विषयपदस्य नानार्थत्वाङ्गीकारश्चानुपपन्नः, मानाभावात्।

ननु वृत्तौ सविषयत्वव्यवहारः सविषयकज्ञानावच्छेदकत्वादिति चेन्न। ब्रह्मणि वृत्तिविषयत्वव्यवहारविरोधात्, इदमाकारवृत्तेः रजतविषयत्वप्रसङ्गाच्च।

किञ्च व्यवहारे हि पदज्ञानं तदर्थज्ञानं च कारणम्। तयोश्च द्वयोरपि कारणत्वार्थं पदज्ञानत्वेन तदर्थगोचरज्ञानत्वेन च कारणत्वं कल्प्यम्। अत उभयानुगतकारणतावच्छेदकस्यान-पेक्षितत्वान्न प्रकाशत्वेन कारणता। तथा सति दण्डचक्रादेर्द्रव्यत्वेनापि कारणतापत्तेः।

किञ्च सामान्यकारणतायामेव समानविषयत्वेन विशेषणादतिप्रसङ्गपरिहारादात्मानात्मव्यवहारयोः तदभिन्नप्रकाशत्वतद्विषयप्रकाशत्वाभ्यां विशेषकारणत्वकल्पनं गौरवपराहतम्।

किञ्च प्रत्यक्षत्वेन सन्निकर्षत्वेन कार्यकारणभावस्सामान्यतो लाघवात्, ज्ञानान्यप्रत्यक्षे तत्सन्निकर्षः, ज्ञाने तु सामान्यसामग्र्यैव प्रत्यक्षमिति सम्भवात् ज्ञानस्य स्वविषयत्वमविरुद्धम्। तथा चात्मव्यवहारेऽप्यात्मगोचरप्रकाशो हेतुरस्तु।

किञ्च त्वया अपरोक्षस्थले तादात्म्यस्यैव व्यवहारप्रयोजकत्वेनाङ्गीकारात् तत्र भेदविलक्षणं भिन्नत्वे सत्यभिन्नसत्ताकत्वलक्षणतादात्म्यं व्यवहारहेतुः। आत्मन्यभेदः परोक्षे तद्गोचरत्व-मित्यतिगौरवम्।

यच्च संविदन्तराभावादिति, तदप्यनुपपन्नम्। तथाहि किं संविदमनपेक्ष्य सर्वव्यवहारसिद्धेः संविदन्तराभावः, उत संविदन्तरे मानाभावात्, उत ब्रह्मचैतन्येनैव सर्वव्यवहारसिद्धेः। नाद्यः, सर्वेषां सर्वदा सर्वव्यवहारस्य वा प्रसङ्गात्। न द्वितीयः, तदुक्त्यसम्भवादेव। सर्वस्य वस्तुनोऽपि संविदधीनसिद्धित्वमभ्युपगम्यैव हि मानाभावात् संविदसिद्धिरुच्यते। अतो व्याघातः। न तृतीयः, ब्रह्मणो घटादिविषयत्वस्य स्वाभाविकत्वे तस्यैव च व्यवहारहेतुत्वे सर्वेषां सर्वदा सर्वव्यवहारप्रसङ्गः। कादाचित्कत्वेऽप्येकस्य व्यवहारदशायां सर्वेषां तद्विषयव्यवहारप्रसङ्गः।

तस्मात् [1]प्रतिमात्रप्रमाणव्यापारभेदं संविद्भेदो वाच्यः। उत्पत्तिविनाशप्रतीत्या च संविदां भेदसिद्धिः। न चोत्पत्त्यादिप्रतीतिर्भेदकोपाधिविषया, घटाकाशो नष्ट इत्यादावुपाधिभूतघटना-शवदिहोपाधेये उपलभ्यमाने उपाधिनाशस्याप्रतीतेः। अन्वयव्यतिरेकाभ्यां व्यवहारहेतुतया क्लृप्तात् सविषयकतयोत्पत्तिविनाशवत्तया चोपलभ्यमानादतिरेकेण तदुपाधेयस्य कस्यचिदङ्गीकारेऽपि न सा संवित्। न चाङ्गीकृतेनापि तेन किञ्चित् प्रयोजनमन्यत्, गौरवात्।

---

1. श्रुतिमात्र; प्रतिमात्र – पाठभेदः

न चैवं संविदङ्गीकारे लाघवम्। त्वया संविद्विषयतयोत्पत्तिविनाशवत्तया चोपलभ्यमानानामप्यङ्गीकारात्। तदतिरिक्तस्यापि तदुपधेयतया कल्पने गौरवात्।

ननु प्रकाशस्य व्यवहारकारणत्वात् ब्रह्मणश्च प्रकाशरूपताया श्रुतिसिद्धत्वात् अन्यस्यापि प्रकाशकल्पने गौरवमिति चेन्न। परस्सहस्रवाक्यैर्जन्यस्य चेतनधर्मस्यापि प्रकाशरूपताप्रतीतेः।

किञ्च श्रुतिर्हि व्युत्पन्नज्ञानप्रकाशादिपदस्यैव प्रकाशब्रह्मसंसर्गं बोधयति। व्युत्पत्तिश्चोत्पत्त्यादियोगिनि चेतनधर्म एव। ततश्च श्रुत्यापि यज्ज्ञानपदप्रवृत्तिनिमित्ततया सविषयत्वं गृहीतं तत्संसर्ग एव ब्रह्मणो बोध्यते, स्वप्रकाशश्रुत्या स्वविषयत्वम्।

ननु जीवब्रह्मणोरभेदश्श्रुतिसिद्धः। अतः प्रकाशात्मकब्रह्माभेदात् स्वस्यापि प्रकाशात्मतया स्वस्वरूपेणैव घटादिप्रकाशोपपत्तौ प्रकाशान्तरकल्पनमनुपपन्नमिति चेन्न, एवमपि घटादिविषयतया सम्प्रतिपन्नेनैव सर्वव्यवहारोपपत्तौ स्वरूपस्यापि घटादिप्रकाशत्वकल्पनाया गौरवपराहतत्वात्। न च संविदन्तराङ्गीकारेऽद्वैतक्षतिः। मिथ्यात्वेनोपपत्तेः। जीवेनैव सति ज्ञानाध्यासोपपत्तेः।

ननु जीवस्य ब्रह्मस्वरूपमिदानीमनवच्छिन्नं न भासते, किन्तु घटाद्यवच्छिन्नमेव - घटः सन्निति। तस्मादधिष्ठानप्रकाशसापेक्षो ज्ञानाध्यासः किञ्चिदवच्छिन्न एव। शुक्त्यवच्छिन्ने सति रजताध्यासवत्। अत्र च किञ्चित् सदवच्छेदकं न प्रतीतमिति कथमध्यासः(इति चेत्?), न। अध्यासमात्रेऽधिष्ठानज्ञानं न कारणम्। अजन्यस्याप्यविद्याध्यासस्य दर्शनात्। सादृश्याधीनाध्यास एवाधिष्ठानज्ञानस्य कारणता। अध्यासस्याधिष्ठानगोचरत्वमेव नियतं। तदिहापि सम्भवत्येव। ज्ञानावच्छिन्नस्यैव सतो भानसम्भवात्। अनवच्छिन्नाप्रकाशोऽपि स्थित एव। अत एव स्वाप्नाध्यासोपपत्तिः शङ्खपीताध्यासोपपत्तिश्च। एवं चावरणकल्पनागौरवं च न भविष्यति। स्वरूपेण प्रकाशप्रसक्त्यभावात्।

ननु वृत्तिनिर्विषयैव चैतन्यावच्छेदिका। अतो वृत्त्या व्यवहारासम्भवात् ब्रह्मचैतन्यसम्बन्धादेव व्यवहारो वाच्य इति चेन्न। उत्पत्त्यादिसामानाधिकरण्येनोपलभ्यमानविषयसम्बन्धस्यान्यनिष्ठत्वकल्पने बाधात्।

किञ्च वृत्तेनिर्विषयत्वे तद्विषयप्रत्यक्षस्य तत्सन्निकर्षजन्यत्वनियमः पूर्वोक्तो भज्येत। यदि विषयसम्बन्धिप्रकाशावच्छेदकत्वमेव वृत्तेः सविषयत्वं तदा रजताध्यासासम्भवः, तत्सन्निकर्षाभावात्। शुक्तीदमाकारवृत्त्यवच्छिन्नमेव हि चैतन्यं रजतावभासकं त्वयेष्यते। अत इदमाकारवृत्ती रजतावभासकचैतन्यावच्छेदकत्वाद्रजतविषया। अतस्तत्र सन्निकर्षाभावात् सा न स्यात्। तस्मात् स्वतः सविषयत्वमङ्गीकृत्य शुक्तीदमाकारवृत्तेरिदंविषयत्वमेव न रजतविषयतेति वाच्यम्।

ननु '**यत्साक्षादपरोक्षाद्ब्रह्मे**'ति ब्रह्मण आपरोक्ष्यश्रवणात् तत्सम्बन्धादेवार्थापरोक्ष्यं वाच्यमित्यर्थापरोक्ष्यहेतोः चैतन्यस्यैव हेतुता[1] वाच्येति (चेत्?), न। एवमपि परोक्षतद्विषयकज्ञानस्यैव

1. व्यवहारहेतुता; हेतुता – पाठभेदः

व्यवहारहेतुतया, अन्यत्रापि तथैव कल्पनस्योचितत्वात्। तथा चापरोक्षीभूतार्थविषयवृत्तिरेव व्यवहारहेतुः स्यात्। आपरोक्ष्यं च नार्थगतमिति व्यवस्थापितं प्राक्। तस्मात् सविषयत्वमापरोक्ष्यं व्यवहारहेतुत्वञ्च वृत्तेरेव। अतो वृत्तिरेव घटादिसंवित्।

ननु कथं वृत्त्यध्यासः मिथ्यार्थस्य ज्ञानव्याप्तेः। अतस्तत्र ज्ञानान्तराङ्गीकारे अनवस्थाप्रसङ्गादात्मैव वृत्तिगोचरज्ञानमिति वाच्यम्। ततश्च तस्यैव घटादिज्ञानत्वमपीति चेन्न, वृत्तेरेव स्वविषयतया स्वज्ञानत्वात्।

अथ कथमविद्याध्यासः अविद्याया ज्ञानरूपत्वासिद्धेः ज्ञानान्तराभावाच्च। अतो ब्रह्मैवाविद्याध्यास इति वाच्यम्। अतस्सर्वत्र तदेव प्रकाशकं कल्पयितुं युक्तमिति चेन्न। ब्रह्मणोऽविद्याध्यासत्वे ज्ञानाध्यासेन सहैवार्थाध्यासनिवृत्तेर्ब्रह्मणोऽपि निवृत्तिरविद्याया अनिवृत्तिर्वा स्यात्। अतोऽविद्याध्यासरूपज्ञानमविद्यैव वा तत्सम्बन्धवदनादिसिद्धमविद्यासाक्षिरूपज्ञानान्तरं वा विद्यया सह निवर्त्यमित्यास्थेयम्। मा भूद्वाविद्याध्यासः किमावयोश्छिन्नम्। **'सत्यवादिनस्तावन्न किञ्चिदपि हीयत'** इति सुप्रसिद्धम्। असत्यवादिनोऽपि किमविद्याध्यासेन। कथं तर्हि मिथ्याभूतघटादिपरिणामः। मृदादौ सति का कथन्ता, मृदादेरपि मिथ्यात्वात्। सर्वस्यापि मूलतया अविद्या एष्टव्येति चेत्, किं त्वं सर्वकार्यरूपेण परिणामान्तरं पश्यसि। भावकार्यत्वात् कार्यस्य मिथ्यात्वाच्च मिथ्याभूतां तां पश्यामीति चेत्, कथं तर्हि रजतोपादानं विना रजतोत्पत्तिं पश्यसि। तस्माद्भावकार्यमपि किञ्चिन्न परिणाम्युपादानकमिति स्वीकुरु। न किञ्चिदपि हीयते, अद्वैतस्याहानेः। न च दोषाभावादनध्यासः भेदवासनायास्सत्त्वात्।

ननु कोऽयमध्यासो घटादेरिति चेत्, दृष्टसृष्टिरिति रहस्यमित्यसदस्यं ब्रुवतः किं नामानुपपन्नम्। अज्ञातमपि मिथ्यावस्तु[1] वर्तत इति वदतो वा प्रातिभासिकस्यैव ज्ञानसापेक्षत्वम्, न व्यावहारिकस्येति सम्भवात्। आध्यासिकस्य ज्ञानव्याप्त्यङ्गीकारेऽपि वस्तुजातं स्व-स्वाधिष्ठानयोः प्रकाशकमित्यस्तु। इतो वरमेकप्रकाशेनैवाध्यासाङ्गीकार इति चेन्न। पूर्वोक्तरीत्या ब्रह्मणोऽपि निवृत्तेरध्यस्तस्यानिवृत्तेर्वा प्रसङ्गस्य दुर्वारत्वात्।

न चावेद्यत्वश्रुतिमहिम्नैव वृत्तेर्जडत्वकल्पनम्, वेद्यत्वश्रुतिमहिम्ना अजडत्वस्यैव कल्पनीयत्वात्। न हि **'नातिरात्रे षोडशिनं गृह्णाति'** इति निषेधबलात् **'अतिरात्रे षोडशिनं गृह्णाती'**ति वाक्यं षोडशिग्रहणातिरिक्तं किञ्चिद्विधातुं समर्थम्। अतस्तत्र विधिनिषेधयोः षोडशिग्रहणपदस्य समानार्थत्वे स्थित एव यथा व्यवस्था तथात्रापि युक्ता। युक्ता च सा।

ननु नित्या तावदेका संविदवश्याभ्युपगन्तव्या, तथैव निखिलज्ञानकार्योपपत्तेः। न वृत्तिरपि संवित्, गौरवात्। तथाहि - अस्ति तावत् घटादिज्ञानधारानुसन्धान'मेतावन्तं कालं घटमद्राक्षम्',

1. मिथ्याभूतवस्तु – पाठभेदः

'इन्दिरारमणमध्यासिषमि'ति। तच्च तत्तज्ज्ञानानां तत्तत्कालीनात्मनश्च पूर्वानुभवाभावे न सङ्गच्छते। न च मध्येऽनुव्यवसायस्सम्भवति, विच्छेदे ध्यानत्वाद्यनुपपत्तेः, जिज्ञासितश्रीवेङ्कटाचलेशलीलाकमनीयविग्रहदर्शनधारानुसन्धानानुपपत्तेः तत्र बुभुत्साघटितभगवद्विग्रहदर्शनसामग्र्याः प्रबलत्वात्। तत्रानुव्यवसायाभ्युपगमे तत्सामग्रीप्राबल्यापत्त्या बाह्यज्ञानोच्छेदात् ज्ञानधारानुपरमप्रसङ्गात्। बाह्यज्ञानसामग्रीप्राबल्यात् तदुपरमेऽनुव्यवसायमात्रविलोपप्रसङ्गात्।

किञ्च नैरन्तर्येण द्वादश नामानि शृण्वतो 'द्वादश नामान्यश्रौषम्' इत्यनुसन्धानानुपपत्तिः मध्येऽनुव्यवसायश्चेत् कल्प्यते। तत्सामग्रीकालोत्पत्तिर्न (कालोत्पत्तौ च?), नाम्नो अनुभवाभावेन द्वादशत्वप्रतिसन्धानायोगः, न चेदनुसन्धानस्यैवायोगः।

किञ्च सुखजनकेष्टज्ञानस्यानुसन्धानानुपपत्तिः, इष्टज्ञानस्य चरमकारणत्वेनानन्तरं सुखोत्पत्तेः। सुखात् प्रागनुव्यवसायकल्पने तत एवेष्टज्ञानविनाशात् सुखानुपपत्तेः। सुखानन्तरमनुव्यवसायश्च सुखस्यावश्यवेद्यत्वान्न सम्भवति। सुखज्ञानयोः समूहालम्बनसम्भवेऽपि पौर्वापर्याग्रहात् कार्यकारणभावग्रहासम्भवः।

ननु ज्ञानस्य स्वप्रकाशत्वात् सर्वमुपपद्यत इति चेन्न। 'जानामी'ति प्रतीयमानस्य घटवद्विषयत्वावश्यम्भावात् स्वप्रकाशत्वानुपपत्तेः। चिदविषयत्वस्य स्वप्रकाशत्वरूपत्वात्।

किञ्चैकविषयज्ञानधारानन्तर'मेतावन्तं कालं नेतः परमद्राक्षमि'तीतरज्ञानाभावानुसन्धानं

[1]अनित्यज्ञानं विना सर्वथानुपपन्नम्। न चेयं न स्मृतिः, किन्त्वनुमितिरिति वाच्यम्। एकज्ञानस्य तदितरज्ञानाभावेन व्याप्त्यभावात्। तदज्ञानेऽपीतरज्ञानाभावज्ञानात् न चान्यल्लिङ्गमस्ति।

एवं स्वप्नसाक्षितयापि नित्यसंवित्सिद्धिः। न च स्वाप्नगजादिज्ञानं स्मृतिः, प्रत्यक्षत्वानुभवात्। नापि जन्यप्रत्यक्षम्, चक्षुराद्युपरमात्। न मानसम्, मनसो बहिरस्वातन्त्र्यात्। न च स्मर्यमाणगजादेस्स्मर्यमाणदेश आरोपः। तथात्वेऽन्धस्य स्मर्यमाणपुरोदेशे स्मर्यमाणरूपारोपस्येव सत्तानिश्चयरूपत्वस्यापरोक्षत्वस्य चानुपपत्तेः। अस्मन्मते त्वनावृतसाक्ष्यध्यासात् सर्वमुपपद्यत इति।

एव'महमस्वाप्समि'त्यादिसौषुप्तिकात्मादिपरामर्शादपि नित्यानुभवसिद्धिः। परामर्शहेत्वनुभवस्य सुषुप्तान्वन्यस्यासम्भवात्।

यत्तु अयं न सौषुप्तिकाज्ञानपरामर्शः, किन्त्वज्ञानानुमानमिति। तत्र न तावदहं ज्ञानाभाववानवस्थाविशेषवत्त्वादित्यनुमानम्। अहमर्थमात्रपक्षीकारे जाग्रति तस्मिन् ज्ञानसत्त्वे अंशतो बाधात्। सुषुप्तिकालीनाहमर्थस्य पक्षत्वे सुषुप्तेः निखिलज्ञानाभावरूपायाः पूर्वमसिद्धत्वात्। साध्यञ्च यत्किञ्चिज्ज्ञानाभावश्चेत्तदा 'न किञ्चिदवेदिषमि'त्यनुभवासम्भवः। निखिलज्ञानाभावश्चेत्

---

1. नित्यज्ञानम् - पाठभेदः

व्याप्तिग्रहायोगः। हेतुश्च यदि सुषुप्तिस्तदा साध्याविशेषः, निखिलज्ञानाभावरूपत्वात् सुषुप्तेः।

ननु जाग्रत्स्वप्नातिरिक्तकालत्वं तत् (इति चेत्?), तन्न, निखिलज्ञानाभावज्ञानात् प्राक् तदतिरिक्तत्वस्य दुर्विज्ञानत्वात्।

एतेन सामग्र्यभावेन ज्ञानाभावोऽनुमीयत इति प्रत्युक्तम्। तत्रापि पक्षस्य दुर्निरूपत्वात्, सामग्र्यभावस्यापि कार्याभावोन्नेयत्वात्। इन्द्रियप्रसादेन तदुपरमानुमानात् (न?), सामग्र्यभावसिद्धिः। बाह्येन्द्रियोपरमेऽपि स्वप्ने विषयज्ञानतत्सामग्र्योः सत्त्वात्, शोभनस्वप्नादपि मनःप्रसादस्यान्यथासिद्धेश्च। नापि तत्तुल्ययोगक्षेमात्मादौ स्मर्यमाणे सति अस्मर्यमाणत्वं ज्ञानाभावे लिङ्गम्, विशेषणासिद्धेः। आत्मनि ज्ञानस्य स्मर्यमाणत्वाद्विशेष्यासिद्धिश्च (द्धेश्च?)। नापि सुषुप्तिकाले अस्मर्यमाणत्वं विवक्षितम्। निखिलज्ञानाभावात्मकसुषुप्तेः प्रागज्ञानात् पथि स्पृष्टतृणादौ व्यभिचाराच्चेति।

अत्रोच्यते - धाराज्ञानं तावदुत्पत्त्याद्यवस्थायोगिन एव ज्ञानत्वानुभवविषयस्य स्वप्रकाशत्वादेवोपपद्यते। तेनैव तत्कालीनात्मग्रहोऽपि, ज्ञानसामग्रीमात्रस्य ज्ञानात्मनोः ग्रहणसामग्रीत्वात्, प्रत्यक्षसामग्रीमात्रस्य कालग्रहणहेतुत्वाच्च।

'जानामी'ति प्रतीयमानस्य विषयत्वावश्यम्भाव इति। तत्र किं विशेषणेऽपि तात्पर्यम्, विशेष्य एव। नाद्यः, **प्रयोजनाभावात्।** प्रतीयमानत्वस्यैव विषयताव्याप्त्या विशेषणवैयर्थ्यात्। नहि विशेष्यं विषयतां व्यभिचरति। अप्रयोजकत्वं विशिष्टेऽपि तुल्यम्। न द्वितीयः, स्वप्रकाशस्य ब्रह्मणो विषयत्वप्रसङ्गात्। प्रतीयमानत्वं ब्रह्मणो नास्तीत्येवेति चेत्, तत् किं प्रतीयमानं प्रतीत्याहितव्यवहारभाक्त्वम् उत प्रतीतिविषयत्वमेव। आद्ये ब्रह्मणि तदस्त्येव। द्वितीये साध्याविशेषः। अत एव 'द्वादश नामान्यश्रौषमि'ति प्रतिसन्धानमपि निर्व्यूढम्। इष्टज्ञानसुखयोरपि कार्यकारणभावग्रहणमत एवोपपन्नम्। मन्मते सुखस्यापि ज्ञानविशेषत्वेन स्वप्रकाशत्वात्।

वस्तुतस्तु इष्टज्ञानमेव सुखम्। तदन्यकल्पने गौरवात्। अनुव्यवसायवादिनामपि न दोषः। न च धाराध्यानयोर्विच्छेदः, विजातीयप्रत्ययव्यवधानादिति वाच्यम्। सजातीयानधिकरणकालाव्यवधानादेव तदुपपत्तेः। तत्र चाद्यज्ञाने ज्ञानत्वनिर्विकल्पकम्, ततस्तदनुव्यवसायः, ततो द्वितीयज्ञानं, तस्मादेवानुव्यवसायात् विशेषणज्ञानात्मकात् द्वितीयज्ञानानुव्यवसायः, ततस्तृतीयज्ञानमिति क्रमेण ज्ञानधारासम्भवः। क्वचिच्चाभिन्नविषयकज्ञानानुव्यवसायानन्तरोत्पन्नघटादिज्ञाने जाते आद्यज्ञानप्रभृत्येव ज्ञानधारोपपद्यते।

न च जिज्ञासितश्रीवेङ्कटाचलेशविग्रहानुभवसामग्रीप्राबल्यादनुव्यवसायसम्भवः। तत्संभवे वा तत्प्राबल्यात् ज्ञानज्ञानधारानुपरमः बाह्यानुभवासम्भवश्चेति वाच्यम्। जिज्ञासायास्तत्तद्घटितबाह्यसामग्र्याः तदघटितबाह्यसामग्रीतो बलवत्त्वापादकत्वेऽपि ततोऽपि स्वविषयीभूतज्ञानानुव्यवसायसामग्रीबलवत्त्वापादकत्वात्। महद्रमणीयबुभुत्सितात् भूतभयानकादिविषयानुभवस्मरणस्यानन्तरं

दर्शनेन विषयरामणीयकादिके सति ज्ञानानुभवसामग्रीप्राबल्यस्य कल्पनात्। 'द्वादश नामान्यश्रौषम्' इत्यत्रापि नानुव्यवसायानुपपत्तिः प्रथमवर्णोत्पत्तिलक्षणापेक्षया स्वज्ञानेच्छाकृतिकरणव्यापारादि बहुक्षणव्यवधानेनैव द्वितीयक्षणोत्पत्तेः।

एतेन प्रयत्नानिष्पाद्यकीचकसुषिरसन्ततिसन्ततवाताभिघातक्रमोत्पादितशब्दसन्तानानुभ-धारानुसन्धानं न स्यादिति प्रत्युक्तम्। तच्छब्दसन्तानगोचरस्मृत्या तदनुभवानुमितेस्तत्स्मरणोपपत्तेश्च।

न च प्रणाडीकल्पने मानाभावः, अनुसन्धानस्यैव मानत्वात्। यदि च तत्कल्पनेऽनुपपत्तिः। तदा तच्छब्दज्ञानस्य स्वप्रकाशत्वं कल्प्येत। न च संविदाख्यधर्मान्तरं, गौरवात्। इष्टज्ञानसुखयोरपि समूहालंबनसम्भवात् नानुपपत्तिः। न च पौर्वापर्याग्रहः। इष्टस्वरूपमात्रस्य सुखं प्रति व्यभिचारात्। सुखानुभवकाले इष्टज्ञानस्यैवानुभवाच्च। परिशेषादिष्टज्ञानस्यैव कारणत्वग्रहसम्भवात्।

किञ्च इन्द्रियसन्निकर्षाद्यन्वयव्यतिरेकानुविधानदर्शनात् सुखकाले प्रतीत्यनुभवाच्च प्रतीतिकारणतया क्लृप्तस्य सन्निकर्षादेस्तद्व्यवधानेन सुखप्रयोजकत्वं कल्प्यते। यथा पुत्रस्ते जात इति वाक्योच्चारणानन्तरं मुखविकासानुमितस्य सुखस्य वाक्यान्वयव्यतिरेकानुविधानदर्शनात्। अव्युत्पन्नस्य च तद्दर्शनाद्वाक्यार्थप्रतीतिद्वारा सुखप्रयोजकत्वं गृह्यते।

'किञ्च फलबलाघटादिगोचरज्ञानस्याहत्वाप्रकारकस्यापि तत्प्रकारकसंस्कारजनकत्वस्य त्वयाङ्गीकारादात्मस्वात्माविषयस्यापि ज्ञानस्य तत्संस्कारजनकत्वमस्तु। किञ्च तैलधारानुसन्धानार्थं नेयं संवित्, किन्तु संविद्धारानुसन्धानार्थम्। ततश्च सा यथा धारानोत्सादयति तथा संवित्वमपि प्रत्युत यथा धारांशं साधयति तथा संवित्त्वमपि।

ननु धारानसन्धानार्थं संविदि सिद्धायां तयैव सर्वव्यवहारोपपत्तौ बहूनां संवित्त्वकल्पने गौरवम्। अत एव ज्ञानत्वानुभवो ज्ञानाभेदाध्यासनिबन्धन इति चेन्न। अनन्तानां विषयसंबन्धानां कादाचित्कप्रकाशार्थमनन्तानामावरणानां तद्धत्वज्ञानादीनां च कल्पनापेक्षया विषयसंबन्धितया संप्रतिपन्नेषूपकल्प्यज्ञानत्वस्य कल्पने लाघवात्। बह्वीनां ज्ञानत्वप्रतीतीनामप्रामाण्यकल्पने गौरवाच्च। किञ्च उभयोरन्यतरस्मिन्नन्यतरकल्पनाप्रसङ्गे अनुभवानुरोधेन कल्पनं न्यायम्।

किञ्च क्लृप्तस्य कल्प्यसंविदनपेक्षस्वविषयव्यवहारहेतुत्वेनातिप्रसङ्गः। कल्प्यमानायाः क्लृप्तानपेक्षत्वे अतिप्रसङ्गः। तस्मात् क्लृप्तस्यैव व्यवहारहेतुत्वात् ज्ञानत्वमनिवार्यम्। यच्चोक्तमेकविषयकधारानन्तरं नेतोऽन्यत् जानामीति[1] परामर्शानुपपत्तिरिति। तत्र, प्रातर्गजाभावज्ञान-वदुपपत्तेः। तद्यथानुपलब्धं तथेहापि अथानुमिति तथेहापि। ननु साक्षिसिद्धेन गजानुभवाभावेन गजानुभवोऽनुमीयत इति चेत्, तथा ह्यननुभवमात्रस्य तृणादिष्वभावव्यभिचारादनु-भवितुं योग्य त्याननुभवोऽर्थाभाव लिङ्गम्। तथा स्मर्तुं योग्यस्य स्मरणमननुभवे लिङ्गमित्युपपत्तेः।

---

1. अद्राक्षमिति; जानामीति - पाठभेदः

किञ्च ज्ञानाभावस्य साक्षिवेद्यत्वे सौसुषुप्तिकपरामर्शाद्भावरूपज्ञानसिद्ध्युपवर्णनविरोधः। किञ्च साक्षिणोऽनित्यत्वेन संस्कारानुत्पत्तेस्त्वन्मते कथमनुसन्धानम्। न च घटाकारवृत्त्यवच्छिन्नसाक्ष्येव यथा घटतद्वृत्तितदाश्रयाहमर्थात् अतिगोचरसंस्कारमाधत्ते तथा ज्ञानाभावेऽपीति वाच्यम्। तथा सति घटवृत्तेरेवान्यज्ञानाभावगोचरसंस्कारसम्भवे साक्षिवैयर्थ्यात्।

किञ्च विषयविशेषावच्छिन्नप्रतियोगिविशिष्टतया ज्ञानाभावग्रहणे कदाप्यननुभूतद्वीपान्तर-वर्तिवस्तुनः तत्तत्प्रातिस्विकरूपावच्छिन्नज्ञानाभावानुभवस्मरणव्यवहारप्रसङ्गः सार्वज्ञापत्तिश्च। अज्ञानावच्छेदकतया इदंग्रहणवत् तत्तज्ज्ञत्वाविरोधित्वात्।विषयविशेषानवच्छिन्नज्ञानाभावग्रहणे घटधारानन्तरमपूर्ववस्तुदर्शने सति एतावन्तं कालमिममर्थं नावेदिषमिति प्रतिसन्धानानुपपत्तिः।

किञ्च यत्र चिरं घटमनुभवन्नेवान्तरान्तरा किञ्चित्तृणाद्यनुभवति तत्र तत्संस्कारविच्छेदानुदयाद्वा धारानन्तरं घटमेवान्वभूवं नान्यत्किमपीति प्रतिसन्धानं कथम्। साक्षिणोपपाद्यताम्, विषयाभावात्। तत्र चानुमानमेव शरणमिति सर्वत्रापि तथैव युक्तम्।

किञ्चायमन्यज्ञानाभावपरामर्शो न घटधाराकाले ज्ञानान्तराभावज्ञानं साधयति।

किन्तु घटव्यतिरिक्तस्य ज्ञानान्तराभावस्य ज्ञानं बाधत एवेति वैपरीत्यम्। स्वाप्नानुभवानुरोधेनापि न नित्यसंवित्सिद्धिः। स्मर्यमाणदेशे स्मर्यमाणगजादेः मनसारोपसम्भवात्। न चान्धस्य तादृशरूपज्ञानवत् सत्तानिश्चयत्वाभावप्रसङ्गः। तस्य बुद्धिपूर्वतया आहार्यत्वात्। अस्य च तथात्वात्।

वस्तुतस्तु **'सन्ध्ये सृष्टिराह हि'** इति मीमांसितश्रुत्यनुरोधात् तदा सृष्टशरीरगतेन्द्रियजन्यमेव तादृशार्थप्रत्यक्षमिति न कश्चिद्दोषः। सुप्तोत्थितपरामर्शस्तु सद्विद्याविजये समर्थयिष्यते।

ननु 'घटः स्फुरति', 'घटं जानामी'त्याश्रयभेदेन सकर्मकतयाकर्मकतया चोपलम्भात् ज्ञानातिरिक्तस्फुरणात्मकसंवित्सिद्धिरिति चेन्न। 'देवदत्तो मोदकमिच्छति', 'देवदत्ताय रोचते मोदक' इत्यत्रापीच्छारुच्योर्भेदप्रसङ्गात्, देवदत्तगताभिलाषे मोदकस्याभिलाषहेतुरसपरिमलादिगुणै-र्हेतुत्वेन कर्तृत्वात् 'मोदको रोचत' इति प्रयोगः - यथा स्फीतालोकमध्यवृत्तित्वादिना देवदत्तगतज्ञानहेतुत्वाद्देवदत्तस्य 'घटः प्रकाशत' इति प्रयोग इति शाब्दाभियुक्तैरुक्तत्वाच्च।

एवञ्च यानि संविदभेदसाधकान्यनुमानानीतराणि ज्ञानपदव्युत्पत्तिगोचरविषयत्वेन अधीतानि तान्यतिरिक्तसंविद्विषयत्वे आश्रयासिद्धानि।

अपिच ज्ञानातिरेकेण वृत्तौ मानाभावान्न वृत्तिविषयत्वं ब्रह्मणः। तथाहि वृत्तावपि परस्परं निघ्नन्ति।

केचिदाहुः - ब्रह्मैव हि जगदुपादानम्। अतस्तदेव सर्वतादात्म्यात् सर्वमवभासयति। अत एव तस्य सार्वज्ञ्यम्। जीवचैतन्यं त्वविद्योपाधिकतया सर्वगतत्वेऽप्यनुपादानत्वेनासङ्गित्वात्

अन्येनासंसृष्टमपि। यथा सर्वगतापि गोत्वादिजातिस्सास्नादिमद्व्यक्तिभिरेव संसृज्यते तथा स्वभावादन्तःकरणेन संसृज्यते। यदान्तःकरणपरिणामरूपा वृत्तिरिन्द्रियद्वारा निर्गत्य विषयपर्यन्तं झटितिदीपप्रभावत् परिणमय्य विषयं व्याप्नोति तदा तामुपारुह्य विषयं गोचरयति। एवं चिदुपरागार्था वृत्तिरिति।

अन्ये तु - जीवस्सर्वगतोऽप्यविद्यावृतत्वात् स्वयमप्रकाशतया विषयाननवभासयन् विषये वृत्त्युपरागादावरणतिरोधानेन तत्रैवाभिव्यक्तः तमेव विषयं प्रकाशयति। एवं आवरणाभिभवार्था वृत्तिरिति।

अपरे तु - अन्तःकरणोपाधितया जीवः परिच्छिन्नः। अतस्संसर्गाभावान्न घटादिकमवभासयति। वृत्तिद्वारा तत्संसृष्टविषयावच्छिन्नब्रह्मचैतन्याभेदाभिव्यक्तौ तं विषयं प्रकाशयति। एवं विषयचैतन्याभेदाभिव्यक्त्यर्था वृत्तिरिति।

अत्र प्रथमपक्षे किमिदमसङ्गित्वम्। न तावदनधिष्ठानत्वम्, वृत्त्यापि तदसम्पादनेन वृत्तिवैयर्थ्यात्। नापि कथञ्चिदपि संबन्धाभावः, स्वावच्छेदकाविद्याद्वारकस्य स्वाभिन्नबिम्बचैतन्यद्वारकस्य च संबन्धस्यावर्जनीयत्वात्। नापि संयोगाभावः, तत्र मानाभावात्। **'असङ्गो ह्ययं पुरुष'** इत्यस्य हेयसंबन्धस्य कर्मकृतत्वेन स्वाभाविकत्वनिषेधे तात्पर्यात्। अन्यथा तदपवादकाभावेनान्तःकरणेनापि संयोगाभावप्रसङ्गात्।

न चान्तःकरणसंबन्धार्थमेव तत्कल्पना, परस्पराध्यासेन तादात्म्यसंबन्धसिद्धेः। अन्तःकरणेन संबन्धस्तादात्म्यमेव, न तु संयोगः। अतो नासङ्गित्वश्रुतिविरोध इति चेन्न, एवं सति वृत्त्या तत्संपादनेऽपि श्रुतिविरोधप्रसङ्गात्। किञ्च यद्यसङ्गित्वं स्वाभाविकं तदा वृत्त्यापि तत्संपादनासम्भवः। यदि न व्यापकत्वादेव संयोगो दुर्निवारः वृत्त्यधीनोविषयोपरागो दुर्वचः। अत्रापि कलहः।

केचिदाहुः - विषयविषयिभावस्संबन्ध इति।

अन्ये तु - विषयसन्निहितजीवचैतन्यतादात्म्यापन्नायाः वृत्तिविषयसंयोगे जीवचैतन्यस्यापि तद्द्वारकः परंपरासंबन्धो लभ्यत इति। स एव चिदुपराग इति।

अपरे तु - साक्षादपरोक्षसंसर्गिण एव सुखादेरापरोक्ष्यदर्शनादपरोक्षविषये साक्षात्संसर्ग एष्टव्यः। तस्माद्वृत्तेविषयसंसर्गे वृत्तिरूपावच्छेदकलाभात्तदवच्छेदेन तदनुपादानस्य जीवस्यापि संयोगजसंयोगस्संभवति। करणाकारणसंयोगात् कार्याकार्यसंयोगवत् कार्याकार्यसंयोगात् कारणाकारणसंयोगस्यापि तुल्यन्यायेनाभ्युपगन्तुं युक्तत्वादिति।

परे तु - अन्तःकरणोपहितस्य विषयावभासकचैतन्यस्य विषयतादात्म्यापन्नब्रह्मचैतन्याभेदाभिव्यक्तिद्वारा विषयतादात्म्यसंपादनमेव विषयोपराग इति।

अत्र विषयविषयिभावस्तावदनुपपन्नः। वृत्तेर्विषयविषयीभावनियामकत्वे तस्या अनिर्गताया एव तत्संभवात्तदर्थं वृत्तिनिर्गमाभ्युपगमोऽनुपपन्नः।

सत्यम्, विषयविषयिभावे न वृत्तिनिर्गमापेक्षा परोक्षवत्। परन्तु साक्षात्त्वार्थं विनिर्गता वृत्तिर्हि साक्षाद्विषयेण संयुज्यत इति चेन्न। तथा सति रूपादेस्संयोगाभावेन साक्षात्त्वाभावप्रसङ्गात्, वृत्तेरापरोक्ष्याभावप्रसङ्गाच्च। वृत्तिसंयुक्ताश्रयत्वादुभयत्रापरोक्ष्योपपादने शब्दादिना धर्मज्ञाने तस्यापरोक्ष्यप्रसङ्गः। तस्मात् वृत्तावेवापरोक्ष्यं कारणविशेषाद्वाच्यम्।

किञ्च 'किञ्चिज्ज्ञ' इत्यत्र यस्संबन्धो ज्ञानार्थयोः प्रतीयते 'सर्वज्ञ' इत्यत्रापि स एव वाच्यः। अन्यथा किञ्चिज्ज्ञस्यापि व्यापकत्वोक्तेर्व्याप्यव्यापकभावसंबन्धेन स्वावच्छेदकाविद्याद्वारक-संबन्धेन वा सर्वज्ञत्वप्रसङ्गात्।

एतेन द्वितीयतृतीयपक्षौ निरस्तौ। किञ्च सूर्यनक्षत्रपथपर्यन्तव्यापिन्या वृत्तेरान्तरालिकसर्वपदार्थ-संयोगावश्यंभावाद्युगपत् सर्वप्रकाशप्रसङ्गः।

ननु जीवचैतन्यस्यान्तरालिकैस्सर्वैः पदार्थैः परम्परासंबन्धे संयोगजसंयोगे सत्यपि तदाकारवृत्तिघटितपरम्परासंबन्धस्य तद्वृत्तिसंयोगजसंयोगस्य वा तद्व्यहारकारणत्वान्नातिप्रसङ्ग इति चेत्, एवमपि तदाकारवृत्त्यापि चिदुपरागसिद्धेः तत्र च विषयावभासाभावात् निरुक्तचिदुपरागाङ्गीकाराच्च न चिदुपरागप्रयुक्तो विषयावभासः, किन्तु तदाकारवृत्तिप्रयुक्त इति वृत्तिनिर्गमो व्यर्थः। असङ्गित्वकथनञ्च व्यर्थम्।

किञ्च संप्रतिपन्नचक्षुस्सन्निकर्षघटितयोग्यपरम्परासंबन्धस्य तत्संयोगजसंयोगस्य वा व्यवहारहेतुत्वस्य कल्पयितुमुचितत्वात् वृत्तिकल्पनं व्यर्थम्। अतिप्रसङ्गस्तु तवापि तुल्यः। कारणाकारणसंयोगात् कार्याकार्यसंयोगे नातिप्रसङ्गः। कार्याकार्यसंयोगात् कारणाकारण-संयोगेऽतिप्रसङ्गः। अग्रे तु कपिसंयोगात् मूलेऽपि तत्प्रसङ्गात्।

किञ्च किञ्चिद्द्रव्यसंयुक्ततन्तुभिः पट आरभ्येत। द्रव्ये पटे च क्रियाया विरहेऽपि तयोस्संयोगः प्रतीतिसिद्ध इति तत्र कारणाकारणसंयोगः असमवायिकारणतया कल्प्यते। इह न तादृशं कल्पकमस्ति। न च विषयप्रकाशार्थमेव तथा कल्पना। सुखादौ दृष्टतादात्म्यस्येव साक्षात्त्वस्याप्यप्रयोजकत्वात्।

नापि चतुर्थः - बिम्बप्रतिबिम्बयोः स्वाभाविकाभेदस्य वृत्तिनिरपेक्षत्वात्। तदभिव्यक्तिर्वृत्तिसापेक्षेति चेन्न। तस्य तदाकारवृत्तिभास्यत्वेन घटाकारवृत्तिभास्यत्वासिद्धेः, तथापि प्रकाशप्रयोजकस्य तादात्म्यस्य वृत्तिसाध्यत्वासिद्धेश्च। उपाधिकृतबिम्बप्रतिबिम्बभेदश्च न वृत्तिनिवर्त्यः, सद्यो मुक्तिप्रसङ्गात्। आमोक्षस्थायित्वात् जीवभावस्यौपाधिकभेदे सत्यपि वत्तिव्याप्तिमात्रादभेदाङ्गीकारे प्रमात्रोः परस्पराभेदः प्रसज्यते। देवदत्तेन घटे चक्षुषा गृह्यमाणे यज्ञदत्तेन त्वचा स्पर्शे गृह्यमाणे प्रमातृचैतन्यद्वयस्याप्यभेदापत्त्या देवदत्तस्यापि स्पर्शप्रकाशप्रसङ्गः। घटाद्यवच्छिन्नचैतन्यस्यैव स्पर्शाद्यवभासकत्वात् प्रमात्रन्तरमनपेक्ष्यापि स्पर्शावभासो अवर्जनीयः, परोक्षार्थानवभासप्रसङ्गः (च ?)।

नन्वपरोक्ष एवोपरागापेक्षा। परोक्षे तु तद्विषयवृत्तिरेव व्यवहारकारणमिति चेत्, हन्त, एवं सर्वत्र वृत्तेरेव व्यवहारकारणत्वापत्त्या विषयोपरागः प्रत्यक्षेऽपि न वाच्यः। आपरोक्ष्यञ्च सामग्रीवैचित्र्यादेवोपपद्यते। तस्मान्न कथञ्चिदपि चिदुपरागार्थता वृत्तेरिति।

आवरणाभिभवार्था वृत्तिरिति द्वितीयपक्षोऽप्यनुपपन्नः।

अत्रापि विवदन्ते - केचिदाहुः चैतन्यमात्रावारकस्याज्ञानस्य विषयावच्छिन्नप्रदेशे खद्योतादिप्रकाशेन महान्धकारस्येव ज्ञानेनैकदेशे नाशोऽभिभव इति।

अन्ये तु - कटवत् संवेष्टनमिति।

अपरे तु - भीरुभटवदपसरणमिति।

अपरे तु - अज्ञानस्यैकदेशनाशे उपादानाभावात् पुनस्तत्र कन्दलनायोगेन सकृदवगते समयान्तरे आवरणाभावप्रसङ्गात्। निष्क्रियस्यापसरणसंवेष्टनयोरभावादस्पर्शतया नोदनाभिघातयोरभावाच्च न यथोक्तरूपोऽभिभवस्संभवति। अतश्चैतन्यमात्रावारकस्याप्यज्ञानस्य तत्तदाकारवृत्तिसंसृष्टावच्छिन्नविषयावच्छिन्नचैतन्यानावारकत्वस्वाभाव्यमेवाभिभव इति। तत्रादौ त्रयः पक्षाः परैरेव निरस्ताः।

किञ्च देवदत्तस्य ज्ञानेन घटाद्यवच्छेदेनाज्ञानच्छिद्रे यज्ञदत्तस्यापि घटप्रकाशप्रसङ्गः। न च तत्प्रमातृवृत्तिकृतच्छिद्रापेक्षानियमः। देवदत्तीयदीपेन तमोनिवृत्तावपि यज्ञदत्तस्य विषयोपलंभदर्शनात्। किञ्च देवदत्तेन ज्ञायमानदशायामेव यज्ञदत्तस्येन्द्रियसंप्रयोगे सति तस्य प्रकाशो न स्यात्। छिद्रे पुनश्छिद्रकरणासम्भवात्।

चतुर्थेऽपि पक्षे वृत्तिसंसृष्टविषयावच्छिन्नचैतन्यानावारकत्वस्वाभाव्यस्य 'अविद्यास्वरूपानुबन्धित्वान्न तस्य वृत्त्यधीनत्वमिति नावरणाभिभवार्थता वृत्तेः। अविद्याकृतमावरणं वृत्त्या निवर्तत इति विवक्षितमिति चेत्, देवदत्तघटवृत्त्या घटावच्छिन्नचैतन्यावरणे निवृत्ते यज्ञदत्तस्यापि घटप्रकाशप्रसङ्गः। प्रतिप्रमातृविषयभेदं आवरणभेदाङ्गीकारेऽपि सकृत्प्रतीतस्य सर्वदा प्रकाशप्रसङ्गः। पुनरावरणोत्पत्तिश्च न सम्भवति। आवरणत्वेन अभिमतायाः 'नास्ति', 'न प्रकाशत' इति व्यवहारयोग्यताया वा नाशोत्पत्त्योरसम्भवस्य सद्विद्याविजये वक्ष्यमाणत्वात्।

किञ्चाज्ञानस्य तदाकारवृत्तिसंसृष्टविषयचैतन्यानावारकत्वस्वभावत्वे नाडीहृदयधर्मादिगोचरपरोक्षवृत्तौ सत्यां तत्रावरणाभावप्रसङ्गः। इन्द्रियजन्यत्वेन तदाकारवृत्तेः विशेषणे इन्द्रियजन्यवृत्तिविषयचैतन्यावारकत्वस्वाभाव्यस्य च सुवचत्वाद्वृत्तेः विषयसंसृष्टत्वमप्रयोजकम्। तदर्थञ्च निर्गमाभ्युगमो निर्मूलः।

किञ्च ज्ञानानामावरणनिवर्तकत्वे ब्रह्मज्ञानादपि आवरणनिवृत्तिरेव स्यादिति मुक्तावप्यज्ञाननिवृत्तिर्न स्यात्, 'घटज्ञानेन घटाज्ञानं निवृत्तमि'त्यनुभवविरोधश्च।

नन्वस्तु तर्हि अज्ञानस्यैव सर्वत्र निवृत्तिः। न च सद्योमुक्तिप्रसङ्गः। मूलाज्ञानस्यैकत्वेऽप्यवस्थाज्ञानानामनेकत्वात्। यावन्ति ज्ञानानि तावन्त्यज्ञानानि इत्यभ्युपगमात्। एवञ्च सर्वगतोऽपि जीवोऽविद्यावृतत्वात् स्वयमभासमानतया पूर्वं विषयाप्रकाशकोऽपि विषयविशेषे वृत्त्युपरागादावारकाज्ञाननाशेन तत्रैवाभिव्यक्तस्तमेव विषयं प्रकाशयतीति व्यवस्थेति चेत्, न। 'घटाद्यज्ञाननिवृत्तमि'त्यनुभवादज्ञाननिवर्तकत्वमुच्यते। तच्चाज्ञानं 'घटं न जानामी'त्यनुभवसिद्धं घटतादात्म्यापन्नतदधिष्ठानगोचरम्। जडस्य स्वयमज्ञानविषयत्वादधिष्ठानञ्च ब्रह्मैवेति जीवचैतन्यस्य नित्यं अनावृतत्वात् सर्वप्रकाशप्रसङ्गो दुर्वारः। अत्र सर्वस्मिन्नपि पक्षे वृत्तेर्निर्गमः किमर्थः। अविद्याया विषयगतत्वात् तत्र गत्वैव निवर्तनीया सेति चेत्, न। समानदेशत्वेन निवर्तकत्वे मुद्गरादिनापि निवृत्तिप्रसङ्गात्। यदीया वृत्तिर्यदाकारा सा तस्य तद्गोचराज्ञाननिवर्तिकेति हि वाच्यम्। एकाविद्यापक्षेऽप्येकदेशस्य कञ्चित्प्रत्यावरकत्वमङ्गीकृत्योक्तनयमो वाच्यः। ततश्च निर्गमो व्यर्थः, इह स्थित्वैव निवर्तकत्वसम्भवात्। न हीदमभिघातादिदृष्टमुखेन निवर्तकम्।

किञ्चावरणस्य विषयगतत्वे मानाभावाच्च न वृत्तिनिर्गमः कल्प्यः।

न चावरणत्वादेव तमोवद्विषयनिष्ठता। तमस आवरणत्वासिद्धेः। लोके स्वसंयोगेन इन्द्रियसन्निकर्षप्रतिबन्धकं ह्यावरणमुच्यते। न च तमस्तादृशम्। लोकसिद्धमावरणमपि किञ्चित् मुखगतम्, यथा पक्ष्म; किञ्चिद्गोलगतम्, यथा पटलादि; किञ्चिच्च विषयगतम्, यथावकुण्ठनपटादि; किञ्चिच्चान्तरालगतम्, यथा कुड्यादि। अस्य च पारिभाषिकावरणस्य देशविशेषनियतिर्न न्यायतस्संभवति। वृत्तिसमानदेशत्वं 'त्वहमज्ञ' इति प्रतीत्यनग्रहाद्युज्यते। तस्मादिहत्य एवाविद्यैकदेशो विषयमावृणोतीति न वृत्तिनिर्गमापेक्षा।

न च प्रमातृगताविद्यैकदेशस्यावारकत्वे घटवृत्त्यां तन्निवृत्तौ कृत्स्नभानप्रसङ्गात् तद्विषयावच्छेदेन छिद्रीकरणम् एवास्थेयमिति वाच्यम्। तत्राप्यतिप्रसङ्गस्य देवदत्तवृत्त्या छिद्रे यज्ञदत्तस्यापि प्रकाशप्रसङ्ग इति प्रागेवाभिधानात्।

चतुर्थपक्षे नानाविद्यापक्षे च न शङ्कालेशोऽपि।

तस्मादविद्यानिवृत्त्यर्थन्न वृत्तिनिर्गमः कल्प्यः। नाप्यविद्यानिवर्तकता वृत्तेर्युक्ता। जडत्वेऽप्यज्ञाननिवर्तकत्वे इन्द्रियसन्निकर्षस्यैव निवर्तकत्वप्रसङ्गाद्वृत्तिरपि न सिद्ध्येत्।

अन्तःकरणावच्छिन्नो जीवः। अभेदाभिव्यक्त्यर्था वृत्तिरिति तृतीयपक्षोऽप्यनुपपन्नः। अत्रापि विवदन्ते।

केचिदाहुः - कुल्याद्वारा तटाककेदारसलिलयोरिव विषयान्तःकरणावच्छिन्नचैतन्ययोवृत्तिद्वारा एकीभावोऽभेदाभिव्यक्तिरिति।

अन्ये तु - विषयावच्छिन्नं ब्रह्मचैतन्यं विषयसंसृष्टाया वृत्तेरग्रभागे विषयप्रकाशकं प्रतिबिम्बमिव मर्षयतीति तस्य प्रतिबिम्बस्य जीवचैतन्येनैकीभावोऽभेदाभिव्यक्तिः। एवं चान्तःकरणवृत्तिविषयावच्छिन्नचैतन्यानां प्रमातृप्रमाप्रमेयभावेनासाङ्कर्यमप्युपपद्यते। न च वृत्त्युपहितचैतन्यस्य

विषयप्रमात्वे तस्य विषयाधिष्ठानचैतन्यस्यैव विषयेणाध्यात्मिकसंबन्धाभावाद्विषयापरोक्ष्ये आध्यात्मिकसंबन्धस्तन्त्रं न स्यादिति वाच्यम्। विषयाधिष्ठानचैतन्यस्यैव विषयेणावच्छिन्नस्य वृत्तौ प्रतिबिम्बिततया तदभेदेन तत्संबन्धस्यैव तत्संबन्धत्वादिति।

अपरे तु - बिम्बभूतविषयाधिष्ठानचैतन्यमेव साक्षात् 'आध्यासिकसंबन्धलाभात् विषयप्रकाशकमिति तस्यैव बिम्बत्वविशिष्टरूपेण भेदसद्भावेऽपि तदुपलक्षितचैतन्यात्मनैकोभावोऽभेदाभिव्यक्तिः। एवञ्च अन्तःकरणावच्छेदात् विषयचैतन्यस्य तदनवच्छेदकृतभेदनिवृत्तिरवभासप्रयोजिका। न चैवं सति जीवब्रह्मसाङ्कर्यम्। न वा ब्रह्मणः सर्वज्ञत्वविरोधः। बिम्बात्मना तस्य यथापूर्वमवस्थानादिति।

तत्र प्रथमः पक्षः औपाधिकजीववादे उत प्रतिबिम्बजीववादे। आद्ये जीवब्रह्मणोः वृत्तिद्वारा भेदे जीवे ब्रह्मगतघटतादात्म्यवद्ब्रह्मणि जीवगतदुःखित्वं प्रसजेत्। तदानीं घटचैतन्यस्य जीवोपाधिव्याप्त्या जीवभावेन ब्रह्मत्वासिद्धेः न ब्रह्मणो दुःखित्वमिति चेत्तर्हि तदानीं ब्रह्मणः सार्वज्ञ्यं न स्यात्। नापि द्वितीयः, भेदकोपाधौ सति वृत्तिमात्रात् बिम्बप्रतिबिम्बयोरभेदायोगात्, स्वाभाविकाभेदस्य च वृत्त्यनपेक्षत्वात्। यदि तूपाधिमपि विनाशयेत्, तदा परं स्यात् आनन्दः। किन्तु तदा प्रतिबिम्बजीवस्यापि नाशात् न तं प्रति प्रकाश उपपद्यते।

द्वितीये अन्तःकरणवृत्तिरूपोपाधिभेदात् प्रतिबिम्बयोः नैक्यसम्भवः। बिम्बभेदाच्च चैतन्यस्वरूपमात्रस्यान्तःकरणे प्रतिबिम्बितत्वात् वृत्तौ च घटावच्छिन्नस्य प्रतिबिम्बात् कालभेदाच्च। जीवस्यानादित्वात् वृत्तितत्प्रतिबिम्बयोरद्यतनत्वात्।

किञ्च विषयावच्छिन्नप्रतिबिम्ब इति किं विषयापादितभेदवच्चैतन्यं विवक्षितम्। किं वा विषयविशिष्टमुत विषयोपलक्षितमधिष्ठानस्वरूपम्? आद्ये विशिष्टज्ञाने समूहालम्बने च विषयभेदेन तदवच्छिन्नचैतन्यानां भिन्नतया वृत्तौ तत्प्रतिबिम्बा भिन्नाः स्युः। ततश्च न तैर्जीवात् प्रतिबिम्बस्य ऐक्यसम्भवः। द्वितीये विषयप्रतिबिम्बाभ्युपगमो व्यर्थः। प्रकाशकाधिष्ठानचैतन्याभेदे तस्याप्रयोजकत्वात्। तदीयवृत्तिप्रतिबिम्बितत्वमेव प्रकाशप्रयोजकम् इति चेन्न। तदा वृत्तेरभेदाभिव्यक्त्यर्थतोक्तिविरोधः। तृतीये घटज्ञानदशायां सर्वभानप्रसङ्गः। किञ्चान्तःकरणवृत्तिप्रतिबिम्बयोरैक्येऽपि बिम्बभूतप्रकाशकाधिष्ठानचैतन्यस्य भिन्नत्वान्न प्रकाशकचैतन्याभेदार्थता वृत्तेः। वृत्त्यग्रभागवृत्तिप्रतिबिम्बतद्बिम्बयोः वास्तवाभेदस्त्वप्रयोजकः। अन्यथान्तःकरणप्रतिबिम्बस्य तद्बिम्बाभेदात् घटादिप्रकाशप्रसङ्गात्, घटाद्यवच्छिन्नचेतन्यस्य तद्बिम्बान्तर्भावात्।

तृतीयेऽपि पक्षे अन्तःकरणानवच्छेदकृतभेदनिवृत्तेरवभासप्रयोजकत्वे घटप्रकाशदशायां स्पर्शस्यापि प्रकाशप्रसङ्गः। तदाकारवृत्तिकृतभेदनिवृत्तिरवभासप्रयोजिकेति चेत्, तथा सति आकाशस्यालोकाकारवृत्त्यभिव्यक्तचैतन्यभास्यत्वाङ्गीकारविरोधः। किञ्चैवं घटप्रकाशदशायां स्पर्शस्याप्रकाशार्थमावरणन्न कल्प्येत, उक्तावभासप्रयोजकाभावादेवानवभाससिद्धेः।

नन्वन्तःकरणावच्छिन्नचैतन्याभेद एवावभासप्रयोजकः, न तु तदाकारस्य। तत्रान्तर्भावः।

एवञ्चावभासप्रयोजके सत्यप्यनवभासार्थं स्पर्शस्यावरणं कल्प्यत इति चेत्, आवृतचैतन्यसंबन्धात् घटोऽपि न प्रकाशेत।

ननु घटावच्छिन्नचैतन्यमनावृतं स्पर्शावच्छिन्नचैतन्यमावृतमिति चेन्न, चैतन्यभेदासिद्धेः। तत्सत्त्वे हि घटाकारवृत्त्या तदवच्छिनचैतन्यस्यैव भेदनिवर्तनसम्भवात् स्पर्शावच्छिन्नचैतन्यस्य भेदादेव स्पर्शाप्रकाशोपपत्तौ पुनरावरणकल्पनवैयर्थ्यम्। न च स्पर्शावच्छिन्नमिति विशिष्टस्यावृतत्वं विवक्षितुं शक्यम्। जडस्यावरणविषयत्वासिद्धेः।

ननु घटाधिष्ठानचैतन्य एव घटावच्छिन्नं किञ्चिदावरणम्, किञ्चिच्च स्पर्शावच्छिन्नम्। घटाकारवृत्त्या घटावच्छिन्नं निवृत्तम्, स्पर्शाकारवृत्त्यभावात् तदवच्छिन्नावरणमनिवृत्तम्। अविद्यमानतदवच्छिन्नावरणकचैतन्याभेद एव च तत्प्रकाशः। अतो न स्पर्शप्रकाश इति चेत्, अनतिरिक्तवृत्तित्वादेरवच्छेद्यद्वयं प्रत्यवच्छेदकद्वयस्याविशेषादवच्छेदनियमासिद्धेः।

ननु तन्निरूपकत्वं तदवच्छेदकत्वम्। घटावच्छिन्नचैतन्यं स्पर्शं प्रत्यावृतम्, घटं प्रत्यनावृतमिति भवतु तयोरावरणनिरूपकत्वम्। एवञ्च तन्निरूपितावरणनिवृत्तौ तस्य प्रकाश इति चेत्, किञ्च तं प्रत्यावरणम् ? प्रकाशासंबन्धस्य साध्यत्वात् 'नास्ती'ति व्यवहारहेतुत्वं चेत्, अस्तु तर्हि प्रकाशे सत्यप्यविद्यामाहात्म्या'न्नास्ती'ति व्यवहारः। चोरभीत्या द्रविणसद्भावं ज्ञात्वापि 'नास्ती'ति व्यवहारवत् स्पर्शप्रकाशस्य सत्त्वात्तद्व्यवहारोऽपि स्यात्। तदपि प्रतिबध्यत इति चेदस्तु पूर्वन्यायेनैवास्तीति व्यवहाराभावोऽपि मूकस्येवस्पर्शप्रकाशोऽवर्जनीयः। घटं पश्यतो मूकस्य घटमस्पृष्टवतो घटस्पर्शप्रकाशयोः अविशेषापत्तिः। विप्रलम्भनार्थं घटस्पर्शाभावेऽपि घटं चक्षुषा पश्यन् स्पर्शो मया साक्षात्कृत इति यो वदति तस्यविप्रलम्भकत्वाभावप्रसङ्गः। तत्रैव व्यभिचारात् प्रतिबन्धकत्वाभावश्च सिद्धः।

ननु स्वज्ञाते विपरीताकारवृत्त्युत्पादनेच्छा हि विप्रलम्भः। स कथं न स्यादिति चेत्, किं वस्तुतः स्वाज्ञातविपरीताकारो विवक्षित उत स्वज्ञाततया अज्ञातविपरीताकारः। नाद्यः, स्वस्य स्पर्शसाक्षात्कारज्ञानसत्त्वात्। घटसाक्षात्कार एव हि घटसाक्षात्कारज्ञानम्, अनुव्यवसायानङ्गीकारात्। एवं स्पर्शसाक्षात्कार एव स्पर्शसाक्षात्कारज्ञानमिति। अत एव न द्वितीयः। घटज्ञानमेव हि घटज्ञानस्य ज्ञातताज्ञानमपि। किञ्च ज्ञातत्वाभावज्ञानात् खलु विप्रलम्भः। ज्ञातताज्ञाने जाग्रति कथं विप्रलम्भः।

किञ्चैवं सत्यावरणनिवृत्त्या वृत्तिः इति तदर्थमेव निर्गमनम्। तस्मिन् सति नान्तरीयकोऽन्तः-करणावच्छिन्नचैतन्याभेदो विषयावच्छिन्नचैतन्यस्य, न त्ववभासे प्रयोजक इति पर्यवस्येत्।

किञ्च तदाकारवृत्त्यवच्छिन्नचैतन्यसंबन्ध एवावभासप्रयोजक इति कल्पयितुमुचितम्, न त्वन्तःकरणावच्छिन्नचैतन्यसंबन्धमात्रमवभासप्रयोजकं कल्पयित्वा तथाप्यप्रकाशार्थम् अज्ञानावरणम्, वृत्त्या च तन्निवृत्तिः कल्पयितुम्, गौरवात्।

**इति अवेद्यत्वभङ्गः।**

## ८. निर्विशेषस्य जिज्ञास्यत्वभङ्गः

'तद्विज्ञानार्थम्', 'अक्षरं पुरुषं सत्यं ब्रह्म विद्याम्' इति सविशेषस्यैव जिज्ञास्यत्वमुक्त्वा निर्विशेषस्य जिज्ञास्यत्वं निराकरोति। तथाहि न निर्विशेषस्य जिज्ञास्यत्वं सम्भवति। तस्य स्वप्रकाशतया नित्यबुद्धत्वात्। न जीवेन बुद्धं तदिति चेत्, किं जीवो ब्रह्मणोऽन्यः। अधिरोह तत्वविदां गोष्ठीम्। न चौपाधिकभेदेन वा प्रतिबिम्बभावेन वा ब्रह्मणो भेदः स्वप्रकाशत्वं वा नश्यति। स्वरूपनाशप्रसङ्गात्। निर्विशेषस्वरूपमज्ञानावृतमिति चेत्, अस्त्वावरणशब्दार्थो यः कश्चन। 'मां जानामि', 'ज्ञानं जानामी'ति प्रकाशे विद्यमाने कथमावरणम्। विशिष्टगोचर एवायं प्रकाशो न तु विशेष्यगोचर इत्युक्तिस्तु विशिष्टपदव्युत्पत्तिविधुराणां गोष्ठीष्वेव शोभते। रूपी घट इति ज्ञानमपि हि घटगोचरमेव।

विशिष्टस्वरूपविशेषो निर्विशेषस्वरूपविशेष इत्येवं स्वरूपविशेषास्सन्ति। ततश्च विशिष्टबुद्धौ विशिष्टस्वरूपविशेष एव भासते न निर्विशेषस्वरूपविशेष इति चेत्, तत्र किं स्वरूपप्रकाशो निर्विशेषस्वरूपप्रकाश उत निर्विशेष इति प्रकाशः।

आद्ये विशिष्टज्ञानस्य निर्विशेषगोचरत्वाभावः किं स्वरूपयोः स्वाभाविकभेदात् किं वौपाधिकभेदादुत कल्पितभेदात्। नाद्यः, असिद्धेः अनङ्गीकाराच्च। द्वितीयेऽपि किं स भेदो विशेषणे पर्यवसित उत विशेष्ये। नाद्यः, अप्रयोजकत्वात्। न द्वितीयः, विशेषणयोः घटाकाशमठाकाशादौ परस्परावच्छिन्नभेदप्रयोजकत्वदर्शनेन विशेषणस्य स्वरूपमात्रप्रतियोगिकभेद-प्रयोजकत्वासिद्धेः। न तृतीयः, वह्नौ गुञ्जारोपवदप्रयोजकत्वात्।

न द्वितीयः, विशेषाभावविशिष्टबुद्धेरपि विशिष्टगोचरत्वावश्यम्भावात् विशेषस्वरूपस्य स्वप्रकाशत्वाभावप्रसङ्गाच्च तस्य तद्रूपत्वासिद्धेः। तथा च निर्विशेषनित्यसत्यज्ञानानन्दानन्तस्वरूप-विशेषाणामस्वप्रकाशत्वात्स्वरूपविशेषान्तराभावात् तत्सत्वे तत्रापि तादृशज्ञानस्यैव वाच्यतया स्वरूपमात्रप्रकाश्यत्वस्य कुत्रापि स्वरूपविशेषेऽभावेन स्वप्रकाशत्वस्यैव लोपात् प्रकाशान्तरानङ्गीकाराच्च सर्वशून्यवादितया निष्कञ्चुकत्वप्रसङ्गः।

किञ्च स्वरूपप्रकाशोऽस्ति न वा। द्वितीये कथं घटादेः स्फुरणम्। स्फुरत्स्वरूपाभेदाद्धि घटादेस्स्फुरणम्। आद्ये कथं जिज्ञासा। अथ न वयं प्रकाशाभावं जिज्ञासाकारणं ब्रूमः। किं तर्हि, भावरूपाज्ञानमिति चेत्, तत्किं प्रकाशविरोधि उत न। द्वितीये न तदज्ञानम्, तत्कल्पने प्रयोजनाभावश्च। नाद्यः, असिद्धेः। शाब्दापरोक्षवृत्त्या तदवच्छिन्नचैतन्येन वा विरुध्यत इति चेत्, तर्हि ज्ञाने विद्यमानेऽपि तदविरोधिनो यस्य कस्यचित् येन केनचिन्निवर्त्यस्य सत्त्वमात्रेण जिज्ञासायां मृष्टमेव भुक्तस्य दहननिवर्त्यपरिधानीयस्य शुक्तिसाक्षात्कारनिवर्त्यरजताध्यासस्य वा पुनः पुनः बुभुक्षाप्रसङ्गात्। अपरोक्षेऽर्थे मीमांसिते जिज्ञासाया अदर्शनाच्च। न भावरूपाज्ञानं

जिज्ञासाहेतुरज्ञाननिवृत्तिरेवेष्यत इति चेन्न तर्हि सा जिज्ञासा किञ्चाज्ञाननिवृत्तेरिष्यमाणत्वमप्यसिद्धमेव। प्रकाशाविरोधिनस्तस्यानिष्टत्वाभावात्। नहि योगिनः मूषकस्य वा प्रकाशाविरोधितमोनिवृत्तीच्छा। शाब्दवृत्तिप्रकाशविरोध उक्त एवेति चेत्, तथापीदानीं प्रकाशावैकल्यात् न तस्य द्विष्टता।

ननु कर्तृत्वाद्यध्यासमूलतया संसारार्थकन्दस्याज्ञानस्य शाब्दापरोक्ष्यनिवर्त्यतया तद्गोचरजिज्ञासा युज्यत एवेति चेत्, तर्हि 'किं तदि'ति प्रश्नप्रयोजकजिज्ञासानुपपन्ना। केनचिदाकारेण ज्ञाते केनचिदाकारेणाज्ञाते हि वस्तुनि जिज्ञासा तादृशी स्यात्। ब्रह्मजिज्ञासायाः तादृशप्रश्नप्रयोजकत्वं च 'अधीहि भगवो ब्रह्मेति', 'यतो वा इमानिभूतानि जायन्ते', 'तद्ब्रह्मे'ति प्रश्नप्रतिवचनाभ्यामवगम्यते। 'भूमानं भगवो विजिज्ञासे', 'तद्विज्ञासस्व', 'किं भगवन्तः परमं वदन्ति' इत्यादि प्रश्नप्रतिवचनानि बहूनि द्रष्टव्यानि।

किञ्चाद्वैतज्ञानवत एव इयं जिज्ञासा। ततश्च ब्रह्मजिज्ञासासूत्रमनुपपन्नम्। अद्वैतनिर्धारणात् प्रागेव हि तत्र जिज्ञासोच्यते। ननु तत्राप्यनन्तरजिज्ञासैवोच्यते। अत एव साधनचतुष्टयपूर्ववृत्तत्वोपपत्तिश्च। तत्रैव श्रवणविधिश्चेति चेत्, तर्हि सूत्रकारस्याद्वैतन्यायग्रथनं व्यर्थमिति स्थितम्।

अत्रापि जिज्ञासोपपादने मिथो निघ्नन्ति। पूर्वमपि विद्यमानमपि शाब्दज्ञानमेककोटिकानवधारणात्मकमिति जिज्ञासोपपत्तिरिति केचित्।

अन्ये तु - सविशेषभ्रमात् तत्सन्देहाद्वा जिज्ञासा जायते। सा च निर्विशेषोपदेशात् निवर्तत इति निर्विशेषगोचरजिज्ञासेत्युच्यत इति।

अपरे तु - अप्रतिबन्धापरोक्षज्ञानम् अविद्यानिवर्तकम्। तदेवेष्यते। इदानीं विद्यमानं स्वरूपापरोक्षं वृत्तिज्ञानं वा सप्रतिबन्धमेवेति।

इतरे तु - सत्त्वविशिष्टज्ञानपूर्वमखण्डगोचरज्ञानमिष्यत इति।

अत्र यत्प्रथमं मतं पूर्वमद्वैतज्ञानं विद्यमानमप्यनवधारणात्मकम्, अतो निर्दिधारयिषा युज्यते न्यायग्रथनं चेति, तन्न, विचारात् प्रागुत्पन्नाया वृत्तेरनवधारणात्मकत्वेऽपि स्वप्रकाशस्यानवधारणात्मकत्वासिद्धेः। तस्य चानवधारणस्वभावत्वं सत्स्वरूपे प्रकाशस्वरूपे वा सन्देहाभावात् दुस्साधञ्च। आवरणकल्पनञ्च एवं सति व्यर्थम्। अनवधारणत्वस्य कल्पितत्वे स्वरूपप्रयुक्तासंशयजिज्ञासाद्युपपत्तिर्दुर्वारा। अज्ञानसंशयादेर्जन्यावधारणमेव विरोधीत्युक्तावप्यावरणकल्पना व्यर्था। स्वरूपप्रकाशात्मकाधिष्ठानयाथार्थ्यावधारणस्याध्यासाविरोधित्वात्। जन्यज्ञानस्याप्यज्ञानविरोधिताया आवरणप्रयुक्तत्वाभावेऽदृष्टद्वारैव निवर्तकत्वं स्यात्। अन्यत्वस्य प्रयोजकत्वं न कस्यापि बुद्धिमधिरोहति। संशयस्यापिनिवर्तकत्वप्रसङ्गाच्च। जन्यावधारणत्वञ्चगौरवान्न प्रयोजकम। अस्तु वा जन्यावधारणमेव विरोधि। तदपि वृत्तमेवाद्वैतवाक्यश्रवणसमनन्तरम्, वाक्यस्यासंशायकत्वात्।

अत्र यदाह नवीनः - यद्यपि प्रथमं निर्विशेषब्रह्मसाक्षात्कारश्शब्दान्निष्पन्नः, तथापि सोऽनवधारण एवाग्रे संशयदर्शनात्। नन्वेककोटिकज्ञानमात्रं निश्चय एवेति न संशयः स्यादिति चेत्, न तावन्निश्चयत्वं जातिः चाक्षुषत्वादिना साङ्कर्यात्। त्वन्मते जातेरव्याप्यवृत्तित्वाभावेन धर्मिज्ञाने तदभावप्रसङ्गाच्च। धर्मिज्ञाने तदभावप्रसङ्गादेव न संशयान्यज्ञानत्वम्। अत एव न संशयत्वाभाववत्त्वम्, धर्मिज्ञानस्य संशयाभिन्नत्वेन तदभावात्। नापि धर्म्यंशे तदभावः, ज्ञाने अंशाभावात्।

न च धर्मिविषयित्वावच्छेदेन तदस्तिता, ज्ञानस्वरूपविषयत्वस्य ज्ञानमात्रतया विरुद्धधर्मद्वयासम्भवात्, ज्ञाने अंशसत्त्वे च संशयेऽप्येकैककोट्यंशे परस्परविरुद्धोभयप्रकारकत्व-लक्षणसंशयत्वाभावेन निश्चयत्वापत्तेः।

न च स्वप्रकारीभवद्धर्मविरुद्धप्रकारकज्ञानाभिन्नत्वं संशयत्वम्, तच्च तत्राप्यस्तीति वाच्यम्। संशयाभिन्नधर्म्यंशज्ञानेऽपि तत्सत्त्वात्।

न च तद्विरुद्धप्रकारकज्ञानत्वे सतीति विशेषणान्नातिप्रसङ्ग इति वाच्यम्। समूहालम्बनव्यावृत्यर्थमेकविशेष्यकत्वस्याप्यावश्यकत्वे एकविशेष्यकत्वे सति स्वप्रकारीभवद्धर्मविरुद्धप्रकारकज्ञानाभेदे सति तज्ज्ञानप्रकारविरुद्धप्रकारकत्वापेक्षया लाघवेन स्वविषये स्वाकारतद्विरुद्धद्वयवैशिष्ट्यावगाहिसंबन्धज्ञानाविरोधिज्ञानत्वस्यैव संशयशब्दार्थत्वात्।

तस्मात् यज्ज्ञानं यत्संशयनिवृत्त्यनुकूलस्वरूपविशेषवत् तत्तन्निश्चयः, इतरन्तु न तथेत्येककोटिकमपि किञ्चित्पुरुषदोषादनवधारणं किञ्चित्तर्कादिकारणमहिम्ना तदनतिरिक्तविषयमपि निश्चय इत्यनवद्यम्।

नन्वेवमपि ब्रह्मजिज्ञासा भवितुमर्हति। संशयविरोधिज्ञानं हीष्यते। तच्च संशयसमानप्रकारकम्। निर्विकल्पकादिदमिति ज्ञानाच्च संशयानिवृत्तेः, निर्विशेषे ब्रह्मणि तदभावात्। न च कल्पितप्रकारोऽस्तीति वाच्यम्। तत्त्वावेदकश्रुतिजन्यज्ञानस्य तदविषयत्वादिति।

मैवम्। ज्ञानं हि न समानविषयतयावधारणात्मकं संशयं निवर्तयति। किन्तु तत्समानप्रकारकतया। अन्यविषयतद्दर्शनात् समानविषयत्वमप्यपेक्षणीयमिति चेत्, संशयादपि प्रसङ्गः। निश्चयत्वमपि अपेक्षणीयमिति चेत्तर्हि समानविषयनिश्चयो निवर्तको लाघवान्निर्विकल्पकन्तु नास्त्येव। अनवधारणत्वादपि न तन्निवर्तकम्। 'इदमि'ति ज्ञानं तु घटत्वादिवैशिष्ट्याविषयत्वान्न तत्संशयं निवर्तयति। अन्यथा 'अयं घट' इति ज्ञानात्तद्गोचरे घटत्वे 'इदं घटत्वं न वे'ति संशयो न निवर्तेत। तस्मिन् घटत्वव्यतिरिक्तप्रकाराभावात्।

किञ्चैवं 'प्रमेयवानि'ति ज्ञानात् त्वदभिमतनिश्चयात् घटत्वप्रकारात् संशयनिवर्त्यापत्तिः। तत्र सामान्यधर्मप्रकारकत्वं प्रतिबन्धकं 'चेदिदमि'ति ज्ञानेऽपि तथा भविष्यतीति अत्रापि विदिताविदिताकारभेदाभावात् प्रश्नप्रयोजकजिज्ञासानुपपत्तिस्स्पष्टा। नहि केनचिदाकारेण

धर्मिनिश्चयाभावेऽविदिताकारज्ञानस्येष्यमाणत्वाभावे च 'इदं किमि'त्यादिप्रश्नहेतुजिज्ञासासम्भवः। न च ब्रह्म केनचिदाकारेण निश्चितम्। न च धर्मस्वरूपमात्रं वा निश्चितम्, येन तन्मात्रं कारणमिति शङ्क्येत। न च धर्मज्ञानमात्रं लाघवात् कारणम्, न तु तन्निश्चय इति वाच्यम्। स्थाणुपुरुषसन्देहानन्तरं 'अयं स्थाणुः खदिरः पलाशो वा' इति संशयादर्शनेन धर्मितावच्छेदकविशिष्टधर्मिनिश्चयस्य हेतुत्वात्।

एतेन स्वरूपात्मकधर्मिज्ञानं निरस्तम्। किञ्च नित्यानित्यवस्तुविवेकमुपपादयन् न्यायोपबृंहितवाक्येनैव नित्यानन्दवस्त्ववधारणमवोचः 'आमनुष्यादाब्रह्मलोके कर्म कार्यम्' इत्यादिना।

अथ नित्यानन्दांशावधारणाङ्गीकारेऽपि तेनाभेदाद्वैतांशानवधारणन्न विरुध्यत इति चेत् हन्त, किं ब्रह्मणोऽवयवित्वमवयवसंघातात्मकत्वं सधर्मकत्वं वाङ्गीकरोषि येनैवं ब्रवीषि।

किञ्च नित्यानन्दात्मकत्वं किं जीवस्य उत ब्रह्मणः। नाद्यः, तदभेदस्यासाध्यत्वात्, अपुरुषार्थत्वात्, तद्दर्शनेन इतरवैराग्यासिद्धिप्रसङ्गात्, **'ब्रह्म वेद ब्रह्मैव भवति'** इति ब्रह्माभेदस्यैव पुरुषार्थत्वप्रतीतेश्च।

द्वितीये जीवब्रह्मणोरभेदज्ञानेन भवितव्यमेव। तच्चाभेदज्ञानमज्ञत्वसर्वज्ञत्वादिभेदज्ञाने जाग्रति नोपपद्यत इति, तन्मिथ्यात्वज्ञानमपि इदानीम् आवश्यकमेव।

ननु विद्यत एवाभेदज्ञानं मिथ्यात्वज्ञानञ्च तदनवधारणरूपमित्युक्तमिति चेन्न, ततो वैराग्यमुमुक्षानुपपत्तेः। अनवधारणादपि मुमुक्षाभवत्येवेति चेत्तर्हि नित्यत्वानित्यत्वज्ञानमप्यनवधारणमेवास्तु। तथैवेष्यत इति चेत्, तर्हि नित्यानित्यवस्तुविवेकस्य न्यायसाचिव्योक्तिविरोधः। न च न्यायसाध्यस्यापि ज्ञानस्य संशयनिवर्तकस्यानवधारणत्वं वक्तुं शक्यम्।

किञ्चास्मिन् पक्षे मननानन्तरभाविज्ञानस्यैव संशयविरोधितयावधारणत्वात् तत एवाविद्यानिवृत्तौ किं निदिध्यासनेन। अवधारणस्योत्पन्नत्वेन तत्प्रतिबन्धककल्मषनिवर्तकत्वेन उपयोगस्य वक्तुमशक्यत्वात्। कल्मषनिवृत्तेः ज्ञानात् प्रागेव भावात्। न चात्रापि पक्षे जातेऽप्यवधारणेऽविद्यानिवृत्तेरनुत्पत्तेः तत्प्रतिबन्धकभेदवासनानिरासकत्वेनोपयोगो वक्तुं शक्यः। तथात्वे प्राथमिकज्ञानस्यावधारणत्वेऽपि मननानन्तरमिव प्रतिबन्धादज्ञानानिवृत्त्युपपत्त्या तदनवधारणत्वकल्पनावैयर्थ्यात्। न चावधारण एव विपरीतवासनानिरासमुखेन निदिध्यासनस्योपयोग इति वाच्यम्। पूर्वमवधारणाभावे भूयसाभ्यासेन वृङ्(4ब्रह्म)शब्दजन्मसाध्ये निदिध्यासने प्रवृत्त्ययोगात्, मननानन्तरं संशयादर्शनाच्च। अपरोक्षज्ञानं प्राक् शब्दान्नोत्पन्नं निदिध्यासनानन्तरमेव उत्पद्यत इति शङ्का त्वयैव निरस्ता। अपरोक्षे परोक्षज्ञानानुपपत्त्या त्वयैव प्राथमिकापातज्ञानस्यापरोक्षस्योपपादनात् प्राथमिकज्ञानस्यानवधारणत्वकल्पनावैयर्थ्याच्च।

न च प्राथमिकज्ञानानवधारणत्वकल्पना नाविद्यानिवृत्त्यभावाय। किन्त्वनभ्यासदशायां जलादिज्ञानस्थल इवोत्तरकालसंशयोपपत्तये इति वाच्यम्। तत्र तथात्वेऽप्यत्राहितसन्देहोपपत्तेः,

अनवधारणत्वाकल्पनात्। वाक्यान्तरात् प्रमाणान्तराद्वा भेददर्शनस्य तदाधायकत्वाद्भेददर्शनाभावे संशयस्यैव सिद्धेः। जलादिज्ञानस्थलेऽप्याहितसन्देह इति वक्ष्यते। न चाहितसन्देहस्यैवापह्नवः शक्यः। अप्रयोजकत्वसन्दिग्धोपाध्यादीनां संशयाधायकत्वान्निश्चये सत्यपि तस्य दोषजन्यत्वादिशङ्कयार्थसंशयस्यानुभवसिद्धत्वाच्च।

किञ्च विचारादिसहकार्यभावे ज्ञानमेवाद्वैते न सम्भवति सर्वपदानां प्रवृत्तिनिमित्तपुरस्कारेण वाक्यानां चार्थद्वयसंसर्गगोचरतया प्रवृत्तेः। तत्सत्वे निर्णयस्यैवाभावात् क्व निर्विशेषावधारणम्।

अत्र यदुक्तं सत्यादिवाक्यानां सामानाधिकरण्येनैकार्थतात्पर्यज्ञानसम्भवात् तदनुरोधाल्लक्षणया निर्विशेषात्मापातधीरिति, तन्न। एकार्थतात्पर्यज्ञानस्य तदनुकूलव्यापारस्य वा श्रवणत्वेन त्वदभिमतस्यापातप्रतीतिदशायामेव वृत्तत्वेन श्रवणाकर्तव्यतापातात्।

किञ्च गृहीतप्रमाण्यस्य वाक्यस्य तात्पर्यावधारणे ते नानवधारणसम्भवः।

किञ्च प्रत्यक्षादिविरोधभानदशायाम् असन्निकृष्टार्थत्वाभावात् न तात्पर्यग्रहः। विरोधसमाधानेन तात्पर्यग्रहे जिज्ञासानन्तरं मननस्य अकर्तव्यतापत्तिः। अर्थानुपपत्तिनिरासकयुक्तिचिन्तनस्य मननत्वात्।

किञ्च एककोटिकज्ञानस्य निश्चयत्वात् नानवधारणत्वकल्पनं युज्यते। अत्र यज्जात्यादिदूषणं तन्न, निश्चयत्वस्य जातित्वे बाधकाभावात्।

ननु निश्चयत्वस्यैकत्वे संशयवृत्तित्वे च ज्ञानत्वेन तुल्यव्यक्तिकतया तद्वृत्तित्वाभावेन धर्म्यंशे निश्चयत्वं न स्यात्। नानात्वे चाक्षुषत्वादिभिः साङ्कर्यात्। चाक्षुषत्वाद्यपेक्षया परत्वे च ईश्वरज्ञानस्यानिश्चयतापत्तिः। न च तन्मात्रेऽन्यनिश्चयत्वं व्यक्त्यैक्यात् इति चेत्, एकमेव निश्चयत्वम्। न च तुल्यव्यक्तिकता निर्विकल्पकस्यानिश्चयत्वात्। न च चाक्षुषत्वादिसाङ्कर्यम्। गुणे तस्यादोषत्वात्। अन्यथा स्वरविशेषात् पुत्राद्यनुमानायोगात् कत्वादिना साङ्कर्यात्। तद्व्याप्यत्वेऽननुगमात्। तारत्ववदनुगमस्यापि जातौ कल्पयितुमशक्यत्वात्। एकस्यैव कारणस्य एकेनोच्चारणे तत्र त्वव्याप्यजातेरसम्भवात्।

यच्च संशये धर्म्यंशे निश्चयत्वाभावप्रसङ्गः, जातेरव्याप्यवृत्तित्वाभावादिति तन्न, निश्चयत्वस्य तत्र सत्वेऽप्यव्याप्यवृत्तित्वप्रसङ्गाभावात्। नहि संशयत्वसामानाधिकरण्यमात्रादव्याप्यवृत्तित्वम्। किन्तु स्वात्यन्ताभावसामानाधिकरण्यमात्रात्। कोट्यंशे संशयत्वात्तदंशे निश्चयत्वाभावात् स्वात्यन्ताभावसामानाधिकरण्यमस्त्येवेति चेन्न, संशयत्वनिश्चयत्वयोः द्रव्यत्वघटत्वयोरिव वृत्तेरिष्टत्वात्। यद्येवं धर्म्यंशे निश्चय इति व्यवहारो न स्यात्। किञ्च संशयानन्तरं संशयो न स्यात्। पूर्वसंशयस्यैव तनिश्चयत्वादिति चेन्न। निश्चयत्वस्यधर्मितावच्छेदकविषयत्वाभिव्यङ्ग्यत्वेन तन्निश्चयत्वव्यवहारात्। किञ्चित्प्रकारकत्वे सति तद्विरुद्धाप्रकारकत्वलक्षणमेककोटिकत्वं हि निश्चयत्वाभिव्यञ्जकम्। तच्च धर्मितावच्छेदकविषयकत्वविशेषात्मकतत्प्रकारकत्वघटितम्।

स्थाणुत्वविषयकत्वं तु न तथा, तद्विरुद्धपुरुषत्वस्यापि प्रकारत्वात्। संशयत्वञ्च स्वप्रकारविरुद्धप्रकारकत्वाभिव्यङ्ग्यनिश्चयत्वव्याप्यजातिविशेषः। स च यत्प्रकारकत्वाभिव्यङ्ग्य-स्तत्संशयः। अतो न धर्म्यंशे संशयः।

यद्वा इदन्त्वस्थाणुत्वादिकमेव विषयतया संबद्धं निश्चयत्वसंशयत्वाभिव्यञ्जकम्। तत्र निश्चयत्वं येनाभिव्यज्यते तन्निश्चयत्वव्यवहारः। एवं संशयत्वव्यवहारोऽपि।

यद्वा यत्संबन्धितावच्छेदकं निश्चयत्वं ज्ञानस्य तन्निश्चयत्वव्यवहारः। यत्संबन्धितावच्छेदकं संशयत्वं तत्संशयत्वव्यवहारः। निश्चयत्वेन किञ्चित्संबन्धित्वस्य संशयत्वेन किञ्चित्संबन्धित्वस्य च ज्ञाने स्वीकारात्। तथा च न संशयान्तरानुत्पत्तिप्रसङ्गोऽपि, तन्निश्चयस्यैव तत्संशयनिवर्तकत्वात्।

संशयान्यत्वं निश्चयत्वमित्यत्रापि त्वद्रीत्या न किञ्चिद्बाधकम्। न च धर्म्यंशे निश्चयत्वाभावप्रसङ्गः। त्वया वृक्षादावपि औपाधिकभेदेन संयोगतदभावप्रतीतेरित्या-दिवदवच्छेदकभेदादवच्छिन्नभेदस्याङ्गीकारात् तद्वदेव धर्मिविषयत्वावच्छेदेन संशयान्यत्वोपपत्तेः।

संशयत्वाभावो निश्चयत्वमित्यत्रापि न दोषः। न च धर्मिविषयकत्वादेर्ज्ञानमात्रत्वाद्विरुद्धा-वच्छेदकालाभः, विषयस्यैवावच्छेदकत्वात् त्वयापि प्रत्यभिज्ञायां विषयभेदेन स्मृतित्वानुभवत्व-योरङ्गीकारात्, रूपरसादीनां सत्ताभेदकत्वस्याङ्गीकाराच्च।

एवञ्च धर्म्यवच्छिन्ने संशयत्वात्यन्ताभावः स्थाणुत्वावच्छिन्ने संशयत्वम्। न चैवमेकैककोट्यंशेऽपि निश्चयत्वापत्तिः, उभयप्रकारकत्वगर्भसंशयत्वाभावादिति वाच्यम्। स्वप्रकारीभवद्धर्मविरुद्धप्रकारकज्ञानाभिन्नस्य संशयत्वात्। न च समूहालंबनेऽप्यतिव्याप्तिः। एकविशेष्यकत्वेन विशेषणात्। न च धर्म्यंशवारणाय तज्ज्ञानप्रकारविरुद्धप्रकारकत्वमपि वाच्यम्। तथा चैकविशेष्यकत्वे सति स्वप्रकारीभवद्धर्मविरुद्धप्रकारकज्ञानाभेदे सति तद्विरुद्धप्रकारकत्वापेक्षया लाघवात् स्वविषये स्वाकारविरुद्धद्वयवैशिष्ट्यावगाहिसमबलज्ञानाविरोधिज्ञानत्वं संशयत्वम्।

न च धर्म्यंशज्ञानातिव्याप्तिः, ज्ञानाभेदेन स्थाणुत्वादेस्तदाकारत्वादिति वाच्यम्। तस्यान्तःकरणवृत्तिरूपतया अविद्यावृत्तिरूपसंशयादन्यत्वादिति वाच्यम्। एतदपेक्षयैकविशेष्यकत्वे सति स्वप्रकारीभवद्धर्मविरुद्धप्रकारकज्ञानाभिन्नत्वस्य लघुत्वात्। उभयत्र ज्ञानपर्यन्तं तुल्यम्। अविरोधित्वस्याप्रतिबन्धकत्वात्मकत्वे अनिवर्तकत्वात्मकत्वे च तदपेक्षया भेदाभावमात्रं लघु भवत्येव। स्वशब्दस्य चाभिन्नपरत्वान्न धर्म्यंशातिव्याप्तिः।

अस्तु वा ज्ञानपरम्। न च धर्म्यंशेऽतिव्याप्तिवारणाय विशेषणस्य देयत्वात् गौरवम्। त्वयापि तदर्थं विशेषणस्य देयत्वात्। धर्मिज्ञानस्य संशयभिन्नत्वेनातिव्याप्तिवारणं तु न। लक्षणान्तरेऽपि इदं वारितम्।

यद्वा स्वाभिन्नज्ञानप्रकारविरुद्धप्रकारकत्वं संशयत्वम्। अतो न धर्म्यंशेऽतिव्याप्तिशङ्कापि।

वस्तुतस्तु एकविशेष्ये परस्परविरुद्धोभयप्रकारताकत्वं संशयत्वम्। न चैकैककोट्यंशेऽव्याप्तिः, ज्ञानस्य निरंशत्वात्।

नन्वेवं धर्मिण्यपि संशयत्वप्रसङ्ग इति चेन्न। धर्मिस्वरूपे संशयत्वस्येष्टत्वात्, विप्रतिपन्नं विमतमित्यादिना पक्षनिर्देशात्। न चैवं धर्मितावच्छेदकसंशयत्वमपि तस्य स्यादिति वाच्यम्। तद्गोचरत्वस्येष्टत्वात्। तन्निरूपितसंशयत्वं तु नेष्यते। संशयत्वमिति धर्मिविषयकत्वविरुद्धोभय-प्रकारकत्वात्मकत्वम्। तच्च धर्मिविरोधतत्प्रतियोगिभिर्निरूप्यते। न च धर्मितावच्छेदकं तन्निरूपकम्।

न च धर्मितावच्छेदकतद्विरुद्धकोटिकसंशयानिवर्तकं स्यादिति विवक्षितमिति वाच्यम्। संशयत्वशरीराप्रविष्टप्रकारताकत्वं निश्चयत्वम्। संशयत्वशरीरप्रविष्टा प्रकारता स्थाणुत्वनिष्ठप्रकारता पुरुषत्वनिष्ठप्रकारता च। परस्परविरुद्धप्रकारताकत्वस्य लक्षणशरीरप्रवेशात्। ज्ञानस्य प्रकारतया संबन्धो निरूप्यनिरूपकभावः। संशयत्वशरीराप्रविष्टप्रकारता धर्मितावच्छेदकनिष्ठा। तादृशनिश्चयश्च निश्चयत्वघटकप्रकारताश्रयस्य तत्प्रकारनिरूपितविशेष्यताश्रये संशयविरोधी। एवञ्च संशयत्वेऽपि धर्मितावच्छेदकनिश्चयत्वात् तत्कोटिकसंशयविरोधित्वमुपपद्यते। अत एव संशयत्वनिरूपको विषयः स्थाणुत्वादिः सन्दिग्ध इत्युच्यते। निश्चयत्वनिरूपकेंदत्वादिः निश्चितः इत्युच्यते। धर्मी तूभयानुप्रवेशात् स्थाणुत्वादिना सन्दिग्धः इदंत्वादिना निश्चित इति सर्वमनवद्यम्।

किञ्च 'स्वविषये स्वाकार' इत्यत्र स्वशब्दद्वयं ज्ञानपरं वा अविरोधिपरं वा। पूर्वस्वपदमप्यविरोधिपरं वा उत्तरस्वपदं ज्ञानपरमिति वा। नाद्यः, स्थाणुत्वादिसंशयाविरोधिनि 'अयं घट' इति ज्ञानेऽतिव्याप्तिः। न च तस्यापि तादृशघटत्वादिसंशयविरोधित्वान्नातिव्याप्तिः, कञ्चिदपि संशयं प्रति विरोधित्वाभावस्य विवक्षितत्वादिति वाच्यम्। तथा सति 'श्वेतश्शंख' इत्यनुमितौ पीतश्शङ्ख इति भ्रमाविरोधिन्यामतिव्याप्तिवारणार्थं कृतस्य समबलविशेषणस्य वैयर्थ्यात्, तस्यापि 'शंखः श्वेतो वा न वे'ति संशयविरोधित्वात्। धर्मिज्ञानस्य संशयादन्यत्वेन परिहारश्च व्यर्थः। शङ्काया एवाभावात्। किञ्च संशयमात्रस्य कोटौ कोट्यन्तरसंशयविरोधि-त्वादसम्भवः। न ह्ययं 'स्थाणुर्वा पुरुषो वे'त्यादिसंशये सति 'स्थाणुः पुरुषो वा न वा', 'स्थाणुत्वं पुरुषत्वं न वे'त्यादिसंशयाः सम्भवन्ति। न च 'स्थाणुत्वं पुरुषत्वविरोधि न वे'ति संशयो वास्ति।

किञ्च धर्मिज्ञानस्य कोटिज्ञानात् भेदे स्वविषये स्वाकारतद्विरुद्धद्वयवैशिष्ट्यावगाहिज्ञानाप्रसिद्धेः। कोटिज्ञानस्य धर्मगोचरत्वेऽन्यथाख्यातिप्रसङ्गः। इदं दूषणं पक्षत्रयसाधारणम्।

किञ्च यत्प्रकारकसंशयः कदापि नास्ति तादृशोत्पन्नविनष्टव्यक्तिविशेषनिष्ठधर्मविशेषप्रकारक-निश्चयेऽतिव्याप्तिः। अत एव न तृतीयः।

नापि द्वितीयः - व्यक्तिविशेषनिष्ठधर्मप्रकारकसंशयः कदापि नास्ति। तद्धर्मप्रकारकत्व-तदभिमतैककोटिकसंशयेऽव्याप्तेः। तस्यानवधारणत्वञ्च तदित्युत्तरकालं प्रामाण्यसंशयादवगम्यते।

ननु प्रामाण्यसंशयो यद्यप्रामाण्यकोटिकः तदा तमादायैव लक्षणसम्भवः। यदि प्रामाण्याभावकोटिकः तदा निश्चितेऽप्यर्थे तदभावानवगाहिनोऽस्य प्रामाण्यसंशयस्य सम्भवादलक्ष्यत्वान्नाव्याप्तिरिति चेन्न। तथा सत्यस्मात् प्रामाण्यसंशयान्निश्चितेऽप्यर्थे संशयसम्भवादग्रिमार्थसंशयानरोधेन प्रामाण्यसंशयानुरोधाच्च प्राचीनज्ञानस्यानवधारणत्व-कल्पनानुपपत्तेः। अनुमिते च वह्नौ वह्नितदभावकोटिकसंशयविरोधित्वादव्याप्तिः। न च पर्वते वह्निसंशयाविरोधित्वान्नैवमिति वाच्यम्। स्थाणुः पुरुषो न वेत्यादिसंशयविरोधित्वेन संशयमात्रेऽसम्भवात्।

न च यदंशेऽविरोधित्वं तदंशे संशयत्वम्, पुरोवर्तिनि चाविरोधित्वात् संशयत्वमिति वाच्यम्। अनुमितेरपि वह्न्यंशे संशयतापत्तेः। न चैतदिष्टं व्याप्तिधीजन्यत्वात्।

ननु यत्किञ्चित् स्वाकारतद्विरुद्धवैशिष्ट्यावगाहिज्ञानाविरुद्धत्वं न विवक्षितम्। किन्तु सामान्यतो वह्नौ च वह्नित्वसंशयविरोधित्वमस्ति। अंशविवक्षया न पूर्वोक्तासम्भवः। न चोर्ध्वतादिसंशय-विरोधित्वादसम्भवः, धर्मिज्ञानस्य संशयादन्यत्वात्, निर्विशेषात्मज्ञाने त्वेतदस्तीति चेन्न, त्वदभिमतैककोटिकजलानवधारणे शौक्ल्यपुरोवर्तित्वाद्याकारे तदाकारसंशयविरोधिन्यव्याप्तेः। नहि तदप्यनवधारणजलत्वज्ञानात् भिन्नम्, अन्तःकरणवृत्तित्वात् सामग्रीसमावेशेनैक्यसिद्धेः।

ननु यस्मिन् विषये यत्स्वाकारवैशिष्ट्यं विषयीक्रियते तत्र तद्विरुद्धवैशिष्ट्यानवगाहिज्ञानाविरुद्धत्वं तत्संशयत्वम्, अतो नैते दोषा इति चेन्न, निर्विशेषज्ञानासंग्रहात्। तस्य निष्प्रकारकस्य वैशिष्ट्याविषयत्वात्। सप्रकारकत्वाभेदवैशिष्ट्याविषयत्वाभ्युपगमपक्षेऽपि यत्र यद्वैशिष्ट्यं गृह्यते तत्र तद्विरुद्धवैशिष्ट्यावगाहिज्ञानाविरोधित्वं तत्र तत्संशयत्वमिति। एतदपेक्षया यत्र यस्य यद्विरुद्धस्य च वैशिष्ट्यं गृह्यते स तत्र तत्संशय इत्यस्य लघुत्वात्। न हीदानीं धर्म्यंशसंशयत्वादिशङ्का गुरुरप्याद्रीयेत।

किञ्च ब्रह्मणोऽब्रह्मणि प्रकारत्वे सद्वितीयाद्वितीयत्वयोर्ब्रह्मरूपप्रकाराविरोधाभावात् सद्वितीयत्वाद्वितीयत्वसंशयावलम्बनेनैककोटिकाद्वैतानवधारणोपपादनमनुपपन्नम्।

किञ्च ज्ञानाविरोधित्वमित्यत्र किं विरोधित्वं निवर्तकत्वं प्रतिबन्धकत्वं वा। नाद्यः, संशयमात्रस्य विरोधिगुणत्वेन निवर्तकत्वादसम्भवात्। नान्त्यः, प्रतिबन्धकत्वतदभावयोरवच्छेदकग्रहं विना दुर्ग्रहत्वात्। तत्सत्त्वे च तद्रहितत्वस्यैव संशयत्वात्मकत्वात्। अवच्छेदकञ्च न निश्चयत्व-मन्योन्याश्रयात्। संशयनिवृत्त्यनुकूलस्वरूपविशेषवत्त्वं निश्चयत्वमिति निर्वचनात्। भूयोऽवयवसन्निकर्षजन्यत्वविशेषदर्शनजन्यत्वादिकमननुगतमवच्छेदकम्। तथापि प्रतिबध्यतावच्छेद-कग्रहं विना प्रतिबन्धकत्वस्य दुर्ग्रहत्वात्। प्रतिबध्यतावच्छेदकञ्च नोक्तसंशयत्वम्, एककोटिकानवधारणस्य निर्णयानन्तरमपि प्रसङ्गात्। न तस्य पृथगेव प्रतिबध्यता। एककोटिकानवधारणत्वस्यान्योऽन्याश्रयग्रसत्वात्। रूपान्तरस्य चासाधरणस्य दुर्वचत्वात्।

न च विशेषदर्शनाद्यजन्यत्वेनानवधारणद्वयस्याप्येकरूपेण प्रतिबध्यता, जन्यतावच्छेदकानिरूपणे तस्य दुग्रहत्वात्। विशेषदर्शनभूयोऽवयवसन्निकर्षजन्यतावच्छेदकञ्च यदि निश्चयत्वाघटितम्, तदा संशयेऽपि जनकताप्रसङ्गः। यदि निश्चयत्वघटितम्, तदा तस्य त्वया निरुक्तस्यावच्छेदकत्वेऽन्योऽन्याश्रयादेककोटिकत्वमेव तद्वाच्यम्। तस्य चानवधारणत्वाभिमतैककोटिकज्ञानसाधारणत्वात् तस्यापि निश्चयत्वापत्तिः।

न चानभ्यासदशापन्नज्ञानान्यत्वेन जन्यतावच्छेदकं विशेष्यत इति वाच्यम्। तस्य संशयत्वे सिद्धे हि तद्व्यावर्तकविशेषणान्तर्भावः। अन्यथा गौरवप्रसङ्गात्। किञ्च लाघवादेककोटिकत्वं प्रतिबन्धकतावच्छेदकम्, एकत्र विरुद्धोभयकोटिकत्वं प्रतिबध्यतावच्छेदकमिति न पूर्वज्ञानस्य संशयत्वम्। विशेषदर्शनाद्यजन्यत्वस्य प्रतिबध्यतावच्छेदकत्वे विशेषदर्शनजन्यत्वादीनां बहूनां प्रतिबन्धकतावच्छेदकत्वे च गौरवात्।

किञ्च त्वन्मते यदि ज्ञाने नांशभेदस्तदा स्वविषये स्वाकारतविरुद्धद्वयवैशिष्ट्यावगाहित्वमेव संशयलक्षणमस्तु। लघुत्वात्। एकैककोट्यंशेऽव्याप्तिशङ्काभावात्। यद्यंशभेदस्तदा लाघवादेव तादृशज्ञानाभिन्नत्वं संशयत्वमित्युभयथापि नैककोटिकमनवधारणम्। न च धर्म्यंशेऽतिव्याप्तिः। तादृशज्ञानाविरोधित्वमित्युक्तेऽपि तत्प्रसङ्गात्। संशयाभेदस्य च पक्षद्वयेऽपि वक्तुं शक्यत्वात्।

किञ्च कस्मिंश्चिदर्थे संशये जाते तस्मिंश्च स्वयमेव युक्त्या निश्चयान्निवृत्ते सति पुनस्तत्र द्वयोः परीक्षकयोर्विवादात् संशयो दृश्यते। तत्र स्वयं युक्त्यनुसन्धानजन्यं ज्ञानं संशयश्चेत् पूर्वसंशयो निवर्तेत। तन्निश्चयश्चेदनन्तरं संशयो न स्यात्। तत्राहितसन्देहश्चेदेककोटिकज्ञानस्थले सर्वत्र तथैव युक्तम्।

किञ्चैककोटिकज्ञानानन्तरं द्विकोटिकज्ञानोत्पत्तेः 'प्रागयमर्थो निश्चित' इति बुद्धिव्यवहारौ दृश्यते। ततो द्विकोटिकज्ञानानन्तर'मेतावत्कालं निश्चयः स्थित इदानीं सन्देहो जायत' इति बुद्धिव्यवहारौ दृश्येते। अतोऽनुभवानुरोधात् नैककोटिकं ज्ञानं संशयः।

किञ्चात्र द्विविधानवधारणानुगतं निश्चयव्यावृत्तं कारणञ्च दुर्घटम्। तथा द्विकोटिकसंशयनिश्चय-व्यावृत्तमेककोटिकानवधारणानुगतमपि।

नन्वस्तु कश्चित् दोषः सामान्यकारणम्, अन्यो दोषो विशेषकारणम्। न चैककोटिकस्या-प्रामाण्यप्रसङ्गः। अस्य दोषस्यानवधारणप्रयोजकत्वेनाप्रामाण्यप्रयोजकदोषा-दन्यत्वादिति चेन्न। पूर्वोदाहृतसंशयद्वयमध्यगतैककोटिकज्ञानस्य संशयनिवर्त्तकत्वसंशयसहत्वाभ्यां दोषजन्यत्वतदभाव-योरापत्तेः।

किञ्च न ह्यस्य दोषस्य कश्चिदस्ति मौहूर्तकः यन्मुखाद्भाविनीं द्विकोटिकसंशयहेतुं विपरीततर्कप्रमाणप्रवृत्तिमुपनिशम्य प्रागेवोत्पद्यमानं ज्ञानमवधारणीकर्तुं तत्सामग्र्यामयमनुप्रविशेत्।

वस्तुतस्तु भासमानविरोधवद्धर्मप्रकारकत्वं न संशयत्वम्। येन लाघवमन्विच्छसि। तावन्मात्रात् संशयत्वे 'परस्परविरुद्धस्थाणुत्वपुरुषत्ववानि'ति प्रतीत्याकारापत्तेः। अनुमित्युपनीतश्वैत्यगोचरशंखपीतप्रत्यक्षस्य श्वैत्यपीतत्वविरोधगोचरस्य निश्चयस्य परस्परविरुद्धाहार्यारोपस्य च संशयत्वापत्तेश्च।

किन्तु कश्चिद्वैलक्षण्यविशेषः। स च तद्विरूद्धवैशिष्ट्यावगाहने सत्यपि तदवगाहनाविरोधप्रयोजक'स्थाणुर्वा पुरुषो वे'ति'वा'शब्दगर्भव्यवहारनिमित्तताप्रयोजकः कोटिद्वयस्मरणसाधारणधर्मदर्शनादिजन्यो जन्यतावच्छेदको वा विरोधविषयत्वेऽपि निर्धारणात्मकपूर्वोदाहृतोपनीतश्वैत्यगोचरशंखपीतभ्रमव्यावृत्तः इक्षुक्षीरादिमाधुर्यवत् सर्वानुभवसाक्षिकस्संशयमात्रानुगतो विषयीकरणविशेषः, तथैव निश्चयत्वमपीति सर्वलोकसंप्रतिपन्नलक्ष्यानुसारादनुभवानुसाराच्च एवमेव वक्तुं युक्तम्। प्रपञ्चयिष्यते च विषयीकरणविशेषो अद्वैतविद्याविजये अनिर्वचनीयभङ्गे।

यच्च यद्यत् संशयनिवृत्त्यनुकूलस्वरूपविशेषवत् तत्तन्निश्चय इति निश्चयलक्षणम्। तदपि न, मुक्तिकालीनस्वरूपानन्दावधारणात्मप्रकाशेऽव्याप्तेः। तस्य निवर्तकत्वे इदानीमपि संशयाभावप्रसङ्गात्। तदेव हि स्वरूपमिदानीमपि। अनवधारणत्वमपि कल्पितमिति चेत्, किं ततः वास्तवमवधारणं तिष्ठत्येव। चरमवृत्तेरवधारणस्वरूपत्वे तस्यैवाज्ञानविरोधिता स्यात्, न तु ज्ञानस्य; आवरणकल्पनावैयर्थ्यञ्च।

एतेन चरमवृत्त्यधीनं स्वरूपस्यावधारणमित्यपि निरस्तम्। स्वरूपमवधारणमेव, प्रतिबन्धादीदानीं संशयन्न निवर्तयतीत्युक्तौ प्राथमिकशाब्दज्ञानस्यानवधारणत्वाङ्गीकारविरोधः, प्रतिबन्धादेवानिवृत्तेः।

किञ्च चरमसाक्षात्कारस्य मुक्तिकालीनस्वरूपानन्दप्रकाशस्य च तद्धर्मिकसंशयविरोधित्वं तत्कोटिकसंशयविरोधित्वं वा नास्त्येव स्वरूपमात्रगोचरत्वात्। न हि घटमात्रगोचरज्ञानं तद्धर्मिकस्य वा तत्कोटिकस्य वा संशयस्य विरोधी भवति।

ननु स्वरूपमात्रगोचरस्यापि चरमसाक्षात्कारस्यैककोटिकसंशयविरोधित्वमस्त्येवेति चेन्न। तस्य द्विकोटिकसंशयाविरोधितया प्राथमिकापातप्रतीतिवदेव विरुद्धप्रकारकज्ञानस्य विरोधितया संशयत्वेन तस्यापि संशयस्य तेनाविरोधात्।

कि'ञ्चायं घट' इत्यादिनिश्चये 'रक्तः कृष्णो वे'त्यादिसंशयाविरोधादव्याप्तिः। यत्किञ्चित्संशयनिवर्तकत्वं तु स्थाणुपुरुषसंशयेऽपि तत्र विरोधभानेन 'स्थाणुत्वं पुरुषवृत्ति न वा', 'पुरुषत्वसमानाधिकरणं न वा' इत्यादि संशयनिवर्तकत्वात्, धर्मितावच्छेदकसंशयनिवर्तकत्वाच्च।

न चेदन्त्वस्य धर्मितावच्छेदकत्वात्तस्य च केवलान्वयित्वात् तत्कोटिकसंशयाप्रसिद्धिः।

तत्तद्व्यक्त्यसाधारणधर्मविशिष्टस्वरूपस्यैव इदंशब्दार्थत्वात्। केवलान्वयित्वव्यवहारस्तु इदंशब्दप्रयोगविषयतागोचरः। यदि तद्धर्मिकसंशयविरोधित्वं तन्निश्चयत्वं तदा स्थाणुपुरुषसंशयः स्थाणुत्वपुरुषत्वेदन्धर्मिकसंशयविरोधित्वात् किञ्चित् संशयोऽपि न स्यात्। 'स्थाणुत्वं पुरुषवृत्ति न वे'त्यादिसंशयविरोधित्वात्। चरमसाक्षात्कारस्य तद्धर्मिकसंशयाविरोधित्वं चोक्तमेव। तद्धर्मिकतत्कोटिकसंशयनिवृत्त्यनुकूलस्वरूपविशेषवत् ज्ञानं तद्धर्मिकतत्कोटिकनिश्चय इति विवक्षायां साधु समर्थितं चरमसाक्षात्कारस्य निर्विशेषप्रकाशस्य निश्चयत्वम्।

न च ब्रह्मरूपसत्त्वासत्त्वसंशयनिवृत्त्यनुकूलस्वरूपविशेषवत्त्वात् तन्निश्चयत्वमिति वाच्यम्। प्राथमिकज्ञानस्यापि तद्विरोधित्वात्। तद्धि निर्विशेषत्वसविशेषत्वसंशयं प्रत्येवाविरोधि।

यच्चैककोटिकज्ञानस्यानवधारणत्वसमर्थनार्थमुक्तम् - अनभ्यासदशापन्नजलज्ञानानन्तर'मिदं जलन्न वे'ति संशयदर्शनात् तत् संशयकोटिनिक्षिप्तमिति। तदपि न ज्ञानप्रामाण्याप्रामाण्य-सन्देहादर्थसन्देहोपपत्तेः। यदि तस्यार्थसन्देहपर्यवसानं ब्रूषे तर्हि दोषजन्यत्वतदभाव-सन्देहादर्थसन्देहोऽस्तु।

यद्वा प्रामाण्यतदभावकोटिकस्संशयोऽस्तु। तत्र जले जलत्वाभावावगाहनाभावेन विरोधाभावात्। विशेष्यावृत्त्यप्रकारकत्वतदभावसन्देहाद्वा संशयोऽस्तु। विशेष्यावृत्तिप्रकारकत्वाभावाभावत्वेन विशेष्यावृत्तिप्रकारकत्वस्योपस्थितावपि विशेष्यावृत्तिप्रकारकत्वत्वरूपेणानुपस्थितेः। 'जलत्ववति जलत्वप्रकारकं तदभाववति वे'त्येव प्रामाण्याप्रामाण्यसंशयोऽस्तु। न च तद्वत्त्वस्य ग्रहात् तत्संशयासम्भवः। इदन्त्वावच्छेदेन तद्वत्त्वग्रहात्तदवच्छेदेन तदभावाग्रहाद्विरोधाभावात्, एकावच्छेदेन भावाभावयोर्ग्रह एव विरोधात्। अन्यथा 'शुक्ती रजतं न भवती'त्याकाररजतत्वाभावग्रहे रजतभ्रमाभावप्रसङ्गात्।

यद्वा अप्रामाण्यज्ञानतत्सामग्र्यसहकृतनिश्चयस्संशयप्रतिबन्धकः। अन्यथा स्वयं युक्त्या निश्चितेऽर्थे बहुज्ञवादिद्वयविवाददर्शनादर्थे प्रामाण्ये च संशयानुपपत्तेः।

किञ्च प्राथमिकज्ञानस्य संशयानिवर्तकत्वादनवधारणत्वं वदता संशयनिवर्तकज्ञान-स्यैवेष्यमाणतोक्ता। अद्वैतसाक्षात्कारश्च निष्प्रकारकत्वान्न संशयनिवर्तकः। समानप्रकारक-निश्चयत्वेनैव संशयनिवर्तकत्वात्।

ननु ज्ञानं समानविषयकतया संशयनिवर्तकम्, न तु समानप्रकारकतया, अन्यविषयतद्दर्शनात्। समानविषयत्वमप्यपेक्षणीयमिति चेत्, संशयादपि प्रसङ्गः। निश्चयत्वमप्यपेक्षणीयमिति चेत्, तर्हि समानविषयनिश्चयस्संशयनिवर्तको लाघवादिति। मैवम्। ''ढेंआत्माश्रयप्रसङ्गात्। संशयनिवृत्त्यनुकूलस्वरूपविशेषवत्त्वं निश्चयत्वमित्युक्तम्। न च विशेषदर्शनप्रभवसमान-विषयकज्ञानत्वं संशयनिवर्तकतावच्छेदकमिति मीलितनेत्रस्य त्वचा गृह्यमाणे घटे 'किमयं लोहितो नीलो वे'ति संशयस्य चक्षुरुन्मीलनानन्तरं जातेन लोहितनिश्चयेनानिवृत्तिप्रसङ्गात्। नहि तल्लोहितज्ञानंविशेषदर्शनजन्यम्।

ननु विशेषदर्शनप्रभवत्वभूयोऽवयवसन्निकर्षजन्यत्वनिकटस्थार्थजन्यत्वादिकमवच्छेदकमिति चेन्न, तेषामन्यतमत्वरूपेणानुगतीभूयावच्छेदकत्वे प्रत्येकं भिन्नभिन्नकार्यतावच्छेदकावच्छिन्न-संशयनिवृत्तिजनकतावच्छेदकत्वे च गौरवाल्लाघवेन समानविषयसमानप्रकारकैककोटिकज्ञानत्वेनैव निवर्तकत्वात्, 'इदमि'ति ज्ञानानन्तरं 'घटो न वे'ति संशयाभावापत्तेश्च।

ननु घटत्वादिवैशिष्ट्यविषयत्वाभावेन समानविषयत्वं नेति चेत्, तत्किं यावत् संशयविषयविषयकत्वेन निवर्तकत्वम्, तर्ह्यसम्भव एव, स्थाणुत्वादिनिश्चयस्य पुरुषविषयत्वाभावात्।

नन्वन्यतरकोट्यंशान्यूनविषयत्वं समानविषयत्वम्। 'स्थाणुरेवे'ति निश्चयस्तादृश एव। 'इदमि'ति धर्मिज्ञानं धर्म्यन्तरे 'पुरुष' इति ज्ञानञ्च न तथा, प्रकारवैशिष्ट्यर्मिणां कोट्यंशविषयत्वादिति चेन्न, निर्विशेषानवधारणजलानवधारणनिवर्तकत्वानुपपत्तेः। तत्रकोटिशब्दार्थप्रकारस्यान्यतरार्थस्य चाभावात्।

कि'ञ्चायं घट' इति निश्चया'दिदं घटत्वं न वे'ति संशयनिवृत्तिर्न स्यात्। घटत्वत्ववैशिष्ट्याविषयत्वेनान्यूनविषयत्वाभावात्।

न च विषय एव कोट्यर्थः, 'इदमि'ति ज्ञानादपि निवृत्तिप्रसङ्गात्। एवं 'जीवो ब्रह्म न वे'ति संशयानिवर्तकतापत्तिश्च, ब्रह्मकोट्यंशविषयकोटितद्वैशिष्ट्यधर्मिणां चरमाखण्ड-साक्षात्काराविषयत्वात्। न चैकब्रह्मस्वरूपस्यैव तत्त्रितयात्मत्त्वादन्यूनविषयतेति वाच्यम्। तथा स'त्यभावो भावभिन्नो न वे'ति संशय'स्यायं भाव' इति ज्ञानान्निवृत्तिप्रसङ्गात्, कोटिविशेषणस्य सर्वज्ञत्वजगत्कारणत्वब्रह्मत्वादेस्तत्राप्रकाशाच्च। तथापि निवर्तक'त्वेऽयं ब्राह्मण' इति ज्ञाना'दयं विद्वद्ब्राह्मणो न वे'ति संशयनिवृत्यापत्तेः। किञ्च कुड्यत्वनिश्चयस्य स्थाणुत्वपुरुषत्वकोटिक-संशयनिवर्तकत्वाभावापत्तिः।

ननु समानविषयनिश्चय एव संशयनिवर्तकः। न चे'दमि'ति ज्ञानान्निवृत्तिप्रसङ्गः। कोटिविरुद्धसामानाधिकरण्येनानिश्चीयमानधर्माप्रकारकसमानविषयावधारणत्वस्य विवक्षितत्वात्। स्थाणुपुरुषसंशयस्य वल्मीकनिश्चयेनापि निवृत्तिदर्शनाद्विरुद्धपदम्। संशयदशायां कोटिविरुद्धसामानाधिकरण्येन इदन्त्वधर्मो न निश्चीयते। स एव 'स्थाणुरेवायमि'ति निश्चयदशायां पुरुषकोटिविरुद्धस्थाणुत्वसामानाधिकरण्येन निश्चीयते। एवञ्च स्थाणुत्वनिश्चये कोटिविरुद्धसामानाधिकरण्येन निश्चीयमानधर्मप्रकारकत्वात् कोटिविरुद्धसामानाधिक-रण्येनानिश्चीयमानधर्माप्रकारकत्वलाभः। अखण्डज्ञाने च निष्प्रकारकत्वादिति चेन्न, कोटिशब्दार्थाभावेन निर्विशेषानवधारणस्य तदवधारणस्य तदवधारणनिवर्त्यत्वानुपपत्तेः। 'स्थाणुः पुरुषो वे'ति संशयस्य 'देवदत्तः पुरुष' इति निश्चयान्निवृत्तिप्रसङ्गश्च (प्रसङ्गाच्च ?)।

ननु संशयहेत्वज्ञाननिवर्तकज्ञानत्वेन संशयनिवर्तकत्वमस्तु। न चाज्ञानसमानविषयत्वेनाज्ञाननि-

वर्तकत्वात् तादृशाज्ञानसमानविषयकत्वेनैव संशयनिवर्तकता स्यादिति वाच्यम्। तथापि निर्विशेषसाक्षात्कारादेर्निवर्तकत्वसम्भवेन प्रकृते क्षत्यभावात्।

वस्तुतस्तु समानविषयकत्वस्य संशयेऽपि सत्त्वात् निश्चयत्वस्यापि प्रवेश्यत्वे गौरवम्, निश्चयत्वं संशयनिवर्तकत्वमित्यात्माश्रयश्च। निश्चयपदेन विशेषदर्शनजन्यत्वादेः विवक्षितत्वे संशयनिवर्तकाननुगमः।

किञ्च चन्द्रत्वाविशेषितचन्द्रस्वरूपप्रकृष्टप्रकाशादिः वाक्यार्थ इति पक्षे चन्द्रत्वविशिष्टविषयाज्ञानं यदि संशयहेतुस्तदा तदज्ञानन्यूनविषयत्वाद्वाक्यजन्यावधारणात् संशयो न निवर्तेत। यदि तत्स्वरूपमात्रविषयं हेतुः तदा स्थाण्वादावपि तथात्वा'दिदमि'ति ज्ञानस्याप्यन्यूनविषयत्वा-दतिप्रसङ्गस्तदवस्थः।

किञ्च जडस्याज्ञानाविषयत्वात्तदवच्छिन्नचैतन्य'स्येदमि'ति ज्ञानेऽपि विषयत्वादतिप्रसङ्गः। न चाज्ञानावच्छेदकविषयकत्वमेव विवक्षितमिति वाच्यम्। निर्विशेषब्रह्मणो ज्ञानविषयत्वेन तत्साक्षात्कारे तदभावात्। तस्मात् संशयहेत्वज्ञाननिवर्तकज्ञानत्वेन संशयनिवर्तकत्वमिति चेन्न।

स्थाणौ संशयस्य परोक्षनिश्चयादपि निवृत्तेः। तत्राविद्यमानपुरुषत्वनिश्चयादपि निवृत्तेरनुभवसिद्धत्वाच्च। संशयहेत्वज्ञानसमानविषयत्वमप्यत एव नावच्छेदकम्। अन्यथा स्थाणुसंशयस्य पुरुषत्वनिश्चयादनिवृत्तौ निवृत्तिशब्दविवक्षितस्य संशयानुत्पादस्याज्ञाननिवृत्तौ सत्यां कारणाभावादेव सिद्धेः। निश्चयस्य संशयप्रतिबन्धकतावच्छेदकविचारस्यैवानवकाशात्। तस्मात् संशयहेत्वज्ञानेन समानविषयत्वं वा तन्निवर्तकत्वं वा न संशयनिवर्तकतावच्छेदकम्। तस्मात् संशयधर्मितावच्छेदकावच्छिन्नधर्मिणः संशयकोटिविरुद्धस्य च संसर्गनिश्चयस्संशय-निवर्तकः। ते'नायं घटो न वे'ति संशये 'अयं घटः', 'अत्र घटत्वमि'ति द्वयोरपि ज्ञानयो'रयं पट' इति संशयाविषयपटत्वनिश्चयस्य च निवर्तकत्वसिद्धिः।

ननु मास्तु तर्हि निर्विशेषनिश्चयस्य संशयनिवर्तकता। अज्ञाननिवर्तकत्वादिष्यमाणतास्तु। अज्ञानान्यूनविषयस्य तन्निवर्तकत्वाद्ब्रह्माज्ञानस्य केवलचिद्विषयत्वादिति चेन्न। संशयानिवर्तकत्वे त्वदुक्तलक्षणाक्रान्तस्य संशयत्वेनाज्ञाननिवर्तकत्वस्याप्यनुपपत्तेः।

किञ्च कोट्यभावभानाद्वा तद्विरोधिभानाद्वा निश्चयस्सर्वत्र संशयनिवर्तकः। अखण्डज्ञाने तदुभयभानाभावात् कथं निवृत्तिः। स्वरूपस्यैव भेदकोट्यभावरूपत्वात् कथं भानाभाव इति चेत्, किं तत्राभावः प्रतियोगिनिरूपितरूपेण भासते उत स्वरूपेण। नाद्यः, स्वरूपमात्रप्रकाशे प्रतियोगिनोऽभानेन तन्निरूपितरूपेण भानासिद्धेः।

न द्वितीयः। तथा सति निवर्तकत्वासम्भवात्। अन्यथा स्वप्रकाशस्वरूपनिर्धारणमात्रा-दुक्तसंशयनिवृत्त्यापत्तेः। न च कारणविशेषप्रभवसमानविषयनिर्धारणं निवर्तकम्। प्रकृते च कारणविशेषो मननादिरिति वाच्यम्। प्राथमिकज्ञानस्यानवधारणत्वकल्पना वैयर्थ्यात् कारणविशेषस्याननुगमाच्च।

यच्च द्वितीयं मतम् - सविशेषत्वभ्रमात् तत्सन्देहाद्वा जिज्ञासा जायते। सा च निर्विशेषोपदेशान्निवर्त्यत इति निर्विशेषगोचरा जिज्ञासेत्युच्यत इति।

तत्र किमुपदेशेन स्वरूपमेव बोध्यते किंवातिरिक्तमपि। आद्ये जिज्ञासाया अनिवृत्तिप्रसङ्गः। द्वितीये सविशेषत्वम्। द्वितीयाभावो बोध्यत इति चेन्न। ब्रह्मणो जिज्ञासानुपपादनात्। द्वितीयाभावविशिष्टरूपेण ब्रह्म प्रतिपाद्यत इति चेन्न, वैशिष्ट्यासिद्धेः, साधनचतुष्टयपूर्ववृत्तत्वाभावप्रसङ्गाच्च। अपिच सविशेषत्वभ्रमः किमहङ्कारस्य उतात्मनः अथवा विशिष्टस्य। नाद्यः, तस्यैव जिज्ञासाज्ञानमोक्षाणां प्रसङ्गात्। न द्वितीयः, स्वतस्सिद्धाद्वैतापरोक्षनिश्चयस्यात्मनस्तद्भ्रमायोगात्। न तृतीयः, विशिष्टपदेन विशेषणविशेष्यविवक्षायामुक्तदोषानतिवृत्तेः। अवच्छिन्नप्रतिबिम्बविवक्षायामपि अवच्छेदप्रतिबिम्बाभावाभ्यामद्वितीयापरोक्षस्वरूपावधारणे कलयापि वैकल्याकरणात् भ्रमासम्भव एव। ताभ्यां भेद एव हि सम्पाद्यते, न तु प्रकाशवैकल्यम्। अथ भेदे सत्यविद्योपाधिमाहात्म्यात् अद्वैतापरोक्षे विद्यमान एव जीवस्य भ्रम उपपद्यते। दृश्यते हि चन्द्रकत्वे भासमान एव दोषमाहात्म्यात् द्वित्वभ्रमः। दृश्यते च तीरस्थवृक्ष और्ध्वाग्र्ये भासमान एव जलोपाधिमाहात्म्यादधोऽग्रत्वभ्रम इति चेत्, तद्वदेव भ्रमस्य ज्ञाननिवर्त्यत्वप्रसङ्गात्। उपाधिनिवृत्त्यैव हि तत्र भ्रमनिवृत्तिः।

ननु तत्रैकत्वोर्ध्वाग्रत्वयोरुपाध्यविरोधित्वात् तत्साक्षात्कारेण नोपाधिनिवृत्तिः। इह त्वविद्योपाधेरप्यद्वैतविरोधित्वात् भवत्येव विरोधिसाक्षात्कारान्निवृत्तिरिति चेन्न। तथा सति स्वरूपापरोक्षे जाग्रत्यविद्याध्यासस्यैवासम्भवाम्। आवरणोपाधिना तदुपपत्तावन्योऽन्याश्रयात्, अविद्याधीनमावरणमावरणाधीना अविद्येति।

किञ्चाविद्यावदावरणस्याप्यद्वैतविरोधित्वेन तस्यैवासम्भवात् कथं तस्याविद्योपपादकत्वम्।

ननु निवर्तकसन्निधाने निवर्त्यस्थित्यनुपपत्त्या अद्वैतसाक्षात्कारे विद्यमाने आवरणाध्यासासम्भवो वाच्यः। निवर्तकञ्चाप्रतिबन्धकज्ञानमेव। इह चाविद्यावरणयोः परस्परमध्यासोपाधितया परस्परनिवृत्तिप्रतिबन्धकतयाप्रतिबन्धज्ञानासिद्धेरविद्याया आवरणस्य वा नानुपपत्तिरिति चेन्न। तथा सति अविद्यातत्सम्बन्धयोरेव परस्परोपाधित्वसम्भवेनावरणत्वकल्पनानपपत्तेः। अविद्यातत्सम्बन्धावरणाध्यासानामनादितया औपाधिकाध्यासत्वासिद्धेश्च। उपाधिरूपदोषविशेषजन्यत्वेऽविद्योपाधिकत्वम्।

किञ्च निवर्तकत्वमुपजीव्य नेह विरोधं ब्रूमः। किन्तु ज्ञानाज्ञानयोः ज्ञानतदभावयोरिव विरोधादेव। अन्यथा 'अहमज्ञ' इति प्रतीतेः कथं तत्र प्रामाण्यम्।

किञ्च ज्ञाने सत्यज्ञाननिवृत्तौ ज्ञानाभाव इव न प्रतिबन्धसम्भवः, क्वाप्यदर्शनात् सोपाधिकभ्रमस्थले दृष्टमिति चेन्न, और्ध्वाग्र्यज्ञानेन तदज्ञानस्य निवृत्तेरानुभविकत्वात्। तथापि तदनङ्गीकारे ज्ञानस्याज्ञाननिवर्तकत्वस्यैवोत्सादनात् कथं तर्ह्यधोऽग्रत्वाध्यासः। ब्रह्माज्ञानादेवेति ब्रूहि क्षणमात्रम्। अनन्तरञ्च निपुणं निरूप्य जलोपाधिवशादेवेति।

यच्च तृतीयं मतम् - अप्रतिबद्धापरोक्षज्ञानमविद्यानिवर्तकं तदेवेष्यते। इदानीं विद्यमानं स्वरूपापरोक्षं वृत्तिज्ञानं वा प्रतिबद्धमेवेति न तदविद्यानिवर्तकम्। प्रतिबन्धिका भेदवासनेति। तदप्यविद्याभ्रमसम्भवोपपादनादेव निरस्तम्।

किञ्च भेदवासनायाः प्रतिबन्धकत्वं चासिद्धम्। बहुकालं रजतभ्रमवासनायां विद्यमानायामेव शुक्तिज्ञानेनाविद्यानिवृत्तिदर्शनात्।

किञ्च तस्याः प्रतिबन्धकत्वे तस्या अविद्यानिवृत्तेः प्राक् केनाप्यनिवृत्त्या तन्निवृत्तिसापेक्षाविद्यानिवृत्तिः कदापि न स्यात्। निदिध्यासनेन भेदवासनायां निवृत्तायामनन्तरोत्पन्नं ज्ञानमविद्यां निवर्त्तयतीति चेन्न। निदिध्यासनस्यादृष्टमुखतो निवर्तकत्वे तदन्तर्गतत्रिचतुरव्यक्तिमात्रेण भेदवासना निवर्तेत। दृष्टमुखत्वेऽनादिसिद्धाया भेदवासनाया अनन्ताभेदवासनयैव निवृत्तिप्रसङ्गः।

किञ्चाभेदवासनाया भेदवासनाविरोधित्वं तद्वासनायास्तद्विपरीतवासनाविरोधित्वं वा क्वाप्यदृष्टचरम्। प्रत्युत तेजस्तिमिरवासनयोरविरोधित्वमेव हि दृश्यते। त्वयाथ घटाद्यर्थानामपि संस्कारस्य स्वीकारात् चन्द्रैकत्ववासनायां विद्यमानायामेवाङ्गुल्यवष्टम्भेन भेदवासना दृश्यते। सा च वासना बहुकालमनुवृत्तापि चन्द्रकत्ववासनां न निवर्तयति।

अपिच भेदवासनायां निवृत्तायां चरमसाक्षात्काररूपवृत्त्युत्पत्तिश्चानुपपन्ना। तभ्रमस्याभेदवासनासाध्यत्वात्।

किञ्च निदिध्यासनस्य चेतोवृत्तिरूपभेदस्य ध्यानदशायां ज्ञायमानतया निदिध्यासनेन भेदवासना वज्राकीलिता स्यात्। किञ्चाभेदवासनया भेदवासनानिवृत्तौ निदिध्यासनस्यैवेष्यमाणता स्यात्, न तु तज्जन्यज्ञानस्येति न जिज्ञासा, भेदवासनानिवृत्तावुत्तरकालं भेदाध्याससम्भवेन बन्धस्यैवासिद्धेः। भेदवासनाया भेदभ्रमहेतुत्वाभ्यपगमादविद्या न निवृत्तेति चेत्, किं ततः, विद्यमानाया अपि तस्यास्संसारहेतुत्वात्। अत एव ह्यात्मनस्सहकारिवशात् संसरणहेतुत्वेऽपि सहकारिभूताविद्यानिवृत्तौ संसरणनिवृत्तये तन्निवृत्त्यनपेक्षा।

किञ्च ज्ञानस्याज्ञाननिवर्तकत्वे न प्रतिबन्धसम्भव इति प्रागेवोक्तम्।

यच्च तत्त्वज्ञानस्य प्रतिबन्धादज्ञानानिवर्तकत्वे निदर्शनं विशेषदर्शनम् - यथा प्रतिबन्धान्न प्रतिबिम्बभ्रमं निवर्तयति तथा प्रतिबन्धादज्ञानं न निवर्तयतीति तन्न। तत्र विशेषदर्शनस्य तन्निवर्तनायोग्यत्वात् प्रतिबन्धकानपेक्षणात्, विशेषदर्शनजन्यभ्रमस्यैव विशेषदर्शननिवर्त्यत्वात्।

ननु विशेषदर्शनविषयविरुद्धविषयभ्रमत्वमेव निवर्त्यतावच्छेदकम्, विशेषादर्शनजन्यभ्रमत्वापेक्षया लघुत्वात्। विरोधस्य नियमघटितत्वेऽपि जन्यत्वस्यानन्यथासिद्ध्यादि घटितत्वेन ततोऽपि गुरुत्वादिति चेन्न। विशेषदर्शनमन्तरेणोपाधिनिवृत्त्या निवृत्तिस्थले व्यभिचारेण तस्य तदवच्छेदेन निवर्तकत्वाभावात्।

न चोपाधिनिवृत्त्याद्यनिवर्त्यत्वेन विशेषणान्न व्यभिचार इति वाच्यम्। उपाधिनिवृत्त्याद्यनिवर्त्त्यसोपाधिकभ्रमस्यासत्त्वेन तदर्थं प्रतिबन्धकल्पनावैयर्थ्यात्।

किञ्चोपाधिनिवृत्तीत्यादिनोपाधिनिवृत्त्यनिवर्त्यत्वव्यासङ्गानिवर्त्यत्वादिकं हि विवक्षितम। तत्र चोपाधिनिवृत्त्यजन्यत्वस्थाने विशेषादर्शनजन्यत्वमेव निवेश्यतां लाघवात्। उपाधिनिवृत्त्य-निवर्त्यत्वस्योपाधिनिवृत्तिजन्यनिवृत्तिप्रतियोगित्वाभावप्रवेशेन गौरवात्।

किञ्चैवं विशेषदर्शनविषयविरुद्धविषयभ्रमत्वमिति विशेष्यभागोऽपि न वक्तव्य इति लाघवम्।

ननु पक्षद्वयेऽपि व्यासङ्गादितत्तदनेकानिवर्त्यत्वविशेषणे गौरवात् विशेषदर्शनासमवहितसामग्र्य-निवर्त्यत्वमेव विशेषणम्। ततश्च पूर्वोक्तलाघवं स्थितमेव। न चैवमपि प्रतिबन्धककल्पनावैयर्थ्यम्। सोपाधिकभ्रमस्योपाधिनिवृत्तिनिवर्त्त्यत्वादिति वाच्यम्। यत्र विशेषदर्शनसमकालोत्पत्तिकोपाधिनिवृत्त्या भ्रमनिवृत्तिः तत्र विशेषदर्शनासमवहितसामग्र्यनिवर्त्यभ्रमत्वस्य सत्त्वेनोपाधिकालीनविशेषदर्शनाद-निवृत्त्यर्थं प्रतिबन्धककल्पनात्।

न च विशेषदर्शनस्य विद्यमानस्यापि भ्रमनिवर्तकत्वविप्रतिपत्तेः तदसमवहितसामग्र्यजन्यत्वा-निश्चयात् न प्रतिबन्धककल्पनेति वाच्यम्। विशेषदर्शनासमवहितपदेन विशेषदर्शनासमान-कालीनत्वस्य विवक्षितत्वादिति चेन्न।

विशेषदर्शनकालीनविशेषादर्शनजन्यभ्रमत्वस्यैव विशेषदर्शनासमवहितसामग्र्य-निवर्त्यविशेषदर्शनविषयविरुद्धविषयभ्रमत्वापेक्षया लघुत्वेनावच्छेदकत्वात्।

ननु तर्हि विशेषदर्शनकालीनविशेषदर्शनविषयविरुद्धविषयभ्रमत्वमेवावच्छेदकमस्तु लाघवादिति चेन्न। विशेषदर्शनोत्तरकालोत्पन्नस्योपाधिकभ्रमस्य विशेषदर्शनं विनाप्युपाधिनिवृत्त्यैव निवृत्तिदर्शनेन व्यभिचारेण तस्यानवच्छेदकत्वात्तदर्थमुपाधिनिवृत्त्यनिवर्त्यत्वेन वा विशेषदर्शनासमानकालीन-सामग्र्यनिवर्त्यत्वेन वा विशेषणे गौरवात्।

किञ्च विशेषदर्शनविषयविरुद्धविषयभ्रमत्वस्यावच्छेदकत्वे संयोगाद्यवच्छेदकमूलाद्यवच्छेदेन संयोगाभावभ्रमस्य तदवच्छेदेन संयोगवत्वस्याप्यदर्शनानिवर्त्यत्वापत्तिः। विशेषदर्शनविषय-मूलादिगतधर्मविरोधित्वाभावात् भ्रमविषयसंयोगाभावस्य आमघटे रक्तत्वभ्रमस्य च रक्तत्वाभावनिरूपितकालिकव्याप्तिमादाय यदामत्वादिविशेषदर्शनं तेनानिवर्त्यत्वापत्तिः। विशेषदर्शनविषयामत्वादिविरोधित्वाभावात् भ्रमविषयरक्तत्वस्य, पाकानन्तरं तत्रैव रक्तत्वोत्पत्तेः। विशेषादर्शनजन्यत्वं तु तत्राप्यस्तीति नास्मन्मते दोषः।

न च विशेषदर्शनविषयेण सहैकस्मिन् काले एकावच्छेदेन सहानवस्थायिविषय-कभ्रमत्वमेवावच्छेदकमिति दोषद्वयनिस्तारः। एतद्वृक्षत्वादेर्मूलावच्छेदेन संयोगव्याप्यत्वग्रहे तदर्शनस्य मूलावच्छेदेन संयोगाभावभ्रमविरोधित्वात्। तत्र चैकावच्छेदेन सहानवस्थायित्वस्याप्यभावात्

घटत्वस्य च दशाविशेषे रक्तत्वाभावव्याप्यत्वग्रहे तद्दर्शनस्य तद्दशायां रक्तत्वभ्रमविरोधित्वात्, तत्र च एककाले सहानवस्थायित्वस्याप्यभावात्।

किञ्च त्वन्मते स्फटिकत्वादिविशेषदर्शनेन लौहित्यभ्रमस्य प्रतिबिम्बस्थल इव निवर्त्यत्वं वाच्यम्। तत्र च परम्परासम्बन्धेन लौहित्यस्य स्फटिके सत्त्वात् विरोधाभावान्न निवर्तकता स्यात्।

ननूपाधिनिवृत्त्याद्यनिवर्त्यत्वादिना न विशेष्यते। किन्तु विशेषदर्शनाव्यवहितपूर्वक्षणवर्तित्वेन। अतो न गौरवम्।

यदप्युक्तम् - विशेषदर्शनविषयविरुद्धविषयभ्रमत्वस्यावच्छेदकत्व इत्यादि। तदपि न। विशेषदर्शनविषयपदेन व्याप्यत्वेन गृह्यमाणव्यापकस्य विवक्षितत्वात्। एतद्वृक्षत्वस्य संयोगविशेषो व्यापकः।

यदपि किञ्च त्वन्मत इत्यादि - तदपि न, भ्रमविषयसम्बन्धेन विरोधित्वस्य विवक्षितत्वात्। भ्रमविषयसाक्षात्सम्बन्धेन लौहित्यस्यापि स्फटिकत्वादिविरुद्धत्वादिति चेत्,

उच्यते - यत्र सोपाधिकभ्रमः द्वितीयक्षणोत्पन्नोपाधिनिवृत्तिमात्रेण तृतीयक्षणे भ्रमनिवृत्तिः तत्क्षण एव च विशेषदर्शनं चोत्पद्यते तद्भ्रमे उक्तनिवर्त्यतावच्छेदकस्य सत्त्वेन व्यभिचारात्तदर्थं विशेषदर्शनाव्यवहितपूर्वक्षणोत्पत्तिकत्वं वक्तव्यम्। उत्पत्तिश्च स्वसमानकालीनपदार्थप्रतियोगिकध्वं-समानाधारसमयसम्बन्धः। अव्यवहितत्वञ्च विशेषदर्शनानधिकरणक्षणानन्तरितत्वम्। पूर्वक्षणश्च प्रागभावावच्छिन्नक्षणः। व्यापकत्वञ्च प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नस्वसमानाधिकरणा-त्यन्ताभावाप्रतियोगित्वम्। तथा च विशेषदर्शनक्षणाव्यवहितपूर्वक्षणोत्पत्तिकत्वे सति विशेषव्यापकेन सहैकस्मिन् काले एकावच्छेदेन भ्रमविषयसम्बन्धेन सहानवस्थायिविषयकभ्रमत्वापेक्षया विशेषदर्शनकालीनविशेषादर्शनजन्यभ्रमत्वस्यैव लघुत्वेनावच्छेदकत्वात्।

ननु विशेषदर्शनाधिकरणक्षणाव्यवहितपूर्वविशेषदर्शनाधिकरणक्षणवर्तिभ्रमत्वरूपं विशेषदर्शनप्रथमक्षणवर्तिभ्रमत्वं मम कार्यतावच्छेदकम्। तव तु विशेषदर्शनसमकाल-विशेषादर्शनजन्यभ्रमत्वमिति जन्यत्वप्रवेशाद्गौरवमिति चेत्, ईश्वरीयाहार्याप्रामाण्यसंशया-क्रान्तपरोक्षसंशयरूपविशेषदर्शनैः समकालेषु भ्रमेषु यथोक्तकार्यतावच्छेदकस्यातिप्रसङ्गात्। तद्वारणार्थं समानाधिकरणानाहार्याप्रामाण्यज्ञानशून्यप्रत्यक्षनिश्चयसमकालीनत्वमवच्छेदकं वाच्यम्। तत्राप्यप्रामाण्यज्ञाने सामानाधिकरण्यमनाहार्यत्वञ्च विशेषणं वाच्यमित्यतिगौरवम। अस्मन्मते तु नैवमितिप्रसङ्गः, तद्विशेषदर्शनसमकालतदभावजन्यभ्रमत्वस्य तन्निवर्त्यतावच्छेदकत्वात्। आहार्यत्वञ्चेच्छाजन्यत्वादिकमिति जन्यत्वप्रवेश उभयोस्तुल्यः।

किञ्च विशेषदर्शने सत्यपि सोपाधिकभ्रमस्थले भ्रमनिवृत्त्यदर्शनेन तदुपपादनाय तद्विलक्षणस्य भ्रमविशेषस्य वा निवर्त्यत्वं कल्पनीयम्। सामान्यतो वा निवर्तकत्वं परिकल्प्य प्रतिबन्धो वा

कल्पनीयः। तत्रातिप्रसङ्गपरिहाराय निवर्त्यतावच्छेदके किञ्चिद्विशेषणप्रक्षेप उचितो लाघवात्, न तु स्वातन्त्र्येण, प्रतिबन्धकतावच्छेदककल्पनागौरवात्। अन्यथा श्वैत्यानुमितेरपि शङ्खपीतत्वभ्रमनिवर्तकत्वापत्तिविशेषणसाक्षात्कारत्वापेक्षया लाघवाद्विशेषणज्ञानत्वेनैव निवर्तकत्वकल्पने तदनुसारेण प्रतिबन्धकत्त्वकल्पनोपपत्तेः। न चेष्टापत्तिः - शाब्दापरोक्षसाधनविरोधात्।

किञ्च विशेषदर्शनं विनाप्युपाधिनिवृत्या निवृत्तिदर्शनेन सोपाधिभ्रमत्वावच्छेदेन निवर्तकत्वकल्पनात्तदभावादेव भ्रमानिवृत्त्युपपत्तौ न तत्र प्रतिबन्धककल्पना। न च व्यासङ्गादिनापि तन्निवृत्तेः व्यभिचारः, व्यासगाद्यजन्यत्वेन विशेषणात्।

वस्तुतस्तु पूर्वभ्रमो विशेषदर्शनेन विरोधिगुणतया निवृत्त इति न तत्र प्रतिबन्धः। अतो विशेषदर्शनस्य प्रतिबन्धकत्वमुपाधेश्चोत्तेजकत्वमिति पर्यवसितम्। तथाच नेदं प्रकृतार्थनिदर्शनं निदिध्यासनस्य प्रतिबन्धनिरासार्थतायां च न मानम्। न चाप्रतिबन्धज्ञानोद्देशेन विधानं मानम्, 'द्रष्टव्य' इति दर्शनस्यैव प्रतीतेः।

यच्च चतुर्थं मतम् - आपातप्रतीतिरेव धर्मज्ञानम्। सा च विचारात् प्रागेव साङ्गाध्ययनेन विदितपदपदार्थसङ्गतिकाद्वाक्यादेवोत्पद्यते। सा च ब्रह्मणि सत्त्वप्रकारका। सत्त्वप्रकारकत्वादेवाखण्डविषयाज्ञानं न निवर्तयति। तन्निवर्तकं चाखण्डमेव निष्प्रकारकं ज्ञानम्। तस्य चानुत्पत्तेस्तज्ज्ञानेच्छा सम्भवति। सैव जिज्ञासेति।

तदनुपपन्नम्, सत्त्वप्रकारकज्ञानस्यापातत्वं ह्यविद्यानिवृत्त्यनर्हत्वम्, तच्च भिन्नविषयत्वात् भ्रमत्वाच्चेत्यभिमतम्। तच्च नोपपद्यते। विशिष्टविषयस्याप्यज्ञानसमानविषयत्वात् भ्रान्तित्वेऽपि शुक्तिरजतज्ञानस्य शुक्तिगतद्रव्यत्वविषयस्य द्रव्यत्वाज्ञाननिवर्तकत्वात्। न चाधिकविषयत्वादनिवर्तकता, शुक्तिज्ञानस्य शुक्तिगतरूपादिविषयत्वेऽपि शुक्त्यज्ञाननिवर्तकत्वात्।

न च विशिष्टविषयत्वादखण्डाज्ञानसमानविषयत्वाभावः, जिज्ञासाया अपि समानविषयधर्मज्ञानसाध्यत्वेन सत्त्वविशिष्टज्ञानस्याखण्डजिज्ञासाजनकत्वोपवर्णनविरोधात्। न चाज्ञानमखण्डत्वविषयम्, सत्त्वविशिष्टज्ञानं तु न तथेति वाच्यम्। अखण्डत्वस्य स्वरूपातिरेके जडत्वेनाज्ञानाविषयत्वात्, स्वरूपत्वे सत्त्वविशिष्टज्ञानविषयत्वावश्यम्भावात्।

न चाखण्डत्वप्रकारकज्ञानमेव तत्प्रकारकाज्ञाननिवर्तकम्, निष्प्रकारकज्ञानस्यैव निवर्तकत्वमिति सिद्धान्तभङ्गात्; तदभ्युपगमे चावरणकल्पनावैयर्थ्यात्, निवर्तकीभूततादृशज्ञानाभावादध्यासाद्यनुपपत्तेः; अखण्डत्वादिप्रकारकज्ञानस्यापि सत्त्वविशिष्टज्ञानवद्विदितपदार्थसङ्गतिकस्य विचारात् प्रागेवोत्पत्तेश्च।

न च वाक्यद्वयाद्विरुद्धानेककोट्युपस्थितौ मानससंशयाज्जिज्ञासोपपत्तिरिति वाच्यम्। अद्वैतवाक्यजन्यप्राथमिकाखण्डत्वप्रकारकज्ञानादेवाज्ञाननिवृत्तौ कुतस्संशयः, कुतस्तरां जिज्ञासेति।

**॥ इति निर्विशेषस्य जिज्ञास्यत्वभङ्गः॥**

## ९. देवतान्तरोपास्यत्वभङ्गः

**'येनाक्षरं पुरुषं वेद'** इति वेद्यदेवतां निर्धारयाञ्चकार। देवताविशेषनिर्धारणार्थत्वे हि 'येन पुरुषं वेद तां ब्रह्मविद्यां प्रोवाच' इति सन्दर्भविशेषोऽयं समञ्जसो भवति। अन्यथा पूर्वखण्डानाञ्जस्यात्। पुरुषशब्दस्य श्रुतिस्मृतिप्रयोगानुशासनैः भगवदभिधानत्वात्।

श्रुतिस्तावत् कूर्मरूपिणं भगवन्तं प्रस्तुत्य **'पूर्वमेवाहमिहासमिति। तत्पुरुषस्य पुरुषत्वम्'** इति। अत्र च तस्य **'भावस्त्वतलौ'** इति सूत्रे 'सर्वे भावास्स्वेन भावेन भवन्ति' इति वार्त्तिकेन शब्दाभिधायिभ्यो गवादिशब्देभ्यो जातिगुणादिषु प्रवृत्तिनिमित्तेषु प्रत्यय इति यः पक्ष उपन्यस्तः, यश्च यस्य गुणस्य भावो द्रव्ये शब्दनिवेशस्तदभिधाने 'त्वतलौ' इति वार्तिकोपन्यस्तोऽर्थवाचिभ्यो गवादिशब्देभ्यो जात्यादिषु प्रवृत्तिनिमित्तेषु प्रत्यय इति पक्षः, तत्राद्यपक्षे तस्य गवादिशब्दस्य भावः प्रवृत्तिनिमित्तमिति लाभादिह पुरुषत्वमित्यस्य पुरुषशब्दस्य प्रवृत्तिनिमित्तमित्यर्थः। अत्र वाच्यत्वं शब्दस्यैवार्थः। द्वितीयपक्षे तु पुरुषत्वमित्यत्र प्रकृतेरर्थपरत्वेन पुरुषस्येत्यत्र पौनरुक्त्यादनन्वयाच्छब्दपरत्वं लक्षणयापि स्वीकर्तव्यमित्यनया श्रुत्या वाच्यत्वसिद्धिः। निर्वचनानां च वाच्यतातात्पर्यकत्वे न विवादः।

अत्र **'अन्तरतः कूर्मं भूतं सर्पन्तम्'** इति कूर्माकृतियोगेन नारायणत्वप्रतीतिः। यद्यपि **'ते पश्यन् पुरोडाशं कूर्मं भूतं सर्पन्तम्** इत्यादिष्वन्यत्रापि कूर्माकृतियोगः प्रतीयते। तथापि

> **'यदि वा पूर्वमेवाहमिहेति पुरुषं विदुः।**
> **यदि वा बहुदानाद्वै विष्णुः पुरुष उच्यते॥'**

इति पाद्मोपबृह्मणात् **'पूर्वमेवाहमिहासम्'** इत्यादौ प्रतिपन्नानादित्वस्रष्टृत्वादिसहचरितं कूर्माकृतिमत्त्वं भगवतोऽसाधारणम्, अन्यत्र तत्प्रसिद्ध्यभावात्। अत एव **'तद्वा इदमग्रे सलिलमासीत्। स प्रजापतिः प्रजाः स्रष्टुं लोकानवपश्यमानो बभ्राम। सोऽन्तःसलिले विचरन्तं कूर्ममपश्यत्। तमपृच्छत् कस्त्वमिति। सोऽब्रवीत् पुरुषोऽहमिति। तं प्रजापतिरब्रवीत् कः पुरुष इति। सोऽब्रवीत् येनेदं सत्येन ज्योतिषा काष्ठमिवाग्निना पूर्णं स वै पुरुष इति। तं प्रजापतिः प्रणिपत्याब्रवीत्। भगवन् येन तेन रूपेण जगदिदं पूर्णं तन्मे दर्शय प्रसीदेति, तस्मै प्रदर्शयन्नारसिंहमनाद्यन्तं ज्योतिर्मयम्'** इति श्रूयते

तापनीये पञ्चमखण्डे। तथा **'परात्परं पुरिशयं पुरुषमीक्षत'** इति च श्रूयते। तत्र हि **'पूस्संज्ञे वै शरीरेऽस्मिञ्छयनात् परुषो हरिः'** इति स्मृत्यनूसारात् परिशयत्वनिमित्तकं पुरुषशब्दवाच्यत्वं 'पुरुषमि'त्यनेन विवक्षितम्। तत्र **'यत्तत्कवयो वेदयन्त'** इति वाक्येन

**'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय'** इति श्रुतसूरिदृश्यपदप्रत्यभिज्ञानात् ईक्षतिकर्मणो विष्णुत्वावगतेः, **'परात्परं यन्महतो महान्तम्'**, **'परात्परं पुरुषमुपैति दिव्यम्'**, **'परात्परं पुरिशयं पुरुषमीक्षत'** इत्यादिषु परात्परशब्दार्थविवरणे प्रवृत्तेन **'परादपि परश्चासौ नास्ति तस्मात्परात्परः'**, **'संज्ञाभेदैः स एवैकः सर्वशास्त्राभिसंस्तुत'** इति पुण्डरीकना-संवादनिबन्धेनानुशासनिकोपबृह्मणेन तथैव स्पष्टत्वाच्च।

तथा स्मृतिरपि। वाधूलसूत्रे तावत् **'यत्र यत्र कर्मभ्रंशो यज्ञभ्रंशो वा तत्र पुरुषं चिन्तयन् पुरुषसूक्तं जपेत्। पूर्णत्वात् पुरुष इति विज्ञायते'** इति। योगयाज्ञवल्क्ये **'ईश्वरं पुरुषाख्यं तु सत्यधर्माणमच्युतम्'** इति। यमस्मृतौ-

**'रविमध्ये स्थितस्सोमस्सोममध्ये हुताशनः।**
**तेजोमध्ये स्थितं सत्त्वं सत्त्वमध्ये स्थितोऽच्युतः॥'**
**'एष देवस्तु मर्त्यानां एतैरेव विधीयते।'**
**एष वै पुरुषो विष्णुः व्यक्ताव्यक्तस्सनातनः।'**

इत्यादिना प्रकृतमच्युतम् **'एष वै विष्णुः'** इत्यनूद्य पुरुषशब्दवाच्यत्वादिकं विधीयते। सहस्रनामसु **'अव्ययः पुरुषः साक्षी'** इति। प्रकृते उद्योगपर्वणि नामनिर्वचनाध्याये **'पूरणात् सदनाच्चापि ततोऽसौ पुरुषो मतः'** इति। भीष्मपर्वणि-

**'एतत् पुरुषसंज्ञं वै पुराणं रूपमुत्तमम्।**
**एतत्पुरुषसंज्ञं वै जायते हीयते न च।'** इति।

मोक्षधर्मे- **'तस्यैकस्य महत्त्वं हि स चैकः पुरुषस्स्मृत'** इति।

तथा - **'स ह्यन्तरात्मा भूतानां क्षेत्रज्ञश्चेति कल्प्यते।'**
**त्रिगुणव्यतिरिक्तोऽसौ पुरुषश्चेति कल्प्यते?'** इति।

राजधर्मे यधिष्ठिरः - **'त्वामेकमाहुः पुरुषं त्वामाहुस्सात्वतां पतिम्'** इत्यत्र 'त्वामेकम्' इत्यन्वयात् त्वामेवेत्यर्थः। **'मामेकं शरणम'** इतिवदेकं पुरुषमित्यन्वयस्त व्यवधानान्न युक्तः। तेन पुरुषशब्दस्य भगवदसाधारण्यसिद्धिः। तथा श्रीमति वैष्णवे पुराणे —

**'भगवानिति शब्दोऽयं तथा पुरुष इत्यपि।**
**निरुपाधी च वर्तेते वासुदेवे सनातने॥'**

इत्यत्र 'निरुपाधी' इत्यनेन मुख्यार्थसंबन्धतत्सामनिमित्तको(सम्बन्धनिमित्तको?) पचारव्यवच्छेदः। अत्र निरुपाधिकत्वकीर्तनमन्यत्र सोपाधिकत्वाभिप्रायम्। अत एव पाद्मे -

**'ब्रह्माद्याः सकला देवा यक्षतुंबुरुनारदाः।**
**ते सर्वे पुरुषांशत्वादुच्यन्ते पुरुषा इति॥'**

इति भगवतोऽन्यत्र सोपाधिकत्वं तस्योक्तम्।

**'तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः।**
**शब्दोऽयं नोपचारेण त्वन्यत्र ह्युपचारतः॥'**

इत्यन्यत्रौपचारिकत्वेन निर्णीतभगवच्छब्दसमभिव्याहारोऽप्येवं सत्यवकल्पते दृष्टान्ताभिप्राय-त्वात्। अन्यथा भगवद्वाचकत्वस्यान्यत्रौपचारिकत्वस्य च 'तत्र पूज्य' इति श्लोकादेव सिद्धत्वेन पुनरत्र भगवच्छब्दोपादानवैकल्यात्(वैयर्थ्यात्?)। तच्च 'तथा पुरुष इत्यपि' इति तथा शब्देन भगवच्छब्दधर्मातिदेशेन स्पष्टीकृतम्। तथा भागवते - **'भूतैर्महद्भिर्य इमाः पुरोविभूर्निर्माय शेते यदमूषु पूरुष'** इति **'पुरिशयं पुरुषम्'** इति श्रुत्यनुसारेण 'पुरि शेते इति पुरुष' इति निर्वचनपूर्वकं पुरुषशब्दवाच्यत्वमुक्तम्। तत्रैव - **'सृष्टं स्वशक्त्येदमनुप्रविष्टं चतुर्विधं पुरमात्मांशकेन। अतो विदुस्त्वां पुरुष'** इति। नारसिंहपुराणे —

**'य एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः।**
**प्रकृतिस्पर्शराहित्यात् स्वातन्त्र्याद्वै भवादपि॥'**
**'स एव वासुदेवोऽयं साक्षात् पुरुष उच्यते।**
**स्त्रीप्रायमितरत्सर्वं जगद्ब्रह्मपुरस्सरम्॥'**

इति सनिमित्तकं वासुदेवस्य वाचकतया पुरुषशब्दमाद्यपद्येनानूद्य स एव साक्षात्पुरुष उच्यत इति तस्यान्यत्रामुख्यत्वमुच्यते, साक्षादिति मुख्यत्वस्याभिधानात्, **'यत्साक्षादपरोक्षात् ब्रह्मे'**तिवत्। तत्र हि प्रत्यगात्मन्युपचरितप्रयोगदर्शनात् तद्व्यावृत्त्यर्थं साक्षादिति विशेषणं मुख्यार्थसंबन्धव्यवधानं निराकुर्वद्ब्रह्मशब्दस्य मुख्यताभिप्रायमुक्तम्। अन्येषामवाच्यत्वविधेश्चार्थवादः 'स्त्रीप्रायमि'त्यादि।

एतेन **'अपशवो वा अन्ये गो अश्वेभ्यः पशवो गो अश्वानेवास्मै समीचो दधाति'** इत्यसाधारण्येन गवाश्वानां पशुत्वोक्तिवदेतानि वचनानि पुरुषधर्मपौष्कल्येन वासुदेवप्रशंसापराणीति परास्तम्। 'य एव वासुदेवोऽयम्' इत्यादेरुक्तवासुदेवादन्येषां पुरुषशब्दावाच्यत्वविधेरेव स्वरसतः प्रतीतेः। तस्य च **'निरुपाधी च वर्तेत'** इति स्मृत्यन्तरानुग्रहाद्वेदोपबृह्मणार्थपुराणापेक्षितवेदान्तार्थ-निर्णयोपाधिकत्वेन सप्रयोजनत्वात् मानान्तराविरोधाच्च उक्तार्थ उपपन्नः। 'अपशव' इत्यादिवाक्यं तु 'सप्त ग्राम्याः पशव' इत्यादिश्रुत्यन्तरविरोधात्, प्रत्यक्षविरोधात्, 'अपशवोऽन्ये पशव' इति स्ववचनविरोधात्, अपशुत्वविधिप्रयोजनाभावात्, वै शब्दोपबन्धात्, 'समीच' इत्यभिधानात्, विध्यन्तरशेषत्वाच्च 'अपशव' इत्यत्र पशुशब्दस्य प्रशस्तपशुत्वनिमित्तकोपचारत्वमभ्युपगम्य गवाश्वान्यवाद इत्युक्तम् [1]'तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवाया' इत्यत्र। एवं स्कान्दे-

1. मी.सू.1.4.23

**'यथा भास्करशब्दोऽयमादित्ये प्रतितिष्ठति।**
**यथा चाग्नौ बृहद्भानुर्यथा वायौ सदागतिः॥**
**यथा पुरुषशब्दोऽयं वासुदेवेऽवतिष्ठते।**
**तथा शङ्करशब्दोऽयम्[1] उमादेवे व्यवस्थितः॥'**

इत्यत्र 'व्यवस्थित' इत्यसाधारण्यमुच्यते। तत्र दृष्टान्तः 'पुरुषशब्द' इति तस्याप्यसाधारण्यं सिद्धम्।

यत्तु स्कान्द एव –

**'पुरुषो नाम संपूर्णः शिवस्सत्यादिलक्षणः।**
**साम्बमूर्तिधरो नान्यो रुद्रो विष्णुरजोऽपि च॥'**

इति वचनम्, तदुदाहृतश्रुतिस्मृतिविरोधात् न पुरुषशब्दस्य रुद्रासाधारण्यपरम्। तद्यथोक्तम्। स्कान्दवचनेनापि विरोधेन स्वव्याघातस्यापि प्रसङ्गात्। तस्मादेवं व्याख्येयम्। रुद्रगायत्र्यादिषु पुरुषशब्देन रुद्रो विष्णुरजोऽपि न प्रतिपाद्यते, किन्तु साम्बमूर्तिधरश्शिव एव। अतः सोऽन्येभ्यः प्रशस्ततर इति। तस्य च प्रशंसामात्रपरत्वं पुरुषशब्दो न भगवदसाधारणः, रुद्रासाधारण्यस्यापि प्रसङ्गादिति वदता परेणाप्यभ्युपगतमेव।

इयांस्तु विशेषः- द्वयोरपि वचनयोः प्रशंसापरत्वं परैरुच्यते। तत्त्वदर्शिभिस्तूक्तरीत्या रुद्रासाधारण्यवचनस्य प्रशंसामात्रपरत्वम्, रुद्रोत्कर्षप्रतिपादनपरप्रकरणस्थस्य शङ्करशब्दासाधारण्य-प्रतिपादनपरस्य दृष्टान्ततया पुरुषशब्दस्य भगवदसाधारण्यं प्रतिपादयतो भगवत उत्कर्षे तात्पर्याभावात् भास्करादितत्तद्देवतासाधारणशब्ददृष्टान्तान्तरप्रायपाठाच्च तत्त्वपरत्वमेवेति।

अपिच [2]**'भगवानिति शब्दोऽयम्'** इत्यादिवचनेषु पुरुषशब्दस्यासाधारण्यं **'निरुपाधी च वर्तेते'** इत्यादिना कण्ठत एवोच्यते। **'यथा पुरुषशब्दोऽयं वासुदेवेऽवतिष्ठत'** इति च। **'पुरुषो नाम'** इति वचने तु न तथा। 'पुरुषो नामे'ति तु मुख्यलक्षणावृत्तिसाधारण्येन पुरुषशब्दविवक्षितत्वमात्रपरत्वेनाप्युपपन्नत्वान्न वाच्यतासाधकम्। वैष्णवे धर्मशास्त्रे —

[3]**'पुरमाक्रम्य सकलं शेते यस्मान्महाप्रभुः।**
**तस्मात् पुरुष इत्येवं प्रोच्यते तत्त्वचिन्तकैः॥'** इति।

मोक्षधर्मे -

---

1. उमादेवे – महादेचे पठभेदः
2. पाद्म.पु.6.226.67
3. पाद्म.स्मृ.97.15

[1]'**वैकुण्ठः पुरुषो विष्णुः शुकोऽनन्तस्सनातनः।**
**मुञ्जकेशो हरिश्मश्रुः सर्वभूतपितामहः॥**' इति।

अत्रापौनरुक्त्याय वाच्यत्वे तात्पर्यं ग्राह्यम्। मात्स्ये पौष्करप्रादुर्भावे - [2]'**स कर्ता कारको बुद्धिर्मनः क्षेत्रज्ञ एव च**', [3]'**प्रणवः पुरुषस्साक्षादेकं ज्योतिर्विभाव्यते**' इति। 'साक्षात्' इति मुख्यताभिप्रायम्। तत्रैवाष्टचत्वारिंशच्छततमेऽध्याये-

[4]'**रहस्यारण्यकोद्दिष्टं यच्चौपनिषदं स्मृतम्।**'
[5]**पुरुषो यज्ञ इत्येतद्यत्परं** [6]**परिकीर्तितम्।**
**यच्चान्यत् पुरुषाख्यः स्यात् स एष पुरुषोत्तमः॥**'

इति रहस्यारण्यके प्रतिपाद्यम्, यच्च [7]'**तं त्वौपनिषदं पुरुषम्**' इत्यादौ 'औपनिषदम्' इत्युक्तम्, यच्चात्रैव [8]'**सहस्रशीर्षा पुरुष**' इत्यादौ च 'पुरुष' इत्युक्तम्, यच्च तत्रैव पुरुषसूक्ते 'यज्ञेन यज्ञमयजन्त' इत्यादिषु 'यज्ञ' इत्युक्तं वस्तु स पुरुषोत्तम एव, यत्तु [9]'**ततोऽन्यत् पुरुषाख्यम्**' जीवरूपं वस्तु तदपि पुरुषोत्तम एव, तदंश एवातः परुषशब्देनोच्यत इत्यभिप्रायः।

यद्वा यच्चान्यत् पुरुषाख्यम् - भिन्नोपनिषत्प्रतिपाद्यत्वोपाधिनान्यदिति भेदनिर्देशः। यच्चोपनिषदन्तरे पुरुषशब्दाभिधेयं तत्सर्वं स एव पुरुषोत्तम इत्यर्थः।

भागवते एकादशस्कन्धे -

[10]'**भूतैर्यदा पञ्चभिरात्मसृष्टेः पुरा विराजं विरचय्य तस्मिन्।**
**स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः॥**'

इति प्रयोगश्च। आरुणकेतुके '**तत्पुरुषस्य पुरुषत्वमि**'ति 'पुरुषस्ये'ति कूर्माकृतिलिङ्गावगमितनारायणाख्यधर्मिविशेषनिर्देशात् '**तदिन्द्रस्येन्द्रत्वमि**'तिवत्। कठवल्ल्याम् [11]'**अव्यक्तात्पुरुषः**

---

1. महा.शान्ति.279.29
2. मत्स्य.पु.163.22
3. मत्स्य.पु.163.23
4. मत्स्य.पु.166.4
5. मत्स्य.पु.166.5
6. परिकीर्तितम् – परिकीर्त्यते
7. बृ.उ.5.9.23
8. पु.सू.1
9. मत्स्य.पु.166.5
10. भा.पु.11.4.3
11. कठ.उ.1.3.11

परः। **पुरुषान्न परं किञ्चित्'** इत्यत्र [1]**'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्'** इति प्राप्यस्याभिधानात् पुरुषशब्दो विष्णुविषयः।

नन्वत्र कठवल्ल्यां [2]**'तत्ते पदं सङ्ग्रहेण ब्रवीम्योम्'** इति पदस्य वक्तव्यत्वेनोपक्रमात् 'सोऽध्वनः पारम्' इति गन्तव्यदेशपर्यवसानत्वेन प्राप्यत्वेन चाभिधानाच्च पदमेवात्र प्रतिपाद्यम्। तच्च पद्यत इति व्युत्पत्त्या प्राप्यपरम्। 'विष्णोः' इति च कर्तरि षष्ठी। इदञ्च [3]**'रुद्र यत्ते जनिम'** इति मन्त्रेण पराशरपुराणकाशीखण्डस्थ वचोपबृंहितेन[4] शिवप्रसादाद्विष्णोः परमपदलाभवर्णनाद्युक्तम्। परमशब्दयोगनिमित्ता पञ्चमी वा। उभयथापि विष्णोरन्यत् पदम्। एवञ्च पुरुषशब्दस्तत्परः, न विष्णुपरः। [5]**'पुरुषान्न परम्'** इति परनिषेधात् विष्णोः परस्यात्रैव श्रवणात् पदस्य प्रधानत्वाच्चेति चेन्न।

पूर्वखण्डे

[6]**'कामस्याप्तिं जगतः प्रतिष्ठां क्रतोरनन्तमभयस्य पारम्।**
**स्तोमं महदुरुगायं प्रतिष्ठां दृष्ट्वा धृत्या धीरो नचिकेतोऽत्यस्राक्षीः॥**

**तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।**
**अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति॥'**

इत्युरुगायस्य ज्ञेयत्वेन प्रतिष्ठात्वेन चाभिधानेन तस्यैव प्राप्यत्वात्। उरुगायशब्दश्च भगवति सुप्रसिद्धः। किञ्च वैष्णवे पुराणे [7]**'यत्तदव्यग्रमजरम्'** इत्यादिना भगवत्स्वरूपं 'यत्तदद्रेश्यम्'[8] इति श्रुत्यनुसारेणानुक्रम्य,

[9]**'व्याप्यं व्याप्तं यतः सर्वं तद्वै पश्यन्ति सूरयः।**
[10]**तद्ब्रह्म परमं धाम तद्ध्येयं मोक्षकाङ्क्षिणाम्।**

---

1. कठ.उ.1.3.9
2. कठ.उ.2.25
3. ऋग्वेद.5.3.3
4. पराशर.पु.5.6
5. कठ.उ.1.3.11
6. कठ.उ.1.11.12
7. विष्णु.पु.6.5.66
8. मुण्डक.1.1.6
9. विष्णु.पु.6.5.67
10. विष्णु.पु.6.5.68

**श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम् ?'**

[1]**'तदेव भगवद्वाच्यं स्वरूप परमात्मनः।**

इत्युक्त्या भगवच्छब्दं निरुच्य

[2]**'एवमेष महाशब्दो मैत्रेय भगवानिति।**

**परमब्रह्मभूतस्य वासुदेवस्य नान्यग॥'**

इत्यन्तेनात्रत्यपदशब्दस्य भगवत्स्वरूपपरतया व्याख्यानात्। अत्र 'सोऽध्वनः पारम्'[3] इति 'तद्विष्णोः' इति हि च श्रुतिमभिप्रेत्य श्रुतिवाक्योदितमित्युक्तम्, अर्थतश्शब्दतश्च तत्रत्यभिज्ञापनात्।

नारायणोपनिषदि —

[4]**'रुद्रं तु सारथिं कृत्वा मनःप्रग्रहवान् पुमान्।**

**स याति परमं पारं विष्णवाख्यं परमं पदम्॥'**

इत्यध्वनः पारत्वेन परमपदत्वेन विष्णोरेवाभिधानाच्च।

[5]**'समस्तहेयरहितं विष्णवाख्यं परमं पदम्,** [6]**'तद्ब्रह्म परमं योगी यतो नावर्तते पुनः'** इति च। [7]**'तुष्टाव वाग्भिरष्टाभिः परावरपतिं हरिम्' इत्यारभ्य**[8]

**'तत्पदं परमं विष्णोः प्रणमामि सदामलम्।'**

[9]**'शक्तयो यस्य देवस्य ब्रह्मविष्णुशिवात्मिकाः।**

**भवन्त्यभूतपूर्वस्य तद्विष्णोः परमं पदम्॥'**

[10]**'यन्मयं भगवन् ब्रह्मा जानाति परमं पदम्।**

**तन्नताः स्मः जगद्धातस्तव सर्वगताच्युत॥'**

[11]**'अव्यक्तमविकारं यत्तद्विष्णोः परमं पदम्।'**

---

1. विष्णु.पु.6.5.69
2. विष्णु.पु.6.5.76
3. कठ.उ.1.3.9
4. ना.उ.3
5. विष्णु.पु.1.22.53
6. विष्णु.पु.1.22.54
7. विष्णु.पु.1.9.39
8. विष्णु.पु.1.9.39-52
9. विष्णु.पु.1.9.53
10. विष्णु.पु.1.9.59
11. विष्णु.पु.1.9.51

**[1]'यन्न देवा न मुनयो न चाहं न च शङ्करः।**

**जानन्ति परमेशस्य तद्विष्णोः परमं पदम्॥'**

**[2]'यद्योगिनः सदोद्युक्ताः पुण्यपापक्षयेऽव्ययम्।**

**पश्यन्ति प्रणवेऽचिन्त्यं तद्विष्णोः परमं पदम्॥'**

**[3]'शुद्धज्ञानं प्रपश्यन्ति विष्णवाख्यं परमं पदम्।'**

इत्येतैः वैष्णवपुराणवचनैश्च विष्णुस्वरूपस्यैव परमपदत्वेनोक्तेश्च।

**[4]'अविकारमजं शुद्धं निर्गुणं यन्निरञ्जनम्।**

**नताः स्म तत्परं ब्रह्म विष्णोर्यत्परमं पदम्'**

**इत्यत्र च हरिस्तोत्रप्रक्रमात् स्वरूपपरत्वम्।**

**[5]'एवं प्रकारममलं नित्यं व्यापकमक्षयम्।**

**समस्तहेयरहितं विष्णवाख्यं परमं पदम्॥' इति।**

**तथा**

**[6]'त्वमव्यक्तमनिर्देश्यमचिन्त्यानामवर्णवत्।**

**अपादपाणिरूपञ्च शुद्धं नित्यं परं पदम ॥' इति।**

[7]**'एकस्त्वमग्र्यं परमं पदं यत् पश्यन्ति त्वां सूरयो ज्ञानदृश्यम्'** इति च स्वरूपं पदमित्युक्तम्।

वाराहे आरुणिस्सत्यतपसं प्रत्युवाच -

**[8]'पुत्र सिद्धोऽसि तपसा ब्रह्मभूतोऽसि सुव्रत।**

**इदानीमात्मना सार्धं मुक्तिकालमवैमि ते॥**

**उत्तिष्ठ गम्यतां पुत्र मया सार्धं परं पदम्।**

**यद्गत्वा न पुनर्जन्म भवतीति न संशयः॥**

1. विष्णु.पु.1.9.55
2. विष्णु.पु.1.9.54
3. विष्णु.पु.1.6.23
4. विष्णु.पु.1.14.38
5. विष्णु.पु.1.22.53
6. विष्णु.पु.5.1.40
7. विष्णु.पु.5.1.43
8. वाराह.पु.98.32-34

**एवमुक्त्वा तु तो सिद्धौ उभौ सत्यतपारुणी।**
**ध्यात्वा नारायणं देवं सह तेन लयं गतौ॥'**

इति वचनात्। तत्रैव - [1]**'यत्सत्वं स हरिर्देवो यो हरिस्तत्परं पदम्'** इत्यपि वचनाच्च।

हरिवंशे गोमन्तयाने जामदग्न्यवाक्ये -

[2]**'तत्र ते कृष्णसङ्ग्रामे सुव्यक्तं वैष्णवं पदम्।**
**ईक्ष्यन्ति रिपवस्सर्वे सुराश्च सुरभावन॥'**
[3]**'भजस्व स्वां गदां कृष्ण चक्रं च चिरविस्मृतम्।'**

इति दर्शनात् पदशब्दः स्वरूपपरः। कौर्मे इन्द्रद्युम्नस्तोत्रे [4]**'यज्ञेशाच्युत गोविन्द'** इत्यारभ्य [5]**'प्रपद्ये भवतो रूपं तद्विष्णोः परमं पदम्'** इतीयं श्रुतिर्विवृता। मात्स्ये [6]**'अहं साङ्ख्यमहं योगमहं तत्परमं पदम्'** इत्यादि बहुद्रष्टव्यम्।

इयञ्च कठवल्ली शङ्खादिभिर्नारायणपरत्वेनोपबृंहिता -

**'पञ्चविंशकमव्यक्तं षड्विंशः पुरुषोत्तमः।**
**एतज्ज्ञात्वा तु मुच्यन्ते यतयश्शान्तबुद्धयः॥**
[7]**'अशब्दमस्पर्शरसमरूपागन्धमव्ययम्।'**
[8]**'अनादिनिधनं यच्च तद्विष्णोः परमं पदम्।'**
[9]**'विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः।**
**सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्॥'** इति।

शङ्खलिखितस्मृतौ -

---

1. वाराह.पु.70.17
2. ह.वं.2.39.76
3. ह.वं.2.39.77
4. कूम.पु.1.1.68-78
5. कूम.पु.1.1.78
6. मत्स्य.पु.266.56
7. शंख.स्मृ.7.29
8. शंख.स्मृ.7.30
9. कठ.उ.1.3.9

[1]'**अशब्दरसमस्पर्शमरूपं गन्धवर्जितम्।**
**निर्दुःखमसुखं शुद्धं तद्विष्णोः परमं पदम्॥'**
[2]**विज्ञानसारथिर्यस्तु मनःप्रग्रहवान् नरः( मनःप्रग्रहबन्धनः? )।**
**सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्॥'**

इत्यनन्तरम् [3]'**इन्द्रियेभ्यः परा ह्यर्था'** इत्यादिकठवल्लीवाक्यमेव [4]'**सा काष्ठा सा परा गतिः'** इत्यन्तं पठित्वोक्तम्?

[5]'**स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम्।**
**ध्याननिर्मथनाभ्यासाद्विष्णुं पश्येद्धृदि स्थितम्॥'**

इत्युक्त्वा [6]'**अणोरणीयान् महतो महीयान्'** इति मन्त्रं पठित्वा '**एष देवस्तु मर्त्यानां पटैरिव विधीयते', [7]'एष वै पुरुषो विष्णुर्व्यक्ताव्यक्तः सनातनः'** इति।

ब्राह्मपुराणे च '**भगवन् शङ्करादिभ्यो वासुदेवाच्च कोऽधिक'** इति प्रश्नोत्तरत्वेन वासुदेवाधिक्यप्रदर्शनायोपन्यस्ताः -

'**तथा च भगवन्मृत्युर्नाचिकेतं समागतम्।**
**पृच्छन्तं प्राह विप्रं तं यमो धीरतरोऽपि सन्॥'**
[8]'**यस्य ब्रह्म च क्षत्रञ्च उभे भवत ओदनः।**
**मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः॥'**
'**ग्रसेत् संहारसमये जगच्च बदराण्डवत्।**
**लीलया यस्तु भगवांस्तं गच्छ शरणं हरिम्॥'**
'**सर्वभूतात्मभूतस्य विष्णोः को वेदितुं गुणान्।**
**शक्तो महेश्वरादन्यः पार्वत्याश्चाथवा भवेत्॥'**

इत्यत्र 'ग्रसेत्' इत्यादिश्लोकेनोदाहृतश्रुतेः पूर्वांशो विवृतः। 'सर्वभूत' इत्यारभ्य 'क

---

1. शंख.स्मृ.7.29
2. शंख.स्मृ.7.31
3. कठ.उ.1.3.10
4. शंख.स्मृ.7.34
5. शंख.स्मृ.7.17
6. शंख.स्मृ.7.19
7. शंख.स्मृ.7.21
8. कठ.उ.1.2.25

इत्था' इत्यादिरिति द्रष्टव्यम्। [1]**'तत्ते पदं संग्रहेण ब्रवीम्योमि'**त्येतत्, [2]**'तत्ते पदं संग्रहणेन प्रवक्ष्ये'** इत्यारभ्य [3]**'ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्'** इत्यन्तेन स्वरूपपरतया भगवतैव गीतम्। अत्र प्रणवप्रतिपाद्यतया श्रुतं पदं स्वयमेवेति भगवदाशयः स्पष्टः। ब्रह्मसिद्धान्ते च 'भयादस्याग्निस्तपति'[4] इति कठवल्लीमन्त्रो नारायणपरतयार्थतः स्पष्टीकृतः।

[5]**'अस्मान्नारयणादभीषा वातः पवत एव हि।**
**उदेति सूर्यो मृत्युश्च यावतीन्द्रोऽपि वर्षति।।'**इति।

एवं श्रुत्युपब्रह्मणानुसारात् पदशब्दस्स्वरूपपरः। षष्ठीस्वारस्याद्व्यतिरेकाङ्गीकारे तु पदशब्दो रूढिबलीयस्त्वादाश्वमेधिकोपबृह्मणाच्च चरणपरस्स्थानपरो वा।

[6]**'बहुवर्षसहस्राणि तपस्तप्यति यो नः।**
**नासौ पदमवाप्नोति मद्भक्तैर्यदवाप्यते।।'**
[7]**'मामेव तस्माद्राजेन्द्र ध्याहि नित्यमतन्द्रितः।**
**अवाप्स्यसि ततः सिद्धिं द्रक्ष्यसे च परं पदम्।।'**

(तस्मान्मामेव देवर्षे ध्यायस्वातन्द्रितः सदा।
अवाप्स्यसि ततः सिद्धिं पदं द्रक्ष्यसि च ध्रुवम्।।)

इति पूर्वमुक्त्वा

**'चिन्तयस्व सदा विष्णुं ध्यायन् कुरु कुलोद्वह।**
**तेन गच्छति नान्येन तद्विष्णोः परमं पदम्।।'**

इत्युपसंहारगतेन वैष्णवधर्मवचनेन एतच्छ्रुत्युपबृह्मणात्। [8]**'अनन्यदेवता भक्ता'** इति तत्र भक्तलक्षणाभिधानात् 'मामेव' इत्यवधारणात् 'नान्येन' इति निषेधाच्च नान्यस्य प्राप्यत्वं शङ्कितुमप्यर्हम्।

यत्तु -

---

1. कठ.उ.1.2.25
2. भ.गी.8.11-12
3. भ.गी.8.13
4. कठ.उ.2.3.3.
5. तै.उ.2.8.1
6. विष्णु.ध.पु.38.53
7. विष्णु.ध.पु.38.60
8. भ.गी.9.23

[1]**'तव श्रिये मरुतो मर्जयन्त रुद्र यत्ते जनिम चारु चित्रम्।
पदं यद्विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनाम्'**

इति मन्त्रानुसाराद्विष्णोः प्राप्यमित्यर्थ इति,

तन्न, अस्या ऋचः वैद्युताग्निपरत्वेन ऋग्वेदभाष्ये व्याख्यातत्वात्। तथा च भाष्यम् - अनयाग्नेर्माध्यमिकी आन्तरिक्षी मूर्तिरुच्यते। हे अग्ने तव **श्रिये** - शोभायै, **मरुतः** - आन्तरिक्ष्यः मर्जयन्ति। हे **रुद्र** वृष्ट्या रुद्रावधितः अग्ने **ते** - तव, **जनिम** - जन्म, वैद्युतलक्षणं **चारु** - चारणीयम्, **चित्रम्** - चायनीयं च। तत्कथमिति चेदुच्यते - विष्णोः - व्यापनशीलस्य देवस्य उपमम् - तुल्यमचक्षुर्गम्यं पदं निधायि। अनेनान्तरिक्षमुक्तम्। तस्मान्नान्तरिक्षं पश्यन्ती'ति ब्राह्मणम्। तेन गोनां - उदकानाम्, गुह्यं नाम पासि - रक्षसीति। इत्थं पूर्वव्याख्यामनादृत्याक्षरपर्यालोचनेनार्थस्वीकारे तु रुद्रस्य भगवदायत्तश्रीकत्वमेव एतन्मन्त्रार्थतया स्वीकारार्हम्। रुद्र यस्मात्ते जन्म चारु चित्रं तस्मात्तव श्रिये मरुतो देवा ब्रह्माद्याः मार्जयन्ति क्षालितवन्तः। किं मार्जयन्त इत्यपेक्षायामाह - **'पदं यत'** इति। उपमं मेयतुल्यमानम्। यद्वा माशब्दो भूमिपरः, वैजयन्त्यां **'मा विश्वा पृथिवी'**[2] इत्यभिधानात्। उपममित्यव्ययीभावः। भूम्यास्समीपे दिवि। क्रमसौकर्यप्रतिपादनायोपममित्युक्तम्। तेन द्वितीयः क्रमो लभ्यते। **'यद्विष्णोः पदं निधायि'**, [3]**'त्रेधा निदधे पदम्'** इति श्रुत्यन्तरम्।

किञ्च 'तेन पुण्येन जन्मना गोनां गिरां प्रकृतस्य विष्णोर्नाम्नां मध्ये गुह्यं नाम तारकाख्यं पासि सर्वदा गोपायसि' इति। विष्णोरिति पञ्चमीति कल्पनं तु शेषषष्ठ्यपेक्षया उपपदविभक्तेर्जघन्यत्वान्निरस्तम्। न चात्रोपपदविभक्तिरपि सम्भवति। नहि परमशब्दः परशब्दवद्दिक्शब्दः, यतस्तद्योगे पञ्चमी स्यात्। [4]**'उरुगायस्य विष्णोः परमं पदम्'**, **'उरुगायस्य वृष्णः परमं पदम्'** इति श्रुत्यन्तरसमानार्थत्वस्य न्याय्यत्वाच्च षष्ठ्येवेयम्।

एतेन [5]**'पञ्चमी विभक्ते'** इति पञ्चमीत्यपि निरस्तम्।

यत्तु [6]'गावो यत्र भूरिशृङ्गा' इति पूर्वत्र श्रवणात् गोलोकान्तर्गतविष्णुलोकपरेयं श्रुतिरिति व्याख्यानम्, तद्यास्कवचनविरोधादपास्तम्। **'सर्वेऽपि रश्मयो गाव उच्यन्त'** इत्युक्त्वा **'गावो यत्र भूरिशृङ्गा'** इत्युदाहृत्य **'गावो रश्मय'** इति निरुक्ते तेन व्याख्यानात् 'भूरिशृङ्गा'

---

1. ऋग्वेद.5.3.3.
2. ब्राह्मणम् पाठभेदः
3. विष्णुसूक्तम्
4. ऋग्वेद.1.3.6.
5. पाणिनि.सू.2.3.41
6. ऋग्वेद.1.3.6.

इति च बहुदीप्तिमत्त्वमित्याभाष्यत। अतो विष्णोः कठवल्लीवेद्यत्वात् पुरुषशब्दस्य तत्परत्वम्।

पूर्वतापनीये च **'न शक्नोमि जगत्स्त्रष्टुमुपायं मे कथय इति। तमुवाच पुरुषः प्रजापते शृणु सृष्टेरुपायम्'** इति नृसिंहे पुरुषशब्दः प्रयुक्तः। योगविधौ [1]**'भगवन्तं वासुदेवं किरीटिनं कुण्डलिनं वनमालाविभूषितोरस्कं सुरूपं सौम्यरूपं चतुर्भुजं शङ्खचक्रगदापद्मधरं ध्यायेत्',** [2]'यद्यद्ध्यायति तत्तदवाप्नोतीति(यद्ध्यायति तदाप्नोति ?) ध्यानगुह्यम्', [3]**'सर्वमेव क्षरन्त्यत्त्वाक्षरमेव ध्यायेत्'**, [4]**'न च पुरुषं विना किञ्चिदप्यक्षरमस्ति'**, [5]**'तं प्राप्य मुक्तो भवति'** इति। पुनस्तत्रैव [6]**'महावराहाच्युतानन्तपुरुषमहापुरुषकपिलपिङ्गल'** इत्यादि। नारायणीये - [7]**'सात्त्विकः पुरुषव्याघ्रः भवेन्मोक्षार्थचिन्तकः'**, [8]**'अत्रापि स विजानाति पुरुषं ब्रह्मवित्तमम्'** इति। वैष्णवपुराणे -

[9]**'न केवलं रवेः शक्तिः वैष्णवी सा त्रयीमयी।**
**ब्रह्माथ पुरुषो रुद्रस्त्रयमेतत् त्रयीमयम्।।'** इति।

तथा - [10]**'यस्य प्रसादादहमच्युतस्य भूतः प्रजासर्गकरोऽन्तकारी।**
**क्रोधाच्च रुद्रः स्थितिहेतुभूतो यस्माच्च मध्ये पुरुषः परस्मात्।।'**
[11]**'मद्रूपमास्थाय सृजत्यजो यः स्थितौ च योऽसौ पुरुषस्वरूपी।**
**रुद्रस्वरूपेण च योऽत्ति विश्वं धत्ते तथानन्तवपुस्समस्तम्।।'**

इति। आदिपर्वणि - [12]**'पुरुषस्स विभुः कर्ता सर्वलोकपितामहः'**, [13]**'धर्मसंवर्धनार्थाय प्रजज्ञेऽन्धकवृष्णिषु'** इति। सभापर्वणि - [14]**'नारायणस्तु पुरुषो विश्वरूपो महाद्युतिः'** इति। श्रीमदुत्तररामायणे -

1. विष्णु.स्मृ.97.10
2. विष्णु.स्मृ.97.11.
3. विष्णु.स्मृ.97.12
4. विष्णु.स्मृ.97.13
5. विष्णु.स्मृ.97.14
6. विष्णु.स्मृ.9.79-102
7. महा.शान्ति.348.69
8. महा.शान्ति.348.70
9. विष्णु.पु.1.11.22
10. विष्णु.पु.4.1.85
11. विष्णु.पु.4.1.86
12. महा.आदि.63.103
13. महा.आदि. 63.104
14. महा.सभा.पृ.सं.900

**'असौ रामो महाबाहुरतिमानुषचेष्टया।**
**तेजोमहत्तया चापि संस्मारयति पूरुषम्॥' इति।**

अयोध्याकाण्डे चतुर्थे सर्गे -

[1]**'श्रुत्वा पुष्ये च पुत्रस्य यौवराज्याभिषेचनम्।**
**प्राणायामेन पुरुषं ध्यायमाना जनार्दनम्॥'**इति।

हरिवंशे गोवर्धनोद्धारणानन्तरे -

**'पुरुषस्यांशभूतं तु त्वां वयं निरणैष्महि।' इति।**
[2]**'इत्येतान् पुरुषस्सर्वान् सृजन् लोकान् सनातनान्।**
**नैधनेऽस्मिन् कथं लोके नरत्वं विष्णुनागतः॥'** इत्यादि।

दशमस्कन्धे प्रथमाध्याये —

[3]**'तत्र गत्वा जगन्नाथं वासुदेवं वृषाकपिम्।**
**पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः॥' इति।**

**लैङ्गे - [4]'ब्रह्मा कमलगर्भाभो रुद्रः कालाग्निसन्निभः।**
**पुरुषः पुण्डरीकाभो रूपं तत्परमात्मनः॥' इति।**

वायुसंहितायाम् -

[5]**'ब्रह्मत्वे सृजते लोकान् कालत्वे संक्षिपत्यपि।**
**पुरुषत्वेऽप्युदासीनस्तिस्त्रोऽवस्थाः प्रजापतेः॥' इति।**

अत्र परिशेषात् पुरुषशब्दो विष्णुविषयः। आग्नेये -

**'अथवा पुरुषसूक्तेन पुरुषं नित्यमर्चयेत्।**
**अर्चनं संप्रवक्ष्यामि विष्णोरमिततेजसः॥' इति।**

अत्र व्यतिकरेण प्रयोगादैकार्थ्यम्। ऋग्विधाने **'पुरुषस्य हरेस्सूक्तं स्वयं धन्यं यशस्करम्'** इति।

ननु पुरुषशब्दस्य **'पुरुषावात्ममानवौ'** इत्यभिधानकोशस्मृतेः लौकिकवैदिकप्रयोगप्राचुर्यात् चात्मसामान्ये शक्तेरावश्यकतया न विशिष्यापि नारायणे शक्तिः कल्प्या, [6]बर्हिराज्याधिकरण-

---

1. रामायणे.2.4.33
2. ह.वं.1.40.62
3. भा.पु.10.1.20
4. लिङ्ग.पु.1.70.92
5. लिङ्ग.पु.1.70.91
6. मी.को.7

विरोधात्। तत्र हि म्लेच्छैस्तृणघृतादिजातिमात्रे आर्यैः संस्कृततृणादावेवप्रयुज्यमानानां बर्हिराज्यादिशब्दानां यववराहाधिकरणन्यायेन शास्त्रार्थप्रसिद्धिबलीयस्त्वात् संस्कारनिमित्ततामाशंक्य शास्त्रस्थप्रयोगस्य जात्यव्यभिचाराज्जातिशक्तिमादायोपपादनसम्भवेन विरोधाभावाज्जातिवाच्यतैवेति सिद्धान्तितम्।

यद्येवं सत्यपि प्रयोगनिर्वचनाभ्यां नारायणे शक्तिः तदा [1]**'पुरुषं कृष्णपिङ्गलम्'**, [2]**'पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि'**, [3]**'तमीशानं पुरुषम्'** इति श्रुतौ [4]**'शूद्राः पादात्पिनाकिन'** इति प्रस्तुत्य[5] [6]**'पुंसां तु पुरुषश्श्रीमान् ज्ञानगम्यो न चान्यथा'** इति लैङ्गे परमशिवे, **'ललाटाक्षः शूलपाणिः पुरुष'** इति संहाररुद्रे, [7]**'अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठञ्च'** इति पिण्डाण्डमूलाङ्गुष्ठसमाश्रयणलिङ्गोपास्थापिते ब्रह्माण्डमूलभूताधारलोकवासिनि कालाग्निरुद्रे च प्रयोगात्, [8]**'यस्मात् पर्यनुशेते च तस्मात् पुरुष उच्यत'** इति लैङ्गे शिवनामसु निर्वचनाच्च शिवेऽपि शक्त्यन्तरं स्यादिति चेत्, (न ?) तथा सति तथैव शिवशब्दस्यापि विशिष्य शक्त्यभावप्रसङ्गात्।

न च **'शिवश्शूली महेश्वर'** इति नामानुशासनाद्विशिष्यशक्तिरिति वाच्यम्, न्यायविरोधे अनुशासनस्याकिञ्चित्करत्वात्। अन्यथा [9]**'पीलुः काण्डे द्रुमे गजे। चरुस्स्थाल्यां हविष्यपि'** इत्यनुशासनेन पीलुचरुशब्दयोः गजस्थालीवचनत्वप्रसङ्गात्। नहि तदिष्टम्, [10]**'तेष्वदर्शनात् विरोधस्य समा विप्रतिपत्तिः स्यात्'** इत्याद्यधिकरणेषु निषिद्धत्वात्। तस्मात् श्रुतिस्मृतिप्रयोगैरभिधा ग्राह्या, अभिधानकोशस्यापि तन्मूलत्वात्। बर्हिराज्यनयस्तु केवलप्रयोगात् शक्तिकल्पनं वारयति, न तु श्रुतिस्मृत्यादिसद्भावेऽपि। तस्मात् पुरुषशब्दस्य श्रुतिस्मृतिप्रयोगसिद्धा भगवति शक्तिर्नापह्नोतुं शक्या।

यच्चोक्तं [11]प्रयोगनिर्वचनाभ्यां रुद्रेऽपि तस्य शक्तिप्रसङ्ग इति, तन्न। न हि **'कृष्णपिङ्गलं**

---

1. म.ना.उ.12.1
2. म.ना.उ.3.1
3. श्वे.उ.4.11
4. लिङ्ग.पु.1.75.10
5. लिङ्ग.पु.1.75.11-12
6. लिङ्ग.पु.1.75.12
7. म.ना.उ.16.3
8. लिङ्ग.पु.1.70.103
9. वैजयन्तीकोश.6.1.62
10. मी3.सु.1.3.8
11. निर्वरणाभ्याम् पाठभेदः

**पुरुषम्**', '**त्र्यक्षश्शूलपाणिः पुरुषः**', '**श्रीमान् पुरुषः**', '**नीलो घटः**', '**दण्डिनं पुरुषमानय**' इत्यादिप्रयोगः विशेषयोगिनि विशेष्यपदस्य विशिष्य शक्तिं कल्पयितुमीष्टे। [1]'**पुरुषस्य विद्म**' इति श्रुतेस्तु यजुर्भाष्यं दर्शयिष्यते। [2]'**तमीशानम् पुरुषमि**'ति श्वेताश्वतरवाक्यं तु विष्णुपरमिति स्थापयिष्यते। पुरीशयत्वनिमित्तकोदाहृततामसपुराणविशेषस्थनिर्वचनं तु पुरीशयत्वस्य भगवत्येव बहुप्रमाणसिद्धत्वात् प्रबलतमविष्ण्वसाधारण्यवचनविरोधाच्च प्रशंसापरम्।

वस्तुतस्तु नात्र बर्हिराज्यनयावतारः। **ते सर्वे पुरुषांशत्वादुच्यन्ते पुरुषा इति**' इत्याद्युदाहृतवचनैः विष्ण्वसाधारण्यात्सामान्यशक्तेरसिद्धेः। '**पुरुषा वात्ममानवौ**' इत्याद्यभिधान-कोशस्तु स्मृत्यनुरोधात् प्रचुरप्रयोगविषयमात्रसङ्ग्राहकः। दृष्टं चैतत् पील्वादिनामानुशासने। '**महर्षयस्तु शब्दैकगम्यपरतत्त्वस्वरूपादिनिर्णयार्थप्रवृत्ताः** [3]**तदनुपयोग्य औपनिषदशब्दार्थसंबन्धपरिपालने यतन्त**' इति तदीयानि वचांसि [4]अविप्लुतशब्दार्थ-सम्बन्धाध्यवसायप्रयोगादिप्रयोजनेभ्योऽभिधानकोशेभ्यो बलीयांसि, धर्मनिर्णयतत्परार्थव्यवहार इव म्लेच्छव्यवहारात्। तदुक्तम् – [5]'**तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिस्स्यात्**' इत्यत्र तान्त्रिकैः

'**प्रतिपादकतामात्रं म्लेच्छेष्वध्यवसीयते।**
[6]'**अविप्लुतस्तु शब्दार्थः शिष्टेष्वेवावधार्यते॥**'

इति। एवं पुरुषशब्दस्य भगवति श्रुतित्वेऽपि [7]'**शब्दादेव प्रमित**' इत्यत्र भगवता यदनुगृहीतम् '**ईशानश्रुतेः**' इति, तदात्ममात्रेऽपि श्रुतितया जीवपूर्वपक्षनिरासासामर्थ्यादसाधारण्य-पक्षे सामान्ये प्रसिद्धिप्राचुर्यात् साधारण्यनिरासायात्र गौरवात् प्रौढ्या तदभ्युपगमेन वेश्वरत्वेऽपीशानशब्दश्रुतित्वाद्वेति द्रष्टव्यम्।

अत एव [8]'**य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यत**' इत्यादिश्रुतिसत्त्वेऽपि अन्तरादित्याधिकरणाद्यारम्भः। यद्यमरकोशे तदनुपलम्भमात्रात् कश्चित् कूपमण्डूको ब्रूयात् न पुरुषशब्दस्य भगवति रूढिरनुशासनाभावादिति, तदा '**पुराणपुरुषो यज्ञपुरुष**' इत्यमरशेषेण

---

1. म.ना.उ.3.1
2. श्वे.उ.4.11
3. तदुपयोग्य पाठभेदः
4. अविष्कृत पाठभेदः
5. मी.सू.1.3.8
6. आविष्कृतस्तु पाठभेदः
7. मी.सू.1.3.8
8. छा.उ.1.6.6.

स प्रबोध्यः। नानार्थरत्नमालायां **'पुरुषो धातृपुन्नागनरपुङ्परमात्मसु'** इत्युक्तम्। परमात्मा च नारायण एव।

**'परमात्मा च सर्वेषामाधारः परमेश्वरः।**
**विष्णुनामा स वेदेषु वेदान्तेषु च गीयते॥'**

इत्यादिभिः तथावगमात्, [1]**'पूतात्मा परमात्मा च'** इति सहस्रनामसु पाठाच्च। एवं श्रुतिस्मृतिप्रयोगानामानुशासनैः पुरुषशब्दस्य भगवदभिधानत्वात् तेन वेद्यदेवतानिर्धारणं युज्यत एव।

अत एवाग्रिमखण्डे -

[2]**'धनुर्गृहीत्वोपनिषदं महास्त्रं शरं ह्युपासानिशितं सन्धयीत।**
**आयम्य तद्भागवतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि॥'**

इति भागवतत्वं भगवद्भक्तिमत्त्वं चेतसो विशेषणं [3]कृतम्, उपास्यपरदेवताभक्तेः विद्यानिष्पत्तिहेतुत्वात्। श्रीमद्रामायणे भगवत्परतयैव इयं श्रुतिरुपबृंहिता। रावणवधानन्तरं [4]**'ब्रह्मा ब्रह्मविदां वर'** इत्युक्त्वा तद्विदितब्रह्मस्वरूपम् [5]**'अक्षरं ब्रह्म सत्यं चे'**त्यादि [6]**'पुरुषः पुरुषोत्तम'**इत्यन्तवचनमुखेन दर्शयता वचनजातेन शब्दतोऽर्थतश्चैतद्वाक्य-प्रत्यभिज्ञानात्। वैष्णवे पुराणेऽप्युपबृंहिता। तत्र हि [7]**'भेषजं भगवत्प्राप्तिः'** इति संसारभेषजतया भगवत्प्राप्तिं प्रक्रम्य **'कोऽसौ भगवान् केन च तत्प्राप्तिः'**[8] इत्यपेक्षिते तत्प्राप्तिहेतुः मुण्डकश्रुत्यनुसारेणानुक्रान्तः। तत्र हि

[9]**'द्वे वै विद्ये वेदितव्ये इति चाथर्वणीश्रुतिः।**
**परया त्वक्षरप्राप्तिः ऋग्वेदादिमयापरा॥'**
[10]**'यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम्।**
**अनिर्देश्यमरूपञ्च पाणिपादाद्यसंयुतम्॥'**

---

1. महा.अनु.149.15
2. मुण्डक.2.23
3. ज्ञातम् पाठभेदः
4. रामायण.6.117.3
5. रामायण.6.117.14
6. रामायण.6.117.15
7. विष्णु.पु.6.5.59
8. मुण्डक.1.1.3-6
9. विष्णु.पु.6.5.35
10. विष्णु.पु.6.5.66

[1]**'विभुं सर्वगतं नित्यं भूतयोनिमकारणम्।'**

इत्यादिना एवं [2]**'यत्तदद्रेश्यमग्राह्यम्'** इत्यादिश्रुत्यर्थम् [3]अनुक्रम्य [4]**'श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्'** इति विष्णुस्वरूपपरत्वमस्याः श्रुतेरुक्तम्। तदुपपादनाय चाग्रिमखण्डे [5]**'आयम्य तद्भागवतेन चेतसा'** इत्युपास्यस्वरूपाभिधायिभगवच्छब्दं मनसि निधाय तद्वाच्यमपि विष्णुस्वरूपमित्युक्तं [6]**'तदेव भगवद्वाच्यं स्वरूपं परमात्मन'** इत्यादिना। तत्रैव प्रचेतस्स्तोत्रे [7]अचक्षुश्श्रोत्रममलमवाक्पाणिमनामयम्, [8]**'अनामगोत्रमसुखम-तेजस्कमहेतुकम्'** इति। अत्र [9]**'नताः स्म पुरुषोत्तमम्'** इति पूर्वेण सम्बन्धः। तथा पञ्चमे अंशे ब्रह्मस्तोत्रे [10]**'द्वे विद्ये त्वमिहाम्नाते परा चैवापरा तथा'** इत्यारभ्य [11]**'त्वमव्यक्तमनिर्देश्यमचिन्त्याना-मवर्णवत्। अपाणिपादरूपं च'** इत्यनेन ग्रन्थेनोपबह्मितेयं श्रुतिः।

एवञ्च सामान्यशक्तस्य तद्विशेषपर्यवसानाद्वा सामान्यशक्तौ सत्यामसत्यामपि भगवन्मात्रगोचरशक्तेर्वा पुरुषशब्दस्य भगवत्परता। अत एव हि श्रीवाराहे एकत्रिंशाध्याये -

[12]**'हन्ति पाति शरीराणि सृजत्यन्यानि चात्मनः।**
**युगे युगे सर्वगोऽयं वेदान्तपुरुषो ह्यसौ॥'**

इति नारायणः कारणमिति कथमभिधीयते, पुरुषस्यैव तदुक्तेरित्यत्राह **'वेदान्ते'**ति। तत्र प्रतिपाद्यमानः पुरुषोऽयमेवेत्यर्थः।

किञ्चात्र मोक्षसाधनज्ञानविषये हि पुरुषशब्दः प्रयुज्यते। पुरुषसूक्ते च [13]**'तमेवं विद्वानमृत इह भवति'** इति पुरुष एव तादृशज्ञानविषयः प्रतिपादितः। अतः पुरुषसूक्तप्रतिपाद्यस्यैव

---

1. विष्णु.पु.6.5.67
2. मुण्डक.1.1.6
3. असुसृत्य पठभेदः
4. विष्णु.पु.6.5.68
5. मुण्डक.2.2.3
6. विष्णु.पु.6.5.69
7. विष्णु.पु.1.14.40
8. विष्णु.पु.1.14.42
9. विष्णु.पु.1.14.37
10. विष्णु.पु.5.1.35-39
11. विष्णु.पु.5.1.40
12. वाराह.पु.31.20
13. पु.सू.17

पुरुषस्येह प्रत्यभिज्ञायमानत्वात् पुरुषसूक्तस्य च भगवत्परत्वात् तत्समानार्थके अत्र पुरुषपदस्य भगवत्परत्वं युक्तम्।

कथं पुरुषसूक्तस्य नारायणपरत्वमिति चेत् -

**'श्रुतिस्मृतिसमाख्यानविनियोगोपबृह्मणैः।**
**सूक्तस्य पौरुषस्यास्य भगवत्परतां विदुः॥'**

सामविधिब्राह्मणे **'इदं विष्णुः** [1]**प्रक्षस्य प्रविष्णुः।** [2]**'प्र काव्यमुशनेव ब्रुवाण'** इति वाराहवत्यं पुरुषव्रते चैष वैष्णवी नाम संहिता। एतां प्रयुञ्जन् विष्णुं प्रीणाति इति विष्णुर्देवतास्येति विग्रहे [3]**'सास्य देवता'** इति विहितप्राग्दीव्यतीयाणन्तेन वैष्णवीशब्देन तद्धितश्रुत्या विष्णुदेवत्यत्वसिद्धेः। अत्र च विष्णुप्रीतिहेतुत्वावगमात् स्तवप्रियत्वेन सहस्रनामादिषु सिद्धस्य तस्य [4]**स्तुति**करणत्वस्य सूक्तेस्सम्भवात् विष्णुप्रीतिहेतुत्वलिङ्गादपि विष्णुपरत्वं लभ्यते।

तथारुणकेतुकाख्ये प्रपाठके [5]**'आपो वा इदमासन् सलिलमेव'** इति प्रलयावस्थामुपक्रम्य **'स प्रजापतिरेकः पुष्करपर्णे समभवत्'** इति ब्रह्मण उत्पत्तिम्, तस्मादनेकेषां भूतानामुत्पत्तिमुक्त्वा प्रजापतिरित्यनुवृत्तौ [6]**'अन्तरतः कूर्मं भूतं सर्पन्तम्। तमब्रवीत्। मम वै त्वङ्मांसा। समभूत्। नेत्यब्रवीत्। पूर्वमेवाहमिहासमिति। तत्पुरुषस्य पुरुषत्वम्'** इति पुरुषशब्दनिर्वचनेन सृष्टजगद्धारणार्थं कूर्मरूपधरस्य नाभिपुष्करे प्रजापतिस्स्रष्टुरादिकर्तुरेवानन्य-साधारणं नामाभिधाय पुरुषसूक्तेनाप्ययमेव पुरुषो जगत्स्रष्टृतयानुगम्यत इति ज्ञापयन्नाह – [7]**'सहस्रशीर्षा पुरुषः सहस्राक्षस्सहस्रपात्। भूत्वोदतिष्ठत्'** इत्यादिना। एवञ्च नात्र तत्तत्कालीनसहस्रशीर्ष-त्वादियुक्तपुरुषभावविशिष्टोत्थानमुच्यते। तथा सति [8]**'पूर्वमेवाहमिहासम्'** इत्यनन्तरवाक्ये भूप्रवृत्तिनिमित्तविरोधापत्तेः। न हि तेन रूपेण पूर्वसत्त्वमस्ति। अग्रिमपुरुषशब्दनिर्वचनत्वञ्च [9]स्वरससिद्धम् अनपेक्षितं च परपक्षे निर्वचनम्। सहस्रशीर्षत्वादि-विशिष्टपुरुषो भूत्वोदतिष्ठदिति

1. पक्षस्य विष्णुः पाठभेदः
2. सामवेद.सं.5.6.2
3. पाणिनी.सू.4.2.24
4. श्रुति पाठभेदः
5. तै.आ.1.89.
6. तै.आ.1.91-92
7. तै.आ.1.92
8. तै.आ.1.23.4
9. स्वरसत्वं पाठभेदः

खल्वर्थः परेणोच्यते। तत्र पुरुषशब्दो लोकप्रसिद्धार्थ एवेति का निर्वचनापेक्षा। किञ्च तत्पक्षे [1]**'त्वं वै पूर्वं समभूः'** इति विरुद्धतादृशपुरुषस्यैव सम्बोद्धव्यत्वात् तस्य च पूर्वत्वाभावात्। तस्मात् पुरुषशब्दवाच्यत्वमुक्त्वा तदुपपादकतया पूर्वं सत्त्वेन निश्चितः सम्भवत्पुरुषशब्द-निर्वचनोऽयमेव पुरुषः पुरुषशब्दवति पुरुषसूक्तेऽप्युच्यत इत्यभिप्रायेण पुरुषसूक्तार्थं प्रत्यभिज्ञापयति **'उदतिष्ठत्'** इति। **'अत्यतिष्ठद्दशाङ्गुलम्'** इत्युक्तार्थः प्रत्यभिज्ञाप्यते। [2]**'कूर्मम्भूतमि'**त्यत्र कूर्मभूतं किमित्यपेक्षायां **'तत्पुरुषस्य पुरुषत्वमि'**त्यग्रे निर्दिश्यमानः पुरुष एव। पुष्करोत्पत्तिस्थानं विशेष्यत्वेन लभ्यते। **'सहस्रशीर्षा'** इत्यत्र च विशेष्यभूतस्स परामृश्यते न कर्मः। इदञ्च पुरुषसूक्तं वक्ष्यमाणब्रह्मादिजगत्सृष्टत्वस्याप्युपलक्षणम्। तेन निर्वचननिमित्तस्य सर्वेभ्यः पूर्वसिद्धत्वस्योपपादनं कृतं भवति।

आथर्वणे गोपथाख्ये ब्राह्मणेऽष्टादशमहाशान्तिप्रकरणे **'रौद्या रौद्रगणान् हुत्वा रौद्रपञ्चापत्यं जपेत् यो जात इत्यैन्द्या'** इत्येवं तत्तद्देवत्येषु कर्मसु तत्तल्लिङ्गेषु मन्त्रेषु विनियुज्यमानेषु वैष्णव्या पुरुषसूक्तमित्युक्तम्। अत्र वैष्णव्यां विनियोगबलात् तत्तद्देवत्यमन्त्रसाहचर्याच्च पुरुषसूक्तस्य भगवत्परत्वं लभ्यते। तत्र **'रौद्रगणं हुत्वा रौद्रपञ्चापत्यम्'** इति विनियोज्यमन्त्राणां तत्तत्कर्मोचितदेवत्यत्वेन कीर्त्यमानत्वादिहापि विष्णुदेवत्यत्वेन कीर्तनमुचितम्।

अतः पुरुषसूक्तमित्यत्र पुरुषशब्देन विष्णुमभिधाय तत्प्रतिपादकत्वेन सूक्तस्य कीर्त्यमानत्वात् श्रुत्यापि तत्परत्वसिद्धिः।

शतपथेऽपि [3]**'पुरुषो ह वै नारायणोऽकामयत। अतितिष्ठेत् सर्वाणि भूतान्यहमेवेदं सर्वं स्यामिति स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमपश्यत् तमाहरत् तेनायजत तेनेष्ट्वात्यतिष्ठत् सर्वाणि भूतानि'** इति पुरुषमेधार्थवादः। [4]**'पुरुष एवेदं सर्वम्'**, [5]**'अत्यतिष्ठद्दशाङ्गुलम्'** इत्यादिभिः पुरुषसूक्तप्रतिपन्नसर्वात्मकत्वसर्वातिशायित्वलक्षणसव-निष्टानादिकं नारायणगतत्वेन प्रतिपाद्य तत्प्रापकतया पुरुष एव स्तूयते। ततश्च तत्प्रत्यभिज्ञानात्पुरुषसूक्तस्य नारायणपरत्वं सिद्धम्। [6]**'यद्भूतं यच्च भव्यम्'** इत्युक्तं समस्तभूतभविष्यद्वस्तुजातात्मत्वञ्च न कर्मसाध्यं सम्भवतीति विरोधात्। अतोऽकर्मसाध्यतोक्तिः गुणवादः। यथा यद्ब्रह्मविद्यया सर्वं भविष्यन्तोऽमन्यन्त किमुत तद्ब्रह्मावेद्यस्मात् तत्सर्वमभवदिति।

---

1. तै.आ.1.92
2. कूर्मभूतमित्यपेक्षायां पाठभेदः
3. शत.ब्रा.12.6.1.1.
4. पु.सू.2
5. पु.सू.1
6. पु.सू.2

**'ब्रह्म वा इदमग्र आसीत्। तदात्मानमेवावेदाहं ब्रह्मास्मीति। तस्मात् तत्तत् सर्वमभवत्। तदिदमप्येतर्हि 'य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति'** इत्यर्थवादः।

किञ्च **'पुरुष एवेदं सर्वम्'** इति मन्त्रस्य नारायणोपनिषदि [1]**'नारायण एवेदं सर्वं यद्भुतं यच्च भव्यम्'** इति वाक्येन स्पष्टीकरणात् पुरुषसूक्तं विष्णुपरम्। पुरुषसूक्तभाष्योदाहत-श्रुत्यन्तरैश्च सूक्तस्यास्य भगवत्परत्वसिद्धिः।

मुद्गलोपनिषदि - **'वामदेव आङ्गिरसः सन् पूर्वप्रजासमारब्धोऽत्रिपत्न्यानसूयया गर्भ एव शयानो ब्रह्म वेदयाञ्चक्रिरे। स हि गर्भः पुरा भित्वा ब्रह्मलोकमुपचक्राम। मध्येऽध्वानमुपनिषद्य उवाच भगवांस्तु गर्भपञ्जरमेवाभिनिविशमाने विज्ञानतोपायम् अकस्मात् किञ्चिद्वीतासंगः [2]सर्वम्मन्यमानः अध्वनः पारमुपगच्छसि। तदेतदिहाश्चर्यं यद्बालस्य गुरुमनुपेयुषोऽधिगन्तुश्च भगवतोऽकस्मात् [3]विशिष्टो ब्रह्मप्रत्ययो विपरीतस्य विपरीतम्। सोऽहं भगवः उप त्वा सेदिवानस्मि'** इत्यादिभिः [4]**'भगवज्ज्ञानमुपदिश्यपुनरपि सूक्ष्मश्रवणाय प्रणतायेन्द्राय परमरहस्यभूतं पुरुषसूक्ताभ्यां खण्डद्वाभ्यामुपादिशत्। द्वौ खण्डावुच्येते। योऽयमुक्तस्स पुरुषो नामरूपज्ञानागोचरं संसारिणामतिदुर्ज्ञेयं विषयं विहाय क्लेशादिभिः सङ्क्लिष्टदेवादीनुज्जिहीर्षया सहस्रकलवयवकल्याणं दृष्टमात्रेण मोक्षदं वेषमाददे। तेन वेषेण भूम्यादिलोकं व्याप्यानन्तयोजनमत्यतिष्ठत्। स पुरुषो नारायणो भूतं भवच्चासीत्। स एव सर्वेषां मोक्षदश्चासीत्। स च सर्वस्मात् महिम्नो ज्यायान्। तस्मान्न कोऽपि ज्यायान्। महापुरुष आत्मानं श्चतुर्धा कृत्वा परमे व्योम्नि चासीत्। इतरेण चतुर्थेनानिरुद्धनारायणेन विश्वान्यासन्। स च पादनारायणो जगत्सृष्टुम् प्रकृतिमजनयत्। स समृद्धकायः सन् सृष्टिकर्म न जज्ञिवान्। सोऽनिरुद्धनारायणस्तस्मै सृष्टिमुपादिशत्। ब्रह्मन् तवेन्द्रियाणि याजकानि ध्यात्वा कोशभूतं दृढं ग्रन्थिकलेबरं हविर्ध्यात्वा मां हविर्भुजं ध्यात्वा वसन्तकालमाज्यं ध्यात्वा ग्रीष्ममिध्मं ध्यात्वा शरदृतुं रसं ध्यात्वा पुरोडाशं ध्यात्वैवमग्नौ हुत्वाङ्गस्पर्शात् कलेबरो वज्रां हीष्यते। ततः स्वकार्यान् सर्वप्राणिजीवान् सृष्ट्वा पश्चाद्याः प्रादुर्भविष्यन्ति। ततश्चराचरं ( स्थावरजङ्गमात्मकम्? ) जगत् भविष्यति। एतेन जीवात्मपरमात्मनोः ( जीवात्मनोः? ) योगेन मोक्षप्रकारोऽपि ( रश्च? ) कथ्यत इत्यनुसन्धेयम्'** इति प्रथमः खण्डः।

---

1. ना.उ.2
2. सर्वैर्मन्यमानः पाठभेदः
3. विशब्दो पाठभेदः
4. मुद्गल.उ.1-2

**'य इमं सृष्टियज्ञं जानाति मोक्षप्रकारञ्च सर्वमायुरेति। अरोगश्च भवति। श्रीमांश्च भवति। पुत्रपौत्रादिभिस्समृद्धो भवति। विद्वांश्च भवति। महापातकात् पूतो भवति। अगम्यागमनात् पूतो भवति। वेदिजन्महानात्पूतो भवति। सर्वगमनात् पूतो भवति। गुरोरशुश्रूषणात् पूतो** भवति। अयाज्ययाजनात् पूतो भवति। ( अरोगश्च भवति इत्यारभ्य अयाज्ययाजनात् पूतो भवति इत्यन्तं न पठ्यते इति भाति )

**य एतदुपनिषदं नित्यमधीते सोऽग्निपूतो भवति। स वायुपूतो भवति। स आदित्यपूतो भवति। अरोगी भवति। श्रीमांश्च भवति। पुत्रपौत्रादिभिस्समृद्धो भवति। विद्वांश्च भवति। महापातकात् पूतो भवति। सुरापानात् पूतो भवति। अगम्यागमनात् पूतो भवति। मातृगमनात् पूतो भवति। दुहितृस्नुषाभिगमनात् पूतो भवति। स्वर्णस्तेयात् पूतो भवति। वेदिजन्महानात् पूतो भवति। गुरोरशुश्रूषणात् पूतो भवति। अयाज्ययाजनात् पूतो भवति।उग्रप्रतिग्रहात् पूतो भवति। परदारगमनात् पूतो भवति। क्रोधादिभिरबाधितो भवति। सर्वेभ्यः पापेभ्यः पूतो भवति। इह जन्मनि पुरुषो भवति। तदिदं परुषसूक्तार्थमतिरहस्यं राजगुह्यं गुह्यादपि गुह्यतरं नादीक्षितायोपदिशेत् नाप्रियवादिने नायज्ञशीलाय नासंवत्सरवासिने नासन्तुष्टाय नानधीतवेदाय। गुरुरेवम्भूतस्सन् शुचौ देशे पुण्ये नक्षत्रे प्राणानायम्य पुरुषं ध्यायेत्। उपसन्नाय शिष्याय दक्षिणकर्णे सकृत्पुरुषसूक्तमुपदिशेत्। न बहुशो वदेत्। यातयामो भवतीति। असकृत्कर्णमुपदिशेत्। एवं कुर्वते अध्येष्टा अध्यापकश्चेह जन्मनि भयतोऽव ( एतत्कुर्वाणोऽध्येताध्यापकश्च इह जन्मनि पुरुषो भवतीत्युपनिषत्? )'** इति।

शाम्बव्यब्राह्मणे - पुरुषसूक्तसंहितायां आदितश्चतसृणामर्थमुक्त्वा **'तस्मादित्यादि'** - तस्मात् व्यापारात्, अनन्तरम् - **'अथ पादनारायणान्मूलप्रकृतिरजायत। सा प्रकृतिः पादनारायणशासनान्महदहङ्कारादीन् पदार्थानजनयत्। एवं सूक्ष्मायां सृष्टौ कृतायां स पादनारायणः स्थूलसृष्ट्यर्थं चतुर्मुखमभिदध्यौ। तद्ध्यानानन्तरमधिविराजः पश्चात् पुरुषश्चतुर्मुखाख्योऽजायत। स पश्चात् पुरतश्चात्यरिच्यत। अतिरेको वृद्धिः। सर्वकार्यक्षमोऽतिवृद्धकायोऽभवत्। वृद्धकायभूतस्तूष्णीमास्त। अनिरुद्धनारायणा-प्राक्षीत्। ब्रह्मन् किं तूष्णीं भवसि। अज्ञानादिति होवाच। ब्रह्मंस्तवेन्द्रियाणि देवान् ऋत्विजः कृत्वा त्वदीयं च कलेबरं हविः कृत्वा मां हविर्भुजं ध्यात्वा मय्यग्नौ निवेदय। मदङ्गस्पर्शमात्रेण जगत्कोशभूतस्त्वत्कायो बृंहिष्यते। तस्मादुद्धूतानि प्राणिजातानि यथापुरं निर्माय त्वष्टा भविष्यसि। य एवं सृष्टियज्ञं जानाति स जन्मनीह मुक्तो भवति'** इति?

शतपथब्राह्मणेऽध्यात्मखण्डे - **'अतो ज्यायान्'** इत्युक्तं ज्यैष्ठ्यं प्रतिपादितम् – **'यदायं नारायणाख्यः पुरुषो महान् भवति तदानीमेवाणुर्भवति। यदायं व्याप्तो भवति तदैव प्रादेशिको भवति। यदैव भूमौ भवति तदैव परमव्योम्नि भवति। यदा एको भवति तदाऽनेको भवति। यदायं प्राकृतो भवति तदैवाप्राकृतो भवति। यदा विषयविवशो भवति तदैवोपरतो भवति। यदा नरको भवति तदा स्वर्गो भवति। यदा स्त्री भवति तदा पुरुषो भवति। यदा मनुष्यो भवति तदा देवो भवति। यदा सर्वं भवति तदा शून्यो भवति। यदा प्रपञ्चभिन्नो भवति तदैवाभिन्नो भवति। यदा बद्धो भवति तदैव मक्तो भवति। यदा शुक्लो भवति तदा कृष्णो भवति। यदाशरीरो भवति तदा शरीरी भवति। तस्माद्यानि यानि विरुद्धस्वभावानि तानि तानि सर्वाणि तदानीमेवास्मिन् लीनानि भवन्ति। तस्मादयमीदृश इति दुर्ज्ञानो दुर्वचोदुर्ध्यानः। तस्मात् ज्येष्ठः अवाङ्मनसयोरगोचर'** इत्येताः श्रुतयः पुरुषसूक्तभाष्योदाहृताः।

किञ्च [1]**'अम्भस्यपार'** इत्यतः प्रभृति [2]**'एष हि देव'** इत्यन्तः प्रकृतसन्दर्भः परमात्मसूक्तम्, भास्करादिभिस्तथा व्याख्यानात्। तत्र च सूक्ते **'अब्द्भ्यस्सम्भूतो हिरण्यगर्भः इत्यष्टौ'** इत्यनेन वाक्येन **'अम्भस्यपार'** इत्येतदन्तर्गतेन **'अम्भस्यपार'** इत्यस्य **'अद्भ्यस्सम्भूत'** इत्यस्य **'हिरण्यगर्भ'** इत्यस्यचान्तर्भावितत्वात् त्रयाणामेकवाक्यत्वमवगम्यते। एतेषाञ्च नारायणपरत्वं लिङ्गसमाख्याविनियोगैरवगम्यते। **'अद्भ्यस्सम्भूत'** इत्यत्र हि [3]**'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ'** इति श्रीभूमिपतित्वमाम्नायते। अत्र ह्रीशब्दस्य—

> **'रामस्य दक्षिणे पार्श्वे पद्मा श्रीस्समवस्थिता।**
> **सव्ये तु श्रीविशालाक्षी व्यवसायस्तथाग्रतः॥'**
> **(रामस्य दक्षिणे पार्श्वे सपद्मा श्रीरुपस्थिता।**
> **सव्येऽपि च मही देवि व्यवसायस्तथाग्रतः॥)**

इति परिशेषात् सव्यपार्श्वान्वयलिङ्गेन च रामायणे भूदेव्यां प्रयोगेण, पाद्मे च **'सव्ये तु श्रीः'** इत्यस्य स्थाने [4]**'तथैव धरणी देवी दक्षिणेतरगा तथा'** इति प्रयोगाच्चात्रत्यह्रीशब्द-स्योपबृंहणेन भूमिपरत्वात्। व्यवसाय इति – सङ्कल्पः सुदर्शन इत्यर्थः।

यद्वा लक्ष्मीतन्त्राद्यनुसाराच्छ्रीवाचको ह्रीशब्दः। तथाहि तत्र -

---

1. म.ना.उ.2.1-12
2. म.ना.उ.2.1
3. पु.सू.2.6.
4. पद्म.पु.उत्तर.244.69

[1]**‘परमात्मानमादाय योजयेत् कालवह्निना।’**
[2]**‘त्रैलोक्यैश्वर्यदोपेतां मायामस्मिन्नियोजयेत्।**
**इयं सा परमा शक्तिः वैष्णवी सर्वकामदा॥’**

इति परमात्मकालानलत्रैलोक्यैश्वर्यदमायाशब्दवाच्यतया पूर्वाध्यायसिद्धैरुत्तराध्याये च [3]**‘तं विद्धि प्रथमं वर्णं हकारं पुरुषोत्तमम्’** इत्यादिना पुरुषोत्तमस्य [4]‘तत्तैजसस्यैव परमव्योमेशरूपस्य [5]तदिच्छाज्ञानक्रियारूपाया लक्ष्म्याश्च वाचकतया वक्ष्यमाणैः हकाररेफानुस्वारैकारैः [6]**‘ह्ल्लेखा’** मन्त्रमुद्धृत्य—

[7]**‘ह्ल्लेखा परमा दिव्या मत्स्वरूपं पुरन्दरः।’**
[8]**‘अनयैव सदा साङ्ख्यैः सङ्ख्यायेऽहं सनातनी।’**
[9]**‘अनयैव सदा योगैस्समाधीये समाधिना।**
**अभिधीयेऽनु यैवाहं शैवैः षट्त्रिंशदन्तिमा॥’**

इत्यादिना लक्ष्मीवाचकत्वस्य प्रपञ्चनात्। [10]**‘अस्या रूपाणि पञ्चेह तत्त्वज्ञास्सम्प्रचक्षत’** इत्यादिनानुस्वारान्तत्वेकारान्तत्वबिन्दुनादान्तत्वमकारान्तत्वैश्चतुरः पक्षानागमादिसिद्धान् प्रदर्श्य वेदे **‘ह्रीश्च त’** इति विसर्जनीयान्तानामाभिप्रायेण [11]**‘सृष्टिकारणमन्तेऽन्ये वैदिकास्समधीयत’** इति पञ्चमपक्षोपन्यासाच्च [12]**‘विसर्गः सृष्टिकृत् ख्यातो ह्यकारः परमेश्वर’** इति तत्रत्यवर्णनिघण्ड्वनुसारेण सृष्टिकारणशब्दस्य विसर्गवाचित्वात्। एवं श्रीवाचको ह्रीशब्दोऽन्तअरङ्गलक्षणया भूमिपरः। [13]**‘स्रष्टा विष्णुरियं सृष्टिः श्रीर्भूमिः श्रीधरो ( भूधरो? ) हरिः’** इति विष्णुपुराणानुसारात्।

---

1. लक्ष्मीतन्त्र.25.36
2. लक्ष्मीतन्त्र.25.37
3. लक्ष्मीतन्त्र.27.9-14
4. तत्तैजसस्तसैव पाठभेदः
5. लक्ष्मीतन्त्र.27.14
6. लक्ष्मीतन्त्र.25.46
7. लक्ष्मीतन्त्र.27.6
8. लक्ष्मीतन्त्र.25.40
9. लक्ष्मीतन्त्र.25.41
10. लक्ष्मीतन्त्र.27.17
11. लक्ष्मीतन्त्र.27.21
12. लक्ष्मीतन्त्र.25.10
13. विष्णु.पु.1.8.19

किञ्च समानप्रकरणे वाजसनेयके [1]'**ह्रीश्च ते लक्ष्मीश्च पत्न्यौ**' इति श्रूयते। तत्र च लक्ष्मीशब्देन पौनरुक्त्यप्रसङ्गात् लक्ष्म्या सहैकपत्यन्वयाल्लिङ्गात् '**श्रीर्भूमिः श्रीधरो हरिः**' इत्यदाहतवैष्णव-वचनानुगुण्यात् [2]'**गन्धद्वाराम्**' इति मन्त्रे '**त्वामिहोपह्वये श्रियम्**' इति भूम्यां दृष्टप्रयोगत्वाच्छ्रीशब्दो भूमिपरः, न त्वैश्वर्यादिपरः। तत्स्थानापन्नः तैत्तिरीये ह्रीशब्दोऽपि तथा। यद्यपि '**श्रीश्च( ह्रीश्च? ) ते लक्ष्मीश्च**' इत्यत्र श्रीशब्दस्य प्रथमश्रुतत्वाच्चरम-श्रूतलक्ष्मीशब्दस्यान्यपरत्वं न्याय्यम्, तथापि श्रौतभूमिविषयोदाहृतप्रयोगानुसारा-दुपबृम्हणानुरोधाच्च भूपरत्वम्।

न च [3]'**श्रियं लक्ष्मीमौपलामम्बिकां गाम्**' इत्यायुष्यसूक्तेः श्रीशब्दलक्ष्मीशब्दयोः गौर्यामपि दृष्टप्रयोगत्वादत्रापि तत्परत्वमिति केनचिदुक्तं युक्तम्। तत्र हरिहरविरिञ्चस्कन्दपत्नीना-मभिधानात्। आरण्यपर्वणि[4] स्कन्दपत्न्या षष्ठीतिथ्यधिदेवतात्वेन षष्ठीनामकत्वम् देवीमाहात्म्ये चेन्द्रसेनेत्यभिधानं प्रसिद्धम्। बह्वीनां पत्नीनामभिधानादेव '**षष्ठीञ्चे**'ति समुच्चयोपपत्तिः। यामिन्द्रसेना [5]इत्युदाहुः तां षष्ठीञ्च इत्यन्वयः। [6]'**षष्ठीञ्च याम्**' इति पाठे सामानाधि-करण्येनान्वयेऽप्यपौनरुक्त्यैकतरपदानां तत्तच्छब्दवाच्यतालक्षणाया (वाच्यत्वावच्छिन्नलक्षणायाः ?) वाच्यत्वादुपक्रमस्थश्रीपदस्य मुख्यार्थत्वमङ्गीकृत्येतरपदेषूक्तलक्षणाङ्गीकार्या।

[7]ननु चरमश्रुतस्याम्बिकापदस्य [8]मुख्यार्थता। तस्मादेषां सर्वेषां नाम्नां लक्ष्मीवाचकत्वमेव सिद्ध्यति। अत एव पूर्वतापनीये तृतीयोपनिषदि नृसिंहशक्तिरूपां [9]नानाशब्दवाच्यां लक्ष्मीमधिकृत्य [10]'**श्रियं लक्ष्मीमौपलामम्बिकां गां षष्ठीं च यामिन्द्रसेनेत्याहुः। तां विद्यां ब्रह्मयोनि सरूपामिहायुषे शरणमहं प्रपद्य**' इति श्रूयते।

वस्तुतस्तु तत्र तथात्वेऽप्यत्र नाम्नां स्वारस्यस्यानुरोध्यत्वादौचित्याच्च बह्वीनामेव देवीनामिहाभिधानम्। औचित्यञ्च चतुर्णाम् [11]अवताराणां पूर्वमिहाभिधानात्। तथाहि [12]'**यो**

---

1. पु.सू.2.6
2. श्री.सू.9
3. आयुष्य.सू.4
4. महा.व.229.49-52
5. इत्युदाहृतः पाठभेदः
6. आयुष्य.सू.4
7. नतु पाठभेदः
8. अमुख्यार्थता पाठभेदः
9. मायाम् पाठभेदः
10. नृ.पू.ता.उ.3
11. देवानां पाठभेदः
12. आयुष्य.सू.1

**ब्रह्मा'** इति चतुर्मुखोऽभिधीयते स्वारस्यात्। यो ब्रह्मा स न आयुर्दधातु, तस्मै जुहोमि हविषा घृतेनेत्यन्वयः। प्राणेश्वरः कृत्तिवासाः पिनाकी ईशानो देवः ब्रह्मणः चतुर्मुखादुज्जहार - उद्बभूव, धातूनामनेकार्थत्वात् तत्तत्कर्मानुक्तेश्च। य ईशानः चतुर्मुखादुज्जहार स ईशानो न आयुर्दधातु, तस्मै जुहोमि हविषा घृतेनेत्यन्वयः, **'तनूर्वर्षिष्ठे'**तिवत्। 'यो ब्रह्मा' इत्यनन्तरमेव 'स न आयुर्दधातु' इति वक्तव्येऽप्युभयोरन्वयविवक्षयैवोभयानन्तरं पाठः **'तनूर्वर्षिष्ठे'**तिवदेव।

अथवा यो ब्रह्मा - चतुर्मुखः ब्रह्मणः - परमात्मन उज्जहार स न आयुर्दधातु, यः प्राणेश्वरः कृत्तिवासाः पिनाकी ईशानो देवः स न आयुर्दधातु। यद्वा यो ब्रह्मा ब्रह्मण उज्जहार स न आयुर्दधातु, यः प्राणेश्वरः कृत्तिवासाः पिनाकी ईशानो देवः ब्रह्मण उज्जहार, स न आयुर्दधात्वित्यर्थः। अत्रापि ब्रह्मपदं परमात्मपरम्।

[1]**'विभ्राजमान'** इत्यादिना भगवानभिधीयते। **'विभ्राजमान'** इति नैसर्गिकं तेजोऽभिधीयते। 'रोचमान' इत्यवतारदशायां तदप्रच्युतिः। **'सरिरस्य'** - सलिलस्य समुद्रस्य मध्यात्, **'रोचमान'** एव, **'अगात्'** - अवतीर्णः, दुष्कृद्विनाशार्थत्वात् अवतारस्य, **'धर्मरुचिः'** - अत्युष्णदीधितिः।

[2]**'ब्रह्मज्योतिः'** इत्यादिना सुब्रह्मण्योऽभिधीयते। ब्रह्मज्योतिश्चतुर्मुखपुत्रो रुद्रः। ब्रह्मपत्नीष्वत्रिसुतत्वेन ब्राह्मणस्य सोमस्य पत्नीषु कृत्तिकासु यं गर्भमादधात् बहुरूपं मातृसङ्ख्यानुरोधाय मुखतो बहुरूपं जयन्तम् - सुब्रह्मण्यमसुरविजयाय देवसेनापतिपदाभिषेकात् जयशीलम्। **'वैजयन्तस्सिद्धसेन'** इति वैजयन्ती। किञ्चिद्विकारेऽपि न दोषः। अतश्चतुर्णां देवानामभिधानात्तेषां पत्नीनामभिधानं युक्तम्।

श्रियं लक्ष्मीम् इहायुषे वर्धयामो घृतेन। औपलामम्बिकाम् इहायुषे वर्धयामो घृतेन। गाम् इहायुषे वर्धयामो घृतेन। षष्ठीञ्च याम् इन्द्रसेनेत्याहुः तामिहायुषे वर्धयामो घृतेन। ब्रह्मयोनिं विद्यां निरुक्तदेवताप्रतिपादकवेदाधिदेवतामिहायुषे वर्धयामो घृतेनेत्यन्वयः।

[3]**'एकः पुरस्तात्'** इति पुनर्भगवन्तमाह। [4]**'अहोरात्रे पार्श्वे'** इत्येतच्चार्थलक्ष्मीहरिप्रभृतिरूपविशेषाभिप्रायेण विष्णौ स्वरसम्। [5]**'सीता रात्रिर्दिवा भवान्'** इति पाद्मपुराणवचनेन लक्ष्मीनारायणयोः रात्रिदिवत्वेनोक्ततयार्थलक्ष्मीरूपस्याहोरात्रपार्श्वकत्वात्। तच्च सन्दर्शितम् —

---

1. आयुष्य.सू.2
2. आयुष्य.सू.3
3. आयुष्य.सू.7
4. पु.सू.2.6
5. पद्म.पु.उ.243.35

**'हस्तैर्बिभ्रत् सरसिजगदाशङ्खचक्राणि विद्यां**
**पद्मादर्शौ कनककलशं मेघविद्युद्विलासम्।**
**वामे तुङ्गस्तनमविरलाकल्पमाश्लेषलोभात्**
**एकीभूतं वपुरवतु वः पुण्डरीकाक्षलक्ष्म्योः॥'**

इत्यादिना।

वस्तुतस्तु **'अहोरात्रे'** इत्यादि कालनिर्वाहकत्वपरम्। [1]**'नक्षत्राणि रूपम्'** इत्येतच्च आरण्यपर्वणि पुंसूक्तार्थमनुक्रम्य [2]**'तारारूपाणि दृश्यन्ते यान्येतानि नभःस्थले। मम रूपाणि तान्येव'** इति मार्कण्डेयं प्रति भगवद्वचनेनोपबृंहितम्। मार्कण्डेयेन च ततः श्रुतवता क्रौष्टुकिं प्रति भुवनकोशं वर्णयता मार्कण्डेयपुराणे तत्प्रपञ्चितम्। तत्र हि —

[3]**'भद्राश्वेऽश्वशिरा विष्णुर्भारते कूर्मसंस्थितिः।**
**वाराहः केतुमाले च मत्स्यरूपस्तथोत्तरे॥'**

इति कूर्मरूपमुपक्षिप्य

[4]**'किन्तु कूर्मस्त्वया पूर्वं भारते भगवान् हरिः।**
**कथितस्तस्य संस्थानं श्रोतुमिच्छाम्यशेषतः॥'**

इति क्रौष्टुकिप्रश्नमुद्भाव्य [5]**'नवधावस्थितान्यस्य नक्षत्राणि समन्ततः'** इत्युपक्रम्य, [6]**'मध्यसारस्वता मत्स्याश्शूरसेनास्समाधिना'** इत्यादिना देशविशेषान्मध्याद्यवयवविशेषस्थानभिधाय,

[7]**'कृत्तिकारोहिणीसौम्या तेषां [8]मध्यनिवासतः।**
**नक्षत्रत्रितयं विप्र शुभाशुभविपाकदम्॥'**
[9]**'रौद्रं पुनर्वसूपुष्ये नक्षत्रत्रितयं मुखे'।**
[10]**'आश्लेषर्क्षं तथा पैत्रं फल्गुन्य प्रथमास्तथा।'**

---

1. पु.सू.2.6
2. महा.आरण्य.189.18
3. मार्क.पु.51/31
4. मार्क.पु.55.2
5. मार्क.पु.55.5
6. मार्क.पु.55.7
7. मार्क.पु.55.10
8. मध्ये निवसिनः पाठभेदः
9. मार्क.पु.55.15
10. मार्क.पु.55.19

[1]‘नक्षत्रत्रितयं पादमाश्रितं पूर्वदक्षिणम्।’
[2]‘फाल्गुन्यश्चेतरा हस्तश्चित्रापार्श्वं तथापरम्
(चित्रा चर्क्षत्रयं द्विज?)।’
[3]‘एते जनपदाः पादे स्थिता ये दक्षिणापथे।
स्वाती विशाखा मैत्रञ्च नक्षत्रत्रयमत्र च॥’
[4]‘अश्वकेशस्तथा पुच्छे जातिः कूर्मस्य संस्थिताः।’
[5]‘ऐन्द्रं मूलं तथाषाढं नक्षत्रत्रयमत्र च।’
‘कूर्मस्य पदमेते वै पश्चिमोत्तरमाश्रिताः।
[6]‘आषाढाश्रवणे चोभे धनिष्ठा च तदाश्रयाः।’
[7]क्षेमधूर्ताश्च कूर्मस्य वामं कुक्षिमुपाश्रिताः।’
[8]‘वारुणञ्चात्र नक्षत्रं तद्वत् प्रोष्ठपदद्वयम्।’
[9]‘पूर्वोत्तरं तु कूर्मस्य पादमेते समाश्रिताः।
रेवती चाश्विदेवत्यं याम्यं चर्क्षमिति त्रयम्॥’
[10]‘एष कूर्मो मयाख्यातो भारते भगवान् विभुः।’
[11]‘नारायणो ह्यचिन्त्यात्मा यत्र सर्वं प्रतिष्ठितम्।’
[12]‘मेषादयस्त्रयो मध्ये मुखे द्वौ मिथुनादिकौ।’
‘प्राग्दक्षिणे तथा पादे कर्कसिंहो व्यवस्थितौ।
सिंहः कन्या तुला चैव कुक्षौ राशित्रयं स्मृतम्॥’
[13]‘तुला च वृश्चिकश्चैव पादे दक्षिणपश्चिमे।
पूर्वे च वृश्चिकेनैव सह धन्वी व्यवस्थितः॥’

---

1. मार्क.पु.55.20
2. मार्क.पु.55.29
3. मार्क.पु.55.33
4. मार्क.पु.55.37
5. मार्क.पु.55.38
6. मार्क.पु.55.41
7. मार्क.पु.55.47
8. मार्क.पु.55.48
9. मार्क.पु.55.53
10. मार्क.पु.55.73
11. मार्क.पु.55.74
12. मार्क.पु.55.75-76
13. मार्क.पु.55.77-79

**'वायव्ये चास्य वै पादे धनुर्मकरकुम्भकाः।**
**कुम्भमीनौ तथा चास्य उत्तरं कुक्षिमाश्रितौ।'**
**मीनमेषौ द्विजश्रेष्ठ पादे पूर्वोत्तरे स्थितौ।'**

इति नक्षत्रतनुं कूर्मरूपं भगवन्तमभिधाय, [1]**'पूर्वेण यत्स्थितं वर्षं भद्राश्वं तन्निबोध म'** इति [2]पक्षान्तरं प्रस्तुत्य, [3]**'अत्र चाश्वशिरा देवश्चतुर्बाहुर्जनार्दनः'**, **'शिरो हृदयमेढ्राङ्घ्रिहस्तै ऋक्षत्रयान्वित'** इत्युक्त्वा [4]**'केतुमालमथो वर्षं निबोध मम पश्चिमम्'** इति प्रस्तुत्य [5]**'अत्रापि भगवान् हरिः। वाराहरूपी पादास्यहत्पृष्ठे पार्श्वतः स्थितः'**, [6]**'त्रिनक्षत्रयुतो देशैर्नक्षत्राणि युतानि च'** इत्यभिधाय, [7]**'अतः परं कुरून् वक्ष्ये निबोधेह ममोत्तरान्'** इत्युत्तरकुरूनधिकृत्य, [8]**'तत्रापि भगवान् विष्णुः प्राक्शिरामत्स्यरूपवान्'**, **'विभक्तो नवधा बिभ्रन्नक्षत्राणि त्रयस्त्रय'** इति भूयसा प्रबन्धेन भूयसां विग्रहाणां नक्षत्रपरत्वं[9] प्रपञ्चितम्।

एवं वैष्णवेऽपि पुराणे नक्षत्ररूपं भगवत उक्तम् -

[10]**'तारामयं भगवतः शिंशुमाराकति प्रभोः।**
**दिवि रूपं हरेर्यत्तु तस्य पुच्छे स्थितो ध्रुवः॥'**

इति। भागवते च शिशुमारं प्रस्तुत्य, [11]**'पुनर्वसुपुष्ये दक्षिणवामयोः श्रोण्योरार्द्राश्लेषे च दक्षिणवामयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामयो नासिकयोः'** इत्यादि।

एवञ्च यद्राजसतामसेषु पुराणान्तरेषु देवतान्तरस्यापि नक्षत्ररूपत्वं कीर्तितं तद्राजभृत्ये राजत्वकीर्तनवत् प्रशंसार्थम्। अतः तदनुसारात्[12] नक्षत्ररूपत्वस्य रुद्रासाधारण्यात्तल्लिङ्गबलादेतदनुवाकस्य रुद्रपरत्वन्न शङ्कनीयम्।

---

1. मार्क.पु.56.4
2. वर्षान्तरम् पाठभेदः
3. मार्क.पु.56.10-11
4. मार्क.पु.56.12
5. मार्क.पु.56.13
6. मार्क.पु.56.17
7. मार्क.पु.56.18
8. मार्क.पु.56.23-27
9. रूपत्वम् पाठभेदः
10. विष्णु.पु.2.9.1
11. भा.पु.5.23.6
12. तन्निरासात् पाठभेदः

आदित्यवर्णत्वमपि लिङ्गम्। [1]**'ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्'** इत्यस्य सन्निधौ [2]**'आदित्यवर्णं तमसः परस्तात्'** इति गीतत्वात्। किञ्च [3]**'उत्तरनारायणेनादित्यमुपतिष्ठेत'** इत्यादौ नारायणसमाख्यायाः तद्देवताकत्वनिमित्तताया दर्शनाद्भगवत्परत्वं सिद्धम्।

[4]नारायणीयोपनिषदि आदित्यमण्डलान्तर्तितया एतद्भर्गाख्यं विष्णुसंज्ञं सर्वाधारं धाम [5]**'आनन्दतृप्तमचलममृतमच्युतं विष्णुसंज्ञितं सर्वाधारं धाम'** इति प्रस्तुते विष्णौ [6]**'एतत् सत्यधर्म, एतद्भानुवर्णम्'** इति भानुवर्णत्वश्रुतेः, [7]**'प्राहुरादित्यवर्णमं तं पुरुषं तमसः परम्'** इति मोक्षधर्मवचनेन वामनप्रादुर्भावे महापुरुषस्तवे उपनिषत्सु पठितैर्नामभिः **'तुष्टावे'**त्युपक्रम्य [8]**'आदित्यवर्ण' 'महापुरुष सुरोत्तम'**[9] इति स्तुत्युक्तेश्च। [10]**'अम्भस्यपार'** इत्यत्र [11]**'समुद्रेऽन्तं विश्वशम्भुवम'** इति नारायणानुवाकवाक्येन [12]**'अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्त वा उ', 'अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्र'** इति ब्रह्मभावनया [13]स्वात्मनो ब्रह्मधर्मानभिलपन्त्या वाग्देव्या वाक्येनाम्भृणीसूक्तगतेन [14]**'समुद्रे अन्तः कवयो विचक्षते मरीचीनां पदमिच्छन्ति वेधस'** इति।

**[15]स्वर्णधर्मानुवाकेन महापुरुषविद्यया।**
**पौरुषेणाथ सूक्तेन सामभी राजतादिभिः॥'**

इति भागवतवचनेन विष्णुपूजायां विनियुक्तब्रह्मपरानुवाक्यान्तरस्थवाक्येन[16] नारायणे

---

1. भ.गी.8.13
2. भ.गी.8.9
3. आप.श्रौ.सू.20.24.13
4. मैत्रायणीयोपनिषदि पाठभेदः
5. मै.उ.7.3
6. मै.उ.6.35
7. महा.शान्ति.340.57
8. ह.वं.3.68.134.202
9. महापुरुषोत्तम पाठभेदः
10. म.ना.उ.1.1.
11. म.ना.उ.11.7
12. ऋग्वेद.10.125.6-7
13. स्वामिनः पाठभेदः
14. ऋग्वेद.10.177.1
15. भा.पु.11.27.30
16. वाक्ये पाठभेदः

प्रसिद्धं **'महार्णवे शयानोऽप्सु'** इत्यादिनोपबृह्मणगतेन समुद्रशायित्वञ्च पर्यवसितं समुद्रान्तर्वर्तित्वं [1]**'यमन्तः समुद्रे कवयो वदन्ति'** इत्यनूद्यमानं नारायणनामनिर्वचनप्रत्यभिज्ञापकं तत्प्रतिपाद्यस्य नारायणत्वे लिङ्गम्। [2]**'अहं रुद्राय'** इति **'शरु'** शब्दो हिंसकार्थः। चतुर्थी द्वितीयार्थे। मूर्ध्नीति सर्गाद्यकालः। योनिशब्दस्स्थानवाची। यद्यपि तामसपुराणभेदे—

**[3]'मध्ये लिङ्गं महाघोरं महाब्धेरम्भसि स्थितम्।**
**ध्यात्वा प्रदोषकाले तु शिवसायुज्यमाप्नुयात्॥'**

इति दृश्यते, तथापि न तदिह ग्राह्यम्। श्रुतिप्रसिद्धस्यैव सम्भवे ग्राह्यत्वात्। तस्य ध्यानशेषतयार्थतथात्वासिद्धेश्च। एवं 'विद्युतः पुरुषादधी'त्युक्तविद्युद्वर्णत्वमपि लिङ्गम् [4]**'विद्युद्रूपा महात्मन'** इत्यादिनोद्योगपर्वणि भगवतो वासुदेवस्य धृतराष्ट्राय विश्वरूपं प्रदर्शयतो विद्युद्वर्णविग्रहादेवादीनामाविर्भावं वर्णयता वचनेन सिद्धत्वात्। मानवे धर्मशास्त्रे उपक्रमे [5]**'आपो नारा'** इत्यादिना प्रस्तुतं नारायणं [6]**'रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम्'** इति उपसंहारस्थेन[7] रुक्मवर्णपुरुषत्वेनाभिदधता वचनेन सिद्धत्वाच्च। एवं [8]**'विश्वं पुराणं तमसः परस्तात्'** इति श्रुतं तमःपारवर्तित्वमपि लिङ्गम्। तद्धि [9]**'वषट् ते विष्णो'** इत्युपक्रम्य **'क्षयन्तमस्य रजसः पराक'** इति रजोगुणोपलक्षितप्रकृतेः परत्वं वर्णयन्त्या श्रुत्या नारायणासाधारणत्वेन सिद्धम्। [10]**'प्राहुरादित्यवर्णं तं पुरुषं तमसःपरम्'** इति नरायणीयवचनेन, **'तमसः परमो धाता शङ्खचक्रगदाधर'** इति श्रीरामायणवचनेन च तदसाधारणत्वेन सिद्धम्। [11]**'तदेव भूतं तदु भव्यमा इदम्'** इत्युक्तं सार्वात्म्यमपि लिङ्गम्। तस्य [12]**'चक्षुश्च द्रष्टव्यं च नारायण'** इत्यादिना सर्वस्य नारायणात्मकत्वमभिधायाम्नाते [13]**'पुरुष एवेदं सर्वम्। यद्भूतं यच्च भव्यम्'** इत्यस्मिन् सौबालमन्त्रे भगवदसाधारणत्वेन

1. म.ना.उ.1.3
2. ऋग्वेद.10.125.6
3. लिङ्ग.पु.76.61
4. महा.उद्योग.131.4
5. मनु.स्मृ.1.10
6. मनु.स्मृ.12.122
7. उपसंहारस्थवचनेन
8. म.ना.उ.1.5.
9. तै.सं.2.2.12
10. महा.शान्ति.340.57
11. म.ना.उ.1.2
12. सु.उ.6
13. सु.उ.6

सिद्धत्वात्। एवं [1]'**न तस्येशे कश्चन**' इति प्रतिपादितमनन्येश्वरत्वमपि लिङ्गम्। [2]'**पतिं विश्वस्यात्मेश्वरम्**' इति नारायणानुवाके तस्य भगवदसाधारण्यसिद्धेः। एवं [3]'**तस्य नाम महद्यश**' इत्युक्तं महायशस्त्वमपि लिङ्गम्। तत् [4]'**तस्य त्रेधोरुगायः**', [5]'**त्रेधा विष्णुरुरुगायो विचक्रमे**', '**विष्णव उरुगायाय दाशत्**', '**तदुगायस्य विष्णोः**', '**त्वं विष्णुरुरुगायो नमस्य**' इत्यादिषु[6] विष्णवसाधारण्येनाभ्यस्यमानत्वात्। नक्षत्रेष्टौ '**विष्णुर्वा अकामयते**'त्यादीष्टिविधौ '**ततो वै स पुण्यं श्लोकमशृणुते**'ति विष्णवसाधारणत्वेन पुण्यश्लोकवत्वप्रसिद्धेः।

[7]'**क्षणा निमेषाः काष्ठाश्च कलास्त्रैकाल्यमेव च।**
**मुहूर्तास्तिथयो मासाः दिनं संवत्सरं तथा।**
**ऋतवः कालयोगाश्च प्रमाणं त्रिविधं त्रिषु।**'

इति विष्णुधर्मतयानुशासनिकोपबृह्मिता '**कला मुहूर्ता**' इति श्रुता कालसृष्टिरपि लिङ्गम्। [8]'**न सन्दृशे तिष्ठति रूपमस्य**' इत्युक्तम् अग्राह्यत्वमपि लिङ्गम्। तस्य मोक्षधर्मे [9]'**न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्**', '**धृत्या च भक्त्या च समाहितात्मा ज्ञानस्वरूपं परिपश्यन्निह**'[10] इति, नारायणीये ब्रह्मरुद्रसंवादे —

[11]'**न स शक्यस्त्वया द्रष्टुं मयान्यैर्वापि सत्तम।**'
[12]'**ममान्तरात्मा तव च ये चान्ये देहिसंज्ञिताः।**
**सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचित्॥**'

इति भगवदसाधारण्येनोपबृह्मणात्। [13]'**विश्वतश्चक्षुः**' इत्याद्युक्तं विश्वाक्षत्वादिकमपि

1. म.ना.उ.1.10
2. म.ना.उ.11.3
3. म.ना.उ.1.10
4. वि.सू.1
5. तै.ब्रा.3.1.2.6
6. ममास्पदत्वादिषु
7. महा.आनु.14.23
8. म.ना.उ.1.11,कठ.उ.2.3.9
9. महा.उद्योग.46.6
10. परिपश्यतीह
11. महा.शान्ति.351.2
12. महा.शान्ति.351.4
13. म.ना.उ.2.1

लिङ्गम्। तस्य नारायणानुवाके [1]'**विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिक**' इति नारायणीयवचनोपबृह्मिते नारायणधर्मत्वेन प्रसिद्धत्वात्। [2]'**येनादित्यस्तपति तेजसा भ्राजसा च**' इति श्रुतसूर्यादितेजोऽनुग्राहकत्वमपि लिङ्गम्। तस्य [3]'**तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्**' इति भगवद्गीतावचनेन, [4]'**तस्यादित्यो गामुपयुज्य भाति**', '**तमध्वरे वेदविदः पठन्ति**' इत्याद्यानुशासनिकवचनेन,

[5]'**तस्मादेव समुद्भूतं तेजोरूपगुणात्मकम्।**
**येन संस्तूयते**[6] **सूर्यस्तेन लोकान् विराजते॥**'

इति मोक्षधर्मवचनेन,

'**तस्य रूपं तु भगवान् परब्रह्ममयो हरिः।**
**तेजसाधिष्ठितस्तस्य भानुर्भुवनभासकः।**
**पर्येति मेरुं देदीप्यन् ज्योतिश्चक्रसमन्वितः।**'

इति भगवद्रूपप्रतिष्ठाध्यायगतब्रह्माण्डवचनेन च वैष्णवत्वेन सिद्धत्वात्। '**स नो बन्धुरि**'त्युक्तं [7]'**माता पिता भ्राता निवासश्शरणं सुहृत्। गतिर्नारायण**' इति सौबालवाक्यप्रपञ्चितम् [8]'**अस्य नाभ्यां पुष्करं सम्प्रसूतं यत्रोत्पन्नः स्वयमेवामितौजाः**', [9]'**अजस्य नाभावध्येकं यस्मिन् विश्वं प्रतिष्ठितम्**' इत्यादिशान्त्यानुशासनिकवचनैः भगवत्परतयोपबृंहितेन '**यो नः पिता जनिता**' इति तैत्तिरीयवाक्येन च सिद्धं [10]'**सर्वेषामेव लोकानां पिता माता च माधव**' इत्यारण्यपर्ववचनसिद्धं सर्वविधबन्धुत्वमपि लिङ्गम्। [11]'**यदेकमव्यक्त-मनन्तरूपम्**' इत्येतच्च श्रीमत्सुन्दरकाण्डे—

---

1. महा.शान्ति.351.5
2. म.ना.उ.1.3
3. भ.गी.15.12
4. महा.आनु.158.22-23
5. महा.शान्ति.344.8
6. संयुज्यते
7. सु.उ.6
8. महा.आनु.158.9
9. महा.शान्ति.47.59
10. महा.वन.189.57
11. म.ना.उ.1.5

[1]**'किं वैष्णवं वा कपिरूपमेत्य रक्षोविनाशाय परं सुतेजः।
अनन्तमव्यक्तमचिन्त्यमेकं स्वमायया साम्प्रतमागतं वा॥'**

इत्युपबृह्मणाद्विष्णुपरम्।

ननु। [2]**'अम्भस्यपार'** इत्यनुवाकान्ते [3]**'पुरुषस्य विद्म सहास्त्राक्षस्य महादेवस्य'** इति श्रुतेरनुवाकस्तत्पर इति चेन्न। [4]**'एष हि देव'** इत्यतः प्राक्तनस्यैव भागस्य परमात्मसूक्तत्वेन भास्करादिभिरुक्तत्वात् तत्सूक्तानन्तर्भूतस्यास्य तदैकार्थ्यानावश्यम्भावात्। अस्तु वा **'पुरुषस्य'** इत्यतः प्राक्तनः सर्वो ग्रन्थो भगवत्परः। हरिवंशे पौष्करप्रादुर्भावे [5]**'अहमग्निर्ब्रह्ममयः सदसस्पतिरद्भुत'** इति, मात्स्ये च तत्रैव [6]**'अहमग्निर्हव्यवाहः सदसस्पतिरद्भुत'** इति भगवद्वचनेन **'एष हि देव'** इत्यादिषु श्रुतस्य [7]**'सदसस्पतिमद्भुतम्'** इत्यस्य भगवत्परतयोपबृंहणात् **'पुरुषस्य विद्म'** इत्ययमपि मन्त्रो भास्करेणेत्थं व्याख्यातः – पुरुषम् - विश्वस्य पूरयितारं परं वस्तु, विद्म - विजानीम लभेमहि वा, विन्दतेर्विकरणव्यत्ययः, तदर्थं महादेवस्य - महादेवं धीमहि इति। एवञ्च [8]**'विद्युतः पुरुषात्'** इति प्रस्तुते पुरुषस्य हरेर्ज्ञानाय लाभाय वा महादेवं धीमहि इति मन्त्रार्थः। **'ईश्वरात् ज्ञानमन्विच्छेत उपायोऽस्मि हरेः स्मृतौ'** इत्याद्युपबृह्मणानुसाराच्च तद्युक्तम्। अत्र च [9]**'प्रजापतिश्चरति गर्भे अन्तः'** इति प्रजापतिशब्दो नारायणपरः।

[10]**'राजाधिराजस्सर्वेषां विष्णुर्ब्रह्ममयो महान्।
ईश्वरं तं विजानीमः स पिता स प्रजापतिः॥'**

इत्याश्वमेधिकवचनात्, वाराहे विंशाध्याये -

[11]**'पुत्रौ प्रजापतिं देवं भक्त्याराधयतां वरम्।
नारायणं स वो दाता वरं नूनं भविष्यति॥'**

---

1. रामायण.5.14.35
2. म.ना.उ.1.1
3. म.ना.उ.3.1
4. म.ना.उ.2.1
5. ह.वं.3.10.52
6. मत्स्य.पु.166.51
7. म.ना.उ.2.8
8. म.ना.उ.2.8
9. म.ना.उ.1.1
10. महा.आश्व.43.13
11. वाराह.पु.20.22

इत्यश्विनौ प्रति मार्ताण्डवचनप्रयोगात्, [1]**'एवं स्तुतस्तदा ताभ्यामश्विभ्यां स प्रजापतिः'** इति प्रयोगात्, **'आश्रावय'** इत्यादिसप्तदशाक्षरसमूहप्रतिपाद्यस्य **'एष वै सप्तदशः प्रजापति'** इत्युक्तस्य प्रजापतेः [2]**'चतुर्भिश्च चतुर्भिश्च'** इति राजधर्मवचने [3]**'स मे विष्णुः प्रसीदतु'** इति विष्णुशब्देनाभिधानात्, **'कस्मात्सत्याद्यातयामान्यन्यानि हवींष्ययातयाममाज्यमिति प्राजापत्यमिति ब्रूयादयातयामा हि देवानां प्रजापतिः'** इति, [4]**'आज्यस्य दैवतं विष्णुः'** इत्यादिषु नारदीयादिषु [5]**'घृतस्य परमात्मा च वासुदेवोऽधिदैवतम्'** इति पाद्मसंहितायां सहस्रकलशस्नपनाध्याये वचनाच्चाज्यदैवतत्वेन स्मृतिसिद्धे विष्णौ प्रजापतिशब्दप्रयोगात्। **'यः पूर्व्याय वेधसे नवीयस'** इति नित्ययुवत्वात्मकतया अयातयामत्वस्य विष्णावेव प्रसिद्धत्वात्। वाजपेये प्राजापत्यपशुषु गुणविधौ **'श्यामा एकरूपा भवन्ति'** इत्यस्यार्थवादे **'एवमिव हि प्रजापतिः समृद्ध्या'** इति प्रजापतेः श्यामत्वाभिधानात् **'पूर्वे प्रजानिसर्गे त्वामाहुरेकं प्रजापतिः'** इत्यारण्यपर्ववचनात्, **'देवः कृष्णः प्रजापतिः'** इति भारते रामायणे च प्रयोगात्, [6]**'तस्मिन्प्रजापतिर्वायुर्भूत्वाचरत्। स इमामपश्यत्। तां वराहो भूत्वाऽऽहरत्'** इति वाराहरूपं प्राप्स्यति प्रजापतिशब्दप्रयोगात्, तस्य च रूपस्य [7]**'उद्धृतासि वराहेण कृष्णेन शतबाहुना'** इति श्रुतौ स्मृतीतिहासादिषु च वैष्णवत्वेन प्रसिद्धत्वात्। नारसिंहे [8]**'परं पराणामपि कारणं हरिं महीधरं लोकगुरुं प्रजापतिम्'** इति प्रयोगः, मात्स्ये पौष्करप्रादुर्भावे - [9]**'यत्तत्सत्यं च परममहमेकः प्रजापतिः', 'अहं साङ्ख्यमहं योगमहं तत्परमं पदम्'** इति प्रयोगश्च द्रष्टव्यः।

वस्तुतस्तु नारायणसमाख्याबलात् कृत्स्नोऽपि प्रश्नो भगवत्परः। अत एव [10]**'सद्योजातम्'** इत्यादिपञ्चब्रह्माख्यानुवाका अपि भगवत्परत्वेन स्कान्दे निर्वाणखण्डे रामगीतायामुपबृंहिताः-

**'प्रवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथोत्तमा।**
**शान्त्यतीता परा सूक्ष्मा समरा चोन्मना तथा।**

---

1. वाराह.पु.20.23-31
2. नारद.पु.19.35
3. नारद.पु.19.34-38
4. नारदीय.सं.20.106
5. पाद्म.सं. 8.184
6. तै.ब्रा.1.1.3.6
7. म.ना.उ.4.5
8. नृ.पु.10.11
9. मत्स्य.पु166.55-56
10. म.ना.उ.17.1

**सीताविलसितं सर्वं नानाकारेण दृश्यते।**
**तथानुग्रहशक्त्यैव त्वदैक्यमपि लभ्यते।**
**सद्योजातः प्रवृत्तेस्त्वमीशिषे क्षेत्ररक्षकः।**
**वामदेवः [1]प्रतिष्ठाया वासनां तनुमाश्रितः।**
**विद्यानामप्यघोरस्त्वं तेजसां निधिरक्षयः।**
**प्राणस्तत्पुरुषश्शान्ते तन्त्राणां यत्र वाहकः।**
**ईशानः [2]शान्त्यतीताया व्यापको व्योमविग्रहः।**
**विष्णुश्च समानायामुन्मानायाम् निरञ्जन।'**

इत्यादिना। [3]'हिरण्यगर्भ' इत्याद्यष्टर्चं च भगवदाराधने विष्णुस्मृतौ [4]'हिरण्यगर्भः समवर्तताग्र इत्यष्टभिर्हविर्निवेदयेदि'ति विनियुक्तम्।

ननु वायव्यपशावैन्द्रे द्वितीयाघारे [5]**'हिरण्यगर्भस्समवर्तताग्र इत्याघारमाघारयति'** इति विनियोगवन्नारायणसमाराधने विनियोगस्तत्परत्वाभावेऽपि युज्यते। अतो

[6]**'हिरण्यमस्य गर्भोऽभूद्धिरण्यस्यापि [7]गर्भजः।**
**तस्माद्धिरण्यगर्भोऽसौ पुराणेऽस्मिन्निरुच्यते॥'**

इति लैङ्गे निर्वचनात्, बोधायनसूत्रे शिवशङ्करादिद्वादशनाममध्ये परिगणनात्, [8]**'य ईशे अस्य द्विपदश्चतुष्पद'** इत्युपन्यस्तात् **'येषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम्'**, **'एतावन्तो वै पशवो द्विपादश्च चतुष्पादश्च'** इति श्रुत्यन्तरप्रतिपन्नात् द्विपाच्चतुष्पाद्रूपपशुपतित्वलिङ्गाच्च रुद्रपरत्वमिति चेन्न, राजधर्मे [9]**'हिरण्यगर्भं त्वामाहुः'** इति, मोक्षधर्मे च -

[10]**'हिरण्यगर्भो द्युतिमान् य एषच्छन्दसि स्तुतः।**
**योगैस्सम्पूज्यते नित्यं स एवाहं भुवि स्मृतः॥'**

---

1. प्रतिष्ठाया वामनाम्
2. शान्त्यतीताय
3. म.ना.उ.1.22
4. विष्णु.स्मृति 65.13
5. आप.श्रौ.सू.6.7.8.
6. लिङ्ग.पु.70.106
7. गर्भजम्
8. श्वे.उ.4.13
9. महा.शान्ति.43.15
10. महा.शान्ति.342.96

इति श्रुतिस्मृत्यादिषु हिरण्यगर्भशब्दार्थो विष्णुरिति वचनात्, हरिवंशे उपनिषत्सु पठितैर्नामभि [1]**'तुष्टाव'** इत्युपक्रम्य [2]**'हिरण्यगर्भहिरण्यनाभनारायणादित्यवर्ण'** इत्यादिभिः महापुरुषस्तवे काश्यपस्तुतिदर्शनात्, वाराहे गौरमुखकृतदशावतारस्तुतौ [3]**'स जामदग्न्यो भुवनस्य गोप्ता हिरण्यगर्भोऽसुरहा प्रपातु'** इति प्रयोगात्, [4]**'चतुष्प्रकारं स्वशरीरमाद्यं हैरण्यगर्भं प्रतिपालयित्वा। रामादिरूपैर्बहुरूपभेदं चकार'** इति, वाराह एव [5]ज्येष्ठाद्वादशीव्रताध्याये [6]**'तस्य पुत्रस्स्वयं जज्ञे रामनाम्ना सुतो बली', 'चतुर्धा योऽव्ययो विष्णुः परितोषान्महामुने'** इति विष्णोश्चातुर्विध्यवदिहापि वैष्णवरूपं चतुष्प्रकारं कल्पयित्वेति वक्तव्ये [7]तत्स्थाने **'हैरण्यगर्भ स्वशरीरमाद्यम्'** इत्यभिधानात्, ज्योतिश्शास्त्रे सर्यसिद्धान्ते [8]**'वासुदेवः परं ब्रह्म'** इत्यारभ्य [9]**'तत्रानिरुद्धः प्रथमं व्यक्तीभूतस्स-नातनः', 'हिरण्यगर्भो भगवानेषच्छन्दसि पठ्यत'** इति वचनात्, [10]**'हिरण्यगर्भो भूगर्भ'** इति सहस्रनामसु पाठात्, तदनुसारिविनियोगेन भगवत्परत्वावसायात्, **'विष्णुना विधृते भूमी', 'व्यस्कभ्नाद्रोदसी विष्णुरेते दाधार पृथिवीमभितो मयूखैः'** इत्याद्युक्तस्य द्यावापृथिवीधारकत्वस्य [11]**'यो अस्कभायत्'** इति श्रुतस्तम्भकत्वस्य च 'यः पार्थिवानि विममे रजाँसि' इति श्रुतरजोविमानस्य च **'स दाधार पृथिवीं द्यामुतेमाम्'** इति सूक्तोपक्रमे [12]उत्तरत्रितये [13]**'येन द्यौरुग्रा पृथिवी च दृढे येन सुवस्स्तभितं येन नाकः। यो अन्तरिक्षे रजसो विमान'** इति प्रत्यभिज्ञानात् तन्मध्यवर्तिद्विपाच्चतुष्पादीशत्वं सर्वेश्वरे विष्णावेव सङ्गच्छते। **'यस्येमाः प्रदिशो यस्य बाहू'** इति वाक्यस्य चारण्यपर्वण्युदङ्कस्तोत्रे [14]**'बाहवस्ते दिशस्सर्वा'** इति, भीष्मपर्वणि [15]**'दिक् बाहुस्त्रिदिवं शिर'** इति च भगवत्परतयोपबृह्मणात्।

---

1. ह.वं.2.72.28
2. ह.वं.6.68.134-202 नामानि
3. वाराह.पु.15.15
4. वाराह.पु.15.16
5. ज्येष्ठ
6. वाराह.पु.45.7-8
7. अप्येतत्स्थाने
8. सू.सि.12-13
9. सू.सि.13-14
10. महा.आनु.141.21
11. विष्णु.सू.1
12. उत्तरत्र
13. यजुर्वेद.32.6
14. महा.वन.209.13
15. महा.भीष्म.65.59

किञ्च—

[1]**'मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान।**
**यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम॥'**

इति मन्त्रो जगत्कर्तृविषयो नारायणपरः। मैत्रायणीयश्रुतौ [2]**'विष्णुसंज्ञम्'** इति प्रकृते [3]**'एतत्सत्यधर्म'** इति सत्यधर्माभिधानदर्शनात्, योगयाज्ञवल्क्ये **'ईश्वरं पुरुषाख्यं तु सत्यधर्माणमच्युतम्'** इति दर्शनात्, राजधर्मे च —

[4]**'यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च।**
**गृणन्ति सत्यधर्माणं सत्यं सत्येषु सामसु॥'**

इति दर्शनाच्च; [5]**'पुरुषो ह वै नारायणोऽकामयत। प्रजास्सृजेयेति। अथापः ससर्ज'** इति श्रुताया अबुपलक्षितसकलतत्त्वसृष्टेः [6]**'आपो नारा इति प्रोक्ता'** इति मानवादिस्मृतिभिः **'नाराज्जातानि तत्त्वानि नाराणीति ततो विदुः'** इत्यानुशासनिकादिवचनैश्चोबृह्मित- **'यश्चापश्चन्द्रा बृहतीर्जजान'** इति श्रवणाच्च। तत्र च श्रुतस्य [7]**'कस्मै देवाय हविषा विधेम'** इत्यस्य [8]**'हिरण्यगर्भ'** इत्याद्यष्टर्चे श्रवणात् तदैकार्थ्यात् **'कस्मै'** इत्यस्य **'सर्वप्रधानायाविज्ञातपारमार्थ्याय'** इति भास्करादिभिर्व्याख्यातस्य **'नारायणस्य चाङ्गानि सर्वे देवास्तथाभवन्'**, [9]**'तस्य लोकप्रधानस्य जगन्नाथस्य भूपते'**, [10]**'त्वं हि लोकगतिर्ब्रह्मन् न त्वां केचन जानते' 'श्रूयतां परमं दैवं दुर्विज्ञेयं मयापि च'** इत्यादि भारतरामायणादिवचनावगमितसर्वदेवताप्राधान्यदुर्विज्ञेयभावे **'वैष्णव्ये गोणगारिर्देवताप्रधानत्वादि'**ति सोमातिरेक प्रायश्चित्तविधायकाश्वलायनवचनसिद्धप्राधान्ये तत एव चाव्यक्तनामकत्वेन प्रसिद्धे **'कः पुरुषः', 'स्वम्भूर्विष्णुः'** इति गायत्रीहृदयसिद्ध'क'शब्दवाच्यभावे नारायण एव सम्भवदर्थत्वात्[11]। तापनीये अष्टर्चान्तर्गतस्य

---

1. यजुर्वेद.12.102
2. मै.उ.6.23
3. मै.उ.6.35
4. महा.शान्ति.47.26
5. ना.अथर्व.उ.1
6. मनु.स्मृति1.10
7. श्वे.उ.4.13
8. म.ना.उ.1.12
9. महा.आनु.149.12
10. रामायणे उत्तरे.110.10
11. संभवदर्थकत्वात्

[1]**'य आत्मदा'** इति मन्त्रस्य नृसिंहविषयतयोदाहरणात्सिद्धं तस्य नारायणपरत्वम्। अत एव [2]**'अभ्द्यस्सम्भूतो हिरण्यगर्भ इत्यष्टौ'** इतिवाक्यव्याख्यानावसरे यजुर्भाष्यकृता एषां मन्त्राणामात्मतत्त्वप्रतिपादनपराणामन्यत्राधीतानामपीहातिदेशबलात् कल्पसूत्रकारविनियोगमन्तरेण लिङ्गादिना महापुरुषार्चनादौ विनियोग इत्युक्तम्।स्मृतिविनियोगो लिङ्गमूल इत्याशयः।

किञ्च पाद्मे गिरियज्ञानन्तरमिन्द्रस्तवे भगवत्परतयेयं श्रुतिरुपबृह्मिता। यथा -

[3]**'अग्रे हिरण्यगर्भस्त्वं भूतस्य समवर्तत।**
**त्वमेवैकः पतिरसि पुरुषस्त्वं हिरण्मयः॥'**
**'पृथिवीं द्यामिमां देव त्वमेव धृतवान् प्रभो।**
**आत्मदो बलदो यस्य विश्वस्य जगदीश्वरः॥'**
**'उपास्यसे त्वं त्रिदशैः प्रशिषं जगतां पते।**
**अमृतं चैव मृत्युश्च तवच्छाये सनातने॥'**
**'तस्मै देवाय भवते विधेम हविषा वयम्॥'** इति।

तस्मादस्याष्टर्चस्य नारायणपरत्वं सिद्धम्। अतः [4]**'अम्भस्यपारे'**, [5]**'अद्भ्यस्सम्भूतः'**, **'हिरण्यगर्भ'** इति त्रयाणां नारायणपरत्वे सिद्धे [6]**'वेदाहमेतम्'** इत्युत्तरनारायणगतमन्त्रस्य पुरुषसूक्ते श्रवणात् तदैकार्थ्यात् पुरुषसूक्तस्य नारायणपरत्वं सिद्धम्।

ननु [7]**'सर्वो वै रुद्र'** इत्युक्त्यनन्तरं [8]**'पुरुष एवेदं सर्वम्'** इति मन्त्रविरोधश-निराकरणाय [9]**'पुरुषो वै रुद्र'** इति श्रुत्या स रुद्रपरत्वेन [10]व्याख्यात इत्यौचित्यादवगम्यते। तथा च तन्मन्त्रयुक्तसूक्तस्य श्रुत्यैव [11]अन्यपरत्वेन व्याख्यानात् कथं नारायणपरत्वमिति चेन्न।

अत्रत्यरुद्रशब्दस्य पुरुषपर्यन्तत्वेन व्याख्यानादपि विरोधशङ्कानिरासात् गुहस्वामिदेवस्वा-

---

1. न.पु.ता.उ.2.4
2. तै.आ.6.3
3. पाद्म.पु.6.272.192-194
4. म.ना.उ.1.1
5. म.ना.उ.1.12
6. पु.सू.2.2
7. म.ना.उ.12.2
8. पु.सू.1.2
9. म.ना.उ.12.2
10. व्याख्यायते
11. अत्मपरत्वेन

मिथ्यामिदं वाक्यमित्थं व्याख्यातम् - [1]'**पुरुषो नारायणः परमात्मा**', [2]'**आत्मा हि पुरुषव्याघ्र ज्ञेयो विष्णुरिति श्रुतिः**' इति भगवान् व्यासः। स एव रुद्रः ततस्सर्वस्योत्पत्तेः तत्पर्यायो वेति। अत्र '**तत**' इति प्रकृतपुरुषः परामृश्यते। तत्पर्याय इति रुद्रपर्यायस्तद्वाच्य इति यावत्।

अपिच [3]'**सहस्त्रशीर्षं देवम्**' इत्यस्य भगवत्परत्वात् तत्र प्रतिपन्नसहस्त्रशीर्षत्वप्रत्यभिज्ञानात् तदैकार्थ्याच्चास्य पुरुषसूक्तस्य भगवत्परत्वमवर्जनीयम्।

स्मृतिश्च ऋग्विधाने '**पुरुषस्य हरेः सूक्तं स्वयं धन्यं यशस्करम्**' इति। मोक्षधर्मे नारायणीये पुरुषसूक्तार्थो वेदसिद्धान्त इत्याशयेन[4] [5]'**इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यत**' इति प्रस्तुत्य तत्प्रतिपाद्यपुरुषनिर्णयार्थं प्रवर्तते। ब्रह्मरुद्रसंवादे —

[6]'**तत्र यः परमात्मा तु स नित्यो निर्गुणः स्मृतः।**
**स हि नारायणो ज्ञेयस्सर्वात्मा पुरुषो हि सः॥**'

इति पुरुषस्य नारायणत्वावबोधनात् पुरुषसूक्तस्य नारायणपरत्वं प्रतीयते। उत्तरगार्ग्ये -

[7]'**सर्वं जगन्मम भवेदिति सञ्चिन्तयन् मुनिः।**
**ध्यायेत् पुरुषसूक्तेन प्रतिपाद्यं जनार्दनम्॥' इति स्मर्यते।**

तथा भागवते दशमस्कन्धे प्रथमेऽध्याये—

[8]'**तत्र गत्वा जगन्नाथं वासुदेवं वृषाकपिम्।**
**पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः॥**' इति।

अत्र हि '**आग्नेय्याग्नीध्रमुपतिष्ठत**' इतिवदुपतिष्ठतिरभिधानार्थः। '**वासुदेवम्**' इति [9]विशेष्यलाभेऽपि पुरुषत्वात् पुरुषसूक्तेनोपस्थानं युक्तमित्यभिप्रायं '**पुरुषम्**' इति पदम्। बोधायनसूत्रे विष्णवर्चने [10]'**अथैनमृग्यजुस्सामभिः( सामाथर्वभिः? ) स्तुवन्ति**',

---

1. महा.शान्ति.351.14
2. महा.शान्ति.346.8
3. म.ना.उ.11.1
4. तत्वाशयेन
5. महा.शान्ति.350.5
6. महा.शान्ति.351.14
7. योगवासिष्ठम्
8. भा.पु.10.1.20
9. विशेष
10. बो.गृ.सू.2.14.10

[1]'**ध्रुवसूक्तं जपित्वा**', [2]'**पुरुषसूक्तं चाथान्यांश्च वैष्णवान् मन्त्रान् इत्येक**' इति पुरुषसूक्तस्य वैष्णवत्वसिद्धवत्कारेण '**अन्यान्**' इति विशेषयति। एवञ्च रुद्रार्चनमुक्त्वा [3]'**अथैनमृग्यजुस्सामभिः (सामाथर्वभिः ?)** स्तुवन्ति, [4]'**सहस्त्राणि सहस्त्रश' इत्यनुवाकं जपित्वा अन्यांश्च रौद्रान् मन्त्रान्**' इत्यत्रान्यविशेषणव्यवच्छेद्यस्य '**सहस्त्राणि सहस्त्रशो ये रुद्रा**' इत्यस्य रौद्रत्वमिव वैष्णवत्वं सिद्धम्। समाख्या च 'नारायणाभ्यां [5]**ब्राह्मण एकहोता**' इति चोपस्थानमिति बोधायनसूत्रे, [6]'**सहस्त्रशीर्षा पुरुषः**' इत्युपहितां पुरुषेण नारायणेन यजमान उपतिष्ठते।' नारायणाभ्यामुपस्थानम्, [7]'उत्तरनारायणेनादित्यमुपतिष्ठेत' इत्यापस्तम्बसूत्रे च नारायणसमाख्यादर्शनात्। अत्रोत्तरनारायणोऽद्भ्यस्सम्भूतानुवाकः। उत्तरपदेन[8] च पुरुषसूक्तं व्यावर्तयत्तस्यापि नारायणसमाख्यां व्यनक्ति।अन्यत्र कल्पसूत्रे '**पुरुषनारायणेन परा चानुशंसती**'ति[9]।

नन्वत्र नारायणदृष्टत्वं समाख्यार्थः,

> **'अस्य पुरुषसूक्तस्य ऋषिर्नारायणः स्मृतः।**
> **छन्दस्त्वानुष्टुभं सूक्तं तिस्त्रोऽन्त्यास्त्रिष्टुभो मताः।**
> **परमव्योमवासी च पुरुषो देवता भवेत्।'**

इति शौनकेन नारायणार्षत्वाभिधानादिति चेन्न। ऋषिसम्बन्धपरत्वे लक्षणापत्तेः। नारायणस्य इदमिति विवक्षायां [10]'तस्येदम्' इति प्राप्तस्याणो [11]'**वृद्धाच्छ**' इति '**छ**'प्रत्ययेन बाधात्। नारायणेन दृष्टमिति विवक्षायां साम्नोऽन्यत्र तद्धितविधानात् '**दृष्टं साम**' इति यत्तददृष्टं साम चेत्तद्भवतीति [12]प्रकृत्यर्थोपाधेः साम्नि हि तद्धितो विधीयते। नारायणो देवता अस्येत्यर्थविवक्षायां

---

1. बो.गृ.सू.3.7.5
2. बो.गृ.सू.1.22.8-9
3. बो.गृ.सू.2.17.14
4. बो.गृ.सू.2.16.37
5. बो.गृ.सू.2.3.1
6. आप.श्रौ.सू.6.28.3
7. आप.श्रौ.सू.20.24.16
8. उत्तरपदञ्च
9. चानुशंसिनीति
10. पणिनि.सू.4.3.120
11. पणिनि.सू.4.2.114
12. प्रकृत्यर्थोपाधौ

तु [1]**'साऽस्य देवता'** इति सूक्तहविषोः [2]प्राग्दीव्यतीयस्याणो विधानात् नारायण इति रूपं सिद्ध्यति।

अत एव तस्येदमित्यर्थे [3]**'नारायणीयमाख्यानम्'** इति मोक्षधर्मे दृश्यते। [4]**'त्रिः पठेदघमर्षणम्'** इत्यत्र त्वनन्यगत्या लक्षणाश्रीयते। अत एव वाधूलसूत्रे ऋषिविवक्षायां **'नारायणदृष्टेन पुरुषसूक्तेन उपहितां चितिमुपतिष्ठमान इह जन्मनि पुरुषो भवेत्'** इति [5]**'दृष्टपदप्रयुक्तश्च शङ्क्यते'**। अस्य सूक्तस्य नारायणार्षत्वसिद्धेः **'वेदाहम्'** इत्यत्राहंशब्दस्य तत्परतया [6]**'कर्मकर्तृव्यपदेशाच्च'** इति सूत्रोक्तन्यायेन सूक्तप्रतिपाद्यात् व्यतिरेको नारायणस्य [7]सिद्ध्यति। तत्र श्रीसूक्तस्य श्रीदृष्टतया तत्रत्यास्मच्छब्दोत्तमपुरुषादेः श्रीपरत्वप्रसङ्गेन [8]**'त्वामिहोपह्वये श्रियम्'** इत्यादिना तत्सूक्तप्रतिपाद्यस्यापि श्रीव्यतिरेकप्रसङ्गात्। तस्मात्तदार्षत्वस्य तद्दृष्टतारूपतया तद्वचनत्वासिद्धेः अहंनिर्देशो नर्षिगोचरः। अतो **'वेदाहम्'** इति ब्रह्मविदभिलापः। ऋष्यभिलापत्वेऽपि न हानिः। दुर्विज्ञेयताख्यापनार्थम्[9] **'अहं वेद'** इति निर्देशात्। स्वरूपज्ञाने[10] च को नाम कर्मकर्तृविरोधः। **'त्वमेव त्वां वेत्थ योऽसि** सोऽसि' इत्यपि हि दृश्यते।

गीतायां च [11]**'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम'** इति स्वोपासनोक्तौ हि स विरोधो भवेत्। **'एतम्'** इति निर्देशश्च प्रकृताकारपरामर्शार्थं ज्ञातव्यगौरवख्यापनार्थञ्च[12] समञ्जसमेव[13]। विनियोगश्च यथाथर्वणे[14] वैष्णव्यां पुरुषसूक्तम् इति विष्णुदेवत्यमहाशान्तौ विनियोगः। आह भगवान् शौनकः —

---

1. पणिनि.सू.4.2.24
2. पणिनि.सू.4.1.83
3. महा.शान्ति.346.13
4. महा.शान्ति.152.30
5. पुरुष
6. ब्र.सू.1.2.4
7. सिध्यतीति तत्र
8. श्री.सू.4
9. ज्ञापनार्थम्
10. स्वस्वरूपज्ञाने
11. भ.गी.10.15
12. ज्ञापनार्थञ्च
13. समञ्जसमिव
14. अथर्व.2.19.3.1-16

**‘प्रायश्चित्ते जपे चैव विष्णोराराधने तथा।**
**मोक्षे वश्येऽग्न्युपस्थाने सुपुत्रप्रापणेऽपि च।**
**सर्वकामफलावाप्तावारोग्ये मृत्युनाशने।**
**एतेष्वर्थेष्विदं सूक्तं मुनयो विनियुञ्जते।’**

इति प्रायश्चित्ते। यमस्मृतौ रहस्यप्रायश्चित्ताधिकारे -

**‘योऽनूचानं द्विजं मर्त्यो हतवानर्थलोभतः।**
**स जपेत् [1]पूरुषं सूक्तं जलस्थश्चिन्तयन् हरिम्॥’**

इति। अत्र जलस्थश्चिन्तयन् हरिसूक्तं जपेदिति विशिष्टसिद्धिः[2]। तत्र च चिन्तायाः अङ्गित्वे[3] मन्त्रस्य दृष्टार्थत्वसम्भवात् मन्त्रवित् मन्त्रविशिष्टध्यानसिद्धे विधिः। यद्वा **‘तस्य वाचकः प्रणवस्तज्जपस्तदर्थभावनम्’** इति योगशास्त्रोक्तन्यायेन[4] जपशब्दस्यैव तदर्थभावनापर्यन्तत्वात् भावनियमार्थविशेषः क इत्यपेक्षायां हरिमिति तद्विशेषः [5]समर्प्यत इति विनियोगात् तत्परत्वसिद्धिः। एवं पाद्मे च – [6]**‘ब्रह्महत्यादिपापानां सर्वेषामपनुत्तये पठेत्तु पौरुषं सूक्तमेकान्ते संस्मरन् हरिम्’** इति। जपे वृद्धमनुः -

[7]**‘ब्रह्मयज्ञे जपेत्सूक्तं पौरुषं चिन्तयन् हरिम्।**
**स सर्वान् जपते वेदान् साङ्गोपाङ्गान् द्विजोत्तमः॥** (साङ्गोपाङ्गविधानतः?)।।’ इति।

आराधने शौनकः – [8]**‘आद्ययाऽऽवाहयेद्देवमृचा तु पुरुषोत्तमम्’** इत्यारभ्य **‘षोडश्योद्वासनं कुर्यादेवमाराधयेद्धरिम्’** इत्यन्तेन ऋग्वेदपाठानुसारेण षोडशानामृचां विनियोगमुक्त्वा, [9]**‘दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव वा’**, **‘अर्चितं स्याज्जगदिदं तेन सर्वं चराचरम्’** इति। आह व्यासस्मृतौ -

[10]**‘न विष्णवाराधनात् पुण्यं विद्यते कर्म वैदिकम्।’**

---

1. पौरुषम्
2. विधिः
3. अग्नित्वे
4. योगशास्त्रसूत्रोक्तन्यायेन
5. ससर्पत
6. पाद्म.सं.20.5
7. वाधू.स्मृ.156
8. नृ.पु.62.9
9. पद्म.पु,नृ.पु.62.8-9
10. व्यास.स्मृति.2.41-43

**'तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम्।**
**तद्विष्णोरिति मन्त्रेण सूक्तेन पुरुषेण तु?'**
**'नैताभ्यां सदृशो मन्त्रो वेदेषूक्तश्चतुर्ष्वपि।**
**तदात्मा तन्मनाश्शान्तस्तद्विष्णोरिति मन्त्रतः॥'** इति।

वैष्णवस्मृतौ - **'सुप्रक्षालितपाणिपादस्स्वाचान्तो देवतार्चायां स्थण्डिले( स्थले ) वा भगवन्तं वासुदेवमर्चयेत्'**[1] इत्यारभ्य षोडशोपचाराननुक्रम्याह -

[2]**'एवमभ्यर्च्य तु जपेत्सूक्तं वै पौरुषं ततः।**
**तेनैव चाज्यं जुहुयाद्य इच्छेच्छाश्वतं पदम्॥'** इति।

वाराहे - [3]**'पौरुषं सूक्तमास्थाय ये यजन्ति द्विजोत्तमाः।**
**संहिताजपमास्थाय ते मां प्राप्स्यन्ति ब्राह्मणाः॥'** इति।

मोक्षे तु विनियोगो योगरत्ने दर्शितः - **'संसारात् मोक्षमन्विच्छन् स सन्न्यस्येषणत्रयम्'** इत्यादिना सन्न्यासमभिधाय,

[4]**'एकाकी यतचित्तात्मा त्यक्तसर्वपरिग्रहः।'**
**ध्यायेन्नारायणं देवं हृदयम्भोजमध्यगम्।**
**दिग्देशकालावस्थाद्यैरनवच्छेद्वैभवम्।**
**सर्वदा पौरुषं सूक्तं मनसैव जपेच्छुचिः॥'** इति।

वश्ये तु विनियोगः उत्तरगार्ग्ये वश्याध्याये दर्शितः।

**'सर्वं जगन्मम भवेदिति सञ्चिन्तयन् मुनिः।**
**ध्यायेत्पुरुषसूक्तेन प्रतिपाद्यं जनार्दनम्।**
**यद्वशे वर्तते सर्वं चराचरमिदं जगत्।**
**वशे भवति तस्यापि जगत्सर्वं मुनेरपि॥'**

इत्यग्न्युपस्थाने त्वापस्तम्बविनियोगः प्रागेवोक्तः। सुपुत्रप्राप्तौ ऋग्विधाने विनियुक्तम्,

**'शुक्लपक्षे शुभे वारे पुंनक्षत्रे सुगोचरे।**
**द्वादश्यां पुत्रकामाय चरुं कुर्वीत वैष्णवम्।**

---

1. विष्णु.स्मृ.65.1-14
2. विष्णु.स्मृ.65.15
3. वाराह.पु.66.10
4. भ.गी.6.10

**दम्पत्योरुपवासः स्यादेकादश्यां सुरालये।**
**ऋग्भिष्षोडशभिस्सम्यगर्चयित्वा जनार्दनम्।**
**चरुं पुरुषसूक्तेन प्राशयेत् पुत्रकाम्यया।**
**प्राप्नुयाद्वैष्णवं पुत्रमचिरात् सन्ततिक्षमम्।।' इति।**

लक्ष्मीतन्त्रे षड्विंशेऽध्याये श्रीरुवाच —

[1]**'एको नारायणो देवः श्रीमान् कमललोचनः।**
**एकाहं परमाशक्तिस्सर्वकार्यकरी हरेः।।**
**तावावां परमे व्योम्नि क्षेमाय सकलात्मनाम्।**
**आसीनौ सकलेशानौ सूरिभिस्सेवितौ सदा।।**
**तयोर्नौ हृदि सङ्कल्पः कश्चिदाविर्बभूव ह।**
**उत्तारणाय जीवानामुपायोऽन्विष्यतामिति।।**
**आवाभ्यां मथितं तेजश्शब्दब्रह्ममहोदधिः।**
**मथ्यमानात्ततस्तस्मादभूत् सूक्तद्वयामृतम्।।**
**पुरुषस्य हरेस्सूक्तं मम सूक्तं तथैव च।**
**अन्योऽन्यशक्तिसंरुद्धम् अन्योऽन्यार्णपरिष्कृतम्।।'**
[2]**'नारायणार्षमाद्यन्तु पौरुषं सूक्तमुच्यते।**
**अन्यन्मदार्षं सूक्तं तु श्रीसूक्तं यत्प्रचक्षते।।'**
[3]**'अष्टादश ऋचः प्रोक्ताः पौरुषे सूक्तसत्तमे।**
**ताभिस्सप्रणवाद्याभिर्भोगानष्टादशोत्तमान्।।'**
**कुर्यादावाहनाद्यांश्च त एतेऽष्टादश स्मृताः।**
**आवाहनासने साघ्यं पाद्यमाचमनं तथा।।'**
**स्नानञ्च परिधानञ्च सोत्तरीयोपवीतकम्।**
**गन्धास्सुमनसो दीपो धूपश्च मधुपर्ककः।।'**
**प्रापणं सेन्दुताम्बूलं पादयोः कुसुमाञ्जलिः।**
**आत्माराधनदानञ्च यथेष्टस्थानचिन्तनम्।।'**

1. लक्ष्मीतन्त्र.36.69.-73
2. लक्ष्मीतन्त्र.36.74
3. लक्ष्मीतन्त्र.36.76-78

तत्रैव शौनककल्पानुसारेण विनियोगः—

[1]'**आद्ययावाहनं कुर्यादासनञ्च द्वितीयया।**
**अर्घ्यं तृतीयया देयं मूर्ध्नयापः कुसुमास्स्मृताः॥**
**पाद्यं देयं चतुर्थ्या तु पञ्चम्याचमनीयकम्।**
**षष्ठ्या स्नानविधिः कार्यः सप्तम्या परिधानकम्॥**
**अष्टम्योत्तरवासश्च नवम्या गन्धलेपनम्।**
**दशम्या स्त्रगलङ्कारं एकादश्या तु दीपकम्॥**
**द्वादश्या सुरभिधूमः परया मधुपर्ककः।**
**प्रापणं तु चतुर्दश्या पञ्चदश्यानुवासनम्॥**
**षोडश्या तु नमस्कारः परया कुसुमाञ्जलिः।**
**अष्टादश्या प्रदानञ्च समाराधनकर्मण॥**' इति।

यद्यपि '**यजेत पुरुषसूक्तेन धनदम् विश्वरूपिणम्। वरुणं विश्वरूपिणम्**' इत्यादिना धनदपूजादिष्वपि विनियोगोऽस्ति; बोधायनसूत्रे शिवसङ्कल्पादिभिस्सह श्रीरुद्राङ्गमन्त्रेषूपदेशात्, छन्दोगानां वाजसनेयिनाञ्च महारुद्रजपमध्ये विनिवेशात्,

'**नमकं चमकञ्चैव पुरुषसूक्तञ्च नित्यशः।**
**जपन्नेति महादेवं गृहं गृहपतिर्यथा॥**'

इति पुराणेषु फलश्रवणात्, '**आवाह्य कुम्भे देवेशं रुद्रं भुवननायकम्**' इत्युपक्रम्य '**नमकं चमकञ्चैव पौरुषं सूक्तमेव च**' इत्यादिना वास्तुशान्तौ जपे विनियोगात्, लैङ्गादित्यपुराणादिषु—

[2]'**सकूर्चेन सपुष्पेण स्नापयेन्मन्त्रपूर्वकम्।**
**मन्त्रांश्च ते प्रवक्ष्यामि शृणु सर्वार्थसिद्धये॥**' इत्युपक्रम्य
'**ज्येष्ठसाम्ना त्रयेणैव तथा देवव्रतेन च।**
**रथन्तरेण पुण्येन सूक्तेन पुरुषेण च॥**'

इति शिवाभिषेकमन्त्रेषु परिगणनाच्च शिवाराधनेऽप्यस्ति विनियोगः;

तथापि न तावता तत्परत्वसिद्धिः। उक्तश्रुतिस्मृति [3]तदुभयविनियोगसमाख्यातदनुसार्युपबृंहणाञ्जस्याय अन्येषां विनियोगानां कथञ्चिन्नेयत्वात्।

---

1. लक्ष्मीतन्त्र.36.100-104
2. लिङ्ग.पु.1.27.39.
3. तध्दृदय

किञ्च **'धनदं विश्वरूपिणं वरुणं विश्वरूपिणम्'** इति विश्वरूपिपदेनान्तर्यामिपरत्वमवगम्यते। तत्र धनदाद्यन्तर्यामिणो महापुरुषस्य पुरुषसूक्तेनाभिधानम् [1]अञ्जसैवोपपद्यते। बोधायनसूत्रे श्रीरुद्राङ्गतया विनियोगोऽपि पुरुषसूक्तस्य रुद्रपरत्वाभावेऽपि तापनीये नारसिंहानुष्टुभाङ्गतया [2]**'घृणिस्सूर्य आदित्य'** इति सौरस्याष्टाक्षरस्येवोपपद्यते। न ह्यर्थमुखनिरीक्षणनिरपेक्षकेवलादृष्टार्थोऽङ्गन्यासविनियोग आरादुपकारकाङ्गतया विनियोगो वार्थविशेषतात्पर्यनिर्धारकः। महारुद्रमध्ये वास्तुशान्तौ चावाहनाद्यविनियुक्तस्य रौद्रस्य वैष्णवस्य च मन्त्रस्य जपः राक्षोध्नतयोपपद्यते। यथा पितृविष्णुदेवताके श्राद्धे राक्षोघ्नानां सूक्तानाम्। महादेवप्राप्तिफलश्रवणमपि विष्णुपूजनस्य विष्णुकीर्तनादेश्च निरतिशयरुद्रप्रीतिहेतुत्वाद्युक्तम्। स्नपनविनियोगस्य पावमानीनामब्लिङ्गानामिव च पावित्र्यादेवोपपत्तेः।

ननु [3]उभय विनियोगेऽपि श्रुत्यनुगुणविनियोगाय तार्थो ग्राह्यः। अस्ति ह्यत्र [4]**'उतामृतत्वस्येशान'** इति श्रुतिः। तस्य रुद्रे रूढत्वादिति चेन्न, **'वैष्णव्यां पुरुषसूक्तम्'** इत्यादिश्रौतविनियोगबलीयस्त्वेन तदनुसार्यर्थस्यैव ग्राह्यत्वे 'वचनात्त्वयथार्थमैन्द्रीयं स्यादि'ति न्यायेन ईशानशब्दरूढेरनादरणीयत्वात्।

किञ्च ईशानशब्दस्य[5] रुद्रपरत्वे लिङ्गम्, **'वैष्णवी नाम सहिता'**[6] इति वैष्णवत्वे श्रुतिः। तया लिङ्गं बाध्यते[7]।

किञ्च रुद्रवाचीशानशब्दः [8]**'ताच्छील्यवयोवचनशक्तिषु चानश्'** इति विहितचानशन्तो वाच्यः। शानजन्तत्वे **'स ईशानस्स भगवान्'** इत्यादौ वेदे **'ईशानस्सपरिवार'** इत्यादौ लोके च प्रथमासामानाधिकरण्यानुपपत्तेः।[9] **'लटश्शतृशानचावप्रथमासमानाधिकरण'** इत्यप्रथमासमानाधिकरण एव तद्विधानात्।

यद्यपि [10]**'नन्वोर्विभाषा'** इत्यतो विभाषाग्रहणम् अनुवर्त्य व्यवस्थितविभाषां स्वीकृत्य

---

1. अञ्जस्येनोपपद्यते
2. नृ.पु.ता.उ.4.2
3. उभयथा विनियोगेऽपि
4. पु.सू.1.2; श्वे.उ.3.15
5. शब्दत्वं सूक्तस्य
6. मम सहता
7. बाधते
8. पाणिनि.सू.3.2.129
9. पाणिनि.सू.3.2.124
10. पाणिनि.सू.3.2.121

व्यवस्थित [1]विभाषाश्रवणात् प्रथमासमानाधिकरणेऽपि क्वचिद्भवति - [2]सन् ब्राह्मणः, अस्ति ब्राह्मण इत्यादाविति वैयाकरणैरुच्यते; तथाप्यन्यथासिद्धप्रयोगदर्शनात् कल्प्यः व्यवस्थितविभाषान्तर्भावो अगतिकगतिर्न गत्यन्तरे चानशन्ततया लब्धे सम्भवति। अन्यथा [3]**'व्यत्ययो बहुलम्'**, [4]**'बहुलं छन्दसि'**, [5]**'षष्ठीयुक्तश्छन्दसि वा'** इत्यादिलक्षणविषयतापि सत्यपि गत्यन्तरे कल्प्येत।

एवञ्च [6]**'द्वादशाहेऽहीनस्य'** इत्यत्र व्यत्ययो बाहुलकव्यवस्थितविभाषाविषयताकल्पनात्। अव्ययपूर्वपदप्रकृतिस्वरबाधनेन उत्तरपदाद्युदात्तत्वसम्भवात् 'हीनं न भवति इत्यहीनम्' इति व्युत्पत्या हीनशब्दस्य प्रकृतज्योतिष्टोम एव सर्वसोमयागप्रकृतौ समस्तौपदेशिकधर्मयोगिनि सम्भवद्वृत्तिकतया अहीनशब्दानुपपत्त्या प्रकरणात् उत्कृष्टद्वादशाहाद्यहर्गणान्वयकल्पनया सिद्धान्तो न स्यात्।

उक्तञ्च शैवभाष्ये – 'निरुपाधिकपरमैश्वर्यविशिष्टत्वादीशानशब्दवाच्यं ब्रह्मे'ति। निरुपाधिकधात्वर्थकर्तृता हि ताच्छील्यं वैयाकरणैर्निरुक्तम्। तट्टीकायां चैतत् सोपपत्तिकमुक्तम्। [7]**'स्थेशभासपिसकसो वरच्'** इति ताच्छील्यार्थविहितवरच्प्रत्ययान्तः ईश्वरशब्दः। तत्पर्याये ईशानशब्देऽपि तत्समानार्थत्वात् [8]**'ताच्छील्यवयोवचनशक्तिषु चानश्'** इति विहितचानशन्त इति। अमरकोशटीकासु तथा व्याख्यानाच्चैतद्युक्तम्। अतश्चानशन्तो रुद्रनाम।अत्र च **'अमृतत्वस्येशान'** इति लादेशशानजन्तः आद्युदात्तत्वात् तस्यानुदात्ते ङिदुपदेशात् तत्सम्बन्धानुदात्तमिति लादेशानुदात्तत्वेन धातुस्वरपरिशेषेण शानजन्तत्वे लादेशत्वाभावाच्च[9] 'त' इत्यन्तोदात्तत्वापत्तेः।

न चात्र शानजन्तत्वे प्रथमान्तत्वानुपपत्तिरप्रथमासमानाधिकरणे तद्विधेरिति वाच्यम्। [10]**'लक्षणहेत्वोः क्रियाया'** इति सूत्रेण शानचस्सभवात्। अमृतत्वस्येशानस्सन्निदं सर्वं भवतीत्यन्वयात्। भवतीत्या'श्रयणेऽपि **'अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ती'**ति

---

1. विभाषाश्रयणात्
2. स न
3. पाणिनी.सू.3.1.84
4. पाणिनी.सू.3.2.88.
5. पाणिनी.सू.1.4.9
6. मी.सू.8.2.24
7. पाणिनी.सू.3.2.175
8. पाणिनी.सू.3.2.129
9. पाणिनी.सू.4.1.174
10. पाणिनी.सू.3.2.123

भवतिशब्दस्य कल्पनात्। सर्वशब्दश्च सर्वव्याप्तिपरः। [1]**'तेनेदं पूर्णं पुरुषेण सर्वम्'**, [2]**'समाप्नोषि ततोऽसि सर्व'** इति श्रुतिस्मृत्यनुसारात्। तथा चामृतत्वस्याप्यर्थो [3]तत्राध्वलब्धशब्दजगतश्च नियन्ता सन्नस्य जगतो व्यापको भवतीत्यर्थः। एवञ्च नियन्तृत्वेन व्याप्तिः, उपासकानुग्रहार्थं व्याप्तिश्चोक्ता भवति।

अस्तु वा प्रथमायाः छान्दसत्वम्। न चैवं सति ताच्छील्यिकचानशन्तस्याद्युदात्तत्वमेव छान्दसं कुतो न स्यादिति वाच्यम्। शानजन्तो वायं छान्दसप्रथमान्तः चानशन्तो वायं छान्दसाद्युदात्त इति संशयेऽपि नामत्वानिर्धारणात् श्रुतित्वानुपपत्तेः।

वस्तुतः प्रथमश्रुतस्वरानुरोधेन चरमश्रुतप्रथमायाः छान्दसत्वकल्पनं ज्यायः, न पाश्चात्यप्रथमानुरोधेन प्रथमावगतस्वरान्यथाकारः।

किञ्चामृतत्वस्येति प्रतिसम्बन्ध्युपादाने योगोन्मेषेण रूढेर्निमग्नत्वान्नात्र रूढ्यादरः। न चौत्सर्गिकरूढ्यर्थोपस्थितिस्तदुपादानेऽपि दुर्वारेति वाच्यम्। शब्दस्यैकार्थप्रतिपादनेन चरितार्थस्यार्थद्वयपरत्वासम्भवात्। अन्यतरनियामकाभावात् क्वचिद्योगरूढ्यर्थद्वयपरत्वम्।

यद्वा - अर्थद्वयतात्पर्यग्राहकसद्भावे [4]उभयपरत्वम्। निर्धारकाभावे रूढितात्पर्यग्राहकमात्र-सम्भवस्थल इव रूढार्थपरत्वम्। तत्रैव प्रतीत्याञ्जस्यात्। योगतात्पर्यग्राहकमात्रसद्भावे तु तन्मात्रपरत्वमिति तावन्मात्रेण प्रयोगस्य चारितार्थ्यात्। योगद्वयतात्पर्यग्राहकसद्भावेऽप्युभयपरत्वम्। अत एव श्लेषोपपत्तिः, आर्षानेकनिरुक्त्युपपत्तिश्च। इह तु प्रतिसम्बन्ध्युपादानं योगार्थग्रहणे नियामकमस्ति। योगार्थस्य उन्मिषितत्वान्न रूढ्युन्मेषः। योगोन्मेषे रूढेर्निमग्नत्वादेव हि **'पद्मानि यस्याग्रसरोरुहाणि'** इत्यत्र पद्मपदप्रयोगः।

यदुक्तं व्यङ्ग्यप्रधानत्वात् काव्यस्य गिरेरौन्नत्यव्यञ्जनाय योगे शब्दस्य उपेक्षायां न तत्र रूढिविवक्षा। इह व्यङ्ग्यार्थविवक्षाविरहान्न रूढिर्निमग्नेति, तन्न। योगार्थप्रतीतिरेव हि व्यङ्ग्यप्रतीतिनिमित्तम्, न तु रूढ्यविवक्षापि। योगार्थप्रतीतिः शब्दस्वभावात् अवर्जनीयतयैवेति। रूढिस्तु अग्रपदेनैव योगोन्मेषहेतुना वारिता। तस्य च योगोन्मेषहेतुत्वमधिकरणाकाङ्क्षेण सरसैवान्वयात्। रोहस्य ह्यधिकरणाकाङ्क्षा सरसैव पूर्णा। वस्तुतस्तु ऊर्ध्वमुखमयूखप्रबोधनमौन्नत्या-भिव्यञ्जकम्, न तु योगार्थः तदभिव्यञ्जकः।

किञ्च पदार्थस्य पदार्थेनान्वयः स्वरसः, न तु तद्विशेषणेन। तस्य विशेष्यान्वयेन निराकाङ्क्षत्वात्।

---

1. म.ना.उ.10.4
2. म.ना.उ.35.40
3. अत शब्दलब्ध
4. उभयपरत्व

तथा चान्तरङ्गत्वादीशानशब्दयोगार्थे प्रथमं रूढ्यर्थान्विते पदान्तरोपस्थाप्यस्य बहिरङ्गस्यामृतत्वस्य न निराकाङ्क्षेण विशेषणेन योगार्थेन अन्वयः परत्वस्य बद्धस्य राजपुरुष इतिवदयोग्यत्वाच्च न विशेष्येणत्यनन्वय एव स्यात।।

किञ्च [1]**'उतामृतत्वस्येशान'** इत्यमृतत्वस्येशानत्वं किमीशानशब्दरूढ्यर्थे विधीयते किं वामृतत्वस्येशानत्वं रुद्रत्वञ्च प्रकृते पुरुषे। नाद्यः, उद्देश्यार्थकस्येशानशब्दस्य विधेयार्थकत्वायोगात्। न द्वितीयः, अत्रैव पुरुषस्य रुद्रत्वे सिद्धे तु, अतिरिक्तरुद्रे [2]**सर्वो वै रुद्र** इत्युक्ते 'कथं सर्वो वै रुद्रः, पुरुषः खलु [3]**पुरुष एवेदं सर्वम्** इत्यादिषु सर्वत्वेन प्रसिद्ध' इति शङ्काया अनुत्थानेन तन्निराकरणार्थं [4]**पुरुषो वै रुद्र** इति रुद्रस्य पुरुषत्वमुच्यत इति व्याख्यानायोगात्।

किञ्च 'पुरुष एव' इति प्रकृते पुरुषे उतामृतत्वस्येशान इति योगरूढ्यर्थद्वयविधाने वाक्यभेदप्रसङ्गः। विशिष्टविधौ गौरवम्। रूढ्यर्थोद्देशेन योगार्थविधौ अप्यर्थे तच्छब्दान्वयास्वारस्यम्। न हि पुरुषस्सर्वात्मकः रुद्रो अमृतत्वस्येशानोऽपि इति वाक्यम् एकविषयत्वे[5] स्वरसम्। नारायणार्थस्तु योगरूढ्योर्विकल्प एव। अक्षादिशब्द इव रूढ्योः कुतः। एवञ्जातीयकानां शब्दानामवयवार्थसमुदायार्थयोः प्रयोगविकल्पदर्शनात्। उत्पलादिष्वपि हि पङ्कजादिशब्दानवयवार्थविवक्षया[6] वाक्यवत् प्रयुञ्जते। अपङ्कप्रभवेषु जलजेषु च नारायणनाभिजाते च पङ्कजशब्दः प्रयुज्यते इति। एवञ्चात्र प्रतिसम्बन्ध्युपादानेनावयवार्थस्यावश्यविवक्षणीयत्वात् न रूढ्या रुद्रोपस्थितिः।

नन्वेवं सति [7]**'शब्दादेव प्रमित'** इत्यधिकरणे [8]**'अङ्गुष्ठमात्रः पुरुष'** इति मन्त्रप्रतिपाद्यस्य [9]**'ईशानो भूतभव्यस्य'** इति श्रुत्या परब्रह्मत्वनिर्णयो न स्यात्। प्रतिसम्बन्ध्युपादानेन रूढ्युन्मेषात् भूतभव्यैश्वर्यस्य च ब्रह्मलिङ्गमात्रत्वादभिधानश्रुतिरूपशब्दाभावेन 'शब्दादेव' इत्यस्यासामञ्जस्यापत्तेरिति चेन्न। किमेतन्मन्त्रप्रतिपाद्यो जीव उत सर्वेश्वर इत्येव विचारप्रवृत्तेः

---

1. पु.सू.1.2
2. म.ना.उ.13.2
3. पु.सू.1.2
4. म.ना.उ.13.2
5. एतद्विषयत्वे
6. विवज्ञया
7. ब्र.सू.1.3.23
8. कठ.उ.2.1.12
9. कठ.उ.3.1.12

सर्वेश्वरत्वस्य च 'भूतभव्यस्येशान' इति शब्देनैवाभिधीयमानत्वाच्छब्दादेवेत्युपपत्तेः।

किञ्च पुरुषशब्दस्य नारायणाभिधानत्वव्यवस्थापनात्तस्य चात्रोपक्रमे आवृत्तस्य श्रवणाच्चरमश्रुतेशानशब्दरूढिस्त्याज्या। न च बर्हिराज्यनयात् सामान्यशक्त्यैव विशेषे प्रयोगोपपत्तेः पुरुषशब्दस्य न विशिष्यापि शक्तिरिति वाच्यम्। ईशानशब्दादेरपि [1]'प्रोक्षणीन्यायेन' विशेषे शक्त्यसम्भवात्। पुरुषशब्दस्य विशेषशक्तौ श्रुतिस्मृत्यादिकमुक्तम्। तस्याश्चोक्तविधया प्रयोगलभ्यत्वं शास्त्रप्रतिपाद्यत्वानुकूलासन्निकृष्टार्थोपपादकम्। उपबृंहणान्यपि भवन्ति। यथा विष्णुस्मृतौ —

[2]'**सहस्रशीर्षस्सुमनाः सहस्रपात् सहस्रचक्षुर्वदनः सहस्रवान्।**
**सहस्रबाहुः प्रथमं प्रजापतिः स्त्रगीपते यः पुरुषो निरुच्यते।**
**आदित्यवर्णो भुवनस्य गोप्ता ह्येकोऽपूर्वः प्रथमस्तुराषाट।**
**हिरण्यगर्भः पुरुषो महात्मा स पद्यते वै तमसः परस्तात॥**
**कल्पादौ रजसोद्रिक्तो ब्रह्मा भूत्वाऽसृजत् प्रजाः।**
**कल्पान्ते तमसोद्रिक्तो कालो भूत्वाऽग्रसत्पुनः॥**
**स वै नारायणाख्यस्तु सत्त्वोद्रिक्तोऽर्णवे स्वपन्।**
**त्रिधा विभज्य चात्मानं त्रैलोक्ये समवर्तत॥'**

इत्यत्र पुरुषसूक्तप्रतिपाद्यस्य नारायणाभिधानस्य प्रथमं प्रजापतिसर्गादौ ब्रह्मत्वकरणमादित्यवर्णत्वं हिरण्यगर्भत्वं तमसः परत्वञ्चोक्तम्। तेन च पुरुषसूक्तस्य **'अद्भ्यस्सम्भुत'** इत्यस्य [3]**'अम्भस्यपार'** इत्यस्य च नारायणपरत्वमाविष्कृतम्। [4]**'प्रजापतिश्चरति'** इत्यादेर्निर्वाहात्।

बोधायनोऽप्युपबृंहयति - यथा नारायणबलिखण्डे [5]**'विष्णवे नमो नारायणाय नमस्सहस्रशीर्षाय नमो यज्ञात्मने नमो यज्ञपुरुषाय नमो विश्वात्मने नमस्सर्वात्मने नमस्सर्वेश्वराय नम'** इति।

युद्धकाण्डे [6]**'लोकानां त्वं परो धर्म'** इत्यनुवर्तमाने [7]**'शार्ङ्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तम'** इति 'त्वं पुरुष' इत्यन्वयः। पुरुषसूक्तादिषु प्रसिद्धः पुरुषस्त्वमित्यर्थः। तत्रैव

1. श्री.भा.1.3.9
2. ब्रह्म.पु.6.63.66
3. म.ना.उ.1.1.
4. म.ना.उ.1.1
5. बो.गृ.सू.3.20.12
6. रामायण.6.117.14
7. रामायण.6.117.15

[1]‘**सहस्रचरणः श्रीमान् शतशीर्षस्सहस्रदृक्**’ इति ‘सहस्रपात्’ इत्यन्तस्योपबृंहणम्।

ब्रह्माण्डे च मध्यमभागे असितजनकसंवादे सूक्तमिदमुपबृम्ह्य अन्ते ‘वासुदेवाभिधानस्य’ इत्यादिना वासुदेवाज्जगत्सृष्टिः विस्तरेणोक्ता।

**‘भूतं भव्यं भवच्चैव सर्वं स पुरुषस्स्मृतः।**
**इदमावृत्य सकलं सोऽत्यतिष्ठद्दशाङ्गुलम्।**
**स यज्ञतन्त्रात्मा मर्त्यमन्त्रं यदत्यगात्।**
**ईशानः सर्वलोकानाममृतस्य भवस्य च।**
**ईदृग्विधोऽस्य महिमा पुरुषस्य दुरत्ययः।**
**पादोऽस्य सर्वभूतानि ज्यायानेष यतो नृप।**
**आसंस्तस्य त्रयः पादा दिवि ये यतचेतसाम्।**
**..... महाराज योग्यानां[2] क्लेशसंक्षये।**
**अपरोक्तस्त्रिलोकस्य पादो य इह कर्मभिः।**
**इज्यमानोऽखिलावाप्तिं करोत्यद्भुतसम्प्लवम्।**
**साशनानशने चोभे इदं विष्णुर्विचक्रमे।**
**अण्डात्तस्माद्विराट् जज्ञे भूतेन्द्रियगुणाश्रयः।**
**अत्यक्रामत् सताद्विश्वमङ्गारौघमिवानलः।**
**धर्मानुस्थितये[3] पूर्वं......................**
**यज्ञमूर्तिरिति प्रोक्तस्ततोऽसौ विश्वरूपधृक्।**
**विराजपुरुषो राजा पुरषो राजौघ .........**
**स एव गीयते ब्रह्म गात्रेभ्यो यस्य जज्ञिरे।**
**मन्त्रा यज्ञाश्च पशवः सवनस्पतयः कुशाः।**
**........................मुमुक्षुत्वेन वा पुमान्।**
**सम्यग्गुरूपदेशाच्च यं विदित्वा विमुच्यते।**
**रूपं यद्विश्वरूपाख्यमात्माद्वैतस्य विग्रहः।**
**नित्यप्रबुद्धसत्यादिप्रभावममृतात्मकम्।**

1. रामायण.6.117.21
2. योगिनाम्
3. धर्मानुकृतये, धर्मानुच्चितये

**स एव सर्वः सर्वात्मा सर्वभूतहृदिस्थितः।**
**यस्माज्जगत्सर्वमिदं भूतं स चराचरम्।**
**यच्चेष्टयति लोकेषु चतुर्विंशतिकं गुणम्।**
[1]**विज्ञप्तिमान्तत्प्रकृतिः अक्षरः प्रकृतेः परः।**
**हृदयग्रन्थयस्सम्यक् भिद्यन्ते सर्वसंशया।**
**छिद्यन्ते चास्य कर्माणि क्षीयन्ते तं विजानतः।**
**तमेकमक्षरं शान्तं परमानन्दमव्ययम्।**
**विष्णवाख्यममृतं साक्षाद्विज्ञाय परिमुच्यत॥** इति प्रपञ्चनात्।

सभापर्वणि चोपबृंह्यते —

[2]**‘अव्यक्तोऽव्यक्तलिङ्गस्थो य एष भगवान् प्रभुः।**
**पुरा नारायणो देवः स्वयम्भूः प्रपितामहः॥**
**सहस्रशीर्षः पुरुषो ध्रुवोऽव्यक्तस्सनातनः।**
**सहस्रास्यस्सहस्राक्षः सहस्रचरणो विभुः।**
**सहस्रबाहुस्साहस्रो देवो नामसहस्रवान्॥**
**सहस्रमकुटो देवो विश्वरूपो महाद्युतिः।**
**अनेकरूपो देवादिरव्यक्ताद्वै परे स्थित॥**
[3]**असृजत् सलिलं पूर्वं स च नारायणः प्रभुः॥’ इति।**

वाराहे तृतीयाध्याये —

[4]**‘सहस्रमूर्धानमनेकबाहुमनेकपादं शशिसूर्यनेत्रम्।**
**क्षराक्षरं क्षीरसमुद्रनिद्रं नारायणं स्तौम्यमृतं परेशम्॥’** इति।

महाभारते आनुशासनिके सुपर्णवैकुण्ठसंवादे —

**‘सहस्रोदरपादाय सहस्रचरणाय च।**
**सहस्रबाहवे चैव साहस्रवदनाय च॥’ इत्यादि।**

तथा वायुप्रोक्ते—

---

1. विज्ञाप्तिमात्रप्रकृतिः
2. महा.सभा.38.893
3. महा.सभा.38.893
4. वराह.पु.3.16

[1]'**एकार्णवे तदा तस्मिन् नष्टे स्थावरजङ्गमे।**
**तदा स भवति ब्रह्मा सहस्राक्षस्सहस्रपात्।**
'**सहस्रशीर्षः पुरुषो रुक्मवर्णो ह्यतीन्द्रियः।**
**ब्रह्मा नारायणाख्यस्तु सुष्वाप सलिले तदा॥**' इति।

न चात्र चतुर्मुखस्यैव नारायणाख्यत्वं सहस्रशीर्षत्वादिकं चोच्यत इति भ्रमितव्यम्। उदाहृतश्लोकानन्तरमेव—

[2]'**सत्त्वोद्रेकात्प्रबुद्धस्तु शून्यं लोकमवैक्षत।**
**इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति॥**
[3]**आपो नरोऽम्भस्तनव इत्यपां नाम शुश्रुम।**
**अप्सु शेते च यस्मात्स तेन नारायणः स्मृतः॥**
[4]**तुल्यं युगसहस्रस्य नैशं कालमुपास्य सः।**
**शर्वर्यन्ते प्रकुरुते ब्रह्मत्वं सर्गकारणात्॥**
[5]**ब्रह्मा तु सलिले तस्मिन् वायुर्भूत्वा तदाचरत्।**
**निशायामिव खद्योतः प्रावृट्काले ततस्तु स॥**' इति [6]**कीर्तनात्।**

अत्र पुरुषसूक्तप्रतिपाद्यस्य सहस्रशिरसो नारायणाभिधानस्य कल्पादौ स्वापादुत्थितस्य किञ्चित्कालं सर्गार्थं ब्रह्मत्वकरणम्, परस्य च प्रसिद्धस्य चतुर्मुखस्य ब्रह्मणस्तावत्कालं वायुभावेन खद्योतवदाकाशचारित्वञ्च विस्पष्टमवगम्यते। ततश्चान्येष्वपि पुराणेषु पृथिव्युद्धरणादिकर्तुस्सलिलशायिनो ब्रह्मणो नारायणाख्यस्य लोकप्रसिद्धत्वात् ब्रह्मणः स्वनाभिपद्मसम्भवादन्यत्वमध्यवसातव्यम्। एवञ्च पृथिव्युद्धरणादिकर्तुरादिवराहस्य भगवदाविर्भावत्वप्रसिद्धिर्नारायणशब्दप्रसिद्धिश्च न बाधिता भविष्यति।

हरिवंशे सूतं प्रति ऋषयः—

[7]'**सहस्रचरणं सूत सहस्रांशं सहस्रशः।**

---

1. ब्राह्म.पु.1.1.5.2-3, कूर्म.पु.1.6.-3
2. ब्राह्म.पु.1.1.5.4
3. ब्राह्म.पु.6.62
4. ब्राह्म.पु.1.1.5.5.
5. ब्राह्म.पु.1.15.7.
6. भेददर्शनात्
7. ह.वं.1.40.20-21

**सहस्रशिरसं देवं यमाहुर्वै युगे युगे।'**
**'नाभ्यरण्यां समुद्भूतं यस्य पैतामहं गृहम्॥' इति।**

तत्रैवानन्तराध्याये वैशम्पायनः—

[1]**'हन्ति विष्णोस्समस्तास्त्वं शृणु दिव्याः प्रवृत्तयः।'**
**'सहस्राक्षं सहस्रास्यं सहस्रचरणं विभुम्।**
**सहस्रशिरसं देवं सहस्रकरमव्ययम्॥'**
**'सहस्रजिह्वं साहस्रं सहस्रमकुटं विभुम्'**

इत्यारभ्य [2]**'आहुर्वेदविदो विप्रा यं यज्ञं शाश्वतं प्रभुम्'** इति। तत्रैवान्यत्र [3]'आदित्यवर्णं तमसः परस्तात्' इत्यस्य

**'स्त्रष्टा वेदस्य यज्ञस्य हविषामृत्विजां हरे।**
**निषेद्धा दुष्टसत्त्वस्य भर्ता त्वं तमसः पर॥'** इति।

मात्स्ये—

[4]**'अहं नारायणो ब्रह्मन् सर्वभूतविनाशनः।**
**अहं सहस्रशीर्षाख्यो यः पादैरभिसंहितः॥'**
**'आदित्यवर्णः पुरुष' इति।**

अत्र [5]**'सहस्रशीर्षा पुरुष' इत्युपक्रमवाक्यं'** [6]**'आदित्यवर्णं तमसस्तु पार'** इत्युपसंहारवाक्यं चार्थतः परमपुरुषे नारायणे सङ्गमय्य सूक्तमध्यस्थवाक्यपदप्रतिपाद्यत्वं कण्ठत उक्तं **'यः पादैरभिसंहित'** इति। उद्योगे **'सहस्रशीर्षं पुरुषं पुराणम्'** इत्यारभ्य **'इन्द्रानुजं तं शरणं प्रपद्य'** इति।

हरिवंशे पौष्करप्रादुर्भावे —

[7]**'अहं सहस्रशीर्षाख्यो यो वेदे हरिसंज्ञितः।**
**आदित्यवर्णः पुरुषो मुखे ब्रह्ममयोऽमलः॥' इति।**

---

1. ह.वं.1.41.2-4
2. ह.वं.1.41.20
3. पु.सू.2.2.
4. मत्स्य.पु.166.50-51
5. पु.सू.1.1.
6. पु.सू.1.13
7. ह.वं.3.10.52

ब्रह्ममयः ब्राह्मणोत्पादकत्वेन तत्वेन तत्प्रचुरः [1]'**ब्राह्मणोऽस्य मुखमासीत्**' इत्यस्यार्थो अनुस्मृतः[2]। काशीखण्डे बिन्दुमाधवाविर्भावेऽग्निबिन्दुस्तुतौ -

[3]'**ओं नमः पुण्डरीकाक्ष बाह्यान्तश्शौचदायिने।**
**सहस्रशीर्षा पुरुषः सहस्राक्षस्सहस्रपात्॥**' इत्यादि।

महाभारते मोक्षधर्मे —

[4]'**केशवो भरतश्रेष्ठ भगवानीश्वरः प्रभुः।**
**पुरुषः सर्वमित्येव श्रूयते बहुधा प्रभुः॥**'

इत्यत्र 'बहुधा' इत्यनेन [5]कठवल्ल्यां [6]मुण्डके [7]सौबालेऽन्यत्र च [8]'**पुरुष एवेदं सर्वम्**' इति अस्याम्नातमभिसंहितम्। तेनेदमेव वचनं सर्वासामुपनिषदां भगवद्विषयत्वे पर्याप्तमुपबृंहणम्। आश्वमेधिके ब्रह्मा —

[9]'**विष्णुरेवादिसर्गेषु स्वयम्भूर्भवति प्रभुः।**'
'**एवं हि यो वेद गुहाशयं प्रभुं परं पुराणं पुरुषं विश्वरूपम्।**
**हिरण्मयं बुद्धिमतां परां गतिम् स बुद्धिमान् बुद्धिमतीत्य तिष्ठति॥**'

इति। अत्र '**पुरुष एवेदं सर्वम्**' इति सर्वशब्दार्थो '**विश्वरूपम्**' इति, [10]'**आदित्यवर्णम्**' इत्यस्यार्थो '**हिरण्मयम्**' इत्युक्तः। '**बुद्धिमतां परां गतिम्**' इति '**अमृतत्वस्येशान**' इत्यस्य, तत्प्रपञ्चनार्थस्य, '**वेदाहमेतम्**' इति मन्त्रस्य [11]'**तमेवं विद्वान्**' इत्यस्य चार्थः। यद्वा अनेन श्लोकेन '**वेदाहम्**' इत्यस्यार्थः '**एवं वेद**' इति, '**एवं विद्वान्**' इत्यस्य '**विश्वरूपमि**'ति, '**महान्तम्**' इत्यस्य '**हिरण्मयमि**'ति, '**आदित्यवर्णम्**' इत्यस्य '**स**

---

1. पु.सू.13
2. अनुसृतः
3. स्क.पु.काशी.60.25
4. महा.शान्ति.207.5
5. कठ.उ.1.3.11
6. मुण्डक.2.1.10
7. सु.उ.1
8. पु.सू.1.2.
9. महा.आश्व.40.12-13
10. पु.सू.1.16
11. पु.सू.1.17; 2.2.

**बुद्धिमानि**'ति, '**अमृत इह भवति**' इत्यस्य चार्थस्य प्रत्यभिज्ञानात्, तथाश्वमेधिके [1]मानसयज्ञेषु वर्ण्यमानेषु [2]'**योगयज्ञः प्रवृत्तो म**' इति योगयज्ञमारभ्य,

[3]'**ऋत्विजश्चात्र( ऋचश्चाप्यत्र? ) शंसन्ति नारायणविदो जनाः।**
**नारायणाय देवाय यदबध्नन् पशून् पुर॥**'

इत्यारभ्य [4]'**देवं नारायणं भीरु सर्वात्मानं निबोध म**' इत्यन्तेन पुरावृत्तरूपेण [5]'**अबध्नन् पुरुषं पशुम्**' इत्यस्यार्थं वर्णयता तन्मुखेनेदं सूक्तं भगवत्परमुपबृंहितम्। आरण्यपर्वणि मार्कण्डेयसमाख्यायां '**ब्राह्मणोऽस्य**' इत्यादिमुखेनोपबृंहणम्—

[6]'**ब्रह्म वक्त्रं भुजौ क्षत्रमूरू मे संश्रिता विशः।**
**पादौ शूद्रा भजन्ते मे व्युत्क्रमेण क्रमेण च॥**
**ऋग्वेदस्सामवेदश्च यजुर्वेदोऽप्यथर्वणः।**
**मत्तः प्रादुर्भवन्त्येते मामेव प्रविशन्ति च॥**' इति।

'**ऋग्वेद**' इत्यादिना [7]'**ऋचः सामानि जज्ञिर**' इत्यादेरर्थोऽनुसृतः।

मोक्षधर्मे—

[8]'**ततः कृष्णो महाबाहुः पुनरेव युधिष्ठिर।**
**ब्राह्मणानां शतं श्रेष्ठं मुखादसृजत प्रभुः॥**
''**बाहुभ्यां क्षत्रियशतं वैश्यानामूरुतश्शतम्।**
**पद्भ्यां शूद्रशतञ्चैव केशवो भरतर्षभ॥**' **इति।**

भीष्मपर्वणि—

[9]'**मुखतस्सोऽग्निमसृजत् प्राणाद्वायुमथापि च।**
**सरस्वतीञ्च वेदांश्च वासुदेवो महायशाः॥**'
'**एष लोकान् ससर्जादौ देवान् ऋषिगणैस्सह।**' **इति,**

1. महा.आश्व.25.12-13
2. महा.आश्व.25.14.15
3. महा.आश्व.25.16
4. महा.आश्व.25.17
5. पु.सू.1.7
6. महा.वन.189.13-14
7. पु.सू.17
8. महा.शान्ति.207.31-32
9. महा.भीष्म.67.6-7

[1]**'असृजन्मुखतो विप्रान् बाहुभ्यां क्षत्रियांस्तथा।**
**वैश्यांश्चाप्यूरुतो राजन् शूद्रान् पद्भ्यां तथैव च॥'**

इति, [2]**'मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत', 'तथा लोकानकल्पयन्',** [3]**'ब्राह्मणोऽस्य मुखमासीत्'** इत्यादिद्वारोपबृंहणम्।

शङ्खस्मृतौ—

[4]**'स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम्।**
**ध्याननिर्मथनाभ्यानाञ्च विष्णुं पश्येद्धृदि स्थितम्॥' इति,**
[5]**'एष वै पुरुषो विष्णुर्व्यक्ताव्यक्तस्सनातन।' इति चाधिकृते**
**'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।**
**य एवं विदित्वा न बिभेति मृत्योर्नान्यः पन्था विद्यते चायनाय॥'**

इति **'वेदाहम्'** इत्यृच उपबृंहणम्। यद्वा युद्धकाण्डे **'तमसः परमो धाता शङ्खचक्रगदाधर'** इति [6]**'आदित्यवर्णं तमसस्तु पार'** इत्यस्योपबृंहणम्।

श्रीमद्विष्णुपुराणे तु ध्रुवस्तोत्रे इदं सूक्तं भगवत्परतया स्पष्टमुपबृंहितम् —

[7]**'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।**
**सर्वव्यापि भुवः स्पर्शादत्यतिष्ठद्दशाङ्गुलम्॥**
**यद्भूतं यच्च वै भव्यं पुरुषोत्तम तद्भवान्।**
**त्वं भो विराट् स्वराट् सम्राट् त्वत्तश्चाप्यधिपूरुषः॥**
**अत्यरिच्यत सोऽधश्च तिर्यगूर्ध्वञ्च वै भुवः।**
**त्वत्तो विश्वमिदं जातं त्वत्तो भूतं भविष्यति॥**
**त्वद्रूपधारिणश्चान्तः सर्वभूतमिदं जगत्।**
**त्वत्तो यज्ञस्सर्वहुतः पृषदाज्यं पशुर्द्विधा॥**
**त्वत्तो ऋचोऽथ सामानि त्वत्तश्छन्दांसि जज्ञिरे।**
**त्वत्तो यजूंष्यजायन्त त्वत्तोऽश्वाश्चैकतोदतः॥**

---

1. महा.भीष्म.67.18
2. पु.सू.1.14-15
3. पु.सू.1.13
4. शं.स्मृ.7.27.
5. शं.स्मृ.7.21-22
6. पु.सू.1.13
7. विष्णु.पु.1.12.56-64

**गावस्त्वत्तस्समुद्भूताः त्वत्तोऽजा अवयो मृगाः।**
**त्वन्मुखाद्ब्राह्मणा बाह्वोः तव क्षत्रमजायत॥**
**वैश्यास्तवोरुजाश्शूद्राः तव पद्भ्यां समुद्गताः।**
**अक्ष्णोः सूर्योऽनिलः प्राणाच्चन्द्रमा मनसस्तव॥**
**प्राणान्नः ( प्राणो नः ) सुषिराज्जातो मुखादग्निरजायत।**
**नाभितो गगनं द्योश्च शिरसस्समवर्तत॥**
**दिशश्श्रोत्रात् क्षितिः पद्भ्यां त्वत्तस्सर्वमभूदिदम्।' इति।**

अत्र **'पुरुष एवेदम्'** इति मन्त्रोपबृंहणे पुरुषोत्तमशब्दप्रयोगात्तस्य पुरुषशब्दवाच्यत्वमपि सिद्धम्। आश्वमेधिके च श्रीभगवानेवाह—

**[1]'अहं सहस्रशीर्षा तु सहस्रवदनेक्षणः।**
**सहस्रबाहूदरधृक् सहस्राक्षस्सहस्रपात्॥**
**धृत्वोर्वीं महतीं सर्वामत्यतिष्ठं दशाङ्गुलम्।**
**सर्वभूतात्मभूतस्थस्सर्वव्यापी ततो ह्यहम्॥' इति।**

हरिवंशे तपश्चर्यायां रुद्रकृतकृष्णस्तोत्रेऽप्युपबृंहितम् —

**[2]'सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात्।**
**सहस्रोदरसाहस्री सहस्रात्मा दिवस्पतिः॥**
**भूमिं सर्वांमिमां प्राप्य सप्तद्वीपां ससागराम्।**
**अणुस्सर्वत्रगो भूत्वा अत्यतिष्ठद्दशाङ्गुलम्॥**
**त्वमेवेदं जगत्सर्वं यद्भूतं यद्भविष्यति।**
**त्वत्तो विराट् प्रादुरभूत् सम्राट् चैव जनार्दन॥**
**तव वक्त्राज्जगन्नाथ ब्रह्मणो लोकरक्षकः।**
**प्रादुरासीत् पुरा ब्रह्मन् षट्कर्मनिरतस्सदा॥**
**राजन्यस्तु तथा बाह्वोरासीत् संरक्षणे तथा।**
**उर्वोर्वैश्यस्तथा विष्णोः पादाच्छूद्र उदाहृतः॥**
**एवं वर्णा जगन्नाथ तव देहात् सनातनात्।**
**मनसस्तव देवेश चन्द्रमास्समपद्यत॥**
**सुखकृत् सर्वजन्तूनां शीतांशुरमृतप्रभः।**

1. महा.आश्व.पृ.1000
2. ह.वं.3.88.33-43

**अक्ष्णोस्सूर्यस्समुत्पन्नः सर्वप्राणिविलोचनः॥**
**यस्य भासा जगत्सर्वं भासते भानुमानसौ।**
**मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत॥**
**नाभेर्व्योम समुत्पन्नं तव देव जनार्दन।**
**द्यौरासीत्तु महाधारा शिरसस्तव गोपते॥**
**पद्भ्यां भूमिस्समुत्पन्ना दिशश्श्रोत्रात् जगत्पते।**
**एवं सृष्ट्वा जगत्सर्वं व्याप्य सर्वं व्यवस्थितम्॥**
**व्याप्य सर्वानिमांल्लोकान् स्थितस्सर्वत्र केशवः।**
**ततश्च विष्णुनामासि धातोर्व्याप्तेः प्रवेशनात्॥'**

इति धातोर्व्याप्तेश्च दर्शनात्।

तत्रैव वामनप्रादुर्भावे —

'व्यक्ताव्यक्तं महद्भूतं भूतभव्यभवो विभुः।'

[1]'सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात्।

शङ्खचक्रगदापाणिः पीतवासास्सुरारिहा।।' इति।

तत्रैव बाणयुद्धेऽध्वरस्तोत्रे –[2]'**नमस्सहस्रशिरसे सहस्रचरणाय च**', '**सहस्राक्ष नमो नित्यं लोकानामभयङ्कर**' इति।

तत्रैव वामनप्रादुर्भावे बलेरन्यैरजय्यत्वमुक्त्वा [3]'**सहस्रशिरसा हन्तुं केवलं शक्य एव हि**' इत्यादिवचनादागतानां ब्रह्मणा विदिताशयेन—

[4]'**भविष्यति च वस्सोऽर्थः काङ्क्षितो यस्सुरोत्तमाः।**
**बलेर्दानवमुख्यस्य यो विजेता भविष्यति॥'**

इत्याद्युक्त्वा प्रेषितानां तदर्थतपश्चर्यायां—

[5]'**प्रसादार्थं सुरेशस्य तस्य देवस्य धीमतः।**
**नारायणस्य देवस्य सहस्राक्षस्य भूतले॥'**

इति पठ्यते। अत्रोपक्रमोपसंहारयोः '**सहस्रशीर्षे**'त्युपबृंहितम्।

हरिवंशे बलियुद्धे —

1. ह.व.3.64.27
2. ह.व.3.90.17
3. ह.व.3.66.5
4. ह.व.37.2
5. ह.व.3.67.24

**‘सहस्त्रशीर्षा पुरुषस्सहस्त्राक्षस्सहस्त्रपात्।**
**शङ्खचक्रगदापाणिः पीतवासास्सुरारिहा॥’ इति।**

हरिवंश एव महापुरुषस्तवे [1]‘**सहस्त्रशीर्षा**’, ‘**सहस्त्रदृक्**’‘**सहस्त्रपात्**’, ‘**सहस्त्रबाहो**’, ‘**सहस्त्रमूर्ते**’, ‘**साहस्त्रास्य**’, ‘**सहस्त्रशस्त्वामाहुर्वेदाः**’ इति।

भागवते प्रथमस्कन्धे तृतीयाध्याये—

[2]‘**पश्यन्त्यदोरूपमदभ्रचक्षुषस्सहस्त्रपादोरुभुजाननाद्भुतम्।**
**सहस्त्रमूर्धश्रवणाक्षिनासिकं सहस्त्रमौल्यम्बरकुण्डलोल्लसत्॥**’**इति।**

यत्तु श्रुत्यादिनियमितशिवैकान्तस्यापि पुरुषसूक्तस्य श्रुतिस्मृतिदृष्टविनियोगान्तरनिर्वाहाय धनदादिप्रतिपादनप्रकारवत् नारायणप्रतिपादनप्रकारस्यापि कस्यचित् पुराणाद्यभावे पुरुषबुद्ध्यापि कल्पनीयत्वात् स एव तत्समाराधनादिप्रपञ्चनपरपुराणागमेषु नियमित इत्यन्यथासिद्धानि उपबृंहणानीति,

तन्न, ईशानश्रुतिनिषेधात्। किञ्च अस्मिन् असमवेतार्थपरवाक्यस्य समवेतार्थपरतया विवरणे हि निर्वाहः। तस्यैवासमवेतार्थस्य पुनः कीर्तने कथं निर्वाह इति न विद्मः। न चात्र निर्वाहापेक्षा। असमवेतार्थप्रकाशनस्य नियमादृष्टार्थत्वेन व्यवस्थापितत्वात्।

यच्चोच्यते-असमवेतार्थानामपि मन्त्राणां तथैव पुराणादिषूपबृंहणं दृश्यते। यथा [3]‘**सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्या**’ इति मन्त्रस्य

[4]‘**सोमं ससर्ज यज्ञार्थं सोमात् द्यौस्समजायत।**’
‘**धरा वह्निश्च सूर्यश्च वज्रपाणिश्शचीपतिः।**
**विष्णुर्नारायणश्श्रीमान् सर्वं सोममयं जगत्॥**’ इति।

तन्न। श्रुतिस्मृत्योः उक्तयोः समवेतार्थत्वात्। द्युपृथिव्यादित्यादयो हि कर्मनिर्मिताः तद्द्वारा सोमसाध्यः विष्णुरपि कर्मभिराराधितः प्रादुर्भवतीति इतिहासादिषु सिद्धम्।अत एवोक्तं वैष्णवे पुराणे —

[5]‘**देह्यनुज्ञां महाराज मा धर्मो यातु संक्षयम्।**

---

1. ह.व.3.64.27
2. भा.पु.1.3.4
3. साम.1.6.1.4.5.
4. लिङ्ग.पु.2.17.6-7
5. विष्णु.पु.1.13.25

**हविषां परिणामोऽयं यदेतदखिलं जगत्॥'** इति।

तस्मादुपबृंहणानामनन्यथासिद्धत्वात् सिद्ध पुरुषसूक्तस्य भगवत्परत्वं तदेकार्थत्वञ्च, [1]**'येनाक्षरं पुरुषं वेद'** इति श्रुतेः। अतो देवतान्तरोपास्यत्ववादिनो निरस्ताः।

**॥ इति देवतान्तरोपास्यत्वभङ्गः॥**

## 10. अवाच्यत्वभङ्गः

[2]**'तां विद्याम्'** इत्येतावतैव चारितार्थ्ये **ब्रह्मविद्याम्'** इति ब्रह्मपदं ब्रह्मणोऽपि उपदेश्यत्वसिद्ध्यर्थम्। उपदेश्यत्वं न वाक्यार्थतया संसर्गत्वात् किन्तु पदार्थतया। तत्र मुख्यत्वरूपः प्रकर्षः प्रशब्देन विवक्षितः, विवेकरूपप्रकर्षवत् बाधकाभावे विवक्षणीयत्वात्। तेनावाच्यत्वं ब्रह्मणो निराचकार। तथाहि ब्रह्मावाच्यमिति न प्रतिजानीषे उत प्रतिजानीषे। नाद्यः, तत्साधनासम्भवात्। द्वितीये ब्रह्मपदवाच्यस्यावाच्यत्वसाधने व्याघातः। लक्ष्यार्थस्य तत्साधने बाधः। ब्रह्मातिरिक्तस्यैव लक्षणया प्रतीतेः। ब्रह्मपदवेद्यस्य अवाच्यत्वसाधनेऽपि तथा, वाच्यलक्ष्यातिरिक्तबोध्यासिद्धेः। ब्रह्मपदेन वाच्यमिति वा लक्ष्यमिति वा बोध्यमिति उक्तावपि तथा।

किञ्च ब्रह्मपदबोध्यस्य कृत्स्नस्याप्यवाच्यत्वसाधने ब्रह्मपदस्य कुत्रापि मुख्यवृत्तेरभावेन तत्सम्बन्धनिमित्तलक्षणाया अभावात् बोधकत्वस्यैव असिद्धिः। ब्रह्मपदबोध्यं किञ्चिदवाच्यमित्युक्तौ न निर्धारणासिद्धिः। ब्रह्मपदमुख्यार्थविशेष्यमवाच्यमित्युक्तौ बाधः। विशेष्यस्वरूपं विशेषणेन विना न शक्तिगोचर इत्युक्तौ सिद्धसाधनम्। घटादेरप्यवाच्यताप्रसङ्गश्च। शुद्धं ब्रह्म न वाच्यं, निर्विशेषं ब्रह्म न वाच्यम् इत्युक्तौ विशेषणेन विना वाच्यं न भवतीति विवक्षायामुक्त एव दोषः। अविद्योपहितभागादन्यभागविवक्षायां ब्रह्मणो व्यापकत्वाभावप्रसङ्गः। अविद्योपहितभागस्य मुख्यार्थतया विवक्षितस्य देशपरिच्छेदवतः कथं ब्रह्मशब्दमुख्यार्थत्वमपि, अविद्यानुपहितभागे मानाभावश्च।

अपिच ब्रह्मणि प्रवृत्तिनिमित्तसत्त्वेऽप्यवाच्यत्वमुच्यत उत तदभावात्। आद्यं ब्रह्मणापि दुस्साधनम्। न द्वितीयः, प्रवृत्तिनिमित्तस्य निरतिशयब्रह्मत्वस्य तत्रैव भावात्। धर्मिसमानसत्ताक-प्रवृत्तिनिमित्ताभावान्न वाच्यमिति चेत् तर्हि ब्रह्मपदस्य न मुख्यवृत्तिरिति तस्य ब्रह्मणि लक्षणापि न स्यात्, तस्यास्तादधीन्यात्। अविद्योपहिते प्रवृत्तिनिमित्तस्य धर्मिसमसत्त्वलाभात् स एव

---

1. मुण्डक.1.2.13
2. मुण्डक.1.2.13

मुख्यार्थ इति चेन्न। उपाधेरधर्मित्वादुपाधेयस्य सत्यत्वाच्च। धर्मिसमसत्वं वाच्यत्वं निषिध्यत इति चेन्न। तस्य प्रपञ्चसमानयोगक्षेमस्य पृथक् साधनवैयर्थ्यात्। अन्यथा कारणत्वस्यापि निषेधप्रसङ्गात्। अस्तु ब्रह्मवित्प्रद्वेषेण तस्याप्रामाणिकत्वबोधनार्थं तथा निषेधः। तथापि सत्त्वादीनां मिथ्यात्वेऽपि यथा ब्रह्म सत्यं ज्ञानमानन्दञ्च तथा वाच्यत्वस्य मिथ्यात्वेऽपि ब्रह्म वाच्यमेव स्यात्। अन्यथा लक्ष्यमपि न स्यात्। वाच्यत्वस्य मिथ्यात्वेऽपि न लक्षणासिद्धिः। एवञ्च श्रुतिप्रत्याशाप्युत्सारिता। तत्राप्युक्तन्यायेन ब्रह्मावाच्यमिति प्रतिपादनासम्भवेन श्रुतेरान्यपर्यात्।

अपिच [1]**'अनुप्रविश्य नामरूपे व्याकरवाणि'** इत्यनुप्रवेशस्य नामव्याकरण-निमित्ततोक्तिः नामवाच्यत्वसिध्यर्थमेव। रूपव्याकरणनिमित्तता तु सद्विद्याविजये निरूपयिष्यते।

**'वचसां वाच्यमुत्तमम्'**, [2]**'तस्योदिति नाम'**, [3]**'यन्नाम तन्नाम'**, [4]**'ब्रह्मैव वाचः परमं व्योम'** इत्यादि सुप्रसिद्धम्। [5]**'नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती'** इत्यादिभिः श्रुतिरुपबृंहिता च।

[6]**'तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः।**
**शब्दोऽयं नोपचारेण त्वन्यत्र ह्युपचारतः॥'**

इत्याद्यनुगृह्णन् भगवान् पराशरः कथमवाच्यतोक्तिं मृष्येत्। पूज्यपादार्थोक्तीति योगोऽभिहितः। परिभाषेति रूढिः।

न च [7]**'यतो वाचो निवर्तन्त'** इति श्रुतिविरोधः। तस्यानन्दापरिच्छेदतात्पर्यकत्वात्, प्रकरणेन तथा प्रतीतेः। [8]**'सैषानन्दस्य मीमांसा'** इति ब्रह्मानन्दो हि मीमांस्यतयोक्तः। सैषेत्युक्तेर्मनुष्यानन्दादिनिरूपणमेव ब्रह्मानन्दमीमांसेत्यवगतं। तन्निरूपणस्य ब्रह्मानन्दार्थत्वं तदुत्कर्षप्रतिपादनेनैवेति शब्दस्वारस्यादवगम्यते। तत्र [9]**'स एको ब्रह्मण आनन्द'** इत्युक्तेःपूर्वानन्दवत्परिच्छेदबुद्धिनिराकरणाय षोडशवर्णस्वर्ण एकवर्णवदुत्कर्षैकदेशो निरूपितः। अखण्डोत्कर्षस्तु नैव[1] मीमांसायास्तदुक्तेश्च गोचर इत्युच्यते **'यतो वाचो निवर्तन्त'**

1. छा.उ.6.3.2
2. छा.उ..1.6.7
3. छा.उ..1.7.5
4. छा.उ.7.2.2.
5. विष्णु.पु.1.14.26
6. विष्णु.पु.6.5.77
7. तै.उ.2.9
8. तै.उ.2.8
9. तै.उ.2.8

इति।

यद्वा किमितोऽपि ब्रह्मानन्दस्योत्कर्षः। किंवा एतावदेव यद्यस्ति तर्हि तावानप्युत्कर्षोऽब्ज-भुवोऽप्युपर्युपरि [2]**'ते ये शतम्'** इत्यनुक्रमात् पुरुषान् परिकल्प्य मीमांस्यतामित्यत्राह – **'यतो वाच'** इति। यद्यप्ययमर्थो निगदेनैवावगम्यते तथापि परैरर्थान्तरस्योत्प्रेक्षितत्वात् तन्निषेधार्थं स एव मया पुनरुक्त इति द्रष्टव्यम्। यदि स्वरूपस्य वाङ्मनसागोचरत्वं विवक्षितं स्यात् तदा [3]**'आनन्दं ब्रह्मणो विद्वान्'** इत्युक्तेः कथं सामञ्जस्यम्। तन्निवत्तौ हि वृत्तिव्याप्यत्वमपि न सिद्ध्येत्। अतो मनोनिवृत्तिरुत्कर्षपरिच्छेदार्थमीमांसाविषयेति वाच्यम्। अतो वाङ्निवृत्तिरपि परिच्छेदविषयैव युक्ता।

किञ्च [4]**'अप्राप्य'** इति प्रकर्षेण आप्त्यभाव उच्यते। तेनाप्तिमात्रं सिद्धम्। अपिच तं प्राप्तवत एव ततो निवृत्तिः। नहि सूत्र एव स्थिते देवदत्ते मालवकान्निवृत्त इति वक्तारो भवन्ति। मालवकं गत्वा निवृत्ते तु त्वरितं वक्तारो भवन्ति। तस्माद्वाङ्मनसे ब्रह्मानन्दमीमांसां प्राप्याखण्डोत्कर्षस्य मीमांसाविषयत्वाभावात् ततो निवृत्ते इत्यर्थः। निवृत्तिपदस्यौपचारिकत्वेऽपि प्रयोगस्य केनचिदाकारेण प्राप्तवत एवाकारान्तरेणाप्राप्तौ स्वारस्यसिद्धिः। निरुक्तमीमांसामुखेनानन्दं प्राप्तवतोः वाङ्मनसयोरुपरि मीमांसामुखेनाप्राप्तिर्हि निवृत्तिपदेन विवक्ष्यते। वाङ्मनसनिवृत्त्यपादानं हि **'यत'** इति निर्दिश्यते। तत्र कथं लक्षणा। नहि तस्यान्यो मुख्यार्थोऽस्ति। सर्वनाम्नां हि प्रकृतमेव मुख्यार्थः। अत इदमेव वाक्यं **'यतो निवर्तन्ते'**, **'अप्राप्य मनसा सह'** इति पदैर्वाच्यत्वं साधयति। अवाच्यत्वे विवक्षिते **'यतो निवर्तन्त'** इत्येतावदेव हि वक्तव्यम्।अप्राप्येति व्यर्थम्। एकदेशं प्राप्य कृत्स्नप्राप्तावसामर्थ्यात् निवृत्ता[5] इत्युक्तौ हि सार्थक्यम्। **'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्'** इति शब्दधियोर्मितिः। आनन्दशब्दस्य परैस्स्वरूपानन्दपरत्वाभिधानादिदमुक्तम्।

वस्तुतस्त्वेषा श्रुतिरानन्दगुणपरा, **'आनन्दं ब्रह्मण'** इति व्यतिरेकनिर्देशात्।

ननु [6]**'आकाशो ह वै नामरूपयोनिर्वहिता ते यदन्तरा तद्ब्रह्म'** इति 'त्वां च माञ्चान्तरा कमण्डलुरि'तिवत् नामरूपयोर्मध्ये ब्रह्मेति तदुभयसम्बन्धराहित्यं प्रतीयत इति चेन्न। **'ह वा'** इत्यनुवादात् सद्विद्या प्रत्यभिज्ञायते। तत्रानुप्रविश्य नामरूपव्याकरणश्रवणात्

1. नैवम्
2. तै.उ.2.8
3. तै.उ.2.4, 2.9
4. तै.उ.2.4, 2.9
5. निवृत्तौ
6. छा.उ.8.14.1

नामरूपव्याकरणस्यानुप्रवेशनिबन्धनत्वस्य नामरूपयोर्ब्रह्मपर्यन्तत्वं विनानुपपत्तेः तदवश्यम्भावे ब्रह्मणस्तत्प्रयुक्तदोषाः प्रादुष्युरित्यत्राह – **'ते यदन्तरा'** इति। नामरूपाभ्यां द्वारनिरपेक्षसम्बन्ध-श्चिदचितोरिव नास्तीत्यर्थः। अन्यथा पूर्ववद्यत्पदानन्वयः नामरूपव्याकरणविषयनामनिवृत्तावपि ब्रह्मादिनामनिवृत्त्यसिद्धिश्च।

[1]**'यद्वाचानभ्युदितम्'** इति न वाग्विषयत्वं निषिध्यते। तेन [2]**'येन वागभ्युद्यत'** इति वाक्यशेषे वाक्प्रेरकत्वस्य प्रतिपादनात् वाक्प्रेर्यत्वमेव निषिध्यते। नानन्याधिपतित्वं प्रतिपाद्यते। अन्यथा पूर्ववत् यत्पदद्वयानन्वयात्।

नन्वत्र वदधातोरिदं रूपम्। एवञ्च ब्रह्मणा वागुच्यते ब्रह्म न वाचोच्यत इति चेन्न। विधिनिषेधयोर्वैरूप्यप्रसङ्गात्। उच्चारणं विधीयते, शक्तिर्निषिध्यत इति वाग्विषयत्वनिषेधे लक्षणाया अपि निषेधप्रसङ्गः। शक्तिविषयतया निषेधसङ्कोचे परिच्छेदविषयतया सङ्कोचे कः प्रद्वेषः। लक्षणाविषयतयैव वा सङ्कोचः किन्न स्यात्।

युक्तश्चायमेव वाच्यत्वनिषेधवत् बाधकाभावात् प्रमाणान्तरानुगुण्याच्च। ब्रह्मणः सर्वशब्दवाच्यत्वं सद्विद्यादिषूपपादितम्। ततश्चावाच्यविषया लक्षणा वाच्ये अनुपपन्नैव। अतो लक्षणाविषयतया निषेधसङ्कोचो ज्यायान्। या **'यद्वाचानभ्युदितम्'** इति श्रुतिस्सापि महीयसी लक्षणां प्रतिषेधन्ती वाच्यत्वे मानमेव नः।

किञ्च **'यद्वाचा'** इति **'येन'** इत्यनुसारात् वाक्प्रकाश्यत्वं न निषेध्यम्, तस्याप्रसिद्धेः। वाचः प्रकाशत्वाभावात्। तत्करणकत्वज्ञानगोचरत्वनिषेधे येनेत्यपि ज्ञानकरणत्वं विवक्ष्येत। अन्यथा अस्वारस्यात्। करणत्वञ्च ब्रह्मणोऽसिद्धमेव।

अस्मदाचार्या अनुगृह्णन्ति—

**ब्रह्मण्यशब्दवाच्ये स्याद्वचसां वाच्यमुत्तमम्।**
**इत्यादिमानविद्वेषो वाच्यत्वोपहितस्य चेत्॥**
**स्वरूपस्यापि वाच्यत्वं तदन्तर्भावतो भवेत्।**
**उपधानेन शून्यस्यावाच्यत्वे व्याहतिर्भवेत्॥**
**वाच्यत्वं ब्रह्मणो वाच्येऽनुपधाने न लक्षणा।**
**समानसत्त्ववाच्यत्वाभावे तौल्यं घटादिना॥**
**निमित्तोपहिते शब्दस्वरूपं चेन्न गोचरः।**
**यतो वाचो निवर्तन्ते श्रुतिस्तु गुणगोचरा॥**

---

1. के.उ.1.4
2. के.उ.1.4

**स्वरूपगोचरत्वेऽपि कथं शक्तिर्निवार्यते।**
**अप्राप्येति निषेधे तु कथं मृष्येत लक्षणाम्॥**
**निर्दिश्य वृत्तिमात्रस्य निषेधे व्याहतिस्ततः।**
**शक्तेर्निषेधश्चेत्तर्हि लक्षणा वा निषिध्यताम्॥**
**लक्षणाया निषेधे हि वाच्यत्वश्रुत्यनुग्रहः।**
**तात्पर्यमपरिच्छेदे श्रुतेः प्रकरणात्ततः॥**
**मनसा सममाम्नाता निवृत्तिर्दुर्वचा गिरः।**
**इष्यते हि परा वृत्तिः परैरपि परात्मनि॥**

अयमर्थः - अवाच्यत्वे प्रमाणविरोधः। उपहितस्य वाच्यत्वान्न विरोध इति चेत्, किं तर्ह्यवाच्यम्। अनुपहितमिति चेत्, किं तदनुपहितम्। किं स्वरूपमेव, किंवोपधानशून्यं स्वरूपम्, किंवोपधानाभावः। आद्ये उपहितस्य वाच्यत्वे स्वरूपस्यापि तत्प्रवेशेन वाच्यत्वमनिवार्यम्।द्वितीयेऽपि किमुपहितस्वरूपमेवोपधानशून्यं विवक्षितं किंवा ततोऽन्यत्। आद्ये व्याघातः। यदि चोपहितस्याप्युपधानस्यापि पारमार्थिकतया पारमार्थिकोपधानशून्यत्वान्न व्याघातः, तथापि तादृशं ब्रह्म वाच्यमेवेति कथमवाच्यता। द्वितीयमसिद्धमनङ्गीकृतञ्च। एतेन तृतीयमपि निरस्तम्। ब्रह्मणो वाच्यत्वाविरोधाच्च। यदि चोपहितान्तर्भाविण स्वरूपस्य वाच्यत्वेऽपि घटादिवद्धर्मिसमानसत्ताकवाच्यत्वाभावमात्रेण वाच्यत्वाभावं मन्यसे, तर्हि ब्रह्मावाच्यमिवालक्ष्यमपि स्यात्, लक्षणावैयर्थ्यं च। यदि प्रवृत्तिनिमित्तोपहितप्रतीतेश्शक्त्यधीनत्वेऽपि स्वरूपमात्रप्रतीतेश्शक्त्यधीनत्वाभावाच्छब्दजन्यस्वरूपमात्रगोचरवृत्तये स्वरूपलक्षणेति ब्रूषे, तर्हि घटाद्यविशेषः। नहि घटत्वाद्युपहितशक्तिस्तदनुपहितं बोधयति। **'यतो वाच'** इति श्रुतिर्गुणापरिच्छेदविषया। स्वरूपगोचरत्वेऽपि वाङ्मात्रनिवृत्तिप्रतीत्या कथं शक्तिनिवृत्तिः। **'अप्राप्य'** इति शक्तिनिवृत्तिः प्रतीयत इति चेन्न। लक्षणाया अपि सम्बन्धत्वात् 'यत' इति निर्दिश्य निषेधे व्याघातः। शक्तिमात्रनिषेधे विपरिवर्तोऽपि सुवचः। तथा सति **'वचसाम्'** इत्याद्यनुग्रहश्च। तस्मात् प्रकरणानुसारादपरिच्छेद एव तात्पर्यम्।

किञ्च वाङ्निवृत्तिवदेव मनोनिवृत्तिरपि वाच्येति तृतीयश्लोके ब्रह्मणो वाच्यत्वञ्च भवेदिति हि अन्वयः। अनुपधानेऽवाच्य इत्यन्वयः। समानसत्त्ववाच्यत्वाभावे न लक्षणेत्यन्वयः। न गोचरः तौल्यं घटादिनेत्यन्वयः।

[1]**'ब्राह्मणः परीक्ष्य'** इत्यनेन वेदाप्रामाण्यवादिनिरासोऽप्यभिप्रेतः। अप्रमाणशब्देनाप्रामाण्यवादिन एके, इतरे पुनः प्रमाणशब्देन। ते हि शैलूषवद्वैदिकभूमिकां परिगृह्य वेदप्रामाण्यं वदन्त इव प्रविश्य वेदस्य व्यावहारिकार्थविषयत्वेनाप्रामाण्यापरपर्यायं प्रामाण्यमुक्त्वा कार्त्स्न्येन

1. मुण्डक.1.2.12

तथोक्तौ वैदिकैः बहिष्कारो भवितेति बुद्ध्या कस्यचित्तत्त्वावेदकत्वं वदन्त इव वैदिकगोष्ठीम् अध्यारुह्य तस्यापि तत्त्ववेदकतया अभिमत-तत्त्वमस्यादेः संसर्गबोधकत्वम् अप्यपहृत्य[1] पदार्थस्यैव वाक्यार्थतां वदन्तः पौनरुक्त्यप्रसङ्गेन तदपि त्याजयन्तो बोधकत्वमेव नास्ति, कुतः प्रामाण्यमिति [2]व्यञ्जयन्ति। तत्र पूर्वनिरासः पूर्वकाण्डे विस्तृतोऽनुसन्धेयः। पाश्चात्यनिरासविस्तरस्त्वद्वैत-विद्याविजयेऽनुसन्धेयः।

**॥ इति अवाच्यत्वभङ्गः॥**

**इत्थं स्वानुचरैर्न्यायैर्निराकृत्य विरोधिनः।**
**तद्विज्ञानश्रुतिस्सार्धं तैर्जयत्यक्षरादिभिः।**

**इति श्रीवाधूलकुलतिलक-**
**श्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये गुरूपसदनविजयः प्रथमः समाप्तः॥**

**वाधूलश्रीनिवासार्यतनयं विनयाधिकम्। प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम्॥**
**चण्डमारुतवेदान्तविजयादिस्वसूक्तिभिः। वेदान्तरक्षकायास्तु महाचार्याय मङ्गलम्॥**

---

1. अपहृत्य
2. वञ्चयन्ति

## श्रीदोड्डयाचार्यापरनामधेयश्रीमहाचार्यविरचिते वेदान्तविजये

# 2
# ब्रह्मविद्याविजयः

### 1. देवतान्तरस्य परविद्यावेद्यत्वभङ्गः

**पुरुषो ब्रह्मविद्यानां मुण्डकेन स्वयं परः।**
**[1]ख्यापितःख्यापयन्त्येताः स्वं भावं पुरुषे स्वयम्[2]॥**

परविद्या तावत् भगवन्निष्ठा। पुरुषश्रुत्यभ्यासात् अक्षरपुरुषशब्दसामानाधिकरण्यात् अमृतशब्दात् एकर्षिशब्दात् प्रत्यभिज्ञानात् लिङ्गात् उपबृह्मणाच्च।

ननु पुरुषपदस्य सविशेषणस्यैव श्रुतेः सामान्यार्थकस्यैव विशेषणबलाद्विशेषनिष्ठत्वात् नात्र भगवद्रूढ्युन्मेष इति चेन्न, भगवतोऽन्यत्र तदमुख्यत्वस्योपपादितत्वात्। 'वेदान्तपुरुषो ह्यसावि'त्यादिवचनैः वेदान्तेषु पुरुषपदस्य भगवत्यौत्सर्गिकत्वावगमात्। [3]'उपासते पुरुषं ये ह्यकामाः', 'पुरुष एवेद'मिति निरुपपदे पुरुषपदे भगवद्रूढ्युन्मेषेणावैरूप्याय तत्समानार्थत्वात् पुरुषशब्दान्तराणां तदभ्यासस्य तात्पर्यलिङ्गत्वोपपत्तेः। [4]"नित्यं निरञ्जनं निर्विकल्पं परञ्ज्योतिरमृताख्यं परं ब्रह्मस्वरूपं ध्यात्वा तस्मिन्नेव लयमवापे'ति नारसिंहपुराणे पूर्वोपक्रान्ते नारायणेऽमृताख्यत्वोक्तेः। ब्रह्माण्डे च सीताजनकसंवादे 'विष्ण्वाख्यममृतं साक्षाद्विज्ञाय परिमुच्यत' इति साक्षाच्छब्दस्य मुख्यार्थव्यवधानात् अपरत्वात् 'यत्साक्षादपरोक्षादि'तिवदमृतशब्दस्य मुख्यार्थतासिद्धिः। मैत्रायणीयश्रुतौ [5]'आनन्दतृप्तमचलममृतमच्युतं ध्रुवं विष्णुसंज्ञं सर्वाधारं धामे'तिविष्णावमृत-

---

1. ख्याप्तिः, ख्यापितः इति पाठभेदौ ।
2. पुरुषोत्तमे इति पाठभेदः ।
3. मु.उ.3.2.1
4. नृ.पु.26.1
5. मै.श्रु.7.3

पदप्रयोगात्। अम्भस्यनुवाके [1]'तदेव शुक्रममृत'मिति प्रयोगात्। सुबालोपनिषदि [2]'अजरममृतमभय-मशोकमनन्त'मितिचतुर्दशकृत्वः प्रयोगात्। तत्रैव [3]'सर्वेश्वरमचिन्त्यमशरीरं निहितं गुहायाममृतम्' इति प्रयोगात्। [4]'क्षराक्षरं क्षीरसमुद्रनिद्रं नारायणं नौम्यमृतं परेशमि'ति वाराहे ब्रह्मपारस्तोत्रे प्रयोगाच्च। नारायणीये नारदस्तुत्यध्याये [5]'अमृतव्योमन् सनातने'त्यादिना विष्णुस्तुत्यनन्तरं [6]'एवं स्तुतस्स भगवान् गुह्यैस्तत्व्यैश्च नामभि'रिति नामत्वानुवादादमृतशब्दस्य नारायणनामत्वं सिद्धम्। [7]'अतस्तपो ब्रह्म परामृतम्', [8]'ब्रह्मैवेदममृतं पुरस्तात्', [9]'यत्रामृतस्स पुरुषोऽव्ययात्मे'त्यमृतशब्दादपि अभ्यस्तात् तत्परतासिद्धिः।

न च जाबालश्रुतौ [10]'अथ हैनं ब्रह्मचारिण ऊचुः किं जप्येनामृतत्वं ब्रूहीति। स होवाच याज्ञवल्क्यश्शतरुद्रीयेणेति। एतान्येवामृतनामधेयानी'ति नामस्वमृतशब्दस्य नामनामवतोरभेदोपचार-मूलकताकल्पनया रुद्रपरता शङ्क्या। [11]'एतैर्ह वा अमृतो भवती'त्यनन्तरवाक्ये एवामृतत्वसाधनत्व-स्योपचारनिमित्तत्वस्योक्तत्वात्। अत एव शाङ्करभाष्येऽमृतशब्दस्य मोक्षवाचित्वमेव न रुद्रवाचित्वमित्यभिप्रायेणामृतस्य मोक्षरूपस्य रुद्रस्य नामधेयानीत्यद्वैतदृष्ट्या व्याख्यातम्। कर्मधारयस्य षष्ठीसमासादभ्यर्हितत्वात् उक्तव्याख्यैवादरणीया। अमृतशब्दितमुक्तिसाधनत्वञ्चात्र मुक्तिसाधनभगवद्ध्यानद्वारा विवक्षितम्। एवञ्च [12]'अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मोक्षी भवती'त्युपक्रमानुरोधो भवति। न हि तारकब्रह्मोपदेशजन्यमोक्षसाधनं भगवज्ज्ञानादन्यत् सम्भवति। न च ज्ञानसाधनत्वं शतरुद्रीयस्य साक्षादुपायस्य बोधकत्वेन, तत एव चामृतत्वोपचारोऽपीति वाच्यम्। तारकब्रह्माख्यसाधनान्तरावरुद्धे नैराकाङ्क्ष्यात् साधनान्तरोपदेशायोगात्। रुद्रादन्यस्यैवोपक्रमे 'य एषोऽनन्तोऽव्यक्त आत्मा तं

1. म.ना.उ.1.7
2. सु.उ.5
3. सु.उ.8
4. व.पु.3.16
5. महा.शा.338.4
6. महा.शान्ति.339.2
7. मु.उ.2.1.10
8. मु.उ.2.2.11
9. मु.उ.1.2.11
10. जा.उ.3
11. जा.उ.3
11. जा.उ.1
12. जा.उ.2

कथमहं विजानीयामि'त्यसाधारणानन्तादिशब्दैरुपास्यविशेषप्रतीतेश्च। अनन्तशब्दवदव्यक्तशब्दो हि 'विष्णावप्यजिताव्यक्ता'वित्याद्यभिधानकोशादिप्रसिद्धः। आत्मशब्दश्चानुशासनिके पुण्डरीकनारदसंवादे नारायणं प्रक्रम्य प्रवृत्तेन

**[1]'वासुदेवं तथा विष्णुमात्मानञ्च तथा विदुः।**
**संज्ञाभेदैः स एवैकस्सर्वशास्त्राभिसंस्तुतः॥'**

इति वचनेन नारायणासाधारणतया सकलश्रुतिप्रसिद्धसंज्ञात्वेनोक्तः। एवञ्च श्रुत्यैव विष्णोः प्रतीतेः अविमुक्तप्रतिष्ठितत्वलिङ्गात् रुद्रपरत्वाशङ्का श्रुतिलिङ्गबलाबलविदां नैवोत्तिष्ठति। अविमुक्तप्रतिष्ठितत्वञ्च भगवतो रामोपनिषदगस्त्यसंहितादिषु प्रसिद्धं [2]साधारणन्न लिङ्गम्। तथाहि - रामोपनिषदि भगवतो रामचन्द्रस्य बहुकालतपश्चर्यातोषितस्य स्वविषयवासिनां मुक्तिं प्रार्थितवन्तं शङ्करं प्रति वचनं श्रूयते —

**[3]'अविमुक्ते तव क्षेत्रे सर्वेषां मुक्तिसिद्धये।**
**अहं संनिहितस्तत्र पाषाणप्रतिमादिषु॥'**

इत्यादिना। नारसिंहपुराणे च गुह्यमानक्षेत्राध्याये [4]'केदारे माधवं विन्द्याद्वाराणस्यां तु केशवमि'त्यादिना। अगस्त्यसंहितायां सप्रपञ्चमुपबृंहितोऽयमर्थः। सुतीक्ष्णं प्रत्यगस्त्यः

**[5]'अस्ति वाराणसी नाम पुरी शिवमनोहरा।**
**सर्वदापीश्वरस्तत्र[6] पार्वत्या सह तिष्ठति॥**
**तस्याप्युपासकास्सर्वे भक्त्या तं प्रतिपेदिरे।**
**मुमुक्षवः परित्यज्य सर्वं तत्रैव संस्थिताः॥**
**सदा शिवशिवेत्येवं वदन्तः शिवतत्पराः।**
**शिवार्पितमनःकाया वाचः शिवपरायणाः॥**
**शिवोऽपि तान्मुहुः पश्यन्नास्ते चिन्तासमाकुलः।**
**कथमेभ्यः प्रदास्यामि मुक्तिमित्यतिदुःखितः॥**
**तत्रैवास्ते गणैस्सार्धं मुनिभिश्च सुरासुरैः।**
**एवं वसति भूलोकमाजगाम चतुर्मुखः॥**

1. म.आनु.514
2. साधारणं स – इति पाठभेदः ।
3. रा.उ.4
4. नृ.पु.65.12
5. अग.सं.7.3-26
6. सर्वदासौ शिवस्तत्र –पाठभेदः । (अग.सं.7.3)

तमीश्वरो निरीक्ष्यैव सम्भ्रमेणाकरोत् प्रियम्।
बहु सम्भावयामास यद्धितं तन्निवेदयत्॥
ततस्स प्राह भगवानीश्वरस्तं चतुर्मुखम्।
कुशलं ननु ते ब्रह्मन् चिराय त्वमिहागतः॥
श्रीमदागमनेनाहं लोकपूज्योऽस्म्युपासकाः।
समाराध्येह मां मुक्तिं प्रार्थयन्ते मुमुक्षवः॥
केनोपायेन तेषां तत्फलं दास्यामि तत्त्वतः।
ईश्वरेणैवमुक्तस्सन् द्रुहिणोऽपि बभाण ह॥
अस्त्युपायो गोपनीयः प्रादाद्यन्मे रघूत्तमः।
तपः कृत्वा चिरायाहं तं वरं लब्धवान्परम्॥
ततोऽन्यो मदभिज्ञातो नास्त्युपायो महेश्वर।
महामन्वग्रहीद्रामो न सन्देहोऽस्ति तत्र च॥
ईश्वरः - ‘अथ किं मे वदस्वेदं त्वं मां यद्यनुकम्पसे।
अगस्त्यः - स तेनाभिहितो दध्यौ क्व कदा युक्तमित्यपि॥
पुण्ये तीर्थे च गङ्गायां मेषार्के सूर्यपर्वणि।
तस्मै मन्त्रवरं प्रादान्मन्त्रराजं षडक्षरम्॥
नियतस्सोऽपि तत्रैव जजाप वृषभध्वजः।
मन्वन्तरशतं भक्त्या ध्यानहोमार्चनादिभिः॥
ततः प्रसन्नो भगवान् रामः प्राह त्रिलोचनम्।
वृणीष्व यदभीष्टं ते देवानामपि दुर्लभम्॥
तदेवेह प्रदास्यामि माचिरं वृषभध्वज।
ततस्तमब्रवीद्विष्णुमीश्वरः परया मुदा॥
दर्शनेनैव ते धन्याः कृतार्थो वै ममेप्सितम्।
एते मदीयास्सर्वेऽपि मां परं पर्युपासते॥
मुक्त्यर्थं तत्कुरुष्वैषां तदेवाभिहितं मम।
नातः परतरं किञ्चित् प्रार्थितं मम विद्यते॥
एवं वदति तत्रैव तदानीं तदुपासकाः।
सर्वे ज्योतिर्मयास्सन्तो विष्णावेव लयङ्गताः॥

ततः प्रोवाच रामस्तं पुनरिष्टं यदस्ति ते।
ब्रूहीश्वरात्र तद्दास्ये प्रार्थनादुर्लभञ्च यत्॥
इत्युक्तः स पुनर्वव्रे हितकृत् भक्तवत्सलः।
सर्वलोकोपकाराय सर्वेषामपि दुर्लभम्॥
ये च स्वतोऽन्यतो वापि यत्र कुत्रापि वा प्रभो।
प्राणान्परित्यजन्त्यत्र मुक्तिस्तेषां फलं भवेत्॥
गङ्गायां वा तटे वापि यत्र क्वचन वा पुनः।
म्रियन्ते हे प्रभो देहि मुक्तिर्नतो [1]वरान्तरम्॥'

श्रीरामः - [2]'क्षेत्रेऽत्र तव देवेश यत्र कुत्रापि वा मृताः।
कृमिकीटादयोऽप्याशु मुक्तास्सन्तु न चान्यथा॥
त्वत्तो वा ब्रह्मणो वापि ये लभन्ते षडक्षरम्।
जपन्तो मन्त्रसिद्धाः स्युः स्मृत्वा मां प्राप्नुवन्ति ते॥
क्षेत्रेऽस्मिन् योऽर्चयेत् भक्त्या मन्त्रेणानेन शङ्कर।
अहं सन्निहितस्तत्र पाषाणप्रतिमादिषु॥
मुमूर्षोर्दक्षिणे कर्णे यस्य कस्यापि वा स्वयम्।
उपदेक्ष्यसि मन्मन्त्रं स मुक्तो भविता शिव॥
इत्युक्तवति देवेशे पुनरप्याह शङ्करः।
महान् ममाभिमानोऽत्र क्षेत्रे त्रैलोक्यदुर्लभे॥
फलं भवति देवेश सर्वेषां मुक्तिलक्षणम्।
मुमुर्षूणां तु सर्वेषां दास्ये मन्त्रवरं परम्॥
इत्येवमीरितो विष्णुस्तस्मै दत्वा वरान्तरम्।
यदभीष्टं पुनस्तस्य तत्रैवान्तरधीयत॥
तदादि तदभून्मुक्तिक्षेत्रं त्रैलोक्यपावनम्।
तत्र तिष्ठन्ति ये भक्त्या यावज्जीवन्नियम्यते॥,
[3]'मुक्तिभाजो भवन्त्येव सत्यं सत्यं न चान्यथा।'

---

1. वरान्तकम् इति पाठभेदः ।
2. अग.सं . 7. 29 . 36
3. अग. सं . 7 . 36

तस्मात् पुरोडाशावरुद्धे यागे 'व्रीहिभिर्यजेते'ति साधनसाधनतया व्रीह्युपदेशवत् शतरुद्रीयेणामृतत्वमित्युपदेशः साधनसाधनतयैव युक्तः। जप्यस्य ज्ञानसाधनत्वञ्च प्रसादद्वारा। एकर्षिशब्दाच्चास्य भगवत्परत्वम्। [1]'एकर्षिं श्रद्धयन्त' इत्युक्तार्थस्य [2]'भागवतेन चेतसे'त्यस्यामेव श्रुतौ भगवत्परार्थकतया शङ्करादिव्याख्यातेन भागवतशब्देनाभिधानात् स्थानप्रमाणात् भगवच्छब्दस्थानापन्नैकर्षिशब्दो विष्णुपर एव हि युक्तः। किञ्च 'य इमा विश्वा भुवनानि जुह्वदृषिर्होता निषसादापिता न' इत्यनुवाके ऋषिर्होतेति ऋषित्वस्य विश्वभुवनहोमलक्षणसंहार-कालावस्थानेन, 'यो देवानां नामधा एक एव ' इत्येकशब्देनैकत्वस्य नारायण एवाभिधानात् स एवात्रैकर्षिः। तस्यानुवाकस्य नारायणपरत्वञ्च 'अजस्य नाभावध्येकमर्पितं यस्मिन्निदं विश्वं भुवनमधिश्रितमि'ति श्रुतिसमर्पितात् विश्वभुवनस्रष्टृकमलासनप्रसूतिनाभिपद्मत्वलिङ्गात्—

**[3]'अजस्य नाभावध्येकं यस्मिन् विश्वं समर्पितम्।**
**पुष्करं पुष्कराक्षस्य तस्मै पद्मात्मने नमः॥'**

इति शान्तिपर्वगतभीष्मस्तवराजाध्यायवचनेन [4]'अस्य नाभ्यां पुष्करं सम्प्रसूतं यत्रोत्पन्नः स्वयमेवामितौजा 'इत्यानुशासनिकस्थवासुदेवमाहात्म्याध्यायवचनेन चोपबृंहितादवगम्यते। वासुदेवमाहात्म्याध्याये च छान्दोग्यैतरेयतैत्तिरीयाद्यनेकश्रुत्युपबृंहणरूपे 'अस्य नाभ्यामि'त्युदाहृतवचनेन 'अजस्य नाभावध्येकमि'ति वाक्यस्योपबृंहणं कृतम्। ततः तदन्तर्गत'यो देवानां नामधा एक एव','ऋषिर्होता निषसादे'ति [5]वाक्यस्थ-एकर्षिशब्दौ बृहदारण्यकेशावास्यमुण्डकश्रुतिगतमेकर्षिशब्दञ्च उपबृंहयितुमिदं वचनम् [6]'तमेवाहुः ऋषिमेकं पुराणं स विश्वकृद्विश्वविदात्मभावादि'ति। तत्रावधारणेन भगवदसाधारण्यसिद्धेरपि स एवात्रैकर्षिः श्रद्धाविषय उक्तः।

न च वाजसनेयके [7]'ईशावास्यमिदं सर्वमि'ति सर्वान्तःप्रवेष्टृत्वेनोपक्रान्तस्य ईशस्य [8]'पूषन्नेकर्षे'त्युपसंहारे एकर्षिशब्देनाभिधानात् रुद्र एवैकर्षिरिति वाच्यम्। 'ईष्ट इतीट्, तेन ईशा आवास्यं व्याप्यमिदं सर्वमि'ति शङ्करेण तस्य व्याख्यानात् ईशशब्दाभावात्।युक्तं चैतद्व्याख्यानम्। ईशशब्दसमासे विभक्तिलोपलक्षणाकल्पनापत्तेः।

---

1. मु.उ.3.2.10
2. मु.उ.2.2.3
3. महा.शान्ति.47.59
4. महा.आनु.158.9
5. वाक्यशब्दावेकर्षिशब्दौ इति पाठभेदः ।
6. महा.आनु.632
7. ई.उ.1.1
8. ई.उ.1.16

[1]'तदेजति तन्नैजति तद्दूरे तद्वदन्तिके।तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत' इत्याद्यग्रिमवाक्येषु तच्छब्दैः समासान्तर्गतोपसर्जनपरामर्शानाञ्जस्यात् नपुंसकलिङ्गेन परामर्शयोगाच्च पूषञ्छब्दसामानाधिकरण्याच्चायमेकर्षिशब्दो भगवत्पर एव युक्तः। भगवत एवादित्यान्तर्वर्तित्वस्य समर्थयिष्यमाणत्वात्। तस्मादयमेव निर्देशः सर्वत्रैकर्षिशब्दं भगवत्परं स्थापयति। तथा [2]'तेनेदं पूर्णं पुरुषेण सर्वम्', [3]'पुरुष एवेदं सर्वम्', [4]'पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मे'ति महोपनिषत्पुरुषसूक्तसुबालोपनिषत्प्रत्यभिज्ञानाच्च पराविद्या नारायणनिष्ठा। तथा [5]'आयम्य तद्भागवतेन चेतसे'ति भागवतशब्दस्य भगवत्प्रवणत्वपरत्वात् उपास्यदेवताभक्तेः विद्यानिष्पादकत्वात् भगवच्चेतसा निष्पाद्यत्वरूपाल्लिङ्गादपि भगवन्निष्ठा कारणत्वलिङ्गाच्च। उपसंहृतञ्च जगत्कारणत्वं महोपनिषदादिभिर्नारायण इति वक्ष्यते। उपबृंहणानि चोक्तानि। श्रीविष्णुस्मृतौ च 'मुमुक्षुध्येयमक्षरं भगवान् वासुदेव'इति दर्शितम्। तत्र योगविधौ [6]'भगवन्तं वासुदेवं किरीटिनं गदिनं श्रीवत्साङ्कं वनमालाविभूषितोरस्कं सौम्यरूपं चतुर्भुजं शङ्खचक्रगदापद्मधरं चतुर्भुजं ध्यायेत्', [7]'यद्यद्ध्यायति तत्तदवाप्नोतीति ध्यानगुह्यम्', [8]'तस्मात् सर्वमेव क्षरं त्यक्त्वाऽक्षरमेव ध्यायेत्', [9]'न च पुरुषं विना किञ्चिदक्षरमस्ति', [10]'तं प्राप्य मुक्तो भवती'ति।हरिवंशेऽपि पौष्करप्रादुर्भावे वेदान्तेष्वक्षरमिति ब्रह्मेति च नारायण एवोच्यत इत्याशयेनोक्तम् –

**'प्रच्छाद्य सलिलेनोर्वीं हंसो नारायणायते।'**

**[11]'महतो रजसो मध्ये महार्णवसमस्य वै।**

**विरजस्को महाबाहुरक्षरं ब्रह्म यं विदुः॥ इति।**

**इति ब्रह्मविद्याविजयेदेवतान्तरस्य परविद्यावेद्यत्वभङ्गः प्रथमः॥**

---

1. ई.उ.1.5
2. महा.ना.उ.10.4
3. पु. सू.1
4. मु.उ.2.1.4
5. मु.उ.2.2.3
6. वि.स्मृ.97.10
7. वि.स्मृ.97.11
8. वि.स्मृ.97.12
9. वि.स्मृ.97.13
10. वि.स्मृ.97.14
11. ह.पु.3.10.2

## 2. देवतान्तरस्यान्तरादित्यविद्यावेद्यत्वभङ्गः

एवं पुरुषश्रुतिमती अन्तरादित्यविद्यापि भगवत्यनुरक्ता। तथा हि - अन्तरादित्यविद्या छान्दोग्ये श्रूयते, [1]'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते, हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णः। तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम, स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदे'ति। अत्र 'य एषोऽन्तरादित्ये'त्यादित्यमण्डलान्तर्वर्तिपुरुषस्य अप्राप्तत्वात् 'वचनानित्यपूर्वत्वादि'ति न्यायेनाग्नेयादिवद्विधिपरम्।'तत्रैष दृश्यते'इत्युपासकदर्शनानुवादः। अत्र पुरुषश्रुतिः पुण्डरीकाक्षाभिधानयोगाधीनतत्प्रत्यभिज्ञापुण्डरीकाक्षत्वाक्षिद्वित्वसुवर्णवर्णत्वापहतपाप्मत्वलिङ्गैः भगवदसाधारण्यसिद्धिः। पुण्डरीकाक्षत्वं पिङ्गाक्षत्वं व्यावर्तयत् भगवल्लिङ्गम्। सिताम्भोजं हि पुण्डरीकमित्युच्यते।

ननु [2]'तस्य यथे'ति वाक्ये किञ्चिद्द्वित्वस्य विधिः उतानुवादः? नाद्यः, विधेयभेदाद्वाक्य-भेदप्रसङ्गात्। किञ्चानुवादत्वे हि भगवत एवादित्ये विधानात् तेनार्थप्राप्तस्य द्वित्वस्यानुवादः। त्र्यक्षस्य विधाने तदनुरोधेनाक्षित्रयानुवादः स्यादित्येवं देवतान्तरनिरासः स्यात्। विधौ त्वपूर्वरूपविधानात् न देवतान्तरनिराससम्भवः। न द्वितीयः, उद्देश्यविशेषणतयाऽविवक्षिततत्वादिति चेन्न, वाक्यभेदप्रसङ्गेनास्यानुवादत्वात्।

न चाविवक्षाप्रसङ्गः, अबोधकत्वविवक्षायां ग्रहैकत्वेऽपि तदसिद्धेः। तत्र हि 'ग्रहं सम्मार्ष्टी'ति विहितसम्मार्गस्य दृष्टहविर्लेपनिर्हरणार्थत्वात्, तदाकाङ्क्षाया ग्रहमात्रसाधारणत्वात् संख्याया अनाकाङ्क्षिततत्वाच्च तावद्ग्रहबोधनसमर्थस्य ग्रहशब्दस्य यवेषु वैतुष्यलक्षण-द्वाराकाङ्क्षाबलात् 'व्रीहीनवहन्ती'त्यत्र व्रीहिपदस्य नियोगीयसतुषद्रव्यलक्षकत्वसिद्ध्या कैमुतिकन्यायेन ग्रहमात्रपरत्वसिद्धेः बहुष्वेकत्वस्यापि सत्त्वात् विभक्त्या तदनुवादः। सत्वबोधकत्वमेव बाधकाभावात्। [3]'तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नश्रुबिन्दव' इत्यत्रापि रावणाक्ष्णां निर्ज्ञातविंशतिसंख्याकत्वेन ग्रहेष्विव संख्याया अनाकाङ्क्षिततत्वात् द्वित्वविधाने वाक्यभेदप्रसङ्गात्, क्रोधस्य साधारणहेतुत्वाच्च [4]प्रतिमुखप्राप्ताक्षिद्वित्वानुवादः। तस्मादिहापि अबोधकत्वमनिवार्यम्। अस्तु वा 'ग्रहं सम्मार्ष्टी'त्यत्रैकत्वावबोधः। तदबोधेऽपि कर्मत्वावगमाय

---

1. छा.उ.1.6.6-7
2. छा.उ.1.6.6-7
3. वा.रा.5.42.23;6.92.23
4. प्रतिमुखहस्ताक्षिद्वित्वानुवादः इति पाठभेदः ।

द्वितीयायाः सार्थत्वात्। इह तु द्वित्वानवगमेन[1] विभक्तेः प्रयोजनं न किञ्चित्।

न च साधुताप्रयोजनम्, तदैकवचनस्यैव प्रसङ्गात्। देवतानिर्धारणार्थसंख्याया अनाकाङ्क्षितत्वाच्चात्र द्वित्वानुवादो वर्जनीयः। अतोऽत्रादित्यमण्डलान्तस्त्र्यक्षस्य विधाने त्रित्वानुवादप्रसङ्गेन द्वित्वानुवादोऽयं भगवन्तं पुण्डरीकाक्षमेवादित्यमण्डलान्तर्वर्तिनं स्पष्टमाचष्टे।

नन्वक्षित्रये सत्यप्येकस्य मुकुलितत्वात् द्वयोरेवाक्ष्णोः रविकरविकसितपुण्डरीकसादृश्यविधानसम्भवः। अतस्त्र्यम्बकपरत्वेऽपि नानुपपत्तिरिति चेन्न। तथा सत्यक्षित्रयस्यैव प्राक् रुद्रे ज्ञाततया द्वयोरेव पुण्डरीकसादृश्यसिद्धये तृतीयव्यावर्तनायाक्षिणि सादृश्यं विधाय 'ते च द्वे' इति द्वित्वस्य विधेयतया वाक्यभेदप्रसङ्गात्।

न चैतदपि वा अभ्युपगन्तुं योग्यम्। पूर्वं विभक्त्यर्थं विहायैवान्वयबोधः, अनन्तरं विभक्त्यर्थविशिष्टान्वयबोध इत्येवं विरम्यव्यापारप्रसङ्गात्। द्वित्वस्य विधानेऽपि न दोषः, उत्सर्गानुरोधेनैव विधानोपपत्तेः। भगवतो ह्यक्षिद्वयम्, रुद्रस्य तु तत्त्रयञ्चोत्सर्गप्राप्तम्। [2]'आप्रणखात् सर्व एव सुवर्ण' इत्युक्तं सुवर्णत्वञ्च 'हिरण्यज्योतिः [3]सरिरस्य मध्ये' इत्येतत्प्रत्यभिज्ञया भवगल्लिङ्गम्। [4]'स एष सर्वेभ्यः पाप्मभ्य उदित' इत्यपहतपाप्मत्वमुच्यते। तच्च [5]'एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण' इति भगवद्धर्मतयावगतम्। 'अनपहतपाप्मा वाऽहमस्मि नाम मे धेही'ति रुद्रस्यानपहतपाप्मत्वश्रवणात् भगवदसाधारण्यसिद्धिः। नामाष्टकश्रवणादग्निपरत्वं न शङ्कार्हम्। जन्मश्रवणाच्च रुद्रस्य कर्मवश्यत्वमवर्जनीयम्। भगवज्जन्मनः कर्मकृतत्वाभावः [6]'अजायमानो बहुधा विजायते। तस्य धीराः परिजानन्ति योनिमि'त्यादिभिः श्रुतिभिः [7]'नैष गर्भत्वमापेदे न योन्यामवसत् प्रभुः','इच्छागृहीताभिमतोरुदेह' इत्यादिभिरवगम्यते।

किञ्च पूर्ववाक्ये [8]'अथ यदेतदादित्यस्य शुक्लं भास्सैवर्क्; अथ यन्नीलं परः कृष्णः तत्साम। तदेतदेतस्यामृच्यध्यूढँ साम तस्मादृच्यध्यूढँ साम गीयते। अथैतदेवैतदादित्यस्य

---

1. द्वित्वावगमेन इति पाठभेदः ।
2. छा.उ.1.6.6
3. सलिलस्य इति पाठभेदः ।
4. छा.उ.1.6.7
5. सु.उ.7
6. पु.सू.
7. महा.सभा.38,पृ.सं.944
8. छा.उ.1.6.5

शुक्लं भास्सैव सा अथ यन्नीलं परः कृष्णः तदमस्तदमस्तत्सामे'त्यादित्यान्तर्वर्तिर्भगवानेवेति स्पष्टमवगम्यते।

अत्र 'अथ यन्नीलमित्येतत्' 'अथ यदादित्ये नील'मिति शङ्करेण व्याख्यातम्। नीलं नीलद्रव्यम्, तत् किमित्याकाङ्क्षायान्तु व्याचष्टे - परः कृष्ण इति। परमात्मा कृष्ण इत्यर्थः। 'परं कृष्ण'मिति पाठे लिङ्गव्यत्ययश्छान्दसः। एवं श्रुत्यैव भगवत्त्वावगतिः। यदि कृष्णशब्दः कृष्णद्रव्यपरः परशब्दश्च कार्ष्ण्योत्कर्षपरः, तत्र च लिङ्गव्यत्ययश्छान्दसः, तदा इदं लिङ्गम्। अस्मिन् पक्षे परकृष्णपदयोर्न किञ्चित्प्रयोजनं दृश्यते। तस्मात् प्रथमपक्ष एव ज्यायान्। पूर्वत्र 'सर्वे त्रयमि'त्यादिना पृथिव्यादिकन्निर्दिश्य 'सैवर्क्' 'तदमे'त्याद्युक्तम्। अतोऽत्रापि 'अथ यन्नीलं तत्साम तदमे'त्येतावत्येव वक्तव्ये परः कृष्ण इत्यतिरिच्यते। तत इदमिह विज्ञायते पूर्वमेकेनैव पदेन पदान्तरनिरपेक्षेण द्रव्यविशेषसमर्पणान्न तत्र पदान्तरप्रयोगः। इह तु नीलपदे द्रव्यविशेषाप्रतीतेः तत्प्रतीत्यर्थं परः कृष्ण इत्युच्यते। द्रव्यविशेषप्रतीत्यर्थमेव 'शुक्लं भा' इत्यत्र भाश्शब्दः। तस्य द्रव्यविशेषप्रतीत्यर्थत्वादेव इयमित्यस्य सामान्यशब्दत्वेऽपि प्रयोगप्राचुर्येण द्रव्यविशेषप्रतीतेर्न पदान्तरप्रयोगः। अतो द्रव्यविशेषप्रतीत्यर्थमेवेदं विवरणं 'परः कृष्ण' इति। उपबृंहिता चैषा विद्या योगार्णवे –

**'आदित्यमण्डले तत्र पश्येद्विष्णुं परात्परम्।**
**सर्वाधारं वासुदेवमीशानं शिवमच्युतम्॥**
**आत्मानं सर्वजगतां पुरुषं हेमरूपिणम्।**
**हिरण्यश्मश्रुकेशञ्च हिरण्मयनखं हरिम्॥**
**कप्यासपुण्डरीकाक्षं सृष्टिस्थित्यन्तकारणम्।**
**पद्मासनस्थितं सौम्यं प्रबुद्धकमलेक्षणम्॥**
**ईश्वरं सर्वभूतानां सर्वलोकाभयप्रदम्।**
**विजानन्तं सदा सर्वं धारणाद्धर्ममुत्तमम्॥**
**भासयन्तं जगत्सर्वं भासयन्तं रविं सदा।**
**त्रयाणां परमं नित्यं भास्करं भास्करोपरि॥**
**एवं भूतं परं ज्योतिर्दृष्ट्वा लोकैकसाक्षिणम्।**
**बिन्दुनादात्मकं देवमविकारमवस्थितम्॥**
**उकारप्रतिपाद्यञ्च भिन्नवद्बहुधा स्थितम्।**
**ध्यानेनानेन सौरेण मुक्तिं यास्यन्ति योगिनः॥'** इति।

तैत्तिरीयमहोपनिषदि चादित्यान्तर्वर्तित्वं भगवत एव श्रूयते - [1]'य एषोऽन्तरादित्ये हिरण्मयः पुरुष' इति। एतस्य च नारायणपरत्वं पूर्वस्मिन् नारायणानुवाके तस्य प्रकृतत्वादवगम्यते। किञ्च[2] 'स यश्चायं पुरुषे। यश्चासावादित्ये। स एक' इति पुरुषे आदित्ये च वर्तमानत्वेन प्रसिद्धवन्निर्दिष्टस्याभेदः श्रूयते। नारायणानुवाके तदनन्तरानुवाकेन च तदपेक्षिता प्रसिद्धिरादेया सन्निधानात्। [3]नारायणानुवाके च नारायणः पुरुषान्तर्वर्ती श्रुत इति तस्यैवादित्यान्तर्वर्तितयाऽ-भिधानौचित्याच्च नारायणपरत्वम्। [4]'ऋतं सत्यमि'ति मन्त्रश्च भगवत्परतया [5]निर्णीते अम्भसीत्यनुवाके श्रुतेन [6]'तदेवर्तन्तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनामि'त्यनेन वाक्येन व्याख्यातत्वात् [7]'ऋतं सत्यं परं ब्रह्म पुरुषं नृकेसरिविग्रहं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षं शङ्करं नीललोहितम्। उमापतिः पशुपतिः पिनाकी ह्यमितद्युतिः। ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानां ब्रह्माधिपतिः ब्रह्मणोऽधिपतिः'इति तापनीयानुसारात्,

**'तन्मध्ये दहराकाशं तन्मध्ये सूर्यमण्डलम्।**
**तन्मध्ये परमानन्दं वपुषा कृष्णपिङ्गलम्।**

नारायणं जगन्नाथं वासुदेवमनामयमि'ति योगार्णववचनानुरोधात् विश्वरूपशब्दस्य भगवति रूढत्वाच्च नारायणपरः। तापनीये चोमाशब्दो लक्ष्म्यात्मकसकलजगत्सृष्टिमूलभूत-भगवद्बुद्धिशक्तिपरः। वाराहे [8]'पूर्वं नारायणस्त्वेको नासीत् किञ्चिद्धरेः परमि'त्यादिना [9]'एको ह वै नारायण आसीदि'त्याद्युपनिषदर्थमनुक्रम्य [10]'तस्य द्वितीयमिच्छन्तश्चिन्ता बुद्ध्यात्मिका बभावि'ति प्रकृतायां लक्ष्म्यात्मिकायां बुद्धौ [11]'उमेति संज्ञया सा तु तदादित्ये व्यवस्थिता', [12]'ओमित्येकाक्षरी भूत्वा ससृजे सा भुवन्तु से'त्युमासंज्ञकत्वाभिधानात्। पिङ्गलत्वञ्च लक्ष्मीभूषाम्बरायुधैरुपपन्नम्। सपत्नीकस्य हृदयाकाशेऽवस्थानञ्च [13]'इन्धो वै नामैष योऽयं

1. म.ना.उ.12.2
2. तै.उ.2.8.1;3.10.4
3. म.ना.उ.11.1.6
4. म.ना.उ.12.1
5. निर्णीयते इति पाठभेदः ।
6. म.ना.उ.1.6
7. नृ.पू.ता.उ.1.1.6
8. व.पु.9.2
9. महो.उ.1.1
10. व.पु.9.3
11. व.पु.9.4
12. व.पु.9.5
13. बृ.उ.6.2.2-3

दक्षिणेऽक्षिन् पुरुषस्तं वा एतमिद्धं सन्तमिन्द्र इत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः। अथैतद्वामेऽक्षिणि पुरुषरूपमेषाऽस्य पत्नी विराट्। तयोरेष सँस्थावो य एषोऽन्तर्हृदय आकाश' इति बृहदारण्यकवाक्यादवगम्यते। इह चोक्तमिन्द्रशब्देन परोक्षाभिधानम्, [1]'राडसि बृहती श्रीरसीन्द्रपत्नी धर्मपत्नी'ति काठके श्रीदेव्यामिन्द्रपत्नीति प्रयोगाद्भगवतो विष्णोरेवेति गम्यते, भूसूक्ते च 'विष्णुपत्नीं महीं देवीमि'तिवत् 'नमाम्यच्युतवल्लभामि'तिवच्च 'इन्द्रपत्नीव्यापिनी'ति भूम्यां प्रयोगाच्चावगम्यते। विरूपाक्षत्वञ्च वाराहे तस्मिन्नेवाध्याये [2]'तस्य चिन्तयतोनेत्रात्तेजस्समभवन्महत्', [3]'दक्षिणं वह्निसङ्काशं वामं तुहिनसन्निभमि'ति शीतोष्णत्वेन वैरूप्याभिधानान्निर्व्यूढम्। [4]'ऊर्ध्वरेतमि'ति च रेतेभ्यो विकारेभ्य ऊर्ध्ववर्तिविश्वविकारोत्तीर्णम्, छान्दसः सकारलोप इति भट्टभास्करेण व्याख्यातम्, उपपन्नञ्च। तदैतरेयके [5]'अथातो रेतसः सृष्टिः। प्रजापते रेतो देवाः। देवानां रेतो वर्षम्। वर्षस्य रेत ओषधयः। ओषधीनां रेतोऽन्नमि'ति विकारे प्रयोगात्। न च 'ऋतं सत्यमि'त्यत्र विरूपाक्षशब्दरूढ्या रुद्रपरत्वाशङ्का। तस्य प्रथमान्तस्य ब्रह्मविशेषणत्वेन नपुंसकलिङ्गत्वात् पुंल्लिङ्गस्यैव तत्र रूढत्वात्। व्याचष्टे च तथा भट्टभास्करः।

ननु [6]'सर्वो वै रुद्र' इत्यारभ्य 'नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतये उमापतये नमो नम' इति श्रवणात् तत्र बहुग्रहणस्योपलक्षणत्वेन आदित्यान्तर्वर्तिहिरण्मयपुरुषप्रत्यभिज्ञानाच्च रुद्र एवान्तर्वर्तीति चेन्न। [7]'आदित्यो वा एषः', [8]'आदित्यो वै तेज' इति द्वाभ्यामनुवाकाभ्यामन्तरादित्यविद्यां समबलमभिधाय तदन्ते 'इत्युपनिषदि'त्युपसंहारात् तद्विद्याप्रकरणविच्छेदात् 'हिरण्यबाहव' इति च बहुव्रीहिणा हिरण्यालङ्कृतबाहव इत्यर्थः। 'देवो वस्सविता हिरण्यपाणिः प्रतिगृह्णात्वि'तिवत्, तथा भट्टभास्करेण व्याख्यानात्। अन्यथा लक्षणाप्रसङ्गात्। तस्मान्न प्रत्यभिज्ञा। अतस्सिद्धं भगवानेव तैत्तिरीयमहोपनिषदि आदित्यान्तर्वर्ती श्रूयत इति। तथैव चेयमुपबृंहिता श्रीविष्णुपुराणे। तथाहि-

---

1. तै.ब्रा.3.11.1.20
2. व.पु.9.12
3. व.पु.9.13
4. म.ना.उ.12.1
5. ऐ.उ.2.1.3
6. म.ना.उ.13.2
7. म.ना.उ.12.2
8. म.ना.उ.12.3

[1]'**सर्वशक्तिः परा विष्णोः ऋग्यजुस्सामसंज्ञिता।
सैषा त्रैयी तपत्यंहो जगतश्च हिनस्ति या॥
सैष विष्णुः स्थितः स्थित्यां जगतः पालनोद्यतः।
ऋग्यजुस्सामभूतोऽन्तस्सवितुर्द्विज तिष्ठति॥
मासि मासि रविर्यो यस्तत्र तत्र हि सा परा।
त्रयीमयी विष्णुशक्तिरवस्थानं करोति वै॥'**
[2]'**अङ्गमेषा त्रयी विष्णोः ऋग्यजुस्सामसंज्ञिता।
विष्णुशक्तिरवस्थानं सदादित्ये करोति सा॥'**
[3]'**नोदेता नास्तमेता च कदाचिच्छक्तिरूपधृक्।
विष्णुर्विष्णोः पृथक्तस्य गणः सप्तविधोऽप्ययम्॥'**
[4]'**एवं सा वैष्णवी शक्तिर्नैवापैति ततो द्विज।
मासानुमासं भास्वन्तमध्यास्ते तत्र संस्थितम्॥'** इत्युक्तम्।

अत्र 'सैषा त्रयी तपती'ति 'सैषा त्रय्यैव विद्या तपती'ति वाक्यस्यैव किञ्चिद्विकृतस्य निबन्धनात् शक्तेः ऋग्यजुस्साममयत्ववर्णनाच्च तदुपबृंहणत्वं स्फुटम्। शक्तिशब्दो विग्रहविशेषविशिष्टपरः। [5]'ब्रह्मविष्णुशिवा ब्रह्मन् प्रधाना ब्रह्मशक्तय' इत्यादिषुतथा दर्शनात्। [6]'विष्णोः पृथक्तस्य गण' इत्युक्त्या मण्डलाधिष्ठातृविग्रहविशिष्टाद्विष्णोः पृथक्त्वस्य विवक्षितत्वात् आदित्यान्तर्वर्तिपुरुषो हिरण्मयो विष्णुरिति दर्शितं भवति। स्वरूपात् पृथक्त्वस्यात्रैव पुराणे बहुशो निषेधात्।'मासि मासी'ति वीप्सया 'नापैती'त्युक्त्या च स मासविशेषे विष्णोर्मण्डलाधिकारित्वात् तस्यादित्यान्तर्वर्तितोक्तिः क्वचिदिति मूर्खप्रलापोऽपास्तः। अपि च तैत्तिरीय एव [7]'प्रजापतिरिन्द्रमसृजताऽऽनुजावरं देवानाम्। तं प्राहिणोत्।परेहि। एतेषां देवानामधिपतिरेधीति। तं देवा अब्रुवन्। कस्त्वमसि। वयं वै त्वच्छ्रेयाँसः स्म इति। सोऽब्रवीत्। कस्त्वमसि वयं वै त्वच्छ्रेयाँसः स्म इति मा देवा अवोचन्निति इति। अथ वा इदं तर्हि प्रजापतौ हर आसीत्। यदस्मिन्नादित्ये। तदेनमब्रवीत्। एतन्मे प्रयच्छ। अथाहमेतेषां देवानामधिपतिर्भविष्यामीति'

1. वि.पु.2.11.7-9
2. वि.पु.2.11.11
3. वि.पु.2.11.18
4. वि.पु.2.11.20
5. वि.पु.1.22.58
6. वि.पु.2.11.11
7. तै.ब्रा.2.2.10.1

इत्यारभ्य [1]'तदस्मै रुक्मं कृत्वा प्रत्यमुञ्चत्। ततो वा इन्द्रो देवानामधिपतिरभवदि'ति सूर्यमण्डलान्तर्वर्तितेजसो रुक्ममयग्रैवेयकीकृतस्येन्द्राय प्रदानमुक्तम्। तस्य रौक्माभरणीकरणञ्च प्रतिकृत्यादिरूपेण रुक्माभरणे विन्यासः। तच्च तेजो विष्णुरूपमेवेत्युदाहृतानुवाकार्थप्रत्यभिज्ञापक-पूर्वतापनीयखण्डादवगम्यते। स एष खण्डः 'इन्द्रः किल देवानामानुजावर आसीत्। तं प्रजापतिरब्रवीत्। गच्छ देवानामधिपतिर्भवेदिति। सोऽगच्छत्। तं देवा ऊचुः आनुजावरोऽसि त्वमस्माकं कुतस्तवाधिपत्यमिति प्रजापतिमभ्येत्योवाच। मां देवा ऊचुः अनुजावरोऽसि कुतस्तवाधिपत्यमिति। तं प्रजापतिः सौवर्णैः कलशैरमृतपूर्णैरानुष्टुभाभिः मन्त्रितैरभ्यषिञ्चत्। तत्सुदर्शनेन दक्षिणतोऽरक्षत्। पाञ्चजन्येन वामतः द्वयेनैव सुरक्षितोऽभवत्। रौक्मे फलके सूर्यवर्चसि मन्त्रमानुष्टुभं विन्यस्य तदस्य कण्ठे प्रत्यमुञ्चत्। ततस्स दुर्निरीक्षोऽभवदि'त्यादिः। हरशब्दस्य तेजोवाचित्वञ्च 'ज्योतिर्हर उच्यते','लोका हरांस्युच्यन्त' इत्यादिनैरुक्तवाक्यादिभ्योऽव-गन्तव्यम्। किञ्च [2]'स्वर्णधर्मानुवाकेन महापुरुषविद्यये'ति भागवते एकादशस्कन्धे भगवदर्चायां विनियोगात् 'समुद्रेऽन्तः कवयो विचक्षत' इति तत्रत्यसमुद्रशायित्वलिङ्गाच्च भगवत्परतयासिद्धस्वर्णधर्मानुवाकोऽपि आदित्यान्तर्वर्तित्वे भगवतः प्रमाणम्। तत्र 'अन्तरादित्ये मनसा चरन्तम्', 'मरीचीनां पदमिच्छन्ति वेधसः', 'सप्त युञ्जन्ति रथमेकचक्रम्','अजस्रं ज्योतिर्नभसा सर्पदेती'त्यादिषु परमात्मलिङ्गैः सूर्यान्तर्वर्तिपरमपुरुषाभिधानात्। किञ्चात्र 'स न इन्द्रः कामवरं ददातु''इन्द्रन्निचिक्युरि'त्यादिना आदित्यान्तर्वर्तिनि ब्रह्मनि इन्द्रशब्दोऽभ्यस्यते। अयं च [3]'तं वा एतमिन्धँ सन्तमिन्द्र इत्याचक्षते परोक्षेणे'ति दक्षिणाक्षिहृदयाकाशावस्थितपरमात्म-विषयश्रुतिविवक्षितः परोक्षवादः। स च [4]'राडसि बृहती श्रीरसीन्द्रपत्नी'ति श्रीपतिविषयप्रयोगेण स्वविषयं नीतः विशेषपर्यवसानापेक्षत्वादपि विष्णुपरः। तथाऽऽरुणकेतुके प्रपाठके 'क्वेदमभ्रन्निविशत' इत्यनुवाके अभ्रादीनां निवासप्रश्नोत्तरवाक्ये 'विद्युत् सूर्ये समाहिता।अनवर्णे इमे भूमी। इयञ्चासौ [5]रोदसी'ति सूर्यमण्डलस्य द्यावापृथिवीधारकत्वमुक्त्वा 'किंस्विदत्रान्तरा भूतं येनेमे विधृते उभे' इति। अस्मिन् 'सूर्यमण्डलान्तः किम्भूतं वर्तते यन्मुखेनास्य द्यावापृथिवीधारकत्वमुपपद्येतेति 'गुह्यं महो बिभ्रत्'इति सावित्रवाक्योक्तगुह्यतेजोविषयकप्रश्नमवतार्य 'विष्णुना विधृते भूमी'इत्युत्तरवाक्येन 'सावित्रान्तर्वर्ति गुह्यमहो भगवानेवे'ति व्याख्यातम्। तथा मैत्रायणीयोपनिषदि

1. तै.ब्रा.2.2.10.2
2. भा.पु.11.27.30
3. बृ.उ.6.2
4. तै.ब्रा.3.11.1.20
5. नादसीति पाठभेदः ।

षष्ठे प्रपाठके [1]‘विश्वसृग्वै नामैषा तनोर्भवतो विष्णोर्यदिदमन्नं प्राणो वा अन्नस्य रसो मनः प्राणस्य विज्ञानं मनस आनन्दं विज्ञानस्येत्येवंविदन्नवान् प्राणवान् मनस्वान् विज्ञानवानानन्दवांश्च भवति’ इत्यारभ्य, [2]‘अग्निहोत्रं जुह्वानो मोहजालं भिनत्त्यतः सम्मोहञ्छित्वा न क्रोधान्स्तुन्वानः काममभिध्यायमानः चतुर्जालं ब्रह्मकोशं भिन्दतः परममाकाशमत्र हि सौरसौम्याग्नेयसात्विकानि मण्डलानि भित्वा ततश्शुद्धसत्त्वान्तरस्थमचलममृतच्युतं ध्रुवं विष्णुसंज्ञितं सर्वापरं धाम सत्यकामसर्वज्ञत्वसंयुक्तं स्वतन्त्रं चैतन्यं स्वे महिम्नि तिष्ठमानं पश्यत्यत्रोदाहरन्ति।

**रविमध्ये स्थितस्सोमस्तस्य मध्ये हुताशनः।**
**तेजोमध्ये स्थितं सत्त्वं सत्त्वमध्ये स्थितोऽच्युतः॥**

शरीरप्रादेशाङ्गुष्ठमात्रमणोरप्यणुतरं ध्यात्वाऽतः परमतां गच्छति। अत्र हि सर्वे कामास्समाहिता इत्यत्रोदाहरन्ति। अङ्गुष्ठप्रादेशशरीरमात्रं प्रद्वीपप्रतापवद्द्विधा त्रिधा हि। तद्ब्रह्माभिष्टूयमानं महो देवो भुवनान्याविवेश। ओं नमो ब्रह्मणे नमः’ इत्युक्तम्। तथा –

[3]‘**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**
**सत्त्वं पूषन्नपावृणु सत्यधर्माय विष्णवे।**
**योऽसावादित्ये पुरुषस्सोऽसावहमिति। एष वै सत्यधर्म**’ इति।

अत्र च ‘विष्णव’ इति ‘क्रियार्थोपपदस्य कर्मणि स्थानिनि’ इति चतुर्थी। ‘एधेभ्यो व्रजती’तित् विष्णुं द्रष्टुमित्यर्थः। ‘घटायोन्मीलितं चक्षु’रितिवत् ‘योऽसौ आदित्ये पुरुषः सोऽहमस्मी’ति तदनन्तरसम्भूतदर्शनाभिलापः। बृहदारण्यके तु [4]‘सत्यधर्माय दृष्टये’ इतिपाठादयमेवार्थः। तत्र च सत्यधर्मशब्देन भगवानभिधीयते, सत्यधर्मशब्दस्य भगवत्परतायाः प्रागभिधानात्। सत्यधर्मायेति चतुर्थी। षष्ठ्यर्थे चतुर्थी वक्तव्येति, ‘अहल्यायै जारेति’वत्। इयं चोपनिषद्योगयाज्ञवल्क्येनानुगता –

**‘ईश्वरं पुरुषाख्यं तु सत्यधर्माणमच्युतम्।**
**भर्गाख्यं विष्णुसंज्ञं तु ज्ञात्वाऽमृतमुपाश्नुते॥**
**हृद्व्योम्नि तपति ह्येष बाह्ये सूर्यस्य चान्तरे।**
**अग्नावधूमके ह्येष ज्योतिश्चित्रतरो ह्ययम्॥’** इति।

सावित्रीव्याख्यानावसरे च—

---

1. मै.उ.6.13
2. मै.उ.6.38
3. मै.उ.6.35
4. बृ.उ.7.15.1

**‘सवितुस्तद्वरेण्यं तु सत्यधर्माणमीश्वरम्।**
**हिरण्यवर्णं पुरुषं व्योम तद्विष्णुसंज्ञितम्॥**
**सूर्यमध्ये स्थितस्सोमस्तस्य मध्ये हुताशनः।**
**तेजोमध्ये स्थितं सत्त्वं सत्त्वमध्ये स्थितोऽच्युतः॥**
**सोऽन्नं प्राणो मनश्चैव ज्ञानमानन्द एव च।**
**निमेषादिः क्षणः कालः तस्मादुत्पद्यते यतः॥**
**कालकर्ता ततो ज्ञेयः कालाख्यो विष्णुरव्ययः।**
**एषा विश्वभृतो नाम तनुर्विष्णोस्सनातनी॥**
**अन्नरूपेण विज्ञेया ययेदं धार्यते जगत्।’इति।**

अत्र शब्दतोऽर्थतश्च प्रत्यभिज्ञानात् स्पष्टं मैत्रायणीयश्रुत्युपबृंहणत्वम्। यमस्मृतावपि ‘रविमध्ये स्थित’ इति श्लोकं पठित्वानन्तरम्

**‘एष देवस्तु मर्त्यानां पटैरिव विधीयते।**
**अज्ञानपटसंवीतैरिन्द्रियैर्विषयेप्सुभिः॥**
**[1]एष वै पुरुषो विष्णुः व्याक्ताव्यक्तस्सनातन’**

इति पठितम्। शङ्खस्मृतावपि ‘रविमध्ये स्थित’ इति श्लोकः पठितः। दत्तात्रेयस्मृतौ च दीक्षाविधौ —

**‘योऽसौ विष्णवाख्य आदित्ये पुरुषोऽन्तर्हृदिस्थितः।**
**सोऽहं नारायणो देवः पुरुषो लोकभावनः॥’इति,**

[2]‘योऽसावादित्ये पुरुषस्सोऽसावहमिति’ मैत्रायणीयवाक्यम्, [3]‘योऽसावसौ पुरुषः सोऽहमस्मी’ति बृहदारण्यकेशावास्याम्नातवाक्यञ्चोपबृंहितम्। किञ्च ऐतरेयकब्राह्मणे नारायण एवादित्यमण्डलान्तर्वर्तीति स्पष्टमाम्नायते [4]‘चत्वारः पुरुषा इति बाद्ध्वः। शरीरपुरुषश्छन्दः पुरुषो वेदपुरुषो महापुरुष इति। शरीरपुरुष इति यमवोचाम स एवायं दैहिक आत्मा। तस्य योऽयमशरीरः प्रज्ञात्मा स रसः। छन्दः पुरुष इति यमवोचाम, अक्षरसमाम्नायत एव। तस्यैतस्याकारो रसः। वेदपुरुष इति यमवोचाम, येन वेदान् वेद ऋग्वेदं यजुर्वेदं सामवेदं तस्यैतस्य ब्रह्मा रसः। तस्मात् ब्रह्माणं ब्रह्मिष्ठं कुर्वीत यो यज्ञस्योल्बणं पश्येत्। महापुरुष

1. शंख.स्मृ.7.21
2. मै.उ.6.35
3. ई.उ.1.16
4. ऐ.आ.उ.3.2.3

इति यमवोचाम, संवत्सर एव प्रध्वंसयन्नन्यानि भूतान्यैक्याभावयन्नन्यानि। तस्यैतस्यासावादित्यो रसः। स यश्चायमशरीरः प्रज्ञात्मा यश्चासावादित्य एकमेव तदिति विद्यात्। तस्मात् पुरुषं पुरुषं प्रत्यादित्यो भवति। तदप्येतदृषिणोक्तम् –

**'चित्रंदेवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।**
**आ प्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च॥**

इत्येतामनुविधं संहितां सन्धीयमानां मन्य इति ह स्माह बाद्धवः। एतं ह्येव बह्वृचा [1]महत्युक्थे मीमांसन्ते। एतमग्नावध्वर्यवः। एतं महावृते छन्दोगाः। एतमस्यामेतं दिव्येवं वायावेतमाकाश एतमप्स्वेतमोषधिष्वेतं वनस्पतिष्वेतं चन्द्रमस्येतन्नक्षत्रेष्वेतं सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते। स एष संवत्सरसम्मानश्चक्षुर्मयः श्रोत्रमयश्छन्दोमयो मनोमयो वाङ्मय आत्मा। स य एवमेतं संवत्सरसम्मानं चक्षुर्मयं श्रोत्रमयं छन्दोमयं मनोमयं वाङ्मयमात्मानं परस्मै शंसती'ति शरीरपुरुषादीनां चतुर्णामधिकरणत्वेन प्रज्ञात्मादयो रसा उच्यन्ते। अकारस्यापि सर्ववाक्प्रकृतित्वेन पूर्वोक्तस्य युक्तं विकृतित्वेनोक्तवर्णान्तराधारत्वम्। वेदविदो वेदधारणप्रसिद्धेः ऋग्विशेषे ब्रह्मण्यपि युक्तम्। आदित्ये तु परब्रह्मस्थानत्वं स्पष्टम्। दैहिक इति शरीरपुरुषस्य तच्छब्दवाच्यत्वोपपादकावयवार्थसम्बन्धः कथ्यते। 'अक्षरसमाम्नाय' इत्युक्त्यैव क्षरसमूहात्मकशब्दसम्बन्धो द्वितीयपुरुषस्य लभ्यते। वेदपुरुषे तु 'येन ऋग्वेदं वेदे'ति तृतीयया लभ्यते। महापुरुषशब्दस्तु कर्मधारयः। तत्रैव महच्छब्दस्यात्वविधानात्। ततस्तत्रावयवार्थमहत्त्वयोगः प्रध्वंसयन्नन्यानि भूतानीत्यननोक्तः। संवत्सरशब्दश्च परे ब्रह्मणि वाराहे विंशेऽध्याये आदित्यमण्डलाधिष्ठातरि संवत्सराभिमानिनि विष्णुरूपे प्रसिद्धः [2]'एते मासास्तथादित्याः स्वयं संवत्सरो हरिरि'ति। एते आदित्या मासा मासाभिमानिनो मम्डलाधिकारिणः सर्वमासानुवृत्तसंवत्सराभिमानिनि सर्वमासेष्वधिष्ठाता हरिरित्यर्थः। भारते च सहस्रनामसु [3]'अहस्संवत्सरो वह्निरि'ति संवत्सरशब्दो विष्णोर्नामसु पठ्यते। एवञ्च तस्यैतस्येति संवत्सरात्मा महापुरुष उच्यते। आदित्यशब्दश्च रूढ्या मण्डलं तदभिमानिजीवं वा आहेति तदेव रसशब्देन साधनत्वेनोच्यते। आदित्यशब्दस्य [4]'दित्यदित्यादित्यपत्युत्तरपदाण्य' इति 'ण्य'प्रत्ययान्तत्वमाश्रित्यादित्यान्तर्वर्तिवाचित्वे रूढिहानेः। 'यश्चासावादित्य' इत्यनेनवैरूप्याच्च। 'स यश्चायमशरीर' इत्यनन्तरवाक्ये शरीरात्मरसत्वेनास्मिन्नेव प्रकरणे पूर्वोक्तोऽनूद्यते। पुरुषद्वयव्यवधानात्तच्छब्दः। एतत्प्रकरणस्थत्वादयमिति।'यश्चासावादित्य' इति वाक्येऽनन्तरोक्ते महापुरुषोऽसाविति प्रत्यक्षतया

1. महत्युक्षे इति पाठभेदः ।
2. व.पु.20.5
3. महा.आनु.149.37
4. पा.सू.4.1.85

निर्दिश्यते। उत्तरत्र [1]'एतं ह्येव बह्वृचे'त्येतच्छब्देन संवत्सरत्वेनादित्यान्तर्वर्तितया प्रज्ञात्मतया चोक्तो महापुरुष एव परामृश्यते। महापुरुषशब्दश्च 'महादेवं वा महापुरुषं वार्चयेत्। अथातो महापुरुषस्याहरहः परिचर्याविधिं व्याख्यास्याम' इति बोधायनादिप्रयोगात् [2]'महापुरुषशब्दं स बिभर्त्येष सनातन' इति नारायणीयोपाख्यानादिगतद्वैपायनादिवचनाच्च नारायणासाधारणवाचकत्वेन सिद्धः। इयं चैतरेयश्रुतिः पाद्मपुराणे उपबृंहिता वत्सापहारानन्तरं ब्रह्मस्तोत्रे –

**'त्वं वेदपुरुषो ब्रह्मन् महापुरुष एव च।**
**शरीरपुरुषस्त्वं स्याच्छन्दःपुरुष एव च॥**
**चत्वारः पुरुषास्त्वं हि पुराण पुरुषोत्तम।**
**विभूतयस्तव ब्रह्मन् पृथिव्यग्न्यनिलादय' इत्यारभ्य,**
**'उक्षे महति मीमांस्यमेतत् ब्रह्म प्रचक्षते' इति।**

तथानुशासनिके—

**[3]'तमध्वरे शंसितारः स्तुवन्ति रथन्तरे सामगाश्च स्तुवन्ति।**
**तं ब्राह्मणा ब्रह्ममन्त्रैः स्तुवन्ति तस्मै हविरध्वर्यवः कल्पयन्ति॥'**

**[4]'स पौराणीं ब्रह्मगुहां प्रविष्टः।'** इति।

अत्र [5]'एतं ह्येव बह्वृचा महत्युक्षे मीमांसन्त' इत्यादिवाक्यमुपबृंहितम्।

गायत्री च विष्णोरादित्यमण्डलान्तर्वर्तित्वे प्रमाणम्। तस्याः भगवत्परत्वात्। तथा हि – सवितृशब्दः सहस्रनामसु भगवन्नामतया पठ्यते। [6]'सविता रविलोचन' इति। किञ्च मैत्रायणीयोपनिषदि[7] 'हिरण्मयेन पात्रेण' इति पूर्वोक्तमन्त्रेणादित्यान्तर्वर्तिविष्णुदर्शनप्रतिबन्धकनिवृत्ति-प्रार्थनानन्तरमाम्नायते [8]'यदादित्यस्य मध्येऽक्षिण्यग्नौ चैतद् ब्रह्मैतदमृतमेतद्भर्गः। एतत् सत्यधर्म' इति,'यदादित्यस्य मध्ये उदित्वा मयूखे भवत एतत् सविदेतत् सत्यधर्म एतद्यजुरेतत्तप एतदग्निरेतद्वायुरेतत्प्राण एतदाप एतच्चन्द्रमा एतच्छुक्रमेतदमृतमेतद्ब्रह्मविषयमेतद्भानुरर्णवस्तस्मिन्नेव यजमानाः सैन्धव इव विलीयन्त एषा वै ब्रह्मैकताऽत्र हि सर्वे कामाः समाहिताः 'इति च।

---

1. ऐ.आ.उ.3.2.3
2. महा.मोक्ष.351.9
3. महा.आनु.158.16
4. महा.आनु.158.17
5. ऐ.आ.उ.3.2.3
6. महा.आनु.149
7. मै.उ.6.35
8. मै.उ.6.35

अनया श्रुत्या गायत्रीप्रतिपाद्यं वरेण्यं भर्गो विष्णुरिति व्याख्यातम्। तलवकाराणां श्रुतौ सावित्रीविषये कस्सविता का सावित्रीति खण्डे [1]'तस्या एष तृतीया स्वधियो यो नः प्रचोदयादिति, यज्ञो वै प्रचोदयितेति प्रचोदयिता यज्ञ' इति व्याख्यातम्। यज्ञशब्दश्च 'यज्ञो वै विष्णुरि'ति श्रुतेः, [2]'यज्ञेन यज्ञमयजन्ते'त्यादिप्रयोगात्,'पुरुषो यज्ञ इत्येतत् यत्परं परिकीर्तितमि'ति मात्स्योक्तेः, [3]'यज्ञायाचरतः कर्म कर्मग्रन्थिः विलीयत' इति गीतादप्रियोगात्, कर्मणोऽचेतनस्याप्रेरकत्वात्, आदित्यान्तर्वर्तित्वानुपपत्तेश्च विष्णुपरः। एवं बृहदारण्यके सप्तमप्रपाठके [4]'भूमिरन्तरिक्षं द्यौरित्यष्टावक्षराणी'त्यादिना गायत्र्याः पादत्रयं तुरीयं चाभिधाय 'गायत्र्येतस्मिन् तुरीये दर्शिते पदे परोरजसि प्रतिष्ठिते'ति चतुर्थपादात्मकपरोरजश्शब्दवाच्ये सूर्यान्तर्वर्तिपुरुषे प्रतिष्ठितत्वमुक्त्वा पुनश्च गायत्रीमहिमानमभिधाय आदित्यान्तर्वर्तिपुरुषदर्शनप्रार्थनामन्त्र आम्नातः [5]'हिरण्मयेन पात्रेणे'त्यादिः। स च मैत्रायणीयश्रुतौ [6]'सत्यधर्माय विष्णव' इति पाठाद्विष्णुविषय इत्युक्तम्। [7]परोरजस्त्वं च 'लोका रजांस्युच्यन्त' इति यास्कनिरुक्त्यनुसारात् सर्वलोकेभ्य उपरिस्थितत्वम् -रजोगुणप्रकृतिमण्डलोत्तीर्णत्वं 'क्षयन्तमस्य रजसः पराक' इति विष्णाववगमितं गायत्रीप्रतिष्ठाभूतस्य विष्णुत्वे लिङ्गम्। भागवते भरतचरिते गायत्री, तद्विषयबृहदारण्यकश्रुतिः, अन्याश्च भगवद्वासुदेवपरतयोपबृंहिताः। भगवन्तं हिरण्मयं पुरुषमुज्जिहातेन सूर्यमण्डलेपि उपतिष्ठन्नेतदुवाच - [8]'परोरजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजाने'ति। अत्रैष वादः [9]'स परोरजा इति होवाच य एष तपती'ति काठकश्रुतिम्'उदुत्यंजातवेदसमि'ति श्रुतिम् उक्तबृहदारण्यकश्रुतिं [10]'य एषोऽन्तरादित्ये हिरण्मयः पुरुष' इत्यादितैत्तिरीयच्छान्दोग्यादिश्रुतिञ्चाभिप्रेत्य'परोरजाः', 'जातवेदाः' [11]'हिरण्मयं ' 'पुरुषमि'त्युक्तम्। योगयाज्ञवल्क्ये –

**'ईश्वरं पुरुषाख्यं तु सत्यधर्माणमच्युतम्।**
**भर्गाख्यं विष्णुसंज्ञं तु ज्ञात्वाऽमृतमुपाश्नुते॥'** इति।

---

1. सावि.उ.4
2. पु.सू.7
3. भ.गी.4.23
4. बृ.उ.7.14.1-4
5. बृ.उ.7.15.1
6. मै.उ.6.35
7. भा.पु.4.7.14
8. भा.पु.5.7.14
9. बृ.उ.7.14.6
10. छा.उ.1.6.6
11. भा.पु.5.7.13

गायत्रीव्याख्यानावसरे च —

**'सवितुस्तद्वरेण्यं तु सत्यधर्माणमीश्वरम्।**
**हिरण्यवर्णं पुरुषं व्योम तद्विष्णुसंज्ञितम्॥' इति।**

सनकस्मृतौ —

**'रश्मिज्वालासहस्राढ्यं मण्डलं विपुलं रवेः।**
**तदन्तः शीतलाभं तु सौम्यं सोमस्य मण्डलम्॥**
**स्फुरत्स्फुलिङ्गमनलरश्मिज्वालासहस्रकम्।**
**तस्य मध्ये सुखासीनं तप्तहाटकसन्निभम्॥**
**[2]चतुरङ्गुलमात्रं तु शुकपत्रनिभाम्बरम्।**
**रक्तनेत्राम्बरं रक्तपाणिपादनखांशुकम्॥**
**शङ्खचक्रगदापाणिं श्रीवत्साङ्कितवक्षसम्।**
**एवं ध्यात्वा जपेन्मन्त्रं सावित्रीं नियतश्शुचिः॥'इति।**

संवर्तस्मृतौ च—

**आदित्यमण्डलान्तस्स्थं रुक्माभं पुरुषं परम्।**
**ध्यायन् जपेत्तदित्येव निष्कामो मुच्यते द्विजः॥'इति।**

आग्नेयपुराणे नवमेऽध्याये—

**'ध्यानं यथाग्निनाप्रोक्तं सन्ध्यायाश्च मरीचये।**
**तत्तेऽर्थतः प्रवक्ष्यामि द्विजानां हितकाम्यया॥**
**सन्ध्यासु संस्थितः सूर्यः सूर्यमध्ये स्थितः शशी।**
**चन्द्रमध्ये हुताशस्तु सर्वतेजोमयो हरिः॥**
**अङ्गुष्ठमात्रः पुरुषः सूर्यमध्ये मयोदितः।**
**शङ्करेण तथा दृश्यस्तत्प्रकाशोऽतितेजसा॥**
**स विष्णुर्भुवनाधारो यस्येदं सकलं जगत्।**
**वरेण्यञ्च तत्सवितुर्भर्गो यो भर्गवान् गिरान्॥'**
**'धीशब्दवाच्यो ब्रह्मा च प्रचोदयति सर्वदा।**
**सृष्ट्यर्थं भगवान् विष्णुः सविता [2]स तु कीर्तितः॥**

---

1. चतुराङ्गुष्ठम् इति पाठभेदः ।
2. संप्रकीर्तितः इति पाठभेदः ।

**सर्वलोकप्रसवनात् सावित्री तेन कीर्त्यते।**
**तद्देवत्या यतस्तस्मात् गायत्री सा तु कीर्त्यते॥' इति।**

एवं चायं गायत्र्यर्थः '**नो धियो धर्मादिगोचराः यः प्रचोदयात् तस्य सवितुर्देवस्य तत् प्रसिद्धं वरेण्यं भर्गस्तेजोमयं रूपं धीमही**'ति। तथा चागस्त्यः—

**'यो देवस्सवितास्माकं धियो धर्मादिगोचराः।**
**प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यमुपास्महे॥**'इति।

ननु सवितुर्वरेण्यमित्यन्वयः, अव्यवधानात् तदक्षरं तत्सवितुर्वरेण्यमित्यत्र तथा दर्शनाच्च। अतः कर्तरि षष्ठी। भर्गशब्दश्चाकारान्तः। तलवकाराणां श्रुतौ 'तस्या एष द्वितीयः पादो भर्गमय' इत्युपादानात्, मैत्रायणीयश्रुतौ [1]'**सविता वै देवः योऽस्य भर्गाख्यस्तं चिन्तयामी**'ति दर्शनात्, 'आदित्यान्तर्गतं यच्च भर्गाख्यं वै मुमुक्षुभिरि'ति योगयाज्ञवल्क्योक्तेश्च। भर्गशब्दश्च रुद्रे रूढः। स च धीमहीत्यनेनान्वेति। [2]'सुपां सुलुगि'त्यादिना स्वादेशेन द्वितीयान्तः व्यत्ययेन प्रथमान्तो वा। तदिति च ब्रह्मवाची,'तदिति वा एतस्य महतो भूतस्य नाम भवती'त्यैतरेयश्रुतेः। एवं च 'देवस्य सवितुर्वरेण्यं तेजःप्रदत्वेन समाश्रयणीयं तन्नामानं भर्गं ध्यायामः। यो भर्गो नो धियः प्रचोदयादि'त्यर्थः। उत्तरवाक्यगतत्वाद्यच्छब्दः तच्छब्दानपेक्ष इति,

तन्न। प्रधानभूतभर्गशब्दान्वयसम्भवे उपसर्जनवरेण्यशब्दान्वयायोगात् विशेषणस्याव्यवधायकत्वाच्च। किञ्च सवितुरितिदेवविशेषणं व्यावर्तकत्वात्। ततश्च देवस्येत्यनेनैव वरेण्यशब्दस्य भर्गशब्दस्य वान्वयो वाच्यः। देवस्येत्यनेन च भर्गशब्दस्यैवाव्यवधानमिति तस्यैव तेनान्वयो न्याय्यः। 'यस्सविते'त्यनुक्त्वा 'यो देव' इति वदन्नगस्त्योऽपीममेवार्थमाह।

न च'तदक्षरं तत्सवितुर्वरेण्य'मितिश्रुत्यनुसारात् तथान्वयः। तत्र किं प्रकृतशिवापेक्षया वरेण्यमिति निर्देशः, किं वा गायत्रीस्थभर्गशब्दस्यैवाव्यवधानमिति तस्यैव तेनान्वयो न्याय्यः? यस्सवितेत्यनुक्त्वा भर्गापेक्षया नोभयथापि नपुंसकत्वोपपत्तिः। अतो गायत्रीस्थवरेण्यशब्दस्य द्वितीयान्तस्य भर्गसो विशेषणतया नपुंसकस्यायं विपरिणामेन प्रथमान्ततया निर्देश इत्यास्थेयतया अनेन वाक्येन गायत्र्या सकारान्तभर्गश्शब्दसिद्ध्या 'घट्टकुट्यां प्रभातम्'। ततश्च सवितुर्वरेण्येन भर्गसा वान्वये भगवत्परत्वे न किञ्चिदपि बाधकम्। तथापि 'सविता वै देवः योऽस्यभर्गाख्यस्तं चिन्तयामी'ति मैत्रायणीयश्रुत्या सवितुर्देवस्य भर्गसान्वयस्य दर्शितत्वात् तथैवान्वयः। तस्याः श्रुतेः गायत्र्यर्थपरतया तच्छेषत्वादिदं तु वाक्यं न तत्परम्। किन्तु प्रकृतशिवस्योत्कर्षप्रतिपादनाय गायत्रीवेद्यतापरम्। तस्मात् भर्गसो विशेष्यपदस्य पुरोवादप्रसिद्धस्यानिर्देशेन विशेष्यविवक्षयैव

---

1. मै.उ.6.7
2. पा.सू.7.1.39

विशेषणपदप्रयोगः कृतः। यथा [1]'**बुद्धेरात्मा महान् पर**' इति महत्त्वविशिष्टे आत्मन्युक्ते महतः परमव्यक्तमिति मन्तव्यम्। एवं परोदाहृतवाक्येनैव सकारान्तत्वं सिद्धम्। अत एव मैत्रायणीयश्रुतौ [2]'**यदादित्यस्य मध्ये उदित्वा मयूखे भवत एतत् सवितुर्वरेण्यमेतदमृतमेतद्भर्ग**' इति च नपुंसकलिङ्गेन निर्देशः। यदिति व्याख्येयगायत्रीस्थभर्गश्शब्दलिङ्गग्रहणौचित्यात् 'भर्गस्तद्वरेण्यमुपास्महे' इत्याद्युदाहृतस्मृतेश्च।

न च तलवकाराणां भर्ग इति श्रुतेरकारान्तत्वावगमः। उपक्रमे प्रथमपादार्थकथने [3]'**अग्निर्वै वरेण्यमापो वै वरेण्यं चन्द्रमा वै वरेण्य**'मिति त्रिष्वपि नपुंसकैकवचननिर्देशेन गायत्रीस्थवरेण्यशब्दस्य नपुंसकलिङ्गतावगमात् तन्निर्देशस्य व्याख्येयानुरोधित्वात्। अन्यथा अत्रत्याग्न्यादिशब्दानुरोधे नानालिङ्गवचननिर्देशापत्तेः। गायत्र्याञ्च वरेण्यशब्दस्य विशेष्यलिङ्गत्वात् सकारान्तविशेष्यपदं भर्गमय इति तु भर्गशब्दे सकारं त्यक्त्वा इतरांशेन पादो निरूपितः। दृष्टञ्च पदैकदेशेनापि निरूपितं यथा वारवन्तीयमिति। तत्र हि वारवन्तीयसामयोनिभूतायामृचि 'अश्वं नत्वा वारवन्तमि'ति द्वितीयान्तान्तर्गत(द्वितीयान्त?)वारवन्तशब्देन तद्वतः साम्नो निर्देशः। [4]'**मतौ छः सूक्तसाम्नो**'रिति शब्दवाचिनो मत्वर्थे 'छ'विधानात्। अस्य वामीयं सूक्तमित्याद्यपि द्रष्टव्यम्।

वस्तुतस्त्वत्र 'तस्या एष प्रथमः पादो भूस्तत्सवितुर्वरेण्यमि'ति पूर्ववत् [5]'तस्या एष तृतीयः स्वधियो यो नः प्रचोदयादि'त्युत्तरवच्च 'तस्या एष द्वितीयः पाद' इत्यनन्तरं 'भुवो भर्गो देवस्य धीमही'ति वक्तव्ये भर्गमय इत्यतिरिक्तमाम्नातम्। तस्य चैतत् प्रयोजनम्। 'धियो य' इति पुंलिङ्गानुरोधात् भर्गशब्दोऽयमकारान्तस्तृतीयपादान्वयी, तदिति तु छान्दसमिति तु शङ्क्येत, तन्मा शङ्कि इति,द्वितीयपादान्तर्भाव उच्यते। भर्गमयः भर्गशब्दप्रचुरोऽयं पादः। प्राचुर्यस्य च अर्थतः स्वरूपतश्च तत्रैवान्वयात्, पादस्य विशेष्यस्य शब्दात्मकत्वात् भर्गशब्दो 'मयट्'प्रकृत्यर्थः स्वरसतोऽवगम्यते। भर्गशब्दस्य तृतीयपादान्वयस्य शङ्कितत्वात् तस्यैव द्वितीयपादान्तर्गतेर्वाच्यत्वात् सकारं विना पदैकदेशनिर्देशः कृतः। मुक्तामरकतयोर्मरकताज्ञानात् मुक्तामात्रे चोरेणापहृते तावन्मात्रमेव हि पुनराहर्तव्यम्, न तु मरकतमपि। सान्तत्व एवात्रान्वयोपपत्तिः द्वितीयान्तत्वात्, नत्वकारान्तत्वे इति तात्पर्यतो रुद्रस्य गायत्रीप्रतिपाद्यत्वाभावसिद्धिः। तेजस्त्वसामान्यरूपेणापि

---

1. कठ.उ.3.10
2. मै.उ.6.35
3. सावि.उ.10
4. पा.सू.5.2.59
5. सावि.उ.10

तत्परत्वे अकारान्तत्वेन तृतीयपादान्वयेऽपि तत्परत्वसिद्धिः। तन्निवारणवैय्यर्थ्यात् अन्वयविशेषमात्रार्थत्वस्य अर्थविशेषलाभरूपप्रयोजनवत्त्वे सम्भवति अग्राह्यत्वात्।

न च वाच्यं द्वितीयः पादो भर्गमयः रुद्रमय इति गायत्र्या रुद्रपरत्वज्ञापनं प्रयोजनमिति। गायत्र्या एव रुद्रपरत्वेन पादविशेषे भर्गमयत्वकथनस्य प्रयोजनविशेषाभावेनानुचितत्वात्। विभक्तिव्यत्ययादिकल्पनारहितप्रयोजनसम्भवे तस्यैव ग्राह्यत्वात्। मैत्रायणीयोपनिषदि भर्गाख्यं [1]'**विष्णुसंज्ञं सर्वापरं धामे**'ति दर्शनेन तद्विरोधाच्च।

ननु 'भर्गमय' एवायं न 'भर्गोमय' इत्येवमकारान्तत्वप्रतिपादनार्थमेवेदमिति चेत्, किमयं मयट् स्वार्थिकः उत प्राचुर्यार्थकः? नाद्यः, पदत्रयात्मकस्यास्य पदस्य एकपदरूपत्वोक्त्यसम्भवात्। न द्वितीयः, प्राचुर्योक्तेः प्रयोजनाभावात्। सकारान्तत्वभ्रमवारणार्थं भर्गशब्दसंबन्धमात्रं हि वक्तव्यम्। सिद्धान्ते तु देवतान्तरनिरासः प्रयोजनमित्युक्तमेव।

अथ स्यात् सिद्धान्तरीत्या अस्मिन्नेव पादे अर्थान्वयोऽपीति विवक्षया प्राचुर्यार्थत्वमुपपद्यत इति चेन्न, अकारान्तत्वे उत्तरान्वयस्यैवाभ्यर्हिततत्वादिहैवान्वये विभक्त्यस्वारस्यात्। न चास्मिन् पक्षे तदिति नपुंसकास्वारस्यम्, त्वयैव तस्य ब्रह्मपरत्वाभिधानात्। उत्तरवाक्यस्थयच्छब्दस्य प्रतिनिर्देशकतच्छब्दानपेक्षा चोक्ता। एवञ्च 'देवस्य सवितुर्वरेण्यं तद्धीमहि यो भर्गो नो धियः प्रचोदयादि'त्यन्वयः। एवञ्च न किञ्चिदपि पदमस्वरसम्। तस्मादकारान्तत्वेनोत्तरान्वयो निषेधार्हः। व्यहितान्वयस्य दुष्टत्वान्निषेधे विभक्त्यस्वारस्यमपि परित्याज्यमेवेति कथं तदविनाभूताया अकारान्तताया विधानम्। तस्मात् यादृशसमन्वये गायत्र्याः पदास्वारस्यं व्यवहितान्वयश्च नास्ति, तस्मिन्नेव समन्वये गायत्रीं व्यवस्थापयितुमिदं वाक्यं प्रवृत्तमितीदमुत्तरान्वयनिषेधमुखेन सकारान्तत्वव्यञ्जनार्थमेव। अतो न अकारान्तत्वख्यापनमस्य प्रयोजनमिति युक्तम्। एवं च तलवकारश्रुतिरेव भगवति भर्गशब्दप्रयोगप्रयुक्तरुद्रपरत्वभ्रमवारणाय सकारान्तत्वं ख्यापयितुं प्रवृत्तेन प्रथमपादव्याख्याने भिन्नलिङ्गवचनैर्वरेण्यशब्दस्य नपुंसकैकवचनस्य समानाधिकरण्येन, द्वितीयपादव्याख्याने भर्गशब्दस्य तदन्वयकथनेन, तृतीयपादव्याख्याने यज्ञशब्दस्य प्रचोदयितृत्ववचनेन ततः समस्तां गायत्रीं निर्दिश्य यज्ञस्य वाक्यप्रधानार्थस्य प्रचोदयितृत्ववचनेन ततः समस्तां गायत्रीं निर्दिश्य यज्ञस्य वाक्यप्रधानार्थस्य प्रचोदयितृत्वाभ्यासेन च गायत्री विष्णुपरेति दृढीकरोतीति सर्वमवदातम्। [2]'सविता वै देवः योऽस्य भर्गाख्यस्तं चिन्तयामी'ति मैत्रायणीयश्रुतावपि शब्दैकदेशे आख्याशब्द औपचारिकः छान्दसत्वात्। पूर्वत्रासिद्धत्वाभावो हि परदेवोऽपि भर्गो मुह्यन्तीतिवत् अकारान्तत्वे 'योऽस्य भर्गाख्यस्त'मिति सवितृशब्देनान्वयप्रदर्शनं

---

1. मै.उ.6.38
2. मै.उ.6.7

न स्यात्। न हि सवितुः रुद्र इत्यन्वयः समञ्जसो भवति। भवति सवितुस्तत्तेज इति। किञ्च नहीदं वचनं भगवतो भर्गशब्दवाच्यत्वाय प्रवृत्तम्, किन्तु गायत्रीपदप्रतिपाद्यत्वाय। गायत्र्यां च न विसर्जनीयस्य प्रतीतिरिति 'भर्गाख्यं विष्णुसंज्ञ'मित्यादि निर्देशो युक्त एव।

किञ्चाकारान्तत्वे आद्युदातत्त्वं न स्यात्। [1]'पुंसि संज्ञाया'मिति 'घ'प्रत्ययान्तत्वेनान्तोदात्तत्वात्। 'असुन्'प्रत्ययान्तत्वे तु नित्वादाद्युदात्तत्वं सिध्यति। न च घञन्तत्वेऽपि ञित्वादाद्युदात्तत्वं तस्येति वाच्यम्। [2]'अकर्तरि च कारके' इति वचनात् कर्तरि तदभावात्। न च छान्दसो घञ् स्वरो वा, असुन्नन्ततोपपत्तेः।

**गायत्र्यां चिन्त्यमानायां स मे गोपकिशोरकः।**
**स्वात्मानं दर्शयामास दर्शयन्निव वेद्यताम्॥**

किञ्च सर्गादिसमये महति तमसि ब्रह्मदण्डमभूत्। तच्च तदन्तस्स्थेन ब्रह्मणा भिन्नम्। ब्रह्ममुखादोमिति शब्द उदभूत्। ततो व्याहृतित्रयात्मकं विवस्वत्सवित्रादिपादास्पदं परमं वैष्णवं तेजः प्रादुर्भूतम्। अथ कृतप्रकाशस्य ब्रह्मणो मुखाच्चत्वारो वेदास्तेजसा जाज्वल्यमानाः प्रादुर्भूताः। तेष्वथर्ववेद ऋगाद्यंशैस्त्रिभिः ऋगादिषु त्रिष्वेव लिल्ये। तच्च तेजस्त्रयीमयमेकीभूय परेण तेजसैकीभूतम्। ततो भगवता सवित्रा निजतापचकितचतुर्मुखस्तुतेन तदनुग्रहाय तदुपसंहृतमल्पावशिष्टम्। ततो मरीचिकश्यपदेवासुरादिसर्गे दैत्यपराजितदेवपरीप्सया आदित्यस्तुतः प्रसन्नः स भगवान् सविता स्वसहस्रांशेन सुषुम्नाख्यरश्मिना तद्गर्गतामवाप्य मार्ताण्डादिसंज्ञां लब्ध्वा निरीक्षणेनैव सुरद्विषो भस्मीकृत्य सूर्याधिकारमवापेति मार्कण्डेयेन त्रिनवतितमप्रभृति पञ्चाध्याय्या विशदमुक्तम्[3]। तत्र ब्रह्मस्तुतौ [4]'यज्ञैर्यजन्ति परमात्मविदो भवन्तं विष्णोः स्वरूपमखिलेष्टिमयं विवस्वन्नि'ति। अदितिस्तुतौ च [5]'नमस्तुभ्यं परं सूक्ष्मं पौरुषं बिभ्रते मह' इति तस्यादिसवितुः विष्णुतेजस्त्वस्फुटीकरणात्। अतः तदधिष्ठितत्वमादित्यमण्डलस्य सिद्धम्। अत एव श्रीविष्णुपुराणे –

[6]'**वैष्णवोंऽशः परस्सूर्ये योऽन्तर्ज्योतिरवस्थितः।**
**अभिधायकमोङ्कारं तस्य तत्प्रेरकं परम्॥**'इत्युक्तम्।

1. पा.सू.3.3.118
2. पा.सू.3.3.99
3. मार्क.पु.102.20
4. मार्क.पु.100.10
5. मार्क.पु.101.18
6. अभिधायकमोंकारं तस्य तत्प्रेरकः परः इति पाठभेदः ।

तृतीयांशे याज्ञवल्क्यादित्यस्तोत्रे [1]'ध्येयाय विष्णुरूपाय परमाक्षररूपिण' इति। उदकाञ्जलिविधौ च [2]'नमो विवस्वते [3]ब्रह्मणस्पते विष्णुतेजस' इति।हरिवंशे च घण्टाकर्णस्तुतौ [4]'सूर्यो मां रक्षतां विष्णो नमस्ते सूर्यतेजस' इति। सनकश्चादित्यान्तर्वर्तिनं विष्णुं स्मरति –

**'आदित्यमण्डले ध्यायेत्परमानन्दमव्ययम्।**

**विष्णुं चतुर्भुजं रक्तपङ्कजासनमध्यगम्॥'** इत्यादिना।

नारसिंहपुराणे च—

**[5]'अर्चन्ति मुनयो नित्यं जलेन रविमण्डले।'**

**'आदित्यमण्डले नित्यं देवदेवमनामयम्।**

**शङ्खचक्रगदापाणिं ध्यात्वा विष्णुमुपासते॥',**

[6]'ध्येयस्सदा सवितृमण्डले'त्यादि। अत्र [7]प्रथमार्चनमर्घ्यप्रदानम्। अनन्तरं गायत्रीजपः।अनन्तरं ध्येयाकारविशेषः। आश्वमेधिके च

**[8]'ऊर्ध्वबाहुस्ततो भूत्वा सूक्ष्ममीक्षेत्समाहितः।'**

**[9]'तन्मण्डलस्थं मां ध्यायेत्तेजोमूर्तिं चतुर्भुजम्।**

**उदुत्यन्तु जपेन्मन्त्रं चित्रं तच्चक्षुरित्यपि॥'**

**[10]'सावित्रीञ्च यथाशक्ति जप्त्वा सूक्तञ्च मामकम्॥' इति।**

**अत्रकश्चित्** - कार्तयुगपरधर्मविद्वेषप्रचितमहातमस्तिरस्कृतविवेको दुर्मतिः स्वीयमवैदिकत्वं वैशम्पायनधर्मसूनुजनमेजयप्रभृतिष्वारोपयन् जल्पति। इदं वचनजातं सन्ध्यासु विष्णुभक्तैरादित्य-मण्डले तन्मूर्तिर्ध्येया इत्येतावत्परम्। स विष्णोरादित्यान्तर्वर्तित्वगायत्रीप्रतिपाद्यत्वपर्यन्तं

---

1. वि.पु.3.5.18
2. वि.पु.3.11.40
3. ब्रह्म भास्वते इति पाठभेदः ।
4. ह.पु.3.80.71
5. ना.सि.पु.62.16
6. ना.सि.पु.62.17
7. प्रथमार्धेनार्घ्यप्रदानमनन्तरं इति पाठभेदः ।
8. महा.आश्व.अध्याय-92,पुटम् -1034
9. महा.आश्व.अध्याय-92,पुटम् -1034
10. महा.आश्व.अध्याय-92,पुटम् -1034

स्थापयितुमीष्टे। [1]'ततः षडक्षरादीनि [2]षट्कृत्वः परिवर्तयेदि'ति षडक्षरकृष्णमन्त्रजपविधानदर्शनेन तदनन्तरं तदर्थस्यादित्यमण्डले ध्यानविध्यौचित्यात्। तत्तद्देवतामन्त्रजपानन्तरं तत्तत्पूजनानन्तरञ्च आदित्यमण्डले तत्तद्ध्यानविधेश्च बहुलमुपलम्भात्। अत एवाग्नेयपुराणे विष्णुपूजावसाने 'ध्येयस्सदे'ति श्लोकः पठितः। किञ्चायं वैष्णवधर्मशास्त्रसंज्ञकः कृष्णयुधिष्ठिरसंवादो वैष्णवागमधर्मविधानार्थं प्रवृत्तः, न तु वैदिकधर्मविधानार्थम्।

**'भगवन् वैष्णवा धर्माः किं फलाः किं परायणाः।'**
**[3]'कथं त्वमर्चनीयोऽसि मूर्तयः कीदृशस्तु ते।**
**वैखानसाः कथं ब्रूयुः कथं वा पाञ्चरात्रिकाः॥'**

[4]'एवमेतत् पुरावृत्तम्', [5]'वैष्णवं धर्मशासनमि'त्यादिमध्यान्तवचनोपलम्भात्। उपक्रमे च [6]'श्रुता मे मानवा धर्मा' इति श्रुतेभ्यो वैदिकेभ्यो व्यावर्त्य [7]'युष्मदीयान् वरान् धर्मान् पुण्यान् कथय मेऽच्युते'ति तान्त्रिकधर्माणां पृष्टत्वात् 'मानवा धर्मा' इति हि वैदिका धर्मा एवोच्यन्ते। 'यद्वै किञ्च मनुरवदत्तद्भेषज'मिति श्रुतेः। कूर्मपुराणे व्यासगीतायां वैदिकवर्णाश्रमाचारोपदेशानन्तरं [8]'इत्येष मानवो धर्मो युष्माकं कीर्तितो मये'त्युपसंहारात्। अत आदित्ये विष्णुचिन्तनमपि तन्त्रनिष्ठानामेव कार्यन्न वैदिकानामिति।

**तदिदं** दुराग्रहमुषितप्रकरणार्थावबोधजल्पितम्। यत्तावत् तत्तद्देवतामन्त्रजपानन्तरं तत्तद्देवताया रविमण्डले ध्यानविध्युपलम्भात् षडक्षरमन्त्रजपस्य पूर्वं विधानात् तं प्रतिपाद्य देवताध्यानविधिः तन्मण्डलस्थमामित्यादिरिति, तत्तथैव। किन्तु सावित्रीसौरैकाक्षरीप्रभृतिमन्त्राणामपि पूर्वं जपविधानात् तदर्थस्याप्येतदेव ध्यानविधानमिति ब्रूमः।

वस्तुतस्तु —

**[9]'दर्भेषु दर्भपाणिस्सन् प्राङ्मुखः सुसमाहितः।**
**प्राणायामांस्ततः कुर्यान्मद्गतेनान्तरात्मना॥'**

---

1. महा.आश्व.अध्याय-92,पुटम् -1034
2. षट्श्रुत्वः इति पाठभेदः ।
3. महा.आश्व.अध्याय-92,पुटम् -1036
4. महा.आश्व.अध्याय-92.53
5. महा.आश्व.अध्याय-92,पुटम् -1002
6. महा.आश्व.अध्याय-92,पुटम् -998
7. महा.आश्व.अध्याय-92,पुटम् -998
8. कूम.पु.2.33.145
9. महा.आश्व.अध्याय-92,पुटम् -1033

[1]**'सहस्रकृत्वः सावित्रीं शतकृत्वस्तु वा जपेत्।'**
**समाप्ते तु जपे तस्मिन्[2] सावित्र्या चाभिमन्त्र्य च।**
**मन्देहानां विनाशाय रक्षसां विक्षिपेज्जलम्॥**
**उद्वर्गोऽसीत्यथाचान्तः प्रायश्चित्तजलं क्षिपेत्।'**
[3]**'अथादाय सपुष्पाणि तोयमञ्जलिना द्विजः।**
**प्रक्षिप्य प्रति सूर्यञ्च व्योममुद्रां प्रकल्पयेत्॥**
**ततो द्वादशकृत्वस्तु सूर्यस्यैकाक्षरं जपेत्।**
**ततः षडक्षरादीनि षट्कृत्वः परिकीर्तयेत्॥**
**प्रदक्षिणं परामृश्य मुद्रया सुमुखं तथा[4]।**
[5]**ऊर्ध्वबाहुस्ततो भूत्वा सूर्यमीक्षेत्समाहितः॥**
**तन्मण्डलस्थं मां ध्यायेत्तेजोमूर्तिं चतुर्भुजम्।**
**उदुत्यं तु जपेन्मन्त्रं चित्रं तच्चक्षुरित्यपि॥**
**सावित्रीं च यथाशक्ति जप्त्वा [6]सूक्तं च मामकम्।**
[7]**मामकानि च सामानि पुरुषव्रतमेव च॥**
**ततश्चालोकयेदर्कं हंसश्शुचिषदित्यधि।**
**प्रदक्षिणं समावृत्य नमस्कृत्य दिवाकरम्॥'**
[8]**'ततस्तु तर्पयेदद्भिर्ब्रह्माणं मां च शङ्करम्'** इति।

अत्र कुण्डिनादिग्रन्थेष्विव कृष्णमन्त्रकल्पविधिर्न दृश्यते। अपि तु नित्यसन्ध्योपासन-सावित्रीजपतदुपस्थानादिकमेव। सौरैकाक्षरादिजपवत्तदङ्गतया षडक्षरजपविधिः। अनन्तरं चावसरप्राप्तस्य [9]'दर्भेषु दर्भपाणिस्सन् स्वाध्यायं तु समारभेदि'ति ब्रह्मयज्ञस्वाध्यायविधानात्। तस्मान्न षडक्षरनिष्ठविषयता वक्तुं शक्या।

यत्तु मानवधर्मेभ्यो व्यावर्त्य तान्त्रिकधर्माणां पृष्टत्वादवैदिकमादित्ये चिन्तनमिति, तन्न।

---

1. महा.आश्व.अध्याय-92,पुटम् -1034
2. महा.आश्व.अध्याय-92,पुटम् -1033
3. महा.आश्व.अध्याय-92,पुटम् -1034
4. परामृष्य मुद्रया स्वमुखान्तरे – इति पाठभेदः।(महा.आश्व.अध्या-92, पुटम्1034)
5. और्ध्वबाहुस्ततो इति पाठभेदः ।
6. सूर्यं इति पाठभेदः ।
7. मन्मयानि च नामानि – इति पाठभेदः । (महा.आश्व.अध्या-92, पुटम्- 1034)
8. महा.आश्व.अध्याय-92,पुटम् -1034
9. महा.आश्व.अध्याय-92,पुटम् -1035

[1]'श्रुता मे मानवा धर्मा वासिष्ठाः काश्यपास्तथे'त्यादिनानुक्रान्तानां वासिष्ठकाश्यपयाज्ञ्यवल्क्य-पराशरापस्तम्बशङ्खलिखितादिधर्मशास्त्राणामवैदिकत्वप्रसङ्गात्। अवैदिकत्वे च कथं परमवैदिकस्य धर्मसूनोरत्यादरेण प्रश्नः, कथञ्च —

**'पवित्राः किल ते धर्माः सर्वपापप्रणाशनाः'** इति।

[2]**'एतेभ्यः सर्वधर्मेभ्यो देव त्वन्मुखनिःसृताः।**

**पावनत्वाद्यथार्थत्वात् विशिष्टा[3] इति मे मतिः॥'** इति

च तत्प्रशंसनम्, कथञ्च देवब्रह्मर्षिप्रभृतीनामपि शुश्रूषया समागतानां वासुदेवसौम्यावलोकनपवित्रीकृतानां तच्छ्रवणयोग्यताज्ञापनम्, कथं च युधिष्ठिरस्य -

[4]**'तथा प्रणम्य गोविन्दं तदा प्रभृति पाण्डवाः।'**

[5]**'युधिष्ठिरस्तु धर्मात्मा हृदि कृत्वा जनार्दनम्।'**

**'तद्भक्तस्तन्मनायुक्तस्तद्याजी तत्परोऽभवत्।'**इति भगवदुपदिष्टधर्मनिष्ठताया धर्मात्मताप्रयुक्तताभिधानम्, कथञ्च वैशम्पायनेन जनमेजयस्यापि तस्मिन्नेव धर्मे प्रवर्तनम् 'चिन्तयस्व सदा विष्णु'मित्यादिना, कथञ्च न तद्धर्माभिनिविष्टाः धर्मसूनुवैशम्पायनप्रभृतयो वैदिका भवेयुः। अत एव तादृशानां महतामवैदिकत्वमापादयन् पापिष्ठः स्वयमेव वेदबाह्यस्तद्विरुद्धप्रलापी कथन्न वैदिकैर्बहिष्कार्यः। यथार्थत्वादिति याथार्थ्येन स्मृतिवैलक्षण्योक्त्या स्मृतेरिव श्रुतिविरोधाधीनमप्रामाण्यं नेति सूचितम्। भगवच्छास्त्रप्रतिपाद्येषु श्रुतिविरोध एव नास्ति। तदर्थानामधीतानधीतवेदगम्यत्वादिति भावः।

न च प्रमाणमप्यादित्ये विष्णुचिन्तनविधानं तन्त्रनिष्ठाधिकारिविषयमिति नार्थसाधकमिति वाच्यम्। तथापि तदर्थध्यानस्यैव तन्मन्त्रजपाङ्गत्वेन सावित्रीजपाङ्गध्यानस्य तदर्थविषयत्वावश्यम्भावात् नित्यगायत्रीजपस्यैव स्वाध्यायपञ्चमहायज्ञादिवत् भक्तं प्रत्यपि विधानात्। दृश्यते हि तत्र स्वाध्यायमहायज्ञगोदानभूदानाहिंसासत्यादिधर्मविधिः।

किञ्च नात्र भक्तरूपाधिकारिविशेषोद्देशेन धर्मविधिः मानाभावात्। सावित्रीजपाद्यनन्तरमर्चाविधौ [6]'मद्भक्तो मां समर्चये'दिति भक्तिरपि विधीयते। ब्रह्माण्डे च भद्रदीपप्रतिष्ठाध्याये -

---

1. महा.आश्व.अध्याय-92,पुटम् -998
2. महा.आश्व.अध्याय-92,पुटम् -998
3. पावनत्वात् पवित्रत्वाद्विशिष्टा– इति पाठभेदः।(महा.आश्व.अध्या-92, पुटम्- 998)
4. महा.आश्व.अध्याय-92,पुटम् -1078
5. महा.आश्व.अध्याय-92,पुटम् -1078
6. महा.आश्व.अध्याय-92,पुटम् -1078

**'तस्य रूपं तु भगवान् परब्रह्ममयो हरिः।**
**तेजसाधिष्ठितस्तस्य भानुर्भुवनभासकः।**
**पर्येति मेरुं देदीप्यन् ज्योतिश्चक्रसमन्वित'**

इत्यादित्यान्तर्वर्तित्वं भगवत उक्तम्। वाराहे च –

[1]**'सर्वे देवाः सपितरो ब्रह्माद्याश्चाण्डमध्यगाः।**
**विष्णोः सकाशादुद्भूता[2] इतीयं वैदिकीश्रुतिः॥**
**अग्निस्तथाश्विनौ गौरी गजवक्त्रो भुजङ्गमाः।**
**कार्तिकेयस्तथादित्यो मातरो दुर्गया सह॥**
**दिशो धनपतिर्विष्णुर्यमो रुद्रः शशी तथा।**
**पितरश्चेति सम्भूताः प्राधान्येन जगत्पतेः॥**

'इति विष्णोरग्न्यादीनां प्रतिपदादितिथिदेवतानां सृष्टिं प्रतिज्ञाय क्रमेण विशिष्य तदाख्यानसमये-

[3]**'योऽसावात्मज्ञानशक्तिरेक एव सनातनः।**
**स द्वितीयं यदा ह्यैच्छत् तदा तर्ह्युत्थितोज्वलन्[4]॥'**

इत्यादिना तस्यैव महातेजोरूपेण सम्भवः, तस्य मण्डलशरीरभावः। ततस्सूर्यभास्करप्रभाकरादीनामयोगः,ततो द्वादशादित्यानां पृथक् तत्तेजसा सम्भवः, तस्य तु प्रधानत्वं सर्वदा मण्डले सत्त्वम्,विष्णुरूपत्वं तेजःप्रधर्षितदेवस्तुतेन तादृशमहातेजःप्रशमनं सप्तमीतिथिप्रियतया तस्यां पूजनीयत्वञ्च षड्विंशेऽध्याये[5] प्रपञ्चितम्।

[6]**'लीनीभूतस्य तस्याशु भासोऽभूत्तच्छरीरकम्।**
**पृथक्त्वेन रविस्सोऽथ कीर्त्यते वेदवादिभिः॥**
[7]**भासयन् सर्वलोकांस्तु ततोऽसावुत्थितो[8] दिवः।**
**अतोऽसौ भास्करः प्रोक्तः प्रकर्षाच्च प्रभाकरः॥'**
[9]**'एतस्य द्वादशादित्याः सम्भूतास्तेजसः पृथक्।**
**प्रधान एक एवायं जगत्सु परिवर्तते॥'**

---

1. व.पु.17.23-25
2. विष्णोः सकाशादुत्पन्ना इति पाठभेदः । (व.पु. 17.23)
3. व.पु.26.2
4. तेजः समुत्थितम् – इति पाठभेदः । (व.पु. 26.2)
5. व.पु.26.15-18
6. व.पु,26.5
7. भासयेत् सर्वलोकांस्तु ततोऽसावुत्थितो दिवि – इति पाठभेदः । (व.पु. 26.6)
8. दिवि इति पाठभेदः ।
9. एतस्य तेजसो जाता आदित्या द्वादश पृथक् – इति पाठभेदः । (व.पु.26.8)

इत्यादीनि वचनानि उक्तार्थे तत्र द्रष्टव्यानि। तस्य विष्णुत्वे तु प्रक्रमः [1]'वेदान्तवेद्यो हि मखेषु देव त्वं भूयसे विष्णुरतिप्रसन्न' इतितं प्रति देववचश्चोपसंहारगतमनुसन्धेयम्। 'त्रिधामे'तिसमाख्यापि भगवतो भानुमण्डलान्तर्वर्तित्वे प्रमाणम्।

**'क्षीराब्धिर्मण्डलं भानोः योगिनां हृदयानि च।**
**त्रीणि धामानि मे सन्ति त्रिधामाहमतः स्मृत॥' इति नामर्निर्वचनात्।**

**मोक्षधर्मे - [2]'विद्यासहायवन्तं मामादित्यस्थं सनातनम्।**
**कपिलं प्राहुराचार्याः सांख्यनिश्चितनिश्चयाः॥'**

इतिनामनिर्वचनाध्यायवचनञ्च प्रमाणम्। अत्र 'विद्ये'ति लक्ष्मीरुच्यते

**[3]'मा विद्या च हरेः प्रोक्ता तस्या ईशो यतो भवान्।**
**तस्मान्माधवनामासि धवः स्वामीति शब्दित॥'**

इति कैलासयात्रायां शिवोक्तेः। 'यश्शुक्र इव सूर्ये यो हिरण्यमिव रोचते। श्रेष्ठो देवानां वसु'रिति श्रुतिस्तु रुद्रसूक्तगतापि न रुद्रस्य सूर्यान्तर्वर्तित्वं गमयति। इवशब्देन शुक्रशब्दविवक्षितादित्यान्तर्वर्तिब्रह्मज्योतिषोऽभेदस्यैव सिद्धेः। प्रत्युत -

**[4]'तन्मण्डलस्थं मां ध्यायेत्तेजोमूर्तिं चतुर्भुजम्।**
**उदुत्यन्तु जपेन्मन्त्रं चित्रं तच्चक्षुरित्यपि॥'**

इति भगवद्वचनेनादित्यान्तर्वर्तितदुपस्थाने विनियोगात्। तत्परेण'तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरदि'ति मन्त्रेण भगवत एव शुक्रत्वावगमात् 'सूर्ये शुक्र इवे'ति दृष्टान्तेन विष्णोरेवादित्यान्तर्वर्तित्वं गमयति। महापुरुषपराम्भस्यनुवाकान्तर्गतेन [5]'तदेव शुक्रममृतमि'ति वाक्येनापि भगवत एव 'तच्चक्षुरि'त्यादिमन्त्रावगतशुक्ररूपत्वाभिधानात्। सनत्सुजातीये च भगवति शुक्रशब्द आवृत्तः —

**[6]'यत्तच्छुक्रं महाज्योतिर्दीप्यमानं महायशः।**
**यद्वै देवा उपासन्ते यस्मादर्को विराजते।**
**योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम्॥'**

---

1. व.पु.26.13
2. महा.मोक्ष.342.95
3. ह.पु.3.88.49
4. महा.आश्व.अध्याय-92,पुटम् -1034
5. म.ना.उ.7
6. महा.उद्योग.46.1

**[1]'शुक्राद्ब्रह्म प्रभवति ब्रह्म शुक्रेण वर्धते।**
**तच्छुक्रं ज्योतिषां मध्येऽतप्तं भवति तापनम्॥'**
**योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम्॥'**

इति। सनत्सुजातीयस्य च भगवत्परत्वं भगवत्परतयावधारिताम्भस्यनुवाकस्थवाक्य-प्रत्यभिज्ञापकेन

**[2]'न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्[3]।**
**मनीषयाऽथो मनसा हृदा च य एनं विदुरमृतास्ते भवन्ति॥'**

इति वचनेन 'योगिनस्तं प्रपश्यन्ति भगवन्तं सनातन'मिति भगवच्छब्दाभ्यासाच्चावगम्यते। मोक्षधर्मे –

**[4]'वैकुण्ठः पुरुषो विष्णुश्शुक्रोऽनन्तस्सनातनः।**
**मुञ्जकेशो हरिश्मश्रुः सर्वभूतपितामहः॥'**

इति विष्णौ शुक्रशब्दप्रयोगाच्च। अत्र चाव्यवधानात् 'सूर्ये शुक्रो यथा रोचते तथायं रोचत' इत्यन्वयान्न रुद्रस्य सूर्यसम्बन्धोऽवगम्यते। [5]'असौ योऽवसर्पति नीलग्रीवो विलोहित' इति शतरुद्रीयान्तर्गतमन्त्रो 'नमो रुद्राय पशुपतये महादेवाय त्र्यम्बकायैकचरायाधिपतये हरये शर्वायेशानायोग्राय घृणिने वङ्क्षिणे कपर्दिने नमः नमस्सूर्यायादित्याय नमो नमश्चन्द्रललाटाय कृत्तिवाससे नम' इति सामगानां कृष्णपिङ्गलादित्योपस्थानमन्त्रश्चाष्टमूर्तेः पशुपतेर्मूर्तिभूतस्यादित्य-मण्डलस्य चाभिमान्यभिमन्तव्ययोः स्तुत्यर्थमभेदोपचारादेव युज्यते।

अथवा नीलग्रीवशब्दो न रुद्रपरः, किन्तु मण्डलपरः। [6]'उतैनं गोपा अदृशन्नदृशन्नुदहार्य' इत्युक्तेः नीलग्रीवकत्वं नीलमध्यकत्वम्। तच्चेन्द्रनीलश्यामलकोमलभगवल्लीलाकमनीय-विग्रहयोगादेव मानान्तरानुरोधात्। मुखस्यार्द्धशरीरत्वप्रसिद्धेः मुखेतराङ्गसन्धिभूतग्रीवावाचिनो ग्रीवापदस्य मध्यपरत्वं युक्तम्। अतो मण्डलाभिमानित्वाद्रुद्रस्य तदभिमन्तव्यार्थवादः। 'ब्रह्मेशानाच्युतेशाये'त्यत्र 'रौद्राय वपुषे नम' इति भगवत एव प्रकृतविजयानुगुण्यादुग्रवपुष्कत्वमनु-सन्धीयते। एवं श्रुतिस्मृतिभिः नारायणस्यैवादित्यान्तर्वर्तित्वात् हिरण्यगर्भस्यादित्यान्तर्वर्तित्वमपि

---

1. महा.उद्योग.46.2
2. महा.उद्योग.46.6
3. कश्चिदेनम् - पाठभेदः
4. महा.मोक्ष.279.29
5. तै.सं. 4.5.1
6. तै.सं. 4.5.1

निरस्तम्।[1] 'य एष आदित्ये पुरुषः स परमेष्ठी ब्रह्मात्मे'त्यत्रपरमेष्ठिब्रह्मशब्दयोः, [2]'ब्रह्मा विश्वः कतमः स्वयम्भुः प्रजापतिः संवत्सर इति संवत्सरोऽसावादित्य'इत्यत्र प्रजापतिशब्दस्य [3]'तद्यत्सत्यमसौ स आदित्य' इति 'य एष एतस्मिन् मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्नि'ति बृहदारण्यकश्रुतौ प्रथमजाक्षविषयस्य सत्यशब्दस्य च नारायणपरत्वात् प्रजापतिशब्दस्य नारायणे प्रयोगो बहुधा प्राग्दर्शितः।ब्रह्मशब्दश्च -

**[4]'एकार्णवे तदा तस्मिन्नष्टे स्थावरजङ्गमे।**
**तदा समभवद्ब्रह्मा सहस्राक्षः सहस्रपात्॥**
**सहस्रशीर्षः पुरुषो रुक्मवर्णस्त्वतीन्द्रियः।**
**ब्रह्मा नारायणाख्यस्तु सुष्वाप सलिले सदा॥'**
**[5]'सत्त्वोद्रिक्तात् प्रबुद्धस्तु शून्यं लोकमवैक्षत।'**
**[6]'इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति।'**
**[7]'आपो नरोऽम्भस्तनव इत्यपां नाम शुश्रुम।**
**अप्सु शेते च यस्माच्च तेन नारायणः स्मृतः॥'**
**[8]'तुल्यं युगसहस्रस्य नैशं कालमुपास्य सः।**
**शर्वर्यन्ते प्रकुरुते ब्रह्मत्वं सर्गकारणात्॥'**
**'ब्रह्मा तु सलिले तस्मिन् वायुर्भूत्वा तदाचरत्।**
**निशायामिव खद्योतः प्रावुट्काले ततस्तु स॥'**

इति ब्रह्मत्वात्मकस्रष्टृत्वनिमित्तमभिप्रेत्य चतुर्मुखसृष्टेः प्राक् सृष्ट्यधिकारनिवर्तकत्वयोगान्नारायण एव प्रयुक्तः। अत्र हि पुरुषसूक्तप्रतिपाद्यस्य सहस्रशिरसो नारायणस्य कल्पादौ स्वापादुत्थितस्य किञ्चित्कालं सर्गार्थं ब्रह्मत्वकारणं परस्य च प्रसिद्धस्य चतुर्मुखस्य ब्रह्मणस्तावत्कालं वायुभावेन खद्योतवदाकाशचारित्वञ्च स्पष्टमवगम्यते। अनन्तरमेव—

---

1. म.ना.उ.23.1
2. म.ना.उ.23.1
3. बृ.उ.7.5.1
4. कू.पु.1.6.2-3
5. व.पु.2.23
6. कू.पु.1.6.4
7. कू.पु.1.6.5
8. कू.पु.1.6.6

[1]**'रूपमास्थाय विपुलं वाराहममितं हरिः'**

[2]**'पृथिव्युद्धरणार्थाय प्रविवेश रसातलम्'।**

इति ब्रह्मनारायणशब्दितस्य भगवदवतारत्वेन प्रसिद्धवराहरूपग्रहणमुक्तम्। पुनस्तस्मिन्नेव-

[3]**'एकार्णवे तदा तस्मिन्नष्टे स्थावरजङ्गमे।**
**तदा समभवत् ब्रह्मा सहस्राक्षस्सहस्रपात्॥'**

इत्यारभ्य[4] **'तेन नारायण स्मृतः'** इत्यन्तं श्लोकचतुष्टयमनुक्रम्य –

[5]**'सहस्रशीर्षस्सुमनास्सहस्रपात् सहस्रचक्षुर्वदनस्सहस्रवान्।**
**सहस्रबाहुः प्रथमः प्रजापतिस्त्रयीपथे यः पुरुषोनिरुच्यते॥**
[6]**आदित्यवर्णो भुवनस्य गोप्ता ह्येको हि पूर्वः प्रथमस्तुराषाट्।**
**हिरण्यगर्भः पुरुषो महात्मा सम्पद्यते वै तमसः परस्तात्॥**
[7]**कल्पादौ रजसोद्रिक्तो ब्रह्मा भूत्वाऽसृजत्प्रजाः।**
**कल्पान्ते तमसोद्रिक्तः कालो भूत्वाग्रसत्पुनः॥**
[8]**स वै नारायणाख्यस्तु सत्वोद्रिक्तोऽर्णवे स्वपन्।**
**त्रिधा विभज्य चात्मानं त्रैलोक्ये समवर्तत॥'**

इत्यन्तेन तस्यैव ब्रह्मत्वपुरुषत्वसहस्रशीर्षत्वाभिधानात् नारायणाख्यस्यैव ब्रह्मत्वस्य कालत्वस्य चाभिधानाद्विष्णुत्वस्य मध्ये वक्तव्यस्य क्रमप्राप्तस्यानभिधानात्'स वै नारायणाख्य' इति नारायणत्वं तस्य स्वभावत इत्यभिधानाच्च नारायणस्यैव ब्रह्मशब्देनाभिधानेन तद्वाच्यत्वात्।

ननु महावराहरूपं विरिञ्चस्यापि न विरुध्यते। [9]'आपो वा इदमग्रे सलिलमासीत्तस्मिन् प्रजापतिर्वायुर्भूत्वाऽचरत्, स इमामपश्यत्तां वराहो भूत्वाऽऽहरदि'ति श्रुतौ 'आपो वा इदमग्रे सलिलमासीत्। तेन प्रजापतिरश्राम्यत्। कथमिदं स्यादिति। सोऽपश्यत्पुष्करपर्णं तिष्ठत्। सोऽमन्यत। अस्ति वै तत्। यस्मिन्निदमधितिष्ठतीति। स वराहो रूपं कृत्वोपन्यमज्जत्। स

1. ह.वं.3.34.33
2. कू.पु.1.6.9
3. कू.पु.1.6.2
4. कू.पु.1.6.3
5. ब्र.पु.6.63
6. ब्र.पु.6.64
7. ब्र.पु.6.65
8. ब्र.पु.6.66
9. तै.ब्रा.1.1.3.6

पृथिवीमध आर्च्छदि'ति श्रुतौ च तद्रूपस्य विरिञ्चे दर्शनादिति चेन्न। [1]'उद्धृतासि वराहेण कृष्णेने'ति कृष्णशब्दवाच्यविष्णूद्धृतत्वश्रुत्यान्यत्रापि तस्यैव विवक्षितत्वात्। इदं श्रुतिद्वयं श्रीमति वैष्णवे पुराणे विष्णुपरतयोपबृंहितम्। तत्र हि[2] 'ततः स वासुदेवेति विद्वद्भिः परिपठ्यत' इति'तद्ब्रह्मपरमि'ति च प्रकृतस्य वासुदेवस्य—

[3]'**प्रजास्ससर्ज भगवान् ब्रह्मा नारायणात्मकः।**
**प्रजापतिपतिर्देवो यथा तन्मे निशामय॥**'इति प्रकृत्य,[4]
[5]'**तोयान्तःस्थां महीं ज्ञात्वा जगत्येकार्णवीकृते।**
**अनुमानात्तदुद्धारं कर्तुकामः प्रजापतिः॥**'
**अकरोत् स्वतनूमन्यां कल्पादिषु यथा पुरा।**
**मत्स्यकूर्मादिकं तद्वद्वाराहं वपुरास्थित॥**'

इति वाराहरूपमुक्तम्।मत्स्यादिरूपसाहचर्यादनन्तरं धरणीस्तोत्रे

[6]'**नमस्ते पुण्डरीकाक्ष शङ्खचक्रगदाधर।**'इति चक्रादितल्लिङ्गदर्शनात्।
[7]'**शेषे त्वमेव गोविन्द चिन्त्यमानो मनीषिभिः।**'
[8]'**त्वामाराध्य परं ब्रह्म याता मुक्तिं मुमुक्षवः।**
**वासुदेवमनाराध्य को मोक्षं समवाप्नुयात्**[9]॥'
[10]'**मूर्तामूर्तमदृश्यञ्च दृश्यञ्च पुरुषोत्तम।**
**तत्सर्वं त्वं नमस्तुभ्यं भूयो भूयो नमो नमः॥**' इति

पुण्डरीकाक्षगोविन्दाद्यभिधानश्रुतेः।

[11]'**सर्गादिषु प्रभो ब्रह्मविष्णुरुद्रात्मरूपधृक्।**' इति ब्रह्मादिरूपत्रयवत्तया

---

1. म.ना.उ.4.5
2. वि.पु.1.2.12
3. वि.पु.1.4.2
4. वि.पु.1.4.3-6
5. वि.पु.1.4.7-8
6. वि.पु.1.4.12
7. वि.पु.1.4.16
8. वि.पु.1.4.18
9. समवाप्स्यसि – इति पाठभेदः । (वि.पु. 1.4.18)
10. वि.पु.1.4.24
11. वि.पु.1.4.15

[1]**'ब्रह्मविष्णुशिवात्मिकाम्। स संज्ञां याति भगवानेक एव जनार्दन'** इत्येतत्पुराणोक्तस्य त्रिरूपिणः प्रतीतेः।

[2]**'ब्रह्मरूपधरो देवस्ततोऽसौ रजसा वृतः।**
**चकार सृष्टिं भगवांश्चतुर्वक्त्रधरो हरिः॥'**

इत्युपसंहाराच्च वाराहं रूपं विष्णोरित्यवगम्यते। उपबृंहणत्वन्तु [3]'सोऽपश्यत् पुष्करपर्णं तिष्ठत्। सोऽमन्यत। अस्ति वै तत्। यस्मिन्निदमधितिष्ठती'ति श्रुत्यभिमतस्य पुष्करपर्णलिङ्गतदुत्पत्तिस्थानभूम्यनुमानस्य [4]'अनुमानात्तदुद्धारं कर्तुकाम' इत्यनेन विवक्षितत्वात्, [5]'तेन प्रजापतिरश्राम्यदि'ति श्रुतप्रजापतिशब्दस्मरणार्थं 'कर्तुकामः प्रजापति'रिति प्रजापतिशब्दप्रयोगात्, उत्तराध्यायादौ [6]'यथा ससर्ज देवोऽसौ देवादीनखिलान् विभु'रिति [7]'प्रजापतिस्स देवानसृजते'ति वाक्यांशविवरणाच्च अवगम्यते। [8]'ब्रह्मा नारायणाख्यः'[9], 'ब्रह्मस्वरूपिणं देवम्', [10]'ब्रह्मरूपधर' इत्याद्युक्तिः श्रुतिस्थप्रजापतिशब्दस्यार्वाचीनप्रसिद्धचतुर्मुखप्रजापतिपरतां व्यावर्तयितुम्। तत्र विष्णोः श्रुतिस्थप्रजापतिशब्दवाच्यतां प्रथमसृष्ट्यधिकारनिमित्तां 'पूर्व्याय वेधस' इति श्रुतिं च हृदि निधाय [11]'प्रजापतिपतिरि'त्युक्तम्। प्रजापतेरपि पतित्वेन प्रजाभूततत्स्रष्टुः प्रजापतिशब्दवाच्यत्वं युक्तमित्याशयः। एतच्छ्रुतिसमानार्थत्वात् 'तस्मिन्प्रजापतिर्वायुर्भूत्वे'ति श्रुतिरप्युपबृंहिता।'वायुर्भूत्वाचरदि'त्येतदपि तच्छरीरभूतचतुर्मुखद्वारकम्।वायुप्रोक्ते अवरप्रजापतेः वायुरूपत्वाभिधानात्। एवं च [12]'ब्रह्मा नारायणाख्यस्त्वि'त्यादि कौर्मादिवचनान्यप्येतदर्थकान्येव द्रष्टव्यानि।

किञ्चाधाने [13]'यद्वाराहविहतं सम्भारो भवती'त्यादिवराहविहतमृत्सम्भरादिविधिशेषार्थवादः [14]'तेन प्रजापतिरश्राम्यदि'त्यादिः विहितानुष्ठानमन्त्रेण [15]'यस्य रूपं बिभ्रदिमामविन्दत्। गुहां

1. वि.पु.1.2.66
2. वि.पु.1.4.50
3. तै.ब्रा.1.1.3.6
4. वि.पु.1.4.7
5. तै.ब्रा.1.1.3.5
6. वि.पु.1.5.3
7. तै.ब्रा.1.1.3.5
8. वि.पु.1.4.1
9. वि.पु.1.4.5
10. वि.पु.1.4.50
11. वि.पु.1.4.2
12. कू.पु.1.6.3
13. तै.ब्रा. 1.1.3.7
14. तै.ब्रा. 1.1.3.5
15. तै.ब्रा. 1.2.1.3

प्रविष्टां सरिरस्य मध्ये। तस्येदं विहतमाभरन्तः। अछम्बट्कारमस्यां विधेमे'त्यादिना समानार्थः। स च मन्त्रो मोक्षधर्मे नारायणीये नामनिर्वचनाध्याये गोविन्दनामानि ब्रुवता वराहरूपिविष्णुपरतयोपबृंहितः –

[1]**'नष्टाञ्च धरणीं पूर्वमविन्दं वै गुहागताम्।**

**गोविन्द इति तेनाहं देवैर्वाग्भिरभिष्टुतः॥'** इति मन्त्रे।

'इयं वा अदितिः अस्यामेव प्रतितिष्ठती'त्यादिष्विव 'इमा'मिति भूमिपरः। उपबृंहणे नामस्थगोशब्दो धरणीमित्युक्तः। 'सरिरस्य मध्य' इत्ययमर्थो नष्टामिति। 'अविन्दं वै गुहागता'मिति मन्त्रस्थशब्द एव प्रयुक्तः। तत्रैव –

[2]**'इमाञ्च धरणीं पूर्वं नष्टां सागरमेखलाम्।**

**गोविन्द उज्जहाराशु वाराहं वपुरास्थितः[3]॥'**

इत्युक्तमन्त्रार्थप्रदर्शनपूर्वकं तन्निमित्तकताभिप्रायेण गोविन्दशब्दः प्रयुक्तः। प्रदेशान्तरे परमेष्ठिशब्दश्च भागवते दशमस्कन्धादिषु ब्राह्मणसुताहरणादिषु दृष्टः। यथा –

[4]**'इत्यादिष्टौ भगवता कृष्णौ तौ परमेष्ठिना।**

**ओमित्यानम्य भूमानमादाय द्विजदारकान्॥' इत्यादौ।**

हरिवंशे च महावराहप्रादुर्भावे [5]'परमेष्ठी हृषीकेशः शयनायोपचक्रमे', [6]'पीतवासा लोहिताक्ष'इत्यादि।

किञ्च 'यः पूर्व्याय वेधस'इति सर्गाद्यसमयसृष्टिकर्तृत्वाभिप्रायेण वेधश्शब्दप्रयोगात् सर्वेऽपि प्रसिद्धवेधोवाचकाः शब्दाः सृष्टिकर्तृत्वयोगाद्विष्णौ प्रयोगार्हा इत्यवबोधितम्। वेधश्शब्दस्साधारण्याभिप्रायेण पूर्व्यायेति[7] विशेषणात्। स्वार्थे 'य'प्रत्ययः। तदनुसृत्य च [8]'तदा समभवद्ब्रह्मा सहस्राक्षस्सहस्रपादि'त्यादिः वायुप्रोक्तादौ प्रयोगः। प्रथमः प्रजापतिरिति प्रथमशब्देनापरव्यावर्तनम्। रामायणे च –

---

1. महा.मोक्ष.342.70
2. महा.मोक्ष.345.12
3. रूपमास्थितः इति पाठभेदः
4. भा.पु.10.89.61
5. ह.पु.3.33.27
6. ह.पु.3.33.28
7. पूर्वायेति इति पाठभेदः ।
8. कू.पु.1.6.2

**[1]‘पद्मे दिव्येऽर्कसङ्काशे नाभ्यामुत्पाद्य मामपि।**
**प्राजापत्यं त्वया कर्म सर्वं मयि निवेशितम्॥’**
**[2]‘सोऽहं सन्न्यस्तभारो हि त्वामुपासे जगत्पतिम्।’**

इति ब्रह्मस्तुतिवाक्ये प्राङ्नारायणगतस्य प्राजापत्यस्य ब्रह्मणि निधानोपन्यासः,‘सीता लक्ष्मीर्भवान् विष्णुर्देवः कृष्णः प्रजापतिरि’ति प्रयोगः,‘तमसः परमो धाते’ति धातृशब्दप्रयोगः, उदाहृते वायुप्रोक्तवचने च ‘सहस्रबाहुः प्रथमः प्रजापति’रिति ब्रह्मसृष्टेः प्राक् प्रजापतित्ववचनम्,‘हिरण्यगर्भः पुरुषो महात्मे’ति हिरण्यगर्भ इति प्रयोग इत्येवंविधसकलश्रौत-स्मार्तप्रयोगकटाक्षेण ‘पूर्वे प्रजानिसर्गे त्वामाहुरेकः प्रजापतिरि’त्यारण्यपर्वणि मुख्यप्रजापतिशब्दवाच्यत्वाभिधानञ्च कृतं महर्षिभिः। [3]‘तद्यत्सत्यमसौ स आदित्य’ इत्यत्र सत्यशब्दोऽपि नारायणपरः,‘पुरुषं वेद सत्यमि’ति पुरुषसामानाधिकरण्यात्।

**[4]‘सत्ये प्रतिष्ठितः कृष्णस्सत्यमस्मिन् प्रतिष्ठितम्।**
**सत्यासत्ये च गोविन्दस्तस्मात् सत्यस्सतां मतः’॥**
**इत्युद्योगपर्वणि नामनिर्वचनाध्याये वचनात्।**
**[5]‘भगवान् वासुदेवश्च कीर्त्यतेऽत्र सनातनः।’**
**स हि सत्यमृतञ्चैव पवित्रं पुण्यमेव च॥**’इत्यादिपर्वणि प्रयोगात्।
**[6]‘यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च।**
**गृणन्ति सत्यकर्माणं सत्यं सत्येषु सामसु॥**’इति शान्तिपर्वणि प्रयोगात्।

न च [7]‘स एष प्रजापतिर्यद्धृदयमेतत् ब्रह्मैतत् सर्वमि’ति प्रजापतिमुपक्रम्य [8]‘तद्वै तदेतदेव तदा स सत्यमेव। स यो हैतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति, जयतीमांल्लोकानि’ति। तस्य सत्यत्वं प्रथमजातत्वरूपहिरण्यगर्भलिङ्गञ्चाभिधाय [9]‘आपो वा इदमग्र आसुः। ता आपस्सत्यमसृजन्त। सत्यं ब्रह्म, ब्रह्म प्रजापतिम्, प्रजापतिर्देवानि’ति प्रथमजातत्वमुपपाद्य, [10]‘तद्यत् सत्यमि’ति तदनुवादेन ‘असावादित्यो य एष एतस्मिन् मण्डले पुरुष’ इति

---

1. वा.रा.उत्तर.104.7
2. वा.रा.उत्तर.104.8
3. बृ.उ.7.5.1
4. महा.उद्योग.70.12
5. महा.आदि.2.256
6. महा.शान्ति.47.26
7. बृ.उ.7.3.1
8. बृ.उ.7.4.1
9. बृ.उ.7.4.2
10. बृ.उ.7.5.1

तस्यादित्यान्तर्वर्तित्वाभिधानात् कमलासन एवात्र प्रतिपाद्यत इति वाच्यम्। उपक्रमस्यापि पूर्वोक्तरीत्या विष्णुवाचकस्यात्रान्यत्र च दक्षमरीच्यादिष्वपि प्रयोगेण बहुशो दृष्टव्यभिचारस्याभिमतविशेषव्यवस्थापनाक्षमस्य प्रजापतिशब्दस्य 'सन्दिग्धे तु वाक्यशेषादि'ति न्यायेनानन्तरसन्दर्भानुगुणार्थवृत्तित्वात्। स चार्थो भगवानेव। 'पुरुष एवेदँ सर्वमि'ति श्रुतिसिद्धस्य महापुरुषलिङ्गस्य [1]'एतत् ब्रह्मैतत्सर्वमि'ति श्रवणात् हिरण्यगर्भस्रष्टृत्वलिङ्गस्य च [2]'ब्रह्म प्रजापतिमसृजते'ति श्रवणात् सत्यशब्दस्य भगवद्वाचित्वस्योक्तस्मृत्यादिसिद्धत्वात्। 'अप एवेदमि'ति श्रुतेस्त्वयमर्थः- 'इदम् - कार्यजातम्, अग्रे - सृष्टेः प्राक्, अप एव - आप एवासीत्'। 'आ' इति छान्दसे ईडभावे रूपम्। अपश्शब्दः तन्मूलाविभक्तावस्थ प्रकृतिपरः। यथा 'तम आसीत् तमसा गूढमग्रे प्रकेतम्, सलिलं सर्वमा इदमि'ति। सलिलशब्दः शङ्करभाष्येऽप्येवं व्याख्यातः। [3]'ता आपस्सत्यमसृजन्त' - आपः सूक्ष्मप्रकृतिविशिष्टं प्रकृतं प्रजापतिशब्दवाच्यं ब्रह्मसन्मात्रं सत्यं कारणं विष्णुमसृजत। सत्यशब्दो हि कारणवाचिश्रुतिषु प्रयुक्तः 'ब्रह्मवादिनो वदन्ति कस्मात् सत्याद्यातयामान्यन्यानि हवींषि किस्मात् सत्येति तयाग्निरस्या इष्टके'त्यादिषु। कस्मात् कारणादिति हि तत्रार्थः। अप्सृष्टं सत्यं किमित्यत्राह 'सत्यं ब्रह्मे'ति। प्रजापतिशब्दोक्तं ब्रह्मैव जगत्सृष्ट्यर्थं सत्यशब्दवाच्यहिरण्यगर्भस्रष्टृमहापुरुषरूपेण स्वेच्छया प्रादुर्भूतमिति भावः। तद्ब्रह्म प्रजापतिम् -एकवचनान्तप्रजापतिशब्दस्य हिरण्यगर्भस्वरसत्वात् हिरण्यगर्भमित्यर्थः। इह सृष्टस्य सत्यस्य ब्रह्मत्वाभिधानं ब्रह्मरुद्रादेः सृज्यान्तरात् सत्यशब्दोदित विष्णोः वैलक्षण्यख्यापनार्थम्, ब्रह्मरुद्रादेः कारणब्रह्मस्वरूपादन्यत्वात्। विष्णोस्त्ववतारमात्रत्वेन ततोऽनन्यत्वात्। एवं च 'ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे सम्प्रसूयन्ते' इत्यादौ श्रुतविष्णुप्रसूतिः कारणस्यैव, अवताररूपब्रह्मरुद्रयोस्त्वन्यादृशीति दर्शितं भवति। अत्र च पूर्वप्रजापतिशब्दः परब्रह्मपरः। अनन्तरः पद्मजपरः। परस्यापि पूर्वः पद्मजपरः। परो मरीच्याद्यन्यतमपर इति वैरूप्यमावश्यकम्। अयं त्वर्थ एकवचनान्ततानुगुणो वाराहोपोद्बलितश्च।तथाहि-

**[4]'योऽसौनारायणो देवः परात्परतरो विभुः।**
**तस्य चिन्ता समुत्पन्ना सृष्टिं प्रति नरोत्तम॥'**
**[5]'सृष्टा चेयं मया सृष्टिः पालनीया मयैव हि।'**
**[6]'एवं चिन्तयतस्तस्य सत्याभिध्यायिनो नृप।'**

---

1. बृ.उ.7.3.1
2. बृ.उ.7.4.2
3. बृ.उ.7.4.2
4. व.पु.31.2
5. व.पु.31.3
6. व.पु.31.4

[1]'प्राक्सृष्टिस्त्वन्मनो राजन् मूर्तिमत्तत्पुरो बभौ।
पुरोभूतस्ततस्तस्मिन् देवो नारायणः स्वयम्॥
प्रविशन्तं ददर्शाथ त्रैलोक्यं तस्य देहतः।
ततस्ससस्मार भगवान् वरदानं पुरातनम्॥
वागादीनां ततस्तुष्टः प्रादात्तस्य पुनर्वरम्।
सर्वज्ञस्सर्वकर्ता त्वं सर्वलोकनमस्कृतः॥'
[2]'त्रैलोक्यवसनाच्च[3] त्वं भव विष्णुः सनातनः।'
[4]'एवमुक्त्वा परो देवः प्रकृतिस्थो बभूव ह।'
[5]'विष्णुरप्यधुना पूर्वां बुद्धिं सस्मार स प्रभुः।'
[6]'ध्यात्वा स्मरणरूपेण ततस्सुष्वाप वै प्रभुः।
तस्य सुप्तस्य जठरे महापद्मं विनिस्सृतम्॥'
[7]'सप्तद्वीपवती पृथ्वी ससमुद्रा सकानना।
तस्य रूपस्य विस्तारं पातालातलसंस्थितम्॥'

इत्याद्येकत्रिंशाध्यायवचनैः नारायणात् पद्मजस्रष्टुः पुरुषस्य विष्णोरुत्पत्तिरवगम्यते। सूर्यसिद्धान्ते भूगोलाध्याये विष्णोरुत्पन्नस्या-निरुद्धाख्यस्य भगवद्रूपस्य चतुर्मुखस्रष्टृत्वमादित्या-न्तर्वर्तित्वं च स्पष्टमुक्तम् –

[8]'वासुदेवः परं ब्रह्म तन्मूर्तिः पुरुषः परः।
व्यक्तो निर्गुणश्शान्तः पञ्चविंशात्परोऽव्ययः॥
प्रकृत्यन्तर्गतो देवो बोध्यमानस्तु सर्वगः।
सङ्कर्षणोपसृष्ट्यादौ तासु वीर्यमुपासृजत्॥
तदण्डमभवद्धैमं सर्वतस्तमसावृतम्।
तत्रानिरुद्धः प्रथमः व्यक्तीभूतस्सनातनः॥

1. व.पु.31.5-7
2. व.पु.31.8
3. त्रैलोक्यप्रतिपालाच्च इति पाठभेदः ।
4. व.पु.31.9
5. व.पु.31.10
6. व.पु.31.11
7. व.पु.31.12
8. सूर्य.सि.12-15

**हिरण्यगर्भो द्युतिमानेषश्छन्दसि पठ्यते।**
**आदित्यो ह्यादिभूतत्वात् प्रसूत्या सूर्य उच्यते॥'**
[1]**'परञ्ज्योतिस्तमःपारे सूर्योऽयं सवितेति च।'**
[2]**'त्रयीमयोऽयं भगवान् कालात्मा कालकृद्विभुः।**
**सर्वात्मा सर्वगस्सूक्ष्मः सर्वमस्मिन् प्रतिष्ठितम्॥'**
[3]**'सोऽहङ्काराज्जगत्सृष्ट्यै ब्रह्माणमसृजत्प्रभुः।'** इत्यादि।

तत्र वाराहे पालनार्थं सृष्टत्वान्मनोरूपत्वाच्च प्रद्युम्नो नारायणात्सृष्ट उक्तः, तस्य पालनाधिकृतत्वात् सङ्कर्षणात् प्रद्युम्नसंज्ञं मनो जायत इति वचनाच्च। सूर्यसिद्धान्ते प्रद्युम्नसृष्टिर्नोक्ता। परञ्च वाराहे प्रद्युम्नस्यानिरुद्धरूपेण सुप्तस्य नाभेः ब्रह्मसृष्टिस्थानपद्मनिर्गमः। सूर्यसिद्धान्ते तु सङ्कर्षणस्य प्रद्युम्नद्वारा अनिरुद्धस्रष्टृत्वं द्रष्टव्यमिति।

**॥ इति देवतान्तरस्यान्तरादित्यविद्यावेद्यत्वभङ्गः॥**

## 3. देवतान्तरस्यान्तरक्षिविद्यावेद्यत्वभङ्गः

एवं पुरुषश्रुतिमती अन्तरक्षिविद्यापि भगवत्परा। छान्दोग्ये श्रूयते [4]'अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते, सैवर्क्, तत्साम, तदुक्थम्, तद्यजुस्तद्ब्रह्म। तस्यैतस्य तदेव रूपम्, यदमुष्य रूपम्; यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामे'ति। अस्याक्षिपुरुषस्य बृहदारण्यके [5]'तद्यत् सत्यमसौ स आदित्यो य एष एतस्मिन् मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्नि'त्यादित्यान्तर्वर्ति-पुरुषेणैकत्वावगमात्। [6]'इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन् पुरुषः। तं वा एतमिन्धँ सन्तमिन्द्र इत्याचक्षते परोक्षेणैव।' [7]'अथैतद्वामेऽक्षिणि पुरुष रूपमेषाऽस्य पत्नी विराडि'ति श्रुताया इन्द्रपत्न्याः [8]'राडसि बृहती श्रीरसीन्द्रपत्नी'ति लक्ष्म्यभेदप्रतीतेः अतिदेशप्राप्तैरपहतपाप्म-त्वादिभिश्च नारायणत्वमवगम्यते।

**॥ इति देवतान्तरस्यान्तरक्षिविद्यावेद्यत्वभङ्गः॥**

---

1. सूर्य.सि.12-16
2. सूर्य.सि.12-18
3. सूर्य.सि.12-20
4. छा.उ.1.7.5
5. बृ.उ.7.5.1
6. बृ.उ.6.2.2
7. बृ.उ.6.2.3
8. तै.ब्रा.3.11.1.20

## 4. देवतान्तरस्य दहरविद्यावेद्यत्वभङ्गः

एतेन दहरविद्यापि व्याख्याता। अपहतपाप्मत्वस्य नारायणधर्मस्य [1]'एष आत्मापहतपाप्मे'ति दहराकाशे श्रवणात्। बृहदारण्यके [2]'तयोरेष संस्तावो य एषोऽन्तर्हृदय आकाश' इति हृदयसुषिरात्मकभूताकाशे अक्ष्यन्तर्वर्तिनो लक्ष्मीपतेरेवावस्थानावगमाच्च। नारायणानुवाके च हृदयान्तर्वर्ती भगवानेवेत्युच्यते। तथाह [3]'सहस्रशीर्ष'मित्यादि। [4]'विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवती'ति - पुरुषो जीवः, विश्वमचेतनञ्च, तदिदं विश्वमेव कृत्स्नमेव कर्तृ उपजीवतीत्यर्थः। पूर्वोत्तरवाक्यैः कर्मार्प्यते। चेतनाचेतनात्मकं कृत्स्नं वस्तु सहस्रशिरसं द्योतमानं सर्वज्ञं सर्वेषां सुखप्रदं सर्वान्तरात्मानं निर्विकारं समाभ्यधिकशून्यं प्रभुं नारायणं देवमुपजीवति। तदेव कर्तृ सर्वस्मात्परं नित्यं सर्वात्मकं हरिं नारायणमुपजीवति। तदेव कर्तृ विश्वस्य पतिमनन्येश्वरं सर्वदा मङ्गलरूपमद्भुतं ज्ञातव्येषु प्रधानभूतं विश्वस्यात्मानं विश्वस्य परायणं नारायणमुपजीवतीति।

ननु परब्रह्मण उपजीव्यत्वं क्वचिदवगम्यते, क्वचिच्च परतत्त्वस्य, क्वचित्परञ्ज्योतिषः, क्वचित्परमात्मनः। अतः कथं नारायणस्योपजीव्यत्वं त्रिरावर्त्यते, तत्राह [5]'नारायणपरं ब्रह्मे'ति। तत्र तत्रायमेव नारायणः प्रतिपाद्यत इति भावः। तस्मात् तत्कर्तृव्ययरहितं सर्वज्ञं समुद्रशायिनं विश्वस्य सुखप्रदमनन्तमुपजीवतीत्युपसंहारः।

एवमुपास्यस्वरूपमुक्त्वा चेतनोपजीवनेषु मोक्षार्थोपासनलक्षणोपजीवनस्य प्राधान्यात् तदपेक्षितमुपासनस्थानमुच्यते [6]'पद्मकोशमि'त्यादिना। यथा मुण्डके चतुर्थखण्डे [7]'आविस्सन्निहितमि'त्यारभ्य विस्तरेण ब्रह्मोपदिश्य [8]'पद्मकोशप्रतीकाशं सुषिरञ्चाप्यधोमुखम्', [9]'हृदयं तद्विजानीयाद्विश्वस्यायतनं महदि'त्युपासनस्थानोपदेशः तद्वत्।

एतेनास्य कस्यचिदवाच्योत्प्रेक्षणं निरस्तम्। न हि मुण्डके पूर्वप्रकृतस्य ब्रह्मणो हृदयं प्रतिपाद्यते। ब्रह्मकोशः ब्रह्मोत्पत्तिस्थानम्। सुषिरपदं तद्विशिष्टपरम्। [10]'ऋतं सत्यमि'त्युपासनमन्त्रः। स च व्याख्यातः। [11]'महाज्ञेयमि'ति कर्मधारयः,अभ्यर्हितत्वात्, न तु परोक्तरीत्या

---

1. छा.उ.8.1.5
2. बृ.उ.6.2.3
3. म.ना.उ.11.1
4. म.ना.उ.11.2
5. म.ना.उ.11.4
6. म.ना.उ.11.7
7. मु.उ.2.2.1
8. म.ना.उ.11.7
9. म.ना.उ.11.8
10. म.ना.उ.12.1
11. म.ना.उ.11.3

बहुव्रीहिः,अतिजघन्यत्वात्। [1]'नारायणपरं ब्रह्मे'ति छान्दसो विभक्तिलुक्। समासेऽपि कर्मधारयः,अभ्यर्हितत्वात्। एतेन नारायणात्परं ब्रह्म तत्त्वम्,नारायणो ब्रह्मणोऽन्य इति परोक्तयोजना निरस्ता। ब्रह्मतत्त्वमित्यन्वयश्चासमञ्जसश्च (असमञ्जसः?)। [2]'विश्वतः परममि'ति पारम्यप्रतिपादनात् परशब्दस्य तत्परत्वमेव युक्तम्, नत्वन्यपरत्वम्। उत्कर्षपरपरशब्दान्तरसमभिव्याहाराच्च। [3]'नारायणपरो ज्योतिरि'ति पूर्ववदन्यपरत्वे आत्मशब्दश्चानतिप्रयोजनः। अत एव महोपनिषदि 'नारायणः परं ब्रह्म' 'नारायणः परो ज्योतिरि'ति विभक्तिः श्रूयते। न च तत्र पञ्चम्याः स्वादेशः तैत्तिरीयवाक्य एव छान्दसलुगङ्गीकारस्य युक्तत्वात्। महोपनिषदि स्वादेशाङ्गीकारे तु तैत्तिरीये पञ्चमीसमासाङ्गीकारेण विभक्त्यर्थलक्षणाङ्गीकारात् वाक्यद्वयमस्वरसं स्यात्। अतस्तैत्तिरीये लुगेव।

सुबालोपनिषद्यपि भगवतो हृदयान्तवर्तित्वं सुप्रसिद्धम्। चतुर्थे [4]'हृद्याकाशे परे कोशे दिव्योऽयमात्मा स्वपिति,' पञ्चमे 'यः प्राणे यो विज्ञाने य आनन्दे यो हृदाकाशे य एतस्मिन् सर्वस्मिन्नन्तरे सञ्चरति सोऽयमात्मा तमात्मानमुपासीताजरममृतमभयमशोकमनन्तमि'ति चतुर्दशकृत्वोऽभ्यस्तम्। सप्तमे खण्डे 'अन्तश्शरीरे निहितो गुहायामज एको नित्यो यस्य पृथिवी शरीरम्', अष्टमे 'अन्तश्शरीरे निहितो गुहायां शुद्धः सोऽयमात्मा', तत्रैव 'सर्वेश्वरमचिन्त्यमशरीरं निहितं गुहायाममृतमि'ति।

आत्मप्रबोधोपनिषदि [5]'अथ यदिदं ब्रह्मपुरमिदं पुण्डरीकम्', 'तस्य य आत्मा हेमपुण्डरीकमध्ये' 'तस्मात्कारणरूपं बोधस्वरूपं विज्ञानघनम्', 'तस्मात्तडिदाभमात्रं दीपवत्प्रकाशो ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः' इति। वासुदेवोपनिषदि —

**[6]'एकाग्रमनसा यो मां ध्यायते हरिमव्ययम्।**
**हृत्पङ्कजे स्वमात्मानं स मुक्तो नात्र संशयः॥'इति।**

एवं भगवतो हृदयान्तर्वर्तित्वं स्पष्टमुक्तम्। श्रुत्यन्तराण्यप्येतत्समानार्थानि। कठवल्ल्यां द्वितीयखण्डे —

**[7]'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।**
**अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति॥'**

---

1. म.ना.उ.11.4
2. म.ना.उ.11.2
3. म.ना.उ.11.4
4. सु. उ.4
5. आ.प्र.उ.1.1
6. वासु.उ.1
7. क.उ.1.2.12

तत्रैव - [1]'**अणोरणीयान् महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम्।**
**तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः॥'**

चतुर्थे- [2]'**यत्पूर्वं तपसो जातमद्भ्यः पूर्वमजायत।**
**गुहां प्रविश्य तिष्ठन्तं यद्भूतेभिर्व्यपश्यत। एतद्वै तत्।'**

[3]'**या प्राणेन सम्भवति अदितिर्देवतामयी।**
**गुहां प्रविश्य तिष्ठन्तीं या भूतेभिर्व्यजायत॥'इति॥**

**षष्ठे** - [4]'**अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः।**
**तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवैषीकां येन तद्विद्याच्छुक्रममृतम्॥'**

मुण्डके तृतीये –

[5]'**सप्त प्राणाः प्रभवन्ति तस्मात्सप्तार्चिषस्समिधस्सप्तहोमाः।**
**सप्त इमे लोका एषु चरन्ति प्राणा गुहाशयान्निहिताः सप्तसप्त।'**

[6]'**पुरुष एवेदँ सर्वं तपो ब्रह्म परामृतम्।**
**एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य॥**

तथा चतुर्थे - [7]'**आविस्सन्निहितं गुहाचरं नाम महत् पदमि**'**ति।**

अन्यत्र [8]'**दिव्ये ब्रह्मपुरे ह्येष व्योमन्यात्मा प्रतिष्ठितः।'**

[9]'**मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्तर्हृदये यन्निधाय।'**

[10]'**ब्रह्मकोशप्रतीकाशं सुषिरञ्चाप्यधोमुखम्।**
**हृदयं तद्विजानीयाद्विश्वस्यायतनं महत्॥इति।**

तथा पञ्चमे [11]'**दूरात् सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायामि**'ति।

---

1. क.उ.1.2.20
3. क.उ.2.1.6
3. क.उ.2.1.7
4. क.उ.2.3.17
5. मु.उ.2.1.8
6. मु.उ.2.1.10
7. मु.उ.2.2.1
8. मु.उ.2.2.7
9. मु.उ.2.2.7
10. म.ना.उ.11.7
11. मु.उ.3.1.7

क्षुरिकोपनिषदि च —

[1]‘**ततो रक्तोत्पलाभासं पुरुषायतनं महत्।**

**दहरं पुण्डरीकमिति वेदान्तेषु निगद्यते॥**’इति।

तथा [2]‘यो वै सोऽन्तः पुरुष आकाशोऽयं वाव स योऽयमन्तर्हृदय आकाशः। यो ह वै सोऽन्तर्हृदय आकाशस्तदेतत् पूर्णमप्रवर्ती’ति।

शाण्डिल्यविद्यायाञ्च [3]‘एष म आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वा। एष म आत्माऽन्तर्हृदये ज्यायानि’ति। तथा [4]‘एष म आत्माऽन्तर्हृदय एतद्ब्रह्म। एतदितः प्रेत्याभिसम्भवितास्मीति।’

ब्रह्मोपनिषदि द्वितीयखण्डे [5]‘एकमेव तत्परं ब्रह्म विभाति। हृद्याकाशे तद्विज्ञानमाकाशं तत्सुषिरमाकाशं तद्वेद्यं हृद्याकाशे यस्मिन्निदं सञ्चरति तस्मिन्निदं सर्वमोतं प्रोतं स विभोः प्रजा ज्ञायेरन्नि’ति।

श्वेताश्वतरे तृतीये [6]‘सर्वाननशिरोग्रीवः सर्वभूतगुहाशय’ इति। तत्रैव [7]‘अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः। [8]‘अणोरणीयान्महतो महीयानात्मा गुहायान्निहितोऽस्य जन्तो’रिति।

तथा चतुर्थे [9]‘एष देवो विश्वकर्मा महात्मा सदा जनानां हृदये सन्निविष्ट’ इति।

बृहदारण्यके चतुर्थेऽध्याये बालाक्यजातशत्रुसंवादे प्रथमब्राह्मणे [10]‘य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी’ति।

तथा शाकल्यप्रश्ने [11]‘हृदये ह्येव सत्यं प्रतिष्ठितं भवती’ति। षष्ठेऽध्याये चतुर्थे ब्राह्मणे

---

1. क्षु.उ.9
2. छा.उ.3.12.8-9
3. छा.उ.3.14.3
4. छा.उ.3.14.4
5. ब्र.उ.2
6. श्वे.उ.3.11
7. श्वे.उ.3.13
8. श्वे.उ.3.20
9. श्वे.उ.4.17
10. बृ.उ.6.4.22
11. बृ.उ.5.9.23

[1]'स एषोऽन्तर्हृदय आकाशः तस्मिञ्छेते सर्वस्य वशी'ति। सप्तमेऽध्याये षष्ठे [2]'मनोमयोऽयं पुरुषो भाः सत्यः तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा', 'स एष सर्वस्य वशी'ति।

कैवल्योपनिषदि [3]'हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकमनन्तमव्यक्तमि'ति। उत्तरत्र च [4]'एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयमि'ति।

माण्डूक्ये [5]'प्रणवं हीश्वरं विद्यात् सर्वस्य हृदये स्थितमि'ति।

आत्मप्रबोधोपनिषदि [6]'हृत्पद्ममध्ये सर्वं यत्तत्प्रज्ञानेऽत्र प्रतिष्ठितमि'ति।

अन्यत्रोपनिषदि 'स एषोऽस्य हृदन्तरे तिष्ठन्नि'ति।

आरण्ये च शिक्षायां [7]'स वा एषोऽन्तर्हृदय आकाशस्तस्मिन्नयं पुरुष' इति। अम्भसीत्यादौ च [8]'प्र तद्वोचे अमृतं नु विद्वान् गन्धर्वो नाम निहितं गुहासु', [9]'अणोरणीयान् महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोरि'ति। एवं बहुभिः श्रुतिभिः पुरुषश्रुतेः सुबालोपनिषदाद्यैकार्थ्यात् भगवत एव हृदयान्तर्वर्तित्वं प्रतिपाद्यते।

ननु [10]सत्वाकाशशब्दो भगवत्परः। तस्मिन्यदन्तरमिति तु तत्र विद्यमानस्यैवान्यस्यैव देवस्य उपास्यत्वमुच्यते। अत एव बृहदारण्यके [11]'यदूर्ध्वं याज्ञवल्क्य दिवो यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतञ्च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतञ्च प्रोतञ्चे'ति प्रश्नस्य 'आकाश एव तदोतञ्च प्रोतञ्चे'त्युत्तरे कृते, [12]'स पुनः कस्मिन्नु खल्वाकाश ओतश्च प्रोतञ्च'इति प्रश्ने, [13]'एतस्मिन्नु खल्वक्षर आकाश ओतश्च प्रोतश्च', [14]'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत' इत्याद्युत्तरञ्च सङ्गच्छते। आकाशशब्देन सर्वाधारत्वेन

1. बृ.उ.6.4.22
2. बृ.उ.7.6.1
3. कै.उ.1.6
4. कै.उ.1.23
5. मा.उ.4.28
6. आ.प्र.उ.1
7. तै.उ.1.6.1
8. म.ना.उ.2.4
9. म.ना.उ.8.3
10. सर्वस्वाकाशशब्दो इति पाठभेदः ।
11. बृ.उ.5.8.6
12. बृ.उ.5.8.6
13. बृ.उ.5.8.10
14. बृ.उ.5.8.8

च छान्दोग्याकाशैक्यप्रतीतेः। छान्दोग्य एव दहरविद्यान्ते [1]'आकाशो वै नामरूपयोनिर्वहिता, ते यदन्तरा तद्ब्रह्मे'ति नामरूपनिर्वोढृत्वेन तदस्पृष्टत्वेन च स्वारसिकं भेदप्रतिपादनमप्यत एव सङ्गच्छते। अत एव [2]'तेनेदं पूर्णं पुरुषेण सर्वमि'ति प्रस्तुतान्नारायणात् परं वस्तु [3]'ततो यदुत्तरतरमि'ति श्वेताश्वतरे श्रुतम्। ब्रह्मोपनिषदि च 'अथास्य पुरुषस्य चत्वारि स्थानानि भवन्ति, नाभिर्हृदयं कण्ठं मूर्धेति, तत्र चतुष्पादं ब्रह्म विभाति, जागरितं स्वप्नं सुषुप्तं तुरीयमिति। जागरिते ब्रह्मा, स्वप्ने विष्णुः, सुषुप्ते रुद्रस्तुरीयपरमाक्षरम्। स आदित्यस्स विष्णुस्स प्राणः स पुरुषस्स जीवः सोऽग्निस्स ईश्वर' इति तुरीयं श्रुतम्। तस्य च हृदयाकाशे वर्तमानत्वमनन्येश्वरत्वं सर्वान्तर्यामित्वादि च तद्वेद्यम्। हृद्याकाशे [4]'न तत्र देवा न ऋषयो न पितर ईशते', [5]'एको देवस्सर्वभूतेषु गूढ' इत्यादितत्रत्यवचनैः सिद्धम्। तापनीये च [6]'आत्मा अं ब्रह्माणं नाभावुकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्य' इत्यकारादिवाच्यानां ब्रह्मादीनामुपासनं विधायोंकारं सर्वेश्वरं द्वादशान्त इति समष्टिप्रणववाच्यं द्वादशान्तोपास्यं सर्वैश्वर्यशालितत्त्वान्तरं दर्शितम्। मैत्रेयोपनिषदि [7]'तमो वा इदमेकमास तत्परेणेरितं विषयत्वं प्रयाति' इत्यादिना मूलतमोऽधिष्ठातुः परस्य सङ्कल्पात् मूलतमसो गुणविभागं निरूप्य तस्य प्रोक्ताग्र्यास्तनवो ब्रह्मा विष्णू रुद्र इति। [8]'अथ यो ह खलु वा अस्य राजसोंऽशोऽसौ योऽयं ब्रह्मा, अथ यो ह खलु वा अस्य तामसोंशस्सोऽसौ योऽयं रुद्रः, अथ यो ह खलु वा अस्य सात्विकोंशस्सोऽसौ योऽयं विष्णुरि'ति त्रिगुणात्मकतमोऽधिष्ठातुः परस्य रजोगुणाद्युपहितांशभेदा ब्रह्मादय इति प्रतिपादनेन तेभ्योऽधिकं तत्त्वान्तरं विभावितम्। अथर्वशिखायां च [9]'ईशानं प्रध्यायितव्यम्, सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे सम्प्रसूयन्ते'। न कारणं कारणानां त्वाधारता कारणं तु ध्येयस्सर्वैश्वर्यसम्पन्नस्सर्वेश्वरश्शम्भुराकाशमध्ये ध्येय इति ब्रह्मादित्रितयकारणमीशानशम्भुशिवादि-शब्दितं तत्त्वमुक्तम्। अथर्वशिरसि च 'यो वै रुद्रस्स भगवान् यश्च ब्रह्मा तस्मै वै नमो नमः,

---

1. छा.उ.8.14.1
2. श्वे.उ.3.9
3. श्वे.उ.3.10
4. बृ.उ.1
5. बृ.उ.1
6. नृ.पू.ता.उ.3
7. मै.उ.5.2
8. मै.उ.5.2
9. अ.शिखा.2

यो वै रुद्रस्य भगवान् यश्च विष्णुस्तस्मै वै नमो नमः, [1]यो वै रुद्रस्स भगवान् यश्च महेश्वरस्तस्मै वै नमो नम इती'त्यादीनां [2]'अहमेकः प्रथममासमि'त्युपक्रान्तरुद्रविभूतित्वेनाभिधानात् तेभ्यः परं तत्त्वं सिद्धम्।

**बृहदारण्यमैत्रेयश्वेताश्वतरवाक्यतः।**
**छान्दोग्यतापनीयाभ्यां ब्रह्मोपनिषदा तथा॥**
**तथाथर्वशिरोवाक्यैरथर्वशिखयापि च।**
**त्रिमूर्तिभ्योऽधिकं तत्त्वं निश्चिन्वन्ति विपश्चितः॥**

अतः तस्यैव परत्वादाकाशान्तर्वर्तित्वेनोपास्यत्वमिति।

इदं तु वाक्यशेषसूत्रवाक्यैः निराकृतम्। तथाहि [3]'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म, दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वा व विजिज्ञासितव्यमि'-त्युपासनं विधाय तं चेत् ब्रूयुः [4]'यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमि'ति पुण्डरीकमत्यल्पं तदन्तस्तदेकदेशे विद्यमानो दहराकाशोऽतिसूक्ष्मस्तत्र किं वर्तितुमर्हति। यदि किञ्चिद्योग्यमस्ति किं तदिति प्रश्नयावनतैश्शिष्टैश्चोद्यगर्भे प्रश्ने कृते [5]'यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश' इति पुण्डीकान्तरुपाधिपरिच्छिन्नोऽपि पुण्डरीकवर्त्याकाशो यावानयं भूताकाशस्तावान् स्वरूपत इत्युक्त्वा एतदुक्त्या परिच्छेदशङ्काव्यावृत्तयेऽस्य वाक्यस्याल्पत्वनिवृत्तौ तात्पर्यं व्यञ्जयितुं [6]'उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्यचन्द्रमसावुभौ विद्युन्नक्षत्राणि। यश्चास्येहास्ति यच्च नास्ति, सर्वंतदस्मिन् समाहितमि'ति द्यावावृथिव्यादिसकलपदार्थानामाका-शान्तःप्रदेशैकदेशेऽसङ्कोचेनासङ्करेण वृत्त्युपपादनेन [7]'ज्यायान् पृथिव्या ज्यायानन्तरिक्षात् ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्य' इति हृदयाकाशान्तर्वर्तिब्रह्मविषयश्रुत्यन्तरोक्त्या परिच्छेदं स्फोरयित्वा [8]'तञ्चैतद्ब्रूयुः अस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितँ सर्वाणि च भूतानि सर्वे च कामाः, यदैनज्जरावाप्नोति प्रध्वंसते वा किं ततो शिष्यत' इति दहराकाशरूपे ब्रह्माख्ये पुरे

1. अ.शिरो.उ.1-2
2. अ.शिरो.उ.1
3. छा.उ.8.1.1
4. छा.उ.8.1.2
5. छा.उ.8.1.3
6. छा.उ.8.1.3
7. छा.उ.3.14.3
8. छा.उ.8.1.4

द्यावापृथिवीसूर्यचन्द्रविद्युन्नक्षत्रादिभौतिकानि अग्निवायूपलिक्षितसमस्तभूतान्यैहिकभोगरूपाः द्वितीयखण्डोक्ताः परलोकभोग्यरूपाः कामाश्च यदि समाहिताः तर्हि प्रदीपवैकल्ये तदाधारप्रभाया इव शरीरवैकल्ये तदाधाराकाशवैकल्यावश्यम्भावादेतच्छरीरं यदा जरा वा आप्नोति, एतच्छरीरं प्रध्वंसते वा तदा शरीरवर्त्याकाशतदाधारद्यावापृथिव्यादिषु किं शिष्यते, न किञ्चिच्छिष्येत। तस्मात् द्यावापृथिव्यादेः तदाप्युपलम्भात् सर्वाधारत्वमाकाशस्य न युज्यत इति। पुनः परिचोद्य [1]'स ब्रूयात् नास्य जरयैतज्जीर्यति न वधेनास्य हन्यत' इति देहे जरया ब्रह्मरूपपुरस्य जराद्यभावमुक्त्वा तद्धेतुतया [2]'एतत् सत्यं ब्रह्मपुरमि'ति वक्ष्यमाणसत्यशब्दनिर्वचनानुसारेण सत्यशब्देन सर्वाधारत्वव्याप्तं सर्वनियन्तृत्वमुक्त्वा नास्य दहराकाशस्य सर्वनियन्तुस्सर्वाधारस्य स्वरूपसिद्धये किञ्चिदपेक्षणीयमस्ति। पुण्डरीके वृत्तिश्च सम्बन्धमात्रमेव। तस्मादपरिच्छिन्न एवायं स्वरूपतो दहराकाश इति दहरत्वहेतुकथनपूर्वं चोद्यं हेत्वसिद्ध्या परिहृत्य [3]'अस्मिन् कामास्समाहिता' इति। किं तदत्र विद्यत इति प्रश्नस्योत्तरमभिधाय, [4]'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प' इति वाक्ये 'एष' इति पुंल्लिङ्गेनाकाशमनूद्यात्मत्वमपहतपाप्मत्वादिगुणांश्च विधाय, 'अस्मिन् कामा' इत्युक्ताकाशत-दन्तर्वर्तिनौ स्पष्टीकृत्य, [5]'अथ य इहात्मानमनुविद्य व्रजन्त्येताँश्च सत्यान् कामान्, तेषां सर्वेषु लोकेषु कामचारो भवती'ति वाक्येन 'एष आत्मे'तिवाक्यक्रमानुरोधेन प्रथममात्मानं पश्चात् कामनोपाधिकतया द्वितीयखण्डे वर्णयिष्यमाणान् मातापिताभ्रात्रादिरूपान् कामान्नित्यत्वार्थकसत्यविशेषणेन व्यावर्त्य ब्रह्मगुणत्वाद्युपाध्यनुक्त्या च नित्यतया प्रतिपन्नानपहतपाप्मत्वादिगुणान् तदुपासनं चानूद्य 'तेषां सर्वेष्वि'ति वाक्येन सत्यकामत्वमुखेन स्वेन रूपेणाभिनिष्पद्यत इति वक्ष्यमाणगुणाष्टकाविर्भावरूपफलसम्बन्धो बोधितः, [6]'एष आत्मापहतपाप्मे'त्यात्मशब्देन धर्मिणो निर्देशादपहतपाप्मेति गुणानां निर्देशात्। [7]'आत्मानमनुविद्य व्रजन्त्येताँश्च सत्यान् कामानि'त्यत्र स्वरसतः तदुभयप्रत्यभिज्ञानादुपसर्जनतया निर्दिष्टानामपहत-पाप्मत्वादीनां कथमेतानीति परामर्शशङ्का दूरोत्सारिता। धर्मिणः पृथङ्निर्देशेनोपसर्जनपरामर्शस्यापि स्वरसत्वात्। [8]'अस्मिंश्चेदिदं ब्रह्मपुर' इति [9]'एतत् सत्यं ब्रह्मपुरमि'तिवत्। ब्रह्मपुरमिति

1. छा.उ.8.1.5
2. छा.उ.8.1.5
3. छा.उ.8.1.5
4. छा.उ.8.1.5
5. छा.उ.8.1.6
6. छा.उ.8.1.5
7. छा.उ.8.1.6
8. छा.उ.8.1.4
9. छा.उ.8.1.5

समानाधिकरणम्। तच्चार्थपरम्। स शिष्यशब्दानुकारः शिष्यो ब्रह्मत्वाज्ञानाद्द्यावापृथिव्याद्याधारतया [1]बृहत्त्वस्य प्रतिपन्नत्वात् पुरत्वेन रूपेण सम्भवात् शिष्यशब्दानुकारोऽपि समञ्जसो वा। अथवा ब्रह्मपुरशब्दः उपक्रमस्थब्रह्मपुरवत् व्यधिकरणस्सन् शरीरपर एव। अस्मिन् ब्रह्मपुर इति व्यधिकरणे सप्तम्यौ। ब्रह्मपुरे विद्यमाने अस्मिन्नाकाश इत्यर्थः। अथवा समानाधिकरणे एव सप्तम्यौ 'अस्मिन् ब्रह्मपुर' इति शरीरमेवोच्यते।

आकाशस्य ब्रह्मपुराधारकत्वमुक्त्वा तत्र द्यावापृथिव्यादिसमाधानोक्तेः तेषां शरीर एव परम्परया समाधानमुक्तं भवतीत्यभिप्रायेण ब्रह्मपुरे समाहितमिति निर्देशः। अत्र 'अस्मिंश्चेदिदं ब्रह्मपुर' इति ब्रह्मपुरोपलक्षिते अन्तराकाश इति शङ्करः। वेश्मत्वेन रूपितपुण्डरीकाधारत्वाय शरीरस्य पुरशब्देन निर्देशः। ब्रह्मणो वासात् ब्रह्मपुरमित्यपहतपाप्मत्वादिभोग्यजाताधारत्वात् ब्रह्मणः पुरशब्देन निर्देशः। तदेवमपहतपाप्मत्वादिकमेवाकाशान्तर्वर्त्यन्वेष्टव्यमिति स्फुटमवगम्यते। [2]'उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते'इत्यत्रान्तरार्थप्रतिसम्बन्धी अस्मिन्नितिस्ववाक्यनिर्दिष्टो दहराकाश एव, न तु वाक्यान्तरनिर्दिष्टं शरीरम्। द्यावापृथिव्यादीनां शरीरान्तस्समाधानासम्भवाच्च। अत एवैतदाक्षेपे 'अस्मिंश्चेदिदं ब्रह्मपुमि'ति वाक्ये ब्रह्मपुरशब्दः कर्मधारयस्सन् दहराकाशपरः, तस्याभ्यर्हितत्वात्। एतदेकवाक्यतापन्नपरिहारवाक्यगत-ब्रह्मपुरशब्दैकार्थ्यासिद्धेश्च। अत एव नास्य जरयैतदिति नपुंसकोपपत्तिः। अन्यथा आकाशपरामर्शात् पुंलिङ्गतापत्तेः। तस्य ब्रह्मरूपपुरस्य जरावाप्तेरितः प्रागसिद्धत्वात्। जराश्रयतया प्रसिद्धं 'ब्रह्मपुरे दहरं पुण्डरीकमि'ति प्राक्प्रस्तुतं देहाख्यं ब्रह्मणः पुरमेव 'यदैनज्जरावाप्नोती'त्यत्रैनदिति परामृश्यते, न तु सन्निहितम्। अथवा पुनरस्तु सन्निहितपरामर्शः, देहस्य जरावाप्त्या ब्रह्मरूपपुरस्य जरावाप्तिं सिद्धवत्कृत्य 'एनज्जरावाप्नोती'त्यनुवादसम्भवात्। [3]'किं ततोऽतिशिष्यत' इति द्यावावृथिव्यादेरेव परामर्श इति।

नन्वत्राकाशशब्दः, 'आ समन्तात् काशत' इति योगस्य व्युत्पत्त्या वा ब्रह्मशब्देन व्यापकत्वस्योपस्थितत्वात् तद्गुणयोगाद्वा पुण्डरीकान्तर्वर्तिपरो वाच्यः। ततश्च स्वरूपेण व्यापकत्वस्य प्रागवगमात् 'यावान्वा' इति कथं व्यापकत्वप्रतिपादनमिति चेन्न। भूताकाशभेदनिर्णयात्प्राक् योगगौणवृत्तेरप्रवृत्तेः। ततश्च भूताकाशत्वेनाप्यनिर्णयात् पुण्डरीकान्तर्वर्तिकिञ्चिद्वस्तु आकाशशब्देन निर्दिश्यत इति एतावत् प्रतीयते। द्यावापृथिव्याद्याधारत्वापहतपाप्मत्वादिश्रवणानन्तरमेव

---

1. ब्रह्मत्वस्य इति पाठभेदः
2. छा.उ.8.1.3
3. छा.उ.8.1.4

भूताकाशव्यावृत्त्यवगमात् न्यायोपेतोत्तरवाक्यानुगुण्येन [1]‘अथ यदिदमस्मिन्नि’ति प्रथमवाक्यार्थनिर्णय-दशायामेव योगगौणवृत्त्यन्तरेण पदार्थावबोध इति न किञ्चिदनुपपन्नम्।

ननु तृतीयखण्डे द्वितीयखण्डोक्तपितृलोकादय एव [2]‘त इमे सत्याः कामाः’, [3]‘अत्र ह्यस्यैते सत्याः कामा’ इत्युच्यन्ते। अतः प्रथमखण्डस्थस्य सत्यान् कामानित्यस्यापि तदर्थकत्वमेव युक्तमिति चेन्न, ऐकार्थ्यासम्भवात्। ‘एतांश्च सत्यान् कामा’नित्यत्र पितृलोकादीनामप्रकृतत्वेन तेषामेतच्छब्देन परामर्शायोगात्। किं तदत्र विद्यत इति चोद्यपरिहारे [4]‘यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितमि’ति पितृलोकादीनामपि सङ्ग्रहेणाभिधानात् परामर्श इति चेन्न। तथा सति द्यावापृथिव्यादीनामपहतपाप्मत्वादीनां च प्रकृतत्वाविशेषात् तेषामपि ग्रहणस्यावश्यकतया वैरूप्यस्यावर्जनीयत्वात्।

ननु‘यच्चास्येहे’त्यत्र ‘अस्य यदि’ति विवक्षितसम्बन्धः। काम्यत्वमेवैतदर्थानुवादेनाक्षेपपरे उत्तरवाक्ये ‘यच्चास्ये’त्ययमर्थः‘सर्वे च कामा’ इत्यनूदितः। अतो द्यावापृथिव्यादीनां काम्यमानत्वाभावेन न तेषां सत्यकामपदेन ग्रहणमिति चेन्न, ‘यदिहास्ती’त्यैहिकपुरुषार्थस्यापि तत्र प्रतीत्या प्रथमखण्डस्थसत्यकामपदस्य द्यावापृथिव्यादिपरत्वमवर्जनीयम्। ततश्च वैरूप्यम्। द्वितीये प्रथमखण्डस्थसत्यकामपदेन किमर्थस्तत्परामर्शः।

एवञ्चान्वेष्टव्यवृत्त्यसम्भवचोद्यपरिहारग्रन्थस्थत्वात् ‘अस्मिन् कामास्समाहिता’इति वाक्यस्य तत्रत्यकामशब्दस्योपासनार्थं ब्रह्मण्यन्विष्यमाणपरत्वात् सन्निहितानामपहतपात्मत्वादीनामेव कामशब्दार्थत्वसम्भवाच्च तेषामेव सत्यकामपदेन परामर्शो युक्तः।

किञ्च सत्यकामत्वं साधारणम्, न पितृलोकादीनामसाधारणम्। नित्यत्वविवक्षायामसम्भवः। तस्मात् पितृलोकादीनां न सत्यकामशब्दार्थत्वं युक्तम्। अत एव न द्यावापृथिव्यादीनामपितदर्थतेति द्यावापृथिव्यादिपदानां तृतीयखण्डस्थसत्यकामपदस्य वा दहराकाशान्तरुपास्यपरत्वमसम्भवि। ‘स्वेन रूपेणाभिनिष्पद्यत’ इत्यस्यापहतपाप्मत्वादिगुणपरत्वस्य ‘ब्राह्मे च जैमिनिरि’त्यत्र, ‘उत्तराच्चेदि’त्यत्र चोपपादनात्। प्राप्यभूतगुणान्तर्गतं सत्यकामत्वं ‘सर्वेषु लोकेषु कामचारो भवती’त्यनेनोक्तं गुणाष्टकोपलक्षणार्थम्। सर्वेषु वस्तुषु यथाकामं सम्बन्धो भवतीत्यर्थः। द्वितीयखण्डेऽयमेवार्थः प्रपञ्चितः। अनन्तरं किमिदं जीवस्य सत्यकामत्वमपि तथासङ्कल्पत्वं

1. छा.उ.8.1.1
2. छा.उ.8.3.1
3. छा.उ.8.3.2
4. छा.उ.8.1.3

स्वाभाविकमुतौपाधिकम्। आद्ये इदानीमपि तत्प्रसङ्गः। द्वितीये स उपाधिर्वाच्य इत्यत्राह - [1]'त इमे सत्याः कामा अमृतापिधाना' इति।स्वाभाविकमेव कर्मणा प्रतिबद्धमित्यर्थः। तदेव द्योतयति 'एषामि'ति। सर्वथा पिधानं स्यादित्यत्राह- 'यो ह्यस्येत' इति। न मोक्षदशायामपिधानम्, किन्तु संसारदशायामित्यर्थः। 'अत्र ह्यस्यैते' इति तु सत्यस्यापि कामस्य मुक्तौ फलोपधानाभिप्रायम्। तस्मात् प्रथमखण्डे 'सत्यान् कामानि'ति कामशब्दः काम्यमानपरः, तृतीयखण्डे कामनापर इति।'तद्यथे'त्यादि हृदयस्थस्याज्ञानोपपादनार्थम्।अहरहः प्रतिदिवसं सुषुप्तिकालेऽव्यासङ्गेन ब्रह्मसङ्गता अपि ब्रह्म न जानन्ति। किमुत जाग्रत्स्वप्नदशयोः सव्यासङ्गयोरिति भावः।

यद्वा तृतीयखण्डे 'त इमे सत्याः कामा' इति, [2]'अत्र ह्यस्यैते सत्याः कामा' इति च जीवगतापहतपाप्मत्वादय उच्यन्ते। इदानीं कथं न कामचार इति शङ्कायामपहतपाप्मत्वादिगुणा इदानीं अनृतेनापिहिताः, मोक्षदशायामेव तदाविर्भाव इत्युच्यते।

यद्वा हृदये विद्यमानस्यापि भगवतो गुणा अनृतेनापिहितत्वादिदानीं न ज्ञायन्ते। उपदेशादिना तदुपासने कृते पूर्वोक्तकामचारलक्षणफलं भवतीत्यर्थः। तत्र च 'एतत्सत्यं ब्रह्मपुरमित्यत्र ब्रह्मपुरमि'ति वाक्येन दहराकाश एव ब्रह्म, स एव च भगवानिति सिद्धमिति अत्र ब्रह्मपुरशब्दे कर्मधारयस्य सर्वसम्प्रतिपन्नत्वाद्दहराकाशस्यैव ब्रह्मत्वावगमान्न तद्वर्ति ब्रह्मेति सम्भवति। न चैतत्सत्यं ब्रह्मपरमित्येतदाकाशान्तवर्तिविषयमिति वक्तुं शक्यम्। 'अस्मिन् कामास्समाहिता' इत्यस्यैव त्वन्मते ब्रह्मविषयत्वात्। [3]'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामानि'ति वाक्यानुसारेण तथैव युक्तत्वात्। [4]'तस्मादेतत्सत्यं तद्ब्रह्मपुरमि'ति वाक्येन दहराकाश एव ब्रह्म। स एव च भगवानिति च सिद्धः। तथाहि [5]'तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमि'ति प्रकृतस्य ब्रह्मणस्सत्यकामत्वं श्रुतम्।

सत्यशब्दश्च भगवद्वाचकतया नारायणादिनामतुल्यतयोद्योगपर्वणि मोक्षधर्मे च निरुक्तः। [6]'सत्ये प्रतिष्ठितः कृष्णस्सत्यमस्मिन् प्रतिष्ठितम्', [7]'सच्चासच्चैव गोविन्दः तस्मात्सत्यः सतां मत' इति उद्योगे। 'सच्चासच्चैव गोविन्द' इति सामानाधिकरण्यं तन्नियन्तृत्वेन तच्छरीरत्वात्।

---

1. छा.उ.8.3.1
2. छा.उ.8.3.2
3. छा.उ.8.1.6
4. छा.उ.8.1.5
5. छा.उ.8.3.4
6. म.उ.70.12
7. म.उ.70.13

तच्च [1]'तान्येतानि त्रीण्यक्षराणि सत्तियमिति। यत् सत् तदमृतम्, अथ यत् ति तन्मर्त्यम्, अथ यत् यं तेनोभौ यच्छती'त्यत्र सत्यनामनिर्वचनश्रुत्यभिमतं चेतनाचेतननियन्तृत्वमभिप्रेत्य कृतम्।

**[2]'नोक्तपूर्वं मया क्षुद्रमश्लीलं वा कथञ्चन।**
**ऋता ब्रह्मसुता सा मे सत्या देवी सरस्वती॥'**
**[3]'सच्चासच्चैव कौन्तेय मयाऽऽवेशितमात्मनि।**
**पौष्करे ब्रह्मसदने सत्यं मामृषयो विदुः॥' इति**

अत्रापि 'सच्चासच्चैवे'त्युक्तश्रुतिनिरुक्तार्थोऽभिप्रेतः। [4]'ब्रह्मपुरे दहरं पुण्डरीकं वेश्म' इति श्रुत्यर्थः 'पौष्करे ब्रह्मसदने' इत्यनेनाभिप्रेतः।पौष्करे- पुष्करसम्बन्धिनि पुष्पे हृदयपुण्डरीके, ब्रह्मसदने – आकाशाख्यस्य ब्रह्मणो वेश्मनि 'दहरं पुण्डरीकं वेश्मे'ति श्रुतेः, तत्र स्थितं सत्यं मामृषयो विदुरित्यर्थः।पुण्डरीकान्तर्वर्ति यद्ब्रह्म सत्याभिधानत्वेन श्रुत्युक्तं सोऽहमेवेति भावः। एवं श्रुतिस्थसत्यनामवाच्यत्वाभिधानात् भगवद्वाचिसत्यशब्दः अभिधेयवल्लिङ्ग इत्यपि सिध्यति। [5]'वेदेषु सपुराणेषु यानि गुह्यानि कर्मभिः [6]तेषां निरुक्तं त्वत्तोऽहं श्रोतुमिच्छामि केशवे'ति प्रश्ने प्रवृत्तत्वात् दहरान्तर्वर्तिवाचकस्य श्रुतिसिद्धसत्यनाम्नो निर्वचनमेतदप्युचितम्।

सहस्रनामसु च सत्यशब्दो 'वसुर्वसुमनाः सत्य' इति विष्णुनामतया पठितः। श्रौतनिर्वचनवाक्ये सकारतकारयकाराणामेवार्थ उच्यते। 'सत्तियमि'त्यत्र इकारः सुखमुखोच्चारणार्थः। अत एवाथ यत्तीति ह्रस्वान्ततया निर्देशः।

किञ्च [7]'इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति, अनृतेन हि प्रत्यूढाः', [8]'स वा एष आत्मा हृदी'ति हृदयवर्तिन आत्मन एव स्वापस्थानत्वेनाभिधानाद्ब्रह्मलोकशब्देन कर्मधारयेण ब्रह्मत्वाभिधानाच्च ब्रह्म दहराकाशः। [9]'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाये'ति श्रुतमसङ्करेण धारकत्वञ्च ब्रह्मधर्मः। [10]'एतस्य वा

1. छा.उ.8.3.5
2. महा.मोक्ष.342.75
3. महा.मोक्ष.342.76
4. छा.उ.8.1.1
5. महा.मोक्ष.341.6
6. महा.मोक्ष.341.7
7. छा.उ.8.3.2
8. छा.उ.8.3.3
8. छा.उ.8.4.1
10. बृ.उ.5.8.8

अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत' इति श्रुतेः। [1]'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशान' इत्युपक्रम्य 'एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाये'ति सर्वेश्वरस्य धारकत्वश्रुतेश्च। [2]'एवमेवैष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परञ्ज्योतिरुपम्पद्य स्वेन रूपेणाभिनिष्पद्यते। [3]स उत्तमः पुरुष' इति दहरोपासकोपास्यस्य पुरुषोत्तमत्वनिर्धारणाच्च न तदन्यो दहरविद्योपास्यः। उपसम्पदनीयं परञ्ज्योतिः किं देवतारूपमित्यपेक्षायामुत्तमपुरुष इति पुरुषोत्तमत्वेन निर्धारणादुत्तमः पुरुष इत्यत्रोत्तमत्वस्यावधिसापेक्षत्वादन्तरङ्गतया पुरुषशब्दार्थतया च सजातीयानां [4]पुरुषाणामेवावधितयान्वयात् 'सर्वेभ्यःपुरुषेभ्य उत्तम' इति सिद्ध्यति। अत्र 'स उत्तम' इति तच्छब्दो ज्योतिःपरः, मुक्तपरत्वेऽयोग्यत्वेन सर्वपुरुषेभ्य उत्तमत्वस्य विधानासम्भवात्। अनुवादत्वे च उत्तमः पुरुषः स तत्र पर्येतीत्येकवाक्यतैव स्यात्, न तु स उत्तमः पुरुषः स तत्र पर्येतीति वाक्यभेदः। तच्छब्दद्वयेन च वाक्यभेदो दुरपह्नवः। अतः 'स उत्तमः पुरुष' इति ज्योतिष्ष्वेव पुरुषोत्तमत्वं देवताविशेषनिर्णयार्थं विधीयते। स तत्र हि पर्येतीति तच्छब्दो मुक्तपरः। तत्र पुरुषोत्तमे पर्येति परिचरति। परिचरणप्रकार एवोच्यते[5] 'जक्षदि'त्यादिना। इदञ्च सर्वेभ्यः पुरुषेभ्य उत्तमत्वं गीतोपनिषदा भगवत एवावगम्यते।

**[6]'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।**
**क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥**
**उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।**
**यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥'**

इत्युत्तमपुरुषशब्दार्थः परमात्मेत्युक्त्वा 'यो लोकत्रयमाविश्य बिभर्त्यव्य ईश्वर' इत्युत्तरार्धे आविश्येश्वरस्सन् - नियन्ता सन् बिभर्तीत्यन्तः प्रविश्य नियमनेन धारकत्वमात्मशब्द-प्रवृत्तिनिमित्तम्,'लोकत्रयमव्यय' इत्यात्मनोऽप्यात्मत्वेन सर्वात्मत्वेन च परमशब्दार्थं चाभिधाय एवम्भूत उत्तमपुरुषशब्दार्थः परमात्मा इत्युक्त्वा 'यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर' इत्युत्तरार्धे 'आविश्य ईश्वर' अहमेव, अत एव लोकवेदयोः पुरुषोत्तमशब्दो मम समाख्यात्वेन प्रथित इति

---

1. बृ.उ.6.4.22
2. छा.उ.8.12.2
3. छा.उ.8.12.3
4. पुरुषार्थमेवावधितयान्वयात् इति पाठभेदः ।
5. छा.उ.8.12.3
6. भ.गी.15.16-17

**[1]‘यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः।**
**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥’**

इति पुरुषोत्तमसमाख्यां प्रमाणत्वेनोपन्यस्यता भगवता उत्तमपुरुषतायाः स्वस्मिन्नेव प्रतिष्ठापितत्वात्।

अत्र ‘क्षरस्सर्वाणि भूतानी’ति बद्ध उच्यते। कूटस्थ इति मुक्तः। उत्तमः पुरुषः - एतेभ्य उत्तम इत्यर्थः, सन्निधानात्। क्षरमतीतः - क्षरमतिक्रान्तः तद्विलक्षणः क्षरादुत्तमपुरुषोत्तमसमाख्येति यावत्। अत एवाक्षरादपीति समुच्चयः।

एवं भगवतैव पुरुषोत्तमशब्दस्य योगार्थप्रदर्शनात् केवलरूढिः पुरुषोत्तमशब्द इति वदन्तो निरस्ताः। ते ह्येवं प्रलपन्ति वेदबाह्याः - पुरुषोत्तमशब्दो न कर्मधारयः, उत्तमशब्दस्य पूर्वनिपातप्रसङ्गात्। न च षष्ठीसमासः, [2]‘न निर्धारण’ इति निषेधात्। नापि सप्तमीसमासः,‘न निर्धारण’ इति निषेधादेव।

न च वाच्यं षष्ठ्या एवायं समासनिषेधो न सप्तम्या इति। विशेषाभावेन सप्तम्या अपि निषेधात्। अन्यथा षष्ठीसप्तमीसमासयोः रूपतोऽर्थतश्च भेदाभावेन निषेधानर्थक्यात्। अतोऽत्रावयवार्थनिरुक्तेरसम्भवात् केवलरूढिरेवायमश्वकर्णादिवदिति,

मैवम्। [3]‘यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तम’ इत्यादिनिरुक्त्यनुसारेण [4]‘पञ्चमी विभक्त’ इति विहितपञ्चम्याः, [5]‘पञ्चमी भयेने’त्यत्र पञ्चमीति योगविभागात् समासोपपत्तेः। योगविभागश्च ‘तादपि परस्तपर’ इति भाष्यवाक्यादवगम्यते। ‘शेषे षष्ठी’ वेयं नीचोत्तमभावसम्बन्धावलम्बिनी। अथवा पुनरस्तु निर्धारणे सप्तम्यास्समासः। न च ‘न निर्धारण’ इति षष्ठीसमासप्रतिषेधानर्थक्यम्। यतः सप्तमीसमासे तत्पुरुषे ‘तुल्यार्थतृतीयासप्तम्युपमाने’त्यादिना पूर्वपदप्रकृतिस्वरेण भवितव्यम्। षष्ठीसमासे त्वन्तोदात्तेन। तत्रान्तोदात्तनिषेधार्थो निषेधः। षष्ठीसमासे चाक्रोशविवक्षायां [6]‘षष्ठ्या आक्रोश’ इत्यलुक् माभूदित्येवमर्थश्च निषेधः। तस्माद्योगरूढ एवायम्। योगनिरासे वा नरोत्तमादौ का गतिः। ‘न निर्धारण’ इति षष्ठीसमासनिषेधः समुदायसमुदायिनोरेव, न तु निर्धारणप्रयोजकरूपवाचिनां शूरादिपदानामिति नवीनाः।

---

1. भ.गी.15.18
2. पा.सू.2.2.10
3. भ.गी.15.18
4. पा.सू.2.3.42
5. पा.सू.2.1.37
6. पा.सू.6.3.21

आचार्यैस्तु नायं पक्षोऽनुगृहीतः। तेषामयमाशयः -'न निर्धारण' इति सामान्यतो निषेधान्निर्धारणषष्ठ्या 'षष्ठी'ति समासशास्त्रेण समासः केनापि सम्बन्धेन भवितुं नार्हति। अत एव 'न निर्धारण' इति सूत्रे वृत्तिकारोदाहृते 'क्षत्रियो मनुष्याणां शूरतमः','गवां कृष्णा सम्पन्नक्षीरतमे'त्युदाहरणद्वये आद्ये क्षत्रियशब्देन द्वितीये सम्पन्नक्षीरतमेत्यनेन समासनिवृत्तिः प्रयोजनम्। गुणवाचिना समासस्य 'पूरणगुणे'ति निषेधादित्युक्तं दत्तेन।

अस्तु वा निर्धार्यसमर्पकपदेनैव समासनिषेधः, तथापि न षष्ठीसमाससम्भवः। उत्तमपदस्य निर्धार्यसमर्पकत्वात्। न हि निर्धार्यसमर्पकं पदान्तरं दृश्यते। न च निर्धार्यसमर्पकाभावे निर्धारणषष्ठ्युपपद्यते। समुदायो रूढिशक्त्या निर्धार्यमुपस्थापयतीति चेन्न, समुदायस्य त्वेकदेशान्वयासामर्थ्यात्।

वस्तुतस्तुनिर्धारणस्थले समुदायसमुदायिनोरेव सम्बन्धः, न तु समुदायविधेययोः, विप्राणां देवदत्तो भुङ्क्त इत्यत्र तद्दर्शनात्। कथं तर्हि मनुष्याणां क्षत्रियः शूरतम इत्यत्र मनुष्याणामवधित्वेन प्रतीतिः, निर्धारणसामर्थ्यात्, अवध्यपेक्षायामुपस्थितपरित्यागे नियामकाभावाच्चार्थादेवावधितया-न्वयसिद्धेः। तस्मात् समुदायसमुदायिसमर्पकपदयोरेव समासतन्निषेधौ। तर्हि कथं'गवां कृष्णा सम्पन्नक्षीरतमे'त्युदाहरणमिति चेन्न, सम्पन्नक्षीरतमेत्यस्यैव निर्धार्यसमर्पकतया विवक्षितत्वात्। तर्हि नेदं गुणवाचिन उदाहरणं स्यात्। जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणमित्युक्त्वा क्रमेण त्रीण्युदाहरणान्युक्तानि। अत इदं गुणवाचिन एवोदाहरणमिति वाच्यमिति चेन्न, जातिशब्दस्य संज्ञाद्रव्योपलक्षणतया व्याख्याततत्वेन द्रव्येण निर्धारणेऽस्योदाहरणत्वात्। प्रक्रियामञ्जर्यां तु क्षत्रियो मनुष्याणामित्येवास्य सूत्रस्योदाहरणम्। निर्धारणे वैविध्यप्रदर्शनार्थं गवां कृष्णेत्याद्युदाहरणमित्युक्तम्।

अथवाऽस्तु कर्मधारयः। न च 'सन्महदि'ति पूर्वनिपातप्रसङ्गः, पूजाया अविवक्षायां समासोपपत्तेः। उत्तमत्वस्य स्वरूपमात्रेण विवक्षितत्वात् पूजार्थतया तस्याप्रतिपादनात्, योऽयं वक्रकेशान्तस्तमानयेत्यत्र वक्रकेशान्तत्ववत्। एवञ्च [1]'विशेषणं विशेष्येण बहुलमि'ति समासः। अत एव पूजाया अविवक्षायां महाजनः, महोदधिरित्यत्र 'विशेषणं विशेष्येणे'ति समास इत्युक्तं हरदत्तेन। न चैवमप्युत्तमशब्दस्य पूर्वनिपातप्रसङ्गः, विशेषणत्वादिति वाच्यम्। 'पुरु सनोतीति पुरुष'इति भूरिदत्ववाचितया तस्यापि विशेषणत्वात्। 'सन्महदि'ति सूत्रं तु पूजाविवक्षायां गुणक्रियाशब्दैस्समाने सदादीनामेव पूर्वनिपातनियमार्थमित्युक्तं दत्तेन।

यद्वा पुरुष इति रूढ एवास्तु। तथापि न कर्मधारयानुपपत्तिः, 'प्रशंसावचनैरि'त्येव समाससिद्धेः। तथाहि पुरुषशब्दो जातिवचनः उत्तमशब्दश्च प्रशंसावचनः।

---

1. पा.सू.2.1.57

**‘क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः।**
**मुख्यवर्यवरेण्याश्च [1]प्रबर्हानवराध्र्यवत्॥’**
[2]**‘श्रेयान् श्रेष्ठः पुष्कल स्यात् सत्तमश्चातिशोभने॥** इत्यमरकोशे,

**‘क्लीबे प्रधानं प्रमुखप्रबर्हप्रवरोत्तमाः।’**इति वैजयन्त्याञ्च पाठात्। न च ‘ रूढिशब्दाः प्रशंसावचना गृह्यन्ते मतल्लिकादय’ इति वृत्तिकारोक्त्या ‘मतल्लिकामचर्चिके’ति श्लोके पठिता एव गृह्यन्त इति भ्रमितव्यम्। तत्र नियामकाभावेन रूढिशब्दप्रदर्शनपरत्वाद्वृत्तेः। चान्द्रव्याकरणवृत्तौ ‘विशेषणमेकार्थेने’ति सूत्रे बहुलग्रहणात् क्वचिद्विशेषणस्यापि परनिपातः पुरुषोत्तम इति, क्वचित् पूर्वनिपात उत्तमपुरुष इतीत्युक्तम्।

नन्वध्यायादौ [3]‘ऊर्ध्वमूलमधश्शाखमि’ति संसारवृक्षं परिकीर्त्य [4]‘ततः परं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूय’ इति संसारमण्डलातीतं परं ब्रह्म अनावृत्तिफलसिद्धये उपासितव्यमित्युक्त्वा [5]‘तमेव चाद्यं पुरुषं प्रपद्य’ इति तमेवादिमं सर्वोत्तमं पुरुषमहमपि सर्वदोपास इति स्वस्याप्युपास्यभूतं वस्त्वन्तरं भगवतैव दर्शितम्। तत्कथं [6]‘यस्मात् क्षरमतीतोऽहमि’ति श्लोके स्वस्य सर्वोत्तमत्वप्रतिपादनं सङ्गच्छते। अतोऽन्यपरमेतदिति चेन्न, कथं परिमार्गितव्यमित्यत्राह ‘तमेव चे’ति यः परशब्देनोक्तः, आदौ भवमाद्यं तं पुरुषं प्रपद्य इत्येवं परिमार्गितव्यमिति परिमार्गणशब्दविवक्षितोपासनाप्रकारपरत्वेन शङ्करभाष्ये व्याख्यानात्।

अस्तु वा कृष्णस्य स्वस्मिन्नेवायमुत्तमपुरुषः, तथापि तस्य धर्मसंस्थापनार्थावताररूपस्य रहस्यतमार्थोपदेशाङ्गभूताचार्यानुसन्धानरूपधर्मप्रवर्तनार्थमाद्यपुरुषरूपेण सर्वगुरुभूतस्य स्वस्य तदानीन्तननमस्कारप्रतिपादनं न कृष्णस्यान्योपासकत्वपरम्। अत एव हि नारायणीये स्वनाम्नां निरुक्तमर्जुनेन पृष्टस्य भगवतः कृष्णस्य उपदेशार्थप्रभावशिष्ययोग्यताख्यापनपूर्वकम् आदिगुरुभूतपरमपुरुषनमस्कारनिरुक्तोपदेशात् प्राक् दृश्यते -

[7]**‘नमोऽतियशसे तस्मै देवानां परमात्मने।’**
[8]**‘नारायणाय विश्वाय निर्गुणाय गुणात्मने।**
**यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसम्भवः॥’ इत्यादिः।**

---

1. पाठभेदाः – प्रवर्हानपरार्थ्यवत्, प्रवह्वेनपरार्थ्यवत्, प्रवर्होनपरार्थ्यवत् ।
2. अ.को.3.26
3. भ.गी.15.1
4. भ.गी.15.4
5. भ.गी.15.4
6. भ.गी.15.18
7. म.मो.341.11
8. म.मो.341.12

अत 'अहमप्याद्यं पुरुषं सर्वदोपास्यमि'त्यर्थेऽपि न दोषः। अवताररूपस्य कृष्णस्य धर्मप्रवर्तनार्थं परमपुरुषभूतस्वोपासनानुष्ठानसम्भवात् तस्यैवात्राभिधानात्। इह हि [1]'ऊर्ध्वमूलमधश्शाख'मित्याद्यश्लोकेन कठवल्लीगतस्य [2]'ऊर्ध्वमूलमवाक्छाखमि'ति मन्त्रस्य [3]'पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूय' इत्यनेन [4]'स तु तत् पदमाप्नोति यस्माद्भूयो न जायत'इति मन्त्रांशस्य च प्रत्यभिज्ञानात्। [5]'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमि'त्युक्तं विष्ण्वाख्यं ब्रह्मस्वरूपं ततः पदमिति पदशब्देन विवक्षितम्। तस्य च [6]'पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिरि'ति निरस्ताभ्यधिकत्वेन समनन्तरमन्त्रे उक्तत्वात्। तदभिप्रायेण 'तमेव चाद्यं पुरुषमि'त्युक्तम्। पदशब्दोक्तं पुरुषमित्यर्थः। शङ्करभाष्येऽपीत्थं तमित्येतद्व्याख्यातम्। वैष्णवं पदं च भगवत्स्वरूपमिति प्रागुपपादितम्। आद्यं पुरुषमिति च भारतादावेव [7]'आद्यं पुरुषमीशानमि'ति नमस्कारश्लोक एव विष्णौ प्रयुक्तः इहापि तद्विषयो युक्तः। कृष्णस्य च स्वात्मोपासकत्वं श्रीविष्णुपुराणेऽप्यभिहितम् -

**[8]'गते तस्मिन् स भगवान् संयोज्यात्मानमात्मनि।**
**ब्रह्मभूतेऽव्ययेऽचिन्त्ये वासुदेवमयेऽमले॥'**
**[9]'सन्त्यज्य मानुषं देहमतीत्य त्रिदिवं ययौ।'** इति।

भागवते च दशमस्कन्धे सप्ततितमेऽध्याये –

**[10]'क्वचिद्धर्मं सेवमानमर्थकामौ च कुत्रचित्।**
**ध्यायन्तमेकमात्मानं पुरुषं प्रकृतेः परम्॥'**

अत्र कृष्णं नारदोऽपश्यदित्यनुषङ्गः। अत्र पुरुषमित्यनेनैव विशेष्यलाभादात्मशब्दः स्वपरः। पर्वते भगवतोऽवतारेषु स्वात्मयजनाद्यपि दृश्यते। यथा नारायणीये वराहं प्रकृत्य,

**[11]'स तेष्वात्मानमुद्दिश्य पित्र्यं चक्रे यथाविधि'**

---

1. भ.गी.15.1
2. क.उ.2.3.1
3. भ.गी.15.4
4. क.उ.1.3.8
5. क.उ.1.3.9
6. क.उ.1.3.11
7. महा.आदि.1.22
8. वि.पु.5.37.74
9. वि.पु.5.37.75
10. भा.पु.10.69.20
11. महा.मोक्ष.345.15

[1]**‘सङ्कल्पयित्वा त्रीन् पिण्डान् स्वेनैव विधिना प्रभुः’**
[2]**‘मर्यादास्थापनार्थं च ततो वचनमुक्तवान्॥’इति,**
[3]**‘वराहपर्वते विप्र दत्वा पिण्डान् सविस्तरान्।**
**आत्मानं पूजयित्वैव तत्रैवादर्शनं गतः॥’** इति च।

श्रीमद्गीताभाष्ये तु भगवतेत्थमनुगृहीतम्। तत्र हि [4]‘असङ्गशस्त्रेण दृढेने’ति पूर्वश्लोकस्थपदद्वयं सम्यज्ज्ञानमूलेन दृढेन गुणमयभोगासङ्गाख्येन शस्त्रेण छित्वेति व्याख्यायावतारितम्। कथमनादिकालप्रवृत्तो गुणमयभोगस्तन्मूलञ्च विपरीतज्ञानं निवर्त्यत इत्यत्राह ‘तमेव चे’त्यादि। [5]तमेवाद्यं पुरुषं प्रपद्य - शरणमुपगम्य इयतः अज्ञाननिवृत्त्यादेः कृत्स्नस्य साधनभूता ‘प्रवृत्तिः पुराणी प्रसृता’- पुरातनानां मुमुक्षूणां प्रवृत्तिः पुराणी। पुरातना हि मुमुक्षवो मामेव शरणमुपागम्य निर्मुक्तबन्धास्सञ्जाता इत्यर्थः इति च व्याख्यातम्। ‘इयत’ इति च पूर्वश्लोकोक्तास्सम्यक्ज्ञान-भोगासङ्गपरिमार्गणभूयोनिवृत्तयः –

[6]**‘निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः।**
**द्वन्द्वैर्विमुक्तास्सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत्॥’**

इत्युत्तरश्लोके यच्छब्दविवरणत्वेन भगवद्भाष्यव्याख्याते गृहीताश्च परामृश्यन्ते। भाष्ये साधनभूतेति षष्ठीविवक्षितसम्बन्धसामान्यविवरणम्। प्रवृत्तिश्चाज्ञान निवृत्त्याद्यर्थः पुरुषव्यापारः। तत्समानकर्तृकत्वात् ‘त्त्वा’ प्रत्यय इति भाष्याभिप्रायः। प्रपद्येदिति पाठान्तरं दृश्यते। तदा यतः- यस्मात् कृत्स्नस्रष्टुरियं गुणमयभोगसङ्गप्रवृत्तिः पुराणी प्रसृता इति भाष्योक्तव्याख्यान्तरमनुसन्धेयम्। यदाज्ञातिलङ्घनात् बन्धः स एव हि प्रसादितस्सन् अज्ञानादिनिवर्तनेन मोचक इत्येवकाराभिप्रायः।

छान्दोग्य एव [7]‘कं ब्रह्म खं ब्रह्मे’त्याकाशस्यैव ब्रह्मत्वमुक्तम्। तद्विषयञ्च सूत्रं ‘सुखविशिष्टाभिधानादेव चे’ति,‘अत एव च स ब्रह्मे’ति च स्वस्य ब्रह्मत्वं निर्धारयति। बृहदारण्यके च सप्तमप्रपाठकादौ [8]‘ओं खं ब्रह्म खं पुराणमि’ति खमेव ब्रह्मेत्युक्तम्। तत्र

1. महा.मोक्ष.345.16
2. महा.मोक्ष.345.17
3. महा.मोक्ष.345.24
4. भ.गी.15.3
5. भ.गी.15.4
6. भ.गी.15.5
7. छा.उ.4.10.5
8. बृ.उ.7.1.1

'ब्रह्म खम् ओमि'ति त्रयं समानाधिकरणम्। अत्र 'ब्रह्म खमि'ति विशेष्यते। तच्च किमित्याकाङ्क्षायां रक्षकवाचिना अवतेः कर्तरि व्युत्पन्नेन ओमित्यनेन विशिष्यते। आकाशं ब्रह्म रक्षकत्वेन प्रसिद्धो विष्णुरेव न ततोऽन्य इत्यर्थः। अतो ब्रह्मैवाकाशो विष्णुश्च। [1]'सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते। आकाशं प्रत्यस्तं यन्ति। आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणमि'ति वाक्यान्तरमप्याकाशमेव परमकारणं परमं प्राप्यञ्च ब्रुवत्परब्रह्मत्वमावेदयति। सूत्रमपि 'आकाशस्तल्लिङ्गादि'त्येतद्विषयं आकाशस्य ब्रह्मत्वं साधयति। सूत्रविरोधश्च [2]'दहर उत्तरेभ्य' इति सूत्रेण दरहस्यैव ब्रह्मत्वनिर्णयात्। 'क्रमादितरत्र तत्र चायतनादिभ्य' इति सूत्रविरोधश्च। छान्दोग्यश्रुतावपहतपाप्मत्वादयः सत्यकामोपलक्षिताः। [3]'य एषोऽन्तर्हृदय आकाशः तस्मिञ्छेते', 'सर्वस्येशानः','एष सर्वेश्वर' इति बृहदारण्यकश्रुत्युक्त्या वशित्वादयश्चेतरत्र तत्र चोभयत्रोपसंहर्तव्याः। आयतनादिभ्यो हेतुभ्यः छान्दोग्यश्रुतस्य दहरपुण्डरीकस्यायतनस्य बृहदारण्यकेऽप्याम्नातत्वादिति तत्सूत्रार्थः। 'अन्तर्हृदय आकाश' इति चाकाशश्रुतिविवक्षित इति सूत्रकृदाशयः। यदि दहराकाशान्तर्वर्ति ब्रह्म उपासितव्यं तदा दहरस्यापहतपाप्मत्वादयो वशित्वादयस्तदन्तर्वर्तिन ईश्वरस्येति कथमेकत्वोपसंहारः। कथञ्चायतनैक्यं हृत्पुण्डरीकदहराकाशयोर्भेदात्। तस्मात् पुण्डरीकान्तर्वर्त्येव दहराकाशः सर्वेश्वरः न तदन्तर्वर्तिपुरुषान्तरशङ्का वाक्यविरोधश्च। वाक्यकारो हि 'तस्मिन् यदन्तरिति कामव्यपदेश' इत्याह। यदतिदन्तर्वर्ति ब्रह्म तदा ब्रह्मव्यपदेशे इत्येवोच्येत। कामव्यपदेशरूपतायाः स्पष्टत्वेन तस्या अवाच्यत्वात्। अतस्तद्वाक्यं तदन्तर्वर्तिपुरुषान्तरशङ्काव्यवच्छेदायैवेति।

यत्तु [4]'यावान्वा अयमाकाशः तावान् एषोऽन्तर्हृदय आकाश' इत्यत्राकाशपदद्वयमपि दहराकाशपरम्। अभेदे उपमानोपमेयभावायोगादनुपमत्वप्रतीतिमुखेनातिसौक्ष्म्यपरमिति,

तत्र सौक्ष्म्यनिमित्तशङ्कायास्तेनैव परिहारः कथं समञ्जसो भवति। 'रामरावणयोर्युद्धं रामरावणयोरिवे'त्यत्रैव गत्यन्तराभावसिद्धेश्च सोऽर्थोऽनुपपन्नः। अयमेष इति भेदस्य स्वरसतः प्रतीतेश्च। द्यावापृथिव्यादिसमाधानानुपपत्तेश्च।

यत्तु भोगोपकरणभोगस्थानभोग्यजातं कृत्स्नमपि युगपल्लब्धञ्चेत् यावान् प्रेमा भवति तावत्प्रेमास्पदत्वयोग्यं निरतिशयानन्दरूपं ब्रह्म गौण्या वृत्त्या द्यावापृथिव्यादिसर्वशब्दान्तसकलशब्दसन्दर्भप्रतिपाद्यमिति, तन्निगददोषम्। गौणत्वाभिधानात्। [5]'द्यावापृथिवी'त्यारभ्य

1. छा.उ.1.9.1
2. ब्र.सू.1.3.13
3. बृ.उ.6.4.22
4. छा.उ.8.1.3
5. छा.उ.8.1.3

सर्वशब्दान्तसन्दर्भप्रतिपाद्यमित्यभिधानाच्च। इत्थं 'स्वयं शूलारूढमृतोपरि बाणप्रक्षेपाच्च' भवन्ति। [1]'एतत्सत्यं ब्रह्मपुरमि'त्यनाञ्जस्यम्। [2]'अस्मिन् कामाः समाहिता' इत्यनाञ्जस्यम्। [3]'ब्रह्मणो नाम सत्यमि'तीत्यनाञ्जस्यम्। [4]'एष आत्मा हृदी'त्यनाञ्जस्यमिति। 'एतत्सत्यं ब्रह्मपुरमि'त्यत्र ब्रह्मपुरशब्दस्याभ्यर्हितत्वात् समानाधिकरणत्वे द्यावापृथिव्यादिबहुपदार्थाधारत्वादपह-तपाप्मत्वादिभोग्य-जाताधारत्वाच्चाकाशपरत्वमेव स्यादिति आकाश एव ब्रह्म। अस्य तदन्तर्वर्तिपरत्वे 'अस्मिन् कामास्समाहिता'इत्यनुपपन्नम्, तस्यान्तर्वर्तिपरत्वात्। तच्चोत्तरोपसंहाररूपतायास्त्वया वाच्यत्वात् [5]'आत्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामानि'ति वाक्यानुरोधाच्च सिद्धम्। पूर्वानुसारात् षष्ठीसमासाङ्गीकारे नाकाशपरत्वसम्भवः। किन्तु शरीरपरत्वस्यैव पूर्ववद्भावात्। ततश्च सत्यपदानन्वयः। 'एतत्सत्यं ब्रह्मपुरमि'ति आकाश एवोच्यते। ब्रह्मणः पुरमिति षष्ठीसमास एव। 'अस्मिन् कामाः समाहिता'इति तत्र ब्रह्मणो वृत्त्युपन्यासः। आत्मानमेतांश्चेत्याकाशतद्वर्तिब्रह्मणोः परिगृहीतश्चोपपद्यत इति चेन्न। पुरत्वेन रूपेणानाञ्जस्यात्। शरीरं पुरत्वेन पुण्डरीकं वेश्म तया च रूपयित्वा तत्राकाशाख्यसिंहासने परिग्रहस्वामी वर्तत इति प्रतिपाद्यत इति हि तव कुदृष्टिः। तत्र प्राणादिरूपणमध्ये आसनस्य पुरत्वेन रूपणं कथमिवाञ्जसं भवेत्। सिद्धान्ते तूपक्रान्तरूपणस्याकाशपर्यन्तेनैव समाप्तेराकाशस्यापहतपाप्मत्वादि-भोग्यजाताधारत्वात् तस्य पुरत्वेन रूपणमञ्जसमेव।

किञ्च एतत्सत्यपदनिर्वचनवाक्ये [6]'तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिती'ति 'सत्यं ब्रह्मपुरमि'त्युक्तसत्यपदं प्रत्यभिज्ञायते। तच्च ब्रह्मनामेत्युक्तम्। अतः कथमाकाशान्तर्वर्तिनो ब्रह्मत्वम्, आकाशस्यैवानेन ब्रह्मत्वसिद्धेः। न च 'सत्यान् कामानि'त्युक्तसत्यशब्दनिर्वचनमुत्तरत्र क्रियत इत्युक्तम्, नपुंसकैकवचनाभ्यां तत्प्रत्यभिज्ञाप्रतिबन्धात्। [7]'एष आत्मा हृदी'त्यात्मनो हृदयान्तर्वर्तित्वम्। तत्र 'एतदभयमेतद्ब्रह्मे'ति ब्रह्मगुणाश्चोक्ताः। अयमेव चात्मा 'आत्मानमनुविद्य व्रजन्त्येतांश्चे'त्यत्रोक्तः। आत्मशब्देनान्तर्वर्त्याश्रयनिर्देशादाकाशपर एवायमात्मशब्दः।

यदुक्तं बृहदारण्यके आकाशशब्दश्छान्दोग्यदहराकाशपर इति, तन्न। [8]'एतस्य वा अक्षरस्य

---

1. छा.उ.8.1.5
2. छा.उ.8.1.5
3. छा.उ.8.3.4
4. छा.उ.8.3.3
5. छा.उ.8.1.6
6. छा.उ.8.3.4
7. छा.उ.8.3.3
8. बृ.उ.5.8.8

प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत' इति श्रुतस्य प्रशासनेन धारकत्वस्य छान्दोग्ये सत्यनामनिर्वचनगते [1]'यत् सत्, तदमृतमथ यत् ति, तन्मर्त्यम् अथ यद्यम्, तेनोभे यच्छती'ति वाक्ये [2]'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाये'ति वाक्ये च दहरे श्रवणेनाक्षरस्यैव दहराकाशत्वात्। तथा च सूत्रकारोऽक्षरधर्मेण प्रशासनपूर्वकधारणेन दहराकाशस्य ब्रह्मतां साधयन् बृहदारण्यकाकाशाद्दहराकाशं भिन्नं साधयति 'धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेरि'ति।

वाराहे नारायणपरतयोपबृंहितं चैवमक्षरविषयं (चैतदक्षरविषयम्?) 'अस्थूलमनण्वह्रस्वमदीर्घमि'त्यादि वाक्यम्। तत्र हि भुवनकोशे मुनीन् प्रति रुद्रवाक्येन 'योऽसौ सकलवेद्यादिस्वस्वरूपी विगतकल्मषपरमाणुरचिन्त्यात्मा नारायणस्सकललोकव्यापी पीताम्बर' इत्यारभ्य 'अस्थूलमनण्वह्रस्वमदीर्घमकृशमलोहितमि'त्येवमाद्युपलक्षितविज्ञानमात्ररूपो भगवान् इत्यादिना सलिलसृष्टितदनन्तरस्वापनाभिपद्मब्रह्मसृष्ट्यादि वर्ण्यते। [3]'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चे'ति वाक्ये आकाशशब्दस्त्वव्याकृतपरतया भगवता सूत्रकारेणैव व्याख्यातः। 'अक्षरमम्बरान्तधृतेरि'ति भूताकाशस्य भूतभव्यसमस्ताधारत्वासम्भवमभिप्रेत्य अत्र अम्बरान्तशब्देनाकाशशब्दो व्याख्यातः। अम्बरान्तोऽव्याकृतम्, अन्तः अवधिः, कार्यस्य हि कारणमवधिः। अन्तगहणं च लक्षणाहेतुसम्बन्धप्रदर्शनार्थम्। अत एवाव्याकृतधृतेरित्याद्यनुक्तिः। तत्र शब्दतन्मात्रस्य साक्षात्कारणत्वेऽपि तदिह न विवक्षितम्। तेन भूताकाशग्रहण इव पूर्वपक्षनिरासासिद्धेः। अक्षरं प्रधानमिति हि पूर्वपक्षः। अतः परम्पराकारणमव्याकृतमेव विवक्षितम्। तस्याप्याकाशात् प्राक्कालवर्तित्वेनावधित्वात्। एतदर्थमेवाम्बरकारणधृतेरिति नोक्तम्। अव्यवहितकारणं मा विज्ञायीत्यन्तग्रहणादेव तन्निवर्त्य प्रधानमेव पूर्वपक्ष इत्यवसीयते। वर्णपूर्वपक्षस्याकाशधृतेरित्येतावतापि निवृत्तेः। आकाशशब्दस्य 'आकाशादेव समुत्पद्यन्त' इत्यादिषु ब्रह्मणि प्रचुरप्रयोगात्। 'आ समन्तात् काशत' इत्यवयवार्थस्य सर्वव्यापकस्वयम्प्रकाशचिदात्मनि ब्रह्मणि सम्भवात् भूतभविष्यदादिसमस्तवस्त्वाधारत्वस्य दहराकाश इत्यत्रापि श्रवणात् दहरविषयाकाशशब्दसमानार्थकोऽयमाकाशशब्दो ब्रह्मपर एव भवितुमर्हति। यस्मिन् अस्याकाशस्योतप्रोतत्वं वर्ण्यते तदक्षरम् 'अक्षरात्परतः पर' इत्यत्राक्षरमिव प्रधानं भवितुमर्हति। 'योऽव्यक्तमन्तरे सञ्चरन्नि'त्यादिश्रुतिभिः ब्रह्मणस्तदन्तस्स्थत्वावेदनेन तस्याव्यक्ते ओतत्वप्रोतत्वोपपत्तेरिति शङ्कावारणाय विषयवाक्यगतमप्याकाशशब्दं विहायाम्बरपदं प्रयुक्तम्। तस्यायं भावः - इह वर्ण्यमानमाकाशस्याक्षर ओतप्रोतत्वमक्षरे आधृतत्वरूपम्। तच्चान्तर्यामित्वेनाव्यक्तान्तर्वर्तिनोऽपि तद्धारकस्य परमात्मनः यौगिकाकाशस्य ग्रहणे मुख्यं न सङ्गच्छते। रूढ्यर्थस्याम्बरस्य ग्रहणे तु मुख्यमक्षरे आधृतत्वं

1. छा.उ.8.3.5
2. छा.उ.8.4.1
3. बृ.उ.5.8.6

सङ्गच्छते। भूतभविष्यदादिसर्वाधारत्वस्यासम्भवात् तदम्बरं स्वसम्बन्ध्यव्याकृतमुपस्थाप्य मुख्यधृत्यन्वयमुपपादयतीति।

ननु प्राथमिकगार्गिप्रश्ने [1]'यदिदं सर्वमप्योतं च प्रोतं च, कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति। वायौ गार्गीती'त्यादिकेन गार्गिप्रश्नयाज्ञवल्क्यप्रतिवचनरूपेण संदर्भेण पृथवीसलिलवाय्वन्तरिक्षलोकगन्धर्वलोकादित्यलोकचन्द्रलोकनक्षत्रलोकदेवलोकेन्द्रलोक - प्रजापतिलोकब्रह्मलोकानां मध्ये उत्तरोत्तरं पूर्वपूर्वाधारत्वेन प्रतिपादितम्। ततः [2]'कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्च' इति गार्ग्या पृष्टे 'गार्गि माऽतिप्राक्षीः मा ते मूर्धा व्यपप्तत्। अनतिप्रश्न्यां वै देवतामतिपृच्छसी'ति गुरूपसदनादिनियमेन प्रष्टव्यां देवतामन्यथा प्रष्टुमनर्हान्नियममतिक्रम्य 'मा प्राक्षीरि'ति निवारितः प्रश्न एव पुनः समयान्तरे गार्ग्या याज्ञवल्क्याभ्यनुज्ञापूर्वकं कृतः [3]'यदूर्ध्वं याज्ञवल्क्य दिव' इत्यादिना। तस्योत्तरं 'आकाश एव तदोतञ्च प्रोतञ्चे'ति। एवञ्चाकाशस्य पूर्वोक्तानतिप्रश्नदेवतारूपत्वादचेतनस्य देवतात्वासम्भवान्नात्राव्याकृतमाकाशः। नापि ब्रह्म अक्षरस्यैव 'अक्षरमम्बरान्ते'त्यादिना ब्रह्मत्वनिर्णयात्। एवञ्च नारायण एवात्राकाशः। [4]'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते; आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणमि'ति तस्याकाशत्ववचनात्। तत्र हि महापुरुषविषयपुरुषसूक्तश्रुतस्य [5]'अतो ज्यायांश्चे'ति ज्यायस्त्वस्य श्रवणाल्लिङ्गादाकाशो नारायण इत्यवसीयते। एवं च दहराकाशोऽपि नारायणः। सर्वाधारत्वस्य उभयत्र श्रवणेन प्रत्यभिज्ञानात्। तदन्तरन्वेष्टव्यतया श्रुतं त्वक्षरम्। एवञ्चाकाशादेव समुत्पद्यन्ते। 'दहरोऽस्मिन्नन्तराकाशः','तत्रापि दह्रं गगनं विशोकः','शम्भुराकाशमध्ये', [6]'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेत' इत्यादौ सर्वत्रैकतद्विषयत्वादाकाशशब्दस्य न वैरूप्यम्। [7]'यदेष आकाश आनन्दो न स्यादि'त्यपि तद्विषयम्। तस्य सर्वकारणत्वात् [8]'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त' इत्युपपन्नम्। अत एव तत्प्रकरणे [9]'स एको ब्रह्मण आनन्दः', [10]'आनन्दं ब्रह्मणो विद्वानि'ति व्यतिरेकनिर्देशस्सङ्गच्छते। अस्याकाशस्याक्षरे ब्रह्मणि ओतप्रोतत्वमुच्यत इति।

---

1. बृ.उ.5.6.1
2. बृ.उ.5.6.1
3. बृ.उ.5.8.4
4. छा.उ.1.9.1
5. पु.सू.
6. बृ.उ.6.4.22
7. तै.उ.2.7
8. तै.उ.3.6
9. तै.उ.2.8
10. तै.उ.2.9

अत्रोच्यते - अतिशब्दस्य नियमातिक्रमपरत्वं तावदनुपपन्नम्, प्रकरणविरोधात्। तथाहि [1]'जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे। तत्र ह कुरुपाञ्चालानां ब्रह्मणाभिसमेता बभूवरि'त्यादिना जनकयज्ञदर्शनार्थं समवेतान् कुरुपाञ्चालादिदेशेभ्यस्समागतान् दृष्ट्वा 'क एतेषां ब्रह्मिष्ठ' इति जिज्ञासुना तत्परीचिक्षिषया, गवां सहस्रमवरुध्य एकैकस्याः शृङ्गयोः पलपरिमितं सुवर्णमाबद्ध्य [2]'ब्रह्मणा भगवन्तो यो वो ब्रह्मिष्ठस्स एता गा उदजतामि'त्युक्ते सर्वेष्वधृष्टेषु तूष्णीं स्थितेषु धाष्ट्र्याद्याज्ञवल्क्यानुशिष्टेन तस्य शिष्येण सामश्रवसा गाः उदाक्रियमाणा उपलभ्य क्रुद्धेषु तस्य जनकस्य होता अश्वलस्तदमृष्यमाणः दौष्ट्याद्याज्ञवल्क्यं जेतुकामस्साधिक्षेपं पूर्वं कांश्चिदर्थान् प्रप्रच्छ। तस्मिन् सदुत्तरेण याज्ञवल्क्येन जिते तथैव आर्तभागभुज्यूषस्तकहोलगार्ग्युद्दाल-कविदग्धशाकल्यानां विजिगीषया यथायथं प्रश्नास्सर्वेषाञ्च तेषां पराजयः शाकल्यमूर्धविपातान्तस्संवृत्त इत्यस्मिन् पञ्चमे प्रपाठके श्रूयते। अत्र जल्पकथारूपेण प्रश्ने कृते (न?) गुरूपसदनादिनियमापेक्षा।

किञ्च यदि नियमापेक्षां ब्रूयात्तदा कथं [3]'अहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ बलवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेत् एवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थाम्, तौ मे ब्रूही'ति स्वकीयप्रश्नाभ्यां याज्ञवल्क्यस्य पराजयावश्यम्भावं दृष्टान्तोपन्यासेनाभिव्यज्यातिधाष्टर्येन याज्ञवल्क्यस्याज्ञानप्रकटीकरणेन जयार्थं तं गार्गी प्रत्यवतिष्ठेत। कथं च याज्ञवल्क्यः प्रश्नयोरुत्तरं ब्रूयात्।

किञ्च [4]'तं त्वौपनिषदं पुरुषं पृच्छामि; तं चेन्मे न विवक्ष्यसि, मूर्धा ते व्यपतिष्यतीति। तँ ह न मेने शाकल्यस्तस्य मूर्धा विपपाते'त्येतत्प्रपाठकान्तवाक्ये शाकल्ययाज्ञवल्क्यसंवादरूपे [5]'त्वां स्विदिमे ब्राह्मणा अङ्गारावक्षयणमकृता३'इति वाक्येन त्वां नूनमङ्गारग्रहणसाधनकाष्ठं संदंशादिरूपं कृतवन्तः ब्राह्मणैः प्रेरितस्त्वं भाव्यनर्थमपश्यन् कलहायसे इत्येवमर्थकेन ब्राह्मणानुज्ञया प्रवृत्तत्वेन दर्शितस्यापि शाकल्यस्य मूर्धनिपातवचनेन सत्यवादितया दर्शितो याज्ञवल्क्यो यदि नियममतिक्रम्य पृच्छन्त्या गार्ग्या मूर्धनिपातं ब्रूयात्, तदा साहङ्काराभिलापं विजिगीषया पृच्छन्त्या गार्ग्या मूर्धा कथन्न विपतेत्। 'पृच्छ गार्गी'ति याज्ञवल्क्येनानुमतत्वान्न मूर्धपातप्रसङ्ग इति चेन्न। पूर्वमेव ब्रह्मप्रश्नस्य निषिद्धतया ततो निवृत्ता प्रश्नान्तरमेव करिष्यतीति बुद्ध्यानुमतिदानात्। तदर्थमेव च 'द्वाभ्यामुपोदस्थामि'ति द्वित्वकीर्तनम्। ननु द्वित्वकीर्तनस्य कथं तादर्थ्यमिति चेन्न। द्वित्वकीर्तनेनानिवारितप्रश्नसाहचर्येण प्रश्नान्तरत्वबुद्धेरेव दृढीकरणात्।

---

1. बृ.उ.5.1.1
2. बृ.उ.5.1.2
3. बृ.उ.5.8.2
4. बृ.उ.5.9.26
5. बृ.उ.5.9.18

ननु ब्रह्मलोकाधारे उक्ते तस्याप्याधारभूतं ब्रह्म प्रक्ष्यतीति बुद्ध्या खलु तन्मूलभूतप्रश्नो निषिद्धः। अतः प्रश्नद्वित्वकीर्तनमस्य प्रश्नद्वयस्य पूर्वनिषिद्धत्वबुद्धिव्यावर्तनासमर्थमिति चेन्न। पूर्वनिषेधस्य प्रश्नद्वयगोचरत्वे मानाभावात्। एकमात्रप्रश्नानन्तरं प्रवृत्ततया 'अनतिप्रश्न्यां देवतामि'त्येकवचनेन चैकप्रश्नविषयत्वस्यैव प्रतीतेः। तस्मात् प्रश्नान्तरत्वबुद्ध्यैवानुमतिदानम्। प्रवक्ष्यामीत्यादिवचनस्य निवारितप्रश्नाभ्यनुज्ञानार्थत्वे द्वयोरनिवारणेन द्वित्वकीर्तनानुपपत्तेः। प्रवक्ष्यामीत्यादिवचनं तु नाभ्यनुज्ञानार्थम्। किन्तु द्वाभ्यामेव प्रश्नाभ्यां याज्ञवल्क्यस्य पराजयो भविता,न चेन्न न केनापीति प्रश्नोत्तरस्य दुर्वचत्वख्यापनेन स्वप्रागल्भ्यद्योतनार्थम्। एवं च द्वित्वकीर्तनेन तस्य पूर्वप्रश्नत्वबुद्धिं प्रतिबुद्ध्य प्रश्नानुमतिः कारिता। तस्याः प्रागल्भ्यवचनं निशम्य इदानीमप्युत्तरानुक्तौ स्वस्य पराजयो भविष्यतीत्याशयवता 'अनतिप्रश्नस्याप्युत्तरमुक्तमि' त्येतावदेव, न तु निवारितप्रश्नस्यानुमतिः कृतेति कथं गार्ग्या मूर्धा न विपतेत्। कथञ्च नियमं विना जिगीषया उद्दालकेन कृतस्यान्तर्यामिप्रश्नस्योत्तरं ब्रूयात्। यदि ब्रह्मज्ञानस्यैव नियमापेक्षा, नान्तर्यामी ब्रह्म, स तु भगवानेव [1]ततोऽतिरिक्तमेव ब्रह्मेच्युच्येत, तदा [2]'कस्मिन् ब्रह्मलोका ओताश्च प्रोताश्चे'ति ब्रह्मलोकाधारप्रश्ने कृतेऽनतिप्रश्नां देवतामतिपृच्छतीत्यनुपपन्नं स्यात्। अक्षराद्ब्रह्मणोऽन्यस्यैवाकाशस्य ब्रह्मलोकाधारस्य पृष्टतया पराभिमतत्वात्।

अपि च देवतामतिपृच्छसीति कर्मप्रवचनीययोगे द्वितीया अतिक्रमणार्थं द्योतयन्ती प्रकृत्यर्थमेव तं द्योतयेत्। ततश्च देवताया एवातिक्रमकर्मत्वं युक्तम्। यथा काठके अत्यंहप्लक्षसंवादाख्यायिकायां [3]'अस्मिन् परोरजाः प्रतिष्ठित इति; सत्य इति; किं तत्सत्यमिति; तप इति; कस्मिन्नु तप इति; बल इति; किं तद्बलमिति; प्राण इती'ति वाक्ये प्रश्नपूर्वकं प्राणे कथितेऽपि [4]'मा स्म प्राणमतिपृच्छ। यद्वै ब्रह्मचारिन् प्राणमत्यप्रक्ष्यः। मूर्धा तेऽव्यपतिष्यदि'ति प्राणः कर्मतयावगम्यते। तत्र हि प्रश्नोत्तरपरम्परया प्राणपर्यन्तमागते प्राणादप्यूर्ध्वं किञ्चिदयं प्रक्ष्यतीति मत्वा तत्प्रश्ननिवारणमेव कृतमिति स्वीकार्यम्। अतोऽतिक्रमकर्म प्राण एव। तथा 'यो वै स्वां देवतामतियजत' इति - 'स्वां देवतामतिक्रम्य यजत' इत्यर्थः। तत्रातिक्रमकर्मस्वादेवतैव। न च तत्रापि नियममतिक्रम्य यजत इत्यर्थः। 'नागतश्रीर्महेन्द्रं यजेत त्रयो वै गतश्रियश्शुश्रुवान् ग्रामणी राजन्यस्तेषां महेन्द्रो देवता यो स्वां देवतामतियजते प्रस्वायै[5] देवतायै च्यवते न परां प्राप्नोति पापीयान् भवती'ति सन्दर्भविरोधात् अबहुश्रुतादिभिः स्वदेवतेन्द्र एव यष्टव्यो न महेन्द्रइत्येवं परो ह्ययं सन्दर्भः। राजसूये वासुदेवार्पणकुपितस्य चैद्यस्य वचने च [6]'अतिपश्यसि वा सर्वान्न वा पश्यसि

---

1. पाठभेदः – न तु भगवानेव ।
2. बृ.उ.5.6.1
3. तै.ब्रा.3.10.9.5
4. तै.ब्रा.3.10.9.5
5. प्रसायै – इति पाठभेदः ।
6. महा.सभा.39.57

पाण्डवे'त्यतिक्रमणकर्मता राज्ञामेव। नियममित्यध्याहृतपदे द्वितीयां कर्मप्रवचनीययोगनिमित्तमङ्गीकृत्य तद्द्वितीययाचमनसम्बन्ध्यतिक्रमद्योतनाङ्गीकारेण प्रश्नकर्मणि देवताशब्दात् कारकद्वितीयाङ्गीकारो जघन्यः, श्रूयमाणद्वितीयाया एव स्वरसतः कर्मप्रवचनीययोगनिमित्तत्वप्रतीतेः।

नन्वत्रातेः कर्मप्रवचनीयत्वं न विवक्षितम्। किन्त्वतिरेव पृच्छिं विशिंषन् अतिक्रमपूर्वकत्वं पृच्छतेः सूचयति। ततश्च पृच्छिकर्मण्येव द्वितीया, अतिक्रमकर्मत्वं तु नियमस्यार्थादिति चेन्न, कर्मप्रवचनीयविवक्षायां तद्योगद्योत्यातिक्रमणरूपार्थबलादेवान्यस्य प्रश्नकर्मत्वम्, पृष्टत्वादेव तद्विशेषश्च झटिति प्रतीयत इति तत्स्वीकारस्यैव युक्तत्वात्।

नन्वनतिप्रश्न्यमित्यत्रातेस्समस्ततयोपसर्गत्वमेव। अत उत्तरत्राप्यतेरुपसर्गत्वमेव युक्तमिति चेन्न। तत्र तथात्वेऽप्यतिपृच्छसीत्यत्रोक्तयुक्त्या कर्मप्रवचनीयत्वस्य युक्तत्वात्।

वस्तुतस्त्वनतिप्रश्न्यामित्यत्र कर्मप्रवचनीयत्वेऽपि न समासानुपपत्तिः। प्रादिप्रसङ्गे कर्मप्रवचनीयानां प्रतिषेध इत्यत्र समासनिषेधः वृत्त्यादिविषय एव। 'स्वत्योस्तु भवत्येवे'ति पदमञ्जर्यामभिधानात् । कारकविभक्त्यङ्गीकारे त्वतिक्रमकर्मविशेषः कुतो लभ्येत।

किञ्च कारकविभक्तित्वेऽपि अतिक्रम्यप्रश्नरूपविशिष्टधात्वर्थस्य विशेषणकर्मण एव कर्मत्वविवक्षया तत्र द्वितीयायां शुद्धविशेष्यकर्मविशेषोऽतिक्रमसामर्थ्यात् पृष्टत्वाच्च सुगमः विशेष्यकर्मणो विशिष्टकर्मत्वेन विवक्षितत्वात्। तत्र द्वितीयाङ्गीकारे विशेषणकर्मण एव विशिष्टकर्मत्वाङ्गीकारो युक्तः। तस्मादेवतामतिक्रम्य पृच्छसीत्येवार्थः। ब्रह्मलोकमतिक्रम्य तस्याप्याधारभूतं किञ्चिद्गार्गी पप्रच्छेति ब्रह्मलोक एवात्र देवता। तस्माद्ब्रह्मलोकशब्देन ब्रह्मैव विवक्षितम्। लोकपदप्रयोगादिन्द्रलोकादिवच्चतुर्मुखलोक एवोक्त इति भ्रन्त्या गार्ग्या तदाधारप्रश्ने कृते तस्य ब्रह्मरूपस्य लोकस्य नाधारान्तरमस्ति। अतस्त्वया तत्प्रश्नो न कर्तव्य इति याज्ञवल्क्येन स्वाभिप्रायो विवृतः।

न च ब्रह्मलोका इति बहुवचनानुपपत्तिः, इन्द्रलोक इवावयवभेदविवक्षया बहुवचनसम्भवात्, सम्भवति चौपाधिकप्रदेशभेदो ब्रह्मणि। सकलभोग्याधारत्वेन हि ब्रह्मणि लोकशब्दः प्रयुक्तः। पूर्वशैल्यनुरोधाय च लोकशब्दः। अथवा ब्रह्मलोकशब्दः चतुर्मुखलोकपरः। अनतिप्रश्न्यपदेन ब्रह्मलोकाधारतया तद्वस्तु पृष्टम्। तदेवोच्यते तदेव ब्रह्म, तस्य निराधारकत्वेनातिप्रश्नानर्हत्वात् तदतिप्रश्न एव निषिध्यते। तत्र ब्रह्मलोकपर्यन्तं बहूनामतिप्रश्नानां करणात् ब्रह्मलोकाधारेऽप्यतिप्रश्नं करिष्यतीत्युन्नीय वर्तमानसामीप्यबुद्ध्या 'अतिपृच्छसी'ति वर्तमानव्यपदेशः। [1]'अतिप्रक्ष्यसि मातिप्राक्षीः' इति वचोभङ्गिविशेषेण 'ब्रह्मलोकाधारो निराधारसर्वाधाराभूतपरदेवते'त्युत्तरमुक्तं भवति। एवं वर्तमानसामीप्याद्वर्तमानव्यपदेशे 'मा प्राक्षीरि'ति निषेधः स्वरसो भवति। ब्रह्मलोकपदस्य

1. बृ.उ.5.6.1

ब्रह्मपरत्वे तु सकृत्पृष्टवत्यां प्रश्ननिषेधो ब्रह्मलोकस्य निराधारत्वादुत्तरं न मया वाच्यम्, उत्तरानुक्तौ च पुनरतिप्रक्ष्यतीति मत्वा पुनर्मातिप्राक्षीरित्येव पुनःप्रश्नविषयो वाच्यः। पूर्वपक्षिणापि कृतप्रश्नविषयोऽयं प्रश्ननिषेधः पुनःकरणविषय एव वाच्यः। तस्मात् पूर्वं गार्गीप्रश्नपरम्पराया-स्तदुत्तरस्य च 'माऽतिप्राक्षीरि'त्यन्तेन परिपूर्णत्वात् पूर्वनिषिद्धप्रश्नस्यैव पुनरुज्जीवनमिदं प्रश्नद्वयमित्यत्रोत्प्रेक्षातिरिक्तप्रमाणादर्शनादुक्तबाधकबलाच्च [1]'देवतामतिपृच्छसी'त्यत्र देवताशब्दवि-वक्षितब्रह्मणो भिन्नार्थस्याकाशशब्दस्याव्यक्तपरत्वमविरुद्धम्। निषेधोज्जीवनपरत्वाभावादेव पुनःप्रश्नस्य [2]'कस्मिन् ब्रह्मलोकाः ओताश्चे'त्येवमाकारत्वाभावः समञ्जसो भवति।

अस्तु वा पूर्वनिषिद्धप्रश्नस्यैव पुनरुज्जीवनम्। अतिप्रश्नशब्दस्य च परोक्त एवार्थः। अथापि न देवताकाशपदयोस्समानार्थता। पूर्वोक्तन्यायेन वर्तमानसामीप्ये वर्तमानव्यपदेशेन ब्रह्मगोचरप्रश्नस्यैव 'देवतामतिपृच्छसी'त्युक्ततया 'माऽतिप्राक्षीरि'ति तत्पूर्वप्रश्नस्य निषेधात्।

अस्तु वा परोक्तरीत्यात्र देवताऽऽकाशपदयोः समानार्थता, अथाप्याकाशपदस्याव्यक्तपरत्व-मविरुद्धम्। परदेवताशरीरतया तत्र देवतापदप्रयोगसम्भवात्। अत एव हि 'हन्ताहमिमास्तिस्रो देवते'ति तेजोऽबन्नेषु देवतापदप्रयोगः। उत्तरत्र 'तत्तेज ऐक्षते'तीक्ष्णाभिधानस्य तच्छरीरकपरमात्मपरत्वात्तेजोऽबन्नानां परमात्मशरीरत्वं स्पष्टम्।

न चैवमप्यस्वारस्यमनिवार्यमेवेति वाच्यम्। अक्षरधर्मस्य प्रशासनेन धारकत्वस्य दहराकाशधर्मत्वस्य प्रागभिधानात् पूर्वोक्तोपबृंहणसूत्रानुसाराच्चास्य अदोषत्वात्। तत्रापि दहरमित्यादेरर्थश्च वक्ष्यते। तत्त्वन्यायानुसारादाकाशशब्दस्य नानार्थत्वे आवश्यके एकार्थता नाभ्यर्थनीयेति नैकार्थत्वायाकाशशब्दस्य भगवत्परता।

यदुक्तम् - [3]'यदेष आकाश आनन्दो न स्यादि'त्युक्त आनन्दः [4]'स एको ब्रह्मण आनन्दः', [5]'आनन्दं ब्रह्मणो विद्वान्' इत्यानन्दशब्देनोच्यत इति, तदनुपपन्नम्। वाक्यतात्पर्यविरोधात्। तथाहि [6]'ब्रह्मविदाप्नोति परमि'ति ब्रह्मोपक्रान्तम्। तत्र पदचतुष्टयं क्रमेण सत्यज्ञानादिमन्त्रेण विवृतम्। गुहाशब्दो हृदयपरः; [7]'गुहाहितं गह्वरेष्ठं पुराणम्',

---

1. बृ.उ.5.6.1
2. बृ.उ.5.6.1
3. तै.उ.2.7
4. तै.उ.2.8
5. तै.उ.2.4
6. तै.उ.2.1.2
7. क.उ.1.2.12

[1]'गुहां प्रविष्टौ', [2]'गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवती'त्यत्र तथा दर्शनात्। निधानक्रियाया अव्यवहितगुहयैव निराकाङ्क्षत्वात् परमव्योम्नः पदान्तरस्थेनापि देशविशेषसाकाङ्क्षेणाश्नुत इत्यनेनैवान्वयो युक्तः।[3] 'अथातोऽनुप्रश्ना' इत्यनुप्रश्नानुवाक्ये [4]'आहो विद्वानमुं लोकं लोकं प्रेत्य। कश्चित् समश्नुता उ' इति अमुं लोकं प्रेत्य समशनं यदुक्तं तत्किं विदुष एव उताविदुषोऽपि कस्यचिदस्ति। लोकविशेषसमशनसम्बन्धसिद्धवत्कारेण तद्विशेषे प्रश्नप्रदर्शनेन मन्त्रवाक्ये लोकविशेषाभिधायिपरमव्योमशब्दस्य 'सोऽश्नुते' इत्यनेनान्वयस्य स्फुटीकरणात्। अन्यथासिद्धवत्कारायोगात्। तेन मन्त्रेण परिहृतत्वाच्चात्र परिहारानुक्तिः। सापि विदुषो लोकविशेषे समशनपरोमन्त्र इत्याविष्करोति। भट्टभास्करेणापि मन्त्रेणैव तत्परिहारादत्र परिहारानुक्तिरित्युक्तम्। इत्थं भट्टभास्करानुसाराद्व्याख्यातम्। अस्मिन्नपि पक्षे [5]'परमे व्योमन् समश्नुत' इत्यन्वयस्सिद्धः।

वास्तवार्थस्त्वाचार्यैरित्थमनुगृहीतः - आनन्दमयप्रतिपादनानन्तरं [6]'ब्रह्मविदाप्नोती'त्युपक्रमाभिहितप्राप्तिविशदीकरणार्थम् [7]'अथातोऽनुप्रश्ना' इति प्रश्ना उपक्षिप्ताः। पूर्वप्रतिपादनस्य बुभुत्साहेतुत्वं अतश्शब्देनोच्यते। [8]'उताविद्वानि'ति पदनिपातस्य छान्दसोऽर्थः। अथासम्पन्नानितिवदविद्वानिति पदे सति ह्याद्युदात्तं स्यात्, तत्पुरुषे 'तुल्यार्थे'त्यादिस्मरणात्।,'अविद्वान् प्रतिगृह्णाती'तिवत्।(अत्र तु ?) अन्तोदात्तं पदम्। तस्मादविद्वानिति पदम्।

न च स्वरस्यैवच्छान्दसत्वमिति शङ्क्यम्। तथा सति विदुषोरेव को गतः या गच्छति समश्नुत इति विरूपनिर्देशस्य 'अथातोऽनुप्रश्ना' इति बहुवचनस्य चानुपपत्तेः। कश्चनाविप्रकृष्टहृदयादिस्थानस्थमनवच्छिन्नं च ब्रह्मोपासीनो विद्वान् किमितः प्रेत्यामुंलोकं 'परमेव्योमन्नि'त्युक्तंलोकं गच्छतीत्येकः प्रश्नः, उत गत्यनपेक्षमिहैव प्राप्नोतीत्यर्थसिद्धः प्रश्नः,'आहो विद्वानि'ति समश्नुत इति भोक्तृत्वं विवक्षितम्। कश्चिदिह ब्रह्मोपासीनोऽपि विद्वानमुं लोकं गत्वा किं समश्नुते, योग्यभूतं ब्रह्मानुभवतीत्येकः प्रश्नः, उत ब्रह्मस्वरूपेणैकीभवतीत्यर्थसिद्धः प्रश्नः। एवं शास्त्रवैविध्यज्ञानमिति विशेषस्वरूपभेदभावाभावविषयाः प्रश्नबहुवचनविवक्षिताः। एतान् प्रतिवक्तुं जगत्कारणत्वौपाधिकगुणविशिष्टस्यैव ब्रह्मणः प्राप्यत्वादिज्ञापनाय [9]'सोऽकामयत'

1. क.उ.1.3.1
2. मु.उ.3.2.9
3. तै.उ.2.6
4. तै.उ.2.6
5. तै.उ.2.1
6. तै.उ.2.1
7. तै.उ.2.6
8. तै.उ.2.6
9. तै.उ.2.6

इत्यादिना जगत्कारणत्वादिकं निरतिशयानन्दपर्यन्तं महिमानमुक्त्वा 'यश्चायमि'त्यादिवदिति अतिसन्निकृष्टहृदयस्थं वा विप्रकृष्टरविमण्डलादिस्थानस्थं पूर्वोक्तसत्यत्वादिलक्षणामात्रत्वगुणकं वा ब्रह्मोपासीनस्सर्वो विद्वानस्माल्लोकात् प्रेत्यान्नमयादिसमष्टिव्यष्टिविभूतिकं निरतिशयानन्दं परमात्मानं भोग्यजातमनुभवतीति प्रश्नस्योत्तरमुक्तम्। अत्र [1]'अस्मात् लोकात् प्रेत्यानन्दमयमुप-सङ्क्रामती'त्युक्तेः अमुं लोकं गच्छतीत्यवगमात् परमव्योमव्याप्तिर्विवक्षिता।

किञ्च भृगुवल्ल्यामानन्दमयविज्ञानस्य [2]'सैषा भार्गवी वारुणी विद्या। परमे व्योमन् प्रतिष्ठिते'ति परमव्योमप्राप्तिफलकत्वमवगम्यते। अतः परमव्योम्नः कामवत्परमित्युक्तप्राप्यान्तर्भाव एव युक्तः। यद्येवमपि स्वपदान्वयनिर्बन्धः तदा 'ब्रह्मैव वाचः परमं व्योम' इतिवद्देशपरस्सन् गुहासमानाधिकरणो वा परमव्योमशब्दः। हृदयसुषिरात्मकभूताकाशपरस्सन् व्यधिकरणो वा। परमत्वविशेषणञ्च भगवदधिष्ठानेन युज्यत एव [3]'परमे परार्ध्ये' इतिवत्, [4]'विश्वस्यायतनं महदि'तिवच्च। उभयोरधिकरणत्वावगमे सति हृदयाकाशयोर्मिथस्सम्बद्धत्वात् 'प्रासादखट्वापर्यङ्क'न्यायेनाधि-करणता। 'सर्वान् कामानि'ति,'आप्नोति परमि'त्यत्र गुणातिशयरूपं परमत्वमाप्तिकर्मतया विवक्षितमिति स्पष्टीकृतम्। एवं ब्रह्मगुणानामाप्यत्वस्फुटप्रतिपत्त्यर्थं प्राधान्यनिर्देशात् नास्य परशब्देन प्रथमप्रतीतगुणोपसर्जनकत्वबाधः। 'ब्रह्मवित् परमाप्नोती'ति प्राप्यत्वसिद्धये सर्वस्मादुत्कृष्टमिति प्रतिपादनाय प्रयुक्तेन परशब्देन मन्दमतीनां ब्रह्मणो भेदबुद्धिर्मा भूदिति 'ब्रह्मणा' इत्युक्तम्। काम्याः क इत्याकाङ्क्षायां षड्गुणाद्या इत्यभिप्रायेण 'विपश्चिते'त्युक्तम्। अत्र 'ब्रह्मणा सहे'त्यन्वयः। अन्यथा 'ब्रह्मणे'त्यस्यानन्वयात्। न 'चेत्थम्भावे तृतीये'ति मृषावाद्युक्तार्थः सम्भवति। तदानीं हि ब्रह्मवैशिष्ट्यं प्रति एतत् ब्रह्मभूयमश्नुत इति तदभिलषितार्थो न लभ्यत एव। तस्मात् ब्रह्मणा सहेत्यन्वयः।

अस्तु वा पररीत्या सहशब्दो यौगपद्यार्थकस्सन् स्वपाद एवान्वितः, तथापि 'सहार्थयोगे तृतीया', 'वृद्धो यूना तल्लक्षणश्चे'तिवदेवं हि [5]'ब्रह्मविदाप्नोति परमि'ति वाक्ये वेद्यप्राप्ययोश्शब्दभेदेन प्रसक्तभेदनिवारणेन सप्रयोजनता भवति, न त्वित्थम्भावतृतीयायां किञ्चित् प्रयोजनमस्ति। न च परमाप्नोतीति प्राप्यप्राप्तृभेदप्रतीतेस्तन्निवारणेन पक्षान्तरेऽपि साफल्यं वाच्यमस्तीति। तथा सति ब्रह्मेत्यस्य स्थाने परेणेति निर्देशप्रसङ्गात्। ब्रह्मविद्ब्रह्मीभूय परं प्राप्नोतीत्युक्तेऽपि ब्रह्मविदोर्भेदशङ्कातादवस्थ्यात् वाक्यान्तरेण ब्रह्मणः परस्य चाभेदसिद्धेरुक्त-

1. तै.उ.2.8
2. तै.उ.3.6
3. क.उ.1.3.1
4. महा.मोक्ष.11.8
5. तै.उ.2.1.2

शङ्कानिरास इत्यपि न।वाक्यान्तरादर्शनात्। नैरपेक्ष्येण शङ्कानिवारणप्रयोजने सम्भवति सापेक्षप्रयोजनकल्पनायोगात्। तथापि [1]'सर्वान् कामानि'ति प्रतीतेस्तच्छङ्कातावदस्थ्याच्च। सहशब्दस्य यौगपद्याभिप्रायेण प्रयोगेऽपि कामानामेव परस्परयौगपद्यं प्रतीयेत। ततश्च ब्रह्मणः प्राप्यताप्रतीतिरेव न स्यात्। अतो वक्रमार्गपरिग्रहेऽप्यर्थोऽनिष्टफलकश्च स्यात्। तल्लाभस्य तत्प्रसादाधीनत्वात् 'कर्तरि तृतीये'ति न स्यात्, पदार्थविवरणार्थं प्रवृत्तत्वादस्य मन्त्रस्य। नह्ययमुपयुक्तार्थप्रदर्शनार्थं प्रवृत्तः। पदत्रयेऽपि पदार्थविवरणं हि दृश्यते। ब्रह्मविदाप्नोतीति पदत्रयवत् परमित्यपि विवरणसापेक्षमेव। तस्मात् सहयोग एवेयं तृतीया। सर्वान्कामानित्यस्येव परशब्दार्थस्य प्रपञ्चः 'तस्माद्वा' इत्यादिः। कारणत्वमपि हि भोग्यमेव [2]'आत्मन आकाशस्सम्भूतः', 'अन्नात्पुरुष' इत्युक्त्या शरीरप्रतिसम्बन्ध्यात्मप्रतीतेः। जीवस्य कारणभोग्यत्वमापाततः प्रतीयत इति भ्रन्तिं वारयितुं जीववैलक्षण्यप्रतिपादनार्थं पञ्चकोशावतारः। तत्र मध्यकोशत्रयं दृष्टान्तार्थम्। यथा चान्नमयात् प्राणमयोऽन्यः, तथा च तस्मात् मनोमयः, तथा च तस्माद्विज्ञानमयः, तथैव तस्मादानन्दमयः इति। [3]'स वा एष' इत्यन्नकार्यतया प्रतिपन्नः प्रत्यक्षसिद्धः अन्नरसमयः – अन्नरसप्रचुरः। अन्नरसप्राणमनोवृत्तिज्ञानानन्दप्राचुर्याणि मयडर्थः। साक्षात् परमात्मप्रतिपादनपरे पञ्चमपर्याये प्राप्यत्वेनोक्तस्य परस्य प्राप्यत्वोपपादनायानन्दप्राचुर्यप्रतीतये आनन्दमय इति मयट्। आवश्यकत्वे सिद्धे तदैकरूप्याय सर्वत्र 'मयट्' प्रयोगः। उत्तरकोशान् पुरुषविधत्वेन प्रशंसितुं तद्विधां प्रत्यक्षसिद्धे पुरुषे तावद्दर्शयति तथोपासनार्थमित्यपि केचित्। शिरःपक्षमध्यपुच्छशारीरात्मान इति विधाः पञ्च। पुच्छशब्देनार्वाग्भाग उच्यते। अर्धद्वयात्मके शरीरे मुखयुक्तो भागः पूर्वभागः, इतरोऽर्वाग्भागः। [4]'तदप्येष' इति श्लोकस्यान्नमयान्तर्गतान्नविषयत्वादन्नमयविषयता। मनोमयपर्याये [5]'यतो वाचो निवर्तन्त' इति श्लोको मनोविषय एव। मनसो ब्रह्मगुणमर्धार्धादर्धपथमागतस्यासामर्थ्यात् पारगमनाभावो निवृत्तिशब्देनोच्यते। अत [6]'आनन्दं ब्रह्मणो विद्वानि'ति ब्रह्मगुणज्ञाने मनस एव परिकरतया विवक्षितत्वात् ब्रह्मज्ञानकरणतया स्तुतिशक्त्यभावविभवेऽपि भागितेतिवत् पारगमनप्रतिषेधहेतुप्रसक्तिरूपविभवभागितया च मनस एव हि प्रशंसा। एवं सत्येव हि 'तदप्येष श्लोको भवती'ति समञ्जसं भवति। पर्यायप्रधानत्वादानन्दमय एव 'असन्नेव स भवती'ति श्लोके प्रतिपाद्यते। तत्रानन्दमयस्य ब्रह्मत्वस्फुटीकरणाय ब्रह्मपदाभ्यासः।

---

1. तै.उ.2.1.2
2. तै.उ.2.1
3. तै.उ.2.1.2
4. तै.उ.2.
5. तै.उ.2.4
6. तै.उ.2.9

तत्रात्मन अव्यवधानात् प्रकृतात्मैव शारीरात्मा अर्थात् सिद्ध्यतीत्यन्नमये तदनुक्तिः, उत्तरत्र 'यः पूर्वस्ये'त्यनुवादसम्भवश्च। आनन्दमयेऽप्यानन्दमयत्वात्मत्वरूपभेदमवलम्ब्य शारीरत्वरूपणमुपपद्यत। एवं शिरःप्रभृतिकमेव रूपणविषयः। शिरःप्रभृतिभिः पुरुषविधत्वेन रूपिते शरीरापेक्षायां शरीरसम्बन्धस्तात्त्विक एव वा प्रतिपाद्यते। अस्मिन् पक्षे आनन्दमये शारीरोपदेशः'स्वे महिम्नि प्रतिष्ठित'इतिवदनन्यात्मत्वपरः।

अध्यारोपापवादन्यायेन स्थूलारुन्धतीवदात्मानं प्रदर्शयितुं वा पञ्चकोशोपन्यासः। परमात्मजिज्ञासोर्बुद्धिं तत्प्राप्तिनिश्रेणिकायां क्रमेण चत्वारि पर्वाण्यधिरोप्य परमात्मानमानन्दमयं प्रापयति श्रुतिः। अस्मिन् पक्षे पूर्वपूर्वं प्रत्युत्तरोत्तरस्य शारीरत्वमुच्यते। 'पूर्वस्य यःतस्यैष एव शारीर आत्मे'त्यर्थः। 'पूर्वस्य य' इत्यनुवादेनानुपदप्राप्तोऽन्तरात्मतया सम्बन्धी लभ्यते। पूर्वस्यान्नमयस्य योऽयमन्तरात्मा प्राणमयः स एव तस्य शारीरात्मापीत्यर्थः। अस्य वाक्यस्य श्लोकान्तरभावित्वात् 'तस्यैष एव शारीर आत्मे'त्येतावत्युक्ते तस्य श्लोकात् प्रागेतत्पर्यायोक्तस्य प्राणमयस्य एष श्लोकोक्तः प्राण आत्मेति स्यात्। अतो 'यः पूर्वस्ये'त्युक्तम्। अस्मिन् पक्षे शारीरो न रूपणान्तर्गतः। आनन्दमये वैकल्यप्रसङ्गात्। नाप्याकाङ्क्षया वस्तुसत्कीर्तनम्, प्राणमयादीनां वस्तुतश्शारीरत्वासिद्धेः। तस्मादन्तरात्मत्वेन शारीरात्मत्वेन च लिलक्षयिषितं ब्रह्म। अतस्तदुभयं प्राणमयादिष्वारोप्य क्रमेणानन्दमये निगम्यते। न शारीरः क्वापि विधाभेदानुप्रविष्टः। अन्तरात्मत्वमन्तस्स्थत्वे सति व्यापकत्वम्। उक्तं हि व्यापकत्वं'तेनैषपूर्ण' इति। शारीरात्मत्वं शरीराधिष्ठातृत्वं व्यापकत्वम्। एवमानन्दमयो ब्रह्मेत्यवगतम्, अन्तरात्मोपदेशस्य तत्रैव समाप्तेः।

न च [1]'इदं पुच्छं प्रतिष्ठे'त्यारभ्य 'ब्रह्मपुच्छं प्रतिष्ठे'त्येतत्पर्यन्तः पुच्छोपदेश अन्तरात्मेत्यनुक्तावप्यन्तरात्मोपदेश इति कस्यचिदनुन्मत्तस्य बुद्धिमधिरोहति। न च ब्रह्मपुच्छे विशेषोऽस्ति। कथं च सर्वत्रान्तरात्मेत्युपदेशे विद्यमाने प्रतिष्ठाशब्दोऽन्तरात्मोपदेशः स्यात्। किञ्च प्राणमयादिषु प्रतिष्ठाशब्दोऽन्नमयपुरुषसाम्यार्थं तथारूपणपर एव। ततश्चात्रापि प्रतिष्ठात्वमतात्त्विकमेव। एवं [2]'ब्रह्मविदाप्नोति परमि'ति प्रापकतया प्राप्यतया चोपदिष्टस्य ब्रह्मणस्तदुभयसिद्धये सत्यज्ञानानन्दात्मकत्व-जगदुपादानत्व-सर्वशरीरकत्व-जीवान्यत्व-आनन्दमयत्वादिप्रतिपाद्यगुहानिहितमन्तरात्मानं निरूप्य किमीदृग्विलक्षणवस्तुनः लोकविशेषे समशनं पूर्वोक्तं ब्रह्मविद एव नाब्रह्मविदोऽपीति 'अथातोऽनुप्रश्ना' इति वाक्येन निरूप्य कर्त्रन्तराशङ्कावारणाय तस्यैव कर्तृत्वमाह [3]'सोऽकामयते'ति। आनन्दमयस्य प्राधान्यात्

1. तै.उ.2.5
2. तै.उ.2.1
3. तै.उ.2.6

पुंलिङ्गतच्छब्दनिर्देशः। यद्यपि 'तस्यैष एवे'ति वाक्यं सन्निहितं तथापि तस्य सर्वपर्यायसाधारणतयोपसर्जनत्वात् न तदपेक्षत्वं युक्तम्। एतत्पर्यायप्रधानार्थपरामर्श एव हि युक्तः। स्थूलारुन्धतीन्यायपक्षे [1]'तस्यैष एव शारीर आत्मे'त्येतदानन्दमयवाक्यवत् प्रधानमेवेति तदर्थ एवानन्दमयः परामृश्यते। [2]'बहु स्यामि'ति विशिष्टोपादानोपादेयभावः प्रतिपादितः। उत्तरग्रन्थस्तत्प्रपञ्चः। [3]'असद्वा इदमि'ति श्लोके 'आत्मानमकुरुत। तस्मात् तत्सुकृतमुच्यत' इतिविशिष्टोपादानोपादेयभावः स्पष्टं पुनरुक्तः। एवं कारणत्वोपपादनानन्तरं पूर्वमानन्दमयत्ववदिदानीमानन्दरूपत्वमुपदिशति। [4]'रसो वै स' इत्यानन्दमयशब्दोक्तानन्दाश्रयस्वरूपस्य भोग्यत्वमुच्यते। 'यदेष आकाश आनन्दो न स्यादि'त्यपि स एवानन्दमयो रसत्वेनोक्त उच्यते। 'परमे व्योमन्नि'त्यस्य हृदयाकाशपरत्वपक्षे 'आकाशे आनन्द' इति सप्तम्यन्तमाकाशपदम्। तथा च तत्रोक्तार्थ एवेह प्रत्यभिज्ञाप्यते। [5]'भीषास्मात् वातः पवत' इत्यानन्दमय एवोच्यते। अस्मादितिवत् अस्येति सर्वनाम्नो निर्दिष्टत्वे तथानिर्देशे आनन्दमयस्य ग्रहणं भविष्यतीति 'सैषास्य मीमांसा भवती'त्यनुक्त्वा 'आनन्दस्य मीमांसे'त्यनुक्तिःएतन्मीमांसाप्रवृत्तिः।

तापनीये भीषणमित्याह, [6]'भीतो वा अस्मादादित्य उदेति भीतश्चन्द्रमाः भीतो वायुर्वाति भीतोऽग्निर्दहति भीतः पर्जन्यो वर्षती'ति ह्युच्यते। सः नारायणानुवाके पुरुषोऽन्तर्वर्तितया प्रसिद्धोऽयमिह तथाप्रसिद्ध आनन्दमयः। [7]'असौ वा आदित्य' इत्यनुवाके 'य एषोऽन्तरादित्ये हिरण्मयः पुरुष' इति प्रसिद्धः। तच्छब्देनाम्भसीति प्रश्नस्योपस्थितत्वात् तदन्तर्गतानुवाकप्रतिपाद्यस्यादित्यमण्डलान्तर्वर्तिनः असाविति निर्देशो युक्त एव। [8]'स य एवंविदि'ति स 'ब्रह्मविदि'त्युक्तः। तत्रान्नमयोपसङ्क्रमणादिर्नानोपासनादिफलतयोच्यते। तत्तत्पर्याये एव तत्फलकीर्तनात्। एवंविदिति ब्रह्मज्ञानफलत्वेन श्रवणाच्च। ततश्च [9]'सर्वात्मानमानन्दमयमात्मानमुपसङ्क्रामति' इत्युच्यते। उपसङ्क्रमावृत्तिः परमपुरुषार्थसुधापयःपारावारकणिकामात्रस्यैव पुरुषार्थतापर्याप्त्यधिकरणत्वप्रख्यापनाय। अन्नमयादिशब्दे वस्त्रभूषणाध्यायप्रतिपादितो वार्थ उच्यते। तत्रान्नप्राणशब्दाभ्यां पृथिवीवाय्वर्थकाभ्यां प्रकृत्यादीनां मनोव्यतिरिक्तानामचित्तत्वादीनामभिमानदेवता उपलक्ष्यन्ते। पृथिव्याः प्राचीनतत्त्वानि प्राणेनोपलक्ष्यन्ते, उत्तराणि त्वनेन।

---

1. तै.उ.2.4-6
2. तै.उ.2.6
3. तै.उ.2.7
4. तै.उ.2.8
5. तै.उ.2.8
6. नृ.ता.उ.2
7. मै.उ.6.1
8. तै.उ.2.8
9. तै.उ.2.8

अत्र केचित् 'एवंविदि'ति प्रकृतान्नमयादिदृष्ट्युपासका आनन्दमयोपासकाश्च परामृश्यन्ते। अन्नमयाद्यभिमानिदेवता [1]'अन्नमयमात्मानमुपसङ्क्रामती'त्यादिना तत्तदुपासकानां प्राप्यतया प्रतिपाद्यन्ते। 'सर्वं वै तेऽन्नमाप्नुवन्ती'त्यानुषङ्गिकफलमर्थवादो वेत्याहुः।

**अस्मिन् पक्षे भृगुवल्ल्या 'मुपसङ्क्रम्ये 'ति समानकर्तृकत्वविरोधः।**

अपरे त्वन्नमयादयो ब्रह्मव्यूहाः। अतः तत्प्रेमप्राप्तिः प्रतिपाद्यत इति। अयमपि पक्षः पूर्वोक्तयुक्त्यैव निरस्तः। उपासनभेदेन क्रममुक्तफलत्वासम्भवात् ल्यबन्वयानुपपत्तेः।

सिद्धान्ते पूर्वकालीनत्वस्याविवक्षायामपि समानकर्तृकत्वमस्यैव विशेषणभेदेनौपाधिकभेदं भगवदनुभवे विवक्षित्वा समानकर्तृकत्वनिर्देशः। एवमुक्तेः प्रयोजनमुक्तमेव पुरुषार्थतापर्याप्तेः द्योतनमिति। एवं ब्राह्मणोक्तं 'सत्यं ज्ञानमि'ति मन्त्रेण विवृतम्। तत्र प्राप्यत्वेन प्रापकत्वेन चोक्तं ब्रह्मस्वरूपं पञ्चकोशेन निरूपितम्। स च भगवानेवेत्युपक्रममध्योपसंहारैः स्थापितम्। [2]'स य एवं वेदे'ति [3]'यो वेद निहितं गुहायां परमेव्योमन्। सोऽश्नुत' इत्युक्तार्थो विवृतः।

भृगुवल्ल्यपि एतत्समानार्था। तत्रापि [4]'अधीहि भगवो ब्रह्मेती'त्युपक्रम्य ब्रह्मोपदेश आनन्देऽउपसंहृतः। आनन्दशब्दश्चानन्दमयपर इ'त्यानन्दमयमात्मानमुपसङ्क्रम्ये'ति फलश्रुतेरवगम्यते। आनन्दरूपता'यदेष आकाश आनन्दो न स्यादि'त्यवगतैव।'परमे व्योमन् सोऽश्नुत' इत्युक्तः पुरुषार्थः [5]'सैषा भार्गवी वारूणी विद्या। परमे व्योमन् प्रतिष्ठिते'त्युच्यते। साधनस्य हि प्रतिष्ठा पुरुषार्थसिद्धिरेव।

यद्वा धर्मधर्मिणोरुभयोरप्यानन्दपदप्रयोगस्यानन्दवल्ल्यां दृष्टत्वेनात्र धर्मिपरत्वसिद्ध्यर्थमाह 'सैषे'ति। 'ब्रह्मैव वाचः परमं व्योमे'ति ब्रह्मणः परमव्योमशब्देन निर्देशदर्शनादिहापि परमव्योमशब्दो ब्रह्मपरः। ततश्चानन्दशब्दस्य ब्रह्मपरत्वादियं विद्या ब्रह्मण्येव प्रतिष्ठिता। ततश्च नोपक्रमविरोधोऽपीत्यर्थः।

तापनीये 'यतोवे'त्येतत् भगवत्परतया स्पष्टमवगतम्। [6]'अनुष्टुभो वा इमानि भूतानि जायन्ते। अनुष्टुभा जातानि जीवन्ति। अनुष्टुभं प्रयन्त्यभिसंविशन्ती'ति अनुष्टुप्पदं तदर्थपरम्। इत्थमर्थानां मिथस्समन्वयेन स्वरसतो वाक्यार्थावगमेन तद्विरोधात् [7]'यदेष आकाश आनन्दो न स्यात्', [8]'सैषानन्दस्य मीमांसा भवती'त्यानन्दशब्दयोर्नैकार्थता।

---

1. तै.उ.2.8
2. तै.उ.2.9
3. तै.उ.2.1.2
4. तै.उ.3.5
5. तै.उ.3.6
6. नृ.पू.ता.1
7. तै.उ.2.7
8. तै.उ.2.8

यदपि किञ्चिदुच्यते 'यो वेदे'ति प्राकारचतुष्टयावृतपर्यङ्कन्यायविवक्षया गुहानिहितपरमव्योम्नि ब्रह्मप्रतिष्ठितमित्युच्यते। गुहाव्योमपदयोः विवरणसापेक्षत्वात् पर्यायचतुष्टयेन गुहाशब्दो व्याख्यातः। पञ्चमपर्यायेण परमव्योमशब्दः। अस्य च तद्व्याख्यानरूपत्वमौचित्यात्। उत्तरत्रास्यानन्दमयस्य 'यदेष आकाश आनन्दो न स्यादि'त्याकाशशब्देन प्रत्यभिज्ञानाच्च।

नन्वानन्दप्रचुरधर्मिवाच्यानन्दमयशब्दस्य कथमानन्दशब्दसमानार्थत्वमिति चेन्न, प्राचुर्यविशिष्टानन्दस्यैवात्रानन्दमयशब्दार्थत्वसम्भवात्, प्रचुरमन्नं वर्तत इत्यस्मिन्नर्थे अन्नमयं वर्तत इति प्रयोगदर्शनेन [1]'तत्प्रकृतवचने मयडि'ति सूत्रेऽर्थद्वयाश्रयणेन प्राचुर्यविशिष्टप्रकृत्यर्थे प्रचुरधर्मिणि च मयड्विधानपरत्वस्य व्याख्यातत्वात्। अयमेवानन्दमयः 'सोऽकामयते'ति परामृश्यते। स च प्रकृत आनन्दः [2]'सैषानन्दस्ये'त्यादिना 'स एको ब्रह्मण आनन्द' इत्यन्तेन ब्रह्मधर्मितया निरतिशयत्वेन चाभिधीयते। तस्मात् ब्रह्मणः स्थानभूतपरमव्योमात्मकात् तद्धर्मभूतपरमानन्दात्मिका च ब्रह्मणश्चिच्छक्तिरेव आनन्दमयः, न तु [3]ब्रह्मेति।

तदप्युक्तस्वारसिकवाक्यार्थविरोधादेव निरस्तम्। अपि च गुहापरमव्योम्नोस्सम्बन्धो न वाक्येनावगम्यते। गुहायां परमेव्योम्नि निहितमित्युभयाधिकरणकत्वस्यैव प्रतीतेः। गुहायां स्थिते व्योम्नीति स्थितपदाध्याहारश्च स्पष्टदोषः। नापि प्रासादखट्वयोरिव सम्बन्धः पूर्वन्निर्ज्ञात इत्याधाराधेयभावे वैपरीत्यमपि प्रसज्येत। पञ्चमपर्यायगुहापरमव्योमविवरणत्वे च न किञ्चिन्मानं [4]पश्यामः। गुहापरमव्योमशब्दयोः ब्रह्माधिकरणपरतया प्रतीयमानयोः निर्ज्ञातार्थत्वात् ब्रह्माधिकरणप्रतिपादकवाक्यस्य स्पष्टार्थस्य बाधकाभावात् विवरणरूपत्वं युक्तमिति चेन्न, व्याख्यानतया विवक्षितवाक्ये ब्रह्माधिकरणत्वप्रतिपादकपदाभावात्। अस्ति हि 'तस्यैष एव शारीर आत्मे'ति चेत्, सत्यम् अस्ति। किन्तु पञ्चानां न तु द्वयोरेव। अतः कथं पञ्चाधिकरणीप्रतिपादकं वाक्यं व्यधिकरणवाक्यस्य विवरणं भवेत्। ततश्चेदं विधाप्रतिपादनशेषभूतम् इत्येव वाच्यम्। यदि सम्बन्धप्रतिपादनार्थमेव तदा अस्यैव प्रधानार्थत्वात् 'सोऽकामयते'त्यपि तस्यैव परामर्शः। [5]'रसो वै सः', 'यदेष आकाश आनन्द' इति सर्वं तद्विषयमेव स्यात्। [6]'ब्रह्मपुच्छं प्रतिष्ठे'त्यस्य सम्बन्धप्रतिपादनार्थत्वेऽप्ययं दोषस्समानः। कथञ्च तदाधारप्रतिपादकस्य तदाधेयप्रतिपादकवाक्यविवरणताप्रत्ययः।

---

1. पा.सू.5.4.21
2. तै.उ.2.8
3. ब्रह्मणेति इति पाठान्तरम् ।
4. किञ्चिन्मात्रम् ति पाठभेदः ।
5. तै.उ.2.7
6. तै.उ.2.5

किञ्च विज्ञानमयानन्दमयपर्याययोर्विवरणता स्यात् सङ्ख्यासाम्यात् परस्परसम्बन्धात् तदुपरि पर्यायान्तराभावाच्च, न पूर्वपर्यायाणामिति तेषां वैय्यर्थ्यमेव। चतुर्भिः पर्यायैरेकैव गुहा प्रतिपाद्यत इति चेन्न, मानाभावात्। पर्यायाणां सर्वेषामेकगुहापरत्वप्रसङ्गाच्च मनोमयपर्यायपर्यन्तं गुहाविज्ञानमयपर्याये परमव्योम आनन्दमयपर्याये ब्रह्म इति वा किं नोत्प्रेक्ष्यते।

किञ्च 'तदिति''तस्माद्वा एतस्मादि'ति कारणत्वेनोक्तस्य ब्रह्मण एव 'सोऽकामयते'ति कर्तृत्वप्रतिपादनस्वारस्यात् ब्राह्मणोक्तब्रह्मण 'एतदि'ति मन्त्रप्रतिपाद्यव्योमसाधारण्यमभेदोपचारादिति हि परैरुच्यते। स चोपचारो न वक्तव्यो भवति।

किञ्च सुषिरयोगेन हि हृदये गुहाशब्दः, यथा [1]'गुहां प्रविष्टावि'त्यत्र। इह तदभावात् कथं ताच्छब्द्यम्। या च प्रत्यभिज्ञोक्ता सा आकाश इति सप्तम्यन्तत्वपक्षेऽस्त्येव। सामानाधिकरण्येऽप्या-काशशब्देन ब्रह्मण एव प्रत्यभिज्ञा स्यात् तत्र प्रसिद्धेः। सूत्रकार एव च तत्र प्रमाणम्।

किञ्च अत्र हि तत्पक्षे नार्थप्रत्यभिज्ञा, ब्रह्माधिकरणतया प्रतिपाद्यमानपरमव्योमार्थकत्वस्य आकाशशब्देऽनिश्चयात्, शब्दप्रत्यभिज्ञाभावश्च स्पष्ट एव। अथाप्येकार्थव्युत्पन्नपदद्वय-प्रयोगादेकार्थत्वमुन्नीयते। न चैतदुन्नयनमात्रस्य ब्रह्मप्रत्यभिज्ञाबाधनक्षमतास्ति। 'परमेव्योम'न्नित्यस्य 'निहित'मित्यनेनान्वये ब्रह्मोपनिषदि [2]'एकमेव तत्परं ब्रह्म विभाति। हृद्याकाशे तद्विज्ञानमाकाशं तत्सुषिरमाकाशं तद्वेद्यं हृद्याकाशमि'ति ब्रह्मविज्ञानात्मकमाकाशमित्युक्त्वा हृद्याकाश इत्यस्य भूताकाशपरत्वं द्योतयितुं 'तत्सुषिरमाकाशमि'ति हृदयसुषिरमाकाशमित्युक्त्वा 'तद्वेद्यं हृद्याकाशमि'ति ज्ञानाकाशात्मकं ब्रह्महृदयाकाशे उपास्यमित्युपसंहाराद्व्योमाकाशपदाभ्यां हृदयाकाशब्रह्माकाशयोरेव ग्रहणं युज्यते।

परोक्तानन्दमयशब्दार्थश्च भगवता सूत्रकारेणैव निरस्तः 'आनन्दमयोऽभ्यासादि'ति। अतस्तदभिप्राय एवाविष्कृत इत्यनुसन्धेयम्।

यच्चोक्तम् – 'आकाशो ह वै नामरूपयोः निर्वहिता ते यदन्तरा तद्ब्रह्मे'त्याकाशस्य नामरूपस्पर्शः तदन्यस्य तदस्पर्शश्च प्रतिपाद्यत इति, तदपि न, नामरूपग्रहणान्निर्वहितेति पदस्वारस्याच्च नामरूपव्याकरणस्यैव प्रतीतेः, अत एव हि तदन्यत् ब्रह्मेत्यनुक्त्वा ते यदन्तरेति नामरूपास्पृष्टत्वमुक्तम्। अतो नामरूपाकाश एव नामरूपास्पृष्टं ब्रह्मेत्युच्यते। अत एव सूत्रम्'आकाशोऽर्थान्तरत्वादिव्यपदेशादि'ति। तत्र ह्याकाशस्यैव ब्रह्मत्वं समर्थ्यते। नामरूपास्पृष्टं यद्वस्तु तद्ब्रह्म इति वा यस्मान्नामरूपास्पृष्टं तस्माद्ब्रह्मेति वा योजना। पूर्वयोजनायामाकाशस्य ब्रह्मत्वमर्थात्। द्वितीययोजनायामाकाङ्क्षावशादाकाशपदमनुषज्यते।

---

1. क.उ.1.3.1
2. बृ.उ.1

यच्च श्वेताश्वतरेऽन्यस्य परत्वं प्रतीयत इति, तन्न।

[1]**‘ततः परं ब्रह्मपरं बृहन्तं यथानिकायं सर्वभूतेषु गूढम्।
विश्वस्यैकं परिवेष्टितारमीशं तं ज्ञात्वा अमृता भवन्ति।।**’इति

[2]‘या ते रुद्र शिवा तनूरि’ति प्रकृतात् परं ब्रह्म प्रस्तुत्य सर्वव्यापित्वं सर्वनियन्तृत्वमनुपमत्वं तज्ज्ञानस्य मुक्तिसाधनत्वं चोक्त्वा -

[3]**‘वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेवं विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।।**’इति

तद्ब्रह्म किमिति देवताविशेषजिज्ञासाया’मेतं पुरुषमि’ति प्रकृतं ब्रह्मपुरुष इति निर्धार्य ‘बृहन्तमेतम्’, ‘महान्तमादित्यवर्णं तमसः परस्तादि’ति विवृत्य [4]‘ईशं तं ज्ञात्वा अमृता भवन्ती’त्यत्रापेक्षितं देवतान्तरज्ञानस्य साधनत्वाभावं ज्ञानातिरिक्तस्य साधनत्वाभावं चोक्त्वैकशब्दार्थञ्च [5]‘यस्मात्परं नापरमस्ति किञ्चिदि’ति यस्मादपरमन्यदवधिविशेषानपेक्षं परं नास्तीति विवृत्य [6]‘तेनेदं पूर्णं पुरुषेण सर्वमि’ति [7]‘सर्वभूतेषु गूढमि’त्यत्र भूतशब्दस्सत्तायोगिपर इति व्याख्याय ‘ततो यदुत्तरतरं तदरूपमनामयम्’, [8]‘य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ती’ति ततस्तस्मादुक्तहेतुभिर्यदुत्तरतरं समस्तकल्याणगुणविशिष्टमखिलहेयप्रत्यनीकञ्च तत्तथा विद्वांसः अमृता भवन्ती, इतरे संसारमेवानुभवन्तीति ‘तमेव विदित्वाऽतिमृत्युमेती’ति विवृत्य,

[9]**‘सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः।
सर्वव्यापी च भगवान् तस्मात्सर्वगतः शिवः।।**’इति

यतोऽयं भगवान् अतस्सर्वव्यापित्वेऽपि तद्गतदोषासंस्पृष्ट इत्युक्त्वा

[10]**‘महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः।
सुनिर्मलामिमां शान्तिमीशानो ज्योतिरव्ययः।।’**

---

1. श्वे.उ.3.7
2. श्वे.उ.3.5
3. श्वे.उ.3.8
4. श्वे.उ.3.7
5. श्वे.उ.3.9
6. श्वे.उ.3.9
7. श्वे.उ.3.7
8. श्वे.उ.3.10
9. श्वे.उ.3.11
10. श्वे.उ.3.12

[1]'**अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः।**
**हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति॥**

'इति सत्त्वप्रवर्तकत्वं प्राप्यस्यैव प्रापकत्वाभिप्रायेण [2]'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते,'स उत्तमः पुरुष' इति प्राप्यस्य पदेन निर्देशाज्ज्योतिःपदेन निर्दिश्य, तेन पुरुषोत्तमत्वमभिव्यज्य, हृदयसन्निधानमुक्त्वा एवमुपास्यतोपयोगिगुणान् प्रदर्श्य तदुपासनस्य मोक्षसाधनत्वमुक्त्वा देवतास्पाष्ट्यार्थमेव 'सहस्रशीर्षे'त्यादि पुरुषसूक्तर्चाभ्यां तद्वैभवमुक्त्वा

[3]'**सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम्।**
**सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥** 'इति प्रथमर्चं व्याख्याय,

[4]'**सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।**
**सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृत्॥**

'इति सर्वस्वामित्वं सर्वेशितृत्वं सर्वशरण्यत्वं सर्वसुहृत्त्वञ्च [5]'अतो ज्यायांश्च पूरुष' इत्यभिप्रेतं विवृत्य, [6]'नवद्वारे पुरे देही हंसो लोलायते बहिरि'ति हंसशब्देन भगवद्वाचकेन प्रकृतं वस्तु निर्दिश्य तत् वैभवं पुनः प्रदर्श्य, [7]'तमाहुरग्र्यं पुरुषं महान्तमि'ति पुनर्भगवतः प्रत्यभिज्ञानेऽपि [8]'अणोरणीयानि'त्यादिना तद्वैभवं प्रतिपादितम्। अतः 'ततो यदुत्तरतरमि'त्यस्य परोक्तार्थोऽनुपपन्नः, पूर्वोत्तरसन्दर्भविरोधात्।

यस्मात्परमित्यत्र यस्मात्परमन्यन्नास्तीत्यर्थः। यस्मात्परं नास्तीत्येतावत्युक्ते परशब्दस्यान्यार्थकत्वबुद्ध्या तन्निषेधस्य सर्वात्मकत्वे तात्पर्यावगमः स्यात्। तेन विवक्षितार्थालाभ इति अपरत्वविशेषणं कृतम्। तस्मिन् कृते अपरशब्देनान्यत्वप्रतीतेः परशब्देनोत्कर्षविवक्षाया एव प्रतीतेर्विवक्षितसिद्धिः।

नन्वणीयस्त्वज्यायस्त्वोभयनिषेधवदिहापि परापरोभयनिषेध एव युक्तः। तथा चापरनिषेधवत् परनिषेधः कथञ्चित् स्तावकतयार्बेन इति चेन्न, 'यस्मान्नाणीयो न ज्यायोऽस्ति कश्चिदि'ति निषेध्यद्वयविवक्षायां नञ्द्वयदर्शनेनात्रैकनञा एकस्यैव निषेधे तात्पर्यावगमादपरमिति विशेषणमेव। नन्वेवमप्यपरमिति नान्यदुच्यते, किन्तु निकृष्टम्। तथा च [9]'यस्मादपरं परं नास्ती'ति निकृष्टस्यैव[10]

1. श्वे.उ.3.13
2. छा.उ.8.3.4
3. श्वे.उ.3.16
4. श्वे.उ.3.17
5. छा.उ.3.12.6
6. श्वे.उ.3.18
7. श्वे.उ.3.19
8. श्वे.उ.3.20
9. श्वे.उ.3.9
10. प्रकृष्टस्यैव इति पाठभेदः ।

पुरुषात् परत्वनिषेधाद्ब्रह्मणः पुरुषात्परत्वमुपपद्यत एवेति चेन्न। यस्मादिति परावधितयोपस्थितस्यैव बुद्धिस्थतया अपरशब्दार्थावधित्वस्य औचित्येनापरशब्दस्यान्यत्वपरताया एव ग्राह्यत्वात्। प्रथमयोजनायां तु परशब्देन सर्वोत्कर्षस्य भूयसा प्रयोगेण स्वतः प्रतीतेः यस्मादित्यस्य परावध्युपस्थापकत्वं नाङ्गीकृतम्। [1]'यस्मात्सर्वगतश्शिव' इत्यत्र शिवशब्दस्य रुद्रपरत्वे तत्र सर्वगतत्वस्य विधेयत्वे तस्मादिति पदानन्वयः। प्रकृतसर्वव्यापित्वपरामर्शितया साध्यावैशिष्ट्यात् सर्वगतं विभुत्वादिति। प्रभुत्वात् समर्थत्वात् सर्वगतमित्यर्थः। ब्रह्मोपनिषत्तापनीयमैत्रेयाथर्वशिखाथर्वशिरस्स्वक्षरसर्वेश्वरपरशम्भुभगवच्छब्दनिर्दिष्टं तुरीयं वस्तु भगवानेव, नान्यद्विष्णोः, त्रिमूर्तिमध्यगतस्य भगवदवतारत्वादक्षरशब्दस्य भगवत्परत्वम्। सर्वमेव क्षरं त्यक्त्वा अक्षरमेव ध्यायेत्। न च पुरुषं विना किञ्चिदक्षरमस्ति। 'तं प्राप्य मुक्तो भवती'ति परविद्याप्रकरणोदाहृतश्रीविष्णुस्मृतिवाक्यात् तत्प्रकरणोदाहृतेन [2]'विरजस्को महाबाहुरक्षरं ब्रह्म यं विदुरि'ति हरिवंशे पौष्करप्रादुर्भाववचनेन च सिद्धम्। सहस्रनामसु [3]'क्षेत्रज्ञोऽक्षर एव चे'ति भगवन्नामसु पाठाच्च। सर्वेश्वरशब्दश्च तापनीय एव 'नृसिंहवैकल एष एव तुर्य'[4] इति नृसिंहस्यैव तुर्यत्वनिर्धारणात् तत्परः। सुबालोपनिषदि च भगवन्नारायण एव सर्वेश्वर इत्युक्तम्। [5]'एष सर्वज्ञ एष सर्वेश्वर एष सर्वाधिपतिरेषोऽन्तर्यामी'त्युत्तरानुशासने तस्य नारायणत्वेन विवरणात्। सहस्रनामसु च [6]'अजस्सर्वेश्वरस्सिद्ध' इति भगवन्नामतया पठ्यते। स च तुरीयस्सर्वेश्वरो नृसिंहः। मैत्रेयोपनिषदि [7]'अयं वाव खल्वात्मा ते भगवा'इति भगवच्छब्देन वासुदेवासाधारणेन परो निर्दिष्टः। अनन्तरञ्च [8]'स वा एष शुद्धः पूतश्शून्यश्शान्तोऽप्राणोऽनीशात्माऽनन्तो अक्षय्यस्स्थिरश्शाश्वतोऽजः स्वतन्त्रः। स्वे महिम्नि तिष्ठती'त्यनन्तशब्देन विष्णौ रूढेण निर्दिष्टः। अनीशात्मेति च रुद्राद्व्यावर्तितः। तदनन्तरञ्च [9]'स वा एषसूक्ष्मोऽग्राह्योऽदृश्यः पुरुषसंज्ञ' इति प्रकृत्य 'अथ खल्वेतस्यांशोऽयं यश्चेतनमात्रः प्रतिपुरुषः क्षेत्रज्ञ' इति श्रुतेन वाक्येन पुरुषसंज्ञकत्वेन श्रुतिस्मृतिप्रसिद्धिमनुरुद्ध्योक्तः। तत्रोक्तं पुरुषांशत्वमुपपादयितुं तमेवेत्यादिकमारब्धम्। अतोऽयं परशब्दो वासुदेवपर एव न्याय्यः।

---

1. श्वे.उ.3.11
2. ह.पु.3.10.2
3. महा.आनु.149.15
4. तुरीय इति पाठभेदः ।
5. सु.उ.5
6. महा.आनु.149.24
7. मै.उ.2.1
8. मै.उ.2.4
9. मै.उ.2.5

[1]'एतस्यांशोऽयं यश्चेतनमात्रः प्रतिपुरुषं क्षेत्रज्ञ' इति वाक्यञ्च, [2]'ममैवांशो जीवलोके जीवभूतस्सनातन' इति भगवद्गीतावचनेन,

**[3]'ब्रह्माद्यास्सकलादेवा यक्षतुम्बुरुनारदाः।**
**ते सर्वे पुरुषांशत्वादुच्यन्ते पुरुषा इति॥'**

इति नारसिंहपुराणवचनेन, [4]'यच्चान्यं पुरुषाख्यं स्यात् स एव पुरुषोत्तम' इति मात्स्ये पौष्करप्रादुर्भाववचनेन च पुरुषोत्तमविषयतयोपबृंहितम्। तमः प्रेरकत्वलिङ्गाच्च। सुबालोपनिषदि नारायणस्योक्तं [5]'तस्मात् तमस्समजायत' इति। 'तम आसीदि'ति प्रतिसर्गकालेऽपि श्रुतस्य तमसः प्रेरणातिरिक्तजन्मासम्भवात्, [6]'तमः परे देव एकी भवती'ति चाप्युपस्थानतया सौबालोक्तः पर एव तत्प्रेरकत्वेन वाच्यः। स च नारायण एवेति। स एव 'तत्परेणेरितमि'त्यत्र परशब्दनिर्देश्यः। मनुश्च नारायणमेव तमःप्रेरकं स्मरति -

**[7]'ततः स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निदम्।**
**महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः॥'इति।**

अनेन कथं भगवतस्तमःप्रेरकत्वावगमः, उच्यते। अत्र ह्येवं पठ्यते -

**[8]'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्।**
**अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः॥**
**ततः स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निदम्।**
**महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः॥**
**योऽसावतीन्द्रियग्राह्यस्सूक्ष्मोऽव्यक्तस्सनातनः।**
**सर्वभूतमयोऽचिन्त्यस्स एव स्वयमुद्बभौ॥**
**सोऽभिध्याय शरीरात् स्वां सिसृक्षुर्विविधाः प्रजाः।**
**अप एव ससर्जादौ तासु वीर्यमपासृजत्॥**

---

1. मै.उ.2.5
2. भ.गी.15.7
3. ना.सि.पु.
4. म.पु.67.5
5. सु.उ.1
6. सु.उ.2
7. मनु.स्मृ.1.6
8. मनु.स्मृ.1.5-11

**तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।**
**तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः॥**
**आपो नारा इति प्रोक्ता आपो वै नरसूनवः।**
**ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः॥**
**यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम्।**
**तद्विसृष्टस्स पुरुषो लोके ब्रह्मेति कीर्त्यत॥'इति।**

अत्र प्रथमश्लोके'नेदं तमोभूतमि'ति सौबालोक्तक्रमेण तमःपर्यन्तं प्रथमम् उच्यते। तेन सौबालार्थः स्मार्यते। तमोभूतमासीदिति तमस्त्वं प्राप्तमासीदित्यर्थः। अप्रज्ञातम्-प्रत्यक्षेम अज्ञातम्। अलक्षणम् -प्रत्यक्षोपयोगिरूपादिशून्यम्। अप्रतर्क्यम् -कार्ये रूपादिदर्शनात् कारणेऽपि रूपादिना भवितव्यमिति कुतर्कागोचरमित्यर्थः। अविज्ञेयम् -परस्मात् ब्रह्मणः पृथग्व्यपदेशानर्हावस्थां क्षीरे नीरमिव प्राप्तमित्यर्थः। प्रसुप्तमिव - सुषुप्तजीववद्वर्तते। यथा सुषुप्तो जीवो ब्रह्मणा अविभागापन्नो भवति तथेत्यर्थः। ततः सर्वकाले प्राप्ते स्वयम्भूशब्दोऽवयवार्थपौष्कल्याद्भगवत्परः। यथा सभापर्वणि -

[1]**'अव्यक्तोऽव्यक्तलिङ्गस्थो य एष भगवान् प्रभुः।'**
[2]**'पुरा नारायणो देवः स्वयम्भूः प्रपितामहः।'** इत्यारभ्य
[3]**'ततस्स भगवांस्तोये ब्रह्माणमसृजत्स्वयम्।'** इति।

मोक्षधर्मे च [4]**'नारायणो जगन्मूर्तिः'इत्यारभ्य,**
[5]**'ततस्तेजोमयं दिव्यं पद्मं सृष्टं स्वयम्भुवा।**
**तस्मात्पद्मात् समभवद्ब्रह्मा वेदमयो निधिः॥'**इति।

आश्वमेधिके च [6]**'विष्णुरेवादिसर्गेषु स्वयम्भूर्भवति प्रभुः।'**इति।

अव्यक्तशब्दश्च भगवति रूढः, 'चक्री सनातनोऽव्यक्त' इत्यमरशेषोक्तेः।इदं व्यष्टिरूपकार्यजातं व्यञ्जयितुम् [7]'लक्षणहेत्वोः क्रियाया' इति शतृ। महाभूतादिवृत्तौजाः - व्यष्टिकारणानि पृथिव्यादीनि महाभूतानि। आदिशब्देन तत्तत्कारणभूतमहदहङ्कारौ गृह्येते। तेषु

---

1. महा.सभा.अध्या.38,पुट-893
2. महा.सभा.अध्या.38,पुट-893
3. महा.सभा.अध्या.38,पुट-893
4. महा.मोक्ष.अध्या.182,पुट-559
5. महा.मोक्ष.अध्या.182-15
6. महा.आश्व.40.12
7. पा.सू.3.2.126

प्रवृत्तसङ्कल्पज्ञानरूपतेजः तमोनुदस्सकाशात् प्रादुरासीत्। अन्यस्मादुत्पत्तिभ्रमं वारयितुमाह 'योऽसावि'त्यादि। वासुदेवावस्थात् स्वस्मादेव विष्णववस्थः स्वयमुद्भभावि'त्यर्थः।

मात्स्ये–[1]**'अतीन्द्रियः परोऽव्यक्तादन्तर्यामी सनातनः।**
**नारायण इति ख्यातस्स एव स्वयमुद्बभौ॥'**

इत्युक्तेः,'चक्री सनातनोऽव्यक्त' इत्यमरशेषोक्तेः, [2]'वैकुण्ठः पुरुषो विष्णुः शुक्रोऽनन्तः सनातन' इति मोक्षधर्मोक्तेश्च सनातनशब्दो भगवति रूढः।

समष्टिसृष्टिमाह - 'सोऽभिध्याये'ति। शरीरशब्देन तमोऽव्यक्तावस्थं चित्संसृष्टमचिद्वस्तूच्यते। [3]'विविधाः प्रजास्सिसृक्षुरि'ति - व्यष्टिसृष्ट्यर्थमित्यर्थः। 'अप एवे'ति अप्-शब्दोऽण्डकारणसमस्त-तत्त्वप्रदर्शनार्थः। अप्-शब्दो व्याख्येयश्रुतिगताप्-शब्दस्मारणार्थः। 'ता इमा आपः तद्धिरण्यमण्डमभवदि'ति हि श्रुतिः। एवकारेण त्रिवृत्करणं व्यावर्त्यते। अत्र त्रिवृत्कृता आप इत्यर्थः। [4]'तासु वीर्यमपासृजदि'ति त्रिवृत्करणजनितामण्डोत्पादनशक्तिं तास्वजनयदित्यर्थः।

व्यष्टिसृष्टिमाह - [5]'तदण्डमि'ति। तदण्डकारणतत्त्वजातमण्डमभवदित्यर्थः। [6]'तस्मिन् जज्ञ' इत्यादि - स्वयमेव भगवानेव, चतुर्मुखशरीरकोऽभवदित्यर्थः। 'विष्णुः ब्रह्मस्वरूपेण स्वयमेव व्यवस्थितः' इति वचनात्। [7]'आपो नारा' इत्यादि - अण्डकारणतत्त्वान्यापः। तासां नारत्वमुपपादयति - 'आपो वै नरसूनव' इति। 'रुङ् क्षये' इत्यस्माद्धातोः 'ड'प्रत्यये 'टि'लोपे च कृते 'र' इति भवति। नरः अक्षयो निर्विकार इत्यर्थः। [8]'जह्नुर्नारायणो नर' इति वचनान्नर इति भगवन्नाम। तस्माज्जात इत्यण्-प्रत्यये कृते 'नारा' इति भवति। 'अयन' शब्देनान्तरात्मत्वमुच्यते। [9]'तस्मिन् जज्ञे स्वयं ब्रह्मे'ति भगवत एव प्रस्तुतत्वात् स एवात्रास्येति सर्वनाम्ना परामृश्यते। अत एव मोक्षधर्मे —

[10]**'नाराणामयनं ख्यातो ह्यहमेकस्सनातनः।'**
[11]**'आपो नारा इति प्रोक्ता आपो वै नरसूनवः।**

---

1. म.पु.2.27
2. महा.मोक्ष.279.29
3. ह.पु.1.1.27
4. ह.पु.1.1.27
5. ह.पु.1.1.30
6. ह.पु.1.1.29
7. ह.पु.1.1.28
8. महा.आनु.149.39
9. ह.पु.1.1.29
10. महा.मोक्ष.341.41
11. महा.मोक्ष.341.40

**अयनं मे मताः पूर्वमतो नारायणोऽस्म्यहम्॥'** इति भगवद्वचनम्। हरिवंशे च प्रथमाध्याये –

[1]'**विष्णुः ( ततः? ) स्वयम्भूर्भगवान् सिसृक्षुर्विविधाः प्रजाः।**
**अप एव ससर्जादौ तासु वीर्यमवासृजत्॥'**
[2]'**आपो नारा इति प्रोक्ताः आपो वै नरसूनवः।**
**ता अस्यायनं ( अयनं तस्य ताः ) पूर्वं तेन नारायणस्स्मृतः॥'**
[3]'**हिरण्यवर्णमभवत् तदण्डमुदकेशयम्।**
**तत्र जज्ञे स्वयं ब्रह्मा स्वयम्भूरिति नः श्रुतम्॥'** इति।

'यत्तत्कारणमिति तेन नारायणः स्मृत' इत्युक्तो भगवानेव परामृश्यते अव्यवधानात्। एवं भगवतः स्वस्मात्तमोनुदः प्रादुर्भूतस्य चतुर्मुखस्त्रष्टृत्वनारायणसंज्ञकत्वाभिधानाद्भगवत एव तमःप्रेरकत्वमुक्तम्। 'तमोनुत् अः' इति वा पदच्छेदः। अकारो भगवति सुप्रसिद्धः। तमोनुत्सन् प्रादुरासीत्। तमः प्रेर्य विष्णुरूपेणावतीर्ण इत्यर्थः। तमोनुद इत्यकारान्तो वा। न च कर्मण्यण्, तमोनोद इति रूपप्रसङ्गः। सम्बन्धसामान्यषष्ठ्यन्तस्य नुदपदेन [4]'इगुपधज्ञाप्रीकिरः क' इति 'क'प्रत्ययान्तेन समासान्मूलविभुजादित्वाद्वा 'क' प्रत्ययः। एवं च कर्मण्यत्वविवक्षायामपि न दोषः। अत एवारण्यपर्वणि सूर्यस्तोत्रे विश्वकर्मा तमोनुद इति प्रयोगः। अत एव नारायणीये-

[5]'**शिष्याणां वचनं श्रुत्वा सर्वाज्ञानतमोनुदः।**
**पराशरसुतः श्रीमान् व्यासो वाक्यमुवाच ह॥'**इति

'पराशरात् गन्धवतीर्महर्षेः तस्मै नमोऽज्ञानतमोनुदाय' इति च प्रयोगः। न चावध्याकाङ्क्षानुरोधात् पञ्चम्यन्तत्वनिर्बन्धः कार्यः। जन्मवत्प्रादुर्भावस्यावध्यपेक्षाविरहात् [6]'स्वयमुद्भावि'त्यनेन स्वस्मादित्यर्थात् प्रतीत्या आकाङ्क्षाशान्तेश्च। मात्स्यपुराणे च—

[7]'**ततः स्वयम्भूरव्यक्तः प्रभवः पुण्यकर्मणाम्।**
**व्यञ्जयन्नेतदखिलं प्रादुरासीत्तमोनुदः॥' इति।**

वैष्णवे च हरिरेव तमःप्रेरक उच्यते —

---

1. ह.पु.1.35
2. ह.पु.1.36
3. ह.पु.1.37
4. पा.सू.3.1.135
5. महा.मोक्ष.340.24
6. महा.पु.2.27
7. म.पु.2.26

**[1]'प्रधानं पुरुषं चापि प्रविश्यात्मेच्छया हरिः।**
**क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्ययौ॥'**इति।

एवं श्रीविष्णुधर्मादिष्वपि द्रष्टव्यम्।

शम्भुशब्दश्चाभिधानकोशादिषु भगवदभिधानतया सुप्रसिद्धः। 'शम्भुधातृहरीशाना' इत्यादिना सुबालोपनिषत्तापनीयादिषु भगवति सर्वेश्वरत्वाभिधानात् तत्समानाधिकृतश्शम्भुशब्दो भगवत्पर एव।

ननु रुद्र एव स्वारस्यमिति चेत्, सत्यम्। तत्तु त्रिमूर्त्यन्तर्गत एव। अत एव ह्यभिधानकोशे ब्रह्मविष्णुरुद्रक्रमेण नामपाठः। अत एकादशरुद्रेषु रुद्राभिधानप्रयोगः समानाकारतया गौण्यैव वृत्या। अत एव स्मरहरत्रिपुरान्तकान्तकरिपुक्रतुध्वंसिप्रमुखपदैस्सह शम्भ्वादिशब्दपाठः।

एतेन रुद्रादिशब्दा जातिशब्दा इति निरस्तम्। युक्तश्चायं नामानुशासनपाठः। एकस्यैव हि रुद्रस्य नामकारणं भगवता स्वनामप्रदानञ्च श्रुतिस्मृतिषु दृश्यते। 'एक एव रुद्रो न द्वितीयाय तस्थ' इति वाक्यम्। 'एक एव रुद्रः, द्वितीयो नास्ती'ति वेदभाष्ये व्याख्यातम्। तेन च रुद्रशब्दमुख्यार्थ एक एवेत्यवगतम्। युक्तं चैतत् व्याख्यानम्। द्वितीयनिषेधासम्भवात्। न हि रुद्रपदं निर्विशेषचिन्मात्रार्थकमिति कस्यापि मतम्। न चेदं वाक्यं प्रलयपरम्, अग्रादिपदाभावात्। अत इदं वाक्यमेकस्यैव रुद्रपदमुख्यार्थत्वमितरेषां गौणत्वमेवेत्येवम्परम्। तस्मात् पञ्चसु नलेषु नलशब्दवत्अन्धकोत्पन्नेष्वन्धकशब्दवच्चान्यत्र गौणा एव रुद्रादिशब्दाः। न हि वैरसेन्यतिरिक्ते नलनामकरणमस्ति। नाप्यन्धकोत्पन्नेष्वन्धकनामकरणम्। एवं च पराभिमतधर्मिण्येव सन्देहात् तत्र प्रयोगस्येहासम्प्रतिपत्तेः कुतस्तत्र वृत्तिः, कुतस्तरां शक्तिः, कुतस्तमाञ्च वा तत्प्रतीतिः। परिग्रहश्चानुपपन्नः, सृज्यत्वानपहतपाप्मत्वयोः श्रवणात्। परानभिमतश्च तत्परिग्रहः। ततो भगवत एव परिग्रहो युक्तः। विष्णोस्सर्गश्रवणेऽपि [2]'अजायमानो बहुधा विजायते। तस्य धीराः परिजानन्ति योनिमि'त्यवतारत्वावगमात्।

नन्वीशानस्य ध्येयत्वे उक्ते किमन्येन तादृशः येनैवमवधारणमिति शङ्कायामितरेषां ध्येयत्वव्यवच्छेदाय परिच्छिन्नैश्वर्यत्वलक्षणदोषमुद्भावयितुमिदं वाक्यं प्रवृत्तम् 'ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे सम्प्रसूयन्त' इति। अतो विष्णोरपि परायत्तमेवेह जन्मविवक्षितमिति चेत्, न ह्यत्रेशानमेवेत्यवधारणं दृश्यते। नाप्यन्यध्याननिषेधः, येन तच्छेषभूतोऽयं निन्दार्थवादः स्यात्। अत ईशानस्य ध्येयत्वमुक्त्वा, तदुपयोगिप्रशंसार्थमिदमुच्यते। सम्भवति च ब्रह्मविष्णुरुद्रस्रष्टृत्वेन प्रशंसा। स्वेच्छास्रष्टृत्वेऽपि विष्णोर्न कारणम्। कारणमित्यनेन तु 'समस्तशक्तिरूपाणि तत्करोति

---

1. वि.पु.1.2.29
2. तै.आ.3.13.3

जनेश्वरे'त्युक्तस्य सर्वावतारमूलस्य भगवद्रूपस्य कारणानन्तरं निषिध्यते। शम्भ्वादिशब्दानां च प्रमाणानुगुणं स्वारस्यं भगवत्येवेति वदन्ति विद्वांसः।

**'ऋते नारायणादीनि नामानि पुरुषोत्तमः।**
**प्रादादन्यत्र भगवान् राजेवर्ते[1] स्वकं पुरम्॥**
**चतुर्मुखश्शतानन्दो ब्रह्मणः पद्मभूरिति।**
**उग्रो भस्मधरो नग्नः कपालीति शिवस्य च॥'**

इति भगवत्येव प्रजापतिशिवशम्भ्वादिशब्दानां नैसर्गिकशक्तियोगस्यान्यत्रागन्तुकाभिधानस्य चावगमात्। दृष्टाश्च विष्णौ शम्भ्वादिशब्दाः।

किञ्च प्रणवमात्राविभागकथने पूर्वमात्रात्रयसम्बन्धित्वेन वेदत्रयानन्तरं क्रमात् ब्रह्मविष्णुरुद्रा उक्ताः। अथार्धमात्रायाथर्ववेदानन्तरं संवर्तकोऽग्निः ब्रह्मादिदेवतास्थाने श्रूयते। न चार्धमात्राप्रतिपाद्यस्तुरीयः प्रायपाठात्। स च संवर्तकोऽग्निर्भगवान् विष्णुः।

**'यः पुरा ह्यनलो भूत्वा और्वस्संवर्तको विभुः।**
**पातालस्थोऽर्णवगतं पपौ तोयमयं हरिः॥'**

इति हरिवंशे कृष्णावतारप्रश्नाध्याये वचनात्। तत्रैव पौष्करप्रादुर्भावे –

**[2]'क्षीरोदः सागरे चाहं समुद्रे बडवामुखः।**
**वह्निः संवर्तको भूत्वा पिबंस्तोयमयं हरिः॥'**

इति मार्कण्डेयं प्रति भगवद्वचनात्। [3]'त्वं बडवामुखोऽग्निः, त्वमाहुतिरि'ति नारायणीये नारदस्तुतौ वचनात्। [4]'अहं हयशिरो भूत्वा समुद्रे पश्चिमोत्तरे, [5]पिबामि सुहुतं हव्यं कव्यं च श्रद्धयान्वितमि'ति नारदं प्रति भगवद्वचनात्। नारायणीये एव नामनिरुक्त्यवसरे [6]'अथ नारायणो लोकहितार्थाय बडवामुखो नाम ऋषिः पुरा बभूवे'ति वचनाच्च। [7]'अहः संवर्तको व्याल (वह्निः?)' इति सहस्रनामपाठाच्च।

किञ्च प्रणवस्य चतुर्थ्यार्धमात्रायाः [8]'याऽवसानेऽस्य चतुर्थ्यर्धमात्रा सा' 'विद्युन्मती सर्ववर्णा

---

1. नृजेवर्ते इति पाठभेदः ।
2. ह.वं.3.10.60
3. महा.मोक्ष.अध्या.338,पुट-1077
4. महा.मोक्ष.अध्या.339.59
5. महा.मोक्ष.अध्या.339.60
6. महा.मोक्ष.अध्या.342.60
7. महा.आनु.149.23
8. अ.शिखा.1

पुरुषदेवत्ये’ति पुरुषदेवत्वस्योपक्रमे श्रुतेः तापनीये प्रणवस्य [1]‘या पूर्वास्य मात्रा पृथिव्यकारस्स ऋग्भि ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्य’ इत्यादिनाथर्वशिखा क्रमेण प्रणमात्राणां चतुर्णां लोकवर्णवेदादीनभिधायानुष्टुभाप्रतिपाद्य नरसिंहत्वेनार्धमात्राप्रतिपाद्यतुरीयस्याविष्करणाच्च महापुरुष एवात्र प्रतिपाद्यः।

एतेन ‘पुरुषदेवत्ये’त्यतःप्रागेव ‘याऽवसाने चतुर्थ्यर्धमात्रा सा सोमलोक’ इति सोमशब्दवाच्यरुद्रस्यावसानार्धमात्रासम्बन्धित्वेनोपक्रमादथर्वशिखा तत्परेति निरस्तम्। सोमशब्दस्य हि रुद्रे न रूढिः, किन्तु चन्द्र एव। ततश्च योगाद्रूढिपूर्वकलक्षणाया ज्यायस्त्वात् सोमशब्दः सोमधर्माह्लादकत्वपरः। एवञ्च लोकविशेषणत्वसम्भवात् कर्मधारयलाभस्वारस्यमपि भवति। योगार्थे हि तस्मिन्नाश्रीयमाणे लोकशब्देन षष्ठीसमासादस्वारस्यापत्तिः। दृष्टश्च सोमशब्दस्य भोग्यत्वलक्षणया प्रयोगः, यथा ‘तस्या आहुतेस्सोमो राजा सम्भवती’ति। तत्र हि भोग्यभूतदिव्यशरीरप्राप्त्या स्वर्लोकगते जीवे सोमशब्दस्य प्रयोगः।

वस्तुतस्तु भगवति विष्णौ रूढस्सोमशब्दः। तापनीये तथैवोपक्रमे श्रुतस्य सोमस्य नारसिंहत्वेनाग्रे प्रपञ्चनेनाथर्वशिखायामपि विष्णोरेव सोमशब्दाभिधेयत्वं युक्तम्। वाराहे ब्रह्मरुद्रादीनां स्रष्टुस्तुरीयस्य विष्णोस्सोमाख्यत्वमभिधाय इयं श्रुतिर्विवृता। तथाहि - तत्र सप्तदशाध्याये –

**[2]‘सर्वे देवाः सपितरो ब्रह्माण्डाः काण्डमध्यमाः।**
**विष्णोः सकाशादुद्भूता इतीयं वैदिकी श्रुतिः॥’**

इत्यारभ्य [3]‘अग्निस्तथाश्विनावि’त्यादिना अग्न्यादीनां प्रतिपदादितिथिदेवतानामुत्पत्तिमुक्त्वा तेषाञ्च वैश्वानरादिरूपाणां शरीरमाश्रितानां ज्यायस्त्वे विवादं तत्परिचिकीर्षयैकैकशो निर्गमेऽपि सोमाख्येन स्रष्ट्रा पालितस्य शरीरस्यापि शरणं ततो लज्जितैस्तैस्सोमाख्यस्य परमेश्वरस्य श्रुतिस्रष्टुस्तस्य स्तुत्यं प्रसादं शरीरान्तर्वैश्वानरादिरूपेण सृष्टानां बहिरग्न्यादिरूपेण सृष्ट्या मूर्तामूर्तरूपद्वयदानं बहिर्मूर्तरूपाणाञ्च अग्न्यश्विगौर्यादीनां प्रदानञ्चोपन्यस्य [4]‘एवं वेदान्तपुरुषः प्रोक्तो नारायणात्मक’ इति [5]‘एवम्प्रभावो देवोऽसौ वेदवेद्यो जनार्दन’ इति सप्तदशाध्याये प्रतिपादितम्। तत्र –

**[6]‘एतैर्मुक्तं क्षेत्रं मुक्त्वास्थन्तु संस्थितम्।**
**सोमेन पाल्यमानं पुरुषेणानन्दरूपिणा॥’**

---

1. अ.शिखा.1
2. व.पु.17.23
3. व.पु.17.24
4. व.पु.17.73
5. व.पु.17.74
6. व.पु.17.55

**[1]'एवं व्यवस्थिते सोमे षोडशात्मन्यथाजरे।'**

**[2]'प्रागवस्थं शरीरन्तं दृष्ट्वा सर्वज्ञपालितम्।**

**ताः क्षेत्रदेवताः सर्वा वैलक्ष्यं भावमाश्रिताः॥'**

**[3]'तमेवं तुष्टुवुः सर्वास्सोमाख्यं परमेश्वरम्।'**

इति वचनैरानन्दरूपतया सर्वज्ञत्वेन परमेश्वरत्वेन चोक्तः पुरुषो विष्णुरेवेत्यवगम्यते। विष्णोरुद्भूतत्वेनाध्यायादावभिहितक्षेत्रदेवताकृतसोमाख्यपरमेश्वरस्तोत्रे [4]'स्थानभङ्गो न नः कार्यः स्वयं सृष्ट्वा प्रजापते' इति सोमाख्यं परमेश्वरं प्रति तत्स्रष्टृत्ववचनात्।

**[5]'उवाच चैताः क्रीडार्थं भवत्युत्पादिता मया।**

**कृतकृत्यस्य मे किं नु भवतीभिः प्रयोजनम्॥'**

इति तेनापि सोमाख्येन स्वस्रष्टृत्ववचनात् उक्तस्य शरीरपालनसर्वज्ञत्वकृतकृत्यत्वक्रीडार्थदेवता-स्रष्टृत्ववचनात् उक्तमहिम्नः [6]'एवं वेदान्तपुरुषः प्रोक्तो नारायणात्मक' इति भगवत्सम्बन्धित्व-वचनाच्च। अनन्तरमष्टादशाध्यायप्रभृतिपञ्चत्रिंशाध्यायान्तेन ग्रन्थेन [7]'कथमग्नेः समुत्पत्तिरश्विनोर्वा महामुने' इत्यादिना क्षेत्रदेवतानां शरीरात् बहिर्मूर्तिशरीरान्तर्वर्तिदेवताया बहिर्विष्णुरूपेण सृष्टिः, तस्य पालनाधिकारतदपेक्षितसार्वज्ञ्यभूषणायुधविशेषद्वादशीतिथिदानम्, तद्व्रतम्, तस्य नाभिपद्माद्ब्रह्मणस्सम्भवश्च त्रिंशेऽध्यायेऽभिहितः। इमानि तत्र वचनानि –

**[8]'योऽसौ नारायणो देवः परात्परतरो विभुः।**

**तस्य चिन्ता समुत्पन्ना सृष्टिं प्रति नरोत्तम॥'**

**[9]'सृष्टा चेयं मया सृष्टिः पालनीया मयैव ह।'**

**[10]'एवं चिन्तयतस्तस्य सत्याभिध्यायिनो नृप।'**

**[11]'प्राक्सृष्टिर्यन्मनो राजन् मूर्तिमत्त्वत्पुरो बभौ।**

**पुरोभूतस्ततस्तस्मिन् देवो नारायणः स्वयम्॥**

---

1. व.पु.17.56
2. व.पु.17.57
3. व.पु.17.58
4. व.पु.17.63
5. व.पु.17.64
6. व.पु.17.74
7. व.पु.18.1
8. व.पु.31.2
9. व.पु.31.3
10. व.पु.31.4
11. व.पु.31.5-8

**प्रविशन्तं ददर्शाथ त्रैलोक्यं तस्य देहतः।**
**ततः सस्मार भगवान् वरदानं पुरातनम्॥**
**अग्न्यादीनां[1] ततस्तुष्टः प्रादात्तस्य पुनर्वरम्।**
**सर्वज्ञः सर्वकर्ता त्वं सर्वलोकनमस्कृतः॥**
**[2]त्रैलोक्यवसनाच्च त्वं भव विष्णुस्सनातनः।**
**देवानां सर्वकार्यञ्च कर्तव्यं ब्रह्मणस्तथा॥'**
**[3]'सर्वज्ञत्वञ्च भवतु तव देव न संशयः।'**
**[4]'अविद्याविजयञ्चेमं शङ्खरूपेण धारय।**
**अज्ञानच्छेदनार्थाय खड्गं तेऽस्तु सदा करे॥**
**कालचक्रमयं घोरं चक्रं तद्धारयाच्युत।**
**अधर्मराजघातार्थं गदां धारय केशव॥**
**मालेयं भूतमाला ते कर्णे तिष्ठतु सर्वदा।**
**श्रीवत्सकौस्तुभौ चेमौ चन्द्रादित्यच्छलेन ह॥'**इत्यादि।
**[5]'तस्य सुप्तस्य जठरे नाभिपद्मं विनिःसृतम्।**
**[6]'कर्णिकायां तथा मेरुस्तन्मध्ये ब्रह्मणो भव॥'**इत्यादि च।

अत्र बहिर्मूर्तिवरप्रदानस्मरणस्त्रष्टृत्वाद्युक्तेः प्रागुक्तस्सोमाख्यः परमेश्वरोऽयं नारायण इत्यवगम्यते।

त्रयस्त्रिंशेऽध्याये ब्रह्मणो रुद्रसृष्टिरुद्रनामकरणादिकमुक्तम्[7]। विंशाध्याये काश्यपसन्तानोक्तेः आदित्यान्तर्भाविनेन्द्रसृष्टिरुक्तवैवं ब्रह्मविष्णुरुद्रेन्द्रसम्प्रसूतिहेतुत्वं सोमाख्यस्य नारायणस्यात्रोक्तम्[8]। पञ्चत्रिंशे च —

**[9]'योऽसौ क्षेत्रज्ञसंज्ञो वै देहेऽस्मिन् पुरुषः परः।**
**स एव सोमो मन्तव्यो देहिनां जीवसंज्ञितः॥'**

1. व.पु.31.7
2. व.पु.31.8
3. व.पु.31.9
4. व.पु.31.14-16
5. व.पु.31.12
6. व.पु.31.13
7. व.पु.33.16-25
8. व.पु.20.27-30
9. व.पु.35.11

इति वचनाज्जीव एवात्र सोम इत्युच्यत इति न भ्रमितव्यम्। तत्र परः पुरुष इत्यनुपपत्तेः। क्षेत्रज्ञत्वस्य तु [1]'क्षेत्रज्ञं चापि मां विद्धी'त्यादिषु भगवति प्रसिद्धेः जीवसंज्ञितत्वस्य तदभिमानिसङ्कर्षणादिमूर्तिमत्त्वादिसम्बन्धेन भगवति सम्भवात्। तथा च मोक्षधर्मे वचः –

[2]'**अहं हि जीवसंज्ञो वै मयि जीवस्समाहितः।**'इति

[3]'**सर्वावासं वासुदेवं क्षेत्रज्ञं विद्धि तत्त्वतः।**' इति च।

तस्मात् सोमोऽत्र नारायणः।

तथा वाराहेऽष्टपञ्चाशे च कान्तिवृत्ताध्याये —

[4]'**बलदेवाय पादौ तु केशवाय तथार्चयेत्।**
**एवमभ्यर्च्य मेधावी वैष्णवं रूपमुत्तमम्॥**'

[5]'परस्वरूपं सोमाख्यं विमलं तद्दिने हि यत्।'इत्यादिना सोमाख्यस्य विष्णोर्व्रतम् ,

[6]'**कान्तिमानपि लोकेषु सर्वज्ञः प्रियदर्शनः।**
**त्वत्प्रसादात् सोमरूपिन् नारायण नमोऽस्तु ते॥**'

इति तच्छब्दलिङ्गमात्रञ्चाभिधाय प्रसिद्धः सोमोऽप्येतद्व्रताचरणतोषितसोमाख्यजनार्दनदत्त-तदीयामृतकलायोगादेव सोमत्वं प्राप्त इत्युक्तम्।

[7]'**आत्रेयेणापि सोमेन कृतमेतत्पुरा नृप।**'
**तस्य व्रतान्ते सन्तुष्टः स्वयमेव जनार्दनः॥**'

[8]'**यक्षाणां पवनायाशु अमृताख्यां कलां ददौ।**
**तत्कलां सोमराजोऽसौ कर्तुमेतत् भवान्निशि॥**'

[9]'**सोमत्वञ्चागमत् सोम ओषधीनां पतिर्बभौ।**'इति।

किञ्च [10]'**याऽवसानेऽस्य चतुर्थ्यर्धमात्रा**' '**सा विद्युन्मती सर्ववर्णा पुरुषदेवत्ये**'ति

1. भ.गी.13.2
2. महा.मो.339.47
3. महा.मो.344.18
4. व.पु.57.4
5. व.पु.57.5
6. व.पु.57.13
7. व.पु.57.15
8. व.पु.57.16
9. व.पु.57.27
10. अ.शिखा.1

सर्ववर्णत्वं श्रुतं तद्देवताभूतपुरुषस्य तद्वर्णत्वादुपचाराद्वाच्यम्। पूर्वमात्रात्रये ब्रह्मविष्णुरुद्रदेवत्यतया श्रुते रक्तकृष्णशुक्लत्वस्य तथात्वदर्शनात्। तच्चानेकवर्णत्वं पुरुषशब्दितस्य भगवतो नारायणस्य रूपं भारतादौ प्रसिद्धम्। तथा सभापर्वणि –

[1]'**अव्यक्तोऽव्यक्तलिङ्गस्थो य एष भगवान्प्रभुः।'**
[2]'**पुरा नारायणो देवः स्वयम्भूः प्रपितामहः।**
**सहस्रशीर्षः पुरुषो व्यक्तोऽनन्तः सनातनः॥**
**सहस्रास्यः सहस्राक्षः सहस्रचरणो विभुः।**
**सहस्रबाहुः साहस्रो देवो नामसहस्रवान्॥**
**सहस्रमकुटो देवो विश्वरूपो महाद्युतिः।**
**अनेकरूपो देवादिरव्यक्ताद्वै परे स्थितः॥'इति।**

अत्र पुरुषस्य पुरुषसूक्तप्रतिपाद्यस्य नानारूपत्वमुक्तम्। मोक्षधर्मे च नारायणीये नारदस्तुत्यनन्तरम् -

[3]'**एवं स्तुतस्स भगवान् स्तवैर्गुह्यैश्च[4] नामभिः।**
**तं मुनिं दर्शयामास नारदं विश्वरूपधृक्॥'**
**किञ्चिच्चन्द्राद्विशुद्धात्मा किञ्चिच्चन्द्राद्विशेषवान्।**
**कृशानुवर्णः किञ्चिच्च किञ्चिद्धिष्ण्याकृतिः प्रभुः॥**
**शुकपत्रवर्णः किञ्चित् किञ्चित् स्फटिकसन्निभः।**
**नीलाञ्जनचयप्रख्यो जातरूपप्रभः क्वचित्॥'**
[5]'**नीलवैदूर्यसदृश इन्द्रनीलनिभः क्वचित्।**
**क्वचिन्मयूरग्रीवाभो मुक्ताहारनिभः क्वचित्॥**
**एतान् बहुविधान् वर्णान् रूपैर्बिभ्रत्सनातनः।**
**सहस्रनयनः श्रीमान् शतशीर्षस्सहस्रपात्॥'**
[6]'**सहस्रोदरबाहुश्च अव्यक्त इति च क्वचित्।'**
[7]'**भगवन् विश्वदृक् सिंहः सर्वमूर्तिर्महान् प्रभुः॥'** इत्याद्युक्त्वा

1. महा.सभा.अध्या.38,पुट-893
2. महा.सभा.अध्या.38,पुट-893
3. महा.मोक्ष.339.1-3
4. गुह्यैस्तथ्यैश्च – पाठभेदः ।
5. महा.मोक्ष.339.5-6
6. महा.मोक्ष.339.7
7. महा.मोक्ष.339.17

[1]**‘मां प्रविश्य भवन्तीह मुक्ता भक्तास्तु ये मम।**
**अहं हि पुरुषो ज्ञेयो निष्क्रियः पञ्चविंशकः॥’**
**‘मां तु जानीहि ब्रह्मर्षे पुरुषं सर्वगं प्रभुम्॥’** इति पुरुषत्वञ्चोक्तम्।

[2]**‘नास्ति तस्मात् परतरं पुरुषाद्वै सनातनादि’**ति ततः परं च निषिद्धम्। यथाथर्वशिखायां ‘स कारणं कारणाना’मित्यादिना।

किञ्च

[3]**‘नित्यं हि नास्ति जगति भूतं स्थावरजङ्गमम्।**
**ऋते मामेकमीशानं पुरुषं लोकजीवनम्॥’**

इत्यथर्वशिखार्थः स्फुटमनुगतः। तत्र [4]‘ध्यायीतेशानमि’ति शिखानिर्देशानुरोधेन, ईशानमिति पुरुषदेवत्येत्येतदनुरोधेन, पुरुषमिति ब्रह्मविष्णुरुद्रेन्द्रा इति वाक्यार्थभूतेतरनश्वरत्वाभिप्रायेण ‘नित्यं हि नास्ति जगति भूतं स्थावरजङ्गममि’त्युक्तम्। ततो

[5]**‘हिरण्यगर्भो लोकादिश्चतुर्वक्त्रोऽनिरुक्तकः।**
**ब्रह्मा सनातनो देवो मम बह्वर्थचिन्तकः॥’**

इत्यादिना ‘ब्रह्मविष्णुरुद्रेन्द्रा’ इति श्रुतिविवक्षितानां ब्रह्मादीनां सर्वेषां देवानामृषीणां पितृणां च तेन पुरुषेणेशितव्यत्वं प्रपञ्चितम्।

[6]**‘प्रादुर्भावगतश्चाहं सर्वकार्येषु नित्यदा।**
**अनुशास्यस्त्वया ब्रह्मन्नियोज्यश्च सुतो यथा॥’**

इत्यादिना ब्रह्मादिभिः सह विष्णोः प्रसूतिरवताररूपेत्यप्याविष्कृतम्।

[7]**‘विद्यासहायवन्तं मामादित्यस्थं सनातनम्।**
**कपिलं प्राहुराचार्याः साङ्ख्यनिश्चितनिश्चयाः॥’**

इति च, उमाशब्दवाच्यतया प्रागुपपादितभगवद्बुद्धिशक्त्यभिमानिलक्ष्मीसहितस्याभिधानात्, [8]**‘ततो भूयो जगत्सर्वं करिष्यामीह विद्यये’**ति वचनेन [9]**‘ततो युगसहस्रान्ते संहरिष्ये**

1. महा.मोक्ष.357.43
2. महा.मोक्ष.339.31
3. महा.मोक्ष.339.32
4. अ.शिखा.2
5. महा.मोक्ष.339.50
6. महा.मोक्ष.357.65
7. महा.मोक्ष.357.68
8. महा.मोक्ष.339.72
9. महा.मोक्ष.339.70

**जगत्पुनः।'** [1]**'कृत्वाऽऽत्मस्थानि भूतानि जङ्गमानि स्थिराणि चे'**ति तस्मिन्प्रलीनत्वेन कथितानां भूतादीनां सम्प्रसूतेः कथनात्, [2]'सर्वाणि चेन्द्रियाणि सह भूतैरि'ति वाक्यार्थस्सोमशब्दार्थश्चोपबृंहितः। एवमथर्वशिखास्थानेकार्थप्रत्यभिज्ञापनेन पुरुषसंज्ञकस्य नानावर्णत्वकीर्तनात् अथर्वशिखाप्रतिपाद्यो नानावर्णः पुरुषः पुरुषोत्तम इति पञ्चवक्त्रसदाशिवमूर्तौ प्रतिमुखं वर्णभेदमात्रान्नानावर्णत्वलिङ्गस्य अन्यस्यान्यथासिद्धिशङ्कावकाशः। यद्यपि वर्णानामविद्यमानानामेव प्रणवे उपास्यत्वमात्रमुच्यते, न तु पुरुषस्य तद्वर्णत्वम्। अथापि पीता कृष्णा शुक्लेति तत्तद्देवतारूपाणामेव ध्यानविधानादिह नानावर्णत्वस्य पुरुषधर्मत्वमवगम्यते।

एतेनोपक्रमस्थाभ्यामपि पुरुषश्रुतिसर्ववर्णत्वलिङ्गाभ्यां न विष्णुपरतासिद्धिः। उपसंहारस्थानामपीशानशम्भुशिवशब्दानां भूयस्त्वेन महाप्राणतया अल्पबलोपक्रमबाधादिति निरस्तम्। सोमसंवर्तकशब्दयोरप्युपक्रमगतयोः विष्णवाख्यात्वोपपादनेन भूयोऽल्पत्वविशेषाभावात्। ईशानादिशब्दानामपि भगवन्नामत्वाच्च। [3]'ईशानः प्राणदः प्राणः', [4]'स्वयम्भूश्शम्भुरादित्यः', [5]'सर्वश्शर्वश्शिवस्स्थाणुः', [6]'सङ्क्षेप्ताक्षेमकृच्छिव' इति सहस्रनामसु पाठात्।

यत्तु 'यानि नामानि गौणानी'त्युपक्रमे गौणत्वाभिधानात् क्रतुपरत्वेनादिशब्दवत् गौणवृत्त्या नामत्वमीशानादिशब्दानामिति, तन्न, तत्र वासुदेवजनार्दनादिशब्दानामपि पाठात्। न च शिवरुद्रादिगौणनामभूम्ना गौणव्यपदेश इति वाच्यम्। रूढानां यौगिकानां च बाहुल्येन गौणत्वाभिमतशिवादिशब्दबाहुल्यासिद्धेः भूम्नोपचारायोगात् । किञ्च मोक्षधर्मे नारायणीये –

[7]**'अस्तौषीत् यैरिमं व्यासः सशिष्यो मधुसूदनम्।**
**नामभिर्विविधैरेषां निरुक्तं भगवन् मम॥'**

[8]**'वक्तुमर्हसि शुश्रूषोः प्रजापतिपतेर्हरेः।'**इति जनमेजयेन पृष्टेन वैशम्पायनेन

[9]**'शृणु राजन् यथाऽऽचष्ट फाल्गुनस्य हरिः प्रभुः।**
**प्रसन्नात्माऽऽत्मनो नाम्नां निरुक्तं गुणकर्मजम्॥'**

---

1. महा.मोक्ष.339.71
2. अ.शिखा.2
3. महा.आनु.149.21
4. महा.आनु.149.28
5. महा.आनु.149.27
6. महा.आनु.149.77
7. महा.मोक्ष.341.1
8. महा.मोक्ष.341.2
9. महा.मोक्ष.350.3

इत्यादिना नामनिरुक्तविषयः कृष्णार्जुनसंवादोऽवतारितः। तत्र गुणकर्मजमिति गुणनिमित्तकं च क्रियानिमित्तकञ्च शब्देनोक्तम्। अनन्तरं च –

**[1]'ऋग्वेदेऽथ यजुर्वेदे सामवेदे तथैव च।**
**पुराणे सोपनिषदे तथैव ज्यौतिषेऽर्जुन॥'**
**[2]'साङ्ख्ये च योगशास्त्रे च आयुर्वेदे तथैव च।**
**बहूनि मम नामानि कीर्तितानि महर्षिभिः॥'**
**गौणानि तत्र नामानि कर्मजानि च कानिचित्।**
**निरुक्तं कर्मजानाञ्च शृणुष्व प्रयतोऽनघ॥'**

इत्यादिनार्जुनं प्रति भगवतो वचनमुपन्यस्तम्। तत्र गुणकर्मजमिति पूर्वोक्तयोर्गुणजमिति स्थाने गौणमिति निर्दिष्टम्। कर्मजशब्दस्तु पूर्ववदेव निर्दिष्टः। अतः स्थानप्रमाणात् कर्मजशब्दसमभिव्याहाराच्च गुणकृतं तत्र विवक्षितम्। अग्रे गौणत्वाभिमतशिव-रुद्रादिशब्दानामकथनाच्च नारान्तरायजनजगद्वासनभूतप्रवेशचिदचिन्नियमनादिक्रियानिमित्तकानां नारायणवासुदेवविष्णुसत्यादिशब्दानामजननाक्षयत्वश्यामवर्णादिगुणनिमित्तानाम् अजाधोक्षज-हर्यादिनाम्नामेव चाग्रे निरुक्तोपदेशदर्शनाच्च अमुख्ये निरुक्त्यसम्भवाच्च। एवञ्च,

**[3]'यानि नामानि गौणानि विख्यातानि महात्मनः।**
**ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये॥'**

इति सहस्रनामोपक्रमे [4]'बहूनि मम नामानि कीर्तितानि महर्षिभिः', [5]'गौणानि तत्र नामानि कर्मजानि च कानिचिदि'ति नारायणीयवचनार्थसारूप्यात् तत्रत्यगौणशब्दसमानार्थत्वमुचितम्। नारायणीये कर्मजानामिति पृथग्ग्रहणं गोबलीवर्दन्यायेन द्रष्टव्यम्। वैशेषिकाद्यभिमतस्य गुणस्यात्राग्रहणात्।

अथवा गुणशब्दः क्रियाव्यतिरिक्तपरः। सहस्रनामादौ 'गौणानी'त्येतत् कर्मजानामप्युपलक्षणम्। [6]'ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे सम्प्रसूयन्त' इत्यत्र विष्णोः प्रसूत्यभिधानमङ्गीकृत्य अवताररूपत्वात् प्रसूतेः तुरीयत्वमविरुद्धमित्युक्तम्। वाक्यतात्पर्यपर्यालोचनायां भगवतः प्रसूतिरेव न प्रतिपाद्यते। तथाहि - ध्यानध्यात्रभिमानिदेवताप्रश्नोत्तरयोः सर्वकारणानि च मनसि सम्प्रतिष्ठाप्य [7]'ध्यानं

---

1. महा.मोक्ष.341.8
2. महा.मोक्ष.341.9-10
3. महा.आनु.149.13
4. महा.मोक्ष.341.9
5. महा.मोक्ष.341.10
6. अ.शि.2
7. अ.शि.2

विष्णुर्मनसि सहकरणैस्सम्प्रतिष्ठाप्य ध्याता रुद्र' इति ध्यानमात्रस्य ध्यातृमात्रस्य च विष्णुरुद्रदेवतैकत्वव्यावृत्तये करणनियमनं विशेषणमुक्तम्। तद्विशिष्टस्यैव मोक्षोपयोगित्वात् तादृशस्यैव तद्देवताकत्वाच्च तदेव विशेषणं विहितम् [1]'प्राणं मनसि सहकरणैः नादान्ते परमात्मनि सम्प्रतिष्ठाप्य ध्यायीते'ति। 'कश्च ध्येय' इति चतुर्थप्रश्नस्योत्तरमुक्तम् [2]'ईशानं प्रध्यायितव्यमि'ति, [3]'कश्च ध्येय' इति प्रश्नसारूप्यात् पूर्वप्रश्नोत्तरवत्,न तु 'ध्यायीतेशानमि'तिना उत्तरम्, वैरूप्यात्। ईशान इति पुंलिङ्गनिर्देशे कृते देवतान्तरस्य बुद्धौ विपरिवृत्त्या परमात्मबुद्धिप्रतिबन्धो भवितेति नपुंसकनिर्देशः कृतः। ईशितव्यानिर्देशात् सर्वेशानं वस्तु ध्यातव्यमित्यर्थः। प्रधानेषु प्राधान्यमुपास्यस्य वक्तुं ब्रह्मादीनां प्राधान्यमाह – 'सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रा' इति। इदम् – प्रमाणसिद्धम्, सर्वं विष्णुब्रह्मरुद्रेन्द्राः। निर्वाह्यनिर्वाहकभावात् सामानाधिकरण्यम्।'ते सर्वे सम्प्रसूयन्ते' इति वाक्यान्तरम्। एवं सति हि तच्छब्दस्य प्रयोजनलाभः। एष भगवतः प्रसूत्यभावं भावं विवक्षन् तद्वत् तेषु तदन्यस्यापि कस्यचित् तदाशङ्का मा भूदिति 'सर्व' इत्युक्तम्। एवं सत्येव ह्यस्य प्रयोजनलाभः।

न च 'सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रा' इत्युक्तराशिद्वयपरामर्शितया 'ते सर्वे' इत्यस्य प्रयोजनलाभः। चकाराभावेन 'ते सर्व' इति समुदायपरामर्शस्यापेक्षितत्वादिति वाच्यम्। नपुंसकशेषापत्तेः 'ते' इति पुल्लिङ्गायोगात्। इन्द्रियादिसहपाठात् तत्तुल्यं परायत्ता प्रसूतिः ब्रह्मादेरिति स्वरसतोऽवगम्यते। भगवतः प्रसूतिं निषेधति – 'न कारणं कारणानां धाता ध्याते'ति। कारणानां त्रयाणां मध्ये कारणं ध्याता धाता न प्रसूयते इति विपरिणामेनानुषङ्गः। विपरिणामः परपक्षेऽपि समानः। 'कारणं ध्याता' इति कारणावस्थायां ध्यातृत्वेन प्रसिद्ध इत्यवगम्यते। तथा प्रसिद्धश्च भगवानेव नारायणः 'अकामयत' 'सोऽन्यं कामं मनसा ध्यायीत' इति। धातृशब्दश्च 'अणोरणीयानि'त्यादौ भगवत्परतया शङ्खलिखितोपबृंहिते प्रसिद्धः। सहस्रनामसु च 'अनादिनिधनो धाते'ति पाठात् भगवन्नामभूतः।

यद्वा कारणानां कारणमिति शेषे षष्ठी। अर्थात्तु निर्धारणलाभः। उपबृंहिता चेयं श्रुतिस्सम्भवपर्वणि –

**[4]'अनादिनिधनो देवः स कर्ता जगतः प्रभुः।**
**अव्यक्तमक्षरं ब्रह्म प्रधानं त्रिगुणात्मकम्॥**
**आत्मानमव्ययं चैव प्रकृतिं प्रभवं प्रभुम्।**

---

1. अ.शि.2
2. अ.शि.2
3. अ.शि.1
4. महा.आदि.63.100.102

**पुरुषं विश्वकर्माणं सत्त्वयोगं ध्रुवाक्षरम्॥**
**अनन्तमचलं मेरुं हंसं नारायणं परम्।**
**धातारमजरन्नित्यं यमाहुः परमव्ययम्॥**' इति।

तत्र 'अव्यक्तमक्षरमि'त्यारभ्य 'आहुरि'त्यन्तेन तत्तत्पदचिह्नितोपनिषदामुपबृंहणं कृतम्। [1]'नादान्तेसम्प्रतिष्ठाप्ये'त्येतत्

**'तस्मिन् रमापतौ प्राणश्चित्तञ्चानीय कारणे।**
**विशुद्धचेतसा पश्य नादान्ते पुरुषोत्तमम्॥'**

इति योगयाज्ञवल्क्यवचनेनोपबृंहितम्। यद्वा नात्र विपरिणामः कार्यः। नापि धातृशब्दस्य प्रसिद्धार्थभङ्गः। धाता चतुर्मुखः ध्याता रुद्रश्च कारणानां न कारणमित्यर्थः। विष्णुरेव कारणमिति भावः, ध्याता रुद्र इति प्रागभिधानात्। अत्र ध्यातृदेवता रुद्रो ध्यातेत्यभिधीयते।

यद्वा नात्र कस्याप्युत्पत्तिः प्रतिपाद्यते। 'सम्प्रसूयत' इति हि 'षू प्रेरण' इति धातोः कर्मणि लकारे रूपम्, न तु 'षूञ् प्राणिप्रसव' इत्यस्य 'षूञ् प्राणिगर्भविमोचन' इत्यस्य वा। तस्य प्राणिविषयतया 'सर्वाणि चेन्द्रियाणि सहभूतैरि'त्यत्रानुषङ्गेणाप्यन्वयायोगात्,'जायन्त' इत्यध्याहारापातात्, [2]'ईशानं प्रध्यायितव्यमि'ति पूर्ववाक्ये असङ्कोचलब्धसर्वेश्वरत्वस्य साक्षादुपपादकतया प्रेरणार्थकस्यैव धातोरत्र ग्राह्यत्वाच्च। परमकारणभूतो ध्याता धाता तु न केनचित् प्रेर्यत इति न कारणमिति वाक्यस्यार्थः। 'कारणं तु ध्येय' इति तु ध्यातव्यस्य हृदयाधिकरणविधिः। तत्र श्रुत्यन्तरसिद्धं कारणत्वं सर्वेश्वरत्वोपपादनार्थमनूद्यते। तच्च 'ईशानमि'त्यत्रैवासङ्कोचादेव सिद्धम्। सर्वापेक्षमपरिच्छिन्नैश्वर्यमुपपादयति - [3]'सर्वैश्वर्यसम्पन्नमि'ति। अत्र सर्वञ्च तदैश्वर्यञ्चेति कर्मधारयः, न तु सर्वेश्वरशब्दाच्छष्ठीसमासात् ष्यञ्, आदिवृद्धिप्रसङ्गात्।अनेन सर्वप्रकारमीशनं विवक्षितम्। अस्ति च नियमने प्रकारभेदः। यथा अन्तः प्रविश्य नियमनम्, राजादिवत् बहिर्नियमनम्, धारणप्रवर्तनादिविषयञ्च सद्वारकमद्वारकञ्च। इदं च सर्वप्रकारमैश्वर्यन्न कतिपयविषयमित्युच्यते –'सर्वेश्वर' इति। एवञ्च सर्वैश्वर्यसम्पन्नसर्वेश्वर-शब्दयोरैकार्थ्यभ्रमात् सर्वेश्वरशब्दे तच्छब्दवाच्यत्वलक्षणामाश्रित्य पौनरुक्त्यपरिहारः केनचित् कृतो निरस्तः। वस्तुवृत्तमुक्तम्। तथार्थेऽपि सिद्धान्तेऽपि न दोषः। सर्वेश्वरशब्दस्य रुद्रे रूढ्यसिद्धेः। इहैव कल्पनायां भगवत्येवास्तु। अस्मिन् पक्षे कारणस्यैव नियन्तृत्वेन कारणत्वोक्त्या नियन्तृत्वस्यापि सिध्या पूर्वोदाहृतोपबृंहणोपपत्तिः। श्रुतौ नियमनोक्त्या अर्थसिद्धकारणत्वोपबृंहणं वा। अत्र च

1. अ.शिखा.2
2. अ.शिखा.2
3. अ.शिखा.2

'सर्वाणि चेन्द्रियाणी'ति पृथगिन्द्रियग्रहणमिन्द्रियप्रेरणरूपं हृषीकेशशब्दार्थं नारायणत्वलिङ्ग-मुपस्थापयितुम्। पूर्वस्मिन् पक्षे 'सम्प्रसूयन्त' इत्युत्पत्तिर्लक्ष्यते।

यद्वा 'कारणं तु ध्येय' इति चुतर्थप्रश्नस्योत्तरम्। उपोद्घातरीत्या तदुपपादनाय 'ईशानं प्रध्यायितव्यमि'ति सर्वेशितुरेव मोक्षप्रदानसामर्थ्यात् तस्यैवोपास्यत्वं युक्तमिति भावः। किञ्च [1]'कश्च ध्येय' इत्युपक्रमादिह कारणविशेषविधानादर्शनाच्च ध्येयविशेषविधिपरमेवेदं प्रकरणम्। तत्र श्रुत्यन्तरसिद्धकारणत्वस्यैवायमनुवादः।

ननु 'सम्प्रसूयन्त' इत्युक्तेः कारणं किमित्यपेक्षायां समभिव्याहृतस्येशानस्य कारणत्वमवगम्यत इति चेन्न। ब्रह्मादीनां प्रसूतिमत्त्वेनापकर्षस्य कारणस्य तद्राहित्येनोत्कर्षस्य च प्रतिपिपादयिषिततया कारणप्रतिपादनतात्पर्ये हेतोरदर्शनात्। अत्र श्रुत्यन्तरसिद्धकारणत्वानुवाद एवायम्। न च वाक्यतात्पर्याभावेऽपि जन्यत्वेनानुमानात् सिद्धं कारणमनूद्यत इति वाच्यम्। श्रुतिसिद्धार्थानुवादे सम्भवति तदयोगात्। कर्मणापि प्रसवोपपत्तेरप्रयोजकं कथमपेक्ष्येत। तस्मात् सुबालोपनिषदादिप्रसिद्धजगत्कारणत्वस्यैवायमनुवादः। तत्र च भगवत एव जगत्कारणत्वं सुप्रसिद्धम्। तत्र कार्येषु भगवतः स्थितिप्रतिपादकपर्यायेषु त्रिमूर्तिषु स्थितिश्रवणात् तत्कारणत्वमपि विवक्षितम्। मैत्रेयोपनिषदि [2]'स वाऽतिसूक्ष्मोऽग्राह्योऽदृश्यः पुरुषसंज्ञ' इत्युपक्रम्य 'तस्य प्रोक्ता अग्र्यास्तनवः ब्रह्मा विष्णूरुद्र' इति [3]'स वा एष एक त्रिधा भूतोऽष्टधाभूत' इति च त्रिमूर्तिकारणत्वमुपदिश्यते। अग्र्या - अग्रे भवाः।

ननु श्वेताश्वतरे —

> **[4]'यदा तमस्तन्न दिवा न रात्रिर्न सत् न चासच्छिव एव केवलः।**
> **'तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी॥'**

इति रुद्रस्य कारणत्वावगमात् तदनुवादेन ध्यानविधिः किं न स्यादिति चेन्न। यदेति तस्याप्यनुवादरूपतया [5]'एको ह वै नारायण आसीदि'त्यादिश्रुत्यन्तरसापेक्षत्वात्। न च तत्राप्यनुवादशङ्का। तथाहि [6]'सदेव सोम्येदमग्र आसीदि'ति विहितकारणानुवादेन 'ब्रह्म वा इदमि'ति ब्रह्मत्वं विहितम्। 'एकमासीदि'त्यनुवादः। ब्रह्मेति विधिः। तथा [7]'आत्मा वा इदमग्र

1. अ.शिखा.1
2. मै.उ.2.5
3. मै.उ.5.2
4. श्वे.उ.4.18
5. महो.उ.1
6. छा.उ.6.2.1
7. ऐ.उ.1.1

आसीदि'त्यात्मत्वं विहितम्। पूर्ववदनुवादः। एवम् [1]'एको ह वै नारायणआसदि'त्यत्रापि 'एको ह वा आसीत्' इत्यनुवादः। नारायण इति विधिः। अनुवादत्वेऽपि [2]'नारायणाद्ब्रह्मा जायत' इत्यादिवाक्यापेक्षया भगवच्छ्रुतिमद्भिरपि वाक्यैरनुवाद इति स्यात्। अतो [3]'यदा तम' इत्यत्र न रुद्रस्य कारणत्वविधिः। किन्तु भगवत्कारणत्वानुवाद एव।

ननु 'यदा तमस्तत्तदा शिव' इति रुद्रकारणत्वविधिरस्त्विति चेन्न। 'तन्न दिवा न रात्रिरि'ति श्रवणेन दिवादिनिषेधस्यापि विधित्वप्रसङ्गात्। न चेष्टापत्तिः। तमसः सर्वदा विद्यमानत्वेन सर्वदैव दिवादिनिषेधप्रसङ्गात्।'तम एवे'त्यवधारणविवक्षायां कथं निषेधस्य विधित्वम्। 'तच्छिव एवे'त्यन्वये व्यवहितान्वयः। किञ्च एवकारोपहतविधिशक्तित्वादपि न शिवशब्दो विधायकः। अत एव 'षड्विंशतिरित्येव ब्रूयादि'त्यत्र न षड्विंशतिविधिरित्युक्तम्।

अश्वमेधे श्रूयते - 'चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिस्समेती'ति अध्रिगुप्रैषमन्त्रः। स च वङ्क्रीयत्ताप्रकाशनसामर्थ्याल्लिङ्गात् तत्प्रकृतौ दैक्षे श्रुतस्य वङ्क्रीयत्ताप्रकाशनकार्यस्य 'षड्विँशतिरस्य वङ्क्रय' इत्यस्याध्रिगुप्रैषगतस्य मन्त्रस्य कार्ये वर्तते। तत्राश्वमधिकृत्येदं श्रूयते –'न चतुस्त्रिंशदिति ब्रूयात्। षड्विँशतिरित्येव ब्रूयादि'ति। तत्र संशयः - किमयं वैशेषिकमन्त्रे चतुस्त्रिंशत्पदप्रतिषेधः उत चतुस्त्रिंशन्मन्त्रस्य वैशेषिकस्य प्रतिषेधः। पूर्वपक्षे प्राकृतस्य षड्विंशतिमन्त्रस्याश्वे निवृत्तिः। सिद्धान्ते तु प्रवृत्तिः। तत्र मन्त्रप्रतिषेधे चतुस्त्रिंशत्पदस्य मन्त्रे लक्षणाविकल्पश्च स्यात्। लिङ्गकल्पितश्रुतिप्रापितस्य प्रतिषेध्यतया श्रुतिविहितप्रतिषिद्धत्वात्। तस्मात् पदप्रतिषेध इति प्राप्ते, उच्यते। पदप्रतिषेधमन्त्रस्य न्यूनता, यथाप्रकृति सङ्ख्याया अनभिधानात्। षड्विंशतिपदेन पूरणे अयथार्थाभिधानम्। अश्ववङ्क्रीणामधिकसङ्ख्यत्वात्। चतुस्त्रिंशत्पदप्रतिषेधेऽपि षड्विंशतिपदाप्राप्तेः, तस्यापि विधेयत्वे वाक्यभेदः, एवकारोपहतविधिशक्तित्वाद्विध्यसम्भवश्च। तस्मान्मन्त्रप्रतिषेधः। तथा सति चोदकस्य निर्बाधतया तत्प्राप्तषड्विंशतिमन्त्रानुवादसम्भवात् वाक्यभेदाद्यभावः। लक्षणा तु वाक्यभेदादिपरिहारलाभान्न दुष्यति। वस्तुतस्सापि नास्ति। तेन चतुस्त्रिंशदिति शब्देनैवाद्यर्थेन तदादिमन्त्रोपस्थापनात्।

ननु चतुस्त्रिंशदितिपदस्थाने षड्विंशतिशब्दं ब्रूयादिति वाक्यद्वयार्थः। एवञ्च न वाक्यभेदः। नाप्ययथार्थाभिधानम्, वचनादैन्द्रीन्यायेनाभिधानसम्भवादिति चेत्, तथाप्येवकारोपबन्धेन विधित्वायोगात्। तदयमर्थः - यदा तत्तमः –'तमः परे देव एकीभवती'त्यविभक्तावस्थं तमः, न दिवादि च समस्तकार्यविधुरो भगवानेव तत् तदा अक्षरमिति भगवतः स्वरूपतो विकाराभावो विधीयते। अत्र च शिवशब्देन भगवन्निर्देशः सर्वशून्यत्वेऽपि मङ्गलरूपत्वं व्यञ्जयितुम्।

1. महो.उ.1
2. ना.अ.शि.1.1
3. श्वे.उ.4.18

ननु यदा शिवस्तदाऽक्षरमित्युक्ते शिवाक्षरयोः भेदोऽवगम्यते, यथा 'यदा देवदत्तस्तदा कौण्डिन्य' इत्युक्ते देवदत्तात् कौण्डिन्य इत्यस्य भेद इति; विषमो दृष्टान्तः। तत्र न्यायनिबन्धनत्वात् भेदप्रतीतेः। न चोभयत्राप्यभेदबोधकः शब्दोऽस्ति भेदबोधको वा। किन्तु दृष्टान्ते भेदप्रतीतिर्न्यायात्। न्यायान्तरादभेदप्रतीतिर्दार्ष्टान्तिके कौण्दिन्यदेवदत्तयोरभेदे 'कौण्डिन्यो देवदत्त आस्त' इति प्रयुज्येत। न तु कौण्डिन्यकाललक्षणतया देवदत्त इति न्यायानुसन्धानादेव भेदप्रतीतिः। इह तूद्देश्यविधेयभावस्य विवक्षितत्वादेव निर्देशः। तत्र तूद्देश्यविधेयभावविवक्षायामपि धर्म्येव विधेयतया हठादन्वेति[1]। इह तु प्रलयकाले सर्वं वस्तु निषिध्य 'तमः परे देव एकीभवती'ति ब्रह्मणो विभक्तावस्थतमसश्चावस्थानावगमात्र धर्मिविधानसम्भव इति धर्मिविधाने परिशिष्टे क्षरणस्वभावे तमस्यक्षरविधानासम्भवात्, प्रलयकालत्वादेव तदानीन्तनक्षरणाम्भवेन तच्छङ्काविरहात्, उपादानत्वोत्त्या शिवे क्षरणशङ्कायास्सत्त्वादव्यवधानाच्च तत्रैवाक्षरविधिरिति न्यायान्तरेणाभेद-प्रतीतिरिति।

अस्तु वा शिवशब्दस्यैव विधायकत्वम्, अथापि शिवशब्देन भगवत एव कारणतया विधिः स्यात् नारायणकारणत्वविध्यनुसारात्।

न च वैपरीत्यं शङ्क्यम्। शिवादिशब्दानां भगवदभिधानत्वात् रूढ्यन्तरनिमज्जन-साम्यान्यतरवद्द्रूढिमत्त्वात् भगवति दृष्टप्रयोगत्वाच्च। न चैवं नारायणादिशब्दाः। स्मार्तयोगो हि न रुद्रे निश्चितः। भगवदभिधानत्वं तावत् वामने —

**[2]'न तु नारायणादीनां नाम्नामन्यत्र सम्भवः।**
**अन्यनाम्नां गतिर्विष्णुरेक एव प्रकीर्तितः॥'**

इति। भगवतैव स्वनामप्रदानं च प्रागुपवर्णितम्। हरिवंशे कैलासयात्रायां रुद्रकृतभगवत्स्तोत्रे रुद्रनामदर्शनेन परिसरवर्तिनां विचिकित्सानिराकरणार्थमुक्तम् –

**[3]'नामानि तव गोविन्द यानि लोके महान्ति च।**
**तान्येव मम नामानि नात्र कार्या विचारणा॥'**इति।

लोक्यते अनेनेति लोकः प्रमाणम्। यानि त्वदभिधायकतया प्रमाणसिद्धानि परत्वगमकानि च भवन्ति तान्येव मम नामानि। तानि च ईश्वरमहेश्वरपरमेश्वरमहादेवशिवादीनि। अत्र भगवन्नामत्व महत्त्वरूपविशेषणद्वयविशिष्टेतरव्यवच्छेदकेनावधारणेन नोभयविशेषणविधुरं व्यावर्त्यते। 'उग्रो भस्मधरो नग्नः कपालीति शिवस्य वे'ति वचनविरोधात्। एवं चैकैकविशेषणयुक्तस्य व्यवच्छेद्यत्वे

1. बाधादन्वेति – इति पाठभेदः ।
2. वा.पु.
3. ह.पु.3.88.61

वाच्ये महत्त्वाविशेषितं त्वदीयन्नाम मम नास्तीत्येवं केवलभगवदीयत्वविशेषणवतो व्यवच्छेदे तेन प्राकरणिकभगवत्प्रशंसाया असिद्धेः, अवतारिकोक्तविचिकित्सानिरासे तस्याहेतुत्वात्, व्यवच्छेदस्यैव श्लोके प्रधानप्रतिपाद्यतया स्वनामसु केषाञ्चिद्भगवत्सम्बन्धेन प्रतिपादनमात्रे तात्पर्यासिद्धेश्च केवलमहत्त्वविशेषणवतो व्यवच्छेदात् मदीयमहानामसु त्वदनभिधायकं किमपि नाम नास्तीत्यर्थः।

ननु'यानि तव नामानि यानि च महान्ति' एतान्युभयविधान्येव मम नामानीत्यर्थः किं न स्यात्। यच्छब्दान्तरं मन्नामानीति पदान्तरयोरध्याहारान्न स्यात्। 'मानसारश्चन्द्रसंज्ञ' इतिवत् भगवन्नाम्नां कार्त्स्न्येन रुद्रनामत्वविधानं किं न स्यात्। विधिशक्त्याकर्षप्रकरणाध्याहारचलनैर्न स्यात्। एवकारेण हि विधिशक्तिराकृष्टाव्यवच्छेद्यरूपविषया नेति। प्रकरणञ्च भगवत्परत्वपरम्। त्वदीयान्यपि मम महान्त्यपि ममेत्यत्राध्याहार उक्त एव। नामान्येवेत्यन्वये स्थानचलनम्। एवमनेन वचनेन रुद्रेणैव शिवादिनाम्नां भगवदीयत्वं समर्थितम्। केचिच्छब्दाः सामान्यरूढिनिमग्न-विशेषरूढिशक्तयः तत्समरूढयो वा यथा शिवपुरुषादिशब्दाः। केचिद्योगनिमग्नरूढिशक्तयः यथा नारायणविष्णुवासुदेवादयः। तत्र द्विविधा अपि शिवपुरुषमहेश्वरमहापुरुषादिशब्दाः न रुद्रविष्णुव्यावर्तकाः। नारायणादिशब्दास्तु व्यावर्तका एव।

ननु शिवशब्दः शक्तिद्वयानुग्रहाय रुद्रपर एवेति कथं तस्यानिर्धारकतेति चेन्न। एकवृत्त्यनुग्रहस्यैवौत्सर्गिकतायाः स्थापनात्। किञ्च शिवशब्दे रूढिद्वयानुग्रहे नारायणशब्दे लक्षणा स्यात्। शिवशब्दे विशेषरूढिं परित्यज्य सामान्यरूढिमात्राङ्गीकारे न कुत्रापि लक्षणेति विशेषरूढिर्नानुग्राह्या। अपि च बर्हिराज्यनयात् न विशेषरूढिः शिवशब्दस्य, तत्संज्ञकत्वप्रमाण-बलाद्विशेषरूढिस्वीकारः पुरुषशब्द इति प्रागेवोक्तम्।

एतेन ईशादिशब्देषु यौगिकेष्वपि वृत्तिद्वयानुग्रहो निरस्तः। नारायणशब्दे लक्षणाप्रसङ्गादेव। भगवतोऽन्यत्र योगाङ्गीकारेण त्वभावस्सुप्रसिद्धः। यथाकथञ्चित् येन केनचिद्व्युत्पत्तिविशेषणतदुपपादने स्मृत्यादिप्रसिद्धयोगपरित्यागः। ईश्वरादिशब्दानां रूढिपरित्यागेऽपि न प्रसिद्धयोगपरित्यागः। अतोऽन्यतररूढिपरित्यागस्यावश्यकत्वात् प्रसिद्धयोगद्वयानुग्रहाय ईश्वरादिशब्दानां नारायण एव योगेन वृत्तिरुचिता।

अपि च कारणविषयनारायणशब्दस्येयं निरुक्तिः प्रकरणात्, कारणगोचरनारायणशब्दस्यैव च त्वया रुद्रपरत्वमिष्यते। अतस्तेनैव योगेन तत्र प्रवृत्तेः णत्वानुपपत्तिरनिवार्या। तन्निरुक्तेश्चतुर्मुखपरत्वं 'नराज्जातानि तत्त्वानी'ति वचनेन 'तद्विसृष्ट' इति वचनेन च निरस्तम्। नह्यण्डोत्पत्त्यनन्तरोत्पन्नस्य महदादितत्त्वकारणत्वसम्भवः।

एतेन तमोनुदस्सकाशाद्रुद्राद्भगवान् प्रादुरासीत्। ततश्चतुर्मुखः। अतो भगवत्येवेयं निरुक्तिः, न तु परमकारणविषयेति निरस्तम्। महदादिकारणत्वस्य निरुक्त्यनुप्रवेशादेव।

नन्वस्तु भगवत एव महदादिकारणत्वम्। तत्कारणं तु तमोनुत्। अतो भगवत्येव निरुक्तिरिति,तन्न। तथा सति योगान्तरोपपादनवैयर्थ्यात्। परविषयनारायणशब्दविषयोऽयं योग इति चेन्न। अत्रापि परमविषयत्वस्यैव प्रतीतेः। [1]'महाभूतादिवृत्तौजा' इति महच्छब्देन तमस एव प्रतीतेः। तत्प्रेरणहेतुभूततद्गोचरप्रेरणसङ्कल्प एव हि स्वरसतोऽवगम्यते। [2]'वृत्तौजाः प्रादुरासीदि'ति प्रादुर्भावकाल एव सङ्कल्पाश्रयत्वमवगम्यते। तथा 'प्रादुरासीदिति' चावताररूपता। अतः सङ्कल्पाश्रयणमवतरणं च तमोनुदः परमकारणस्यैव युक्तम्। 'योऽसावतीन्द्रियग्राह्यमि'ति श्लोकेन 'यत्तत्कारणमि'ति श्लोकेन च तथैव परमकारणमेव स्वरसतोऽवगम्यते। परमकारणं विहायान्यस्योक्तौ त्वदिच्छां विना हेत्वन्तरं न पश्यामः। अतः परमकारणविषयनिरुक्तिरेवेयम्। अतो णत्वविरोधो दुरपह्नवः।

अपि च नेश्वरादिशब्दानां रुद्रे रूढिरपि, प्रोक्षणीन्यायेन योगेनैवोपपत्तेः। प्रसिद्धिप्राचुर्याद-भिधानकोशोपपत्तिरिति प्रागेवोक्तम्। सामान्यरूढिश्च निश्चितैव भगवति। दृष्टप्रयोगाश्च देवतान्तरशब्दाः। तथाहि - [3]'शाश्वतं शिवमच्युतम्', यमस्मृतौ —

**'एष वै पुरुषो विष्णुर्व्यक्ताव्यक्तः सनातनः।**
**एष धाता विधाता च प्रधानं निष्कलश्शिवः॥'**

सभापर्वणि - [4]**'बाहू द्वौ स्थापयामास कृष्णस्साक्षात्स्वयं शिवः।'** हरिवंशे षट्चत्वारिंशच्छततमे [5]**'शिवयोर्देवयोस्तत्र हरेश्चैव भवस्य च।'** त्रिपञ्चाशच्छततमे [6]**'ध्यायन् हरिं जगद्योनिं विष्णुं पीताम्बरं शिवम्।'** पञ्चाशच्छततमे [7]**'चतुर्भुजं शुभगिरं निश्चलं सर्वगं शिवम्।'** सप्तपञ्चाशच्छततमे [8]**'तपश्चर्तुं हरिः कृष्णो विष्णुः सर्वेश्वरः शिवः।'**, [9]**'अव्ययः शाश्वतो देवस्सकलो निष्कलश्शिवः'**, एकनवतिशततमे **'वसन्तमम्भोनिधिशायिनं हरिम्'**,**'भक्तप्रियं भक्तजनास्पदं शिवम्'**, चतुर्विंशतिद्विशततमे **'महादेवं महाभागमनन्तं शिवमच्युतम्'**, शान्तिपर्वणि राजधर्मप्रशंसायां भीष्मः [10]**'लोकनाथ**

---

1. म.स्मृ.1.6
2. म.स्मृ.1.6
3. म.ना.उ.11.3
4. महा.सभा.
5. ह.पु.3.73.16
6. ह.पु.3.80.84
7. ह.पु.3.81.13
8. ह.पु.3.84.15
9. ह.पु.3.110.2
10. महा.शान्ति.52.2

**महाबाहो शिव नारायणाच्युत**', श्रीवराहे तृतीयेऽध्याये [1]'**तत्र गत्वा महाविष्णुः पुराणः पुरुषः शिवः**', द्वादशेऽध्याये [2]'**शिवं स्वरूपं प्रभवं महेश्वरं सदा प्रपन्नार्तिहरं वृतश्रियम्**', पञ्चविंशेऽध्याये [3]'**पुरुषो विष्णुरित्युक्तः शिवो नारायणः स्मृतः**', सूर्यसिद्धान्ते '**निरामयं निराभासं निर्द्वन्द्वं केवलं शिवम्**', सुवर्णवैकुण्ठसंवादे '**भूतभव्यभवेशाय शिवाय शिवमूर्तये**', '**शिवयोनये शिवाख्याय शिवपूज्यतमाय च**', इतिहाससमुच्चये [4]'**तमाहुः पुरुषं केचित् केचिदीश्वरमव्ययम्**', [5]'**केचिच्च परमात्मानं केचित् शिवमनामयम्**', हरिवंशे शततमेऽध्याये [6]'**तुष्टुवुर्देवमीशानं मन्त्रैर्भागवतैः तथा**', [7]'**इत्यादिभिस्तदा देवं वाग्भिरीशानमव्ययम्**', द्विपञ्चाशच्छततमे [8]'**तं देवं द्रष्टुमीशानं यतामः साम्प्रतं हरिम्**', एकषष्टिशततमे [9]'**तानि त्वामाहुरीशानं भूतानि च जगत्पते**', अन्यत्र '**स्तुत्वा च देवमीशानं वरदं भक्तवत्सलम्**', भारतसारसमुच्चये —

[10]'**आद्यं पुरुषमीशानं सर्वलोकमहेश्वरम्।**
**स चिन्तयति यो विष्णुं नारायणमनन्यधीः॥**'

यज्ञाहराध्याये—

[11]'**प्राहुरादित्यवर्णं तं पुरुषं तमसः परम्।**
**बृहन्तं सर्वगं देवमीशानं वरदं प्रभुम्॥**'

महाभारते आदिपर्वणि [12]'**आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतम्**', हरिवंशे [13]'**स हि युद्धगतः श्रीमानीशो न स्म व्यकम्पत**', '**जहि निद्रां जगद्धातः केशवेश जनार्दन**', '**एतैस्सप्तभिराद्येशं विचिन्वन् प्रणवं तथा**', त्रिपञ्चाशच्छततमे [14]'**यज्ञात्मको**

---

1. व.पु.3.8
2. व.पु.12.5
3. व.पु.25.4
4. नृ.पु.64.73
5. नृ.पु.64.75
6. ह.पु.3.76.12-16
7. ह.पु.3.76.17-18
8. ह.पु.3.79.12
9. ह.पु.3.88.23
10. ह.पु.1.1.1
11. महा.मोक्ष.340.57
12. महा.आदि.1.22
13. ह.पु.1.46.30
14. ह.पु.3.80.48

**यज्ञपतिर्जगत्पतिं द्रष्टुं तमीशं वयमुद्यताः स्मः'**, [1]**'वेदान्तसंस्थापितसत्त्वयुक्तं द्रष्टुं तमीशं वयमुद्यताः स्मः'**, [2]**'आहुर्यमात्मानमजं पुराविदो द्रष्टुं तमीशं वयमुद्यता स्मः'**,**'अन्तर्हितो माधव एव साक्षाद्द्रष्टुं रणं याति नगेन्द्रमीशः'**, पञ्चपञ्चाशदि्द्वशततमे [3]**'तं पावका लोकगुरुं दिवीशं (स्वयम्भुवं?) साङ्गाश्च वेदा मखदेवताश्च'**, भागवते प्रथमस्कन्धे द्वादशेऽध्याये [4]**'उत्तराया हतो गर्भ ईशेनाजीवितः पुनः'**, तृतीयस्कन्धे त्रयोदशेऽध्याये [5]**'यस्याहं हृदयादासं स ईशः शं करोतु मे'**, तत्रैव [6]**'विरिञ्चिमुख्या उपतस्थुरीश्वरम्'**, षष्ठस्कन्धे द्वितीयेऽध्याये [7]**'नाधर्मजं तद्धृदयं तदपीशाङ्घ्रिसेवया'**, सप्तमस्कन्धे दशमेऽध्याये [8]**'सर्वेषु भूतेष्वधियज्ञमीशम्'**, अष्टमस्कन्धे प्रथमेऽध्याये [9]**'स विश्वकायः पुरुहूत ईशस्सत्यः परञ्ज्योतिरजः पुराणः'**, तथान्यत्र [10]**'ईहते भगवानीशो नहि तत्र विषज्जते'**, चतुर्थेऽध्याये [11]**'सोऽनुकम्पित ईशानं परिक्रम्य प्रणम्य तम्'**, द्वाविंशे [12]**'भूयात् स ईशः परमो गुरोर्गुरुः'**, नवमस्कन्धे षष्ठे [13]**'एकश्चरन् रहसि चित्तमनन्त ईशे'**, द्वाविंशे [14]**'तदा हि भगवानीश आत्मानं सृजते हरिः'**, हरिवंशे [15]**'कृत्वात्मानं महाबाहुश्चतुर्धा प्रभुरीश्वरः'**, [16]**'ईशरत्वं हि तस्येमां कर्मणां गहनां गतिम्'**, [17]**'ऋषिभिः पूजितस्तैस्तु विवेश हरिरीश्वरः'**, [18]**'प्रत्युवाच शुभं वाक्यं देवानां प्रभुरीश्वरः'**, [1]**'एवं तां स समादिश्य गतोऽन्तर्धानमीश्वरः'**,

---

1. ह.पु.3.80.49
2. ह.पु.3.80.50
3. ह.पु.3.53.38
4. भा.पु.1.12.1
5. भा.पु.3.13.18
6. भा.पु.3.13.34
7. भा.पु.6.2.17
8. भा.पु.7.10.12
9. भा.पु.8.1.13
10. भा.पु.8.1.15
11. भा.पु.8.4.5
12. भा.पु.8.24.48
13. भा.पु.9.6.52
14. भा.पु.9.24.54
15. ह.पु.1.41.122
16. ह.पु.1.42.2
17. ह.पु.1.50.1
18. ह.पु.1.55.1

**'समुत्तेरतुरीशौ तौ सयूथाविव यूथपौ'**, [2]**'ममोपरि यथेन्द्रस्त्वं स्थापितो गोभिरीश्वरः'**, **'बालाञ्चाबालसद्वृत्तमीश्वरं सकलेश्वरम्'**, **'योगिनां योगगम्यं तमीश्वरं सकलेश्वरम्'**, **'कोऽयं मत्सदृशो लोके दृष्टवान् योऽहमीश्वरम्'**, विंशतितमे **'रुक्मिणी च तदा देवी ददृशे कृष्णमीश्वरम्'**, षड्विंशतितमे च **'अर्घ्याभिर्वाग्भिरर्घ्याभिरीश्वरं प्रणताः स्थिताः'**, एकोनत्रिंशच्छततमे [3]**'आकर्णपूर्णमाकृष्य जघान हरिरीश्वरः'**, त्रयस्त्रिंशच्छततमे [4]**'तथा क्षणमुहूर्ताभ्यां यथा जज्ञे सुरेश्वरः'**, एकोनपञ्चाशच्छततमे [5]**'तुष्टुवुः पुण्डरीकाक्षं वाग्भिरिष्टाभिरीश्वरम्'**, **'तन्न विन्दे यथाकामं दुर्ज्ञेयेश्वरचिन्तनात्'**, त्रिसप्ततिशततमे [6]**'स्तुत्या स्तोतुं हरिं विष्णुमीश्वरं कमलेक्षणम्'**, पञ्चसप्ततिशततमे [7]**'अभ्यन्तरे जगन्नाथः प्रविश्य हरिरीश्वरः'**, [8]**'ततः स्वभवनं विष्णुः प्रविश्य हरिरीश्वरः'**, षण्णवतिशततमे [9]**'शरेणाकृष्य चाकर्णं धनुःप्रवरमीश्वरम्'**, एकद्विशततमे [10]**'दारुकं पृष्ठवाहं तं कृत्वा देशं तमीश्वरः'**, तत्रैव [11]**'अथ विद्धो दृढं तेन शरेण हरिरीश्वरः'**, एकादशद्विशततमे **'अर्चयन्तं जगन्नाथं मनसा विष्णुमीश्वरम्'**, **'वधाय हि मनो दध्रे दैत्यस्य हरिरीश्वरः'**, **'असिधारानिभैस्तीक्ष्णैर्मृगेन्द्रो हरिरीश्वरः'**, तत्रैव [12]**'क्षीरोदस्योत्तरं कूलं जगाम हरिरीश्वरः'**, द्विसप्ततिशततमे **'निश्शेषं दानवबलञ्चकार हरिरीश्वरः'**, षट्चत्वारिंशच्छततमे [13]**'द्वारवत्यां जगन्नाथो वसन् वृष्णिभिरीश्वरः'**, पञ्चाशच्छततमे [14]**'सुखासनं समास्थाय समाधौ यतते शिवम्'**, **'नमः पुष्करनाभाय वन्दे त्वामहमीश्वरम्'**, **'ईशस्त्वं सर्वभूतानामीश्वरोऽसि सदा हरे'**, सभापर्वणि [15]**'ईश्वरस्योत्तमस्यैनां कर्मणां गहनां गतिम्'**, [16]**'हिरण्यकशिपुं राजन् जगाम हरिरीश्वरः'**, **'दत्तेत्युक्ते जलं हस्ते दृष्ट्वा**

---

1. ह.पु.2.3.34
2. ह.पु.2.19.46
3. ह.पु.3.96.12
4. ह.पु.2.101.12
5. ह.पु.3.76.12
6. ह.पु.3.100.12
7. ह.पु.3.102.18
8. ह.पु.3.112.22
9. ह.पु.3.123.5
10. ह.पु.3.127.33
11. ह.पु.3.127.34
12. ह.पु.3.47.35
13. ह.पु.3.73.18
14. ह.पु.3.80.58
15. महा.सभा.38.पुट.-893
16. महा.सभा.38.पुट.-901

**पतितमीश्वरः'**, [1]**'बुभुजे पायसं शौरिरीश्वरः सर्वहृच्छयः'**, [2]**'चकाराथ यथाद्देशेमीश्वरो मणिपर्वतम्'**, [3]**'एष तिष्ठति गोविन्दः पूजितोऽस्माभिरीश्वरः'**, भागवते प्रथमस्कन्धेऽष्टमेऽध्याये [7]**'नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परम्'**, दशमे [5]**'निवेशयित्वा कुरुराज्यमीश्वरो युधिष्ठिरं प्रीतमना बभूव'**, त्रयोदशे [6]**'तावद्यूयमवेक्षध्वं भवेद्यावदिहेश्वरः'**, द्वितीयस्कन्धे षष्ठेऽध्याये [7]**'तमेव पुरुषं यज्ञं तेनैवायजमीश्वरम्'**, सप्तमे [8]**'मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः'**, तृतीयस्कन्धे चतुर्थेऽध्याये [9]**'ज्ञानं परं स्वात्मरहः प्रकाशं यदाह योगेश्वर ईश्वरस्ते'**, पञ्चमे [10]**'चकार कर्माण्यतिमानुषाणि यानीश्वरः कीर्तय तानि मह्यम्'**, तत्रैव [11]**'गृहीतोऽनन्यभावेन यत्त्वया हरिरीश्वरः'**, षष्ठेऽध्याये [12]**'निशाम्य गतिमीश्वरः'**, विंशेऽध्याये - [13]**'अन्ववात्सीत्तमीश्वरः'**, [14]**'यस्य नाभेरभूत् पद्मम्'**, एकोनत्रिंशे [15]**'सन्तमात्मानमीश्वरम्'**, [16]**'ईश्वरं मां स्वकर्मकृत्'**, [17]**'ईश्वरो जीवकलया प्रविष्टो भगवानिति'**, चतुर्थस्कन्धे एकोनविंशेऽध्याये [18]**'यत्र यज्ञपतिस्साक्षात् भगवान् हरिरीश्वरः'**, एकोनत्रिंशे [19]**'सेव्यते हरिरीश्वरः'**, तत्रैव [20]**'भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदम्'**, पञ्चमस्कन्धे चतुर्दशेऽध्याये [21]**'तस्मिन्**

---

1. महा.सभा.38.पुट.-916
2. महा.सभा.38.पुट.-935
3. महा.सभा.44.41
4. भा.पु.1.8.18
5. भा.पु.1.10.2
6. भा.पु.2.13.49
7. भा.पु.1.6.27
8. भा.पु.2.7.53
9. भा.पु.3.4.25
10. भा.पु.3.5.16
11. भा.पु.3.5.19
12. भा.पु.3.6.1
13. भा.पु.3.20.15
14. भा.पु.3.20.16
15. भा.पु.3.29.22
16. भा.पु.3.29.25
17. भा.पु.3.29.35
28. भा.पु.4.19.3
29. भा.पु.4.31.9
20. भा.पु.4.31.27.
11. भा.पु.5.14.1

**दुर्गाध्ववदसुगमेऽध्वन्यापतित ईश्वरस्य भगवतो विष्णोर्वशवर्तिन्या मायये**'ति। षष्ठस्कन्धे चतुर्थे [1]'**अन्तर्देहेषु भूतानामात्मास्ते हरिरीश्वरः**', तत्रैव [2]'**स ईश्वरो मे कुरुतां मनोरथम्**', पञ्चदशेऽध्याये [3]'**हयमेधेन पुरुषं परमात्मानमीश्वरम्। इष्ट्वा नारायणं देवम्**', सप्तमस्कन्धे षष्ठेऽध्याये [4]'**एक एव परो ह्यात्मा भग वानीश्वरोऽव्ययः**', सप्तमेऽध्याये [5]'**यदीश्वरे भगवति**', [6]'**हरिस्सर्वेषु भूतेषु भगवानास्त ईश्वरः**', [7]'**क्रि.यतेभक्तिरीश्वरे। वासुदेवे भगवति**', [8]'**भजतानीहमात्मानमनीहं हरिमीश्वरम्**', [9]'**सर्वभूतात्मनीश्वरे**', अष्टमे [10]'**स ईश्वरः काल उरुक्रमोऽसावोजः सहःसत्त्वबलेन्द्रियात्मा**', [11]'**वयं किम्पुरुषास्त्वं तु महापुरुष ईश्वरः**', नवमे [12]'**तस्मादहं विगतविक्लव ईश्वरस्य सर्वात्मतामभिगृणामि यथामनीषम्**', [13]'**त्वामीश्वरो मदपरोऽवतु कं हरामि**', अष्टमस्कन्धे चतुर्थेऽध्याये [14]'**स एकदाऽराधनकाल आत्मवान् गृहीतमौनव्रत ईश्वरं हरिम्**', षष्ठेऽध्याये [15]'**एवं स्तुतस्सुरगणैर्भगवान् हरिरीश्वरः**', [16]'**तेषामन्तर्दधे राजन् स्वच्छन्दगतिरीश्वरः**', सप्तमेऽध्याये [17]'**विलोक्य विघ्नेशविधिं तदीश्वरः**', अष्टमेऽध्याये [18]'**एतस्मिन्नन्तरे विष्णुः सर्वोपायदृगीश्वरः**',एकादशेऽध्याये [19]'**सर्वेषामेव भावानां**

1. भा.पु.6.4.13
2. भा.पु.6.4.34
3. भा.पु6.13.7.
4. भा.पु.7.6.21
5. भा.पु.7.7.29
6. भा.पु. 7.7.32
7. भा.पु. 7.7.33
8. भा.पु. 7.7.48
9. भा.पु. 7.7.53
10. भा.पु.7.8.9.
11. भा.पु.7.853
12. भा.पु.7.9.12
13. भा.पु.7.9.29
14. भा.पु.8.4.8
15. भा.पु.8.6.1
16. भा.पु.8.6.26
17. भा.पु.8.7.8
18. भा.पु.8.8.41
19. भा.पु.8.12.4

**त्वमात्मा हेतुरीश्वरः।'** चतुर्दशे [1]**'भवद्विधो भवान् वापि वर्जयित्वेश्वरं हरिम्'**, षोडशेऽध्याये [2]**'चिन्तयन्त्येकया बुद्ध्या महापुरुषमीश्वरम्'**, द्वाविंशे

[3]**'यदर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितम्।**
**तमः प्रकृति दुर्मर्षं कर्मग्रस्तमिवेश्वरः॥'**,

[4]**'गोविप्रसुरसाधूनां छन्दसामपि चेश्वरः। रक्षामिच्छंस्तनुं धत्ते'**, तथा [5]**'दधार शफरीरूपं भगवान् हरिरीश्वरः'**, [6]**'कर्तुं समेताः प्रभवः पुमांसः तमीश्वरं त्वां शरणं प्रपद्ये'**, नवमस्कन्धे प्रथमेऽध्याये [7]**'तस्मै कामवरं तुष्टो भगवान् हरिरीश्वरः'**, चतुर्थे [8]**'ईजेऽश्वमेधैरधियज्ञमीश्वरम्'** - [9]**'स्वधर्मेण हरिं प्रीणन्**न्ति'ति प्रकरणम्, अष्टमे [10]**'और्वोपदिष्टयोगेन हरिमात्मानमीश्वरम्'**, एकादशे [11]**'स्मरंस्तस्या गुणांस्तांस्तान् नाशक्नोद्रोद्धुमीश्वरः'**, चतुर्दशे [12]**'क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः'**, [13]**'एवं भृगुषु विश्वात्मा भगवान् हरिरीश्वरः'**, मोक्षधर्मे सनत्कुमारसंहितायाम् [14]**'तं विश्वभूतं विश्वादिं परमं विद्धि चेश्वरम्'**, षट्त्रिंशे **'प्रभो प्रभुमनाद्यन्तं प्रपद्ये प्रभुमीश्वरम्'**, श्रीविष्णुपुराणे प्रथमेंऽशेऽष्टादशे [15]**'यत्रानपायी भगवान् हृद्यास्ते हरिरीश्वरः'**, द्वाविंशे [16]**'क्षराक्षरमयो**

---

1. भा.पु.8.15.29
2. भा.पु.8.17.2
3. भा.पु.8.24.2
4. भा.पु.8.24.5
5. भा.पु.8.24.9
6. भा.पु.8.24.49
7. भा.पु.9.1.22
8. भा.पु.9.4.22
9. भा.पु.9.4.26
10. भा.पु.9.8.7
11. भा.पु.9.11.16
12. भा.पु.9.15.40
13. भा.पु.9.16.26
14. महा.मोक्ष.280.23
15. वि.पु.1.18.36
16. वि.पु.1.22.65

**विष्णुः बिभर्त्यखिलमीश्वरः'**, तत्रैव [1]**'भूतादिमिन्द्रियादिञ्च द्विधाहङ्कारमीश्वरः'**, षष्ठे अंशे प्रथमे [2]**'कलौ जगत्पतिं विष्णुं सर्वस्त्रष्टारमीश्वरम्'**, चतुर्थे [3]**'तद्ब्रह्म परमं धाम परमात्मा स चेश्वरः'**, वाराहेऽष्टमेऽध्याये **'नृसिंहं हरिमीश्वरम्'**,**'प्रभुं त्रिधामनामानमनन्तवर्चसम्'**, वाराहे चतुर्थेऽध्याये

**'यस्य ब्रह्मा समुत्पन्नो नाभिपङ्कजमध्यगः।**
**तस्माच्च ब्रह्मणो रुद्रः स विष्णुः परमेश्वरः॥'**,

एकपञ्चाशे [5]**'इदानीं त्वत्प्रसादेन स्मरणं प्राक्तनं मम'**, [6]**'जातं जातिस्मरत्वञ्च विशोका परमेश्वर'**, अष्टपञ्चाशे

[7]**'न विष्णोर्व्यतिरिक्तं स्याद्दैवतं नृपसत्तम।**
**नामभेदैस्तु सर्वत्र संस्थितः परमेश्वरः॥'**,

सप्तषष्टितमे

[8]**'एवं विचिन्त्य सन्दध्यौ तं देवं परमेश्वरम्।'**,

अष्टषष्टितमे

**'न सकिञ्चिद्ददर्शाथ सत्त्वजातं महामुनिः।**
**ततश्चिन्तापरो भूत्वा तमेव परमेश्वरम्॥'**,

एकोनसप्ततितमे [9]**'न विष्णोःपरतो देवो विद्यते नृपसत्तम। ततो देवक्रियायोगादृश्यते परमेश्वरः'**, सप्ततितमे [10]**'स चतुर्भिर्युगैः कीदृग्विज्ञेयः परमेश्वरः'**, नारसिंहपुराणे सप्तविंशे [11]**'परमेश्वरो विमानस्थो विभीषणेन नीयमानः'**,

---

1. वि.पु.1.22.70
2. वि.पु.6.1.50
3. वि.पु.6.4.38
4. व.पु.4.25
5. व.पु51.4
6. व.पु.51.5
7. व.पु.57.18
8. व.पु.66.6
9. व.पु.67.8
10. व.पु.68.1
11. नृ.पु.27.10

द्वात्रिंशेऽध्याये [1]**'संस्थाप्य भक्त्या विधिवच्च पूजयन् स याति साक्षात् परमेश्वरं हरिम्'**, विष्णुधर्मे—

[2]**'भक्त्या दूर्वाङ्कुरैः पुम्भिः पूजितः परमेश्वरः।**
**हरिर्ददातीह फलं सर्वयज्ञैस्सदुर्लभम्॥'**,

श्रीविष्णुधर्मोत्तरे द्वितीये [3]**'कर्मणा श्रद्धया ज्ञानादर्चितः परमेश्वरः'**, सप्तमे [4]**'सर्वान्तरात्मा जगतामाधारः परमेश्वरः'**, नवमे [5]**'तोषितोऽभिमतान् कामान् ददाति परमेश्वरः'**, श्रीविष्णुपुराणे प्रथमेंऽशे द्वितीये [6]**'सर्वगस्सर्वभूतेशः सर्वात्मा परमेश्वरः'**, तत्रैव [7]**'नागपर्यङ्कशयने स शेते परमेश्वरः'**, चतुर्थे [8]**'यच्चोक्तं यच्च नैवोक्तं मयात्र परमेश्वर'**, श्रीविष्णुपुराणे प्रथमेंऽशे तत्रैव [9]**'विश्वस्य विद्मः परमेश्वरोऽसि प्रसीद नाथोऽसि चराचरस्य'**, नवमे

[10]**'एवं संस्तूयमानस्तु भगवान् शङ्खचक्रधृत्।**
**जगाम दर्शनं तेषां मैत्रेय परमेश्वरः॥'**,

द्वादशे [11]**'त्वद्भक्तिप्रवणं ह्येतत् परमेश्वर मे मनः'**, सप्तदशे [12]**'यतो यश्च स्वयं विष्णुः स विष्णुः परमेश्वरः'**, एकोनविंशे [13]**'तं सर्वसाक्षिणं विष्णुं नमस्ये परमेश्वरम्'**, द्वाविंशे [14]**'बिभर्ति पुण्डरीकाक्षस्तदेवं परमेश्वरः'**, तृतीये अंशे सप्तमे [15]**'सकलमिदमहञ्च वासुदेव परमपुमान् परमेश्वरः'**, सप्तदशे स्तोत्रस्यावसाने [16]**'ते**

---

1. नृ.सिं.पु.32.21
2. वि.धर्म.1
3. वि.धर्म.2
4. वि.धर्म.7
5. वि.धर्म.9
6. वि.पु.1.2.28
7. वि.पु.1.2.64
8. वि.पु.1.4.24
9. वि.पु.1.4.35
10. वि.पु.1.9.66
11. वि.पु.1.12.48-49
12. वि.पु.1.17.22
13. वि.पु.1.19.81
14. वि.पु.1.22.77
15. वि.पु.3.7.32
16. वि.पु.3.17.35

**ददृशुः परमेश्वरम्**', चतुर्थे अंशे प्रथमे [4]'**न च स्वरूपं न परस्वभावं न चैव सारं परमेश्वरस्य**', पञ्चमे अंशे प्रथमे [2]'**एवं संस्तूयमानस्तु भगवान् परमेश्वरः**', अष्टादशे [3]'**अनाख्येयाभिधानं त्वां नतोऽसि परमेश्वर**', विंशे [4]'**स त्वं प्रसीद परमेश्वर पाहि विश्वमंशावतारकरणैर्न ममासि पुत्रः**', त्रयोविंशे [5]'**प्राह ज्ञातो भवान्विष्णोरङ्गस्त्वं परमेश्वर**', तत्रैव [6]'**शाश्वती प्राप्यते केन परमेश्वर निर्वृतिः**', त्रिंशे [7]'**न जानामि परं यत्ते प्रसीद परमेश्वर**', हरिवंशे सप्तषष्टिद्विशततमे '**पुष्पहास परमेश्वर परमख**', भागवते सप्तमस्कन्धे षष्ठेऽध्याये [8]'**केवलानुभवानन्दस्वरूपः परमेश्वरः**', श्रीवाराहे षष्ठेऽध्याये [9]'**आदिदेवं महादेवं वेदवेदाङ्गपारगम्**', दशमेऽध्याये [10]'**ते प्रतस्थुः महादेवं चिन्तयन्तः श्रियोधरम्**', हरिवंशे पञ्चाधिकद्विशततमे [11]'**ते समेत्य महादेवमृषयो वीतमत्सराः**', सप्तषष्टिद्विशततमेऽध्याये [12]'**सुरासुरगुरोर्ब्रह्मा**', चतुरशीतिद्विशततमे '**दृष्ट्वा दृतो महादेवो महाभूतविभावनः**',चतुरशीतिशततमे अध्याये [13]'**जानामि त्वां महादेवं वञ्चयन्निव भाषसे**', '**महादेवं महाभागमनन्तं शिवमच्युतम्**', पुराणान्तरे '**अनादिरक्षयोऽनन्तो महादेवो महेश्वरः**', हरिवंशे सप्तषष्टिद्विशततमेऽध्याये '**शम्भुरशम्भुर्भवः स्वयम्भूर्भूतादिः**', त्र्यशीतिद्विशततमे '**तथान्यद्रूपमास्थाय शम्भुर्नारायणोऽव्ययः**', सभापर्वणि 'इति नारायणश्शम्भुर्भगवान् जगतः प्रभुः',वाराहे सप्तमे [14]'**कलौ घनाभ्रप्रतिमं महेश्वरं गदाधरं प्रणमति यस्सुखं वसेत्**', द्वादशे [15]'**शिवं सुरूपं महेश्वरं सदा प्रपन्नार्तिहरं वृतश्रियम्**', ब्रह्मसिद्धान्तेऽपि गोलाध्याये '**अस्मान्नारायणाद्धीषा, वातः पवत एव ही**'ति प्रकृत्य,

---

1. वि.पु.4.1.83
2. वि.पु.5.1.60
3. वि.पु.5.18.52
4. वि.पु.5.20.103
5. वि.पु.5.23.26
6. वि.पु.5.23.43
7. वि.पु.3.30.23
8. भा.पु.7.6.23
9. व.पु.6.12
10. व.पु.10.69
11. ह.वं.3.131.2
12. ह.पु.2.109.6
13. ह.पु.3.111.32
14. व.पु.7.35
15. व.पु.12.5

**'ऊर्णनाभिर्यथा तन्तुं सृजते संहरत्यपि।**
**तथा विश्वं सृजत्यत्ति पाति चायं महेश्वरः॥'**,

भागवते सप्तमस्कन्धे दशमेऽध्याये [1]**'वरं वरय एतत्ते वरदेवान्महेश्वर'**, श्रीविष्णुधर्मोत्तरे षष्ठे [2]**'पूजाफलं महेशस्य देवदेवस्य शार्ङ्गिणः'**, एकादशे

**'आदर्शं यो महेशाय सन्दर्शयति मानवः।**
**फलं वक्तुं न शक्नोमि महेशकरुणोद्भवम्॥'**,

श्रीविष्णुधर्मोत्तरेऽष्टमे [3]**'परमेशप्रसादेन सञ्जाता याः पयोनिधौ'**, त्रयोदशे [4]**'स याति ब्रह्मसालोक्यं परमेशप्रभावतः'**, हरिवंशे सप्तषष्टिद्विशततमे **'हिरण्यगर्भः हिरण्यनाभः'**, सभापर्वणि [5]**'असौ बल महद्भूतं स्वयम्भूर्यदिदं स्वयम्'**, [6]**'पुरा नारायणो देवस्स्वयम्भूः प्रपितामहः'** इति।

किञ्च रुद्राभिधानानां प्रसिद्धे सम्प्रतिपन्ने गुणिनि रुद्रे त्रिमूर्तिमध्यपरिगणित एव रूढत्वात् तस्य च कारणत्वानुपपत्तेः परस्यापि तत्सम्मतेश्च श्रुत्यन्तरानुसारात् भगवत्परत्वमेव परतत्त्वविषयाणां सर्वासामप्युपनिषदां युक्तम्, न तु ततोऽप्यतिरिक्तविषयत्वम्। भगवत्परत्वे ततोऽप्यतिरिक्तपरत्वे वा स्वारस्यभङ्गाविशेषेण श्रुत्यन्तरानुसरणपरित्यागे हेत्वभावात्। तस्मात् शिवादिशब्दानां यथासम्भवं रूढियोगगुणवृत्तिभिर्भगवत्परत्वमेव युक्तमिति परतत्त्वविषयाणां सर्वासामप्युपनिषदां भगवत्परत्वं सिद्धम्। अतोऽपीह शिवशब्दो भगवत्परः।

अपि च शिवेश्वरादिशब्दाः परब्रह्मणि स्वरसा इति तावत् सर्वसम्प्रतिपन्नम्। अतः परमात्मपरत्वात्तेषां शब्दानां परब्रह्मपरमात्मादिशब्दवन्न तैर्देवताविशेषनिर्धारणसम्भवः। अतो नारायणादिशब्दा एव देवतानिर्धारकाः। तेषां भगवतो ब्रह्मत्वनिर्धारणात् प्राक् परमात्मपरत्वनिर्णयाभावात्।

ननु परमात्मन्येवैषां शक्तिः। रुद्रस्य परमात्मभेदे तत्र शक्त्यन्तरकल्पनाप्रसङ्गात् तदभेद एव रुद्रस्य वाच्य इति चेन्न। प्रसिद्धरुद्रे शक्त्यन्तरस्य कल्पनीयत्वात्।

ननु तत्र न शक्तिः, किन्तु गौण्येव वृत्तिः। लोकप्रयोगमात्रात् तत्र निघण्टुपाठोऽपीति

---

1. भा.पु.7.10.15
2. वि.धम.6
3. वि.धम.उ.8
4. वि.ध.13
5. महा.सभा.39.19
6. महा.सभा.43.10

चेत्, तर्हि सिद्धन्नस्समीहितम्। शिवादिशब्दानां प्रसिद्धरुद्रातिरिक्ते शक्तौ शिवादिशब्दैः भगवद्व्यावर्तनाभावेन जगत्कारणतया श्रुत्यन्तरप्रसिद्धे भगवत्येव तेषां वृत्त्युपपत्तेः। न हि किञ्चित् तत्र बाधकं पश्यामः। प्रत्युत सकलोपनिषदैककण्ठ्यलाभः। तस्मात् परविषयशब्दास्सर्वे भगवद्विषया एव।

अथ स्यात् शिवादिशब्दानामपि रुद्रस्य परमात्मत्वनिर्णयात् प्राक् परमात्माभिधायकत्वं नेति। तर्हि प्रसिद्धरुद्र एव तेषां व्युत्पत्तेस्तदन्यप्रतीतिर्लक्षणयैवेति श्रुत्यन्तरानुसारेण तैः कथं भगवत्प्रतीत्यभावः। उपक्रमानुसाराच्चायं शिवशब्दो भगवत्परः। तथाहि - प्रथमे खण्डे

[1]'ब्रह्मवादिनो वदन्ति —

**किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च सम्प्रतिष्ठाः।**
**अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम्॥**
**कालःस्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्।**
**संयोग एषां न त्वात्मभावादात्माप्यनीशः सुखदुःखहेतोः॥'**

[2]**'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निरूढाम्'** इत्याद्युक्त्या तद्ब्रह्मोपनिषत्परमित्युपसंह्रियते। तत्र 'तद्ब्रह्मोपनिषत्परमि'त्युपसंहारात् प्रथमखण्डे एव उपक्रान्तः प्रधानार्थो निर्धारित इत्यवगम्यते। तत्र 'किं कारणं ब्रह्मे'ति कारणभूतं वस्तु ब्रह्म वा कालो वा स्वभावो वा नियतिर्वा यदृच्छा वा भूतानि वा पुरुषो वेत्येवं कारणधार्मिकब्रह्मादिकोटिकसंशयो विवक्षित इति न सम्भवति। तदा हि कारणं ब्रह्म किं कारणं ब्रह्म वेत्यन्वयः स्यात्। तत्र कालादिकोट्यन्तरानुपन्यासात् कथं तथा संशयविवक्षासम्भवः। किञ्च एवं संशये कालादिवाक्यस्य कालाद्यपेक्षापरताया वाच्यत्वात् 'संयोग एषान्नत्वात्मभावादि'ति वाक्यमनन्वितं स्यात्। कारणानां संयोगस्य हेतुत्वानुक्त्या तदापेक्षासम्भवात्। अचितः कोटित्वे 'अधिष्ठिताः केने'ति चानुपपन्नम्। तस्मात् कारणं ब्रह्मेति धर्मिनिर्देशप्रदर्शनम्। किं दैवतमित्यर्थः। ब्रह्माविष्णुः रुद्रो वेति विवक्षितम्। एवं किंशब्देनैव नानाकोट्युपस्थापनान्नास्मिन् पक्षे पूर्वोक्तकोट्यन्तरोपस्थापकाभावलक्षणदोषावकाशः। इत्थं संशयाद्देवताविशेषविषयमेव निर्धारणमिह चिकीर्षितमिति चावगम्यते। पराभिमता च देवतानिर्धारण(पर?)ता। ततः प्रथमखण्डे कारणीभूतदेवतानिर्धारणं वाच्यम्। तत्र पुरुषेशहरपदानि त्रीण्येव श्रूयन्त इति तदन्यतमस्मिन्नेवायं देवतानिर्धारणभावः पर्यवस्थितः।

तत्र न तावदीशशब्दो निर्धारकः। [3]'व्यक्ताव्यक्तं भरते विश्वमीश' इत्याधारत्वमेव हि

1. श्वे.उ.1.1-2
2. श्वे.उ.1.3
3. श्वे.उ.1.8

श्रूयते, न तु कारणत्वम्। तत्र [1]'पृथगात्मानम्', [2]'उद्गीत(थ)मेतमि'ति नियन्तृनियाम्यभेदज्ञानस्य मोक्षसाधनत्वं तदनुष्ठानं चोक्त्वा तदेव ज्ञानस्य मोक्षहेतुत्वं [3]'संयुक्तमेतदि'ति परमात्मनो बन्धकत्वादस्य जीवस्य बध्यत्वाच्चास्य तदुपासनया बन्धनिवृत्तिर्युक्तेत्युपपाद्यते। अतः कथमिदं वाक्यं कारणं ब्रह्म किन्देवतारूपमित्यस्योत्तरं स्यात्।

किञ्च [4]'अनीशश्चात्मा बध्यते भोक्तृभावात्' इत्युत्तरवाक्ये समुच्चयासम्भवात् चस्त्वर्थः। 'ईशो बिभर्ति अनीशस्तु बध्यत' इत्यनीशनं हेतुतया विवक्षितम्। अन्यथा अन्यत्वमात्रविवक्षायाम् 'अन्यश्चात्मा बध्यते भोक्तृभावादि'ति हि वाच्यम्। अतः 'अनीश' इत्यत्र योगार्थस्य विवक्षितत्वात् पूर्वत्रापि तस्यैव वाच्यतया नात्र ईशशब्देन देवताविशेषनिर्धारणसम्भवः। यत्र च योगोद्भवः न तत्र रूढिपरिग्रहे निमित्तमस्ति। योगमात्रेणापि प्रयोगचारिताथ्यात्। अस्येशशब्दस्य विवरणसापेक्षतया हरपदस्य तद्विवरणरूपत्वं वदता परेणापि ईशशब्दस्यानिर्धारकत्वमङ्गीकृतमेव। ईशशब्दस्योन्मिषितयोगत्वात् भगवति प्राचुर्यादपि निर्धारणाक्षमत्वादेव हि विवरणसापेक्षता। नापि हरशब्दो निर्धारकः। [5]'क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एक' इति श्रूयते। अत्रापि कारणत्वं न प्रतीयते। किन्तु नियन्तृत्वमात्रम्। तच्चाकारणस्यैव जीवस्य शरीरनियमनवदुपपद्यते।

किञ्चात्राक्षरपदविवरणमेव हरश्शब्दः सकारान्तः। स च तेजोवाचकत्वात् प्रकाशरूपत्वविवक्षया-मात्मनि प्रसज्यते, यथा [6]'अत्रायं पुरुषः स्वयञ्ज्योतिः', [7]'प्राणेषु हृद्यन्तर्ज्योतिः' इत्यादिः। यद्वा भोग्यजातं स्वार्थतया हरतीति हरो जीवः। अकारान्तश्च हरशब्दः सर्वदा अक्षरपदविवरणमेवेदं हर इति।

ननु 'हरतेरनुद्यमनेऽच्' इति सोपपदादभिधीयते। निरुपपदं चेदम्, न च पचाद्यच्। पचाद्यन्तर्भावकल्पने प्रमाणाभावादिति चेन्न।'पश्यतोहर' इत्यादिषु 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु' इत्यलुग्विधायकसूत्राङ्गीकृतस्य हरशब्दस्य दर्शनेन पचाद्यन्तर्भावकल्पनात्। हरशब्दस्य विवरणसापेक्षत्वात् 'क्षरात्मानावि'त्यात्मपदप्रयोगः। तथाहि -'संयुक्तमेतत् क्षरमक्षरञ्चे'त्युक्तं क्षराक्षरशब्दयोर्विवरणमिह क्रियते। तत्र [8]'क्षरं प्रधानमि'ति व्याख्येयं पूर्वमुपादाय अनन्तरं

1. श्वे.उ.1.6
2. श्वे.उ.1.7
3. श्वे.उ.1.8
4. श्वे.उ.1.8
5. श्वे.उ.1.10
6. बृ.उ.6.3.9
7. बृ.उ.6.3.7
8. श्वे.उ.1.10

व्याख्यानात् उत्तरत्रापि तथैव वाच्यतया 'अक्षरं हर' इति हरपदेन व्याख्यानं युक्तम्, न तु पूर्वेणामृतपदेन।

किञ्चोपक्रमे 'संयुक्तमेतत् क्षरमक्षरं चे'ति भर्तव्ये पृथक्पादेन निर्दिश्य [1]'व्याक्ताव्यक्तं भरते विश्वमीशमि'ति पादान्तरेण भर्ता निर्दिश्यते। तथोत्तरत्र [2]'क्षरं त्वविद्या ह्यमृतं तु विद्ये'तीशितव्यं पृथङ्निर्दिश्य [3]'विद्याविद्ये ईशते यस्तु सोऽन्य' इतीशिता पृथक्पादेन निर्दिश्यते। तदनुसारात् प्रथमपादस्येशितव्यमात्रपरत्वमेव युक्तम्।

किञ्च न ह्यमृतमिति श्रूयते, येन व्याख्यानरूपता स्यात्। यदुक्तम् -'सप्तदशारत्निर्वाजपेयस्य यूपो भवती'त्यत्र समासान्तर्गतस्यापि सप्तदशपदस्य यथा विधायकता तथैव समासान्तर्गतस्याप्यमृतपदस्य विधायकतोपपत्तेर्विवरणरूपता युज्यत इति, तन्न, तत्र हि परम्परासम्बन्धिवाजपेययूपोद्देशेन सप्तदशारत्निरिति विधाने अरत्निमात्रस्यापि प्राप्तत्वात् साप्तदश्ये विधिपर्यवसानमिष्यते। तत्रोद्दिश्यविधानरूपवाक्यभङ्गीसत्त्वात् कथमुद्दिश्य विधिः। तत्र यूपोद्देशेन साप्तदश्यविधौ साप्तदश्यसम्बन्धघटकारत्नयोऽनूद्यन्ते।

**अपि चोभयोर्यौगिकत्वेनाभिन्नार्थताप्रतीतेश्च कथं व्याख्यानव्याख्येयभावः।**

किञ्च क्षरं किमित्यपेक्षायां प्रधानमिति व्यक्तिविशेषनिर्धारणं हि कृतम्, न तु योगार्थ उक्तः। अतो नामृतशब्देन व्याख्यानम्। अतो हरशब्देनैव व्याख्यानमुचितम्। हरो देव इत्यन्वये पदान्तरान्वयो व्यवहितान्वयश्च। एवं हरशब्दोऽक्षरशब्दस्य व्याख्यानमिति स्थिते अमृतशब्दो व्याख्येयविशेषणं। तस्य प्रयोजनमन्यत्र क्वचिदमृतपदेन जीवोपलम्भः। एवं अमृतपदस्य विशेषणत्वे सति हि उत्तरत्र [4]'क्षरं त्वविद्या ह्यमृतन्तु विद्ये'त्यमृतपदेनाक्षरनिर्देश उपपद्यते। 'क्षरं प्रधानमि'त्यत्र यद्व्याख्येयं क्षरपदं तेन हि 'क्षरं त्वविद्ये'ऽत्र क्षरस्य निर्देशो दृश्यते, न तु प्रधानमिति व्याख्यानपदेन। तस्मात् 'अमृतं तु विद्ये'त्यत्रापि 'अमृताक्षरं हर' इत्यत्र यद्व्याख्यानं तेन पदेन क्षरस्य निर्देशो न कार्यः, किन्तु व्याख्येयेनैव। एवञ्चामृतपदस्य व्याख्येयविशेषणतया व्याख्येयानुप्रवेशे सत्येव तेनाक्षरस्य निर्देशसम्भवः, न तु व्याख्यानरूपत्वे। तस्माद्धरशब्दो जीवपर इति, न तेन देवतानिर्धारणसम्भवः। अतः पुरुषशब्द एव देवतानिर्धारणपरो वाच्यः।

किञ्च कालादिवाक्यस्य निर्धारकत्वाभावे कालादिकारणत्वाक्षेपपरता वाच्या। कारणं ब्रह्मेति निश्चित्य देवताविमर्शे क्रियमाणे कालाद्याक्षेपस्य कः प्रसङ्गः।

---

1. श्वे.उ.1.8
2. श्वे.उ.5.1
3. श्वे.उ.5.1
4. श्वे.उ.5.1

एतेन देवताविमर्शमङ्गीकृत्यापि कालादिवाक्यस्याक्षेपपरत्वं वदन्तः परे निरस्ताः।

तदयमर्थः 'किं कारणमि'ति कर्तृनिर्देशः। [1]'कुतः स्म जाता' इत्युपादानस्य। [2]'जीवाम केने'त्यस्य केन जीवाम इत्यन्वयः। अनेन क्षरस्य [3]'क्व च सम्प्रतिष्ठे'ति संहर्तुर्लयस्थानस्य च सर्वप्रतिष्ठारूपलयस्थानस्य लयकर्तृत्वसूचनसम्भवात् तदधिकरणकस्य लयस्य तत्कर्तृकत्वे सामीचीन्यं विवक्षितम्। 'अधिष्ठिताः केने'ति नियन्तुर्नियाम्यत्वेन पारतन्त्र्ये हेतुः। 'सुखेतरेष्वि'ति अधिष्ठितत्वाभावे दुःखत्वं न स्यादिति भावः। सुखानि तदितराणि, दुःखानि च सुखेतराणि। अव्यवस्थाः दुःखवृत्तौ सुखवृत्तौ वा व्यवस्थाशून्याः। व्यवस्थितत्वे हि स्वाभाविकत्वान्नाधिष्ठानापेक्षेति शङ्कोदयेऽपि इत्थं विप्रतिपत्तिरुपन्यस्ता। अथ सिद्धान्त उपन्यस्यते [4]'काल(लः?)स्वभाव' इत्यादि। कालस्वभावः -कालविशेषः कारणमस्तीति निश्चित्य संशयप्रवृत्तेः, स्वभाववादस्याप्रसक्त्या तन्निराकरणासम्भवात्, योनिपदानन्वयाक्षेपपक्षेऽपीत्थमेव वाच्यत्वात्। नियतिरदृष्टम्। यदृच्छा क्वचित्क्वचित् तत्तत्कार्यविशेषेषु हेतुः,दैवाद्यदृच्छयेति च समानार्थतया प्रयोगात्। भूतानीति महदादीनामप्युपलक्षणम्। 'एतानि पुरुषः' - निर्वाह्यनिर्वाहकभावनिबन्धनं सामानाधिकरण्यम्। तेन कारणनिर्वोढृत्वेन कर्तृत्वमुक्तम्। योनिरित्युपादानत्वमुक्तम्। एवं किं कुत इत्यस्योत्तरमुक्तम्। उभयविधकारणत्वरक्षकत्वलयाधिकरणत्वकर्तृत्वनियन्तृत्वविशिष्टं वस्तु किन्दैवतमिति हि विप्रतिपत्तिः। अतः कारणत्वादीनामेकधर्मिगतत्वस्य निश्चितत्वात् प्रधानभूतकारणनिर्धारणेनैव निर्धारणान्तरमपि सिद्धमिति पृथक् तदनुक्तिः। 'चिन्त्यमि'ति - निर्धार्यमित्यर्थः। सन्देहवाचिना तत्प्रयोज्यनिर्धारणाभिधानात्। अत एवाह भवनाथः -'तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवा-यादि'त्यत्र एवं शाब्दता स्थितीनिह नयान्तरात् गौणमुख्याधिकनयान्तराद्विवेकः शाब्दत्वेपीति चिन्त्यमिति। अत एव सम्यक् चिन्तितोऽयमर्थ इति वक्तारो भवन्ति। एतदभिप्रायेणै'वेदं चिन्त्यमि'त्यादि वदन्ति। तद्वदिहापि निर्धारणमेवार्थः। इयांस्तु विशेषः - गौरवितविषये तदुक्तं नेति वक्तुमक्षमाः 'चिन्त्यमि'ति व्यतिरेकनिर्धारणं लक्षयन्ति। इह तु तादृशविवक्षाहेत्त्वाभावा-दन्वयनिर्धारणमेव विवक्षितम्। अतः कारणं ब्रह्मेति धर्मिनिर्देशः। किमिति नानादेवताकोटिप्रदर्शनम्। पुरुष इति परदेवतानिर्धारणम्। यदि हि कालादिवाक्यमाक्षेपः स्यात् तथाभूतानि पुरुषो योनिरिति चिन्त्यमिति वाच्यम्। पुरुषशब्देन परमात्मनिर्देशादेव हि तेन पदेन जीवनिर्देशे

---

1. श्वे.उ.1.1
2. श्वे.उ.1.1
3. श्वे.उ.1.1
4. श्वे.उ.1.2

पूर्वनिर्दिष्टपुरुषप्रत्यभिज्ञा भवितेति तन्निवृत्तये पुरुषजीवयोर्भेदप्रतीतिसिद्ध्यर्थं [1]'आत्माप्यनीशस्सुखदुःखहेतोः', [2]'कालात्मयुक्तानि', [3]'पृथगात्मानम्', [4]'क्षरात्मानावीशते', [5]'अनीशश्चात्मे'-त्यात्म-शब्देन जीवनिर्देशः।अस्मिन् प्रकरणे क्वापि पुरुषपदेन जीवनिर्देशाभावश्च। आक्षेपपरत्वे 'पुरुष इति चिन्त्यमि'त्यनन्तरं तद्धेतूपन्यासे 'पुरुषोऽप्यनीशस्सुखदुःखहेतोरि'ति हि वाच्यम्। एवं सति 'ब्रह्मवादिनो वदन्ति, किन्देवत्यं पौर्णमासमिति... ब्रूयादि'त्यादिषु संशयप्रदर्शनवाक्यानन्तरवाक्यस्यैव निर्धारणपरत्वदर्शनात् इहापि तादृशश्रुतिशैल्यनुरोधो भवति। एवं परमपुरुषस्यैव कारणत्वं प्रतिज्ञाय अस्यैवेदमुपपद्यत इत्यभिप्रायेणाह 'संयोग' इति। कालादिसंयोगस्य कार्यापेक्षितत्वात् संयोगस्य च कालादिस्वरूपप्रयुक्तत्वाभावात् तदनुगुणसार्वज्ञ्यसर्वशक्तियुक्तः परमपुरुष एव तत्संयोजकः, न तु ब्रह्मरुद्रादिर्जीववर्गः। तस्य सुखदुःखभागित्वेन कर्मपरतन्त्रतया निरङ्कुशज्ञानशक्त्योरभावादित्यर्थः। सुखदुःखहेतोरिति ब्रह्मवादिनो वदन्तीत्यन्वयः। इदं च वाक्यं भारते एवोपबृंहितम् -

**[6]"तत्त्वं जिज्ञासमानानां हेतुभिः सर्वतोमुखैः।**
**तत्त्वमेको महायोगी हरिर्नारायणः प्रभुः।**
**प्रधानं कारणं येषां पुरुषश्चापि कारणम्।**
**स्वभावश्चैव कर्माणि दैवं येषां च कारणम्॥**

पञ्चकारणसङ्ख्यातो निष्ठा सर्वत्र वै हरिः।'इति।'प्रधानमि'ति 'भूतानी'त्येतदुक्तम्। 'पुरुष' इति 'आत्माप्यनीश एव' इत्येतदुक्तम्। 'स्वभाव' इति 'कालस्वभाव' इत्येतदुक्तम्। 'कर्माणी'ति 'नियतिरि'त्येतदुक्तम्। 'दैवमि'ति यदृच्छेत्येतदुक्तम्। अत्र कालपदाभावात् पञ्चसङ्ख्योक्तेश्च 'कालस्वभाव' इत्येककारणनिर्देशः। अत्र हरिपदेन पुरुषशब्दो व्याख्यातः।

केचिदध्येतारः किञ्चिद्वाक्यपर्यालोचनया प्रधानं कारणमिति वदन्ति। एवं तत्तद्वाक्यपर्यालोचनया पुरुषादीनां कारणत्वं तदध्येतारो वदन्ति। तेषां सर्वेषामपि भगवदनधिष्ठितानां प्रधानादीनां कारणत्वेन तात्पर्यम्। किन्तु भगवदधिष्ठितानामेव कारणत्वं इति भावः। निष्ठाभूतो हरिरेव पञ्चकारणसङ्ख्यात इति योजना। अस्य कथं पञ्चकारणसङ्ख्यातत्त्वम्, प्रधानादीनामेव

1. श्वे.उ.1.2
2. श्वे.उ.1.3
3. श्वे.उ.1.6
4. श्वे.उ.1.10
5. श्वे.उ.1.8
6. महा.मोक्ष.347.88-90

हि तदित्यत्र उक्तम् –'निष्ठे'ति। निष्ठा – पर्यवसानम् - तात्पर्यभूमिः। एवं भगवतः कारणत्वं निर्धार्य किं विशेषणद्वारकपरिणामान्वयाद्विशिष्टमुपादानम्, किं स्वरूपपरिणामात् केवलस्वरूपमेवोपादानमिति ध्यानयोगेन विचार्य विशिष्टोपादानत्वं निर्धारयाम्बभूवुरित्याह - [1]'ते ध्याने'ति। आत्मशक्तिः - अनन्याधीनत्वशक्तिः। गुणवैषम्यनिबन्धनत्वात् कार्यस्य 'स्वगुणैर्निरूढामि'ति सत्त्वादिगुणत्रयोपन्यासः। एवमुपक्रमे भगवतः कारणत्वनिर्धारणात्तदनुरोधेनात्र शिवशब्दो भगवत्पर एव।

किञ्चास्य श्वेताश्वतरस्य भगवत्परत्वं तत्रत्यकृत्स्नवाक्यैरेवावगम्यते। विरोधोऽपि नोपलभ्यते। तथाहि - प्रथमखण्डस्य भगवत्परत्वं तावदुक्तमेव। तत्र 'यः कारणानि निखिलानी'ति वाक्येन पूर्ववाक्यसिद्धमधिष्ठातृत्वमनूद्य विशिष्टकारणे विशेषणविशेष्यस्वरूपमुक्तम्। तत्र 'अधीम' इति ब्रह्मविदामनुसन्धानम्। 'तमेकनेमिमि'त्यारभ्या'अधीम' इत्यनेनैवान्वितम्। 'अपश्यन्नि'त्यस्य परस्पराकाङ्क्षाबलेन 'शक्तिमि'त्यनेनैवान्वितत्वात्।

एतेन [2]'ते ध्यानयोगानुगता अपश्यन्नि'ति वाक्ये गौरीदर्शनमुच्यते। यः कारणानीति रुद्रदर्शनमुच्यत इति निरस्तम्। 'अपश्यन्नि'त्यस्योत्तरत्रान्वयासम्भवात्। न च 'अधीम' इत्यस्याव्यवधानात् स्त्रीलिङ्गान्तपदबोधितकर्मणैवान्वयः।आकाङ्क्षाया अविशेषणस्य सन्निधेरवैषिकत्वात् 'तनूर्वर्षिष्ठेति'वत् 'सर्वाजीवे' इति - 'अधिष्ठिताः केने'त्युक्ताधिष्ठातृत्वस्यापि कालादिवाक्ये विवक्षितत्वात् तद्विवृतम्। [3]'पृथगात्मानमि'ति ब्रह्मचक्रभ्रमणरूपसंसारमोक्षणे हेतुरुक्तः। [4]'उद्गीथमि'त्यनुष्ठानमुक्तम्। [5]'संयुक्तमेतदि'त्यनेन [6]'सर्वाजीवे''पृथगात्मानमि'त्येतदुभयं विवृतम्। [7]'ज्ञाज्ञौ द्वावि'त्यशक्तिपदज्ञानस्यापि बन्धहेतुत्वम्, तन्मोचकस्यानन्तविश्वरूपाभिधानस्य भगवतः कर्मवश्यत्वाभावश्चोक्तः। कर्मवश्यत्वाभावोक्त्या ईशने हेतुरुक्तः। **'ईशे'**ति योगार्थस्य विविक्षितत्वात्। 'तस्याभिध्यानादि'ति ज्ञात्वा इत्येतद्विवृतम्। भूयोऽभिधानादित्यन्वयः। 'वह्नेर्यथे'त्यादिना आद्येन प्रणवस्य साधनत्वमुक्तम्। एवं प्रथमखण्डे परा देवता तज्ज्ञानस्य मोक्षसाधनत्वं च निर्धारिते।

---

1. श्वे.उ.1.3
2. श्वे.उ.1.3
3. श्वे.उ.1.6
4. श्वे.उ.1.7
5. श्वे.उ.1.8
6. श्वे.उ.1.6
7. श्वे.उ.1.9

द्वितीयखण्डे योगारम्भप्रयोज्यमन्त्रादिकमुच्यते। तत्र 'एको हि देव' इति वाक्येन [1]'एष हि देव' इत्यम्भसिवाक्यं प्रत्यभिज्ञाप्य भगवानेवेह विवक्षित इति ख्यापितम्।

तृतीयखण्डे [2]'विश्वतश्चक्षुरि'त्यादिना पुरुषसूक्तार्थप्रत्यभिज्ञापकेनाम्भसिवाक्येन भगवत्परेण जगत्कारणमुक्तम्। [3]'यो देवानामि'ति भगवदुपासनोपयोगिरुद्रगोचरज्ञानप्रार्थनामन्त्र उक्तः। 'ईश्वरात् ज्ञानमन्विच्छेत् उपायोऽस्मि हरेः स्मृतावि'ति हि स्मर्यते। [4]'हिरण्यगर्भं जनयामासे'ति - हिरण्यगर्भमपश्यदित्यर्थः, अनुवादरूपस्यास्य हिरण्यगर्भोत्पत्तिविधायकमहोपनिषदादिवाक्यानुसारेणैव नेयत्वात्। एवमर्थो जातः, ममार्थो न जातः, अयमर्थो निष्पन्न इत्यादिभूयःप्रयोगदर्शनात् जनयामासेति ज्ञानपरत्वं युक्तम्। [5]'हिरण्यगर्भं पश्यत जायमानमि'ति तैत्तिरीयवाक्यानुसारादत्रत्यतद्वाक्यानुसाराच्च इष्टप्राप्त्यनिष्टनिवृत्तिप्रार्थनारूपध्यानाङ्गमन्त्रोपदेशानन्तरं ध्येयस्वरूपमाह [6]'ततः परमि'ति।मन्त्रप्रतिपाद्यरुद्रात् परमित्यर्थः। तत इत्यवधिपरम्, न तु हेतुपरम्। तथात्वे परपदद्वयानन्वयात्। अवधिपरत्वे तु प्रथमः परशब्दोऽन्यपरः। द्वितीयः सर्वस्मादुत्कर्षपरः। ईश्वरशब्दविवरणार्थं भगवति तात्पर्यव्यञ्जनार्थञ्च पुरुषसूक्तं शङ्खलिखितेन भगवत्परतयोपबृंहि' [7]ताणोरणीयानि'त्यनुवाकवाक्यञ्चोदाहृत्य भगवति तात्पर्यं व्यञ्जितम्। 'वेदाहमेतमि'त्यारभ्य 'सर्वमि'त्यन्तेन 'ततो यदुत्तरतरमि'ति व्याख्यातम्। [8]'य एतद्विदुरमृतास्ते भवन्ती'ति 'य एनं विदुरमृतास्ते भवन्ती'त्यम्भसिवाक्यार्थः प्रत्यभिज्ञापितः। [9]'तस्मात् सर्वगतः शिव' इति यतो भगवान् अतः सर्वगतत्वेऽपि शिव इत्युक्तम्। [10]'महान् प्रभुर्वै पुरुष' इति सत्त्वप्रवर्तकत्वं भगवति प्रसिद्धमुक्तम्।'शान्तिमीशान' इति 'अधीगर्थदयेशां कर्मणी'ति न षष्ठी, कर्मणश्शेषत्वेनाविवक्षितत्वात्। शान्तिमीशानः पुरुष इत्याह [11]'अङ्गुष्ठमात्रः पुरुष' इति। पुरुषसूक्तोदाहरणेन भगवत्परत्वं स्पष्टीकृतम्। पुरुषसूक्तं विवृतं [12]'सर्वतः पाणिपादं

---

1. श्वे.उ.2.16
2. श्वे.उ.3.3
3. श्वे.उ.3.4
4. श्वे.उ.3.4
5. म.ना.उ.10.3
6. श्वे.उ.3.7
7. श्वे.उ.3.20
8. श्वे.उ.3.1
9. श्वे.उ.3.11
10. श्वे.उ.3.12
11. श्वे.उ.3.13
12. श्वे.उ.3.16

तत्' इति। [1]सर्वस्य प्रभुम् सर्वस्येशानमित्यन्वयः,सर्वस्य शरणं सर्वस्य सुहृदित्यन्वयात्। [2]'नवद्वारे' इति - हंसो भगवान्, स एव सर्वशरीरत्वात् देही।हरिवंशे द्विसप्ततिद्विशततमेऽध्याये पौष्करप्रादुर्भावे [3]'अथायं भगवान् हंसो गतो योगेन बालतामि'ति, [4]'तस्मिन्नहनि सम्प्राप्ते तं हंसं महदक्षरमि'ति। वाराहे प्रादुर्भावे [5]'प्रच्छाद्य सलिलेनोर्वीं हंसो नारायणायते' इति, पौष्करप्रादुर्भावे [6]'रराम सुखमेकान्तं शुश्रूषुर्हंसमव्ययमि'ति, एकादशस्कन्धे वसुदेवनारदसंवादे –

**[7]'हंसः सुपर्णो वैकुण्ठोधर्मयोगेश्वरोऽमलः।**
**ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते॥'**
**नानारत्नमालायां 'हंसः खगे स्मरे विष्णावि'ति।**

एवं तृतीयखण्डे पुरुषशब्दः सप्तधावृत्तः। भगवत्पुराणहंसशब्दाश्च श्रुताः। [8]'विश्वतश्चक्षुः', [9]'वेदाहमेतम्', [10]'यस्मात्परम्', [11]'सहस्रशीर्षा पुरुषः', [12]'हृदा मनीषा', [13]'अणोरणीयानि'ति षोढा भगवति प्रत्यभिज्ञा। एवं भगवदभिधानश्रुतेः प्रत्यभिज्ञया [14]'ततः परं ब्रह्म परं बृहन्तमि'ति रुद्रात्परत्वश्रुतेश्चास्य खण्डस्य भगवत्परत्वं स्पष्टम्। [15]'तस्मात् सर्वगतः शिव' इति हेत्वन्वयान्मङ्गलपरः। 'शान्तिमीशानः, सर्वस्येशानमि'ति यौगिक इत्युक्तम्। 'ईशं तमि'ति 'ततः परमि'त्येतत्परामर्शाद्भगवत्परत्वं स्पष्टम्। अतस्तृतीयखण्डे भगवत्परत्वहेतवो भूयांसः। अतस्तस्मिन् खण्डे [16]'एक एव रुद्र' इत्यत्र रुद्रशब्दः संहारकालीनक्रौर्याभिप्रायो भगवत्परः।

---

1. श्वे.उ.3.17
2. श्वे.उ.3.18
3. ह.पु.3.10.35
4. ह.पु.3.33.19
5. ह.पु.3.10.1
6. ह.पु.3.11.68
7. भा.पु.11.5.23
8. श्वे.उ.3.3
9. श्वे.उ.3.8
10. श्वे.उ.3.9
11. श्वे.उ.3.14
12. श्वे.उ.3.13
13. श्वे.उ.3.20
14. श्वे.उ.3.7
15. श्वे.उ.3.11
16. श्वे.उ.3.2

चतुर्थखण्डे [1]'य एकोऽवर्ण' इति वाक्यं 'तदेवाग्निरि'त्यम्भसिवाक्येन भगवत्परतया व्याख्यातम्। 'अजामेकामि'ति 'अणोरणीयानि'त्यनुवाकवाक्यमपि भगवन्तं प्रत्यभिज्ञापयति। [2]'जुष्टं यदा पश्यत्यन्यमीशमि'त्यत्र च ईशशब्दः 'अनीशया शोचती'ति पूर्ववाक्यानुरोधाद्यौगिकः। [3]'मायिनं तु महेश्वरमि'त्यत्र महेश्वरशब्दो भगवत्परः। [4]'मम माया दुरत्यये'त्यादिभिर्मायाया भगवदधीनत्वावगमात्, सौबालादौ तथावगमाच्च। [5]'यो योनिं योनिमि'त्यत्रेशानशब्दः कारणत्वानुवादात् तथाप्रसिद्धभगवत्परः। [6]'यो देवानामि'ति पूर्ववदङ्गमन्त्रः - ऋषित्वात् स्वपितरं जायमानावस्थं पश्यतीत्यर्थः। [7]'य ईशेऽस्ये'ति भगवत्प्रत्यभिज्ञा, 'हिरण्यगर्भस्समवर्तताग्र' इत्यष्टर्चन्तर्भावात्। [8]'ज्ञात्वा शिवं शान्तिमत्यन्तमेती'ति शिवशब्दो [9]'ज्ञात्वा शिवं सर्वभूतेषु गूढमि'ति व्याख्यातः। सर्वभूतसम्बन्धेऽपि दोषासंस्पृष्टमित्यर्थः, [10]'तस्मात् सर्वगतः शिव' इतिवत्। [11]'तमेवं ज्ञात्वा अमृता भवन्ती'ति [12]'तमेवं विद्वानमृत इह भवती'त्यर्थप्रत्यभिज्ञानात् [13]'हृदा मनीषा', [14]'नैनमूर्ध्वमि'त्यम्भसिवाक्याभ्यां भगवत्प्रत्यभिज्ञाच्च भगवत्परम्। 'अजात' इति रुद्रविषयोऽयमङ्गमन्त्रः - भगवतो ब्रह्मणो वा जातः ( इत्यर्थः?) अत एव [15]'रुद्र यत्ते','जनिम चारुचित्रमि'त्याद्युच्यते। एवं चतुर्थखण्डः प्रत्यभिज्ञाबाहुल्यात् भगवत्परः।

पञ्चमषष्ठयोः कारणत्वनियन्तृत्वादिसुबालोपनिषदाद्यर्थानुवादात्,'ब्रह्मयोनिरि'ति [16]'यो ब्रह्माणमि'ति च चतुर्मुखोत्पादकत्वोक्तेः, [17]'एको हंसः''तमेव विदित्वे'ति भगवत्प्रत्यभिज्ञानाच्च

---

1. श्वे.उ.4.1
2. श्वे.उ.4.7
3. श्वे.उ.4.10
4. भ.गी.7.14
5. श्वे.उ.4.11
6. श्वे.उ.4.12
7. श्वे.उ.4.13
8. श्वे.उ.4.14
9. श्वे.उ.4.16
10. श्वे.उ.3.11
11. श्वे.उ.3.7
12. नृ.पू.ता.उ.1.6
13. श्वे.उ.4.17
14. श्वे.उ.4.19
15. श्वे.उ.4.21
16. श्वे.उ.6.18
17. श्वे.उ.6.15

भगवत्परत्वं स्पष्टमेव। [1]'ब्रह्मणे ब्रह्मदायिन' इति कैलासयात्रायां हरिवंशे श्रूयते। अपिच [2]'यदा तम' इत्यनुवाद इति सर्वसम्प्रतिपन्नम्। प्रलयावस्थापर इत्यपि। तत्रापकं च [3]'तमः परे देव एकी भवती'ति सौबालवाक्यम्। स च देवो नारायण एव। मैत्रायणीयोपनिषदि च [4]'तमो वा इदमेकमास' इति श्रूयते। तत्रापि [5]'स वा एष सूक्ष्मोऽग्राह्योऽदृश्यः पुरुषसंज्ञ' इत्युपक्रम एवास्या उपनिषदो भगवत्परत्वेन निर्णयात् तत्रापि भगवान् प्रतिपन्नः। 'नासदासीन्नो सदासीत् तदानीम्','तम आसीदि'ति वाक्यमपि 'तदानीमि'ति सौबालादिप्रसिद्धप्रलयानुवादात् सदसदभावस्य तमस्सद्भावस्य च तत्रैव प्रपञ्चितत्वात्तद्वाक्यनुवादः। किञ्च यदि क्वचित् तमोमात्रं श्रुतं तत्राप्युक्तश्रुत्यनुसाराल्लयस्थानत्वेन स एव देवो विवक्षितः। तस्मादिह प्रलयावस्थतमसोऽनुवादात् तल्लयस्थानत्वेन तदधिष्ठातृत्वेन तत्प्रेरकत्वेन च तत्र प्रतिपन्नस्य भगवतः प्रत्यभिज्ञानात्तत्रैव भगवत्यक्षरत्वविधानमुचितम्। तत्रैव शिवत्वविधानेऽपि न दोषः। लीलापुरुषार्थसाधनशून्यत्वेन प्राप्तामाङ्गल्यशङ्कानिरासाय माङ्गल्यस्य विधेयत्वाल्लयस्यापि लीलोपकरणत्वात् पुरुषार्थाहानेर्नामाङ्गल्यमिति भावः। शिवत्वविधौ केवलशब्दोऽपि सप्रयोजनः। कैवल्येऽप्यमाङ्गल्यं नास्तीत्यर्थात् कारणत्वशङ्कितदोषनिरासार्थं वा शिवत्वोक्तिः।

यत्तु उपक्रम एवास्याः श्रुतेः देवतानिर्धारणार्थत्वावगमात् सौबालादावनेकार्थप्रतिपादके तथा तात्पर्यानवगमेनार्थान्तरतात्पर्येणापि चारितार्थ्यादनन्यपरैतच्छ्रुत्यैव देवतानिर्धारणात् सौबालादिगतनारायणशब्दो रुद्र एव लक्षणया वर्तितुमर्हतीति,

तन्न। सौबालस्य देवतातात्पर्याभावासिद्धेः। तथाहि [6]'न सन्नासन्न सदसदिति' इत्युपक्रम्य उपनिषदन्ते [7]'परस्तान्न सन्नासन्नसदसदित्येतन्निर्वाणमनुशासनमिति वेदानुशासनमि'ति कृत्स्नस्यापि वाक्यस्यैकवस्तुप्रतिपादकत्वं तस्मिन्नर्थे तात्पर्यातिरेकं च ख्यापयित्वापि तत्तदवान्तरार्थेष्वपि तात्पर्यातिरेकख्यापनार्थम् 'इति निर्वाणमनुशासनमिति वेदानुशासनमिती'ति तत्रतत्रोपसंहृत्य षष्ठसप्तमघटितखण्डद्विकेन देवताविशेषं निर्धार्य, तत्रापि तात्पर्यातिरेकख्यापनार्थम्

'इति निर्वाणमनुशासनमिति वेदानुशासनमि'त्युक्त्यापि तात्पर्येख्यापितेऽपि नैतावता प्राधान्यं सिध्यतीति तत्सिद्धये उपनिषत्समाप्तेः प्रागेवैतद्द्विकान्ते उपनिषत्समाप्ताविव

---

1. ह.पु.3.90.16
2. श्वे.उ.4.18
3. सु.उ.2
4. मै.उ.5.2
5. मै.उ.2.5
6. सु.उ.1
7. सु.उ.15

'एतां विद्यामि'त्यादिना सम्प्रदायोऽपि दर्शितः। अतो भगवत एव प्राधान्येन तात्पर्यविषयत्व-मित्यवगतम्।

अपिच प्रथमखण्डद्वयेन कारणत्वमुक्त्वा 'इत्येतन्निर्वाणमनुशासनमिति वेदानुशासनमिती'ति कारणत्वं परिसमाप्यानन्तरत्रिकेनास्योपास्यत्वं तत्सिद्धये सर्वान्तरत्वं च प्रासङ्गिकजीवनिरूपणेन सहोक्त्या तमप्यर्थम् 'इति निर्वाणमनुशासनमिति वेदानुशासनमि'ति परिसमाप्य कारणत्वेन सर्वान्तरत्वेन चोक्तदेवताविशेषः क इत्यपेक्षायामुत्तरद्विकेन देवतानिर्धारणं क्रियते। तत्र [1]'नैवेह किञ्च नाग्र आसीदि'ति प्रथमखण्डप्रतिपन्नप्रलयावस्थामनूद्य [2]'दिव्यो देव एको नारायण' इत्याह। [3]'आसीदि'त्यनुषङ्गः। 'चक्षुश्चे'त्यादिना चतुर्थखण्डप्रतिपन्नं तादात्म्यमनूद्य नारायणत्वं विधीयते। एवं कारणान्तर्यामिनिर्धारणस्य परिसमाप्तत्वात् तत्र तात्पर्यातिरेकख्यापनार्थम् 'इति निर्वाणमनुशासनमिति वेदानुशासनमि'त्युपसंहृतम्। न ह्यत्र नारायणातिरिक्तं विधेयमस्ति येनात्र 'एतन्निर्वाणनुशासनमि'त्युपसंहारेण प्रख्यापितं तात्पर्यमन्यविषयं स्यात्।

सप्तमे [4]चातुर्थसर्वान्तरत्वसिद्धमन्तर्यामिब्राह्मणयोरुक्तञ्च सर्वशरीरत्वमनूद्य नारायणत्वं विधीयते। अन्यथा नारायणत्वविध्यभावे किञ्चिदनूद्य किञ्चिद्विधातुं [5]'यस्येदं शरीरमि'त्यर्थपदपर्यन्तमागतमिदं वाक्यं कं विधेयमर्थमासाद्य विश्राम्येत्। सर्वान्तरत्वं तावच्चरमखण्डेन प्राप्तम्, अपहतपाप्मत्वञ्चामृत-त्वोपदेशात्, [6]पञ्चमे 'एतदजरममृतमभयमशोकमि'त्यनेन च प्राप्तम्। दिव्यत्वमपि वस्त्वन्तरवैलक्षण्यरूपं प्राप्तमेव।

न च दिवि भवं दिव्यमिति परमव्योमस्थत्वं विधीयत इति वाच्यम्। सर्वान्तरत्वकथनेन दिव्यात्मस्वरूपस्यैवेह प्रतिपाद्यमानतया अस्य द्युमात्रवृत्त्यसिद्ध्या तस्याप्रतिपाद्यत्वात्। तस्मान्नारायणानुवाक इव सुबालोपनिषत्, श्वेताश्वतरोपनिषदपि सुबालोपजीवित्वात् तदनुसारिणी भगवदनुरक्ता। मैत्रायणीयोपनिषदपि भगवदनुरक्ता पुरुषसंज्ञकत्वोक्तेरित्युक्तमेव। अपिच [7]'तमो वा इदमेकमासीदि'त्यनुवादकत्वख्यापनात् सापि सुबालोपनिषदमनुसरति। तस्माच्छिवादिशब्दा एव भगवत्पराः।

ननु स्थाणुर्वा पुरुषो वेति संशये स्थाणुपदेन पुरुषनिर्धारणवत् ब्रह्मा विष्णुः रुद्रो वेति

---

1. सु.उ.6
2. सु.उ.6
3. सु.उ.1
4. सु.उ.7
5. सु.उ.7
6. सु.उ.5
7. मै.उ.5.2

संशये रुद्रवाचिपदेन भगवन्निर्धारणमनुपपन्नम्। सौबालादिष्वेवं संशयपूर्ववृत्तेरभावादुक्तन्यायाप्रवृत्तेः। नारायणशब्दस्य रुद्रे लक्षणया वृत्तिस्सम्भवति। रुद्राभिधानचिह्नितैर्वाक्यैर्भगवदभिधानचिह्नितैरपि वाक्यैः कारणवस्तुप्रतिपादने सति अन्यतरवाचिपदानामन्यतरस्मिन् लक्षणाया आवश्यकत्वे किमभिधानं लक्षकमिति विशये उक्तन्यायेनैव निर्धारणौचित्यादिति चेत्, तन्न। पुरुषपदेनैव तन्निर्धारणस्योक्तेः। किञ्च किमयं संशयस्त्रिकोटिकः उत तुरीयान्तर्भावेन चतुष्कोटिकः। नाद्यः, त्रिमूर्त्यन्तर्गतस्यैवोक्तावयोग्यार्थता। द्वितीये त्वदीय एव पाशस्त्वां कण्ठे बध्नाति। अन्यतरकोट्यभिधायिना इतरकोट्यभिधानासम्भव इति। अपिच तुर्यस्य ज्ञाने संशयस्यैवासम्भवान्न चतुष्कोटिकसंशयोपपत्तिः। तदज्ञाने च सुतराम्।

ननु त्रिकोटिक एव संशयः। गौर्याः प्रसादात्तुरीयं पश्यतीति चेत्, एवमपि कथमितरकोटिवाचिना तुरीयाभिधानम्। कोट्यन्तर्गतस्य रुद्रस्यानपहतपाप्मत्वादिना परमकारणत्वासम्भवेन तुरीयाभिधानत्वमीशादिशब्दानां निर्णीयत इति चेत्, तर्हि सिद्धान्तेऽपि तथैव भगवदभिधायकत्वं निर्णीयत इति न काचित् क्षतिः। उपबृंहिता चेयमुपनिषच्छङ्खलिखितेन –

**[1]'स्वदेहमरणिं कृत्वा प्रणवञ्चोत्तरारणिम्।**
**ध्याननिर्मथनाभ्यान्तु विष्णुं पश्येद्धृदि स्थितम्॥'**
**[2]'अणोरणीयान् महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः।**
**तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्॥'**
**[3]'एष देवस्तु मर्त्यानां पटैरिव विधीयते।'**
**[4]'एष वै पुरुषो विष्णुर्व्यक्ताव्यक्तः सनातन।' इति।**

श्रीविष्णुधर्मे च तत्र [5]'श्रोतुमिच्छामि विप्रेन्द तद्विष्णोः परमं पदमि'ति शतानीकेन पृष्टो भगवाञ्छौनकः

**[6]'सूक्ष्माणां तत्परं सूक्ष्मं स्थूलानाञ्च महत्तरम्।**
**सर्वव्यापि च राजेन्द्र दूरस्थं चान्तिके च तत्॥'**इत्यादिश्लोकैः,

[7]'बृहच्च तद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत् सूक्ष्मतरं विभाति।

---

1. शं.स्मृ.7.17
2. शं.स्मृ.7.19
3. शं.स्मृ.7.20
4. शं.स्मृ.7.21
5. वि.ध.95.1
6. वि.ध.95.12
7. मु.उ.3.7

दूरात् सुदूरे तदिहान्तिके चे'ति मुण्डकश्रुतिमुपबृंह्य,

[1]'**सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्।**
**सर्वतश्श्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥'इति**

[2]'**सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।**' इत्यन्तं श्वेताश्वतरस्थवाक्यमेव पठित्वा,

[3]'**तच्चाद्यो जगतामीशः परेशः परमेश्वरः।**
**परापरस्वरूपेण विष्णुः सर्वहृदि स्थितः॥**' इति तद्विष्णुतरतयोपबृंह्य तन्निर्वाहाय,

[4]'**यज्ञेशं यज्ञपुरुषं केचिदिच्छन्ति तत्परम्।**
**केचिद्विष्णुं हरिं केचित् केचित्केशवसंज्ञितम्॥**
**केचित् गोविन्दनामानं पुण्डरीकाक्षमच्युतम्।**
**केचिज्जनार्दनं त्वन्ये वदन्ति पुरुषोत्तमम्॥**
**केचिद्विरिञ्चं ब्रह्माणमब्जयोनिं पितामहम्।**
**सर्वमीशमजं रुद्रं शूलिनं चापरे नृप॥**
**वरुणं केचिदादित्यं चन्द्रमग्निमथापरे।**
**यमं धनेशमपरे सोममन्ये प्रजापतिम्॥**
**हिरण्यगर्भं कपिलं क्षेत्रज्ञं कालमीश्वरम्।**
**स्वभावमन्तरात्मानमात्मानं बुद्धिरूपिणम्॥**
**श्रूयतां तु नरव्याघ्र वेदवेदान्तनिश्चयः।**
**यज्ञेशो यज्ञपुरुषः पुण्डरीकाक्षसंज्ञितः॥**
**स विष्णुः परमं ब्रह्म यतो नावर्तते पुनः।**
**स एव रुद्रस्सेन्द्रोऽग्निस्सूर्यो वैश्रवणो यमः॥**
**ब्रह्मा प्रजापतिः काल( लः? )स्वभावो बुद्धिरेव च।**
**क्षेत्रज्ञाख्यस्तथैवान्यः संज्ञाभिः प्रोच्यते बुधैः॥'**

इत्यन्तेन श्वेताश्वतरगतानां श्रुत्यन्तरगतानाञ्च शिवरुद्रेश्वरमहेश्वरेशानेशादिशब्दानां भगवत्परतां

---

1. वि.ध.95.16
2. वि.ध.95.17
3. वि.ध.95.20
4. वि.ध.95.21-28

विवक्षुः सर्वदेवताशब्दाः ब्रह्मप्रतिपादकवेदन्तभागगताः विष्णुपराः, अतः स एव मुक्तप्राप्यं परं ब्रह्म इति सकलवेदान्तविचारपरिनिष्पन्नोऽर्थ इति विशदं ब्रवीति।

पञ्चमखण्डगतं [1]'**तद्वेद गुह्योपनिषत्सु गूढमि**'ति वाक्यञ्च

**[2]'आरण्यकोपनिषदि ये तु पश्यन्ति मां द्विजाः।**
**निगूढं निष्कलावस्थं तान्प्रयत्नेन पूजयेत्॥'**

इत्याश्वमेधिके भगवद्वचनेन कृष्णपरतयोपबृंहितम्। तस्मादथर्वशिखावाक्यस्य कारणत्वानुवादेन ध्येयविधिपरत्वात् श्वेताश्वतरादिभिर्भगवत एव कारणत्वावगमात्तस्यैव ध्येयत्वम्।

हरिवंशे कैलासयात्रायामियमथर्वशिखा भगवत्परतयोपबृंहिता। तत्रोपाख्यानादौ—

**[3]'यथागतो हरिर्विष्णुः कृष्णो जिष्णुः पुरातनः।**
**यथा च शङ्करस्साक्षात् कृतवान्नागभूषणः।**
**एतत्सर्वं विप्रवर्य ब्रूहि तत्त्वेन यत्नतः॥'**

इति जनमेजयप्रश्नेन केशवशङ्करयोः प्रस्तुतत्वे तुल्येऽपि केशवस्य प्राधान्यं सूचयितुं [4]'नमस्कृत्य प्रवक्ष्यामि केशवं खगवाहनमि'त्यादिना नमस्कृत्य वक्ष्यमाणार्थस्यानेकोपनिषत्सिद्धता वेदसिद्धान्तता चोक्ता।

**[5]'ध्येयं पुण्यात्मनां नित्यमिदं वेदार्थनिश्चितम्।**
**अनेकारण्यसंयुक्तं सेवन्ते नित्यमीदृशम्॥'**

[6]'**मुनयोवेदनिलया नारदाद्यास्तपोबलाः।**' इत्यनेनास्याख्यानस्य वेदवेदान्तोपबृंहणत्वमाविष्कृतम्। अनन्तरं च भगवता गन्तव्यत्वेन सङ्कल्पितबदर्याश्रमवर्णने [7]'मुनिभिर्वेदतत्त्वार्थविचारनिपुणैस्सदा', [8]'इदमेकमिदं तत्त्वमिति निश्चितमानसैरि'त्यादिना वक्ष्यमाणस्य बदर्याश्रमवासिनामाचारस्य प्रमाणत्वार्थं मुनीनामाप्ततमत्वमुक्तम्। अथ

**[9]'वेदविद्याव्रतस्नाता निराहारा महातपाः।**
**स्मरन्तस्सर्वदा विष्णुं तद्भक्तास्तत्परायणाः॥'**

1. श्वे.उ.5.6
2. महा.आश्व.अध्या.92.पुट-1009
3. ह.पु.3.73.8
4. ह.पु.3.73.11
5. ह.पु.3.73.14
6. ह.पु.3.73.15
7. ह.पु.3.73.42
8. ह.पु.3.73.43
9. ह.पु.3.77.4

**[1]'आसन्नमुक्तयः केचित् विष्णुध्यानैकतत्पराः।**
**ध्यानेन मनसा विष्णुं दृष्टवन्तस्तपोधनाः॥'**

इति मोक्षार्थं विष्ण्वेकध्यानाचारस्तेषामुक्तः। अनेन 'कारणं तु ध्येयः', [2]'ततस्तु तं पश्यति निष्कलं ध्यायमान' इत्यादिश्रुतिर्विष्णुपरतयोपबृंहिता भवति। ततो घण्टाकर्णवचने—

**[3]'विष्णुः सर्वेश्वरः साक्षात् द्रष्टव्यो हरिरव्ययः।'**
**[4]'लोकानां प्रभवः पाता कर्ता हर्ता जगत्पतिः।**
**आदिरादेस्समस्तस्य प्रभवः कारणं हरिः॥'**

इति कारणानां कारणत्वं सर्वेश्वरत्वं चाथर्वशिखोक्तं हरिगतमुक्तम्। अथ

**[5]'ध्यायन् हरिं जगद्योनिं विष्णुं पीताम्बरं हरिम्।'**
**[6]'मुकुन्दमादिपुरुषमेकाकारमनामयम्।**
**नित्यशुद्धं ज्ञानगम्यं कारणं सर्वदेहिनाम्॥**
**नासिकाग्रं समालोक्य पठन् ब्रह्म सनातनम्।**
**निर्वातस्थो यथा दीपः प्रोच्चरन् प्रणवं सदा॥**
**प्रणवं वाचकं मत्वा वाच्यं ब्रह्मेति निश्चितः।**
**एकाग्रं संयतं कृत्वा चित्तं कृष्णे प्रतिष्ठितम्॥**
**विकल्परहितं चित्तं हृदि मध्ये नियोजयेत्।**
**पुण्डरीके शुभदले समावेश्य जगत्पतिम्॥**
**आस्ते सुखं महायोगी पिशिताशस्तथाभवत्।**
**त्रिशरीरं जपंस्तत्र स्मरन् विष्णुं सदामलम्॥'**

इति धनदानुशिष्टघण्टाकर्णसमाधिकथने शिवमादिपुरुषं कारणमिति पदैः [7]'शिव एको ध्येयः, [8]पुरुषदेवत्या', [9]'कारणं तु ध्येय' इति वाक्यांशं प्रत्यभिज्ञाप्य [10]'प्रणवं वाचकं

---

1. ह.पु.3.77.5
2. मु.उ.3.1.8
3. ह.पु.3.80.36
4. ह.पु.3.80.37
5. वही
6. वही
7. ह.पु.3.80.84
8. ह.पु.3.80.85-89
9. अ.शिखा.2
10. अ.शिखा.1

मत्वे'ति श्लोकेन प्रणववाच्यं परं ब्रह्म कृष्ण इति विभावितम्। अत्र 'एकाग्रमि'त्युत्तरार्धेन 'प्राणं मनसि सहकरणैर्नादान्ते परमात्मनि सम्प्रतिष्ठाप्य ध्यायीते'त्ययमंशः प्रत्यभिज्ञापितः। [1]'हृदि', 'पुण्डरीक' इत्यादिना 'शम्भुराकाशमध्ये' इत्यंशो विवृतः। [2]'सदामलमि'ति शिवशब्दार्थ उक्तः। ततः कैलासे तपश्चर्यानन्तरं समागतस्य रुद्रस्य वचनं भगवत्पारम्यविषयं दर्शयिष्यन् वैशम्पायनस्तस्य प्रमाणतमत्वमाह -

**[3]'इत्युक्त्वा पुनरादेहं याथात्म्यं दर्शयन्निव।'**
**[4]'मुनीनां श्रोतुकामानां याथात्म्यं तत्र सत्तम।**
**अञ्जलिं सम्पुटं कृत्वा विष्णुमुद्दिश्य शङ्करः॥'**
**[5]'उमया सार्धमीशानो याथात्म्यं वक्तुमैहत।'**

इति। अत्र याथात्म्यं श्रोतुकामानां मुनीनां याथात्म्यं दर्शयन्निव विष्णुमुद्दिश्याञ्जलिं सम्पुटं कृत्वा याथात्म्यं वक्तुमैह्यतेत्यन्वयः। वक्ष्यमाणं भगवतः स्वस्मात्परत्वं क्रियया दर्शन्निवेत्यर्थः। उपदेशवदर्थवादशङ्काविरहात् अनवतीर्णेन अवतारे करणेन अवतारत्वाद्देवतानमस्कारोऽभिनय इति भगवतीव वक्तुमशक्यत्त्वाच्चप्रत्यक्षेणैव निर्विचिकित्समञ्जलिना परत्वं निर्धार्यत इत्यभिप्रायेण दर्शयन्निवेत्युक्तम्। श्रोतुकामानां प्रत्यक्षदृष्टमिवाभूदिति भावः।

**[6]'हरे कुर्वति तत्रैवमञ्जलिं कुरु सत्तम॥'**
**[7]'मुनयो देवगन्धर्वास्सिद्धाश्च सह किन्नराः।**
**अञ्जलिं चक्रिरे तत्र विष्णौ देवदेवेश्वरे हरौ॥'**

इति समनन्तरश्लोके कार्यमुखेन निर्विचिकित्सनिर्धारणं स्फोरितम्। ततश्च स्तोत्रव्याजेन कारणत्वादिर्महिमा विष्णोरुक्तः। तत्राथर्वशिखास्थपुरुषपदाभिप्रायेण पुरुषसूक्तार्थोऽनुक्रान्तः। अनन्तरम् ईशानशिवशङ्करेश्वरादिशब्दानां नारायणादिनामतुल्यं भगवदभिधानत्वस्फोरणार्थं तन्निर्वचनं कृतम्। तत्र [8]'शमि धातोस्संज्ञायामि'त्यनुशिष्टस्य [9]'अश्नोतेर्वरती'ति संज्ञाधिकारस्थौणादिक-

---

1. ह.पु.3.80.88
2. ह.पु.3.80.89
3. ह.पु.3.88.14
4. ह.पु.3.88.15
5. ह.पु.3.88.16
6. ह.पु.3.88.16
7. ह.पु.3.88.17
8. पा.सू.3.2.14
9. पा.सू.7.4.72

सूत्रानुशिष्टस्य च शङ्करशब्दस्येश्वरशब्दस्य च विशिष्योपादानं भगवति रूढिख्यापनार्थम्। भगवति रूढिज्ञापनपूर्वकमन्येषामपि रुद्रवाचकानां शिवादिशब्दानाम् अथर्वशिखादिस्थानां भगवन्नामत्वमुक्तं [1]'नामानि तवे'ति श्लोके। किं बहुना, सर्वाण्यपि मन्नामानि त्वदीयान्येवेत्यर्थः। अनेन शिखास्थशिवादिशब्दो निर्वाहः कृतः। अनन्तरम् [2]'एतदेव परं वस्तु', [3]'एतदेव सदा विप्रा ध्येयं सततमानसैरि'त्यादिना [4]'ईशानं प्रध्यायितव्यमि'त्यादेरर्थ उक्तः। पुंलिङ्गेन प्रकृतस्यापि गोविन्दस्यैव तदेवेत्यादिना नपुंसकनिर्देशः,'ईशानं प्रध्यायितव्यमि'ति निर्देशानुरोधात्। [5]'हरिरेकः सदा ध्येय' इति [6]'शिव एको ध्येयः' इति वाक्यार्थ उक्तः। [7]'ओमित्येवं सदा विप्रा पठत ध्यात केशवम्', [8]'स्मरध्वं सततं विष्णुमि'त्यादिना प्रणववाच्यत्वं प्रणवध्येयत्वञ्चाथर्वशिखोक्तमुक्तम्।

**[9]'यो दधार करेणासौ कुशश्चीराजिनाम्बरम्।'**
**[10]'दधार दोर्भ्यां यस्तस्मै तुभ्यं ब्रह्मात्मने नमः।**
**सर्वान् संहरते यस्तु संहारे विश्वधृक् सदा॥**
**क्रोधात्मा विश्वरूपोऽसि तुभ्यं रुद्रात्मने नमः।**
**सृष्टौ सृष्टौ समस्तानां प्राणिनां प्राणदायिने॥'**
**[11]'अजाय विष्णवे तुभ्यं स्त्रष्ट्रे विश्वसृजे नमः।'**

इति श्लोकेषु 'ब्रह्मविष्णुरुद्रेन्द्रा' इत्यत्र विष्णुप्रसूतिरवताररूपेति ख्यापितम्। तत्र 'ब्रह्मात्मने रुद्रात्मन' इति ब्रह्मरुद्रयोः तच्छरीरतोक्ता।'विष्ण्वात्मन' इत्यनुक्तेर्विष्णुः। स्वरूपत एव त्रिमूर्तिकारणाभिन्न इति स्फुटम्। 'सृष्टौ सृष्टावि'ति वीप्सया च एकस्यैव रक्षितुस्सर्वसृष्टिषु 'प्राणदायि' शब्दविवक्षितरक्षकत्वेनानुवृत्तिद्योतनात् ब्रह्मरुद्रयोस्तदभावेन तद्वैषम्यात् त्रितयकारणस्य विष्णोः स्वरूपाभेदस्य विवक्षितत्वाच्चावतारताविष्कृता। एवमथर्वशिखाया भगवत्परत्वात् न

1. ह.पु.3.88.61
2. ह.पु.3.89.2
3. ह.पु.3.89.3
4. अ.शिखा.2
5. ह.पु.3.89.8
6. अ.शिखा.2
7. ह.पु.3.89.9
8. ह.पु.3.89.12
9. ह.पु.3.90.5
10. ह.पु.3.90.6-7
11. ह.पु.3.90.8

ततस्तदुत्तीर्णसिद्धिः। भगवच्छब्दश्च भगवदभिधानतया सर्वसम्प्रतिपन्नः। अतोऽथर्वशिरसि भगवच्छब्दनिर्‌दिष्टं तुरीयं भगवानेव।

भगवत्परत्वमेव च वाक्यतात्पर्यानुगुणम्। तथाहि - [1]'देवा ह वै स्वर्गं लोकमायन्। ते रुद्रमपृच्छन् को भवानिती'ति तपस्विवेषधरं युक्तावस्थं रुद्रं दृष्ट्वा मुनिवेषदर्शनेन निर्धारणाशक्ताः पप्रच्छुरिति प्रश्नमुपक्षिप्य [2]'अहमेकः प्रथममासं वर्तामि भविष्यामि च। नान्यः कश्चिन्मत्तो व्यतिरिक्त इती'ति अहमिति भगवन्तं गृहीत्वा तत्र सार्वात्म्यं समुपदिश्य इतिशब्देन रुद्रवाक्यस्य परिसमाप्तिं ख्यापयित्वा, [3]'पुरुष एवेदं सर्वमि'ति पुरुषस्य खलु सार्वात्म्यं कथमस्येत्यपेक्षायां वामदेवन्यायं स्फोरयितुम्, [4]'सोऽन्तरादन्तरं प्राविशद्दिशश्चान्तरं स प्राविशदि'ति स आनन्दमयः प्राणमयादन्तरान्मनोमयादन्तरं विज्ञानमयं प्राविशदन्यत्रापि सर्वत्र स प्राविशदिति भगवतस्सर्वान्तरत्वमुक्तं वक्ष्यमाणसार्वात्म्यव्यवहारहेतुतयोक्त्वा पुनरपि [5]'सोऽहं नित्यानित्यः' इत्यारभ्य 'स्वेन तेजसे'त्यन्तेन रुद्रवाक्यमुपन्यस्यते। 'देवा रुद्रं नापश्यन्नि'ति यथापूर्वं स्वातन्त्र्येण दर्शनाभावमुक्त्वा 'ते देवा रुद्रं ध्यायन्ती'ति यथोपदेशं भगवतात्मकतया ध्यानमुक्त्वा [6]'ते देवा रुद्रं स्तुवन्ति - 'यो वै रुद्रस्स भगवान् यश्च ब्रह्मा तस्मै नमो नम' इति, 'यो रुद्रस्स भगवानेव; यो ब्रह्मा सोऽपि भगवानेव। अत उभयात्मकाय भगवते नम' इत्येवं बहुपर्यायेषु भगवतो नमस्कार उक्तः। तपस्वित्वञ्च 'सोऽपि त्र्यम्बकः मामृचमुद्गायन्नुद्ग्रथितजटाकलापः प्रत्यक्ज्योतिषात्मन्येव आरमतारमते'ति तापनीयवाक्यसिद्धम्। रुद्रपदस्य परमात्मपरत्वेऽपि प्रतिपर्यायं रुद्रविशेषणोपादानात् रुद्रं स्तुवन्तीत्युक्तम्। अत्र एवमितिकरणं स्वस्थान एव योजितम्। कृत्स्नरुद्रवाक्यसमाप्तावितिकरणं योज्यमित्यप्याहुः। तदानीं [7]'सोऽन्तरादि'ति वाक्यमपि रुद्रस्यैव। भगवत्सार्वात्म्यमेव मया व्यपदिश्यत इति भावः। अस्यां योजनायां [8]'सोऽहं नित्य' इत्यत्र 'स' इति निर्देशः स्वरसो भवति। 'प्राविशदि'ति स्वेनैवोक्तं 'स' इति परामृश्य 'स परमात्मैवाहञ्च नित्यश्चानित्यश्चे'त्येवं 'स' इति निर्देशः सफलो भवति। पक्षान्तरे तु पूर्वमहमेवेति वाक्यनिर्दिष्टस्य स्वस्य स इति परामर्शः स्यात्। तदा न किञ्चित्प्रयोजनम्। यदि 'स' इति

1. अ.शिर.1
2. अ.शिर.1
3. श्वे.उ.3.15
4. अ.शिर.1
5. अ.शिर.1
6. अ.शिर.1
7. अ.शिर.1
8. अ.शिर.1

भगवन्तमेव परामृश्य 'स एवाहं च नित्यश्चे'त्येवमर्थः पक्षान्तर इवोच्येत, तदा साफल्यमस्त्येव। प्रकृतस्यापि प्रसिद्धिमूलः परामर्श इत्यास्थेयम्। स अन्तरादन्तरं परमात्मानं ज्ञातवानित्यर्थः - इत्यपि वदन्ति।

परे तु 'इति सोऽन्तरादन्तरं प्राविशदि'त्येतदुत्पाद्यकृत्स्नरुद्रवचनसमाप्त्यनन्तरं प्रक्षिप्य 'रुद्रो देवदृश्यं स्थूलरूपं विहाय सूक्ष्मरूपं प्राविशदि'त्यस्यार्थं यथेष्टं उत्प्रेक्षयन्ति। अत्र उत्पादनप्रक्षेपदोषौ स्पष्टावेव। अनन्तरादन्तरमिति कोशप्रत्यभिज्ञा स्फुटा। प्राविशदिति नामरूपव्याकरणप्रसिद्धानुप्रवेशप्रत्यभिज्ञापि स्फुटैव। दिशश्चान्तरमिति चानन्वितम्। अत उत्प्रेक्षामात्रमकिञ्चित्करमेव। [1]'यो वै रुद्रः स भगवानि'त्यत्र उक्तार्थ एव स्वरसः। भगवच्छब्दस्यापि रुद्रपरत्वे 'यो रुद्रः यश्चान्यस्ताभ्यां नम' इति वाच्यम्। तस्मादित्यनन्वितमेव। 'यो रुद्रो ब्रह्माभूदि'त्यर्थाङ्गीकारे द्वितीययत्पदासामञ्जस्यम्। 'यो रुद्रोऽभूत्ब्रह्माभूदि'त्यर्थाङ्गीकारे धर्म्यन्तरं स्वरसतो लभ्येत। पक्षद्वयेऽपि स भगवानिति तच्छब्दस्य स्वारसिकयच्छब्दप्रतिनिर्देशकत्वभङ्गः। 'यो वै रुद्रः स भगवान् तस्मै नमः। यश्च ब्रह्मा य एव च ब्रह्मा तस्मै नम' इत्यर्थः। ब्रह्मशब्दो रुद्रपर्यन्तः इत्यङ्गीकारेऽप्ययं दोषस्समानः। 'तस्मै नम' इत्यावृत्तिरधिका। सिद्धान्ते यश्च ब्रह्मा सोऽपि भगवानिति तद्भगवच्छब्दावृत्तिस्तु न दोषः। चकारेण द्योतनात्। एवं च 'यो वै''यश्चे'ति वाक्यद्वयेन नमस्कार्यताहेतुमुभयतादात्म्यमुक्त्वा 'तस्मै नम' इति तृतीयवाक्येन तादृशस्य भगवत एव नमस्कारः क्रियत इति पूर्वोक्त एवार्थः स्वरसः। एवमुक्तार्थस्येह विवक्षितत्वादेव तद्विवक्षाभावे भङ्ग्यन्तरं दृश्यते। यथा तापनीये [2]'यो वै नृसिंहो देवो भगवान् यश्च ब्रह्मा तस्मै नम' इति। अत्र पूर्वोक्तार्थस्य तात्पर्यगोचरत्वाभावेन यश्च ब्रह्मा सोऽपि भगवानेवेत्येवं वाक्यभेदस्याविवक्षिततया भगवानित्यतः प्राक् तच्छब्दाप्रयोगः। अत्र च 'यो नृसिंहो देवो भगवान् तस्मै नम' इति स्वरूपेण नमस्कृत्य 'यश्च ब्रह्मा तस्मै नम'इत्यन्तर्यामी नमस्यते। 'तस्मै नम' इत्येतदुत्तरवाक्य एवान्वितम् अव्यवधानात्। [3]'भूरादिपर्यायेषु' तत्पदलिङ्गवचनयोर्भूरादिलिङ्गवचनानुरोधित्वाच्च पूर्ववाक्ये तत्सजातीयपदाध्याहारः। अतोऽस्मिन् प्रकरणे प्रतिपर्यायमुत्तरवाक्यं तत्तदन्तर्यामिनमस्कारपरम्। अत एव [4]'या सरस्वती तस्यै नमः, या श्रीः तस्यै, या गौरी तस्यै, या प्रकृतिः तस्यै, या विद्या तस्यै, याश्चतस्रो मात्रास्ताभ्यः, ये च देवास्तेभ्यः, ये च पञ्चाग्नयस्तेभ्यः, याः सप्तव्याहृतयस्ताभ्यः, ये चाष्टौ लोकपालास्तेभ्यः, ये चाष्टौ वसवस्तेभ्यः, ये चैकादशरुद्रास्तेभ्यः, ये च द्वादशादित्यास्तेभ्यः,

---

1. अ.शिर.1
2. नृ.पू. ता.उ. 4.1
3. नृ.पू.ता.उ.21
4. नृ.पू.ता.उ.4.6.21

ये चाष्टौ ग्रहास्तेभ्यः, यानि पञ्चमहाभूतानि तेभ्य' इत्येवं विशेषणानुसारिलिङ्गवचननिर्देशः। स भगवानित्यन्वयस्याविवक्षिततया तत्तदन्तर्यामिनमस्कारस्यैव विवक्षिततत्वात्। अथर्वशिरसि तु 'सोऽपि भगवानेव, तादृशे भगवते नम' इत्यन्वयस्य विवक्षिततत्वादेव [1]'या च भूस्तस्मै, या च पृथिवी तस्मै, याश्चापस्तस्मै, यानि च नक्षत्राणि ये चाष्टौ ग्रहास्तस्मै' इति तत्तद्विशेषणातिलंघिभगवच्छब्दानुरोधिलिङ्गवचननिर्देशः। अत एव रामोपनिषन्मन्त्रेष्वपि [2]'यो वै श्रीरामचन्द्रस्स भगवानि'त्यादि वाक्येषु स इति निर्देशात् 'ये सर्वे वेदास्तस्मै नम' इत्यादिनिर्देशः। तत्राप्यथर्वशिरसि 'यो रामस्स भगवान् यश्चान्यत् सोऽपि भगवान् नारायणः। तस्मै भगवते नम' इत्यर्थः।

नन्वस्त्वेवं योजना, अथापि 'यो रुद्रस्स भगवानि'त्यत्र भगवच्छब्दे यौगिकत्वमिष्यत इति चेन्न। बाधकं विना स्वारसिकरूढिपरित्यागायोगात्। किञ्च 'यो रुद्रस्स सार्वज्ञ्यादिगुणकः यश्च ब्रह्मादिः सोऽपि सार्वज्ञ्यादिगुणक' इत्युक्तौ उभयोस्सार्वज्ञ्यमुक्तं स्यात्। उपरि चायोग्यार्थता। तस्माद्रूढ्या भगवत्परत्वमेव युक्तम्। तदेतद्रुद्रचरितं हृदये सप्रणवं सर्वात्मविशिष्टपरमात्मानुसन्धानं रुद्रेणानुष्ठितमित्यर्थः। तदेतदुपासितव्यमिति रुद्रेणोपासितं सार्वात्म्यविशिष्टं चोपासितव्यमित्यर्थः। प्रतिपर्यायं रुद्रविशेषणोपादानात् रुद्रान्तर्यामिणस्सार्वात्म्योपासनमिह विधीयते। रुद्रस्य विशेषरूपेणानुसन्धानमितरेषां तु सामान्यरूपेण। एवं रुद्रान्तर्यामितयोपासने अङ्गविशेषो विधीयते। व्रतमेतत्पाशुपतमित्येतद्वक्ष्यमाणमित्यर्थः। पाशुपतं पशुपतिनानुष्ठितम्। इदमेव व्रतं कालाग्निरुद्रोपनिषदि प्रतिपाद्यते। अतस्सापि भगवदुपासनाङ्गविधिपरतया भगवत्परैव। पञ्चमखण्डे [3]'एक एव रुद्र' इति भगवत्परतया श्वेताश्वतरे व्याख्यातम्। ईशानादिशब्दाः [4]'यस्सर्वान्लोकानि' त्यादिना योगार्थाभिधानात् तन्मुखेन भगवदभिधायकास्सन्तः तदभिधायकं प्रणवं बोधयन्ति। षष्ठे [5]'एषो ह देव' इति परमप्रकृतपुरुषपरः, न तु 'तदेतद्रुद्रचरितमि'त्यनन्तरं प्रकृतोपसर्जनरुद्रपरः। [6]'विश्वतश्चक्षुः' इत्यादिना पुरुषसूक्तार्थप्रत्यभिज्ञानादम्भसिवाक्यत्वाच्चायमेवार्थः स्थापितः। 'ईशानं पुरुषमि'तीशानशब्दः 'अधितिष्ठती'त्युक्तयोगार्थपरस्सन् पुरुषविशेषणम्। एवमथर्वशिरसो भगवत्परत्वादेवाश्वमेधिके पञ्चदशशततमेऽध्याये -

---

1. अ.शिर.1
2. रा.उ.1
3. श्वे.उ.3.2
4. श्वे.उ.3.1
5. श्वे.उ.2.16
6. श्वे.उ.3.3

[1]'अथर्वशिरसाञ्चैव नित्यमाथर्वणौ द्विजाः।
स्तुवन्ति सततं ये मां तेऽपि भागवतोत्तमाः॥'

इति श्रूयते। तस्मात् तुरीयो भगवानेव। एवं त्वदुदाहृतोपनिषद्भिरेव भगवतस्तुरीयत्वमुपपादितम्। यथा सुबालोपनिषदि नवमखण्डे [2]'तुरीयमेवाप्येति यस्तुरीयमेवास्तमेति तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येती'ति त्रयोदशधा भगवांस्तुरीय इत्युपदिष्टः। तदिति तुरीयं परामृश्य तत्सामानाधिकरण्येनानन्त उपदिष्टः। मुनयोऽपि तुरीयो भगवानेवेत्युपबृंहयन्तीति अस्मदीये 'परिकरविजये'[3] स्पष्टम्। एवं भगवत एव तुरीयत्वात्तस्यैव च दहराकाशत्वान्न तदतिरिक्तं ब्रह्मेति।

कैवल्योपनिषदि च हृदये भगवदुपासनमेवोच्यते। तथाहि [4]'परात्परं पुरुषं याति विद्वानि'ति पृष्टत्वात् भगवद्वेदनमेव पृष्टमित्यवगतम्। उत्तरे [5]'अणोरणीयानि'त्यनुवाकवाक्यैर्भगवान् प्रत्यभिज्ञापितः। तथा अनन्तामृतब्रह्मयोनिपदैरपि। ब्रह्मणो योनिर्ब्रह्मयोनिः। 'अद्भुतमि'त्यनन्तरं विचिन्त्येत्यनुषङ्गः। तथेत्यनेन('तम्' इत्यनेन?) तथावगमात्। अन्यथा तथेति('तम्' इति?) वैयर्थ्यात्। [6]'उमासहायमि'त्यङ्गभूतध्यानविधिः। अत एव नारायणोपनिषदि -

रुद्रं तु सारथिं कृत्वा मनःप्रग्रहवान्पुमान्।
स याति परमं पारं विष्ण्वाख्यं परमं पदम्॥'

इति श्रूयते। उमासहायं ध्यात्वाद्भुतं पुरुषं विचिन्त्य गच्छतीति योजना। प्रश्नानुसारात् पुरुषो विशेष्यतया लभ्यते। स ब्रह्मेति च भगवान् प्रत्यभिज्ञापितः। 'नान्यः पन्था' इति च 'अणोरणीयानि'ति चाङ्गभूतरुद्रध्यानस्याङ्गमन्त्रं विदधाति। 'यः शतरुद्रीयमि'ति मन्त्राङ्गक-रुद्रध्यानफलमङ्गे विदधाति 'अनेन ज्ञानमाप्नोती'ति। एवं पुरुषानन्तब्रह्मयोनिपदोपक्रमतथा(तं?) शब्दप्रत्यभिज्ञासनातनशब्दैरियमुपनिषद्भगवदुपासनपरा। एवं दहरविद्या भगवदेकान्तेति स्थितम्। तत्राधिकारवाक्ये [7]'य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामानि'ति धर्म्युपासनस्याप्यनुवादादुत्पत्तिवाक्ये तद्विधेरावश्यकतया [8]'तस्मिन् यदन्तः' इत्यत्र तच्छब्देन दहराकाशस्य तदन्तर्वर्तिनश्च परामर्शः।

---

1. महा.आश्व.अध्या.72.पुट-1076
2. सु.उ.9
3. परिकरविजयः – वेदान्तविजयग्रन्थकर्त्रा महाचार्येण विरचितोऽयं ग्रन्थः ।
4. कै.उ.1
5. कै.उ.30
6. कै.उ.7
7. छा.उ.8.1.6
8. छा.उ.8.1.1

ननु कथं नपुंसकेनाकाश इति पुंलिङ्गान्तनिर्दिष्टस्य परामर्शः। कथञ्चैकवचनान्तेन द्वयोः। [1]'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामि'ति नपुंसकैकशेषैकवचनेन परत्वेन [2]'त्यदादीनि सर्वैर्नित्यमि'त्यस्यैव प्रवृत्तेः। न च तत एवैकशेषोऽस्त्विति वाच्यम्, एकवचनस्य तेनासिद्धेः। न च त्यदाद्येकशेषस्थलेऽपि नपुंसकशेषसिद्ध्यर्थं 'नपुंसकमनपुंसकेन' इति सूत्रं प्रवर्तत इति वाच्यम्, परेण बाधाभावस्य निवृत्तादन्यतरशेषे कामचारात्। त्यादादितश्शेषे पुंनपुंसकतो लिङ्गवचनानि भवन्तीति 'त्यदादि'सूत्रस्थवार्तिकेन पुंलिङ्गनियमसिद्धेश्च।

न च तत्रैव वचनग्रहणादेकवचनस्यापि सिद्धेः 'त्यदादि'सूत्रेणैव एकशेषोऽस्त्विति वाच्यम्, वचनग्रहणस्य सम्पातायातत्वात्। नहि वचनविशेषानुपादानेन वचनग्रहणं कञ्चनार्थं विधातुं शक्नोतीति,

उच्यते। अनेन वार्तिकेन त्यादादिसूत्रविषयेऽपि नपुंसकसूत्रप्रवृत्त्यवगमादिष्टसिद्धिः। कथमस्य वार्तिकस्य तज्ज्ञापकत्वमुच्यते। न तावदिदं वार्तिकं विधायकम्। तादात्म्यबाधितश्शेषे तत्सूत्रविषये यत् पुंलिङ्गं ततो लिङ्गं वचनञ्च भवति। सूत्रविषये यन्नपुंसकं ततो लिङ्गं वचनञ्च भवति। तथा च सा च देवदत्तौ च ते, स च कुण्डले च तानीत्यत्र द्विवचनमपि प्राप्नोति। स च कुण्डले च तदिति रूपं तद्दर्शनीयमिति तत्समानाधिकरणसुबन्तस्य तत्तिष्ठतीति तिङन्तस्य चैकवचनं न सिध्यति। तस्मादिदं वार्तिकं न विधायकम्। किन्त्वनुवादरूपम्। स त्यदादिविषयेऽपि 'पुमान्स्त्रिये'त्यस्य 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामि'त्यस्य च प्रवृत्तिं ज्ञापयति। एवञ्चानिष्टं न प्राप्नोति, इष्टं च प्राप्नोति। अर्थस्यैकवद्भावस्य एकवदिति विधानात् समानाधिकरण-सुबन्ततिङ्गन्तयोरेकवचनसिद्धिः।

ननु यदिस च कुण्डले च तदिति रूपमिष्टं स्यात् तदा तत्सिद्ध्यर्थं वचनग्रहणस्यैवं व्याख्यानं स्यात्। तदेव कुत इति चेत्, वचनग्रहणसामर्थ्यात्। अन्यथा हि वचनग्रहणमनर्थकं स्यात्। सूचितश्चायं प्रयोग इष्ट इति 'लिङ्गभेदाविवक्षायां लिङ्गसामान्यं नपुंसकलिङ्गं विवक्षितम्। तत्र सामान्यविवक्षायामेकवचनं व्यक्तिविवक्षायां द्विवचनबहुवचने इति' इति प्रत्याचक्षाणेन भाष्यकारेण। एतदभिप्रेत्यानुगृहीतमाचार्यैः 'त्यदादीनीति सर्वैर्नित्यमिति पुंलिङ्गनपुंसकलिङ्गवच्छ-ब्दयोरेकशेषः। 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामि'ति नपुंसकमेकवचनान्तत्वं वे'ति। अथवा मण्डूकप्लुत्या नपुंसकसूत्रानुवृत्त्या तद्विशिष्टत्यदादिसूत्रेण नपुंसकैकशेषैकवद्भावो विधीयत इति वार्तिकाभिप्रायः। तदा त्यदादिसूत्रेणानिर्धारितैकशेषः। तदनुवृत्तेन नपुंसकसूत्रेणैकवदित्या-चार्याभिप्रायः। मध्यसूत्रद्वये अन्यतरस्यामित्यस्य नानुवृत्तिः। किन्तूत्तरसूत्रे नित्यग्रहणान्मध्यसूत्रद्वयेऽ-

1. पा.सू.1.2.69
2. पा.सू.1.2.72

प्येकशेषविधानं विकल्पेनैवेति सूच्यते। यद्वा नपुंसकसूत्रेऽस्येति ग्रहणादनेन वान्येन वा यद्यन्नपुंसकमनपुंसकसन्निपातेन शिष्यते अस्यार्थ एकवद्भवतीत्यवगम्यते।

नन्वेतत्सूत्रविहितैकशेषस्थले एवैकवद्भाव इति ज्ञापनार्थमस्य ग्रहणमिति चेन्न। सन्नियोगशिष्टत्वादेव तल्लाभात्। नन्वर्थग्रहणार्थमस्य ग्रहणम्, अस्येत्युक्त्यास्यार्थ एकवदिति गम्यत इति चेन्न। 'मन्यतेरुत्तम एकवच्चे'त्यत्रैव सामर्थ्यादेवार्थविषयत्वलाभात्। एकवदित्यस्य शब्देनानन्वयात्। नहि शब्दस्यैकवद्भावविधानेन किञ्चित्प्रयोजनं लभ्यते। न चैकस्यैव सतस्तद्भावो विधातव्यः। अत एकवचनं भवतीति वक्तव्ये एकवद्भवतीत्युक्तेरर्थात् अर्थस्यैवायमेकवद्भाव इत्यवगम्यते। अस्मिन् पक्षे आचार्यसूक्तेरेवमर्थः - नपुंसकमनपुंसकेनेत्यादितत्सूत्रार्थस्य सत्त्वान्नपुंसकत्वमेकत्वं चेत्यर्थः। एकवचनसिद्ध्यर्थं नपुंसकान्तत्वोक्तिः। नपुंसकशेषे सति ह्येकवद्भावः।न च तावन्मात्रेणापि तत्सिद्धिः कुण्डलानीति सरूपैकशेषेऽपि तत्प्रसङ्गात्। (अतः ?) 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामि'त्युक्तम्। नपुंसकानपुंसकसन्निपातेन नपुंसकशेषस्य तदधीनैकवद्भावस्यापि सत्त्वात् नपुंसकान्तत्वमेकवचनान्तत्वं चेत्युक्तं भवति। अथवा स्वरितासञ्ज्ञेन 'अन्यतरस्यामि'त्येतदनुवृत्त्या सूत्रत्रयेऽप्यन्वेति। इतरांशस्तु वचनग्रहणमहिम्ना मण्डूकप्लुत्या तृतीयसूत्रेऽनुवर्तते। मध्यसूत्रद्वयेऽन्यतरस्यामित्यस्यैकशेषेणान्वयात्। तृतीयसूत्रेऽपि तथान्वयप्रसङ्गात्तद्व्यावर्तनार्थं नित्यग्रहणम्। 'नित्यग्रहणैकशेषाद्व्यावृत्तमन्यतरस्यामि'त्येतत् प्रतिसम्बन्धिनमाकाङ्क्षमाणं पूर्वसम्बन्धिनैकवद्भावेनैवान्वेतीत्यन्वेष्टव्यपदे नपुंसकसूत्रेणैकशेषो नपुंसकत्वमेकत्वं च तदनुरोधाद्यत्तच्छब्दयोरित्यप्याहुः।

दहराकाशविषयशाण्डिल्यविद्याप्येतद्विद्यासमानशीलतया भगवत्परा। [1]'दह्रं विपाप्मं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम्। तत्रापि दह्रं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम्' इत्यपि भगवत एव हृदयान्तर्वर्तित्वमुपदिशति। [2]'यद्वेदादो स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।तस्य प्रकृतिलीनस्य यः परः स महेश्वर' इत्युत्तरवाक्यानुसारात्। [3]'तस्मिन्यदन्तः' इति किमुच्यत इत्याकाङ्क्षायां तदुपासनाङ्गमन्त्रप्रतिपाद्यत्वमुखेन देवतानिर्धारणं क्रियते। तत्र च प्रणवप्रतिपाद्यत्वमात्रोक्तौ ब्रह्मपदेनेव न देवतानिर्धारणसिद्धिरिति भगवति प्रसिद्धेनाकारवाच्यत्वेन देवतानिर्धारणं क्रियते। तत्राप्युपासनाङ्गभूतप्रणवप्रतिपाद्यत्वोपदेशायेत्थं सन्निवेशः। [4]'अणोरणीयान् महतो महीयान्', [5]'महो देव' इत्यादिना महेश्वरत्वस्य प्राप्तत्वान्महेश्वरः को देव इति

1. म.ना.उ.10.7
2. म.ना.उ.10.8
3. छा.उ.8.1
4. म.ना.उ.8.3
5. म.ना.उ.10.1

देवतानिर्धारणाकाङ्क्षायां महेश्वर इत्यनूद्य, तत्र 'यतो वे'त्यादिवाक्ये प्रकृतब्रह्मानुवादेन प्रसिद्धकारणाभेदविधानेन जगत्कारणं ब्रह्मेति ब्रह्मनिर्धारणवत् प्रसिद्धकारणवाच्याभेदविधानेन देवतानिर्धारणं क्रियते। आकाशस्यान्यत्र योगेऽपि योगात् रूढिस्वारस्यं सुप्रसिद्धम्। योगस्वारस्यमपि त्रिमूर्तिषु भगवत एव रक्षणाधिकारात्। 'विष्णुर्मन्वादयः काल' इति रक्षणमात्रस्य भगवत्कार्यत्वस्मरणाच्च। न हि पालनसामर्थ्यमृते सर्वेश्वरं हरिमिति च वैदिकानां सुप्रसिद्धमेव। रक्षणेति धातूत्पन्नश्चायमकारः। 'पर' इत्यन्तेनानूद्य तस्मिन् प्रसिद्धं महेश्वराभेदविधानं किं न स्यात्। तदर्थस्याप्रकृतत्वान्न स्यात्। नहि प्रकृतानुवादसम्भवे दूरभावसंयुक्तम्। प्रसिद्धाभेदविधाने यत्पदान्वितपदोपस्थापिताभेदविधानस्वारस्याच्च, यथा 'यतो वे'त्यादिना।

ननूपक्रमे [1]'महिमानमीशमि'ति पदं श्रूयते। किं तेन रुद्रोऽभिधीयते उतान्यः। आद्ये उपक्रम एव देवतानिर्धारणसिद्धेर्न पुनर्निर्धारणापेक्षा। द्वितीये कथमस्वारस्यपरिहार इति,

उच्यते। 'ईश'शब्दस्य सर्वेश्वरे स्वारस्यमिह तेन तदभिधानञ्चावयोः सम्प्रतिपन्नम्। अतो नेशशब्दस्वारस्यबलाद्देवतानिर्धारणसम्भवः। नापि [2]'यो देवानां प्रथममि'ति मन्त्रेण, अस्य प्रकरणप्रतिपाद्यपरतत्त्ववस्तुत्यभ्यर्थनात्मकस्य मन्त्रस्य प्राकरणिकप्रधानार्थनिर्धारणासामर्थ्यात्। वस्तुतस्तु 'सारथिं कृत्वा योऽस्मि हरेस्मृता' इत्युक्तरीत्यास्य मन्त्रस्य भगवत्स्मृत्यभ्यर्थनात्मकतया अनेन प्रधानेन मन्त्रेण भगवन्निर्धारणसिद्धिः। यद्यपि [3]'तेनेदं पूर्ण'मित्येव देवता निर्धारिता, तथापि पुरुषशब्दस्य साधारण्यप्रसिद्ध्या मन्दप्रतिभानुजिघृक्षयेदं निर्धारणमिति मन्तव्यम्। प्रणवस्य तावद्वेदाद्यन्तयोरनूद्य ध्येयत्वं वैदिकानां सुप्रसिद्धम्,

**[4]'ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा।**
**स्रवत्यनोंकृतम् पूर्वं परस्तात्तु विशीर्यत॥'**

इति मनुस्मृतेः। तदिदमाह- [5]'यद्वेदादावि'ति।'तस्य प्रकृतिलीनस्ये'ति -'अकारो वै सर्वा वागि'त्याद्यर्थवादनिर्देशमभिप्रेत्यात्र प्रकृतिशब्देनाकार उच्यते 'मृद्घट' इतिवत्।'अकारो वै सर्वा वागि'ति उपादानोपादेयभावप्रतीतेर्लयोऽपि तत्रैव वक्तुं योग्य इति लयस्थानत्वमुत्प्रेक्ष्य 'प्रकृतिलीनस्य' इत्यभेदोपचारेणोच्यते। परः - प्रधानः। अर्थप्रतिपादनार्थो हि शब्दः। 'गावो वा एतत्सत्रमासत' इत्यर्थवादानुसारात् गावामयनमिति व्यपदेशवदिहाप्यर्थवादानुसारेण प्रकृतिव्यपदेशो

1. म.ना.उ.8.3
2. म.ना.उ.10.3
3. म.ना.उ.10.4
4. म.स्मृ.2.74
5. म.ना.उ.10.8

युक्त एव। यद्यपि भागवते [1]'समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः। हृदयाकाशादभून्नाद' इति नादरूपार्थमात्रं प्रकृत्य [2]'ततो हि त्रिवृदोङ्कार' इति तस्य प्रकृतित्वं कण्ठरवेणावगतम्, तथापि तत् प्रणवं प्रत्येव, न तु स्वरं प्रति। प्रणवश्च समकारः तु न स्वरमात्रम्। अतो व्यञ्जनान्तसमुदायं प्रत्येव नादस्योपादनत्वान्न तस्य स्वरोपादानत्वम्। 'अकारो वै सर्वा वागि'ति तु सर्ववर्णोपादानत्वावगमात् स्वरं प्रत्यप्युपादानमेवाकार इति श्रुतिमर्यादानुरोधात् 'अकारस्य स्वरानन्यान् हलश्चापि ससर्ज हे'ति वाराहवचनाच्चेत्थं प्रकृतिपदं व्याख्यातम्। अनुशासनानुरोधात् प्रकृतिपदं स्थानिपरमित्यपि वदन्ति। अकारोकारयोरेकादेशौकारस्थानित्वावधारणार्थस्योकारस्याकारोपसर्जनत्वेनार्थबलात् स्थानिरूपमापन्नस्येत्युपचर्यते। तत्र प्रकृतिपदेन प्राधान्यादकारस्यैव वा प्रकृतित्वाविशेषादकारोकारयोरेकादेशाकारस्थानित्वावधारणार्थस्योकारयोर्वा ग्रहणम्। समुदायस्य सावधारणार्थपरतया भगवानेव समुदायप्रधानः।

प्रकरणानुगुणञ्च भगवत्परत्वम्। 'अम्भसीति' पूर्वत्र, उत्तरत्र [3]'ऋतं सत्यं' इति नारायणानुवाके च भगवत एव प्रकृतत्वात् अयं चानुवाको भगवत्परः। उत्तरतापनीये [4]'अणोरणीयांसमिममात्मानमोंकारं नो व्याचक्ष्वे'ति नृसिंहेप्रयोगादात्मवाचकत्वादभेदोपचारःप्रणवे। अयञ्चानुवाकः शङ्खलिखितेन भगवत्परतयोपबृंहितः।

**[5]'अशब्दमस्पर्शरसमरूपं गन्धवर्जितम्।'**
**[6]'निर्दुःखमसुखं शुद्धं तद्विष्णोः परमं पदम्।'**
**[7]'अणोरणीयान् महतोमहीयानात्मा गुहायां निहितोऽस्य जन्तोः।**
**तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्॥'**
**'एष देवस्तु मर्त्यानां पदैरिव विधीयते।'**
**[8]'एष वै पुरुषो विष्णुर्व्यक्तोऽव्यक्तः सनातनः।'** इति।

इदं चोपबृंहितं पाद्मे—

---

1. भा.पु.12.6.37
2. भा.पु.12.6.38-39
3. म.ना.उ.8.5
4. नृ.उ.ता.उ.1
5. शं.स्मृ.7.29
6. शं.स्मृ.7.30
7. शं.स्मृ.7.19
8. शं.स्मृ.7.21

**[3]'यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।**
**परः( तस्य ? ) प्रकृतिलीनस्य यः परस्स महेश्वरः॥'**
**[4]'योऽसावकारो वाच्यो विष्णुर्नारायणो हरिः।**
**स एव पुरुषो नित्यः परमात्मा महेश्वरः॥'**
**[5]'तस्यांशभूतमैश्वर्यं यस्मिन् कस्मिन् हि वर्तते।**
**तस्मिन्नीश्वरशब्दादिः प्रोच्यते मुनिभिस्तथा।**
**निरुपाधीश्वरत्वं तु वासुदेवे प्रतिष्ठितम्।'**
**[6]'आत्मेश्वर इति प्रोक्तो वेदवादैस्सनातनैः।**
**तस्मान्महेश्वरत्वं तु वासुदेवे प्रतिष्ठितम्॥**
**असौ त्रिपाद्विभूतेस्तु लीलया अपि चेश्वरः।**
**बिभ्रति द्वयमैश्वर्यं तस्यैव सकलात्मनः॥**
**श्रीभूनीलापतिर्योऽसावीश्वरस्समुदाहृतः।**
**तस्मात्सर्वेश्वरत्वं तु वासुदेवे प्रतिष्ठितम्॥'** इत्यादि।

यदाह कश्चित् - प्रणववेदान्तप्रतिपाद्यं यद्ब्रह्म तस्य प्रकृतावविद्यायां प्रतिबिम्बितस्य प्रकृतिविशिष्टस्य भोक्तुः प्रधानः तदुभयनियन्तृत्वादिति तन्न। उपाधिमाहात्म्यात् भेदारोपेऽपि नियमनासम्भवात्। स्वाभाविकाभेदान्निर्विशेषस्य च कथं नियमनम्। तदभावे च कथं महेश्वरत्वम्। निर्विशेषादन्यदेव किञ्चित् बिम्बस्थानीयं सविशेषमिति दुर्वचनम्। तस्यैव प्रतिबिम्बितत्वे प्रतिबिम्बस्यापि सार्वज्ञ्यनियन्तृत्वादिप्रसङ्गात्। चिन्मात्रस्य प्रतिबिम्बितत्वे तस्यैव बिम्बत्वान्न बिम्बस्थानीयं सविशेषं किञ्चित् सिध्यति। विस्तरस्तु अद्वैतविद्याविजये द्रष्टव्यः।

किञ्चैवं प्रणववेदप्रतिपाद्यस्यैव महेश्वरत्वोपदेशसम्भवे प्रकृतिलीनस्येति वक्रमार्गेणोपदेशस्य न किञ्चित् प्रयोजनं पश्यामः। प्रणवसङ्कीर्तनमपि ब्रह्मोपस्थापनमन्त्रार्थत्वान्नातीव सप्रयोजनम्।

यच्चार्थान्तरमुन्नीतम् 'अग्निमीळे पुरोहितम्','योनिस्समुद्रो बन्धुः','समानं परमि'त्यत्रोपान्त्यः, ततः परं स्वराभावेन तस्यैवान्त्यस्वरत्वात्, 'तस्य प्रकृतिलीनस्य' - प्रकृतिर्विष्णुः, 'वासुदेवः परा प्रकृतिरि'ति श्रुतेः, तस्मिन् लीनस्य वाच्यवाचकाभेदेनाभेदं प्राप्तस्य तस्य 'यः परः' - वेदाद्यन्तावगमिताभ्यर्हितभावस्य प्रकृतिरूपस्य विष्णोः 'यः परः' प्रधानभूतः परमात्मा 'स महेश्वरः' स महानीश्वर इति। अथवा अस्य मन्त्रस्य यजुर्वेदपठितत्वात् वेदो - यजुर्वेदः,

3. पा.पु.226.70
4. पा.पु.226.71
5. पा.पु.226.72
6. पा.पु.226.73-75

तस्यादौ पठितः स्वर इकारः'इषेत्वे'ति, स एव तदन्तेऽपि प्रतिष्ठितः एव पश्यतीति, तस्य प्रकृतिर्लक्ष्मीः,'तत्र श्रीरभवद्देवी'त्युपक्रम्य 'मूलप्रकृतिरव्यये'ति कौर्मे प्रयोगात्। तस्यां वाच्यवाचकभावेन लग्नस्य ईकारस्य लक्ष्मीनामत्वाद्देव्यवस्थां प्राप्तस्येति यावत्। तस्य यः परः पञ्चमीविषये षष्ठी। तस्माद्यः पर उत्तरो वर्ण उकारस्स महेश्वरस्तद्वाच्यश्शिवस्सर्वेश्वर इति। तत्र नाद्यः, स्वरस्यान्तप्रतिष्ठितत्वाभावात्। समानं परमित्यत्र मकार एव ह्यन्तप्रतिष्ठितः। अक्ष्वन्तत्वेऽपि वेदान्तत्वासिद्धेः। न ह्यत्र अचोऽन्त्यादिवत् सजातीयनिर्देशः कृतः। तस्य प्रकृतिलीनस्येत्यत्र प्रकृतिरित्यर्थ एव, अर्थार्थत्वाच्छब्दप्रयोगस्य। तस्मादकारार्थस्यैव महेश्वरता सिध्यतीति किमनिष्टम्। 'वासुदेवः परा प्रकृतिरि'ति च वासुदेवस्य प्रकृतिशब्दवाच्यत्वं न विधीयते, किन्तूपादानत्वम्। अन्यथा परशब्दवैयर्थ्यात्। उपादानत्वे च परशब्दः प्रकर्षपरः। प्रकर्षश्च स्वेच्छाधीनपरिमाणावत्त्वं स्वरूपास्पर्शश्च। न द्वितीयः, लक्ष्मीवाचकस्येकारस्य वेदाद्यन्तयोः प्रतिष्ठितत्वासिद्धेः। अत्रोदाहृतानामनुदाहृतानां चोपनिषदां स्वारसिकपदवाक्ययोजनानुगुणं तात्पर्यरहस्यं मदीयउपनिषन्मङ्गलदीपिकायां द्रष्टव्यम्।

**॥ इति देवतान्तरस्य दहरविद्यावेद्यत्वभङ्गः॥**

**श्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये ब्रह्मविद्याविजयः द्वितीयः समाप्तः॥**

**वाधूलश्रीनिवासार्यतनयं विनयाधिकम्। प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम्॥**
**चण्डमारुतवेदान्तविजयादिस्वसूक्तिभिः। वेदान्तरक्षकायास्तु महाचार्याय मङ्गलम्॥**

## श्रीदोड्डयाचार्यापरनामधेयश्रीमहाचार्यविरचिते वेदान्तविजये

# 3

# सद्विद्याविजयः

**वाधूलश्रीनिवासार्यतनयं विनयाधिकम्।**
**प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम्॥**
**वेद्यता ब्रह्मविद्याभिर्हरेरिति निरूपितम्।**
**तेन तत्रैव जिज्ञासा सद्विद्यालक्ष्मशोधिनी॥**

उक्तं भगवतः सर्वविद्यावेद्यत्वम्। अतः स एव जिज्ञास्यः। जिज्ञास्यलक्षणमुक्तं ''यतो वा इमानी''[1]ति। तत्र च जगत्कारणत्वं लक्षणमभिसंहितम्। तच्च सद्विद्यायां प्रतिपन्नम्। तत्र चोपोद्घातेन प्रथमखण्डेन पितापुत्राख्यायिकया प्रतिपिपादयिषितार्थः अवतार्यते। अनन्तरं षड्भिः खण्डैः प्रतिपिपादयिषितार्थः प्रतिपाद्यते। अनन्तरं च नवभिः स एवार्थः स्थाप्यते। केन सिद्धोऽयं विभागः? उच्यते, सद्विद्यान्त इव सप्तमखण्डान्तेऽपि ''तद्धास्य विजज्ञाविति विजज्ञाविती''[2]ति पित्रा पुत्रस्य उत्पिपादयिषितं ज्ञानं सम्यगेव निर्वृत्तमिति ह्यवगम्यते। न चावान्तरार्थस्य ज्ञातव्यतापरमिदमिति वक्तुं शक्यम्। पूर्वोत्तरखण्डेषु अवान्तरार्थेषु तददर्शनात्, ''उद्दालको हारुणि''[3]रिति पुनरुपदेशारम्भप्रतीतेश्च पूर्वप्रकान्त उपदेशः परिसमाप्त इत्यवगम्यते। तस्मात् प्रथमखण्डः नवखण्डी च मध्यमषट्कशेषभूतौ।

### प्रथमखण्डस्य कारणत्वावतारणपरत्वनिरूपणम्

तत्र विवक्षितार्थस्य साधिष्ठताज्ञापनार्थं पितापुत्राख्यायिकामाह ''श्वेतकेतु''रित्यादि। आरुणेयः- अरुणस्य गोत्रापत्यं पौत्र इत्यर्थः। ''उद्दालको हारुणिश्श्वेतकेतुं पुत्रमि''ति वक्ष्यते। अननूच्य – अनूक्तिः स्वाध्यायाध्ययनम्। स्वाध्यायमनधीत्येत्यर्थः। श्वेतकेतुरुपेत्येति उपनीतत्वं गम्यते। उपनयीतेति प्रयोजकव्यापारान्तर्गतप्रयोज्यव्यापारस्य उपपूर्वेणैतिना प्रत्यभिज्ञानेन गुरुकुलान्युपेत्येत्य-

1. तै.उ.1.34
2. छा.उ.6.7.5
3. छा.उ.6.8.1

वगमात्। ''महामनाः'' - कर्ममीमांसोपचितमनाः, 'अनूचानः'- अधीतवेदाङ्गः। 'स्तब्धः' - अव्यापारः। 'अलम्पटः' - परिपूर्णः। उद्दालकः पुत्रस्नेहेन ब्रह्मोपदिदिक्षुः तस्य ब्रह्मजिज्ञासामुत्पादयितुमाह- 'श्वेतकेतो' इत्यादि। 'तमादेशम्' – प्रसिध्दं नियन्तारम्। उत्तरयच्छब्दस्य तच्छब्दनिरपेक्षत्वात् तच्छब्दः प्रसिद्धिपरः। 'एतस्य वा अक्षरस्य प्रशासने गार्गि सुर्याचन्द्रमसौ विधृतौ तिष्ठतः'[1] 'यः पृथिवीमन्तरो यमयति'[2] इत्यादिषु प्रसिद्धिर्द्रष्टव्या। आदेश इति कर्तुरपि साधकतमत्वात् स्वातन्त्र्यमविवक्षित्वा साधकतमत्वविवक्षया वस्तुतः कर्तर्येव करणे घञ्, 'विवक्षातः कारकाणि भवन्ती'ति न्यायात्। कर्मणि घञङ्गीकारेण उपदेश्यपरत्वाभ्युपगमे प्रकृत्यस्वारस्यम्। 'आङ्'पूर्वस्य दिशेः प्रशासनार्थत्वात्।

किञ्च- धर्मादेरप्युपदेश्यत्वेन तस्य ब्रह्मासाधारण्यासिद्धेः, अप्राक्ष्य इत्यनेनैव उपदेश्यत्वसिद्धेश्च आदेशशब्दो व्यर्थः। किञ्च 'सदेव सोम्येदमि'[3]ति वक्ष्यमाणत्वेन नपुंसकपदान्तरनिर्देशे स्वरसेऽपि पुंलिङ्गनिर्देशः नियन्तृप्रतीत्यर्थ एव। नियन्तृपरस्य आदेशपदस्य 'एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः'[4] इत्यत्र पर्यवसानेन तत्प्रसिद्धिसापेक्षस्य निर्देशस्य पुंलिङ्गत्वोपपत्तेः।

अपि च तमादेशमिति तच्छब्दः प्रसिद्ध्यर्थ इत्युक्तमेव। नियन्तृत्वं हि बहुश उपदिश्यते न तथा उपदेश्यत्वम्। अतो नियन्तैवादेशशब्दार्थः। प्रकरणानुसारादपि नियन्तृपरत्वमेव युक्तम्।

अत्रोपादानत्वमात्रप्रतिज्ञायां –'तदैक्षत'[5], 'असृजत'[6] इत्यवक्तव्यं स्यात्। तत्तेजोऽभवादित्यादि हि वाच्यम्। अत उत्तरत्र कर्तृत्वाभिधानादिहापि तदुक्तेरपेक्षितत्वात् अपेक्षितविधानन्यायात् तदभिधानमेव युक्तम्। 'उत तमादेश'[7]मित्याक्षेपाभिप्रायम्। ब्रह्मज्ञानं हि स्तब्धताहेतुः। तदभावेऽपि सा विस्मयनीयेति भावः। 'येनाश्रुतमि'[8]ति 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विज्ञातं भवती'[9]ति मैत्रायणीयश्रुत्यनुसारात् उपादानप्रकरणानुगुण्याच्च येन श्रुतेनाश्रुतं श्रुतं भवति, येन मतेनामतं मतं भवति, येन विज्ञातेनाविज्ञातं विज्ञातं भवतीत्यर्थः। विज्ञानं निदिध्यासनम्।

---

1. बृ.उ.5.8.9
2. बृ.उ.5.7.3
3. छा.उ.6.2.1
4. सु.उ.7
5. छा.उ.6.2.3
6. छा.उ.6.2.3
7. छा.उ.6.1.3
8. छा.उ.6.1.3
9. बृ.उ.6.5.6

अश्रुतत्वं स्थूलकारणविशिष्टरूपेण, श्रुतत्वं सूक्ष्मरूपेणेति हृदयम्। आवृत्त्या ज्ञाततां दृढीकर्तुं श्रवणादित्रयमुपन्यस्तम्। इति पितोवाचेत्यन्वयः। अन्यज्ञानेनान्यस्य ज्ञातत्वासम्भवं मन्वानः पुत्रः पृच्छति 'कथमिति'। गुरुराह यथेत्यादि। अत्रापि मृत्पिण्डादेरज्ञातत्वं विवक्षितम्। रूपभेदात् नामधेयभेदाच्च कार्यद्रव्यभेदात् दृष्टान्तेऽप्यसम्भवाशङ्कां परिहरति –'वाचारम्भणमि'[1]ति। अध्ययनेन वसतीतिवत् प्रयोजनतया हेतुत्वं वाचेति विवक्षितम्। विकारग्रहणात् जलाहरणादिव्यवहारोऽप्युपलक्ष्यते। वाग्व्यवहारार्थं जलाहरणादिव्यवहारार्थं च पृथुबुध्नोदराकारादिः विकारः घटादिनामधेयं च मृत्पिण्डेन; आरम्भणम् - आरभ्यते स्पृश्यते, कर्मणि ल्युट्। तत्र प्रत्यभिज्ञायुक्तिमाह – 'मृत्तिकेत्येवे'ति। 'प्रातर्या मृत्तिकेहोपलब्धा सैवेदानीं घटादिरभूत्' इत्यबाधिता प्रत्यभिज्ञा दृश्यते। इतीति प्रत्यभिज्ञां द्योतयति -'मृत्तिकेत्येव सत्यं'मित्यन्तेन। व्यवहारानुकरणाभिलापरूपेण तद्धेतुभूता प्रत्यभिज्ञा लक्ष्यते। सत्यम्-अबाधितम्। लोहमणिः-स्वर्णपिण्डः। नखनिकृन्तनेनेति—चिकीर्षिताकारप्रागवस्थम् आकारसाम्यादुच्यते। प्रतिज्ञावाक्ये कर्तृत्वं ब्रह्मज्ञानेन कृत्स्नस्य ज्ञातत्वं च प्रतिज्ञातम्। तत्र द्वितीये शङ्का दृष्टान्तेन परिहृता। पुनर्गुरुकुलप्रस्थापनशङ्कयाऽऽह – 'न वै'[2] इति। 'मे' इति स्वकीयकुमारेभ्योऽपि निरवधिकव्यामोह-विषयत्वं सूच्यते। तत् ब्रवीत्विति दृष्टान्ते उपादानोपादेयभावात् ज्ञातता युज्यते, इह तु कथमिति भावः। एवं प्रथमखण्डेन कारणत्वमवतारितम्।

अथ कारणत्वमाह-सदेवेति। समष्टिव्यष्टिसर्गौ। व्यष्टिसर्गार्थं त्रिवृत्करणं विकारस्य नामधेयस्य च स्वपर्यन्तत्वसिद्धये नामरूपव्याकरणयोरनुप्रवेशाधीनताम्, जीवस्य कार्यत्वसिद्धये अनुप्रवेशस्य जीवद्वारकतां त्रिवृत्करणोपपत्तिं जीवस्य शरीरद्वारकसत्कार्यत्वसिद्धये शरीरस्य भूतत्रयमयत्वं सूक्ष्मनिर्गममाप्यायकत्वं चोपपाद्य विशिष्टोपादानत्वं प्रसाध्योपसंहरति षड्भिः खण्डैः।

### द्वितीयखण्डस्य समष्टिसृष्टिपरत्वनिरूपणम्

द्वितीयखण्डेन समष्टिसृष्टिमाह – सदेवेति। अप्ययपूर्वत्वात् सृष्टेः प्रथमतो लयमाह। अनेन सर्गप्रलययोः प्रवाहानादित्वं सूच्यते। तेन सतः अनादित्वसिद्ध्या सत्कार्यवादः स्थाप्यते। अन्यथा सतः स्वरूपतः कार्यत्वे कथं सत्कार्यवादः सिध्येत्। इदम् - परिदृश्यमानं चेतनाचेतनात्मकं विभक्तनामरूपं स्थूलं कार्यम् अग्रे - सर्गात् प्राचीने प्रलयकाले अद्वितीयम् - कर्त्रन्तरनिरपेक्षम्, एकम् -अविभक्तनामरूपतया कार्यावस्थानिबन्धनबहुत्वशून्यं सत् आसीदित्यर्थः। सत एव कर्तृत्वस्य कार्यरूपेण बहुवचनस्य च वक्ष्यमाणत्वात् प्रकरणानुसारेण एकाद्वितीयपदयोरर्थ

1. छा.उ.6.1.4
2. छा.उ.6.1.7

उक्तः। प्रतिज्ञायामादेशपदेन नियन्तृतयाऽवगतस्यैवोपादानत्वोक्तेः, इदमिति प्रसिद्धकार्यनिर्देशाच्च श्वेतकेतुः महामनाः सदिदमिति विशिष्टग्रहणमिति स्वयमेव ज्ञास्यतीत्यभिप्रायेण वैशिष्ट्यं न कण्ठरवेणोक्तम्। ततश्चेदं सदासीदित्यस्य स्थूलचिदचिद्विशिष्टं सूक्ष्मचिदचिद्विशिष्टमासीदिति पर्यवसितोऽर्थः। सच्छब्देन निर्देशो वादिनिराकरणार्थः।

मिथ्यावादिमतमनूद्य दूषयति –'तद्धैक'[1] इति। तत् तत्र इदमद्वितीयं कार्यशून्यम्। अत एवैकं सद्विलक्षणमज्ञानमासीत्। तस्मादसतोऽज्ञानात् प्रातिभासिकात् व्यावहारिकसत्ताशून्याद्व्या-वहारिकं सज्जायत इत्यर्थः। कथमसतः सज्जायेतेति अज्ञानस्यैवमसिद्धिः असतस्सदुत्पत्त्यसम्भवश्च विवक्षितौ। सच्छब्देन मिथ्यात्वनिरासोऽभिप्रेतः। निरासश्च अद्वैतविद्याविजये द्रष्टव्यः। 'असदेवेदमग्र आसीदि'[2]ति तन्त्रवृत्त्यन्यतरेण नैयायिकमतानुवादः 'कुतस्तु खलु सोम्ये'[3]ति तन्निरासश्चाभिप्रेतः। शून्यवादानुवादस्तु न सम्भवति। असत्त्वस्य कालविशेषानपेक्षत्वात् 'सज्जायत' इति तैरनङ्गीकारात् – न च लयः उक्तः।

अथ कर्तृत्वमुपादानत्वं चाह- 'तदैक्षते'ति। ईक्षणात् स्यामिति चोभयसिद्धिः। तत् सत् – सूक्ष्मचिदचिद्विशिष्टं ब्रह्म तेजः- तेजोऽवस्थं बहु स्याम्, 'तत्तेज ऐक्षते'ति पुर्वोत्तरानुसारात्। तस्मादित्यौचित्यद्योतनम्।

### तृतीयखण्डस्य व्यष्टिसृष्टिपरत्वनिरूपणम्

सदेवेदमासीदिति स्थूलस्य लयः उक्तः। सृष्टिरप्यस्यैव वाच्या। तत् कथंभूता सृष्टिरुच्यत इति शङ्कां परिहरन् व्यष्टिसृष्टिं तृतीयखण्डेनाह- तेषामिति। अण्डजं जीवजमुद्भिज्जमित्येतेषां विभागानां बीजानि त्रीण्येव तेजोबन्नान्येव। व्यष्टिसृष्ट्यर्थमेव भूतसृष्टिरुक्तेति भावः। व्यष्टिसृष्टिसङ्कल्पमाह-सेयमिति। ननु सत ईक्षणमनुपपन्नमचेतनत्वात्। चेतनत्वेऽपि निरुक्तेक्षणानुपपत्तिरिति शङ्कां देवताशब्देन परिहरति। सा आदेशपदेन निर्दिष्टा इयं सत्पदेन निर्दिष्टा। तिस्रो देवताः – अत्र देवताशब्देन देवताशरीरत्वात् भूतान्युच्यन्ते। नामरूपयोः स्वपर्यन्तत्वसिद्धये अनुप्रवेशकीर्तनमनुप्रेशस्य नामरूपव्याकरणार्थत्वद्योतनार्थम्। ल्यपा समानकर्तृकत्वनिर्देशः। अनुप्रवेशस्य हि तादर्थ्यं नामरूपव्याकरणयोः स्वपर्यन्तत्व एव सिद्ध्यति। जीवस्यापि कार्यत्वसिद्धये तद्द्वारकमनुप्रवेशमाह – अनेनेति। अनेन जीवेनात्मनाऽनुप्रविश्याहं नामरूपे व्याकरवाणीत्यर्थः। जीवपदं स्वपर्यन्तम्। अतः स्वपर्यायेणात्मशब्देन सामानाधिकरण्योपपत्तिः। अनेन जीवेनानुप्रवेशस्तद्द्वारकस्वानुप्रवेशश्च विवक्षितः।

---

1. छा.उ.6.2.1
2. छा.उ.6.2.1
3. छा.उ.6.2.2

**नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना।**

**नाशक्नुवन् प्रजास्स्रष्टुमसमागम्य कृत्स्नशः॥** इति

त्रिवृत्करणं विना भूतानां कार्याक्षमत्वात् नामरूपव्याकरणार्थं त्रिवृत्करणसङ्कल्पमकरोदित्याह- तासामिति। कार्यसङ्कल्पानन्तरं कारणसङ्कल्पो युक्त एव। सेयं देवतेति- अत्र पाठक्रमो न नियामकः, किन्त्वर्थस्वभाव एव। स च कार्यकरणाभाव एव; व्याकरणस्य कार्यत्वं सङ्कल्पप्राथम्यादवगतमेव। एवमनुप्रवेशकथनात् सद्वारकावस्थाश्रयतया उपादानत्वमुक्तम्। अचितः कार्यत्वमस्थाद्वारकम्। चितः कार्यत्वमस्थावद्द्वारकम्। परमचेतनस्य तदुभयद्वारकं सद्वारककारणत्ववत् सद्वारकमाश्रयत्वं चास्त्येव। खट्वायां शयनेऽपि प्रासादे शेत इत्यभिधानात्। जलपूर्णकुम्भवहने श्रमाधिक्योपलम्भाच्च उह्यमानगुरुत्वस्यैव श्रमप्रयोजकताया यथाप्रमाणमन्यत्र क्लृप्तत्वेन स्वैरमेव प्रयोजकान्तरकल्पनस्यानवकाशात्। न च भूतलस्य घटावस्थाश्रयत्वप्रसङ्गः। यथादर्शनमपृथक्सिद्धस्य स्वापृथक्सिद्धं प्रति तदपृथक्सिद्धस्यैव स्वापृथक्सिद्धं प्रति च द्वारकत्वात्। एवं च ब्रह्मणः सद्वारकवस्थाश्रयत्वान्न निर्विकारश्रुतिविरोधोऽपि। सर्वत्रापि हि निषेधो यथाप्रसक्ति। अचेतने ज्ञानं नेत्युक्ते यः सम्बन्धश्चेतने दृष्टस्तत्सम्बन्धेनाचेतनेऽपि प्रसक्तौ तेन संसर्गेण निषेधः क्रियते, लौकिकेष्वेव ज्ञानं न शास्त्रार्थेष्वित्युक्तौ लौकिकेषु दृष्टविषयविषयिभावसम्बन्धेनैव वैदिकेष्वपि प्रसक्तौ तेन संसर्गेण निषेधः क्रियते। एवमिहापि येनाद्वारकसम्बन्धेनाचेतने विकारो दृष्टस्तेनैव सम्बन्धेन निषेधः क्रियते। अन्यथा उपादानत्वसर्वाधारत्वश्रुतिविरोधात्। न चाद्वारकसंसर्गप्रतीतौ लक्षणा। प्रतियोग्यधिकरणाभावोपस्थापकपदेषु लक्षणाविरहात्। केन तर्हि तत्प्रतीतिः? प्रतियोगित्वप्रतियोगितावच्छेदकवन्निषेधकवाक्येनैव। एवं विशिष्टस्योपादानत्वमुपादेयत्वं चोक्तम्।

ननु किमिदं विशिष्टोपादानत्वम्? न तावदुभयोः, निर्विकारत्वश्रुतिविरोधात्। विकाराश्रयत्वं ह्युपादानत्वम्। अत एव न विशेष्यस्य। नापि विशेषणस्य, ब्रह्मणोऽनुपादानत्वप्रसङ्गात् इति चेन्न, उभयोपादानत्वस्यैव विवक्षितत्वात्। विशेषणं विशेषणोपादानं विशेष्यं विशेष्योपादानमित्युक्तरीत्या ब्रह्मणि विकाराश्रयताया द्वारसापेक्षत्वादपि विशिष्टोपादानत्वव्यपदेशः। एवं च इदमिति स्थूलचिदचिद्विशिष्टं ब्रह्मरूपं कार्यं निर्दिश्य सदासीदिति तस्य स्थूलावस्थाप्रहाणेन सूक्ष्मचिदचिद्विशिष्टकारणरूपता प्रतिपाद्यते। एतत्सर्वमभिप्रेत्य नामरूपव्याकरणमनुप्रवेश-प्रयोज्यमुक्तम्।

ननु अनुप्रविश्य व्याकरवाणीति अनुप्रवेशस्य सङ्कल्पविषयता प्रतीयत इति चेत्, सत्यम्, प्रतीयते। अत एव नामरूपव्याकरणप्रयोजकत्वसिद्धिः। अनुप्रवेशस्य साध्यत्वाभावेन प्रयोजकत्वविशिष्टवेषेणैव सङ्कल्पविषयतया विवक्षितत्वात्। प्रयोजकत्वं च रूपाश्रयत्वनामवाच्यत्वाभ्यामेव सिध्यति। न हि पितृकुलालयोरनुप्रवेशो नामरूपव्याकरणे

हेतुतया दृष्टः। कार्यप्रयोजकमेव हि त्रिवृत्करणमिह कीर्त्यते। अतः प्रकरणावगतं च प्रयोजकत्वम्। अन्यथा भूतसृष्ट्यनन्तरं कार्यसृष्टिं वक्तुं प्रथमतः सामान्येन कार्यत्रैविध्यमुखेन कार्यमुपक्षिप्य 'हन्ताहमिमा''[1] इत्यादिना कार्यसृष्टिं प्रतिपादयितुं प्रवृत्तस्य मध्येऽनुप्रवेशकीर्तनं स्त्रुघ्नान् गच्छतो मालवकपथान्वेषणवदसङ्गतमेव स्यात्। एवं दृष्टान्ते विकारो नामधेयं च स्पृश्यते न तु द्रव्यमुत्पद्यत इति यत् पूर्वमुक्तं तद्दार्ष्टान्तिके स्पष्टीकृतम्। एवं तृतीयखण्डेन व्यष्टिसृष्टिरूपपादिता।

### चतुर्थखण्डप्रतिपाद्यनिरूपणम्

एवं त्रिवृत्करणमन्यस्य कार्यस्याभावं च संवादयति चतुर्थखण्डेन--- 'यदग्नेरि'[2]त्यादि। अपागादिति-अग्नित्वेन पराभिमतादग्नित्वावस्थाकारणादन्यस्मादग्नित्वमपागादित्यर्थः। पूर्वोक्तामुपपत्तिं स्मारयति – 'वाचारम्भणमि'[3]ति। भूतत्रयरूपाण्येवाग्नौ प्रत्यभिज्ञायन्ते। सा च प्रत्यभिज्ञा अबाधिता रूपान्तरानुपलम्भादिति भावः। गुर्वन्तरसंवादमाह-एतद्ध स्मेति। तत्-कार्यकारणयोरनन्यत्वम्। एतत्-त्रिवृत्करणम, विद्वांस आहुरित्यर्थः। तेभ्यः सकाशादन्ये केचन इममर्थमवेदिषुरित्याह - 'पूर्वे महाशाला महाश्रोत्रियाः न नोऽद्य कश्चनाश्रुतममतमविज्ञात-मुदाहरिष्यतीति ह्येभ्यो विदाञ्चक्रुरि'[4]ति। महाशालाः-यज्वानः। महाश्रोत्रियाः - श्रुतवेदान्ताः। अविज्ञातं भूतत्रयातिरिक्तं कार्यद्रव्यम्। न कश्चिदपि - नः -अस्माकमस्मत्पुरतः उदाहर्तुं शक्नोतीति इममर्थमेभ्यः विद्वांस इति निर्दिष्टेभ्यो विदाञ्चक्रुरित्यर्थः।

### पञ्चमखण्डप्रतिपाद्यनिरूपणम्

जीवस्य शरीरद्वारकं कार्यत्वमभिप्रयन् स तस्य सत्कार्यत्वसिद्धये शरीरस्य भूतत्रयमयत्वमाह पञ्चमखण्डेन। अन्नमशितमिति-तन्म इति-आयुर्घृतमितिवद्व्यपदेशः। तेनाप्यायितमित्यर्थः। सूक्ष्मस्य सारांशस्य कथं ततो निर्गम इत्यभिप्रायेणाह- भूय इति।

### षष्ठखण्डार्थनिरूपणम्

सूक्ष्मनिर्गममुपपादयति - षष्ठखण्डेन। आप्यायकत्वमुपपादयति - सप्तमखण्डेन। षोडशेति। अभ्याहितस्येति - वह्नेरिति शेषः। एतर्हि – इदानीम् 'तद्धास्ये'ति - आचार्येण प्रतिपिपादयिषितं तमादेशमिति प्रतिज्ञातं कार्यकारणयोरनन्यत्वं कर्तुरुपादानत्वं चिदचिद्विशिष्टस्य उपादानोपादेयभावं

1. छा.उ.6.3.2
2. छा.उ.6.4.1
3. छा.उ.6.1.4
4. छा.उ.6.4.5

च विशिष्य सोपपत्तिकं कुदृष्टिनिरसनपूर्वकं ज्ञातवानित्यर्थः। हेति-कुदृष्टिनिरसनप्रयुक्तहर्षो द्योत्यते।

श्वेतकेतोः स्वेनोत्पादितां भगवतः सर्वोपादानत्वबुद्धिं वेदान्तिनः अपहरेयुरिति पुत्रस्नेहेनापायमाशङ्क्य विशिष्टोपादानत्वं सोपपत्तिकं नवकृत्वः अभ्यस्य द्रढयति-नवभिः खण्डैः। जीवस्य कार्यता द्विविधा- एका अज्ञानावस्थाद्वारिका। अपरा ज्ञानावस्थाद्वारिका। द्विविधामपि तामुपपादयत्यष्टमखण्डेन—स्वप्नान्तमिति। स्वपितीति प्रयोगप्रसिद्ध्या जीवस्य लय उच्यते। यत्र-यदा। सता सम्पन्नो भवति ज्ञानविकासरूपस्थूलावस्थाप्रहाणेन स्वामिन् लीनो भवति। यथा शकुनिरिति-प्राणो जीवः प्राणमेवाश्रयते प्राणे निर्व्यापारं तिष्ठतीत्यर्थः।

द्वितीयं कार्यत्वमुपपादयति- अशनायेत्यादिना। तत्र स्वपीतीति प्रसिद्ध्येव अशनायापिपासाप्रसिद्ध्या विवक्षितं साधयति। किं तत इत्यत्राह - 'तत्रैतदिति'[1] तत्र - अशनायावस्थायामेतत्। तत्कालीनः शारीरो विकारः। शुङ्गमङ्कुरं कारणानुमापकमित्यर्थः। तस्येति अद्भिर्नीतं क्षीणमन्नं तत्कारणमित्यर्थः। अन्नेनेति उक्तरीत्या तन्नेतृत्वात् कारणत्वाच्चेति भावः। 'सन्मूला'[2] इति यत एवं भूतत्रयात्मकत्वं शरीरस्य भूतानां च सन्मूलत्वम् अतः प्रजा भूतत्रयात्मकशरीरसंसृष्टाः सन्मूलाः सत्कार्यभूताः 'सदायतना' इति स्थितिरुक्ता, 'सत्प्रतिष्ठा' इति लयः; 'यत्रैतत्पुरुषः पिपासति नामे'[3]ति पूर्ववद्योज्यम्। जीवस्य ब्रह्मकार्यत्वसिद्धये शरीरस्य भूतत्रयात्मकत्वमुक्त्वा तदपि त्रिवृत्कृतभूतत्रयात्मकमेवेत्यभिप्रायेण त्रिवृत्करणोपपादनं स्मारयति – यथा त्विति। भूतावस्थाद्वारकं लयमुपपादयति- अस्य सोम्येति। एवमुपादानत्वमुपपद्यत एवेत्यभिप्रायेण उपसंहरति- स य इति। यस्स आदेश एषोऽणिमा सूक्ष्मावस्था; अथवा यस्स आदेशः एष सदित्युक्तः अयमणिमेत्यर्थः। ऐतदात्म्यमिदं सर्वम् एतदात्मकं सदादेशस्वरूपम् स्थूलचिदचिद्विशिष्टं ब्रह्म सूक्ष्मचिदचिद्विशिष्टब्रह्माभिन्नमित्यर्थः। कुदृष्टिभिरविचाल्यत्वाभिप्रायेणाह- तत्सत्यमिति। स्वरूपाभेदबुद्धिं वारयति स आत्मेति। तस्य अन्तर्यामित्वेन स्थूलसूक्ष्मावस्थाद्वययोगात् अयमभेदव्यपदेश इत्यर्थः। तत्त्वमसीति विशिष्टोपादानोपादेयभावे श्वेतकेतुमेव उदाहृत्य उपसंहरति दार्ढ्यार्थम्। 'स त आत्माऽन्तर्याम्यमृत'[4] इतिवत् तत् त्वमिति पदद्वयमपि परमात्मपर्यन्तम्, श्वेतकेतुपदं तु न तथा सम्बोधनत्वात्। युष्मद्युपपदत्वात् मध्यमपुरुषः। कथं तर्हि अहमनेन सम्पन्न इति सम्पत्त्यग्रहणमित्यभिप्रायेण पृच्छति भूय इति?

अग्रहणमुपपादयति नवमखण्डेन यथा सोम्येति। अमुष्याहामिति अमुष्य रसोऽपामेभिः

1. छा.उ.6.8.5
2. छा.उ.6.8.4
3. छा.उ.6.8.5
4. श.ब्रा.14.6.7.7

सङ्गतोऽस्मीति विवेको नेत्यर्थः। सामग्रीविरह एव तस्य तथा ज्ञानाभावनिबन्धनं स एवेहापीति भावः। सामग्रीसम्भावनामपि वारयितुं जडदृष्टान्तोपादानम्। त इहेति – यथा पूर्वं सुप्ताः तद्दशायामपि व्याघ्रादयो भवन्त्येव तथापि तद्रूपं न जानन्ति तद्वदिहापीति भावः। सुप्तोत्थितज्ञानं वा विवक्षितम्। तदेति सुप्तोत्थितकालः परामृश्यते। अत्रापि पक्षे स्वापकाले व्याघ्रादिरूपवदेव सत्संसर्गमपि न जानन्तीति भावः। स य एषोऽणिमेति पूर्ववत्। कथमागमनाग्रहणमिति पृच्छति – भूय इति?

तदुपपादयति दशमखण्डेन। इमास्सोम्येति। इयमहमस्मीति अस्मात्समुद्रादागताहमिति न जानन्तीत्यर्थः। स य एष इति पूर्ववत्। भूतावस्थाविशिष्टस्य लय उक्तः। तत्र जीवस्यैव कथं मरणं वदतीत्यभिप्रायेणाह- भूय इति। तदुपपादयति एकादशेन। अस्य सोम्येति स य इति पूर्ववत्। अणिम्नः कथं महत्त्वमित्यभिप्रायेणाह भूय इति। तदुपपादयति द्वादशेन। न्यग्रोधेति – यदि परमात्मा कार्यकारणानुगतः कथं तर्हि तदनुपलम्भः। अनुपलम्भे च तत्र तस्यानुगतत्वे किं मानमित्यभिप्रायेणाह – भूय इति। तदुपपादयति त्रयोदशेन। स य इति पूर्ववत्। लवणवदिह ज्ञानोपायः क इत्यभिप्रायेणाह भूय इति। तदुपपादयति चतुर्दशेन। यथा सोम्य पुरुषमिति। आचार्यवानिति। आचार्यवानुपदेशेन तं सदादेशं वेद, तद्विदो मम सत्सम्पत्तौ शरीरवियोगपर्यन्तमेव विलम्ब इत्यपि जानाति। तज्ज्ञानस्य मोक्षसाधनतया आचार्येणाभिधानादिति भावः। न विमोक्ष्य इति मोक्षतया किमभिप्रेतमित्यभिप्रायेणाह भूय इति। विवक्षितमाह पञ्चदशेन। पुरुषं सोम्येति। स य इति पूर्ववत्। इतः परमप्युपपादनीयमस्ति चेत् उपपादयेत्यभिप्रायेणाह भूय इति। इदं ब्रह्मणः कर्तृत्वं विशिष्टोपादानत्वं च तप्तपरशुग्रहणेन श्रद्धापयितव्यमित्याह- चरमखण्डेन। पुरुषं सोम्योतेति स यथेति। तथा विशिष्टोपादानवाद्यपि तच्छ्रद्धापनाय तप्तपरशुग्रहणेन श्रद्धापयितव्य इत्याह। स य इति पूर्ववत्। कर्तुः विशिष्टोपादानतया – आदेशं येनाश्रुतमित्युपक्रमः। ऐतदात्म्यमिदं सर्वं स आत्मेत्युपसंहारः तस्यैवाभ्यासः। अपूर्वत्वं प्रसिद्धम्। अथ सम्पत्स्य इति फलम्। आख्यायिका अर्थवादः। दृष्टान्तप्रदर्शनानुप्रवेश-कथनादिरुपपत्तिः।एवं षड्विधतात्पर्यलिङ्गोपेतया सद्विद्यया कर्तुः विशिष्टोपादानभावः समर्थितः। श्रुत्यन्तराण्यपि इमामेव सद्विद्यामनुरुन्धते।

### विशिष्टोपादानत्वे षड्विधतात्पर्यलिङ्गकथनम्।

असद्वा इदमग्र आसीत्- स्थूलावस्थं ब्रह्म तच्छून्यं सूक्ष्मावस्थमासीत्। अतः असतः सूक्ष्मावस्थात् इत्यर्थः।सत् स्थूलावस्थम्। कार्यकारणयोरभेदं विशिष्टोपादानत्वं कर्तृत्वं चाह- 'तदात्मानं स्वयमकुरुते'[1]ति। अनेन 'तत्तेजोऽसृजते'[2]त्यादौ तेजआदिपदानां भगवत्पर्यन्तत्वं

1. तै.उ.1.31
2. छा.उ.6.2.3

प्रख्यापितम्। तत् असत् सूक्ष्मावस्थम्। एवं 'आत्मा वा इदम्'[1], 'ब्रह्म वा इदम्'[2], 'एको ह वै नारायणः'[3], 'ब्रह्म वनं ब्रह्म स वृक्ष आसीत्। यतो द्यावापृथिवी निष्टतक्षुः'[4], 'आत्मन आकाशस्सम्भूतः'[5], 'यतो वा इमानि भूतानि जायन्ते'[6], 'तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्'[7] इत्यादिवाक्यान्यपि एतदर्थकानि?

ननु 'आत्मनः' 'यतो वा इमानि भूतानि' इत्याभ्यां कथमुपादानत्वसिद्धिः। न च पञ्चम्या तत्सिद्धिः। तस्या अनेकार्थत्वात्। अपादानार्थत्वेऽपि 'ध्रुवमपायेऽपादान'[8]मित्यपादानसंज्ञासिद्धेः 'जनिकर्तुःप्रकृति'[9]रित्यनेनापादानसंज्ञायामपि प्रकृतिग्रहणस्य कारणमात्रार्थकत्वेन उपादानत्वासिद्धेः। अन्यथा पुत्रात् प्रमोदो जायत इत्यत्रानुपपत्तेः। अत एव न्यासकृता, ध्रुवपादानुवृत्त्या जनिकर्तृसम्बन्धिनः अपादानसंज्ञायां प्रत्यासत्त्या अनुपादानस्यैव स्यात्। प्रकृतिग्रहणात् सर्वत्र भव(त्येवे)ति। तेन पुत्रात् प्रमोदो जायत इत्यादि सिध्यतीत्युक्तम्। अत एव –

**'यदिन्दोरन्वेति व्यसनमुदयं वा निधिरपाम्**
**उपाधिस्तत्रायं जयति जनिकर्तुः प्रकृतिता॥'**[10]

इति मुरारिणा कारणमात्रे प्रकृतिपदं प्रयुक्तमिति चेत्, उच्यते- जनिकर्तृसूत्रं प्रत्याचक्षाणो भाष्यकार एव सूत्रस्येममर्थं प्रत्याह। ध्रुवमपायेऽपादानमिति सूत्रेण एतद्विषयप्रसिद्ध्या हीदं सूत्रं प्रत्याचख्यौ। 'अयमपि योगश्शक्योऽवक्तुम्। कथं गोलोमाविलोमभ्यो दूर्वा जायन्त इति? अपक्रामन्ति तास्तेभ्य'[11]इत्यादि प्रत्याख्यानभाष्यम्। यदिदं हेतुमात्रार्थं स्यात्, तदा पुत्रादौ ध्रुवमपाय इति सुत्राप्रवृत्तेः सूत्रस्य तदर्थत्वान्न प्रत्याख्यानावकाशः। पुत्रात् प्रमोदो जायते इत्यत्र का गतिरिति चेत् – प्रक्रियामञ्जरीपदमञ्जर्यादिषु उक्तो 'विभाषा गुणेस्त्रिया'मिति विभाषेति योगविभागः।

नन्वेवं तत एव 'यतो वा' इत्यत्रापि पञ्चम्यस्त्विति चेत्, योगविभागस्योन्नेयत्वेन प्रत्यक्षविध्यपेक्ष्या

1. ऐ.उ.1.1.1
2. बृ.उ.3.4.10
3. महोपनिषत्.1
4. तै.ब्रा.2.8.9
5. छा.उ.1.25
6. तै.उ.1.34
7. तै.उ.1.30
8. पा.सू.1.4.24
9. पा.सू.1.4.30
10. अ.रा.1.58
11. महाभाष्यम्.1.4.30

दुर्बलत्वात्, तद्विषयत्वं हि प्रयोगान्यथानुपपत्तिकल्प्यं बाहुलकविधिविषयत्ववत्। इह तु जनिकर्तुः प्रकृतिरिति प्रत्यक्षशास्त्रसिद्धापादानविषयत्वोपपत्तेः नान्यथानुपपत्तिः। मुरारिप्रयोगात् प्रकृतिपदं कारणमात्रार्थकमिति तु अयुक्तम्। चन्द्रस्य समुद्रैकदेशपरिणामित्वेऽपि बाधकाभावात्। यथाकथञ्चित् रसोत्पत्त्यर्थकाव्यप्रयोगमात्रादर्थसिद्धौ-

**'कलशे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुणः'**[1]

इति श्रीहर्षप्रयोगात् चक्रभ्रमहेतुत्वस्य गुणत्वं दण्डस्य समवायिकारणत्वं च स्यात्।।

वस्तुतस्तु- मुरारिवचनेन उदाहरणं हरिचन्दनपङ्कभ्रमेण तप्तायस्स्पर्शन्यायं स्मारयति।तथाहि – चन्द्रार्णवयोः समानधर्मताया दर्शनात् जनिकर्तारं चन्द्रं प्रति प्रकृतित्वरूपमुपादानत्वं जयतीति हि श्लोकार्थः; न तु कारणत्वं जयतीति। न हि कार्यसाधर्म्ये कारणत्वं प्रयोजकं किन्तु उपादनत्वमेव। एवं च अत्र अर्णवजन्यर्थत्वप्रसिद्धिमुपजीव्य समानधर्मत्वेन उपादानत्वमुत्प्रेक्ष्यते।।

यच्चोक्तम् – 'ध्रुवमपायेऽपादानम्' इत्यपादानसंज्ञेति, तन्न। अपायहेतुक्रियां प्रत्यवधित्वेन कारकस्य अपादानसंज्ञाविधानात्। अत्र च क्रियाया अश्रवणादपायाभावाच्च। न च शृङ्गाच्छरो जायते इत्यादावपि अपरिणतभागसत्त्वात् तस्य अपायावधित्वत् अपादानत्वे इहापि तद्वदेव सम्भवतीति वाच्यम्। तद्वदेव एकदेशोपादानत्वसिद्धेः। विभोरात्मनः अपायायोगाच्च। स्मृतीतिहासपुराणान्यपि एतन्निष्ठानि। तत्प्रपञ्चः परिकरविजये द्रष्टव्यः।

### सद्विद्याप्रमेये मतान्तरानुवादः

इमं सद्विद्याराद्धान्तमसहमानाः प्रकारान्तरमपि निर्वोढुमसमर्थाः परस्परं निघ्नन्ति। तत्र केचित् – अनुपादानशब्देन उपादनतां प्राहुः। केचित् उपादान शब्देन। पूर्ववादिनस्तावदाहुः— विशेष्यस्य विशेष्यविशेषणयोर्वा उपादानत्वे निर्विकारत्वश्रुतिविरोधः। विशेषणस्योपादानत्वे तु न ब्रह्मण उपादानत्वसिद्धिरिति न ब्रह्मोपादानमिति।

### येनाश्रुतमिति श्रुत्यर्थः

केचन सद्विद्यामनुरुन्धाना इव प्राहुः। सादृश्यप्राधान्याभ्यां प्रतिज्ञादृष्टान्तौ। तथाहि— येनाश्रुतमिति येन श्रुतेन ब्रह्मणा अश्रुतं श्रुतम्, ब्रह्मणि ज्ञाते तत्सादृश्यात् सर्वं ज्ञातं भवतीत्यर्थः। ब्रह्मज्ञानेन कृत्स्नफलसिद्धेः इतरत् सर्वं ज्ञातप्रायमित्यर्थः। प्रथमे दृष्टान्तमाह यथेति। अत्रापि सादृश्यात् ज्ञानं विवक्षितम्। द्वितीये 'तनूर्वर्षिष्ठे'[2]तिवदावृत्तेन 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादि' त्यनेन दृष्टान्तोपन्यासः। मृदित्येतस्मिन् पदे ज्ञाते सर्वं मृण्मयं

---

1. नै.च.2.32
2. तै.सं.1.2.11

मृत्पदापभ्रंशभाषापदानि ज्ञातप्रयाणि। भाषापदानि हि अव्यापकानि। संस्कृतं तु सर्वदेशव्यापकम्। अतः तत्तद्देशे तेन तेनापभ्रंशेन यो यो व्यवहारो भवति तस्य सर्वस्यापि संस्कृतेनैव करणसंभवात् अपभ्रंशो ज्ञातप्राय इत्यर्थः। उक्तार्थमुपपादयति – वाचारम्भणमिति। अपभ्रंशरूपं नामधेयं वाचा आरभ्यते तस्मादनित्यम्। मृत्तिकेति पदं तु नित्यम्। अपभ्रंशस्तु तत्तत्पुरुषवागुपज्ञत्वान्न व्यापकः, संस्कृतं तु अपुरुषोपज्ञत्वात् व्यापकमित्यर्थ इति।

**उपादानशब्दार्थः**

अपरे तु – उपादानपदेनानुपादानतामाहुः। मिथ्याभूतस्य जगतो मिथ्याभूता माया उपादानं सालक्षण्यात्। यथा घटस्य मृत् ब्रह्माधिष्ठानतयोपादानम्। उपादानत्वं च विकाराश्रयत्वं स्वसमानसत्ताकविकाराश्रयत्वं परिणामितया उपादानत्वम्। असमानसत्ताकविकाराश्रयत्वं विवर्ताधिष्ठानतया उपादानत्वम्। कार्यं च कारणाद्भिन्नं कार्यत्वादेव। प्रातर्या मृत् मया दृष्टा सैवेदानीं घटादिरभूदिति प्रत्यभिज्ञया कार्यं कारणादभिन्नं च। अभेदश्चानिर्वचनीयः। तादात्म्यमेव वा सामानाधिकरण्यनिमित्तम्। तच्च भिन्नत्वे सति अभिन्नसत्ताकत्वम्। इदमपृथक्सिद्धमात्रसाधारणम्। अत एव शुक्लो घट इति सामानाधिकरण्यम्। तस्मात् माया ब्रह्मण उपादानमित्याहुः।

ते च सद्विद्यामनुरुन्धाना इव स्वोत्प्रेक्षितार्थे कथञ्चित् सद्विद्यां पातयन्ति। आदेशशब्द उपदेश्यपरः। येनाश्रुतमित्यादि- ब्रह्मस्वरूपे ज्ञाते प्रपञ्चस्वरूपं ज्ञातमेव। मिथ्यार्थस्याधिष्ठानमेव हि स्वरूपम्। तदतिरिक्तस्वरूपाभावात्। दृष्टान्तेऽपि मृत्पिण्डमृण्मयादीनामपि ब्रह्मण्यध्यस्ततया मृदादिस्वरूपे ज्ञाते तत्कार्यस्वरूपं ज्ञातमेव। वाचारम्भणमिति- वागालम्बनं व्यावहारिकमित्यर्थः मृत्तिकेत्येव सत्यमिति मृत्तिकास्वरूपेणैव सत्यमित्यर्थः। तद्व्यतिरेकेण सत्ताविरहादिति।

अत्रोच्यते - बहुश्रुतिस्मृतिविरुद्धं ब्रह्मणोऽनुपादानत्वम्। श्रुतय उदाहृताः। स्मृतयः परिकरविजये द्रष्टव्याः। उपादानत्वं च निर्व्यूढम्। यश्च वाक्यार्थः उक्तः सोऽनुपपन्नः। सादृश्यस्य साधारणतया तन्निबन्धनज्ञानहेतुतयाऽपि साधारण्येन ब्रह्मणि विशेषाभावात् ‘तमादेशमप्राक्ष्य’ इत्यसाधारण्येन ब्रह्मनिर्देशानुपपत्तेः। दृष्टान्तवैयर्थ्याच्च। सदृशज्ञानात् सदृशज्ञाननियमश्चासिद्धः। तत्सदृश इति ज्ञानस्य तादधीन्यमात्रविवक्षाप्यनुपपन्ना। विसदृश इति ज्ञानस्यापि तादधीन्येन सादृश्ये विशेषाभावात् ब्रह्मणोऽत्यन्तविसदृशत्वाच्च। वस्तुत्वादिना सादृश्यस्य सर्वसाधारण्यात् बहुधर्मैःसादृश्यस्य घटादावेव सम्भवात् ब्रह्मणि तदम्भवात्।

किञ्च श्रुतं मतं विज्ञातमिति हि उच्यते। ब्रह्मज्ञाने सति कथञ्चित् तत्सादृश्यादन्यस्य ज्ञाततासम्भवेऽपि ब्रह्मणि श्रुतत्वादौ सति न ह्यन्यत्र सादृश्यमात्रात् श्रुतत्वादिसम्भवः। श्रुतपदस्य ज्ञाततापरत्वे मतादिपदानामपि तथात्वे पौनरुक्त्यम्। प्राधान्यपरत्वेऽपि ज्ञातप्रायत्वविवक्षाया-मौपचारिकत्वं स्पष्टम्।

किञ्च श्रुतपदेन युगपच्छ्रुतत्वश्रुतप्रायत्वरूपमुख्यामुख्यार्थबोधनासम्भवात् श्रुतपदावृत्तिः तन्निबन्धनवाक्यावृत्तिश्च प्रसजेत्। यथा सोम्यैकेनेत्यस्य आवृत्तिश्चानुपपन्ना। 'तनूर्वर्षिष्ठे'त्यत्र तु 'अयाशयारजाशये'[1]त्यनयोः साकाङ्क्षत्वादावृत्तिरुपपन्ना। मृदादिशब्दानामशब्दानुशासनत्वात् अर्थपरत्वेन शब्दपरत्वमनुपपन्नम्। मृत्पिण्डमृण्मयमृत्तिकाशब्दानां लोहमणिलोहशब्दयोः नखनिकृन्तनकार्ष्णायसशब्दयोश्च मिथो व्याघातः। व्याकरणाध्ययनसाध्यत्वात् संस्कृतस्य तदेव व्यापकम्।

किञ्च 'वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यमि'[2]त्यत्र कां गतिं यास्यसि?। तत्र त्वदीयकुसृष्ट्यभावेन तद्द्वैरूप्यमिहानुपपन्नम्।

यच्च तेनैवोक्तं बहु स्यामिति तत्तत्कार्यानुप्रवेशार्थं विग्रहविशिष्टरूपेण बहुभवनमुच्यते इति, तत्तुच्छम्। स्वरूपेण बहुभवनाप्रसिद्धेः, कार्यविशिष्टरूपेण बहुभवनस्य वक्तुं शक्यत्वाच्च। 'यस्य पृथिवी शरीरम्'[3] इत्यादिना सर्वेषां विग्रहत्वग्रहसिद्धेः कार्यरूपविग्रहविशिष्टरूपेण बहुभवनं सङ्कल्प्यत इति कुतो नेष्यते।

किञ्चैवं सति सङ्कल्पसर्गयोः परस्परवार्तानभिज्ञत्वप्रसङ्गः। तथाच 'नामरूपे व्याकरवाणी'[4]ति 'नामरूपे व्याकरोदि'[5]ति 'त्रिवृतं करवाणी'[6]ति 'त्रिवृतमकरोदि'[7]ति च सङ्कल्पितप्रकरणविरोधः। 'तत्तेज ऐक्षत' 'बहु स्यां' 'ता आप ऐक्षन्त' 'बह्व्यः स्याम' इति कथं सङ्कल्पकीर्तनम्। ब्रह्मणि लक्षणायां स एव दोषः। एवमुत्तरत्राप्यस्वारस्यं द्रष्टव्यम्।

द्वितीयपक्षे उपादानशब्देनानुपादानत्वप्रतिपादनं स्पष्टमेव। अधिष्ठानस्यानुपादानत्वात्। न हि शुक्तिः रजतोपादानं रजतानाश्रयत्वात्। रजताभेदेनैव हीदमर्थस्य प्रतीतिः। कार्याश्रयत्वं ह्युपादानत्वं त्वयोक्तम्। यच्च भेदाभेदोपपादनं तत् त्वयैव भेदाभेदवादनिराकरणाद्विरुद्धम्। न च विषमसत्ताकयोरङ्गीकारादविरोधः। इह भेदाभेदयोः विषमसत्ताकत्वासिद्धेः।

ननु भेदः पारमार्थिकः अभेदोऽनिर्वचनीयः। न चाद्वैतक्षतिः। भेदो ब्रह्मस्वरूप एवेत्यङ्गीकारात् इति चेन्न, घटस्यापि पटवत् घटभेदप्रसङ्गात्। भेदवादिनापि तथैव वक्तुं शक्यतया भेदखण्डनासम्भवाच्च। न च प्रातिभासिकरूपेणाभेदः व्यावहारिकभेदे अन्यरूपेण भेदः,

---

1. तै.सं.1.2.11
2. छा.उ.6.4.1-4
3. बृ.उ.5.7.3
4. छा.उ.6.3.2
5. छा.उ.6.3.3
6. छा.उ.6.3.3
7. छा.उ.6.3.4

अभेदस्य अबाधितप्रत्यभिज्ञासिद्धतया प्रातिभासिकत्वानुपपत्तेः। भेदस्य प्रातिभासिकत्वे कार्यत्वानुपपत्तेः। न च यौक्तिकत्वात् भेदो व्यावहारिकः, अभेदस्य प्रतीतिमात्रसिद्धत्वात् प्रातिभासिक इति वक्तुं शक्यम्, वाचारम्भणश्रुत्यैव कार्यभेदसाधकयुक्तिनिरासात्।

यच्च सद्विद्यानिपातनं तत् सद्विद्याकरग्रहविचक्षणे परमपुरुषे जाग्रति कथमिव भवेत्। तथाहि- उक्त आदेशशब्दार्थः परोक्तार्थानुपपत्तिश्च। येनाश्रुतमिति अधिष्ठानस्य मिथ्यावस्तुस्वरूपत्वं मानाभावादसिद्धम्। न च स्वरूपान्तराभावो मानम्। मिथ्यावस्तुन एव मिथ्यावस्तुस्वरूपत्वात्। यदि तत् तस्य स्वरूपं न भवेत् तर्हि तत् निस्स्वरूपमेव स्यात्। न हि वायौ रूपान्तराभावात् पृथिव्यादिरूपमेव तदीयमित्यङ्गीक्रियते। किन्तु नीरूपमेव।

किञ्च मिथ्यात्वादेव यथा मिथ्यार्थस्वरूपं न स्यात् तथा मिथ्यात्वादेव स्वरूपसापेक्षोऽपि न स्यात्। अश्रुतामताविज्ञातपदानां स्वरूपेण लक्षणा च स्यात्। अश्रुतादिपदार्थात् प्रपञ्चरूपात् ब्रह्मणोऽन्यत्वे सति अनृतजडपरिच्छिन्नव्यावृत्तं हि आवर्तयसि 'यथा सोम्ये'ति पिण्डघटयोः कथमेकसत्ताकत्वं, भिन्नकार्यत्वात्।

किञ्च 'कथं नु भगवः स आदेश' इति पृष्टवन्तं प्रति ह्ययं दृष्टान्त उच्यते। दृष्टान्तश्च पूर्वं विज्ञातः। अद्वैतोपदेशार्थश्चायमारम्भ इति तव मतम्। एवं च प्रपञ्चमिथ्यात्वस्य प्रागनवगमात् दृष्टान्ते मृत्पिण्डघटयोः ब्रह्मैव स्वरूपमित्यनवगमात् कथं दृष्टान्तः। दृष्टान्तस्याप्यपरिज्ञानादेव वाचारम्भणमिति तदुपपाद्यत इति चेत्। प्रपञ्चमिथ्यात्वज्ञानात् प्राक् त्वदुक्ततद्वाक्यार्थस्याप्यपरिज्ञानात्।

किञ्च मृत्पिण्डमृण्मयलोहमणिलोहमयनखनिकृन्तनकार्ष्णायसपदानां लक्षणा च स्यात्। तथा मृत्तिकादिपदत्रयस्यापि। ब्रह्मण एव सर्वेषां स्वरूपत्वात् यस्य कस्यापि स्वरूपे ज्ञातेऽपि सर्वेषां स्वरूपं ज्ञातमेवेति विशिष्य प्रतिबन्द्युक्तिःनिर्निबन्धना। कारणस्वरूपमेव कार्यस्वरूपमिति चेत्। विशेषणत्वे मृत्पिण्डस्यापि घटस्वरूपत्वप्रसङ्गः। उपलक्षणत्वे पूर्वोक्तदोषः तदवस्थः।

किञ्च ब्रह्मज्ञानेन सर्वस्य स्वरूपज्ञाने प्रतिपादिते ब्रह्मणोऽधिष्ठानत्वे तत्र प्रपञ्चस्याध्यस्तत्वे च सत्येव ब्रह्मज्ञानेन प्रपञ्चस्वरूपस्य ज्ञातता सेत्स्यतीति बुद्ध्या श्वेतकेतुः प्रपञ्चमिथ्यात्वं ज्ञास्यतीति मत्वा खलु एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातम्। तत्र कथमस्य दृष्टान्तस्य आनुगुण्यम्। यथा सोम्यैकया रज्ज्वा सर्वं सर्पभूदलनाम्बुधारादि विज्ञातं स्यादित्युक्तिर्हि तदनुगुणा।

किञ्च मिथ्यात्वे प्रतिपिपादयिषिते वाचारम्भणमित्येवालम्। मृत्तिकेत्येव सत्यमित्येवं वाक्यत्रयं व्यर्थम्। मृत्तिकापदस्य मृत्तिकामात्रपरत्वे एवकारेण घटव्यावृत्तिरनुपपन्ना। मृद्घटयोः सत्त्वे विशेषाभावात्। स्वरूपपरत्वेऽपि तथैव। मृत्तिकापदं स्वरूपपरं व्यावर्त्यम्, मृन्मयमात्रम् इत्युक्तौ न मृत्तिकाग्रहणे निमित्तं पश्यामः। यदि तत्कार्यसत्त्वप्रतीतेःगमनिका उच्यते इति न वैयर्थ्यम्। तर्हि विकारस्वरूपमेव सत्यमित्येव वाच्यम्। कारणस्य सत्यत्वं च कार्यस्य मिथ्यात्वं च खलु प्रतिज्ञाभिप्रेते। तथैव दृष्टान्तेऽपि विवक्षितमिति दृष्टान्तानुगुण्यमिति चेन्न। तथा सति मृत्तिका

सत्या न घट इत्यनुपपत्तेः। उभयोः मिथ्यात्वस्य व्यावहारिकसत्यत्वस्य चाविशेषात्। इतिपदं च व्यर्थम्। मृत्तिका सत्येति हि वाच्यम्।

**व्यावहारिकत्वस्वरूपकथनम्**

वाचारम्भणपदेन व्यावहारिकत्वलाभश्च अतिक्लिष्टः। कटकादिकार्यक्षमत्वं हि व्यावहारिकत्वं न तु वाग्विषयत्वम्। प्रातिभासिकेऽपि सत्त्वात्। यदि व्यावहारिकं पदं रूढं तदा सुतरां तदर्थस्य वाचारम्भणपदेनोपस्थापनासम्भवः। नामधेयग्रहणं च व्यर्थम्। सिद्धान्ते तु नामभेदात् कार्यद्रव्यभेदशङ्कानिरासः प्रयोजनम्।

यच्चेदमुच्यते – ब्रह्मणि ज्ञाते सर्वमिदं कार्यं मिथ्यात्वेन ज्ञातं भवतीति, तदपि मन्दम्। घटादिज्ञानानामपि ब्रह्मविषयतया तेषु सत्स्वपि मिथ्यात्वज्ञानासिद्धेः। ब्रह्मणोऽद्वितीयत्वज्ञानविवक्षायां मिथ्यात्वज्ञानपर्यवसानात् आत्माश्रयः। कस्मिन् खलु विज्ञाते इदं सर्वं विज्ञातं भवतीति वाक्ये प्रपञ्चस्य ब्रह्मज्ञानविषयतया स्वरसतः प्रतीतेः तज्ज्ञानबाध्यत्वोक्तिरनुपपन्ना दृष्टान्तानुपपत्तिश्च स्पष्टा।

**सदेव सोम्येति वाक्यानां परमते अस्वारस्यप्रदर्शनम्**

सदेव सोम्येदमग्र आसीदिति प्रपञ्चमिथ्यात्वमुच्यत इत्यप्यनुपपन्नम्। अग्रे इदं सदासीदिति तदानीं सत्त्वेनावगतस्य पूर्वकालेऽपि सत्त्वप्रतीत्या सर्वकालसत्त्वस्यैव प्रपञ्चस्य प्रतिपादनात्। सत्पदेन ब्रह्मोपस्थापनेऽपि कथं तदभेदोक्तिः। अध्यासकाल एव तदभेदात्। यदि अधिष्ठानाध्यस्यमानभावात् तादात्म्यात् सा, तदा अग्र इत्यनुपपन्नम्।इदानीमपि अधिष्ठानाध्यस्यमानभावात्।

वस्तुतः इदानीमेवाधिष्ठानाभेदः, अध्यासकाल एव तदभेदात्। तत्त्वावेदकवाक्यस्य भ्रमोत्पादकत्वं चानुपपन्नम्। अग्रे नासादित्यर्थाङ्गीकारे लक्षणा, मिथ्यात्वासिद्धिश्च। न हि कालविशेषासत्त्वमात्रेण मिथ्यात्वसिद्धिः।

न च सजातीयविजातीयस्वगतभेदशून्यवस्तुप्रतिपादनात् मिथ्यात्वसिद्धिः। किं सदनुवादेन सजातीयादिभेदशून्यत्वं विधीयते? किं वा सजातीयादिभेदशून्यवस्त्वनुवादेन प्रपञ्चाभेदः? नाद्यः, तदा खलु सदेवाग्र एकमेवाद्वितीयमासीत् - नान्यदग्रे एकमेवाद्वितीयमासीदित्यर्थः स्यात्। तत्र इदम्पदानन्वयस्स्पष्टः। सदेवेत्येवकारस्य विधीयमानार्थस्य तत्कालेऽन्यत्र व्यवच्छेदपरतया तस्य त्वदभिलषितार्थपरत्वभङ्गः। न द्वितीयः, प्रपञ्चस्य विद्यमानतादशायामेव अधिष्ठानतादात्म्यं न पूर्वमित्युक्तत्वात्।

**एकशब्दार्थः**

तस्मात् प्रलयकाले प्रपञ्चजातमेकमेवाद्वितीयं सदासीदित्यन्वयः।एवं एकमेव - बहु स्यामिति

वक्ष्यमाणबहुत्वावस्थाशून्यमेव अद्वितीयम् - कर्त्रन्तरनिरपेक्षं सदासीदित्यर्थः। बहु स्यामित्यनुसारादेकशब्दार्थनिर्णयः। उपादानत्वबोधनेन कर्त्रन्तरस्य घटादिवदाकाङ्क्षितत्वात्। अद्वितीयो देवदत्त आस्त इति सजातीयपुरुषान्तरनिषेधवत् सत्पदस्य आदेशपदार्थोपस्थापकतया कर्तृपरत्वेन अद्वितीयशब्दस्य कर्त्रन्तरनिषेधपरत्वात् आकाङ्क्षासत्पदाभ्याम् अद्वितीयपदस्यार्थनिर्णयः। 'तद्धैक आहुरि'त्यस्य परोक्तार्थपरत्वं प्रागेव दूषितम्। मिथ्यावादादिनिराकरणपरत्वं च प्रागेवोक्तम्। बहु स्यामित्यनुपपन्नम्। न तावत् निर्विशेषस्यायं सङ्कल्पः, एकतत्त्वावेदनादीश्वरस्य भ्रमाभावेन प्रपञ्चे बहु स्यामिति स्वाभेदभ्रमासम्भवात्। तेजसः अपाञ्च ईक्षणकर्तृत्वप्रतिपादनं चानुपपन्नम्।

किञ्चैवं मिथ्यात्वतात्पर्ये कर्तृत्वोपवर्णनं व्यर्थम्। अतः कर्तृत्वोपादानत्वयोः प्रतिपादन एव तात्पर्यम्। तत्रैव कृत्स्नानुगुण्यं प्रागेवोपपादितम्।

एवं प्रथमखण्डे आदेशपिण्डमणिपदत्रयम्, अश्रुतादिपदत्रयम्, श्रुतादिपदत्रयम्, मृत्पिण्डादिपदत्रयम्, मृन्मयादिपदत्रम्, वाचारम्भणपदत्रयम्, नामधेयपदत्रम्, मृत्तिकादिपदत्रयमिति चतुर्विंशतिपदानि अस्वरसानि। अज्ञातत्वात् वैरूप्याच्च दृष्टान्तवाक्यत्रयमस्वरसम्। न हि पराभिलषितार्थानुगुणो दृष्टान्त इत्युक्तमेव।

द्वितीयखण्डे सदिदमग्र आसीत्, सज्जायते, सत्त्वेव इदमग्र आसीत्, तदैक्षत बहु स्यां प्रजायेयेति, तत्तेजोऽसृजत, तत्तेज ऐक्षत बहु स्यां प्रजायेयेति, तदसृजत, ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति, ता असृजन्त इत्यादिपदानि अस्वरसानि।

तृतीयखण्डेऽपि अनुप्रविश्य नामरूपे व्याकरवाणि, अनुप्रविश्य नामरूपे व्याकरोदिति ब्रह्मणः सङ्कल्पकर्तृत्वे अनुपपन्ने इति प्रागेवोक्तम्। ईश्वरस्य तु जीवाद्भिन्नत्वात् समानकर्तृत्वानुपपत्तिः।

चतुर्थखण्डेऽपि अपागादग्नेरग्नित्वम् इत्यादेः मिथ्यार्थपरत्वे अग्नेरग्नित्वमपागादिति अग्निमङ्गीकृत्य तत्र धर्मनिषेधोऽनुपपन्नः। त्रीण्येव रूपाणीत्येव सत्यमित्यपि न मिथ्यात्वसाधकम् अनुपपन्नं च। त्रीणि रूपाणीत्येव सत्यमित्यत्र त्रिरूप्यधिष्ठानसद्विवक्षायां तल्लक्षणैव दोषः। कार्याधिष्ठानस्य सतोऽपि सत्यत्वात् विशेषोत्त्यसम्भवश्च। न्यग्रोधफलमित्यादि - द्वादशे खण्डे श्रद्धत्स्व सोम्येत्युच्यते। अत एतदर्थ एव प्रकरणे प्रतिपाद्यत इत्यवगम्यते।

न च अत्र अधिष्ठानत्वं प्रतिपाद्यते, किन्तु परिणामित्वम्। अणिम्नो महान्न्यग्रोधस्तिष्ठतीति अभिधानात्। न्यग्रोधफलेऽपि वृक्षो न दृश्यते, नापि तदन्तर्गतासु अण्वीषु धानासु। तस्मात् अण्व्या धानाया एवायं परिणामो वृक्ष इति परिणामोपपादने हि तात्पर्यं गम्यते। यदि सूक्ष्मे स्थूलाध्यासोपपादने तात्पर्यं स्यात् तदा हि काचाद्यधीष्ठानलिपिस्थूलाध्यासादिः उदाहर्तव्यः। तस्मात् पूर्वोक्तस्वारसिकवाक्यार्थानुरोधात् कर्तुः विशिष्टोपादानत्वपरा सद्विद्या।

### असद्वा इत्यादेः परोक्तार्थनिरासः

'असद्वा इदमग्र आसीत्' इत्यत्र असदिति कार्यस्वरूपासत्त्वमेवोच्यते। 'आत्मानमकुरुत'

इति विग्रहविशिष्टरूपेण सृष्टिरुच्यत इति कस्यचित् व्याख्यानमनुपपन्नम्। तदित्यसतः परामर्शात् कर्तृत्वानुपपत्तेः। 'आत्मन आकाशस्सम्भूत' इति प्रकृत आत्मा परामृश्यत इति चेत् – न। तदिति नपुंसकानुपपत्तेः। 'सच्च त्यच्चाभव'दिति सत्त्वादिगुणाभिव्यक्तिपरमित्यनुपपन्नम्। ब्रह्मणः सत्त्वादिगुणासिद्धेः। सदिति स्वरूपविकारशून्यो जीव उच्यते। त्यदिति स्वरूपविकारवदचेतनमुच्यते। सृष्टिकथनात् सत्त्यद्भावस्य अनुप्रवेशाधीनत्वकथनाच्च विवर्ततात्पर्याभावोऽवगम्यते। सृष्ट्यनुप्रवेशसत्त्यद्भावानां समानकर्तृकत्वमात्रं विवक्षितम्। एवं च निर्विकारत्वश्रुतेः उपादानत्वश्रुतेश्च सद्वारकमुपादानत्वं सिध्यति, कर्मणोऽपूर्वद्वारा स्वर्गसाधनत्ववत्।

### उपादाननिरूपणखण्डनम्

यदाह नवीनः--- अवस्थान्तरयोगित्वं नोपादानत्वम्। तद्धि विकारवत्कारणत्वं परिणामित्वं वा –नाद्यः-यत्किञ्चिद्विकारसमवायित्वस्य निमित्तसाधारणत्वात्, यावद्विकारसमवायित्वस्यापि एकसमवायवादे तत्र सत्त्वात्। तन्नानात्वेऽपि अनित्यत्वे च भावकार्यस्य सोपादानत्वनियमात्। तदुपादाने तत्समवायित्वसत्त्वेऽनवस्था, उपादानलक्षणाव्याप्तिः।

न द्वितीयः-तद्धि न तात्विकरूपान्तराभेदः, अभेदरूपान्तरत्वस्य परमते व्यघातात्। तस्मात् परमते नोपादानत्वलक्षणं सम्भवति। अस्मन्मते तु यदभिन्नं कार्यमुत्पद्यते तत्कारणमुपादानम्। अभेदश्च मृद्घट इति सामानाधिकरण्यानुभवसिद्धः। अयं घट इत्यत्र स्वप्रकारीभूतधर्मद्व-विशिष्टाभेदविषयत्वस्य क्लृप्तत्वात्। स चाभेदः प्रकृते तादात्म्यम्। तच्च भिन्नत्वे सत्यभिन्नसत्ताकत्वम्। अस्ति हि मृद्घटयोः एतत्तादात्म्यम्। भेदाभावे कार्यकारणभावायोगात्। उपादानोपादेययोः सत्ताभेदायोगाच्च। दण्डघटयोस्तु नैवम्। भेदे भासमानेऽपि दण्डाधिष्ठानात् तदुपहितात् तत्सत्त्वात् घटसत्ताया अन्यत्वात्। अन्यत्वं च दण्डाद्यभावेऽपि सन् घट इत्यनुभवात् दण्डो घट इत्यनुभवाच्च सिद्धम्। न त्वेवम् एकाश्रितरूपरसादीनां घटसत्ता, एकैव सत्तेति रूपरसादेरन्योन्यं सामानाधिकरण्यानुभवप्रसङ्गादिति चेन्न – रूपाद्यवच्छिन्नघटसत्तात्मकत्वाभावात्।

ननु मृद्घटयोर्भेदे कथमेकसत्ताकत्वम्, दण्डघटयोरदर्शनादिति चेत्—न। दण्डघटभेदवत् मृद्घटभेदस्य सत्ताभेदावच्छेदकत्वाभावात्। रूपरसयोरप्यन्योन्यं भेदः सत्तावच्छेदकः, न तु तयोराश्रयाद्भेदः। अथवा कश्चिदनिर्वचनीयो धर्मः तादात्म्यम्। अतो यदभिन्नं कार्यमुत्पद्यते तत्कारणमुपादानम्। एवं च जगद्विवर्ताधिष्ठानं ब्रह्माप्युपादानम्। विवर्तस्य अधिष्ठानाभिन्नत्वात् ब्रह्मणः कारणत्वाच्च।

अभेदश्च सन् घट इति प्रतीतिप्रसिद्धः। सद्रूपाधिष्ठानतादात्म्यविषयत्वात् तस्याः। न हि सदिति घटस्वरूपमेव प्रतीयते, तस्य पटादावननुगतत्वात्। नापि सत्ताजातिवैशिष्ट्यम्। अतिरिक्तसत्ताकल्पने गौरवात्। प्रतीतेरधिष्ठानतायां सत्तादात्म्यविषयत्वेनाप्युपपत्तेः। सामान्यादौ सद्बुद्ध्ययोगाच्च। न च बाधायोग्यत्वं सत्त्वं सामान्याद्यनुगतमिति वाच्यम्। तस्या एव सत्तायाः

लाघवानुगृहीतानुभवेन न ह्यस्ति द्वैतसिद्धिः। आत्मैव सिद्धोऽद्वितीय इत्यादि श्रुत्या च आत्ममात्रतया सिद्धत्वात्। अन्यथासिद्धानुभवेन श्रुत्यर्थान्यथाकरणायोगात्। नापि प्रमाणयोग्यत्वम्। अबाधितानुभवस्य प्रमाणत्वे बाधायोग्यत्वपर्यवसानात्। यथार्थानुभवत्वे मिथ्यारजतादिसाधारण्यात्। तस्मात् कार्यभिन्नं ब्रह्म कारणं चेत्युपादानं भेदश्चाधिष्ठानतयेति ब्रह्मविवर्तभूतं जगदिति।

## सिद्धान्त्यभिमतस्य उपादानत्वप्रकारस्य समर्थनम्

अत्रोच्यते – समवायानङ्गीकारात् आश्रयाश्रयिभावाङ्गीकाराच्च अवस्थान्तरयोगित्वमित्यत्र च कश्चिद्दोषः। एवं परिणामित्त्वमपीति तदपि सुस्थम्। रूपान्तरवदभेदो वा परिणामित्वम्। रूपान्तरं च कार्यावस्था। समवायाङ्गीकारेऽपि स्वसमवेतकार्याश्रयत्वमुपादानत्वमिति विवक्षितत्वात् न कश्चिद्दोषः। भूतलादिः घटोपादानं मा भूदिति समवेतपदम्। तात्त्विकरूपान्तराभेदः परिणामित्वमित्यसङ्गतम्। रूपान्तरस्य तात्त्विकत्वे अद्वैतहानेः। स्वसमानसत्ताकत्वविवक्षायां यदभिन्नं कार्यमुत्पद्यते इत्यत्र वक्ष्यमादोषोऽनुसन्धेयः। सिद्धान्ते तु एतदपि पूर्वत्रैव पर्यवसितम्। यदभिन्नं कार्यमुत्पद्यते तत्कारणमुपादानमित्यत्रापि न दोषः। उपादानस्यैव सद्वारकोत्पत्तेः। स्वपक्षे तु एतदयुक्तम्-कार्यकारणयोः भेदाङ्गीकारात्।

ननु भिन्नत्वे सत्यभिन्नसत्ताकत्वलक्षणाभेदोऽस्तीत्युक्तम्। सत्यमुक्तम्, दुरुक्तं तु तत्। तस्य मृद्घट इति सामानाधिकरण्यानुभवसिद्धत्वाभावात्। अयं घटः, अयं कम्बुग्रीव इति सामानाधिकरण्यानुभवविषयस्यैव एतत्सामानाधिकरण्यानुभवविषयत्वात्। त्वयैवाभेदस्य मृद्घटः इत्यत्र सामानाधिकरण्यानुभवविषयत्वे अयं घट इत्यत्र स्वप्रकारीभूतधर्मद्वयविशिष्टाभेदविषयत्वस्य क्लृप्तत्वादिति हेत्वभिधानात् अभेदबुद्ध्या तादात्म्यबुद्धिसाधनात् हेतुसाध्ययोरसाङ्गत्यं च स्पष्टम्।

न च तादात्म्यमेव सर्वत्र सामानाधिकरण्यबुद्धिगोचरः। 'सोऽयं देवदत्तः', 'तत्त्वमसि'[1], इत्याद्यनुपपत्तेः। किञ्च तादात्म्यस्य सामानाधिकरण्यप्रतीतिगोचरत्वे मृद्घटौ भिन्नौ अभिन्नसत्ताकौ चेति प्रयोगः स्यात्।संसर्गमर्यादया भानाङ्गीकारात्। यदि न तथा प्रयोगः तदा मृद्घटावभिन्नाविति प्रयोगो न स्यात्।

किञ्च तादात्म्यं हि तत्त्वरूपत्वम्। तच्च तत्स्वरूपाभिन्नम्। इदं कथमभेदसत्ताभेद-घटितस्वरूपं स्यात्। यदि तादात्म्यशब्दो रूढ इत्युच्यते, एवमपि मृदात्मको घट इति प्रयोगो न स्यात्। मृत्स्वरूपं यस्येति हि तदर्थः। किञ्च कार्यकारणयोः भेदे 'सङ्घीभवन्ति ब्राह्मणाः' इत्यत्रेव 'तन्तवः पटीभवन्ती'ति 'सम्पद्यकर्तरि च्विः'[2] न स्यात्। जायमानात् पटाभिन्नतया

---

1. छा.उ.6.8.7
2. पा.सू.5.4.50

सम्पद्यकर्तृत्वाभावात्। अवयविभङ्गे त्वदुक्तगुरुत्वाधिक्यप्रसङ्गश्चावर्जनीयः। अपि च असत उत्पत्त्यसम्भवात् घटस्य सूक्ष्मरूपेणावस्थानं त्वयैवोच्यते, तत् अजातस्य सूक्ष्मरूपस्य जातस्य घटस्य च अभेदः कथमुपपद्यते।

न चात्र भेद एव। असत उत्पत्तिप्रसङ्गात्, सूक्ष्मरूपकल्पनावैयर्थ्याच्च। तथाच द्रव्यत्वस्य पिण्डरूपेण प्रागवस्थानम्, पश्चात् घटरूपेणोत्पत्तिरित्येव वक्तुमुचितम्। किञ्च मृत्पिण्डो घट आसीदिति प्रतीतिर्नस्यात्। पुनरावृत्तिः स्वर्णपिण्डः खादिराङ्गारसवर्णे कुण्डले भवतः इति च भाष्यम्।

पिण्डरूपं कारणं घटरूपकार्यात् भिन्नमेवेति हि तव मतम्। न च तत्र तादात्म्यसम्भवः। तत्राभिन्नसत्ताकत्वासिद्धेः। सा च पिण्डाभावेऽपि घट इत्यनुभवात्, घटाभावेऽपि पिण्ड इत्यनुभवाच्च सिद्धा। किञ्च् कार्यत्वाद्भेदः कथं साध्यते, पूर्वकाले अविद्यमानस्य कार्यस्य पूर्वकालीनेन अभेदायोगात्, इति चेत्। कथं तर्हि घटस्यैव सूक्ष्मरूपेणावस्थानम्। स्थूलरूपविशिष्टवेषेण कार्यत्वोक्तौ मृद एव घटत्वविशिष्टवेषेण कार्यत्वसम्भवे किमजागलस्तनेन सूक्ष्मरूपेण।

अपि च भिन्नत्वे सति अभिन्नसत्ताकत्वं सामनाधिकरण्यप्रयोजकमिति कुत्र दृष्टम्। इदं रजतमिति मिथ्यारजतवाक्य इति चेन्न, तत्राभेदस्यैव प्रतीतेः। न च अयुतसिद्धसामानाधिकरण्यार्थम्। अयुतसिद्धेरेव तन्निबन्धनत्वकल्पनस्योचितत्वात्। शुक्लो घट इत्यत्र शुक्लपदस्य द्रव्यपर्यन्ततया तत्राप्यभेदस्यैव प्रतीतेः। किञ्च सर्वेषां ब्रह्मण्यध्यस्ततया सर्वसामानाधिकरण्यप्रसङ्गः।

ननु सर्वे पदार्थाः सत्ताभेदकाः, घटरूपयोस्तु न मिथः सत्ताभेदकत्वमिति चेत्,न, एवं विभागे मानाभावात्। न च सामानाधिकरण्यतदभावप्रतीतिभ्यामेव तत्सिद्धिः, शुक्लो घट इति प्रतीतेरिति वाच्यम्। रूपी घट इति प्रतीत्या शुक्ल इति प्रतीतेरपि द्रव्यपर्यन्तत्वसिद्धेः। किञ्च, घटतद्वृत्त्योः मिथस्सत्ताभेदकत्वे घटतत्प्रमातृचैतन्ययोरभेदो न स्यात्। तदभावे च घटो ज्ञानमिति सामानाधिकरण्यप्रसङ्गः। किञ्च कोऽयमभिन्नसत्ताकत्वमित्यत्र सत्तासम्बन्धः। न तावत् तादात्म्यमेव, आत्माश्रयात्, सन् घट इति सामानाधिकरण्यानुपपत्तेश्च। न हि सत्तया सत्ताया भेदघटिततादात्म्यसम्भवः। अत एवाधिष्ठानाध्यस्तभावः सम्बन्ध इति निरस्तम्।

अनिर्वचनीयः कश्चिद्धर्मः तादात्म्यमित्यपि न। तस्याभेदादन्यत्वे सामानाधिकरण्य-निमित्तत्वाभावात्। अन्यत्वे त्वया भेदाङ्गीकारेण तस्मिन् सति तदयोगात्। उभयोस्तुल्यसत्ताकत्वात्।

ननु भेदो व्यावहारिकः। यौक्तिकत्वादभेदः प्रातिभासिकः इति चेत् न। यथा सोम्येति श्रुतिविरोधात्। न हि प्रातिभासिकाभेदमात्रेण अन्यज्ञानेनान्यस्य ज्ञातता सम्भवति। न ह्यस्ति द्वैतसिद्धिरित्याद्यर्थश्च अद्वैतविद्याविजये द्रष्टव्यः। विशिष्टोपादानत्वं समर्थयन्त्या सद्विद्यया भावरूपाज्ञानम्, असत्यात् सत्योत्पत्तिः, अवयव्यन्तरम्, विवर्त इत्येतानि निरस्तानि।

विशिष्टोपादानत्वमुपपाद्य कृतेन तत्त्वमसीत्युपसंहारेण उपादानत्वनिबन्धन-सामानाधिकरण्येन

जीवब्रह्माभेदानवगमात् तदुपपादकतया भेदमिथ्यत्वाकल्पनात् न मिथ्यावस्तुसिद्ध्यर्थम् अज्ञानं कल्पनीयमित्यवगम्यते। तथा विशिष्टोपादानत्वसमर्थनादेव प्रपञ्चनिषेधकश्रुतीनामपि स्वातन्त्र्यनिषेधे तात्पर्यावगमात् न तन्मुखेनापि अविद्याकल्पनमित्यवगम्यते।

**भावरूपाज्ञानवादः**

आह- प्रत्यक्षानुमानार्थापत्तिश्रुतिभिः भावरूपाज्ञानमेष्टव्यम्। प्रत्यक्षं तावत् 'अहमज्ञो मामन्यं च न जानामि', 'त्वदुक्तमर्थं न जानामि', 'शास्त्रार्थं न जानामि' इत्यादि। आसां च प्रतीतीनां ज्ञानाभावविषयत्वं कारणीभूतधर्मिप्रतियोगिज्ञानाभ्यां व्याहन्यते। तदभावे च तदसम्भवः स्पष्टः। सुप्तोत्थितस्य 'एतावन्तं कालं न किञ्चिदहमवेदिषमि'ति परामर्शो दृश्यते। स च साक्षिणा सुषुप्तिकाले भावरूपाज्ञानं विना नोपपद्यत इति सौषुप्तिकानुभवबलादपि भावरूपाज्ञानसिद्धिः। अनुमानमपि विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभावाति-रिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम्, अप्रकाशितार्थप्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति। कार्यान्यथानुपपत्तिरपि मानम्। मिथ्याभूतस्य कार्यस्य मिथ्योपादानं विना अनुपपत्तेः। श्रुतिश्च –'अनृतेन हि प्रत्यूढाः' इत्यादिरिति—

अत्रोच्यते – अहमज्ञ इति कृत्स्नाज्ञानप्रतीतिस्तावदसिद्धा। कृत्स्नविषयत्वेन वा, कृत्स्नज्ञानविरोधित्वेन वा भावरूपाज्ञानपक्षेऽपि ग्रहणासम्भवात्। न ह्यन्तःकरणतद्वृत्त्यादेः अतीतादेश्च अज्ञानविषयत्वं त्वया अङ्गीक्रियते साक्षिरूपज्ञानविरोधित्वं वा परोक्षज्ञानविरोधित्वं वा।

किञ्च इयं प्रतीतिः किं सर्वकालीना? उत किञ्चित्कालीना। नाद्यः, असिद्धेः। घटादिग्रहदशायां तदसम्भवात्। द्वितीये 'किं राजवृत्तान्तं न जानासि' इति प्रश्नस्थलादौ 'अहं न जानामि' इत्युत्तरानुरोधेन योऽज्ञानानुभवः कल्प्यते स एव विवक्षितः उतान्यः? नान्त्यः। सर्वकालीनत्वापर्यवासनेन उक्तोत्तरत्वात्। यदा प्रश्नो नास्ति, नापि घटादिज्ञानं तद्दशायां तादृशज्ञानं सम्भवतीति चेन्न। अहमर्थस्य सर्वदा भासमानतया तादृशज्ञानयोग्यकालासिद्धेः। यद्यपि भावरूपज्ञानस्य प्रमाणज्ञानेनैव विरोधः, नाहमर्थानुभवरूप साक्षिणा; तथापि त्वयैव घटापरोक्षज्ञानाभावेऽपि तत्परोक्षज्ञाने सति तेनैव प्रतिबन्धात् नाज्ञानानुभवः इत्युक्तत्वात् परोक्षज्ञानस्य अज्ञानेऽपि सामान्यावगाहनस्यैव प्रतिबन्धप्रयोजकत्वादिहाप्यहमर्थे भासमाने न जानामीत्यनुभवोऽनुपन्नः। एवं च प्रतियोगिविषयज्ञानाज्ञानाभ्यां ज्ञानाभावपक्षे यद्दूषणं तत् भावरूपाज्ञानपक्षेऽपि समानमापद्यते। साक्षिणि प्रतियोगितद्विषयज्ञाने सत्यपि प्रदर्शितरीत्या ज्ञानानुभवसम्भवात्। प्रतियोगिविषयज्ञानाभावे च अज्ञानानुभवः स्फुट एव। भावरूपस्याऽपि अज्ञानत्वेन अनुभवदशायां प्रतियोगितद्विषयज्ञानसापेक्षत्वम् अवर्जनीयमेव। एतेनैव प्रत्यक्षस्यैव अज्ञानविरोधित्वेऽपि प्रत्यक्षमेव च ज्ञानसामान्यात्मना भासत इति निरस्तम्।

किञ्च परोक्षस्य वा अपरोक्षस्य वा यत्किञ्चिज्ज्ञानस्य सर्वदाऽऽवश्यकत्वात् सुषुप्तेरन्यत्र नाज्ञानानुभवसम्भवः। सौषुप्तिकाज्ञानानुभवस्तु निरसिष्यते। आद्यस्तु राजवृत्तान्तज्ञानाभावविषयः। राजवृत्तान्तं विशिष्य न जानामीत्यर्थः। एतेन 'शास्त्रार्थं न जानामि, तवदुक्तमर्थं न जानामीत्यादिकमपि विशेषज्ञानाभावविषयतया व्याख्यातम्। यद्यपि राजवृत्तान्ततया शास्त्रार्थतया त्वदुक्तार्थतया ज्ञानमस्त्येवेति सामान्येन निषेधासम्भवः। तथापि विशिष्य ज्ञानाभावाद्विशेषज्ञानाभावो ग्रहीतुं शक्यत एव।

ननु विशेषाणां ज्ञानाभावे कथं तद्गोचरज्ञानाभावग्रहः। विशेषग्रहणाभावे तद्गोचरज्ञानाग्रहणेन तदभावग्रहासम्भवात्। सति च विशेषज्ञाने तदभावासिद्धेः कथं तदग्रहः। किञ्च – विशिष्य न जानामीति विशिष्यापि ज्ञानमस्त्येव। अन्यथा विशिष्य न जानामीति ज्ञानायोगादिति चेन्न।

अविशिष्य विशेषप्रकारकज्ञानाभावस्य ग्राह्यत्वात्। एतज्ज्ञाने च विशेषप्रकारिकैव। विशेषत्वं प्रति विशेषस्य विशेष्यत्वात्। अत एव हि शास्त्राध्ययनेन विशेष्यभूतविशेषप्रकारकज्ञानोदयेऽसति शास्त्रार्थं न जानामीति ज्ञानाभावोपपत्तिः। यदि भावरूपाज्ञानमस्य ज्ञानस्य विषयः तदा तस्य सत्त्वात् कथं तज्ज्ञानाभावः। परोक्षज्ञानेन अज्ञानग्रहः प्रतिबध्यते। सौरप्रभयेव चन्द्रप्रभाग्रह इति चेन्न। तथा सति प्रागपि शास्त्रार्थं न जानामीति ज्ञानं न स्यात्। शास्त्रार्थत्वेन शास्त्रार्थपरोक्षज्ञानस्य प्रागपि सत्त्वात्। अविशेष्यविशेषप्रकारकपरोक्षज्ञानमेव प्रतिबन्धकमित्युक्तौ तादृशज्ञानाभाव एव ग्राह्यः सिद्धेनैवोपपत्तेः।

किञ्च अज्ञानस्य साक्षिणः तयोरधिष्ठानाध्यस्यमानसम्बन्धस्य च अनादित्वात् का प्रतिबन्धकथा। अपि च वनं पश्यतः अयं पनसः, अयमशोकः इति विशेषज्ञानाभावदशायाम्, अस्ति मया अत्र वृक्षो विशिष्य न ज्ञायत इत्यनुभवः। तत्र च ज्ञानाभाव एव विषयो वाच्यः। न च तत्र विशेषगोचरभावरूपाज्ञानमेव विषयोऽस्त्विति वाच्यम्। तव तत्रैककोटिकानवधारणस्यैवेष्टतया तत्र अज्ञानग्रहणासम्भवात्। अत एव अनभ्यासदशापन्नजलज्ञाने एककोटिकानवधारणतया त्वदभिमते जलं न जानामीति ज्ञानाभावः। का तर्हि मम चन्द्रे गतिरिति चेत् धूमादिमार्ग एवेति ब्रूमः।

किञ्च मम शास्त्रार्थज्ञानसामग्री नास्तीति अस्ति प्रतीतिः। त्वदुक्तरीत्या शास्त्रार्थज्ञानसत्त्वात् न तत्सामग्र्यभावःसम्भवति। विशेषज्ञानसामग्रीविरहेऽपि त्वदुक्तव्याघातादेव ग्रहीतुं न शक्यते। तत्र कां गतिं यास्यसि। यदि तत्र सामग्री भावरूपा इष्यते तदा काममङ्गीकुरु भावरूपमज्ञानमपि?

अपि च कश्चिदाह- 'शास्त्रार्थमुपदिशेति', अपर आह - 'अनधिकारी भवान्, न तवोपदेष्टव्यः शास्त्रार्थः' इति। शास्त्रार्थं शास्त्रार्थ इत्येव विशिष्याप्युपदिशति। विशिष्य नोपदेष्टव्य इति तत्र भावरूपानुपदेशेन विना कथं भावरूपाज्ञानसिद्धिः।

किञ्च ब्रह्मसूत्रारम्भानुरोधेन जिज्ञासा तावत् दुरपह्नवा, त्वदिष्टा च सा। तत्र ज्ञानस्याग्रहणे

तदिच्छाया असम्भवात्, ज्ञानस्य च विषयनिरूप्यत्वात् विषयज्ञानाज्ञानयोः जिज्ञासा अनुपपन्नैव। यदि च विशिष्य न जानामीति तथा ज्ञातव्यमिति जिज्ञासानुरोधेन ज्ञाते जिज्ञासासम्भवेन च ज्ञातैः विशेषैरेव ज्ञाननिरूपणेन जिज्ञासोपपत्तिरिति कल्प्यते, तदा विशिष्य न जानामीति प्रत्ययानुरोधेन विशेषत्वेन ज्ञातैः विशेषैरेव ज्ञाननिरूपणे विशेषज्ञानाभावोपपत्तिरिति कल्प्यताम्। यदि च जिज्ञासाविषयज्ञाननिरूपणं साक्षिभास्यैरेव विशेषैः, साक्षिभानं च न जिज्ञासाविरोधीति कुदृष्ट्या पश्यसि, तदा अभावप्रतियोगितानिरूपणमपि साक्षिणैवेति कुतो न पश्यसि।

ननु ज्ञाननिरूपकविशेषविषयकसाक्ष्यात्मकज्ञाने सति विशेषज्ञानाभावज्ञानं न सम्भवति। जिज्ञासा तु साक्षिरूपज्ञानस्य संशयानिवर्तकत्वात् सम्भवतीति चेन्न - इच्छा तावत् इष्टतावच्छेदकप्रकारकज्ञानसाध्या, तत्र च इष्टतावच्छेदकावच्छिन्नसिद्धौ तेन रूपेण इच्छाया असम्भवात्। तथा चावधारणत्वं दृष्टान्तावच्छेदकं तेन रूपेण ज्ञानेच्छा जिज्ञासेति पर्यवसन्नम्। तथा चाभावपक्षेऽप्यनवधारणात्मकसाक्षिणा विशेषज्ञानेऽपि अवधारणरूपज्ञानाभावविषयत्वमस्त्विति तुल्यम्। साक्षिणः संशयानिवर्तकत्वं च असिद्धम्। शुक्तिरजताज्ञानेन संशयनिवृत्तिदर्शनात्।

किञ्च साक्षिणा शास्त्रार्थस्य ज्ञाने शास्त्रश्रवणानन्तरमिव तदर्थः प्रागपि व्यवह्रियेत ज्ञानवदेव। तस्मात् सर्वत्र अविशिष्यविशेषप्रकारकज्ञानावलम्बनेनैव परिहार इति ।

किञ्च अज्ञानमिति, न जानामीति च ज्ञानाभावत्वेनैव प्रतीयमानत्वात् कथं भावरूपाज्ञसिद्धिः।

अत्र यदुक्तमभावत्वेनानुभवोऽसिद्ध एव। अधर्म इत्यादाविव विरोधित्वेनैवानुभवात्। अत एवाज्ञानमिति प्रयोगः। अभावार्थकत्वे समासानुपपत्तेः। अन्यथा घटाज्ञानमितिवत् वायौ पृथिव्यरूपमिति प्रयोगापत्तिरिति।

तन्न, अद्वेषागमनाभोजनाकाणादिशब्दानाम् अबाधासिद्ध्यनवधारणादिशब्दानां च लौकिकैः परीक्षकैश्चाभावविषयतया प्रयोगात्। त्वयापि हि कार्यानुत्पादप्रयोजकमित्याद्युच्यते। एवं धात्वर्थयोगिनो नञः सर्वत्राभावविषये प्रयोगदर्शनात् अज्ञानमित्यनुभवव्यवहारयोरभावविषयत्वमेव।

अस्तु वान्यत्राभावे प्रयोगाभावः। तथापि नास्ति, न करोति, नेच्छतीत्यादावख्यातान्वितनञः अभाववाचित्वमेव दृश्यते। यदि नामान्वितनञो विरोधिविषयत्वमिति त्वया उच्येत, तर्हि उभयविधप्रयोगस्यापि 'मयि ज्ञानं नास्ति मय्यज्ञान'मित्यादौ दर्शनादुभयोरैकार्थ्ये वक्तव्ये कस्मिन्नर्थे उभयोरैकार्थ्यमिति विशये क्लृप्तत्वादभाव एवेत्युचितम्। न च तत्र मय्यज्ञानमिति वा अहमज्ञ इति वा अज्ञानानुभवे सति पश्चात् तेन ज्ञानाभावानुमानात् मयि ज्ञानं नास्तीति व्यवहार इति वाच्यम्। अज्ञानस्य ज्ञानसामान्याभावव्याप्तेरसिद्धेः। यच्च पृथिव्यरूपमिति प्रयोगापादनं तत् वायुत्वस्य रूपविरूद्धतया अज्ञानशब्दस्य विरोधिपरत्वेऽपि तुल्यम्। वायुत्व एव रूपविरोधविवक्षया प्रयोगसम्भवात।

यच्चोक्तम् - अभावत्वमपि भावरूपाज्ञानस्यास्त्येव। चैतन्ये कल्पितस्य तदभावात्मकत्वात्। यो यदभावात्मकः स तदभाव इति व्याप्तेरिति, तन्न, प्रतियोगितावच्छेदकस्य अन्योन्याभावात्यन्ताभावत्वेऽपि अन्योन्याभावस्य तदत्यन्ताभावत्वासिद्धेः। ननु यो यद्भावप्रतियोगिकोऽभावः स भावः तदत्यन्ताभाव इति विवक्षितम्। अतो न व्यभिचारः। अन्योन्याभावस्य भावत्वाभावात्। अविद्या च भावरूपेति स्वाभावात्मकाभावाधिष्ठानाभाव इति चेन्न। व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगिनि तदत्यन्ताभावत्वाभावेन व्यभिचारः। यः प्रतियोगिविरोधियद्भावप्रतियोगिकोऽभावः स तदभाव इति विवक्षितम्। विरोधित्वं च यद्यपि न प्रतियोग्यनधिकरणाधिकरणत्वम्। व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगिनि व्यभिचारात्। ब्रह्मणि निराश्रये तादृशविरोधित्वाभावाच्च। तथापि प्रतियोग्यधिकरणानधिकरणत्वं तद्विवक्षितम्। न चैवं सत्याकाशस्य स्वात्यन्ताभावाभावत्वाभावप्रसङ्गो दोषः, इष्टत्वात्।

अथवा प्रतियोगिविरोधीतिस्थाने प्रतियोगितासमानाधिकरणधर्मावच्छिन्नत्वं विवक्षितम्। तेन न कोऽपि दोष इति चेत्, पटाभावस्य स्वस्मिन् घटाभावव्यवहारजनकतया घटाभावत्वेन तत्प्रतियोगिनि घटे पटाभावाभावत्वाभावेन व्यभिचारात्। अधिकरणान्तरे अभावव्यवहारालम्बनं यो भावप्रतियोगिकाभाव इति चेद्विवक्षितम्, तर्हि ब्रह्मणोऽधिकरणान्तरे अभावव्यवहारानालम्बनात् नाविद्या ब्रह्मणो भावः।

किञ्च प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानमभावज्ञानकारणमिति त्वयैवोक्तम्। ज्ञानाभावत्वेन प्रतीते ज्ञानत्वं प्रतियोगितावच्छेदकं वक्तव्यम्। तथाच साक्षिणोऽपि ज्ञानत्वात् तस्मिन् सति कथं तदभावः, स्वयम्प्रकाशतया तस्मिन् प्राकाशमाने च कथं तदभावज्ञानम्। किञ्च ब्रह्मणोऽविद्याभावत्वाभावाच्च न तन्मूलमविद्याया ब्रह्माभावत्वम्। अधिष्ठानस्याध्यस्ताभावात्मकत्वस्य निराकरिष्यमाणत्वात्।

किञ्च यद्यभावत्वमिष्यते कथं तर्हि भावत्वम्? ज्ञानसामान्यविरोधित्वनिर्वाहाय लाघवार्थं च भावत्वमिष्यत इति चेन्न। किमहमज्ञ इति ज्ञानसामान्यविरोधित्वं तन्निर्वाहाय भावत्वं कल्प्यत इति विवक्षितम्, उत सामान्याभावत्वादेव? नाद्यः, धर्मिप्रतियोगिज्ञानयोः सत्त्वेन ज्ञानसामान्यविरोधित्वप्रतीतेरसम्भवात्। न द्वितीय, स्वरूपासिद्धेः व्याप्यत्वासिद्धेः व्यभिचाराच्च। लाघवं चासिद्धम् अक्लृप्तत्वात् ।

अपि च अज्ञानस्य चैतन्याश्रयत्वेनान्तःकरणाश्रयत्वाभावात् कथमहमज्ञ इति प्रतीतिः तद्विषयः स्यात्।

अत्र यदुक्तम् - अन्तःकरणस्याज्ञानाश्रयचिदैक्याध्यासात् तथा प्रतीत्युपपत्तिरिति, तन्न, अहमर्थाज्ञानयोरुभयोरपि चैतन्याध्यस्तत्वात् चैतन्याभेदेन प्रतीयमानयोः परस्पराधाराधेय-भावप्रतीतेरसम्भवात्। अन्यथा अहमर्थस्यैवाज्ञाननिष्ठतया प्रतीतिप्रसङ्गात् ।

नन्वज्ञानं चिदधिष्ठानं चिदाश्रयं च, अहमर्थस्तु चिदधिष्ठानक एव। अतः चिदाश्रयतया अज्ञानस्य प्रतीतौ चिदभिन्नतया प्रतीयमानाहमर्थाश्रयत्वप्रतीतिः उपपद्यत इति चेन्न। अभेदे सति भेदगर्भाश्रयाश्रयिभावायोगात् तयोः सत्ताभेदासिद्धेः।

किञ्च एवं सति घटोऽज्ञ इति प्रतीतिप्रसङ्गः। किञ्च त्वन्मते जडविषयाज्ञानाभावात् 'घटं न जानामी'ति घटविषयत्वेनाज्ञानानुभवः कथं भावरूपाज्ञानविषयः स्यात्। अज्ञानविषयचैतन्याभेदात् तदुपपत्तिरिति चेन्न, शुद्धचैतन्यस्यैव घटाद्यधिष्ठानत्वात्, तेनैव घटस्याभेदः प्रतीयते। अज्ञानविषयावच्छिन्नचैतन्यस्य ततो भेदात् नाज्ञानविषयाभेदप्रतीतिः सम्भवति।

नन्वधिष्ठानचैतन्यस्याज्ञानविषयचैतन्येन वास्तवाभेदात् अज्ञानविषयचैतन्याभेदप्रतीतिः सम्भवतीति चेत्, तर्हि अज्ञानविषयपटावच्छिन्नचैतन्याभिन्नशुद्धचिदभिन्नतया घटज्ञानदशायामपि 'घटं न जानामी'ति प्रतीतिप्रसङ्गः। घटापरोक्षज्ञानमेवाज्ञानप्रतिबन्धकमिति चेन्न। वनं गतस्य 'इमं वृक्षं न जानामी'त्यज्ञानानुभवस्य इदमिति ज्ञानेन प्रतिबन्धप्रसङ्गात्। न चेदमिति ज्ञानेन पनसत्वावच्छिन्नाज्ञानानुभवो न प्रतिबध्यत इति परेण वक्तुं शक्यते। नापीदमिति भानदशायामेव पनसत्वादिभानाभावस्याङ्गीकारात् एककोटिकानवधारणात्मकं तज्ज्ञानमस्त्येव।अयं पनसो न वेति सन्देहानुसारेण अनवधारणात्मकत्वस्य वक्तव्यत्वात्। न च पनसत्वमेव न गृह्यते व्यक्तिसामग्रीवेद्यत्वाज्जातेः। न च वाच्यताविषयः संशयः, पनसशब्दवाच्य इत्यग्रहादिति हि परेणोच्यते। न च अवधारणमेव अज्ञानानुभवप्रतिबन्धकम्, अनभ्यासदशापन्नजलज्ञानेन तवानवधारणतयाऽभिमतेनाज्ञानानुभवप्रतिबन्धदर्शनात्। अपि च 'सुखं न जानामि', 'शुक्तिरूप्यं न जानामी'त्यादेः सुखाद्यज्ञानाभावेन ज्ञानाभावविषयत्वमेव वाच्यमित्यन्यत्रापि तथा।

यदत्रोक्तम् - स्वस्य विद्यमाने सुखे विशेषतोऽनुभवनियमेन न जानामीत्यनुभवोऽसिद्ध एवेति चेत्, तन्न, विशेषतोऽनुभवेऽपि, अशोकादाविव 'सुखं न जानामी'त्यनुभवस्य, तत्सन्देहजिज्ञासाप्रश्नप्रतिवचनानां चादर्शनात्। सम्भवन्ति हि तत्र द्रव्यत्वगुणत्वनिर्धारणे सन्देहादयः। यत्र सुखप्रातिभासिकादिविषयमेव वाक्यं प्रयुक्तं श्रोतुर्वाक्यादर्थज्ञानं न जातं, तत्र त्वदुक्तं न जानामीत्यनुभवो दुरपह्नवः। स च ज्ञानाभावे नैवोपपन्नः। किञ्च' अनागतं न जानामी'ति कथं प्रतीतिः। तदावारकाज्ञानाभावात्। तथा 'अतीतं न जानामी'त्यनुभवोऽप्यनुपपन्नः।

यच्चोक्तम् - ज्ञाननिवर्त्यत्वमेव ज्ञानविरोधित्वम्। एवञ्च ज्ञाननिवर्त्यत्वेनैवाज्ञानं गृह्यत इति, तन्न। ज्ञानस्य तु तदानीमभावेन ततो निवृत्तेरसिद्धेः कथं प्रत्यक्षेण तदग्रहः। घटाज्ञानादौ घटज्ञाननिवर्त्यत्वदर्शनात् अनुमिनोतीति चेन्न, आश्रयासिद्धेः। केनापि रूपेण तस्याज्ञानात् स्वरूपासिद्धिश्च, हेतोः तत्राज्ञानात् व्याप्यत्वासिद्धिश्च। अज्ञानत्वस्य ज्ञाननिवर्त्यत्वात्मकतया ज्ञाननिवर्त्यत्वग्रहणात् पूर्वं तदाकारेण तस्यानुपस्थितेः। आकारान्तरस्य चाभावात्।

किञ्च यदि ज्ञाननिवर्त्यत्वं गृह्येत तदा अहमज्ञ इतिवत्, अहं ज्ञाननिवर्त्यत्ववानिति

व्यवहारापत्तिः। किञ्च ज्ञानस्य कारणत्वाकारणत्वसन्देहे कारणत्वाभावनिश्चये च न जानामीति ज्ञानं दृश्यते। न च तद्दशायां त्वदुक्तज्ञाननिवर्त्यत्वात्मकविरोधग्रहसम्भवः। किञ्च न गच्छामीत्यादौ गमनादिनिवर्त्यत्वप्रतीतिमङ्गीकुर्वतः कथमेतदङ्गीकारः। अपि च प्रकृष्टप्रकाशतया चन्द्रेऽपि प्रकृष्टप्रकाशश्चन्द्र इत्युपदेशात् प्राक् 'चन्द्रं न जानामी'ति प्रतीतिरनुभवसिद्धा। न च सा भावरूपाज्ञानविषया। प्रत्यक्षेण चन्द्रज्ञानादेव तदज्ञानासम्भवात्। संस्थानविशेषात्मकं चन्द्रत्वमपि हि दृष्टमेव, त्वदिष्टं च। तथा सत्यमिष्टम्। अत एव चन्द्रानवधारणमेककोटिकमिष्यत इति चेन्न, एककोटिकानवधारणे सति तद्विषयगोचराज्ञानानुभवासम्भवात्। अन्यथा अनभ्यासदशा-पन्नानुभवे सति 'जलं न जानामी'त्यनुभवप्रसङ्गात्। अतः तत्र प्रकृष्टप्रकाशाद्यसाधारणधर्मावच्छेदेन चन्द्रपदवाच्यत्वग्रहाभावः 'चन्द्रं न जानामी'त्यनुभवविषयो वाच्यः। एवञ्च एवमेव सर्वत्र ज्ञानविशेषाभावः तत्र तत्र योग्यो विषयः।

अपि च अस्ति तावत् सार्वलौकिकीयं प्रतीतिः इममर्थं सामान्येन जानामि, विशेषवानित्यपि जानामि, विशिष्य तु न जानामीति। अस्याः प्रतीतेर्न भावरूपाज्ञानं विषयः। विशिष्य न जानामीति प्रतीत्यनुपपत्तेः। अर्थस्यैवाज्ञानविषयतया इमं न जानामीति प्रतीतेरिव भवितुं योग्यत्वात्। विशेषाणामज्ञानविषयत्वे तेषामज्ञाने कथं तन्निरूपितवेषेणाज्ञानप्रतीतिः। विशेषत्वेन अज्ञातानां साक्षिणा ज्ञातानां वा ज्ञाननिरूपकत्वं भावरूपाज्ञानपक्ष इवाभावपक्षेऽपि सुवचम्।

यच्चोक्तम् - न जानामीति प्रतीतेः ज्ञानाभावविषयत्वे घटो न जानातीति प्रयोगः साधुः स्यादिति - तत्र बाढमित्युत्तरम्, अर्थासत्त्वात्, अनुशासनविरोधाभावाच्च, न त्वप्रयोगात् असाधुतावश्यम्भावाच्च। न च अनुशासनविरोधोऽस्ति। तस्मादर्थाभावनिबन्धनैवासाधुता इति चेन्न –

**दूषणसङ्ग्रहकारिकाः**

**घटो नेच्छति न द्वेष्टि न दुःख्यति न सुख्यति।**
**न गच्छति न जागर्ति न शेते न च भाषते॥**
**इत्यादावप्यसाधुत्वं वस्त्वभावप्रसङ्गतः।**
**अप्रसङ्गान्निषेधस्य व्यतिरेकोपपादने॥**
**घटे विधिर्निषेधो न तथैवेति विभावय।**
**जानाति घट इत्येवं विप्रलब्धेन चोदितः॥**
**प्रयुङ्क्ते च न जानाति घट इत्येव संसदि।**
**त्वत्पक्षे तु प्रसङ्गोऽयं दुर्वार इति निश्चिनु॥**

**भावाज्ञानस्य विरहान्न प्रयोगो भवेद्यदि।**
**अहमर्थेऽपि तेनैव न प्रयोगो भवेद्ध्रुवम्॥**
**एकस्मिन्नेव चैतन्ये द्वयोरध्यासनाद्यदि।**
**अज्ञानमहमर्थे स्यात् प्रतीतेर्विषयत्वतः॥**
**घटे तथैव दृश्येत चैतन्याध्यसनात्तयोः॥**
**इयानेव विशेषोऽत्र प्रसङ्गविरहाद्घटे।**
**न निषेधो मम स्यात्ते स्यात् प्रयोगो घटे ध्रुवम्॥**
**न जानातीति भावस्य गोचरत्वं यतो मतम्।**
**ततस्स्यात् ध्रुवमेवं च स्वदोषो रोपितः परे॥**

यच्चेदमुच्यते —

अनुभूयते तावज्ज्ञानेन अज्ञानं निवृत्तमिति, गीतं च भगवता –

**'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।'[1] इति,**

ततश्च अभावस्य ज्ञाननिवर्त्यत्वाभावात् भाव एव अज्ञानमिति।

तन्न—

**निवृत्तिप्रतियोगित्वं ज्ञानाधीनं यतस्ततः।**
**ज्ञानान्निवृत्तमज्ञानमिति धीरुपपद्यते॥**
**अध्यक्षरूपया बुद्ध्या ज्ञातो घट इतीर्यते।**
**नाध्यक्षाज्ज्ञानमन्यद्धि तत्र सिध्यति तद्धिया॥**
**रामेण पुत्रवान् पङ्क्तिरथश्च समुदीर्यते।**
**ज्ञानेन तु तदज्ञानमित्येतत् कर्मगोचरम्॥**
**मिथ्याज्ञानग्रहो वाऽपि तेन स्यान्नेतरस्य हि।**
**ज्ञानान्निवृत्तमज्ञानमिति धीर्भावगोचरा॥**
**न सेत्स्यति परोक्षेऽपि तद्धियस्स्फुटमीक्षणात्॥**

यच्चोक्तम् - सुप्तोत्थितपरामर्शसिद्धसौषुप्तिकप्रत्यक्षविषयो भावरूपाज्ञानमिति – तदसारम् - स्वरूपेणैवाज्ञानानुभवे न किञ्चिदहमेवेदिषमिति परामर्शानुपपत्तिः। साक्षिणा विषयव्यावृत्तस्यैवाज्ञानस्य सुषुप्तावनुभवे विषयव्यावृत्तमेव सुप्तोत्थितेन परामृश्यते। ननु स्मर्यत एव - न किञ्चिदहमवेदिषमितीति चेन्न। घटत्वादिविशेषरूपेण प्रतीतेरापादनात्। न च तत्रापादकाभावः। विशेषाकाराणामपि साक्षिणा भानात्। अस्त्येव घटं नाज्ञासिषमिति परामर्शोऽपीति चेत् - इतः

1. भ.गी.5.16

पूर्वं कदाऽप्यननुभूतस्यापि प्रातिस्विकरूपेण परामर्शप्रसङ्गात्। अन्यथा एतावन्तं कालं न किञ्चिदवेदिषमिति कालस्यापि प्रातिस्विकरूपेण परामर्शाभावापत्तेः। साक्षिणा सर्वेषां स्फुरणेऽपि साक्षिविषयत्वात् अपरामर्शे अज्ञानपरामर्शोऽपि न स्यात्। अज्ञानविषयत्वादपरामर्शे न किञ्चिदवेदिषमिति किञ्चिदित्यपि परामर्शो न स्यात्। सुखमहमस्वाप्समिति स्वरूपेणानन्दपरामर्शोऽपि न स्यात्।संसारदशायामानन्दावरणस्य त्वदिष्टत्वात्। न च सुषुप्तिकाले तदावरणनिवृत्तिः शङ्कितुं शक्या। तदानीं प्रमाणज्ञानविरहात्।

अथ स्यात् संस्कारेण विना परामर्शानुपपत्तेः संस्कारस्य च कादाचित्कज्ञानसाध्यत्वात् सुषुप्तौ प्रमाणज्ञानविरहेऽपि अविद्यावृत्तिरिष्यते। सा चाविद्याकारिका, विषयावच्छिन्नाकारिका, विषये किञ्चित्त्वाकारिका, तत्कालाकारिका, तदधिकरणत्वाकारिका च। अतः तदधीनोऽयं सुसम्पन्नः परामर्श इति नातिप्रसङ्गगन्धोऽपि, साक्षिमात्रादेव परामर्श इत्यनभ्युपगमात् इति।

नैवम्, तद्वृत्तेः दशाविशेषसाध्यत्वे तद्दशासहकारात् निरुक्तपरामर्शोपयोग्यनुभवस्य ज्ञानाभावगोचरस्य मनसैवोपपत्तौ परामर्शान्यथानुपपत्त्या कथं भावरूपाज्ञानानुभवकल्पना, परामर्शबलात् तावन्मात्रगोचराविद्यावृत्तिकल्पनवत् तावन्मात्रे मनोव्यापारकल्पने बाधकाभावात्। न च प्रतियोगिज्ञानस्य आवश्यकत्वात् तस्मिन् सति कथं तदभावग्रह इति वाच्यम्। प्रातिस्विकरूपप्रकारकज्ञानाभावानामेव ग्राह्यत्वसम्भवात्। किञ्चित्त्वेनोपस्थितानां च पदार्थानां अभावप्रतियोगिभूतज्ञाननिरूपकत्वात्। कथमन्यथा भावरूपाज्ञानपक्षेऽपि गतिः ? तत्रापि हि किञ्चित्त्वस्य अज्ञानविषयत्वे परामर्शानुपपत्तेः, प्रातिस्विकरूपेण अज्ञानविषयाणामेव किञ्चित्त्वेनोपस्थितानामज्ञाननिरूपकता वाच्या।

ननु न किञ्चिदवेदिषमिति प्रतीतेः किञ्चित्त्वेनैवाज्ञानविषयता। न च अज्ञानविषयस्य स्मरणासम्भवः, परोक्षानुभूतानामपि स्मरणदर्शनादिति चेन्न। तथा सति परोक्षस्थल इव तत्प्रकाशे तद्गोचराज्ञानग्रहणासम्भवात्। अज्ञाने सत्यपि परोक्षज्ञाने सति नाज्ञानग्रह इति हि तव राद्धान्तः। तस्मादाकारान्तरेण अज्ञानविषयान्तराणामेव आकारान्तरेणोपस्थितानाम् अज्ञाननिरूपकतेति वाच्यम्। तत् ज्ञानाभावपक्षेऽपि समानमेव।

किञ्च अन्तःकरणस्य सुषुप्तौ लयाङ्गीकारात् तदाश्रयतया तदानीमज्ञानानुभवासम्भवात् कथं तथा परामर्शः।

किञ्च - एतावन्तं कालं न किञ्चिदवेदिषम्, एतावन्तं कालमपि घटं नावेदिषम् इति अस्ति प्रतीतिः। अतः कथं प्रागज्ञानाधिकरणतया कालग्रहः। यदि काल इदानीमनुमेयः कथं तत्समयसम्बन्धितया अज्ञानपरामर्शः। यदि सोऽपि इदानीमनुमेयः तदा ज्ञानाभाव एवानुमीयताम्। तत्काले भावरूपाज्ञानसम्बन्धसाधकतया अभिमतानामेव हेतूनां ज्ञानाभावसम्बन्धसाधकत्वम्भवात।

किञ्च - घटमनुभूय विस्मृतवतः एतावन्तं कालं घटं नावेदिषम् इति ज्ञानं दृश्यते। न

चायमज्ञानपरामर्शः। घटानुभवकालेऽपि घटाज्ञानानुभवात्। तत्र च अनुमानस्यैव गवेषणादन्यत्रापि तदेव युक्तम्।

किञ्च शुक्तिरजतज्ञानानन्तरम् एतावन्तं कालम् इदं रजतं नावेदिषमित्यस्ति प्रतीतिः। तत्र चानुमानमेव शरणम्।

किञ्च इदानीमुत्पन्नघटादिज्ञानानन्तरम् एतावन्तं कालमिदं नावेदिषमित्यस्ति प्रतीतिः। तत्रानुमानेन विना का गतिः। विषयस्य स्वकाल एव चैतन्यावच्छेदकतया तदभावदशायां तदवच्छिन्नचैतन्याज्ञानासम्भवात्। तस्मादिहाप्यनुमानमेव युक्तम्। सम्भवति चेन्द्रियप्रसादेन तदुपरमानुमानात् ज्ञानाभावानुमानम्।

यदुक्तं शोभनस्वप्नादपि मनःप्रसादोऽस्तीति, तन्न - शोभनस्वप्नदर्शनजन्यस्य दुस्स्वप्नदर्शनेऽपि दृश्यमानस्य स्वानुभवसाक्षिकस्य इन्द्रियप्रसादविशेषस्य लिङ्गत्वात् बहुव्यापृतस्य हस्तादेः उपरमाधीनप्रसादविशेषदर्शनात् तादृशप्रसादेन इन्द्रियप्रसादोपरमानुमानात्। प्रसादश्च कार्यविशेषक्षमताविशेषः। अस्मरणादप्यननुभवानुमानं सम्भवति। यद्यपि पथि गच्छतः तृणानुभवेऽप्यनन्तरं न तत्स्मरणनियमः, तथापि तत्रैव गमनत्वरया वृक्षादिमहत्तरदर्शनात् जिज्ञासितवस्तुदर्शनाद्वा संस्कारोत्पत्तिप्रतिबन्धाभावात् इहानुमानमुपपद्यत एव। लोकव्यवहारसिद्धं चास्मरणलिङ्गम्। लोके हि किमयमर्थस्त्वया दृष्ट इति पृष्टः कश्चित्कालं मनः प्रणिधाय नाहं तत् स्मरामि अतो नानुभूत इत्याह। तस्मात् सुप्तोत्थितपरामर्शानुरोधेनापि न भावरूपाज्ञानसिद्धिः।

या चेयमनुमानजीर्णकन्था—विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभावातिरिक्त-स्वविषयावरणस्वनिर्वर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम् अप्रकाशितार्थप्रकाशकत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत्, अत्र धारावाहिकज्ञाने द्वितीयादिव्यवच्छेदार्थं विवादाध्यासितशब्दः , स्वरूपभूतज्ञानव्यावृत्त्यर्थं भ्रान्तिभूतज्ञानव्यावृत्त्यर्थं च प्रमाणशब्दः, कारणप्रतीतिव्युदासाय ज्ञानशब्दः, स्वप्रागभाव-स्वोत्पादकादृष्ट-स्वोत्पत्तिप्रतिबन्धकादृष्ट-वेद्यगतव्यक्त्यभिव्यक्तिप्रागभावाः साध्यविशेषणैः व्यवच्छेद्याः। वस्त्वन्तरशब्दो वैशद्यार्थः। एवमाद्यस्वशब्दोऽपि। प्रागभावव्यतिरिक्तेत्येतावता प्रथमचतुर्थविशेषणफलसिद्धौ पृथग्विशेषणनिर्देशो व्यवच्छेद्यविशेषव्यञ्जनाय। धारावाहिकद्वितीयादिषु अनैकान्त्यपरिहारायाप्रकाशितार्थशब्दः। आलोकमध्यारोपितदीपव्यवच्छेदायान्धकारोक्तिः। तत्रापि द्वितीयादिप्रभाव्यवच्छेदाय प्रथमोत्पन्नशब्दः। इन्द्रनीलादिप्रभाव्यवच्छेदाय प्रदीपशब्द इति।

## अविद्यानुमानदूषणम्

तत्र सुखादिप्रमायां व्यभिचारः तस्यास्साक्षिरूपत्वात्। किञ्च वृत्तेः पक्षत्वे तस्याः जडत्वेनानिवर्तकत्वात् बाधः। चैतन्यस्य पक्षत्वे तस्य प्रागभावाद्यसिद्ध्या बाधः।

वृत्त्यवच्छिन्नचैतन्यस्य पक्षत्वे वृत्तेरुपलक्षणत्वे स एव दोषः। विशेषणत्वे पूर्वोक्त एव दोषः। वृत्तेर्निवर्तकत्वे चैतन्यस्य निवर्तकत्वाभावापत्तिश्च। प्रतिबिम्बस्य पक्षत्वेऽपि तस्य बिम्बाभेदात् पूर्वोक्त एव दोषः।

**स्वविषयावरणत्वविवरणदूषणम्**

साध्ये च स्वविषयावरणत्वस्य तद्विषयज्ञानप्रतिबन्धकत्वरूपतया अज्ञानस्य तदङ्गीकारे ज्ञानानुत्पत्तिप्रसङ्गेन अज्ञाने आवरणत्वासम्भवाद्बाधः। ज्ञानसामग्र्या उत्तेजकत्वं च न सम्भवति। तदन्वयव्यतिरेकयोरेव कार्यतदभावप्रयोजकत्वेन पृथगन्वयव्यतिरेकासिद्ध्या प्रतिबन्धकत्वासम्भवात्।

किञ्च प्रागभावस्य स्वनिवर्त्यत्वासम्भवात् प्रागभावव्यतिरिक्तेति( पदं ) व्यर्थम्। आवरणपदेनैव स्वोत्पादकादृष्टव्यावृत्तेः स्वविषयेति व्यर्थम्। चितः अज्ञानादिसाक्षितया प्रकाशमानस्य आवरणयोगाच्च। घटाद्यवच्छिन्नमेवावृत्तम्, न त्वनवच्छिन्नमिति चेन्न। तथा सति शाब्दाखण्ड-साक्षात्कारे बाधः। तस्य पक्षबहिर्भावे व्यभिचारः। स्वरूपस्य सर्वदा प्रकाशमानतया प्रकाशितार्थप्रकाशकत्वमेव चरमसाक्षात्कारस्येति हेत्वभावान्न व्यभिचार इत्युक्तौ श्रुतेरनुवादकत्वप्रसङ्गः। द्वितीयादिज्ञानवदनिवर्तकत्वापत्तिश्च।

किञ्च जडावरणानङ्गीकारात् घटविषयकज्ञानस्य स्वविषयावरणनिवर्तकत्वाभावात् बाधः। स्वविषयावच्छिन्नावरणनिवर्तकत्वविवक्षायामखण्डब्रह्मसाक्षात्कारे बाधः। दृष्टान्तासिद्धिश्च। अन्धकारस्य स्वविषयावच्छिन्नानावारकत्वात्।

हेतौ च प्रकाशकत्वम् किं ज्ञानत्वम्, किं वा ज्ञान( क)कारणत्वम्, अथवा (क)कारणानुग्राहकत्वम्, यद्वा ज्ञानहेतुत्वमात्रम्, किं वा प्राकट्यहेतुत्वम्, यद्वा साक्षाद्वा परम्परया वा विषयव्यवहारानुगुण्यमात्रहेतुत्वमिति।

नाद्यः, दृष्टान्तस्य साधनविकलत्वात्। न द्वितीयः—पक्षे तदभावेन स्वरूपासिद्धिप्रसङ्गात्। दीपस्य च करणभूतेन्द्रियानुग्राहकत्वेन साक्षात् करणत्वासिद्धेः। न तृतीयः, पक्षे तदभावात् स्वरूपासिद्धेरेव। नापि चतुर्थः, इन्द्रियादिष्वनैकान्त्यात् स्वरूपासिद्धेश्च। नापि पञ्चमः, प्राकट्यमनभ्युपगच्छतामप्रसिद्धेः। अभ्युपगच्छतामपि दीपप्रभायाः तद्धेतुत्वाभावेन साधनविकलत्वात्। नापि षष्ठः, इन्द्रियादिभिरनैकान्त्यात्।

किञ्च परोक्षज्ञाने व्यभिचारः। तस्याप्यज्ञाननिवर्तकत्वे अनुमितेरज्ञाननिवर्तकत्वेन स्वगोचरज्ञानविषयाज्ञानान्तरावश्यम्भावात्, तत्प्रकाशेऽपि तथेत्यनवस्थता। निवर्तकत्वे व्यभिचारः, अनुमानवैयर्थ्यं च। न च व्यवहार एव प्रयोजनम् अज्ञाननिवृत्त्यभावे तस्यैवाम्भवात् । ब्रह्मस्वरूपभूतज्ञाने सत्यपि ह्यज्ञानवशात् अस्ति प्रकाशत इति व्यवहाराभावात्, नास्ति न प्रकाशत इति व्यवहारं चाङ्गीकरोषि।

नन्वज्ञानाभाव एव व्यवहारप्रयोजकः न तु तन्निवृत्तिः। तेनाज्ञाने तदभावस्य स्वतस्सिद्धत्वात् अज्ञानानुमित्यापि तद्व्यवहारः स्यादेवेति चेन्न। तथापि वह्न्यनुमानात् तद्व्यवहाराभावप्रसङ्गात्। ज्ञानमात्रस्य तत्प्रयोजकत्वे ब्रह्मणोऽपि व्यवहारप्रसङ्गः। वृत्तेरेव व्यवहारमूलत्वमित्याज्ञा तु निर्मूलैव। वृत्तेरेव व्यवहारप्रयोजकत्वे आवरणकल्पनावैयर्थ्यम्। न च संशयनिवृत्तिः प्रयोजनम्। अज्ञाननिवृत्त्यभावे तदसिद्धेः। अज्ञानाभावस्य च प्रयोजकत्वे च वह्निसंशयानुच्छेदप्रसङ्गात्। ज्ञानस्य संशयनिवर्तकत्वे ब्रह्मणि संशयाभावप्रसङ्गात्। समानविषयावधारणस्य निवर्तकत्वेऽपि स एव दोषः। एककोटिकानवधारणत्वस्य निरासात्। यदि च समानप्रकारकावधारणं निवर्तकं ब्रह्मस्वरूपज्ञानं तु निष्प्रकारकमित्युच्यते, तर्हि अद्वैतसाक्षात्कारात् संशयानिवृत्ते तदर्थजिज्ञासानुपपत्तिः। तस्मादज्ञाननिवृत्तावप्रयोजकत्वमेव।

यत्तु कश्चिदाह- जागराद्यपरोक्षवृत्तित्वं पक्षतावच्छेदकम्, तेन सुखादिप्रमायां धारावहिकद्वितीयादप्रमायामपरोक्षवृत्तौ च न बाधः। किञ्च पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिविरोधिज्ञानं न बाधः। किन्तु तत्सामानाधिकरण्येन साध्यसिद्धिविरोधिज्ञानम्। तथाच वृत्तिमात्रे साध्याभावेऽपि कस्याञ्चिद्वृत्तौ साध्यसत्त्वात् यथाश्रुतेऽपि पक्षे नोक्तबाधावतारः। साध्ये च प्रागभावातिरिक्तेति विशेषणं न व्यर्थम्। प्रतियोगिनः प्रागभावनिवृत्तिरूपत्वे प्रतियोगिध्वंसे सति प्रागभावोन्मज्जनप्रसङ्गात्। प्रतियोग्यतिरिक्तैव हि प्रागभावनिवृत्तिः। न च निवृत्त्यानन्त्यं प्रागभावानन्त्यं च स्यादिति वाच्यम्। घटप्रागभावानन्त्यवदिष्टत्वात्। अतः स्वप्रागभावनिवर्तकतया अर्थान्तरवारकं सार्थमेव तत्। नापि द्वितीयविशेषणं व्यर्थम्। स्वोत्पादकादृष्टमादायार्थान्तरवारकत्वात्। अज्ञानादिसाक्षितया प्रकाशमानेऽपि चैतन्ये आवरणमुपपद्यते। प्रकाशमानेऽपि सूर्यादौ मेघादेरावरणत्वदर्शनात्। आवरणत्वं च प्रतिबन्धकत्वम्। तस्य त केवलान्वयित्वेनाव्यावर्तकतया स्वविषयावरणेत्यप्यावश्यकम्। चतुर्थमपि युक्तं विषयगताज्ञातत्वव्युदासार्थत्वात्। हेतावपि न विकल्पावकाशः, प्रसिद्धानुमानेऽपि एतद्देशैतत्कालीनधूमवत्त्वादिविकल्पेन साधनवैकल्यस्वरूपासिद्ध्यादिना दूषणप्रसङ्गात्। उभयानुगतसामान्यस्य तत्र हेतुत्वे अत्राप्यावरणसामान्यनिवर्तकत्वेन प्रत्यक्षसिद्धप्रकाशसामान्यस्य हेतुत्वासम्भवात्। न च पृथिव्या गोत्वेन शृङ्गित्वानुमानम्, विपक्षे बाधकाभावेनाप्रयोजकत्वात्। अत्र चावरणसामान्यनिवर्तकतायाः प्रत्यक्षसिद्धत्वेनानुकूलतर्कसत्त्वात्। न चास्या अनुमितेः प्रकाशितप्रकाशकत्वे वैयर्थ्यम्। असिद्धत्वशङ्कानिरासार्थत्वात्। तस्मात् अनवद्यमिदमनुमानमिति।

**सिद्धान्तः**

अत्र ब्रूमः - एवमप्यनवधारणात्मकजागराद्यचन्द्रादिप्रत्यक्षस्यापि पक्षतया तत्र बाधः। अवधारणत्वविवक्षायां जागरादौ दैवादद्वैतवाक्यस्मरणानन्तरम् उत्पन्ने भेदवासनादिप्रतिबन्धकार्ये अवधारणात्मके अद्वैतसाक्षात्कारे बाधः, तद्व्यावृत्त्यर्थं पक्षविशेषणे तत्रैव व्यभिचारः।

प्रकाशितार्थप्रकाशकत्वेन व्यभिचारोद्धारे पूर्वदिनानुभूतघटादिगोचरजागराद्यसाक्षात्कारे भागासिद्धिः। जले अधोगत्वभ्रमपूर्वभाविनि वृक्षोर्ध्वाग्रत्वज्ञाने च जागराद्ये बाधः - तत्र भ्रमानुसारेण ज्ञानस्यावश्यकत्वात्।

यच्च किञ्च पक्षतावच्छेदकेत्यादि, तदपि न। अंशतो बाधेनानुमितिप्रतिबन्धाभावेऽपि साध्याभाववतः पक्षीकरणं प्रयोगस्य दोष एव। अन्यथा प्रतिज्ञाविषये सर्वत्र धर्मिणि बाधेऽपि दैवादबाधितपक्षान्तरे व्याप्यवत्तया उपस्थितेः अनुमितेरबाधात् प्रयोगस्यादुष्टत्वापत्तेः वादी न निगृह्येत। यदि च स्वाभिमतपक्षतावच्छेदकसामानाधिकरण्येन साध्यासिद्धेः निगृह्यते तर्हि पक्षतावच्छेदकयावदधिकरणे साध्यासिद्धावपि वादी निगृह्येत, तथैव कथकसम्प्रदायात्। अत एव पूर्वे निबन्धारः बाधितेतरपक्षपरिग्रहे महान्तं यत्नमास्थिताः। कथमन्यथा प्रमाणपदमपि तव सङ्गच्छते।

किञ्च विवादाध्यासितमित्येतावता पक्षपरिग्रहे शेषवैयर्थ्यात् तस्य तद्विवरणरूपता वाच्या। तद्विवरणरूपत्वं च विवादपदमात्रनिर्देश एव स्यादिति तत्सिद्धये बाधितव्यावृत्तिः कार्यैव। किञ्चात्र बाधितस्थलेऽपि साध्यसिद्धये साध्यं निरुध्यते न वा। आद्ये किमर्थोऽयं संरम्भः। द्वितीये तत्रैव व्यभिचारः।

यदपि च साध्ये चेत्यादि, तदप्यसाधु-तथा सति त्वदभिमतमोक्षदशायां घटध्वंसे निवृत्ते घटोन्मज्जापत्तेः।

ननु तत्राविद्यालक्षणकारणाभावान्न घटोन्मज्जनमिति चेत्, हन्त तर्हीदानीं घटध्वंसकाले घटप्रागभावस्य कारणं पश्यसि येन प्रागभावोन्मज्जनमापादयसि। ननु सर्वस्य प्रागभावतदभावयोरन्यतरवत्त्वनियमात् प्रागभावाभावध्वंसे प्रागभावः स्यादिति चेत्, तर्हि घटप्रागभावदशायां ध्वंसः स्यात्, ध्वंसप्रागभावात्मकघटस्याभावात्। किञ्च घटात्यन्ताभावस्य घटप्रागभावाधिकरणे अभावात् घटः स्यात्। अत्रापि ध्वंसप्रागभावो घटात्यन्ताभावाभावोऽपि प्रतियोगिनोऽन्य एवेति चेत्, न, गौरवात्। लाघवेन घटध्वंसयोः प्रागभावध्वंसरूपतायाः घटतत्प्रागभावयोः ध्वंसप्रागभावरूपतायाः घटतद्ध्वंसप्रागभावानामत्यन्ताभावाभावत्वस्य च कल्पनात्। किञ्च प्रागभावनिवृत्तेः घटजन्यतया घटस्य द्वितीयक्षण एवोत्पत्तेः घटोत्पत्तिक्षणे प्रागभावः स्यादेव। तच्चानुपपन्नम्। प्रतियोग्यभावयोर्विरोधात् प्रागभावत्वविरोधाच्च। अत्यन्तशब्दस्य क्षणिकत्वपक्षे तस्य प्रागभावविरोध एव न स्यात्, रूपतत्प्रागभावयोः युगपत् साक्षात्कारश्च स्यात्। अस्तु वा प्रागभावनिवृत्तिरन्यैव। तथापि तत्र न प्रतियोगिनो जनकत्वसम्भवः मानाभावादुक्तविरोधाच्च। तत्सामग्र्या एव जनकत्वसम्भवात् प्रागभावभेदेन च सामग्रीभेदात् कार्यभेदोपपत्तेः।

यच्च अज्ञानादिसाक्षितयेत्यादि, तदपि न - प्रकाशावरणयोरविरोधे आवरणस्यैवोत्सादात्। सूर्यदृष्टान्तोऽपि विषमः, तत्र हि बहुलालोकनिस्सरणप्रतिबन्धो वा भूयोऽवयवेन्द्रियसन्निकर्षप्रतिबन्धो

वा आवरणम्। न चात्र तत्प्रसङ्गोऽपि। किञ्च न घटादिप्रतिबन्धकत्वमज्ञानस्य तमसो वेति बाधो व्याप्यत्वासिद्धिश्च। तदज्ञानप्रतिबन्धकत्वविवक्षायामपि ज्ञानप्रागभावात्यन्ताभावयोः प्रतिबन्धकत्वाभावेन आदिमान्तिमविशेषणवैयर्थ्यात्। अज्ञानस्य प्रतिबन्धकत्वाभावेन बाधश्च। तन्निवर्त्यस्य तत्प्रतिबन्धकता नास्तीति त्वयोक्तत्वात्।

यदपि चतुर्थमपीत्यादि, तदपि न। विषयगताज्ञातत्वस्य विषयगतज्ञानाभावरूपत्वे ज्ञानविषयत्वाभावरूपत्वे च स्वनिवर्त्यपदेन तद्व्यावृत्तिसिद्धेः। यच्च हेतावपीत्यादि, तन्न। पक्षदृष्टान्तानुगतं प्रकाशकत्वं न विद्यते। शब्दसाम्येन चेत्, पृथिव्या गोत्वात् शृङ्गं समापतेदित्यनेनैव दत्तोत्तरत्वात्। अनुकूलतर्काभावस्य चोभयत्राविशेषात्। आलोकत्वतमस्त्वादिभिरेव निवर्त्यनिवर्तकभावात्। यच्च न चाऽस्या अनुमितेरित्यादि, तदपि न। असिद्धत्वशङ्कानिरासः किमनुमितेरसिद्धत्वाभावविषयत्वात् निरुक्तसाध्यविषयत्वाद्वा? नाद्यः, तस्य साध्याप्रवेशात्। न द्वितीयः, अस्या अनुमितेः प्रकाशितप्रकाशकत्वे पूर्वप्रकाशेनैवाप्रसिद्धत्वशङ्कायाः निरासेन तद्वैयर्थ्यात्।अप्रकाशितार्थप्रकाशकत्वे व्यभिचारः।

**पूर्वपक्षः**

यदाह नवीनः—जन्यसविकल्पकाजन्यचाक्षुषघटप्रमाणज्ञानं पक्षः। अतो न सुखादिप्रमादिषु पूर्वोक्तबाधः। न च पटज्ञानजन्यस्य तदुत्तरक्षणजन्मनोऽपि घटज्ञानस्य पक्षतावच्छेदकाक्रान्तत्वात् तत्र च स्वसमानाधिकरणेत्यादिना वक्ष्यमाणस्याप्याद्यहेतोरभावात् भागासिद्धिरिति वाच्यम्, सविकल्पकाजन्येत्यनेन स्वपूर्वसविकल्पकध्वंससामग्रीशून्यसमये चक्षुर्जन्यत्वस्य विवक्षितत्वात्।

अन्धकारनिवृत्त्यव्यवहितोत्तरकालीनचाक्षुषज्ञानं वा पक्षः। स्वविषयावरणस्वनिवर्त्यव-स्त्वन्तरपूर्वकमित्येकं साध्यम्। स्वविषयावरणत्वं च स्वजननायोग्यत्वम् स्वजन्यध्वंसप्रतियोगित्वम्। वस्तुपदं च स्वपरम्। तदन्तरं तदन्यत्। अनेन स्वस्य स्वाधिकरणक्षणोत्तरक्षणे सत्त्वेन स्वपूर्वत्वमस्तीत्यर्थान्तरता निरस्ता। इदं च साध्यं प्रागभावनिवृत्तिः प्रतियोग्यतिरिक्तेतिमते। तेन स्वनिवर्त्येति इच्छाप्रागभावादिनाऽर्थान्तरवारणम्। स्वविषयावरणेति स्वप्रागभावेनार्थान्तरत्वं वारितम्। स्वप्रागभावातिरिक्तस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकमित्यपरं साध्यम्। इदं च प्रतियोग्येव प्रागभावनिवृत्तिरित्येतन्मते। अत्र च स्वसमानाधिकरणः प्रागभावः स्वप्रागभावः। तेनेच्छाप्रागभावादिभिः नार्थान्तरत्वम्। आत्मत्वादिनाऽर्थान्तरवारणाय स्वनिवर्त्येति। स्वदेशगतत्वं च स्वसमानाधिकरणत्वे सति प्रत्यक्षत्वम्। तेन स्वजनकादृष्टादिभिः नार्थान्तरता।

अथवा एकमेव साध्यम्। अत्र स्वप्रागभावव्यतिरिक्तेत्यादीनां पूर्वोक्त एवार्थः। स्वदेशगतेत्यत्र तु स्वाश्रये वर्तमानत्वमेव विवक्षितम्। अत्र च इच्छादिप्रागभावः स्वजनकादृष्टमात्मत्वादिकं चिकीर्षादिद्वारा स्वजन्यतन्तुसंयोगघटादिकार्यप्रागभावश्च क्रमाद्व्यवच्छेद्यानि। अभावान्यत्वात् प्रागभावान्यत्वमन्यदेवेति न वैयर्थ्यमपि।

अथवा स्वप्रतियोगिकः प्रागभावः स्वप्रागभावः स्वविषयावरणत्वं स्वविषये संशयादिजननयोग्यत्वम्। स्वसत्ताक्षणनियतध्वंसप्रतियोगित्वं स्वनिवर्त्यत्वम्। ततश्च प्रागभावोऽपि परमते विशेषादर्शनतया संशयादिजनक इति स्वप्रागभावस्वजनकादृष्टान्धकारादिव्यावृत्तये स्वप्रागभावेत्यादि विशेषणम्। परमते मनस्संयोगपूर्वकत्वेनार्थान्तरतानिवृत्तये स्वनिवर्त्येति।

अथवा पराभिमतप्रागभावान्यत्वज्ञानसमानविषयत्वज्ञाननिवर्त्यत्वज्ञानसमानाश्रयत्वविशिष्टाज्ञाननिवृत्त्यर्थं तानि विशेषणानीति न कस्यापि वैयर्थ्यम्। एकेनापि तेन विना उद्देश्यसाध्यासिद्धेः, येन विशेषणेन विना स्वाभिमतार्थो न सिध्यति तस्यैव साध्यविशेषणत्वात् इति। स्वसमानाधिकरणविशिष्टाज्ञानध्वंसोत्पत्तिसमयानाधारस्थितिकचाक्षुषसविकल्पकान्धकार-

निवर्तकालोकान्यान्यत्वात् इति हेतुः। अत्रासिद्धिसाधनवैकल्यपरिहाराय निर्विकल्पके व्यभिचारवणाय च सविकल्पकेत्यादि। सुखप्रत्यक्षे व्यभिचारवारणाय चाक्षुषेति।

यद्वा, एतज्ज्ञानविषयदेशीयान्धकारस्थितिसमयास्थितिकप्रत्यक्षत्वे सति एतज्ज्ञानोत्पत्तिसमये एतद्विषयसम्बधित्वादिति हेतुः। देशान्तरीयद्वितीयादिप्रभायां व्यभिचारवारणाय एतद्विषयसम्बन्धित्वादिति। धारावाहिकद्वितीयादिज्ञानव्यावृत्तये एतज्ज्ञानोत्पत्तिसमय इति। एतद्धेतुनिर्विकल्पकनिवृत्तये प्रत्यक्षेति। एतद्विषयपरकीयानुमित्यादौ व्यभिचारवारणाय अन्धकारस्थितिसमयास्थितिकेति। तच्च अन्धकारस्थितिसमयस्थित्यभावप्रयोजकरूपवत्त्वं विवक्षितम्। तच्चालोके आलोकत्वं ज्ञाने चाक्षुषत्वमस्ति। अनुमितौ तु न किञ्चिदिति न परानुमितौ व्यभिचारः। पक्षीकृतज्ञानस्यापि देशान्तरीयान्धकारसमानकालीनत्वात् असिद्धिवारणाय एतज्ज्ञानविषयदेशीयेति।

यदा द्वितीयसाध्यं प्रति पक्षहेत्वोः प्रयोगः-तदा न तयोरर्थान्तरव्यावर्तकविशेषणमुपादेयम्। तेन विनापि तत्र पूर्वज्ञाननिवर्तकतया तत्साध्यस्य सत्त्वेन व्यभिचाराभावात्।

**हेतुपरिष्कारः**

यद्वा एतद्विषयमात्रावारकनिवर्तकत्वे सति आवारकान्यत्वं हेतुः। मात्रपदमीश्वरादौ व्यभिचारवारणाय। तेषामेतज्ज्ञानाविषयरसाद्यावारकत्वं प्रत्यपि निवर्तकत्वात्। आवारकत्वं च तद्विषये नास्तीत्यादिव्यवहारप्रयोजकत्वम्। न च वर्णितसाध्यसिद्धेः पूर्वमेतज्ज्ञानं नास्तीति वाच्यम्। रूपादिचाक्षुषज्ञानाभावे तस्मिन् संशयादिजनकतदज्ञानरूपावरणस्य तत्सत्त्वे तदभावस्य च अनुभवसिद्धत्वेन भावरूपाज्ञानात्मकावरणनिवर्तकत्वज्ञानाभावेऽपि सामान्यतः सिद्धत्वात्।

तद्विषयावरणसमयावृत्तित्वे सति तदावरणनिवर्तकत्वं वा हेतुः। एतत्सिद्धिः पूर्ववदेव। न चात्राप्रयोजकत्वम्। प्राथमिकज्ञानविषये उभयवादिसम्मतस्य अज्ञातत्वस्य भावरूपाज्ञानानङ्गीकारे कथमपि निर्वक्तुमशक्यत्वात्। ज्ञानप्रागभावस्याज्ञानरूपत्वे द्वितीयादिज्ञानदशायामपि

अज्ञातत्वव्यवहारप्रसङ्गात्। लाघवेनाप्रकाशशब्दस्य भावरूपाप्रकाशविषयत्वौचित्याच्च। भावरूपाज्ञानाख्यावरणादन्यस्य प्रागभावादेः निवर्त्यत्वासम्भवेनावरणनिवर्तकत्वरूपहेतूच्छित्तिश्च विपक्षे बाधिक।

एवं देवदत्तप्रमा तत्स्थप्रमाभावातिरेकिणः अनादेः ध्वंसिनी प्रमात्वात् यज्ञदत्तप्रमा यथा इति चित्सुखोक्तानुमानमप्यत्र प्रमाणम्। न च सुखादिप्रमायां परोक्षवृत्तौ द्वितीयादिप्रत्यक्षप्रमायां च बाध इति वाच्यम्। जन्यसविकल्पकाजन्यदेवदत्तघटचाक्षुषप्रमायाः पक्षत्वेन विवक्षितत्वात्। न च धारावाहिकद्वितीयादिबुद्धौ व्यभिचारः, तत्रापि पक्षप्रमाप्रागभावातिरिक्तस्य स्वप्रागभावनिवर्तकतया साध्यसत्त्वात्। प्रागभावनिवृत्तिः प्रतियोग्यतिरिक्तेति मते इदं साध्यम्। तेन नाभावातिरिक्तेत्यन्तवैयर्थ्यम्, न वा दृष्टान्ते साध्यवैकल्यम्। न चेच्छादिप्रागभावादिनिवर्तकतयाऽर्थान्तरता। न च साध्ये प्रमापदवैयर्थ्यम्। अभावातिरिक्तेत्यत्र सामान्याभावस्यापि विवक्षिततया देवदत्तदुःखादिप्रागभावातिरिक्त-स्वाभावनिवर्तकतया अर्थान्तरतापरिहारार्थत्वात्। न चैवमपि पटप्रागभावातिरिक्तस्वप्रागभावनिवर्तकतया अर्थान्तरता, प्रमापदेन पक्षीभूतप्रमाया एव ग्रहणात्। न च तत्रापि पक्षीभूतप्रमामात्रस्यार्थान्तरता शङ्कनीया। प्रमाव्यक्तीनां प्रत्येकमेव पक्षत्वात्। न चैवं देवदत्तगतत्वविशेषणं व्यर्थम्, पक्षीकृतप्रमाधिष्ठानरूपस्वाभावातिरिक्तान्तःकरणगतप्रागभावनिवर्तकत्वेन अर्थान्तरतापरिहारार्थत्वात्।

अथवा जन्येत्यादि निरुक्तमेव पक्षतावच्छेदकम्।साध्ये चाभावातिरिक्तेत्यत्र सामान्याभाव एवात्र विवक्षितः। न चैवं प्रमापदवैयर्थ्यम्, देवदत्तगतप्रमानिवर्त्याज्ञाने देवदत्तगतत्वस्यावश्यकत्वात्। तस्य चाज्ञानस्य स्वनिवृत्तिप्रागभावरूपत्वाच्च। पक्षीकृतप्रमाया देवदत्तगताभावातिरिक्तनिवर्तकत्वस्य बाधितत्वेन प्रमापदस्य तत्परिहारार्थत्वात्। न चाप्रयोजकता, तर्काणामुपन्यस्तत्वात्।

### अनुमानान्तरपरिष्कारः

अनुमानान्तराण्यप्यत्र प्रमाणानि ।इच्छाद्वेषप्रयत्नासमानकालीनसामग्रीजन्यप्रत्यक्षभावधर्माजन-कस्वसामग्रीकालीनजन्यविशिष्टज्ञानाविषयविषयकघटादिप्रत्यक्षप्रमा ज्ञानातिरिक्तप्रत्यक्षनिवर्तिका स्वसामग्रीकालीनजन्यविशिष्टज्ञानाविषयकबाह्यविषयकजन्यप्रमात्वात्। स्वविषयध्वंसजनक-प्रतियोगिप्रत्यक्षवत्। पक्षे परोक्षप्रमावारणाय प्रत्यक्षेतिपदम्। स्वमते शब्दजनिताहमाकारापरोक्षवृत्तौ बाधवारणाय घटादीति। धारावाहिकद्वितीयादिज्ञानव्यावृत्तये स्वसामग्रीकालीनेत्यादि। इच्छादिप्रागभावनिवर्तकतया अर्थान्तरताव्यावृत्तये धर्माजनकेति। संस्कारजनकतया असम्भववारणाय प्रत्यक्षेतिपदम्। स्वध्वंसजनकतया असम्भवो मा भूदिति भावरूपपदम्। इच्छाद्यनन्तरभाविघटादि-प्रमायाः तन्निवर्तकतया अर्थान्तरता मा भूदिति प्रत्यक्षेति। स्वनिवर्तकतया विशेषणज्ञानादिनिवर्तकतया चार्थान्तरं मा भूदिति ज्ञानातिरिक्तेति। हेतौ परोक्षप्रमायामुक्ताहमाकारवृत्तौ द्वितीयादिज्ञाने च व्यभिचारवारणाय स्वसामग्रीत्यादि विशेषणं बाह्यपदं विषयजन्यपदं च।

यद्वा इच्छाद्वेषप्रयत्नासमानकालीनेत्येतद्वहिर्भावेनैव पक्षः। तत्र च पक्षविशेषणप्रयोजनानि पूर्वोक्तान्येव। कार्यसमानाधिकरणातिरिक्तप्रत्यक्षनिवर्तकमिति साध्यं पूर्वोक्तमेव। अत्रापि प्रत्यक्षपदकृत्यं उत्तरसाध्येष्वप्येवं द्रष्टव्यम्। ज्ञानेच्छादिनिवर्तकत्वेन अर्थान्तरतावारणाय कार्यसमानाधिकरणातिरिक्तेति। अज्ञानस्यापि समानाधिकरणतया बाधवारणाय कार्येति।

यद्वा कार्यत्वानधिकरणप्रत्यक्षनिवर्तकमिति साध्यम्। अत्र च परमतानुसारेण घटादिप्रागभावनिवर्तकमृदादिप्रत्यक्षं दृष्टान्तः। इच्छादिनिवर्तकत्वेन अर्थान्तरवारणाय कार्यत्वानधिकरणेति विशेषणम्।

**साध्यान्तरम्**

यद्वा जन्यज्ञानासहकृतसामग्रीजन्यध्वंसप्रतियोगिजातीयातिरिक्तज्ञानान्यप्रत्यक्षनिवर्तकमिति साध्यम्। अत्र जन्येत्यादिकं ज्ञानादिकं ज्ञानान्यत्वं च प्रत्यक्षविशेषणम्। स्वस्वजनकविशेषणज्ञाननिवर्तकतया अर्थान्तरतावारणाय ध्वंसप्रतियोगीत्यादि। तावत्युक्ते अज्ञानस्यापि विनाशित्वात् बाधः स्यादिति जन्यज्ञानेत्यादिप्रतीकम्। न च घटध्वंसजनकघटप्रत्यक्षे साध्यवैकल्यम्। घटस्यापि सत्तादिना तादृशध्वंसप्रतियोगिजातीयत्वादिति वाच्यम्। ध्वंसप्रतियोगिजातीयपदेन तादृशध्वंसप्रतियोगिवृत्तिबाह्यावृत्तिजातिमत्त्वस्य विवक्षितत्वात्। जातिरहितप्रागभावनिवर्तकमृदादिज्ञानं वा अत्र दृष्टान्तः।

जन्यज्ञानाजन्यध्वंसप्रतियोगिजातीयातिरिक्तज्ञानान्यप्रत्यक्षनिवर्तकमिति वा साध्यम्। दृष्टान्ते साध्यवैकल्योद्धारः पूर्ववदेव। स्वेन अर्थान्तरतानिवृत्तये ज्ञानान्येति। पूर्ववदेव ध्वंसप्रतियोगीत्यादेः जन्यज्ञानेत्यादेश्च प्रयोजनम्। न चात्र साध्यद्वयेऽपि बाह्यावृत्तिजातिमद्भिन्नप्रत्यक्षनिवर्तकमित्येतावता अभीष्टसिद्धेः शेषपदवैयर्थ्यम्। विशिष्टाभावस्यान्यत्वात्। गुणत्वानधिकरणप्रत्यक्षनिवर्तकत्वं वा साध्यम्। गुणत्वेत्यादिकम् इच्छादिनिवर्तकत्वेन अर्थान्तरतावारणार्थम्।

**साध्यान्तरम्**

यद्वा स्वस्थितिक्षणनियतस्वविनाशसामग्रीमद्भिन्नप्रत्यक्षनिवृत्तौ चरमकारणत्वं साध्यम्। इच्छादिनार्थान्तरतां व्यावर्तयितुं स्वस्थितीत्यादि। सिद्धान्ते यावत्कारणनाशं वृत्तिज्ञानस्य स्थायित्वात् स्वनिवर्तकतया अर्थान्तरवारणाय चरमकारणत्वपर्यन्तम्। अत्र सर्वत्रापि पूर्वानुमानोक्त एव हेतुः। यथासम्भवं तत्रोक्त एव दृष्टान्तः।

यद्वा चेष्टानपेक्षज्ञानजन्यप्रत्यक्षनिवर्तकम्, चेष्टाजन्यान्यकार्यातिरिक्तप्रत्यक्षनिवर्तकम्, चेष्टानिमित्तजातीयातिरिक्तप्रत्यक्षनिवर्तकम्, अहमनुभवविषयधर्मातिरिक्तनिवर्तकम् इत्येवमादि साध्यं द्रष्टव्यम्।

एवमविद्या महाविद्यादिभिरपि सिध्यति। अयं घटः एतद्घटाज्ञानान्यान्याभावान्यः,

मेयत्वात्, घटवत्। एतद्घटाज्ञानाभ्यां यदन्यत् पटादि सर्वम्, ततोऽन्यः एतद्घटः, अज्ञानं च, तादृशभावादन्यत्वं च एतद्घटरूपाभावान्यत्वस्य अत्राबाधितत्वात् अज्ञानस्य भावत्वमादाय सिध्यति। घटान्यत्वमादाय पक्षातिरिक्ते साध्यसिद्धिः। अज्ञानं स्वस्वेतरवृत्तित्वरहितभाववृत्ति-धर्माधिकरणं ज्ञेयत्वात्, घटवत्। अज्ञानतदितरवृत्तित्वरहितो धर्मः अज्ञानमात्रवृत्तिर्वा तदितरमात्र-वृत्तिर्वा स्यात्।तत्र तदितरमात्रवृत्तिभाववृत्तिधर्माधिकरणत्वसाधने बाधात् स्वमात्रवृत्तिभाववृत्तिधर्ममादाय साध्यसिद्धौ अज्ञानस्य भावत्वसिद्धिः। अज्ञानान्यत्वमादाय सर्वत्र भावेष्वभावेषु च साध्यसिद्धिः।

अज्ञानत्वं स्वस्वेतरवृत्तित्वरहितभाववृत्तिधर्मवत् मेयत्वात्, घटवत्। अज्ञानत्वेतरमात्रवृत्तिधर्मस्य अज्ञानत्वे बाधितत्वात् अज्ञानत्वमात्रवृत्तिभाववृत्तिवृत्तिधर्ममादाय साध्यपर्यवसानेन अज्ञानस्य भावत्वसिद्धिः। अज्ञानत्वान्यत्वस्य च भाववृत्तिप्रमेयत्वादिवृत्तित्वात् तदाश्रयत्वात् सर्वत्रापि सपक्षे साध्यसिद्धिः। भावत्वं स्वस्वेतरवृत्तित्वानधिकरणाज्ञानवृत्तिवृत्तिधर्मवत् मेयत्वात्, घटवत्। भावत्वेतरमात्रवृत्तिधर्मस्य भावत्वे बाधात् भावत्वमात्रवृत्त्यज्ञानवृत्तिवृत्तिधर्ममादाय साध्ये वाच्ये अज्ञानस्य भावत्वसिद्धिः। अज्ञानवृत्तिप्रमेयत्वादिवृत्तिभावत्वान्यत्वमादाय सपक्षे साध्यसिद्धिः। न च अप्रयोजकत्वम्, घटाद्यज्ञानाभावे तद्विषयवल्मीकभ्रमानुत्पादप्रसङ्गात्, न जानामीति ज्ञानसामान्यविरोध्यभावप्रसङ्गाच्च।

घटध्वंसाजनकघटापरोक्षप्रमाणज्ञानं घटं न जानामीत्यनुभवविषयनिवर्तकं घटापरोक्षप्रमाणज्ञानत्वात् घटध्वंसजनकघटप्रत्यक्षवत्। न च प्रागभावेन अर्थान्तरता। तस्य स्वानिवर्त्यत्वात्।निवर्तकत्वयोग्यता................साध्येति............ न धाराद्वितीयादिज्ञाने बाधो व्यभिचारो वा।

यद्वा स्वसामग्रीकाले स्वसमानाधिकरणज्ञानाविषयविषयत्वं पक्षे जन्यसविकल्पकाजन्यत्वं च हेतौ विशेषणमस्तु। मूलाज्ञाने तु प्रयुज्यते। ब्रह्मसाक्षात्कारः स्वसमानविषयभावरूपाज्ञाननिवर्तकः अज्ञातविषयसाक्षात्कारत्वात्, घटादिसाक्षात्कारवत्। न च अप्रयोजकत्वम्। मूलाज्ञानानङ्गीकारे मोक्षशास्त्रानर्थक्यप्रसङ्गात्। दुःखध्वंसस्य अपुरुषार्थत्वात्। तत्त्वज्ञानं विनाऽपि प्रागभावक्षयादेवोपपत्तेश्च। धर्माधर्मादिरूपबन्धहेतोः सत्यत्वे ज्ञानानिवर्त्यत्वप्रसङ्गात्। भोगादेव कर्मणां क्षय इति चेन्न, तथापि ज्ञानवैयर्थ्यप्रसङ्गात्। अनन्तकर्मणां युगपद्भोगासम्भवात्। क्रमेण भोगे कर्मप्रवाहस्यानुच्छेदप्रसङ्गात्। आनन्दस्यापि जन्यस्य अमृतत्वायोगात्। मुक्तौ शरीरत्यागाभावेन तदुत्पत्यसम्भवाच्च। नित्यानन्दाभिव्यक्तिर्भोग इत्यत्रापि अभिव्यक्तिज्ञानं तत्प्रागस्ति वा न वा। अन्त्ये तस्य कार्यत्वात् अनित्यत्वापत्तिः। पश्चाच्च शरीराद्यभावात् नोत्पत्तिरिति मुक्तेरनित्यत्वप्रसङ्गः। प्रथमे च अनावृतस्य तस्य इदानीं सत्त्वे अनुपलम्भो न स्यात्। आवरणस्य च स्वरूपभूते स्वधर्मे वा आनन्दे वास्तवस्यासम्भवात्। न हि प्रकाशाप्रकाशत्वे युगपदेकस्य वस्तुनः सम्भवतः। न चेदानीमानन्दः सङ्कुचितो भवति मुक्तौ तु विस्तृत इति

वाच्यम्। निरवयवे आनन्दे वास्तवसङ्कोचादेरसम्भवात्। लिङ्गशरीरनिवृत्तिर्मुक्तिरिति च न साधु। तस्यापुरुषार्थत्वात्। तस्मात् आनन्दरूपात्मरूपावारकाविद्यानिवृत्तिः मोक्ष इत्यवश्याभ्युपगन्तव्यम्। शास्त्रार्थवत्त्वाय उपादानत्वम् अनादिज्ञाननिवर्त्यवृत्ति कारणत्वावान्तरधर्मत्वात्, निमित्तत्ववत्। असमवायित्वस्यासिद्धेः न तत्र व्यभिचारः।

अनाश्रितवृत्तिकारणविभाजकधर्मत्वादिति वा हेतुः। न च अप्रयोजकत्वं, सर्गाद्यकार्यस्य उपादानान्तरानिरूपणात् निरवयवाणूनां संयोगासम्भवात्। तत्र प्रमाणाभावाच्च नोपादानत्वम्। आत्मनस्तु निरवयवस्य न परिणामः। विवर्तस्तु असत्यरूपान्तरापत्तिरूपः असत्यप्रपञ्चसमानस्वभावाविद्यां विना न सम्भवति। स्वतन्त्रा तु पराभिमतप्रकृतिः नास्त्येव, मानाभावादिति नोपादानम्। परतन्त्रा च साऽविद्यैव, तस्या अनादित्वात्, ज्ञाननिवर्त्यत्वाच्च। ज्ञाननिवर्त्यत्वं च तस्याः श्रुतिसिद्धम्। मृद्घट इत्यादिना अनुभूयमानजाताजाताभेदस्य विरोधेन वास्तवत्वासम्भवात्। अनिर्वचनीयस्य तादृशाविद्यां विना असम्भवाच्च।

अत एवोपादानत्वमिति ज्ञाननिवर्त्यवृत्ति न भवति। निमित्तत्वातिरिक्तकारणत्वावान्तरधर्मत्वात्, असमवायित्ववदिति प्रत्यनुमानम् निमित्तत्वेन सोपाधिकत्वं च परास्तम्। तर्काभावेन दुर्बलत्वात्। साध्याव्यापकत्वाच्च। प्रपञ्चस्य सत्यकारणकत्वे सत्यत्वापत्तेः। तद्भेदस्यापि तथात्वात्। तस्य सर्वात्मत्वाद्वितीयत्वादिपरानेकश्रुतिबाधप्रसङ्गेन कारणान्तरस्य बाधितत्वाच्च। तस्मात् अनादिज्ञाननिवर्त्योपादानं नाज्ञानादन्यत् साधितमिति तत्सिद्धिः।

एवं पीतपटसमानकालीनः श्यामघटः पीतघटोपादानजडोपादानकः घटत्वात्, पीतघटवत्। अत्र पीतघटेत्यादि पक्षविशेषणं पीतघटावयवैरेव कालान्तरे श्यामघटार्म्भम्भवादर्थान्तरतावारणाय। न चाप्रयोजकत्वम्। अन्यथाऽनुगतबुद्धेराकस्मिकत्वप्रसङ्गात्। अविद्यातिरिक्तघटत्वे प्रमाणाभावात्।

एवमनादिभावत्वं ज्ञाननिवर्त्यवृत्ति अनात्मवृत्तित्वात् घटत्ववत्। अनादित्वं ज्ञाननिवर्त्यभाववृत्ति जडभाववृत्तित्वात् घटत्ववत्। भावत्वम् अनादिज्ञाननिवर्त्यवृत्ति अनादिजडवृत्तित्वात्, प्रागभावत्ववत् इत्याद्यूह्यम्। सर्गाद्यकालीनं कार्यं जडोपादानकं कार्यत्वात्, घटवत्। तच्च लाघवादेकम्, सर्गाद्यकार्योपादानत्वात् अनाद्युपादानत्वाच्च भावरूपमेवेति, अनाद्येकं भावरूपं जडोपादानं सिद्धम्। तदेवाज्ञानमिति।

**सिद्धान्तः**

अत्रोच्यते यत्तावत् जन्यसविकल्पकेत्यादि पक्षतावच्छेदकमुक्तम्, तदनुपपन्नम्। तथाहि - भ्रमस्य अधिष्ठानादिसविकल्पकजन्यत्वमस्ति, न वा? आद्ये प्रथमविशेषणेनैव तद्व्यावृत्तिसिद्धेः (सिद्धिः?)। द्वितीये च शुक्तिगतरूपादिविषयतया तदज्ञाननिवर्तकत्वेन साध्यत्वात् प्रमाणपदवैयर्थ्यम्। प्रमाणज्ञानत्वमपि यदि तद्वति तत्प्रकारज्ञानत्वं तदा त्वन्मते प्रमाणपदेन भ्रमव्यावृत्तिः।

यद्यबाधितार्थविषयत्वं तदा त्वन्मते असिद्धिः। अधिष्ठानांशमादाय अबाधितार्थत्वं तु भ्रमप्रमयोस्तुल्यम्। अन्तःकरणवृत्त्यादिरूपत्वे अस्मन्मतेनाश्रयासिद्धिः।

किञ्च चैतन्यस्य तावत् चाक्षुषत्वमसिद्धम्। वृत्तेस्तदवच्छिन्नस्य वा पक्षत्वे आश्रयासिद्धिः। वृत्तेर्जडतया अज्ञानानिवर्तकत्वेन बाधश्च।

ननु परेषां यच्छाक्षुषं ज्ञानं तदाश्रयताबुद्धेः विवक्षितसाध्यव्याप्यहेतौ उत्पादेन वस्तूत्पादकतया तेषामदोषतया दोषान्तरकल्पनानवकाशात् साध्यसिद्धिरविकलैव। प्रयोगस्य परार्थतया तावतैव चारितार्थ्यादिति चेन्न। तथा सति अप्रयोजकत्वेन साध्यासिद्धेः। चैतन्यस्य नित्यत्वे हि तदावरणापेक्षा। न च विक्षेपार्थमपि तदपेक्षा। प्रपञ्चस्य मिथ्यात्वसिद्धौ तत्कारणानां मिथ्यावस्तूत्पादकतया तेषामेव दोषान्तरकल्पनानवकाशात् उभयसम्प्रतिपन्नपक्षापरिग्रहे कथकसम्प्रदायविरोधाच्च। अत एवान्धकारेत्यादिपक्षनिर्देशोऽपि निरस्तः।

स्वविषयावरणेत्याद्यसाध्यं चायुक्तम्। प्रागभावनिवृत्तेः प्रतियोग्यतिरेकपक्षेऽपि न तस्य प्रतियोगिसाध्यत्वं प्रागभावप्रतियोगिनोरेककालत्वविरोधादेः पूर्वमेवोक्तत्वेन प्रतियोगिसामग्र्यैव निवृत्तेः। न च सामग्र्यभेदात् कार्याभेदः। प्रतियोगित्वप्रागभावत्वरूपकारणतावच्छेदकभेदेन तद्भेदात् चरमकारणमेव निवर्तकत्वेन कल्प्यताम्। तथाच इच्छाप्रागभावस्यापि ज्ञाननिवर्त्यत्वात् न स्वनिवर्त्यपदेन तद्व्यावृत्तिः।

### द्वितीयसाध्यदूषणम्

प्रागभावेत्यादिद्वितीयसाध्येऽपि स्वजनकादृष्टेनार्थान्तरता। तस्यापि अलौकिकप्रत्यक्षविषयत्वात्। लौकिकप्रत्यक्षविवक्षायां अज्ञानस्य लौकिकप्रत्यक्षत्वाभावात् लौकिकप्रत्यासत्तिजन्यत्वरूपलौकिकत्वस्य नित्ये अज्ञानसाक्षिण्यभावात्। अलौकिकप्रत्यासत्त्यजन्यप्रत्यक्षविवक्षायम् ईश्वरप्रत्यक्षविषयत्वात् स्वजनकादृष्टमादाय अर्थान्तरतैव। जन्यत्वेन तद्विशेषणे अज्ञानसाक्षिणो नित्यत्वाद्बाधः। अज्ञानाकाराविद्यावृत्तिमादाय जन्यत्वोपपादने च अज्ञानावच्छेदकतयाऽदृष्टस्यैव भानात् सैवार्थान्तरता। साध्यद्वयेऽपि क्वचित् घटत्वनिर्विकल्पकानन्तरं पटादिवस्त्वन्तरविषयेच्छा ततो (विषयेच्छातः ?) घटत्वविशिष्ट-सविकल्पकसम्भवात् तत्रार्थान्तरता। विरोधिगुणतया घटचाक्षुषज्ञानस्य पटादिविषयेच्छानिवर्तकत्वात्। न च निर्विकल्पकानन्तरमविलम्बेन सविकल्पकस्यैव उत्पत्तेरन्तरा नेच्छादिसम्भवः इति वाच्यम्। तथा सति पटज्ञानानन्तरोत्पन्नघटज्ञाने आद्यहेत्वसिद्धिवारणाय सविकल्पकाजन्येत्यनेन सविकल्पकध्वंससामग्रीशून्यसमये चक्षुर्जन्यत्वमभिप्रेतमिति तव विवक्षानुपपत्तेः। तत्र घटत्वनिर्विकल्पकानन्तरं पटाद्यर्थान्तरज्ञानम्, अनन्तरं घटसविकल्पकमिति वक्तव्यत्वात्। यदि च घटज्ञानानन्तरं पटनिर्विकल्पकम्, अनन्तरं घटसविकल्पकं तत्रेति स्यात्, तदा पटसविकल्पकध्वंसोत्पत्तिसमयोत्पत्तिकतया घटसविकल्पकस्य तत्समयानाधारस्थितिकत्वस्य

सत्त्वेन भागासिद्ध्यभावात् तस्य पक्षबहिर्भावार्थं पक्षविवक्षानुपपत्तेः। न च स्मरणाद्यात्मकमेव तत्र घटत्वविशेषणज्ञानं तदनन्तरं पटज्ञानं तदनन्तरं घटसविकल्पकमिति वाच्यम्। जन्यसविकल्पकाजन्येत्यनेनैव पक्षबहिर्भावे सिद्धे विवक्षानुपपत्तितादवस्थ्यात् एतेन तृतीयसाध्यमपि निरस्तम्।

चतुर्थसाध्यमप्ययुक्तम् , स्वविषयसंशयजननयोग्यतातीतकालीनसाधारणधर्मदर्शनम् आदाय अर्थान्तरत्वात्, पक्षीभूतज्ञानसत्ताक्षणे तद्ध्वंसस्य सत्त्वात्। स्वसत्ताक्षणनियतध्वंसप्रतियोगीत्यत्र नियतपदं च व्यर्थम्।

ननुस्वसत्ताक्षणनियतध्वंसप्रतियोगीत्युक्ते क्वचित् स्वसत्ताक्षणे स्वजनकमनस्संयोगध्वंसस्य सम्भवादर्थान्तरतादवस्थ्यमिति चेत, नियतत्वविशेषणेऽपि तत्तादवस्थ्यात्। तस्य ध्वंसविशेषस्य पक्षीभूततज्ज्ञानव्यक्तिसत्ताक्षणनियतत्वात्। उद्देश्यसिद्धये विशेषणानीत्यपि पक्षो न युक्तः। स्वविषयावारकनिवर्तकत्वादिति हेत्वसिद्धिं परिहरता त्वया स्वविषयावारकत्वादिकस्य सिद्धत्वेन भावत्वमात्रे विप्रतिपत्त्या अनुमानप्रवृत्तिः इत्युक्तत्वेन स्वसमानविषयकत्वादीनां सिद्धत्वेन अनुद्देष्टव्यत्वात्।

ननु भावत्वेन सहासिद्धत्वात् स्वविषयावरणत्वादीनामुद्देष्टव्यतेति चेत्, तर्हि प्रमेयत्वादीनामपि भावत्वादिनिरुक्तधर्मैः सहासिद्धत्वात् तेषामपि साधनप्रसङ्गात्। तैर्विनाऽप्यज्ञानसिद्धेः न तेषामुद्देश्यतेति चेत्, तर्हि प्रागभावव्यतिरिक्तस्वविषयावरणपूर्वकमित्येतावतैव स्वेष्टसिद्धेः शेषवैयर्थ्यात्। न च तमोव्यावृत्यर्थत्वान्न व्यर्थतेति वाच्यम्। स्वनिवर्त्यस्वदेशगतेत्येतयोरन्यतरेणैव तद्व्यावृत्तिसिद्धौ अन्यतरवैयर्थ्यात्। आद्यहेतोः चतुर्थसाध्ये इच्छादिव्यवहितघटज्ञान-विनाशकालोत्पन्नतद्घटविषयज्ञाने व्यभिचारः। तस्याज्ञानानिवर्तकत्वेन पक्षबहिर्भावस्यावश्यकत्वात्।

## द्वितीयहेतुदूषणम्

द्वितीयहेतोरपि उक्तपक्षतावच्छेदकावच्छिन्नज्ञानस्य द्वितीयालोकेनापि सम्भवात् द्वितीयालोके व्यभिचारः। प्रथमालोकमात्रजन्यत्वं पक्षविशेषणमिति चेत्, जालसूर्यमरीचिकामात्रजन्यनिरुक्त-पक्षतावच्छेदकाक्रान्तत्रसरेणुप्रत्यक्षकालीने तन्मरीचिकानन्तरभाविनि प्रदीपालोके व्यभिचारात्। न च अन्धकारनिवृत्तीत्यादिपक्षाभिप्रायेणायं हेतुः, तत्र च एतत्पदेन अन्धकारनिवृत्त्यव्यवहितोत्तर-कालीनज्ञानस्यैव परामर्शात्, उत्पत्तिसमये तद्विषयसम्बन्धित्वाभावात् न द्वितीयालोके व्यभिचार इति वाच्यम्। एवमपि यत्र प्रथमालोकद्वितीयक्षणे अन्धकारनिवृत्तिद्वितीयालोकयोरुत्पत्तिः, तृतीयक्षणे घटज्ञाम्, तत्र द्वितीयालोके व्यभिचारात्।

किञ्च एतज्ज्ञानोत्पत्तिसमये एतद्विषयसम्बन्धिपरकीयद्वितीयादिज्ञाने व्यभिचारः।

यदत्रोक्तम् - तदीयप्रथमज्ञानस्यापि पक्षत्वेन तदुत्पत्तिकाले परकीयद्वितीयादिज्ञानस्य

तद्विषयसम्बन्धित्वाभावान्न व्यभिचार इत, तत्तुच्छम्। परकीयप्रथमज्ञानोत्पत्तिसमये एतद्विषयसम्बन्धित्वाभावेऽपि एतदीयप्रथमज्ञानोत्पत्तिसमये एतद्विषयसम्बन्धित्वस्य सत्त्वेन तत्र हेतुसत्त्वात्। जन्यसविकल्पकाजन्यचाक्षुषघटज्ञानस्य पक्षीकृतस्यैव एतत्पदेन अभिधानात्। यदि च पक्षीकृतयत्किञ्चिज्ज्ञानोत्पत्तिसमये तद्विषयसम्बन्धित्वेऽपि तादृशसर्वज्ञानोत्पत्तिसमये तद्विषयम्बन्धित्वाभावेन हेत्वभाव उ(च्यते)च्येत, तर्हि स्वरूपासिद्धिरेव। न हि कस्यापि ज्ञानस्य तादृशसर्वज्ञानोत्पत्तिसमये तद्विषयम्बन्धित्वमस्ति।

अपि च एतद्विषयसम्बन्धित्वं किमेतद्विषयकत्वम् एतद्विषयम्बन्धमात्रं व? नाद्यः, साधनवैकल्यात्। आलोकस्य निर्विषयत्वात्। द्वितीये तु अन्धकाराभावे व्यभिचारः।

किञ्च एतज्ज्ञानसमानकालीन-एतत्समानविषयपरकीयानुमितिविशेषे व्यभिचारः। ननु अन्धकारस्थितिसमयस्थित्यभावप्रयोजकरूपवत्त्वं विवक्षितमित्युक्तमिति चेन्न, प्रयोजकत्वं हि नाव्याप्यत्वादन्यत् सम्भवति। तच्चोक्तानुमितिविशेषेऽपि चाक्षुषज्ञानसमकालोत्पत्तिमत्त्वरूपमस्त्येव।

न द्वितीयः, ज्ञानस्य एतज्ज्ञानविषयदेशे घटादावसत्त्वेन ज्ञानत्वस्यैव तत्प्रयोजकतया पूर्वोक्तपरकीयानुमितेरपि तादृशत्वेन व्यभिचारानिस्तारात् ।

किञ्च जन्यसविकल्पकाजन्यचाक्षुषघटज्ञानविषयदेशीयान्धकारस्थितिसमयास्थितिकमप्रसिद्धम्। एतच्छब्देन पक्षीकृतज्ञानाभिधानात्।

### तृतीयहेतुदूषणम्

**तृतीयहेतोरपि स्वरूपासिद्धिः।**

न च अज्ञाने भावत्वविप्रतिपत्तावपि ज्ञानेनाज्ञानं निवृत्तमिति अनुभवात् अज्ञानदशायां तद्विषयसंशयदर्शनाच्च ज्ञानस्य अज्ञाननिवर्तकत्वम् अज्ञानस्यावरणत्वं च सिद्धमिति वाच्यम्। 'ज्ञानेनाज्ञानं नष्टम्' इत्यनुभवस्यैवासिद्धेः। 'इदानीमज्ञानं नष्टं जातमि'त्येव ह्यनुभूयते। न तु तयोः साध्यसाधनभावानुभवः। पक्षीभूतज्ञानजनकद्वितीयालोके व्यभिचारश्च। ज्ञानप्रागभावस्य 'नास्ति', 'न प्रकाशत' इति व्यवहारप्रयोजकत्वेन तदावारकत्वात्। द्वितीयालोकस्य च तन्निवर्तकत्वात्। तस्य च प्रागभावस्य आलोकसामानाधिकरण्याभावेन आलोके साध्याभावात्।

एतेन तुरीयहेतुरपि निरस्तः। न च तस्य प्रागभावसमानकालीनत्वान्न व्यभिचारः इति वाच्यम्। तथा सति दृष्टान्तस्य साधनविकलत्वापत्तिः(त्तेः?)।

किञ्च पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरनुमानफलत्वे द्वितायादिज्ञाने बाधवारणाय पक्षविशेषणमनर्थकम्। पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरनुमानफलत्वे इच्छाप्रागभावादि-निवर्तकज्ञानेषु अंशतः सिद्धसाधनवारणार्थम् आद्यसाध्यप्रभृतिषु स्वनिवर्त्येत्यादिविशेषणमनर्थम्। इदं च यथासम्भवम् उत्तरानुमानेष्वपि दूषणं द्रष्टव्यम्।

किञ्च सकृज्ज्ञातेऽर्थे पश्चात् स्वरूपावारकाज्ञानाभावस्य त्वयोक्तत्वात् तादृशस्वरूपविषये पक्षीभूतज्ञाने बाधः। इदमपि दूषणमनुमानान्तरेऽपि द्रष्टव्यम्। तस्मात् साध्वनुगृहातमाचार्यैः 'अनुमानजीर्णकन्थे'ति।

### आद्यतर्कदूषणम्

अप्रयोजकाश्च हेतवः। तथाहि - न तावदाद्यस्तर्कः। देवदत्तीययावज्ज्ञानप्रतियोगिक-विषयविषयिभावसंसर्गावच्छिन्नाभावकूटो वा, तत्संसर्गावच्छिन्नतत्प्रतियोगिकसामान्याभावो वा अज्ञातत्वमस्तु - द्वितीयादिज्ञानदशायां च इदमुभयमपि अज्ञातत्वं नास्त्येव। न च प्रमेयत्वेन ज्ञाते अज्ञातताभावप्रसङ्गः, अहमज्ञ इति प्रतीतेः विषयसमर्थनेनैव तन्निरासात्। यादृशज्ञानसत्त्वात् 'ज्ञात' इति व्यवहारः, तादृशज्ञानविषयत्वाभावादेव हि अज्ञातत्वव्यवहारो युक्तः। ततश्च त्वदुक्तन्यायेन प्रमेयत्वादिना ज्ञानेऽपि 'मया घटो ज्ञात' इति व्यवहाराभावेन ज्ञानविशेषस्यैव तत्प्रयोजकत्वेन तदभाव एवाज्ञातत्वव्यवहारप्रयोजकः।

### द्वितीयतर्कदूषणम्

नापि द्वितीयस्तर्कः - अप्रकाशशब्दस्य वाक्यतया लोके व्युत्पत्त्यनुसारेण पदद्वयार्थसंसर्गतया ज्ञानाभावपरत्वस्य युक्तत्वेन लाघवानवतारात्। प्रत्युत क्लृप्तत्वेन अभावपरत्व एव लाघवात् ।

किञ्च अभावस्य तु गौरवं न तुलाग्राह्यम्। किन्तु नियमतः प्रतियोगिनिरूपणाधीननिरूपणत्वेनैव। तच्च विरोधितया भासमाने भावरूपाज्ञानेऽपि तुल्यमिति कुतो लाघवम्।

किञ्च अज्ञानशब्दस्य ज्ञानजन्यनिवृत्तिप्रतियोगित्वात्मकविरोधित्वपरत्वेन निवृत्तिरूपाभावविशेषस्य जन्यत्वादेश्च प्रवेशेन अतिगौरवम्।

### तृतीयतर्कदूषणम्

नापि तृतीयस्तर्कः - हेत्वसिद्धेरुक्तत्वेन इष्टप्रसङ्गत्वात्। त्वदुक्तरीत्या प्रागभावनिवृत्तिः प्रतियोग्यतिरिक्तेति मते तन्निवर्तकत्वसम्भवाच्च। मतान्तरे त्वन्यत्र प्रागभावनिवृत्तेः प्रतियोगिरूपत्वेऽपि अनुमानेन ज्ञानप्रागभावस्य प्रतियोग्यतिरिक्तनिवृत्तिमादाय साध्यसिद्धौ भावरूपाज्ञानं विना हेतूच्छित्तेरभावात्।

चित्सुखानुमानमप्ययुक्तम्। प्रागभावनिवृत्तेः प्रतियोग्यतिरिक्तत्वेऽपि प्रतियोगिसाध्यता नास्ति, किन्तु प्रतियोगिसामग्रीसाध्यत्वमेव इत्युक्तत्वेन साध्ये भावातिरिक्तपदवैयर्थ्यात्। इच्छाप्रागभावादिभिः अर्थान्तरत्वाच्च। प्रमाव्यक्तिविशेषस्यैव पक्षत्वेन साध्येऽपि प्रमापदस्य तत्परत्वेन दृष्टान्ते साध्यसिद्ध्यर्थदेवदत्तपदवैयर्थ्याच्च।

यदुक्तम् - अधिष्ठानात्मकस्वप्रागभावातिरिक्तान्तःकरणवृत्तिप्रागभावेन अर्थान्तरतावारणार्थं

तदिति। तन्न, अधिष्ठानस्य अभावत्वे मानाभावात्। वृत्तिमत्त्वभागमात्रेण अधिष्ठानव्युदासे सिद्धे देवदत्तगतपदवैयर्थ्याच्च।

अथवा 'जन्येत्यादि' इत्यपि न। धाराद्वितीयादिज्ञाने व्यभिचारात्। प्रमापदेन पूर्ववत् पक्षीभूतप्रमाविवक्षायां देवदत्तपदवैयर्थ्यात्। न च देवदत्तपदरक्षार्थं साध्ये प्रमापदेन जन्यसविकल्पकाजन्यचाक्षुषघटप्रमांशमात्रस्य परामर्श इति वाच्यम्। तथा सति प्रमापदेन जन्यसविकल्पकाजन्यमात्रस्य परामर्शे द्वितीयादिज्ञानस्य दृष्टान्तत्वसम्भवात् देवदत्तघटचाक्षुषपदानि साध्ये व्यर्थानि। अप्रयोजकत्वाच्च। त्वदभिमततर्कानां निरस्तत्वाच्च।

यानि च प्राचीननिजगुरुजनम् अचतुरम्मन्यमानेन आहोपुरुषिकाभारमन्थरचेतसा नवीनेन चिरं विचिन्त्य परिहृतनिखिलावद्यानि स्वाभिलषितसाधनक्षमाणीति गाढं विश्वस्तानि कानिचिदनुमानानि ग्रथितानि तान्यपि 'या चेयमनुमानजीर्णकन्थे'त्याचार्यवचने जीर्णपदसार्थकत्वायैव केवलं प्रकल्प्यन्ते।

तथाहि - तत्र तावत् प्रथमानुमाने पक्षे प्रत्यक्षपदं व्यर्थम्। संस्काराजनकस्य पक्षत्वसम्भवात्। संस्काराजनकानुभवो नास्तीति चेन्न। अनुभूततृणादिविषयकस्मृत्यभावे तद्विषयकसंस्कारोऽस्तीत्यत्र मानाभावात्। तृणादिसम्बन्धिदर्शनेऽपि तृणादेरस्मरणम् अर्थक्षुद्रत्वादिप्रयुक्तं वक्तव्यम्। तस्य च न स्मृतिप्रतिबन्धकत्वम्। अतीतेऽपि तादृशार्थे स्मृतिदर्शनात्। तस्मात् संस्कारे प्रतिबन्धकत्वं वाच्यम्।

न चैवमपि अतिक्षुद्रविषयकानुभवेन कथं स्मरणम्, तत्र संस्कारोत्पत्तिप्रतिबन्धादिति वाच्यम्, महनीयादिविषयानुभवसमानकालीनानुभवे क्षुद्रविषयकत्वस्यैव प्रतिबन्धकत्वात्।

साध्ये च संस्कारप्रागभावनिवर्तकत्वेन अर्थान्तरता। लौकिकप्रत्यक्षविवक्षायामज्ञानस्य लौकिकप्रत्यक्षत्वाभावात् बाधः। अलौकिकप्रत्यासत्त्यजन्यप्रत्यक्षविवक्षायाम् ईश्वरज्ञानमादाय अर्थान्तरतैव। अलौकिकप्रत्यासत्त्यजन्यजन्यप्रत्यक्षविवक्षायाम् अज्ञानसाक्षिणो नित्यत्वात् बाधः। अज्ञानाकाराविद्यावृत्तिमदाद्यजन्यत्वोपपादने च अज्ञानावच्छेदकतया संस्कारप्रागभावस्यापि भानात् पुनः सैवार्थान्तरता। हेतौ च घटपटोभयसन्निकर्षेऽपि यत्र पटज्ञानमन्धकारावृतत्वात् न जातम्, घटज्ञानधारा च जायते, तत्र मध्ये तमोनिवृत्तौ धारान्तःपात्येव यत् घटज्ञानं पटनिर्विकल्पात्मकमपि जायते तत्र व्यभिचारः। न च तन्निवृत्तेरपि प्रागभावनिवृत्तित्वेन ज्ञानातिरिक्तप्रागभावमादाय साध्यसत्त्वात् न व्यभिचार इति वाच्यम्। तथा सति साध्ये स्वप्रागभावमादाय अर्थान्तरतापत्तेः।

किञ्च जन्यज्ञानमात्रस्य शरीरजन्यत्वात् परोक्षज्ञाने व्यभिचारः। स्वविषयजन्यत्वविवक्षायामपि शरीरविषयकपरोक्षज्ञाने व्यभिचारः। विषयत्वेन तज्जन्यत्वविवक्षायां बाह्यपदं व्यर्थम्। शब्दस्यैव अहमाकारवृत्तौ कारणतया विषयसन्निकर्षाजन्यत्वात्।

**द्वितीयानुमानेऽपि प्रथमसाध्ये प्रत्यक्षविशेषणे दूषणं दत्तमेव।**

किञ्च स्वसमानाधिकरणपदमत्र व्यर्थम्। न च उपादानप्रत्यक्षस्य कार्यहेतुत्वानभ्युपगमपक्षे

तस्य दृष्टान्ते वाच्ये तत्र साध्यलाभार्थं समानाधिकरणपदमिति वाच्यम्। इच्छाप्रागभावनिवर्तकेष्ट-ज्ञानद्वित्वजनकापेक्षाबुद्ध्यनुमितिजनकपरामर्शादेः बाह्यविषयप्रत्यक्षमात्रस्य यत्किञ्चित्कार्यजनकस्य दृष्टान्तत्वसम्भवात्। यत्र व्याप्तिं स्मरत एव पर्वतसमीपं गतवतः पर्वतत्वांशे निर्विकल्पकं धूमविशिष्टज्ञानम्, अनन्तरं परामर्शः, तत्र पर्वतत्ववैशिष्ट्यस्य पूर्वज्ञानाविषयत्वेन स्वसामग्रीकालीनजन्यविशिष्टज्ञानाविषयविषयकत्वघटितहेतोः सत्त्वात्।

द्वितीयसाध्यमपि प्रत्यक्षविशेषणदूषणेन स्वनिवृत्तिरूपस्वप्रागभावनिवृत्तिजनकतया प्रतियोग्यतिरिक्तप्रागभावनिवृत्तिसिद्धौ अर्थान्तरत्वेन च दूषितम्।

अत एवोत्तराण्यपि साध्यानि निरस्तानि। चेष्टानपेक्षेत्यादिसाध्यद्वयेऽपि अजन्यप्रत्यक्षनिवर्तकम्, कार्यातिरिक्तप्रत्यक्षनिवर्तकमित्येतावता साध्यसिद्धौ शेषवैयर्थ्यम्। न चैवं सति ध्वंसजनकप्रतियोगिप्रत्यक्षस्य कथं दृष्टान्तता घटत इति वाच्यम्। उपादानप्रत्यक्षस्य दृष्टान्तत्वासम्भवात्। तस्य उपादेयकारणत्वानभ्युपगमपक्षेऽपि अनुमित्यादिप्रागभाव-निवर्तकपरामर्शादेः पूर्वोक्तन्यायेन दृष्टान्तत्वसम्भवात्। चेष्टासापेक्षविशेषणज्ञानजन्ये चेष्टाप्रत्यक्षे स्वनिवर्तकत्वेनार्थान्तरता च। चेष्टाप्रत्यक्षस्य चेष्टाजन्यान्यकार्यातिरिक्ततया तस्य स्वनिवर्तकत्वेन द्वितीयसाध्येऽप्यर्थान्तरता। चेष्टानिमित्तेत्यादिसाध्यमप्ययुक्तम्। यथाकथञ्चिज्जातीयत्वविवक्षायां घटादेरपि तादृशतया साध्यवैकल्यात्। कार्यतावच्छेदकरूपेण साजात्यविवक्षायां द्वेषस्यापि तज्जातीयातिरिक्ततया तन्निवर्तकत्वेन अर्थान्तरत्वात्। शत्रुहननाद्यर्थचेष्टाया अपि समानविषयकेच्छैव हेतुः, न तु द्वेषः। तस्य प्रवृत्त्यजनकत्वेन चेष्टायामजनकत्वात्। निर्विकल्पकस्य चेष्टानिमित्तजातीयातिरिक्ततया तन्निवर्तकत्वेनार्थान्तरत्वाच्च। इष्टतावच्छेदकप्रकारकज्ञानस्यैव इच्छाहेतुत्वात्।

न च चेष्टानिमित्तिवृत्तिबाह्यावृत्तिजातिमत्त्वं विवक्षितम्। अतो न साध्यवैकल्यमिति वाच्यम्। द्वेषनिवर्तकत्वेन अर्थान्तरस्यापरिहारात्। न च जातिरहितप्रागभावनिवर्तकमृदादिज्ञानमेव दृष्टान्त इति वाच्यम्। चेष्टानिमित्तेत्यस्य वैयर्थ्यात्।

अहमनुभवेत्यादिसाध्यमप्ययुक्तम्। आत्मनोऽप्यहमनुभवविषयतया अविद्यायाः तद्धर्मत्वेन बाधात्। शुक्त्याद्यज्ञानं शुक्त्याद्यवच्छिन्नचैतन्यगतमिति पक्षे शरीरप्रत्यक्षे साध्ये बाधो व्यभिचारो वा। शरीरावच्छिन्नस्यैव अन्तःकरणावच्छिन्नतया अहमनुभवविषयत्वात्। अन्तःकरणधर्मता तथापि नास्तीति चेत्, तत् किम् अहमनुभवविषययावद्धर्मत्वं विवक्षितम्। तथा सति इच्छादेरप्यहमनुभवविषयदेहधर्मत्वाभावादर्थान्तरता स्थिरैव। महाविद्याश्च अप्रयोजकतया निरस्ताः। न च भावरूपाज्ञानानभ्युपगमे घटादौ वल्मीकभ्रमानुपपत्तिः। दुष्टेन्द्रियाधिष्ठानसन्निकर्षादेवोपपत्तेः। यथा चैतत् तथा अनिर्वचनीयख्यातिभङ्गे च वक्ष्यते। न च 'न जानामी'त्यननुभवप्रसङ्गो बाधकस्तर्कः। यथा अस्याः अनुपपत्तिः तथा प्रागुपपादितत्वात्।

यच्च घटध्वंसाजनकेत्याद्यनुमानान्तरम्, तत्र घटध्वंसाजनकेति पक्षविशेषणं व्यर्थम्। तद्धि विषयनिवर्तकतया अर्थान्तरतापरिहाराय। न चैतद्विशेषणे दत्तेऽप्यर्थान्तरतापरिहारः। निवर्तकत्वयोग्यताया एव साध्यतया तस्याः फलानुपहितेऽपि सत्त्वेन अर्थान्तरतादवस्थ्यात्। घटध्वंसाजनकेत्यत्र स्वरूपयोग्यत्वविवक्षायामाश्रयासिद्धेः। प्रतियोगिप्रत्यक्षत्वेन ध्वंसहेतुत्वात्।

'घटं न जानामी'त्यादि साध्यमप्यनुपपन्नम्। योग्यतायाः साध्यत्वे विषयनिविर्तकत्वेनार्थान्तरत्वात्। फलोपधानस्य साध्यत्वे धारावाहिकद्वितीयादिप्रमायां बाधात् व्यभिचाराद्वा स्वनिवर्तकतया अर्थान्तरत्वाच्च। 'न जानामी'ति ज्ञानविरोधित्वेन प्रतीयत इति त्वयोक्तत्वेन विरोधनिरूपकज्ञानस्य विषयत्वात्। 'यदि च न जानामी'त्यत्र विरोधनिरूपकं चैतन्यमेव न त्वपरोक्षज्ञानमित्युच्येत, तदा बाध एव। अपरोक्षप्रमाणज्ञानस्य पक्षीकृतत्वात्। तस्य चाज्ञानविरोधित्वाभावात्।

घटापरोक्षेत्यादिहेतुरप्यनुपपन्नः। इदानीं प्रागभावस्य 'घटं न जानामी'त्यनुभवविषयत्वसन्देहात् पटज्ञानस्य विरोधिगुणतया घटज्ञानप्रागभावध्वंसात्मकघटज्ञानध्वंसजनकतया सन्दिग्धव्यभिचारकत्वेन तद्वारकस्य घटविशेषणस्य सन्दिग्धव्यर्थविशेषणत्वात्, पटविशिष्टघटप्रत्यक्षे ज्ञानानुभवविषयतया सन्दिह्यमानघटज्ञानप्रागभावध्वंसात्मके पटज्ञानस्य विशेषणज्ञानतया कारणत्वेन सन्दिग्धव्यर्थविशेषणत्वाच्च, पटज्ञानस्य विरोधिगुणतया 'पटं न जानामी'ति प्रतीतिविषयघटज्ञाननिवर्तकत्वात् साध्यसत्त्वेन व्यभिचाराभावाच्च। अपरोक्षविशेषणं च सन्दिग्धव्यर्थविशेषणमेव। परोक्षघटज्ञानस्यापि घटविशिष्टप्रत्यक्षे 'घटं न जानामी'त्यनुभवविषयतया सन्दिह्यमानघटज्ञानप्रागभावनिवृत्त्यात्मके विशेषणज्ञानतया जनकत्वात्।

यच्च - धारावाहिकद्वितीयादिज्ञानव्यवृत्त्यर्थं 'यद्वा स्वसामग्री'त्यादिना पक्षविशेषणम् -

तदप्ययुक्तम्। योग्यतायाः साध्यत्वे उक्तविशेषणवैयर्थ्यात्। फलोपधानस्य साध्यत्वेऽपि 'न जानामी'त्यनुभवविषयस्वनिवर्त्यकत्वेनार्थान्तरत्वात्।

किञ्च यत्र प्रथमं त्वचा घटज्ञानं चक्षुषा रूपादिविशिष्टं तद्विषयकं तत्रोक्तसाध्याभावात् बाधः।

हेतौ च द्वितीयादिज्ञानव्यवृत्त्यर्थं जन्यसविकल्पेत्यादि यद्विशेषणं तदप्यसत् - तदा ह्यपरोक्षपदं व्यर्थमेव। परोक्षज्ञानमात्रस्य जन्यसविकल्पकजन्यत्वात्। अनवधारणात्मकघटापरोक्षे व्यभिचारश्च। प्रमाणज्ञानत्वमपि यदि असाधितार्थज्ञानत्वं तदा त्वन्मते असिद्धिः। निर्विकल्पके व्यभिचारश्च। यदि अन्तःकरणवृत्त्यवच्छिन्नज्ञानं तदा अस्मन्मते असिद्धिरिति।

अप्रयोजकश्चायं हेतुः। न च ज्ञानेनाज्ञानं निवृत्तमित्यनुभवस्याप्रामाण्यप्रसङ्गो बाधकः। तादृशानुभवासिद्धेरुक्तत्वात्।

यदपि - मूलाज्ञानानुमानं ब्रह्मसाक्षात्कार इत्यादि, तदपि न सम्यक्। प्राथमिकब्रह्मसाक्षात्कारे बाधात्। घटादिद्वितीयसंशये त्वदभिमतैकैककोटिकानवधारणे च व्यभिचारः। मूलाज्ञानानुमानानां दूषितत्वेन दृष्टान्ते साध्यवैकल्याच्च।

किञ्च अज्ञानपदेन भावरूपाज्ञानविषयत्वविवक्षायामसिद्धिः। ज्ञानाभावविवक्षायामपि तथा। ब्रह्मणः सर्वदा प्रकाशमानत्वात्। ज्ञानाविषयसाक्षात्कारत्वविवक्षायामपि तथैव। श्रवणदशायामेव ज्ञातत्वात्। तत्पूर्वक्षणे ज्ञातत्वाभावविवक्षायां सकृज्ज्ञाते स्वरूपे अज्ञानाभावस्य त्वयोक्ततया घटाज्ञानानन्तरं द्वित्रक्षणव्यवहितघटज्ञाने व्यभिचारः। अप्रयोजकत्वाच्च(त्वञ्च?)। न च मूलाज्ञानानङ्गीकारे मोक्षशास्त्रानर्थक्यप्रसङ्गः। आनन्दात्मावारकाविद्यानिवृत्त्यजन्यपुरुषार्थस्य असम्भवादिति वाच्यम्। दुःखध्वंसस्यैव मोक्षत्वोपपत्तेः। न च तस्यापुरुषार्थत्वम्। स्वतः पुरुषार्थतया सुखवद्दुःखाभावस्यापि लोकसिद्धत्वात्।

यदुक्तम् - तत्त्वज्ञानं विनाऽपि प्रागभावक्षयादेव मोक्षसिद्धेः शास्त्रानर्थक्यमिति। तन्न - तत्त्वज्ञानं विनाऽपि कस्यचिन्मोक्षसम्भवेऽपि अविम्बेन मोक्षेच्छोः समाहृत्यभोगेन मोक्षासिद्धेः तत्साधनीभूतयोगजधर्मसिद्ध्यर्थं तत्त्वज्ञाने प्रवृत्त्युपपत्तेः मोक्षशास्त्रस्य तं प्रति सार्थकत्वात्। न च अनन्तकर्मणां युगपद्भोगासम्भवः। परिमितकर्मज्ञानवतः तत्सम्भवात्। वरीयान् खलु स एव त्वत्तोऽपि यः कश्चिदपि शास्त्रसार्थक्यमङ्गीकरोति। त्वन्मते तु क्वचिदपि न मोक्षशास्त्रसार्थक्यम्। एतच्चाविद्यानिवृत्तिभङ्गे द्रष्टव्यम्।

बन्धहेतुभूतधर्मादिनिवृत्तिर्वा मोक्षोऽस्तु। न च तस्य सत्यत्वे ज्ञानानिवर्त्यत्वप्रसङ्गः। सत्यस्यापि विषादेः गरुडादिध्याननिवर्त्यत्वात्। न च ध्यानं न ज्ञानम्, ज्ञानत्वेन अनुभवसिद्धत्वात्। न च सत्यस्याधिष्ठानज्ञाननिवर्त्यत्वनुपपत्तिः। अधिष्ठानज्ञाननिवर्त्यत्वाभावस्य इष्टत्वात्। अनधिष्ठानभूतब्रह्मज्ञाननिवर्त्यत्वात् ।

आनन्द एव वा मोक्षोऽस्तु। न च जन्यत्वे तस्यामृतत्वानुपपत्तिः। अजन्यभावत्वे अविद्याया विनाशवत् जन्यभावत्वेऽपि तस्याविनाशित्वोपपत्तेः। कथमन्यथा प्रागभाववत्साध्यत्वेन त्वदभिमतस्य मोक्षस्याविनाशित्वम्। प्रवाहरूपेण वा अमृतत्वमस्तु। न च शरीराद्यभावात् मुक्तावानन्दोत्पत्त्यसम्भवः। चन्दनसंयोगादिजन्यसुखस्य शरीरसापेक्षत्वेऽपि शरीरनिवृत्तिसापेक्षस्य तदपेक्षत्वासम्भवात्। न हि किञ्चिज्ज्ञानं घटसन्निधानसापेक्षमिति घटाभावज्ञानमपि तथा।

नित्यानन्दाभिव्यक्तिरेव वा मोक्षोऽस्तु। न चानन्दाभिव्यक्तेः ज्ञानरूपायाः कार्यत्वे अनित्यत्वापत्तिः, शरीराद्यभावात् प्रवाहस्यापि अनुपपत्तिरिति वाच्यम्। पूर्वोक्तरीत्या सुखवदेव तदुपपत्तेः।

नित्यभूतैव वाऽभिव्यक्तिरस्तु। ननु उपलब्धेरनित्यत्वे इदानीमनुपलम्भो न स्यादिति चेत्। किमनुपलम्भशब्देन ज्ञानाभावो विवक्षितः, उत भावरूपाज्ञानम्, उत अनुपलम्भोपलब्धि?

नाद्यौ, इष्टापत्तेः। न तृतीयः। अनुपलम्भभ्रमसम्भवात्। न च दोषाभावः। कर्मण एव दोषत्वात्। न चानन्दोपलम्भयोः व्यवहारप्रसङ्गः। त्वन्मतेऽपि तुल्यत्वात्। न चावरणादव्यवहार इति वाच्यम्। तस्य सत्यत्वे अद्वैतहानेः। मिथ्यात्वे व्यवहारस्य दुर्वारत्वात्। गुञ्जापुञ्जभ्रमेऽपि वह्नेः दाहकत्वात्। न चोपलम्भस्यापि स्वप्रकाशतया तस्मिन् भासमाने अनुपलम्भभ्रमासम्भवः। त्वन्मते नित्यज्ञानस्य भ्रमाविरोधित्वकल्पनोपपत्तेः।

### उपादानपक्षकानुमानम्

उपादानत्वपक्षकानुमानमपि अप्रयोजकत्वेनैव निरस्तम्। न च सर्गाद्यकार्यस्य उपादानान्तरानिरूपणम्। ईश्वरपरतन्त्रप्रकृतेरेव उपादानत्वसम्भवात्। न च तस्या अनादित्वेन ज्ञाननिवर्त्यत्वेन श्रुतिसिद्धतया अविद्याया एवोपादानत्वमायातमिति वाच्यम्। सत्यस्यापि ज्ञाननिवर्त्यत्वेन त्वदभिमताविद्याया एवमप्यसिद्धेः। प्रकृतेः ज्ञाननिवर्त्यत्वं च असिद्धम्। 'गौरनाद्यन्तवती'[1] इत्यादिश्रुत्या नित्यत्वेनैव सिद्धेः।

यच्च - जाताजाताभेदव्यवहारानुपपत्तिरूपतर्कान्तरम्, तदप्यसत् । जाताजातपदाभ्याम् उत्पन्नानुत्पन्नविवक्षायाम् उपादानकारणस्यैव कार्यतया तस्यैवोत्पत्तेः कारणानुत्पत्त्यसिद्ध्या उत्पन्नानुत्पन्नाभेदोऽसिद्ध एव। पूर्वकालसत्त्वासत्त्वविवक्षायां द्रव्यस्याजातत्वात् घटत्वाद्यवस्थाया एव जातत्वात् तयोरभेदोऽसिद्ध एव।

किञ्च अज्ञानोपादानकत्वे वा कथं तदुत्पत्तिः। भेदस्य व्यावहारिकत्वे व्यावहारिकभेदानुपपत्तेः। विनिगमकाभावाच्च नान्यतरस्य प्रातिभासिकत्वम्।

एवं पीतघटसमानकालीनेत्याद्यनुमानमप्ययुक्तम्, अप्रयोजकत्वात्। न चानुगताविद्यानुपादानकत्वे 'अयं घट' इत्याद्यनुगतबुद्ध्यभावप्रसङ्गः। घटत्वादिजातिभिरेव तदुपपत्तेः। न च घटत्वाद्यनन्तजातिकल्पने गौरवात् सर्वानुगताऽविद्या एकैव घटत्वपटत्वाद्यनुगतव्यवहारनिमित्तमिति वाच्यम्। तस्या अनुगतघटप्रतीत्यालम्बनत्वे पटेऽपि तत्प्रसङ्गात्। व्यक्तिविशेषस्यापि तद्बुद्धौ कारणत्वात् तदभावादेव न पटे घटव्यवहारः इति चेत्, तर्हि विषयाजन्यापरोक्षप्रमा कुतो न स्यात्।

किञ्च व्यक्तिविशेषाभावात् तद्व्यवहाराभावेऽपि काले घटत्वमिति व्यवहारः स्यादेव। काले जातेः सत्वेऽपि यथा 'अयं घट' इति व्यवहाराभावेऽपि काले घटत्वमित्यादिव्यवहारः, तथा 'पटे घटत्वमि'ति व्यवहारश्च। अज्ञानस्यैव घटत्वात्मकत्वे तस्योपादनत्वात् 'मृद्घट' इतिवत् 'इदं घटत्वमि'त्येव घटे प्रतीतिः स्यात्, न तु घटे घटत्वमिति।

किञ्च व्यक्तिविशेषाभावात् माभूत् घटप्रतीतिः, अन्यत्र घटे तु कथं घटत्वप्रतीतिः। तादृशव्यक्तिविशेषत्वादिति चेत्, तर्हि घटान्तरे कथं तत्प्रतीतिः। तस्यापि तादृशव्यक्तिविशेषत्वादिति

1. मन्त्रि.उ.1.5

चेत्, तर्हि यादृशव्यक्तिविशेषाभावात् पटे घटत्वप्रतीत्यभावः यादृशव्यक्तिविशेषसत्त्वाच्च घटेषु सर्वेषु घटत्वप्रतीतिः तादृशव्यक्तिविशेषस्यैव अनुगतप्रतीत्यालम्बने किमज्ञानकल्पनया।

किञ्च 'द्रव्यत्वेन जानामि, घटत्वेन न जानामी'त्यादिप्रतीतिः नोपपद्यते। तयोर्भेदाभावात्। द्रव्यं घट इति च पर्यायः स्यात्, त्प्रवृत्तिनिमित्ताभेदात्। ब्रह्मण एव वा प्रमेयस्य वा कालस्यैव वाऽनुगतप्रतीतिहेतुता स्यात् क्लृप्तत्वात्, न त्वज्ञानस्य।

किञ्च अनुपादानत्वेऽपि दण्डकुण्डलादिवदनुगतप्रतीतिहेतुत्वसम्भवात् कथमुपादानत्वम्।

अनादिभावत्वपक्षकानुमानमप्ययुक्तम्। प्रकृतेर्नित्यत्वस्य प्रमाणसिद्धत्वेन प्रकृतित्वे व्यभिचारात्। तस्या एवात्र ज्ञाननिवर्त्यत्वसाधने बाधात्। तदतिरिक्तस्य ज्ञानविवर्त्यत्वसाधने अनादिद्वयक्लृप्तिगौरवात्। उक्तव्यभिचाराच्च। अनादित्वभावत्वपक्षकोत्तरानुमानद्वयमप्युक्तगौरवादेव निरस्तम्। सर्गाद्येत्याद्यनुमाने च जडनित्यप्रकृत्युपादानकत्वेनार्थान्तरता।

सत्प्रतिपक्षाश्चोक्तहेतवः। तथाहि – त्वदुक्तपक्षः त्वदुक्तसध्याभाववान् त्वदुक्तपक्षसाध्याभाववदन्यतरत्वात्, साध्याभाववान् दृष्टान्तः। जन्यसविकल्पकाजन्यचाक्षुषघटप्रमाणज्ञानं स्वजन्यान्यायोग्यस्वजन्यध्वंसप्रतियोगिस्वव्यतिरिक्तवस्तुपूर्वकं न भवति, 'घटं न जानामी'त्यनुभवविषयातिरिक्तस्वजनकानिवर्तकज्ञानत्वात्, धाराद्वितीयज्ञानवत्। ज्ञानत्वमात्रं स्वाजनकज्ञानेच्छाद्वेषप्रयत्नानन्तरभाविनि विरोधिगुणतया तन्निवर्तकज्ञाने व्यभिचारि। ब्रह्मवधाद्यपुण्यदर्शनदेवतादिपुण्यदर्शनरूपतया धर्माधर्मनिवर्तकज्ञानेऽपि व्यभिचारीति पूर्वप्रतीकम्। 'घटं न जानामी'ति अनुभवविषयातिरिक्तानिवर्तकज्ञानत्वमसिद्धम्, तादृशनिर्विकल्पकनिवर्तकत्वात्। प्रागभावस्य 'घटं न जानामी'त्यनुभवविषयतायाः सन्दिह्यमानत्वात् सन्दिग्धासिद्धिश्चेति तद्वारणाय स्वाजनकेति। तथाच विशिष्टाभावस्य सत्वान्नासिद्धिः। स्वाजनकानिवर्तकज्ञानत्वमात्रम् उक्तसाध्यव्याप्यमपि इदानीमसिद्धमित्यतः पूर्वप्रतीकम्। विशिष्टाभावश्च नासिद्धः। न च स्वाजनकेतिविशेषणं 'न जानामी'त्यनुभवविषयातिरिक्तपदं वा न स्वरूपासिद्धिवारकत्वात् व्यर्थं विशिष्टभागस्यैव गमकत्वादिति वाच्यम्। 'घटं न जानामी'त्यनुभवविषयातिरिक्तस्वाजनकनिवर्तकत्वाभावस्य तदन्योन्याभावस्य वा अखण्डाभावत्वेन वैयर्थ्याभावात् घटनिवर्तके घटासमवायिकारणध्वंसे व्यभिचारवारणाय ज्ञानत्वादिति। दृष्टान्ते पूर्वोत्तरघटज्ञानयोरपि 'घटं न जानामी'त्यनुभवविषयत्वात् पूर्वज्ञानस्य स्वाजनकत्वाभावाच्च साधनलाभः स एव पक्षः स्वसमानाधिकरणप्रागभावव्यतिरिक्तस्वजन्यध्वंसप्रतियोगिस्वसमानाधिकरणप्रत्यक्ष - स्वव्यतिरिक्तवस्तुपर्वको न भवति, 'घटं न जानामी'त्यनुभवविषयस्वान्यज्ञानातिरिक्तभिन्नवृत्त्यभावानिवर्तकत्वात् – आद्यनिर्विकल्पकवत्। अत्र 'घटं न जानामी'त्यनुभवविषयेति स्वान्यज्ञानातिरिक्तविशेषणम्। 'घटं न जानामी'त्यनुभवविषयभिन्नप्रत्यक्षभावानिवर्तकज्ञानत्वं द्वितीयादिज्ञाने व्यभिचारीति ज्ञानातिरिक्तपदम्। स्वनिवर्तकत्वेनासिद्धिवारणाय स्वाजन्येति

ज्ञानविशेषणम्। इच्छादिनिवर्तकज्ञाने व्यभिचारवारणाय 'घटं न जानामी'त्यनिभवविषयेति। प्रत्यक्षभावानिवर्तकत्वमसिद्धम्, स्वनिवर्तकत्वात् भावरूपाज्ञाननिवर्तकत्वसन्देहात् सन्दिग्धासिद्धं चेति पूर्वप्रतीकम्। निर्विकल्पकनिवर्तकतया स्वोत्पादकादृष्टनिवर्तकतया च असिद्धिरिति प्रत्यक्षपदम्। धाराद्यज्ञाने द्वितीयादिज्ञानप्रागभावनिवर्तकत्वात् तस्य च घटं न जानामीत्यनुभवविषयत्वसन्देहात् तत्र सन्दिग्धासिद्धिवारणार्थम् आद्यनिर्विकल्पके साधनवैकल्यपरिहारार्थं च भावपदम्। घटनिवर्तकघटासमवायिकारणध्वंसे व्यभिचारवारणाय ज्ञानत्वादिति। दृष्टान्ते ज्ञानानन्तरभाविनि निर्विकल्पके तन्निवर्तकत्वेन साध्यसाधनयोरभावादाद्यपदम्। हेतौ च स्वशब्दः समभिव्याहृतपरः। पक्षीकृतज्ञानमात्रपरत्वे प्राथमिकघटचाक्षुषसविकल्पकनिवर्तके पटनिर्विकल्पके व्यभिचारात्। स्वसमानाधिकरणप्रागभावातिरिक्तस्वजननायोग्यस्वजन्यध्वंसप्रतियोगिस्वदेशगतस्वातिरिक्त -वस्तुपूर्वकं न भवति 'घटं न जानामी'त्यनुभवविषयातिरिक्तस्वाजनकभावानिवर्तकत्वात्, धाराद्वितीयज्ञानवत्। अत्र हेतुगतविशेषणानां प्रथमसाध्यहेतुवदेव प्रयोजनानि। भावपदं तु धाराद्यज्ञाने 'घटं न जानामी'त्यनुभवविषयतया सन्दिह्यमानस्वानन्तरभाविघटसविकल्पकप्रागभावनिवर्तकतया सन्दिग्धासिद्धिवारणाय। अखण्डाभावत्वाच्च न व्यर्थता। स्वप्रागभावातिरिक्तस्वविषयसंशयादिजनन-योग्यस्वसत्ताक्षणनियतध्वंसप्रतियोगिस्वसमानाधिकरण -वस्तुपूर्वकं न भवति इति वा साध्यम्। तत्रोक्तहेतुरेवात्रापि द्रष्टव्यः। तत्रोक्त एवात्रापि दृष्टान्तः।

देवदत्तप्रमा तत्प्रमाप्रागभावातिरेकिणः नानादेः ध्वंसिनी, देवदत्तप्रमात्वात्, द्वितीयप्रमावत्।

### साध्यपरिष्कारः

इच्छाद्वेषप्रयत्नासमानकालीनसामग्रीजन्यभावरूपप्रत्यक्षधर्माजनकस्वसामग्रीकालीनजन्य - विशिष्टज्ञानाविषयविषयकघटादिप्रत्यक्षप्रमा ज्ञानातिरिक्तप्रत्यक्षनिवर्तिका न भवति, इच्छाद्वेषप्रयत्नासमानकालीनसामग्रीजन्यभावरूपप्रत्यक्षधर्मजनकज्ञानत्वात् द्वितीयज्ञानवत्। इच्छानिवर्तके इच्छाजनके च व्यभिचारवारणार्थं विशेषणद्वयम्। स्वनिवर्तकत्वेन इच्छादौ व्यभिचारवारणाय ज्ञानत्वादिति विशेष्यम्।

यद्वा प्रत्यक्षभावधर्माजनकस्वसामग्रीकालीनजन्यविशिष्टज्ञानाविषयविषयकघटादिप्रत्यक्षप्रमा कार्यस्वसमानाधिकरणातिरिक्त प्रत्यक्षनिवर्तिका न, कार्यातिरिक्तप्रत्यक्षनिवर्तिका न, जन्यज्ञानासहकृतसामग्रीजन्यध्वंसप्रतियोगिजातीयातिरिक्तज्ञानान्यप्रत्यक्षनिवर्तिका न, जन्यज्ञानासहकृतसामग्रीजन्यध्वंसप्रतियोगिवृत्तिबाह्यावृत्तिजातिमदतिरिक्तज्ञानान्यप्रत्यक्षनिवर्तिका न, जन्यज्ञानाजन्यध्वंसप्रतियोगिजातीयातिरिक्तज्ञानान्यप्रत्यक्षनिवर्तिका न, जन्यज्ञानाजन्य-ध्वंसप्रतियोगिवृत्तिबाह्यावृत्तिजातिमदतिरिक्तज्ञानान्यप्रत्यक्षनिवर्तिका न, गुणत्वानधिकरणप्रत्यक्ष-निवर्तिका न - स्वस्थितिक्षणनियतस्वविनाशसामग्रीमद्भिन्नप्रत्यक्षनिवर्तिका नेति वा साध्यम्। प्रत्यक्षभावधर्माजनकज्ञानत्वादिति हेतुः। द्वितीयज्ञानं दृष्टान्तः।

चेष्टानपेक्षज्ञानजन्यप्रत्यक्षनिवर्तिका न, चेष्टाजन्यान्यकार्यातिरिक्तप्रत्यक्षनिवर्तिका न, चेष्टानिमित्तजातीयातिरिक्तप्रत्यक्षनिवर्तिका न, अहमनुभवविषयधर्मातिरिक्तनिवर्तिका नेति साध्यम्। स एव हेतुः। स एव दृष्टान्तः। चेष्टानपेक्षेत्याद्युक्तसाध्यद्वये चेष्टाप्रत्यक्षव्यतिरिक्तं पक्षः। हेतौ च चेष्टाजन्यान्यत्वं विशेषणम्। तेन चेष्टाप्रत्यक्षे नासिद्धिव्यभिचारौ।

घटध्वंसजनकघटापपरोक्षप्रमाणज्ञानं ज्ञानान्य-'घटं न जानामी'त्यनुभवविषयनिवर्तकं न भवति, घटध्वंसाजनकत्वात्, पटमात्रगोचरज्ञानवत्। योग्यताभावस्य साध्यत्वात् न द्वितीयादिज्ञाने अंशतः सिद्धसाधनम्। स्वसामग्रीकाले स्वसमानाधिकरणज्ञानाविषयविषयकत्वं वा पक्षविशेषणम्। ततः फलोपधानाभावसाधनेऽपि न दोषः। अयं घटाभावः तदभावान्याज्ञानान्याभावान्यः मेयत्वात् घटवत्, अज्ञानम् स्वस्वेतरवृत्तित्वरहिताभाववृत्तिधर्माधिकरणं मेयत्वात् घटवत्, अज्ञानत्वं स्वस्वेतरवृत्तित्वरहिताभाववृत्तिज्ञानवृत्तिधर्माधिकरणं मेयत्वात् घटवत्, अभावत्वं स्वस्वेतरवृत्तित्वरहिताज्ञानवृत्तिवृत्तिधर्माधिकरणं मेयत्वात् घटवत् इति महाविद्यादिभिरप्यज्ञानस्याभावत्वसिद्धिः।

उपादनत्वं अनादिवृत्तिज्ञाननिवर्त्यवृत्ति न भवति भावमात्रवृत्तिधर्मत्वात्, आत्मत्ववत्। पीतघटसमानकालीनश्याममघटः पीतघटोपादानजडोपादानको न भवति पीतघटावयवाजन्यत्वात्, आत्मवत्।अनादिभावत्वं ज्ञाननिवर्त्यवृत्ति न भवति अनादिभावमात्रवृत्तित्वात्, आत्मत्ववत्। अनादित्वं ज्ञाननिवर्त्यभाववृत्ति न भवति अनादिमात्रवृत्तित्वात्, आत्मत्ववत् प्रागभावत्ववच्च। भावत्वम् अनादिज्ञाननिवर्त्यवृत्ति न भवति भावमात्रवृत्तित्वात्, आत्मत्ववत् घटत्ववच्च।

**प्रतिकूलतर्कः**

प्रतिकूलतर्कपराहताश्च हेतवः। तथाहि - घटज्ञानेनाज्ञाननिवृत्तौ कालान्तरे 'घटं न जानामी'ति प्रतीतिर्न स्यात्। अज्ञानान्तरमनन्तरमावृणोति, युगपदुभयोरावारकत्वे मानाभावात्। एकदैकमेवावृणोति यदाऽऽवृणोति तन्निवर्तत इति चेन्न, आवरणस्य व्यवहारप्रतिबन्धकत्वात्मकतया युगपत्सन्निहितानां प्रतिबन्धकानां युगपत्प्रतिबन्धकत्वनिवृत्त्योरवर्जनीयत्वात्। ज्ञाननिवृत्त्यनन्तरम् अज्ञानान्तरोत्पत्त्यङ्गीकारश्चानुपपन्नः, कारणाभावात्। ज्ञाननिवृत्तेरेव कारणत्वे घटगोचरप्राथमिकज्ञानात् प्रागभावानुभवो न स्यात्। पूर्वज्ञानाभावेन तन्निवृत्तेरसिद्धेः। प्राथमिकज्ञानेन आद्यमज्ञानं तन्निवृत्तम्, तन्निवृत्त्या अज्ञानान्तरोत्पत्तिरित्युक्तावपि अनाद्यज्ञानानां सर्वेषामप्यविशेषेण घटावारकतया घटज्ञाने सर्वनिवृत्तिप्रसङ्गः। चक्षुर्द्वयसन्निकर्षे सति उत्पन्नज्ञानस्य न ह्येकमेव चक्षुः कारणमिति नियम्यते। अत एकमेवावारकं घटस्येति नियमनं निर्मूलमेव।

ननु अज्ञानानां ज्ञानवत् सविषयत्वात् तत्तद्विषयकमज्ञानं तदावृणोतीति चेन्न, 'मयि घटाज्ञानं', 'घटं न जानामी'ति ज्ञानमेव हि सविषयतया भासते। अज्ञानं तु ज्ञानाभावत्वेन वा ज्ञानविरोधितया वा भासत इति कथमज्ञानस्य सविषयतया सिद्धिः। अतः चक्षुर्द्वयस्य कारणत्ववत् सर्वेषामज्ञानानां यगपत् घटावारकत्वस्य आवश्यकतया तज्ज्ञानेनैव युगपन्निवृत्तिरनिवार्या।

किञ्च परोक्षापरोक्षयोः ज्ञानत्वस्य तद्विरोधित्वतन्निवर्तकत्वानुभवयोश्च अविशेषेऽपि परोक्षज्ञानं व्यवच्छिद्य अपरोक्षज्ञानस्य अज्ञाननिवर्तकत्वसाधनं कथमिव समञ्जसं भवेत्। अपि च अवधारणस्यैव निवर्तकत्वाङ्गीकारात् अनभ्यासदशापन्नजलज्ञाने सति अज्ञानमनुभूयेत। एककोटिकज्ञानस्य अज्ञानानुभवप्रतिबन्धकत्वे 'चन्द्रं न जानामी'त्यनुभवाभावप्रसङ्गः। आश्रयानुपपत्यादिबाधकतर्काश्च वक्ष्यन्ते।

### हेतोस्सोपाधिकत्वम्

सोपाधिकाश्च हेतवः। तथाहि - पक्षेतरत्वं तावत् सर्वत्रोपाधिः। अनुकूलतर्काभावप्रतिकूलतर्कयोः परानुमाने उपन्यस्ततया तत्साहचर्यादयं च निश्चितोपाधिः। अपि च जीर्णकन्थासूचितेषु प्रौढप्रकाशतेजस्त्वमुपाधिः। अन्वयव्यतिरेकाभ्यां तमस्त्वेन प्रौढप्रकाशतेजस्त्वमुपाधिः। अन्वयव्यतिरेकाभ्यां तमस्त्वेन प्रौढप्रकाशतेजस्त्वेन च निवर्त्यनिवर्तकभावग्रहणात् इह तथा ग्रहणाभावेन उक्तोपाधेः साध्यव्यापकत्वात्। अयं चोपाधिः प्रत्यनुमाने अनुकूलतर्कः, निवृत्तिप्रयोजकाभावे च निवृत्त्यभावस्य आवश्यकत्वात्। अयं च वक्ष्यमाणोपाधौ सर्वत्र द्रष्टव्यः। चित्सुखानुमानेऽपि देवदत्तावृत्तिकार्यत्वमुपाधिः। कार्यत्वादेव हि प्रागभावनिवर्तकता। देवदत्तावृत्तिकार्यत्वादेव च तत्स्थप्रमाप्रागभावातिरिक्तनिवर्तकता। कार्यस्य स्वसमानाधिकरण-प्रागभावनिवर्तकत्वस्वभावात्। ज्ञानातिरिक्तप्रत्यक्षनिवर्तकमिति साध्ये निवृत्तिप्रयोजकरूपवत्त्वमुपाधिः। तत्प्रयोजकरूपं च प्रागभावनिवर्तकेषु प्रतियोगिजनकतावच्छेदकरूपम् इच्छादिनिवर्तकेषु विरोधिगुणवत्त्वं ध्वंसजनकप्रतियोगिप्रत्यक्षे च प्रतियोगिविषयत्वमन्वयव्यतिरेकसिद्धम्। इह च तादृशक्लृप्तप्रयोज्यप्रयोजकरूपाभावे कथं निवर्त्यनिवर्तकभावः। इत उत्तरानुमानेष्वपि अयमेवोपाधिः। महाविद्यानान्तु पक्षेतरत्वोपाधिरुक्त एव। उपादानत्वपक्षकानुमाने च प्रागभाववृत्तित्वमुपाधिः। प्रागभावस्य प्रतियोगिजनकनिवर्त्यत्वनियमात्। पीतघटेत्याद्यनुमाने च पीतघटावयवसंयोगजन्यत्व-मुपाधिः। अनादिभावत्वपक्षकानुमाने च ज्ञाननिवर्त्यताप्रयोजकरूपवद्वृत्तित्वमुपाधिः। अन्वयव्यतिरेकाभ्यां घटादेः ज्ञानेन निवृत्तितर्शनेन तत्प्रयोजकरूपवत्त्वात्। अजन्यभावान्यवृत्तित्वं वोपाधिः। अनादित्वपक्षके च जन्यभाववृत्तित्वमुपाधिः। भावत्वपक्षके च प्रागभाववृत्तित्वमुपाधिः।

बाधितविषयाश्च परोक्तहेतवः, प्रतिपक्षानुमानानाम् अनुकूलतर्कप्रतिकूलतर्काभावस्थापना-नुमानानुकूलतर्काभावप्रतिकूलतर्कैः परिष्कृततया प्रबलत्वात्।

**इत्यनुमानखण्डनं समाप्तम्**

### अर्थापत्त्या अज्ञानसिद्धिरिति पूर्वपक्षः

ननु अस्तु अर्थापत्तिर्मानम्। तथाहि – मिथ्यार्थोत्पत्तिः भावरूपाज्ञानं विनाऽनुपपन्ना तत्

कल्पयति, भावकार्यस्य रजतादेरुपादानान्तरासम्भवात्। न चात्मा उपादानम्। तस्याधिष्ठानतयोपादानत्वेन परिणाम्यन्तरस्यावश्यकत्वात्। परिणामितया उपादानत्वे परिणामस्य परिणामिसमानसत्ताकत्वनियमेन कार्यस्यापि सत्यत्वप्रसङ्गात्। तस्य निरवयवत्वेन परिणामायोगाच्च। नापि शुक्त्यादिः काचादिकं वोपादानम्। अननुगतत्वात्, काचादेः रजताद्यनाश्रयत्वाच्च। अतः परिशेषात् अज्ञानमेवोपादनम्। एवं ब्रह्मणो जगदुपादानत्वं श्रुतमन्यथानुपपद्यमानं भावरूपाज्ञानं कल्पयति। निरवयवस्य निर्विकारस्य ब्रह्मणः परिणामित्वासम्भवात्, अधिष्ठानतयोपादानत्वस्य मिथ्यापरिणाम्यज्ञानोपादानं विनाऽनुपपत्तेः। ब्रह्ममात्रकार्यत्वे जडस्य जडत्वस्य आकस्मिकत्वप्रसङ्गाच्च। न च विकारस्याविद्यापरिणामत्वे गौरवेण ब्रह्मोपादानत्वभङ्गप्रसङ्ग इति वाच्यम्। श्रुतिबलेन तस्याप्युपादानत्वात्। कार्ये सत्तादात्म्यानुभवेन तदुपादानत्वस्यावश्यकत्वाच्च। अविद्यावत् ब्रह्मणोऽपि उपादानत्वे विकारापात इति चेन्न, द्विविधं ह्युपादानत्वं परिणामित्वं तत्सत्ताप्रदत्वं च इति। तत्राद्यमज्ञानस्येति तद्भवतु विकारि। द्वितीयं तु ब्रह्मणः इति न तद्विकारि।

किञ्च यत् यदात्मककारणतादात्म्यापन्नं जायते तदात्मकत्वं हि उपादानत्वम् (तदुपादानत्वम्?)। वियदादिकार्यवर्गश्च चैतन्यसत्तानुविद्धो जडानुविद्धश्च जायत इति उभयस्याप्युपादानलक्षणलक्षितत्वात् उभयमुपादानम्। एवं स्वप्रकाशब्रह्मस्वरूपावभासानुपपत्तिः भावरूपाज्ञाने मानम्, आवारकेण विना स्वप्रकाशात्मकब्रह्मस्वरूपानवभाससंशयाद्ययोगात्। न च ब्रह्मणो जीवभावादेव तदनवभासः, तस्य निरस्तत्वात्। अविद्यातिरिक्तेन प्राप्तावरणायोगाच्च। न कर्मण आवारकत्वम्। एवं चिदानन्दरूपब्रह्मणः अविद्यां विना जडदुःखात्मकप्रपञ्चतादात्म्यानुपपत्तिरपि मानम्। एवं मोक्षशास्त्रोपदेशानुपपत्तिरपि मानम्। तन्निवृत्त्यतिरिक्तोपदेशसाध्यप्रयोजनाभावादित्युक्तमिति।

**सिद्धान्तः**

अत्रोच्यते - न तावत् मिथ्यार्थोत्पत्त्यनुपपत्तिः मानम्, मिथ्यार्थोत्पत्त्यसिद्धेः। अस्तु वा मिथ्यार्थोत्पत्तिः। तथाऽपि नाज्ञानसिद्धिः। उपादानाभावे कथं तदुत्पाद इति चेत्, न। रजतावयवादिक्लृप्तकारणाभावे कथं तदुत्पादः। यदि मिथ्यात्वात् न तदपेक्षा, तदा तत एवोपादाननैरपेक्ष्यमप्यस्तु। अस्तु वा आत्मन एवोपादानत्वम्। न च निरवयवत्वादनुपादानता। निरवयवत्वेन सत्यपरिणामाभावेऽपि मिथ्याभूतपरिणामसम्भवात्। घटाकारेण परिणममानमृत्पिण्डस्यैव इदानीं शरावाकारेण परिणाम इति भ्रान्तिसिद्धमिथ्याशरावपरिणामो दृश्यते। तत्र यदा घटपरिणामदशायां शरावपरिणामायोग्यस्यापि मृत्पिण्डस्य मिथ्यात्वादेव शरावपरिणामसम्भवः, एवं ब्रह्मणोऽपि मिथ्याभूतोपादानत्वं सम्भवत्येवेति। न चासत्यस्य असत्योपादानत्वं वाच्यमिति वाच्यम्। क्वाप्यदर्शनात्। ननु उपादानोपादेययोः सालक्षण्यनियमदर्शनादेव तत्सिद्धिरिति चेत्, सर्वथा सालक्षण्यस्य मृद्घटयोरप्यदर्शनात्। यत्किञ्चित्सारूप्यस्य शुक्तिरजतादावपि पदार्थत्वादिना सत्त्वात्।

यदुक्तम् - ब्रह्मणः परिणामितयोपादानत्वे परिणामस्य परिणामिसमानसत्ताकत्वनियमेन कार्यस्यापि सत्यत्वप्रसङ्गः इति, तत्र किं परिणामशब्देन कार्यमात्रं विवक्षितंम् उत रूपान्तरापत्ति? नाद्यः, ध्वंसस्य अविद्यानिवृत्तेश्च परिणामिसमानसत्ताकत्वाभावात्। न हि तद्रूपेण परिणामि किञ्चिदस्ति। न द्वितीयः, रूपान्तरापत्तेः परिणामिमात्रसापेक्षत्वात् गौरवेण स्वसमानसत्ताक-परिणाम्यपेक्षाभावात्। ननु स्वसमानसत्ताकरूपान्तरापत्तेरेव परिणामशब्दार्थत्वात् कथं तदभावे परिणामित्वमिति चेन्न। लाघवेन रूपान्तरापत्तेरेव परिणामशब्दार्थत्वात्। न च ब्रह्मापरिणामित्व-श्रुतिविरोधः। परिणामस्यासत्यत्वेन श्रुतिविरोधाभावात्। अविद्याया मिथ्यात्वेन निरवद्यत्वश्रुतिवत्। सत्यप्रकृतिरिदमर्थ एव वोपादानमस्तु। न च शुक्त्यादेरननुगतत्वेन नोपादानता। रजतादिकार्यस्यापि अननुगतत्वात्। क्लृप्तत्वेन लाघवात् शुक्त्यादेरेवोपादानत्वौचित्याच्च। अन्यथा सत्यकार्येऽपि मृदादेरनुपादानत्वप्रसङ्गात्। ननु सत्यकार्यमात्रं प्रत्यननुगतत्वेऽपि तत्तद्घटादिकार्यं प्रति अनुगतिरस्त्येव। प्रकृते च मिथ्यारजतमात्रेऽपि न शुक्तिरनुगता, रङ्गेऽपि रजतभ्रमदर्शनादिति चेन्न। अविद्याया अप्यननुगतत्वात्। तत्रापि रङ्गाज्ञानस्य कस्यचिदुपादानत्वं क्वचित् शुक्त्यज्ञानस्येति। यदि च रजताधिष्ठानतावच्छेदकावच्छिन्नचैतन्यावारकाज्ञानानुगमः तर्हि तदधिष्ठानतावच्छेदक-त्वेनानुगमोऽस्तु, लाघवात्। एतेन ब्रह्मणो जगदुपादानत्वात् श्रुतार्थापत्तिरपि निरस्ता, ब्रह्मोपादानत्वसम्भवस्योपपादितत्वात् ।

यदुक्तंम् - ब्रह्ममात्रोपादानकत्वे जडस्य जडत्वमाकस्मिकं स्यात् इति, तन्न। मृदुपादानकस्य घटानुपादानकस्यापि घटस्य घटत्वदर्शनात्। ननु तन्मात्रोपादानकत्वे तद्रूपता स्यादिति चेत्, न, सदनुविद्धतया प्रतीतेरिष्टत्वात्। गोमयाद्युपादानवृश्चिकादेः गोमयत्वाभावेन व्यभिचाराच्च।

### अनवभासानुपपत्तेर्मानत्वभङ्गः

एवं ब्रह्मानवभासानुपपत्तिरपि न मानम्। जीवब्रह्मणोर्भेदव्यवस्थापनात्।

किञ्च कोऽयमनवभासः, यदनुपपत्त्या अज्ञानं कल्प्यते। न तावदवभासाभावः। स्वरूपात्मावभावस्य नित्यत्वेनाभावासिद्धेः। वृत्त्यात्मकावभासाभावस्तु कारणाभावादेवोपपन्नः। नापि भावरूपाज्ञानम्। तत्सिद्ध्यसिद्ध्योः तस्य कल्पकत्वायोगात्। नापि 'नास्ति', 'न प्रकाशत' इति व्यवहारयोग्यता। तस्यानादित्वेन अज्ञानवदेवान्यानपेक्षणात्। सापेक्षत्वेऽपि ब्रह्मैवापेक्ष्यताम्, किमज्ञानेन। न च ब्रह्मणस्तत्प्रयोजकत्वे मुक्तावपि तत्प्रसङ्गः। तत्त्वज्ञानेन च निवृत्तत्वात्। न च पुनरुत्पादप्रसङ्ग इति वाच्यम्। अज्ञानादेव ब्रह्माधिष्ठानस्यापि कारणाभावादेवानुत्पादोपपत्तेः। अज्ञानसद्भावेऽपि यथाऽऽवरणानुपपत्तिः तथा वक्ष्यते। कर्मणैव वाऽनवभास उपपद्यते ।

यदुक्तम् - कर्मणः प्राप्तावारकत्वं नास्ति इति, तन्न। किमिदं प्राप्तावरणम्? प्राप्तज्ञानोत्पत्तिप्रतिबन्धः तावत् अविद्याया अपि नेष्यत एव। प्राप्तस्य व्यवहारजनकताप्रतिबन्धः कर्मणापि स्यादेव। 'नास्ति', 'न प्रकाशत' इति व्यवहारयोग्यतापादनमपि कर्मणैवोपपद्यते।

किञ्च अविद्यायाः प्राप्तावारकत्वं न दृष्टतयोपपद्यते इतीदानीं वक्तुं शक्यते, अविद्याया एवासिद्धेः। किन्तु अविद्याया मिथ्यात्वेनैव कल्पनात् मिथ्याभूतं प्राप्तस्याप्यावरणं तयोपपद्यत इति वाच्यम्। ततश्चावरणमिथ्यात्वमेव प्राप्तसम्बन्धप्रयोजकमिति पर्यवसितम्। ततश्च चाकचक्यादिना मिथ्याभूतरजतोत्पत्तिवत् कर्मणैव मिथ्याभूतावरणमुपपद्यत इति।

**प्रपञ्चतादात्म्यानुपपत्तेर्मानत्वनिरासः**

ब्रह्मणः प्रपञ्चतादात्म्यानुपपत्तिरपि न मानम्। तादात्म्यासिद्धेः। तत्सिद्धावपि मिथ्याभूतस्य तस्य अज्ञानं विनाऽप्युपपत्तेर्दर्शितत्वात्।

एवं मोक्षशास्त्रोपदेशानुपपत्तिरपि न तत्र मानम्। अविद्यानिवृत्त्यतिरिक्तस्य पुरुषार्थस्य उपपादितत्वात्। अज्ञाननिवृत्त्यनुपपत्तेर्वक्ष्यमाणत्वाच्च।

**अर्थापत्तिप्रमाणखण्डनं समाप्तम्**

अस्तु तर्हि श्रुतिः प्रमाणम् - 'अनृतेन हि प्रत्यूढाः'[1], 'तेषां सत्यानाम् अनृतमपिधानम्'[2], 'नासदासीन्नो सदासीत् तदानीम्''[3], 'तम आसीत् तमसा गूढमग्रे प्रकेतम्''[4], 'इन्द्रो मायाभिः पुरुरूप ईयते'[5], 'अविद्यायामन्तरे वर्तमानाः'[6], 'अजामेकां लोहितशुक्लकृष्णाम्''[7], 'नीहारेण प्रावृताः''[8], 'देवात्मशक्तिं स्वगुणैर्निगूढाम्'[9], 'मायां तु प्रकृतिं विद्यात्'[10], 'भूयश्चान्ते विश्वमायानिवृत्तिरि'[11]ति।

स्मृतयश्च – 'अज्ञानेनावृतं ज्ञानम्'[12], 'दैवी ह्येषा गुणमयी मम माया दुरत्यया''[13],

---

1. छा.उ.8.3.2
2. छा.उ.8.3.1
3. तै.ब्रा.2.8.9
4. तै.ब्रा.2.8.9
5. छा.उ.4.5.19
6. क.उ.1.2.5
7. श्वे.उ.4.5
8. तै.सं.4.6.2.2
9. श्वे.उ.1.3
10. श्वे.उ.4.10
11. श्वे.उ.1.10
12. भ.गी.5.15
13. भ.गी.7.14

'यो माययेदं पुरुरूपयाऽसृजत्'[1], 'तरत्यविद्यां विततां हृदि यस्मिन् निवेशिते'[2], 'योगी मायाम्(योगमायाम् ?)'[3] इत्यादि।

अत्रोच्यते - कथमेषां त्वदभिमतार्थे प्रामाण्यम्। तस्यैवासिद्ध्या तत्रानृतादिपदानां व्युत्पत्त्यग्रहात्। मिथ्यार्थे ह्यनृतपदं व्युत्पन्नमिति चेत्। किं ततः? न ह्यविद्यैव मिथ्या, किन्तु प्रपञ्चमात्रम्। ततश्च प्रसिद्धः शरीरसम्बन्ध एव कुतो नोच्यते। अनृतशब्दस्य मिथ्याभिलापे प्रसिद्धेः स एव वा कुतो नोच्यते। वस्तुतस्तु अनृतशब्दः कर्मपरः, तस्य ज्ञानप्रतिबन्धकत्वप्रसिद्धेः। तदेव चेह प्रतिपाद्यम्। 'एतं ब्रह्मलोकं न विन्दन्ती'[4]ति ज्ञानाभावप्रतिपादनात्।

### विन्दत्यर्थः

यद्यपि विन्दतिः प्राप्तिवचनः, तथापीह प्रकरणानुसारात् ज्ञानपरः। 'हृदये विद्यमानस्य कथमज्ञानमित्यपेक्षायाम् इदं वाक्यं प्रवृत्तमि'ति हि दहरविद्यानिरूपणेऽभिहितम्। 'अहरहर्गच्छन्त्य'[5] इति प्राप्तिमनूद्य 'न विन्दन्ती'[6]त्यभिधानेन प्राप्तिनिषेधासम्भवाच्च।

### यमधो निनीषतीति श्रुत्यर्थः

पापस्य च ज्ञानविरोधित्वम् 'एष एवासाधु कर्म कारयति तं यमधो निनीषति'[7] इत्यादिश्रुतिसिद्धम्। नन्वियं श्रुतिः निरयनिनीषाविषया किं न स्यात्। उन्नयनप्रत्यनीकत्वादधोनयन-स्येति ब्रूमः। अत्र विवक्षितमुन्नयनं हि उपासननिष्पादनरूपम्। न चोन्नयनमपि नाकादिनयनमिति शङ्कनीयम्। 'यमेभ्यो लोकेभ्य उन्निनीषती'त्यवगतस्य समस्तलोकेभ्यः उन्नयनस्य अपवर्गप्रापणरूपत्वात्। तर्हि गर्भजन्मजरामरणादिसंसारप्रापणमधोनयनं स्यात्। न तूपासननिरोध इति चेन्न, उन्नयनस्य ज्ञानोत्पादनद्वारकत्वावगमात्। 'यं त्वं मनुष्याय हिततमं मन्यसे'[8] इत्युपक्रमवाक्येन 'माम्...उपास्व'[9] इति विधित्सितोपासनस्याव्यवहितोपायत्वमवगतम्। 'नान्यः पन्थाः'[10] इत्यादीनि च श्रुत्यन्तराणि तथा अवगमयन्ति। तच्च कर्मणामपवर्गं प्रत्यव्यवहितोपायत्वे

---

1. श्री.भाग.4.24.61
2. वि.पु.5.17.14
3. वि.पु.5.17.14
4. छा.उ.8.3.2
5. छा.उ.8.3.2
6. छा.उ.8.3.2
7. कौ.उ.3.7
8. कौ.उ.3.3
9. कौ.उ.3.14
10. श्वे.उ.6.15

विरुध्यते। अतः उपक्रमाद्यविरोधात् साधुकर्मणामपवर्गं प्रत्युपायत्वमुपासनद्वारकमवसीयते। अतः कर्मणामुन्नयहेतुत्वम् उपासननिष्पादनरूपमिति तद्विपरीतमधोनयनमुपासनप्रतिबन्धरूपमिति स्फुटतरमवगम्यते।

अस्तु वा उन्नयनाधोनयने स्वर्गनरकप्रापणरूपे, तथाऽपि असाधुकर्मणां ज्ञानविरोधित्वं सिध्यति। तथाहि - उन्निनीषाधोनिनीषयोः निर्हेतुकत्वे परमात्मनः वैषम्यनैर्घृण्यप्रसङ्गात् नेतव्यचेतनगोचरं यत् वृत्तद्वयं गतिद्वयनिनीषानिमित्तभूतातिप्रभूतपुण्यपापकर्तृविषयं विज्ञायते, तत्र च गतिद्वयपर्याप्तोत्तरोत्तरसाध्वसाधुकर्मकारयितृत्वमीश्वरस्य न भूतावेशादिवत् जीवबुद्ध्यनपेक्षं भवति। तथा सति ज्ञानचिकीर्षाद्यभावात् वायूदकादिनुन्नतृणादेरिव संसारिणां शास्त्रवश्यत्वाभावेन कर्मफलभोगानुपपत्तिः। एवं संसारिणां कर्मफलभोक्तृत्वानुपपत्तिरूपन्यायानुगृहीतम् 'एष एव' इत्यादिकं वाक्यद्वयं ज्ञानप्रदानद्वारककर्तृत्वविषयमवसीयते। तथा सति स्मृत्यनुग्रहश्च भवति—

**न देवा यष्टिमादाय रक्षन्ति पशुपालवत्।**
**यं हि रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम्॥**
**यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम्।**
**बुद्धिं तस्यापकर्षन्ति सोऽपनीतो विनश्यति॥**

इति ह्युच्यते। तथा—

**पुण्यं प्रज्ञां वर्धयति क्रियमाणं पुनः पुनः।**
**वृद्धप्रज्ञः पुण्यमेव नित्यमारभते नरः॥**
**पापं प्रज्ञां नाशयति क्रियमाणं पुनः पुनः।**
**नष्टप्रज्ञः पापमेव नित्यमारभते नरः॥** इति च।

तत्र बुद्धिमपकर्षति, प्रज्ञां नाशयति, इति च सम्यक् ज्ञानहानिपूर्वकतद्विपरीतज्ञाननिष्पत्तिः विवक्षिता। अन्यथा कर्मान्तरप्रारम्भानुपपत्तेः। यद्यपीदं वचनजातं सर्वकर्मदेवतासामान्यविषयम्, तथाऽपि भगवज्ज्ञानस्य सम्यग्ज्ञानसामान्याबहिर्भावात् असाधुकर्मणः तद्विरोधित्वसिद्धिः। तथा विशेषतश्चोच्यते —

**ददामि बुद्धियोगं तं येन मामुपयान्ति ते।**
**आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि।**
**मामप्राप्य तु कौन्तेय ततो यान्त्यधमां गतिम्॥** इति च।

एवं न्यायस्मृत्युपबृंहितयाऽनया श्रुत्या सामान्येन ज्ञानविरोधित्वमसाधुकर्मणां सिद्धमित्याचार्यैरनुगृहीतम्।

'ऋतं पिबन्तौ'[1] इत्यत्र ऋतशब्दस्य सत्कर्मपरत्वदर्शनात् अनृतशब्देन ऋतविरोधित्वात् ऋतान्यत्वाद्वा पापमुच्यत इति वेदान्ताचार्यैरनुगृहीतम्।

नन्वेवं सति 'गुहां प्रविष्टौ'[2] इति सूत्रभाष्यविरोधः। तत्र हि 'ऋतं पिबन्तावि'ति वाक्यमधिकृत्यानुगृहीतम् – 'ऋतपानं हि कर्मफलभोग एव' इति। अत्र च 'कर्मफलेत्यनेन ऋतशब्दार्थ उक्त' इत्याचार्यैः अनुगृहीतम्। अतः कथममृतशब्दः अनुकूलकर्मपर इत्युच्यत इति चेन्न, 'ऋतं सत्यं तथा धर्मः' इत्यादिवचनात् ऋतशब्दस्य कर्मवाचित्वमेव। 'ऋतं पिबन्तावि'त्यत्र तु पिबन्ताविति भोगप्रतीतेः ऋतशब्दस्य कर्मवाचिनः तत्फले लक्षणया प्रवृत्तिरिति भाष्याभिप्रायः। अत एवान्यत्र भाष्ये 'ऋतमिति कर्मवाची'ति। अत्र च मुख्यार्थप्रतीतिपूर्वकत्वात् लाक्षाणिकार्थप्रतीतेः 'अनुकूलं कर्म ऋतशब्दार्थ' इत्युक्तम्। एतदभिप्रायेणैव 'ऋतमिति कर्मवाचि, ऋतं पिबन्ताविति दर्शनादि'ति भाष्यम्। 'यथा वृक्षस्य सम्पुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाति'[3] इत्युक्त्वा 'एवमनृतादात्मानं जुगुप्सेत्'[4]. इति पुण्यप्रतियोगिनि अनृतशब्दः प्रयुक्तः। 'वृजिनमनृतं दुश्चरितम्'[5] इति च श्रूयते।

एतेन 'अनृतेन हि प्रत्यूढाः'[6] इति श्रुतिर्भावरूपज्ञाने मानम्। ऋतं सत्यं न भवतीत्यनृतम् अनिर्वचनीयम्। तदपि 'एतं ब्रह्मलोकं न विन्दन्ती'ति पूर्ववाक्यावगतस्वापकालीनब्रह्मालाभ-निमित्तमज्ञानमेव। तदन्यस्य तदा तदलाभनिमित्तत्वासम्भवात्। न च ऋतं सत्कर्म, अनृतं पापमिह विवक्षितम्। 'ऋतं पिबन्तावि'त्यत्र सुकृते ऋतशब्दप्रयोगादिति वाच्यम्। सत्यवाचिनो हि ऋतशब्दस्य कर्मणि सत्त्वावश्यकत्वाभिप्रायेण कर्मफले प्रयोगः, न तु कर्मणि। 'सुकृतस्य लोके' इति कर्मणः पृथग्ग्रहणात् स्वप्रकाशप्रत्यगभिन्नब्रह्मालाभस्य वास्तवत्वासम्भवात्। अनिर्वचनीये च तस्मिन् सत्यस्य कर्मणः निमित्तत्वासम्भवात्, न कर्मणस्तदावारकत्वमपि। अज्ञानं तु विद्यमानमेवावृणोति, प्राप्तकण्ठचामीकराद्यावारकत्वदर्शनात्। अतः तदेवानृतशब्दार्थः। उभयत्रानृतशब्दप्रयोगेऽपि, 'अज्ञानेनावृतं ज्ञानम्'[7] इत्यादिशास्त्रप्रसिद्धावरणस्वभावस्याज्ञानस्यैव 'न किञ्चिदवेदिष'मिति परामर्शेनापि सिद्धस्य स्वप्रकाशात्मावरणयोग्यतया प्रकृते तदर्थत्वादिति नवीनोक्तं निरस्तम्। अनृतशब्दस्य दुष्कर्मपरत्वस्योपपादितत्वात्।

---

1. क.उ.1.3.1
2. शा.मी.सू.1.2.11
3. तै.उ.2.19
4. तै.उ.2.19
5. तै.ब्रा.3.9.19
6. छा.उ.8.3.2
7. भ.गी.5.15

यच्च स्वप्रकाशप्रत्यगभिन्नेत्यादि, तत्र न तावत् ब्रह्माभेदादलाभस्य वास्तवत्वासम्भवः, जीवब्रह्मभेदस्य व्यवस्थापितत्वात्। नाप्यनिर्वचनीये सत्यस्य कर्मणो निमित्तत्वासम्भवः। कर्मणः सत्यत्वासिद्धेः। व्यावहारिकत्वविवक्षायामलाभोऽपि तादृश एव। तथाप्यसाध्यत्वे ब्रह्मणः एव कर्मसाध्यता कर्मणः साधनत्वोच्छेदो वा स्यात्। तस्मादनिर्वचनीयत्वमेव कर्मसाध्यताप्रयोजकमिति विरुद्धो हेतुः।

किञ्च निमित्तपदेन कारणत्वोक्तौ सत्यस्यापि ब्रह्मणो जगत्कर्तृत्वाङ्गीकारेण व्यभिचारात्, उपादानत्वविवक्षायाम् इष्टापत्तिरेव, ब्रह्मण एवोपादनत्वात्। यथा च परिणामं विनाऽपि सत्यस्य ब्रह्मणः उपादानत्वं तथा अर्थापत्तिनिरासे उपपादितम्। नाप्यज्ञानस्यालाभनिमित्तत्वसम्भवः। तस्यापि प्राप्तावारकत्वादर्शनात्। न च प्राप्तकण्ठचामीकराद्यावारकत्वं दृष्टमिति वाच्यम्। तत्र कण्ठे चामीकरस्य सत्त्वेन तदप्राप्तेरभावात्। तत्सम्बन्धाज्ञानमेवाप्राप्तिरिति चेन्न। अज्ञानपदेन भावरूपाज्ञानविवक्षायामसिद्धेः। हेतुहेतुमतोरभेदप्रसङ्गाच्च। ज्ञानाभावरूपत्वे इन्द्रियसन्निकर्षादिस्व-कारणाभावादेव तदुपपत्तेः। तत्राज्ञानस्य ज्ञानाभावोपपादकत्वदर्शनेनाज्ञाने प्रमाणोपन्यासो व्यर्थः। ज्ञानाभावाभिन्नत्वेन तस्य सिद्धत्वात्। नापि चामीकरासम्बन्ध एवाप्राप्तिः प्रातिभासिकी। 'मम कण्ठे चामीकरं नास्ती'ति प्रतीतेः परोक्षत्वेन तस्य प्रातिभासिकार्थत्वासिद्धेः।

किञ्च 'अज्ञानात् कण्ठचामीकरं न प्राप्तमि'ति केनाप्यननुभवात् अज्ञानस्याप्राप्तिहेतुत्वम-सिद्धमेव। यच्च 'उभयत्रानृतशब्दस्य' इत्यादि, तन्न। 'अज्ञानेनावृतं ज्ञानम्' इत्यत्र कर्मण एवाज्ञानशब्देनाभिधानादित्युक्तत्वात्।

**नासदासीदित्यत्र तमश्शब्दार्थः**

'नासदासीदि'त्यत्र तमश्शब्दः प्रकृतिपरः। 'तमः परे देव एकीभवति'[1], 'यस्य तमः शरीरम्', 'आसीदिदं तमोभूतमि'त्यादिषु तथा दर्शनात्। प्रकृतेश्च 'गौरनाद्यन्तवती'ति नित्यत्वावगमात् नाज्ञाननिवर्त्यतेति न त्वदभिमताज्ञानरूपता। सदसदभावोक्तिः व्यष्टिचेतनाचेतनविलयपरा। न चेदं वाक्यं सदसद्विलक्षणत्वपरमिति शङ्कनीयम्। सदसद्विलक्षणमित्यनभिधानात्। सन्नासीदसन्नासीदिति हि उच्यते।

किञ्च किं सदसच्छब्दौ पारमार्थिकनिरुपाख्यपरौ, उत व्यावहारिकप्रातिभासिकपरौ? नाद्यः, तदानीमिति कालविशेषे निषेधे कालान्तरे तयोस्सत्त्वप्रसङ्गात। तदानीं ब्रह्मणस्सत्वेन तयोर्निषेधासम्भवाच्च। न द्वितीय, तमसः पारमार्थिकत्वनिरुपाख्यत्वयोः अन्यतरप्रसङ्गात्।

किञ्च असन्नासीदिति सद्विलक्षणस्य निषेधे कथं तादृशस्य भावरूपाज्ञानस्य तमः आसीदिति विधिः। तस्मात् व्यचष्टिचेतनाचेतनलयपरत्वमेव तद्वाक्यस्य युक्तम् ।

---

1. सु.उ.2.4

**मायाशब्दार्थः**

'इन्द्रो मायाभिः'[1] इत्यत्र मायाशब्दो न त्वदभिमते विप्रतिपन्नार्थे व्युत्पन्नः। ननु भ्रमहेतुभूत-मन्त्रौषधपिञ्छादिमति मायावीति प्रयोगदर्शनेन मायाशब्दस्य भ्रमहेतुकत्वार्थकत्वात् (भ्रमहेत्वर्थकत्वात्?) भावरूपाज्ञानस्यापि भ्रमहेतुतया तत्परत्वमिति चेन्न। कर्मणां भ्रमहेतुतया तत्परत्वसम्भवेन विप्रतिपन्नार्थपर-त्वकल्पनायोगात्। नापि मिथ्यात्वं मायाशब्दार्थः, बहुरूपहेतुत्वाभिधा-नात् विवक्षितविशेषलाभ इति वाच्यम्। मायाशब्दस्य मिथ्यार्थकत्वासिद्धेः। शुक्तिकारजतादिषु मायाशब्दप्रयोगादर्शनात्।

**मायामृगस्तु मारीचसृष्टिरेव हि तात्त्विकी।**
**न चेद्रामशरेणास्य निधनं नोपपद्यते॥**

वस्तुतस्तु मायाशब्दोऽत्र सङ्कल्पपरः। 'माया वयुनं ज्ञानमि'ति वेदनिघण्ट्वनुसारात्। प्रकृतिपरो वा। बहुत्वमविवक्षितम्। अवयवभेदविवक्षया वा बहुत्वोपपत्तिः। 'अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः'[2] इति मायाशब्दो हि 'मायां तु प्रकृतिं विद्यादि'[3]ति प्रकृतिपरतया श्रुत्यैव व्याख्यातः। मायाशब्दस्यानिर्ज्ञातार्थत्वात् तदनुवादेन 'क्षरं प्रधानमि'[4]तिवत् प्रसिद्धप्रकृतिपदार्थपरत्वं हि विधीयते। न च प्रकृत्यनुवादेन मायापदेन मिथ्यात्वविधिः। प्रकृतिपदस्याप्रकृतत्वात्। तुशब्द-विद्यादिति-पदसन्निधानाभ्यां प्रकृतत्वपौर्वापर्यानुगुणोद्देश्यविधेय-भावस्य स्पष्टत्वाच्च। मायाशब्दश्च आश्चर्यत्वं प्रवृत्तिनिमित्तीकृत्य प्रकृतौ वर्तते। अत एवासुरशस्त्रैन्द्रजालिकमन्त्रादिषु मायाशब्दप्रयोगः। 'देवमायेव निर्मिते'ति च।

**अविद्याशब्दार्थः**

'अविद्यायामन्तरे वर्तमाना'[5] इत्यत्र अविद्याशब्दः न त्वदभिमतार्थपरः। तस्य विप्रतिपन्नतया तत्राव्युत्पत्तेः। अतो विद्याविरोधिकर्मपरः, प्रकृतिपरो वा।

**अजाशब्दार्थः**

'अजामेकामि'[6]त्यत्र अजाशब्दोऽप्युक्तन्यानेनैव न त्वदभिलषितार्थपरः। किन्तु प्रकृतिपरः।

**नीहारशब्दार्थः**

'नीहारेणे'ति श्रुतौ नीहारशब्दोऽप्यत एव प्रकृतिपरः, कर्मपरो वा। अत व 'देवात्मशक्तिम्'[7]

1. बृ.उ.4.5.19
2. श्वे.उ.4.9
3. छा.उ.4.10
4. श्वे.उ.1.10
5. क.उ.1.2.5
6. श्वे.उ.4.5
7. श्वे.उ.1.3

इत्यत्र देवात्मशक्तिः प्रकृतिः। गुणाः सत्त्वरजस्तमांसि। एतेन स्मृतयोऽपि व्याख्याताः।

**॥ इति सद्विद्याविजये भावरूपाज्ञानप्रमाणभङ्गः॥**

## सद्विद्याविजये तिरोधानभङ्गः

### किञ्च प्रयोजनाभावाच्च नाविद्याकल्पनम्

यच्चेदमुच्यते - आत्मा तावदहमित्यनुभूयमानोऽपि पूर्णानन्दब्रह्मभिन्नोऽपि न तथाऽनुभूयते। एवं च स्वप्रकाशतया प्रसक्तप्रकाशस्य अप्रकाशः अविद्यावरणादेवेति।

तत्र किं स्वप्रकाशत्वहेतुकः प्रसक्तः प्रकाशस्वरूपमेव, उत अतिरिक्तः? नाद्यः, हेतुहेतुमद्भावव्याघातात्। इष्टापत्तेश्च प्रसङ्गानुपपत्तेः न द्वितीयः, तस्यानादित्वेन तदुत्पत्तिप्रतिबन्धासम्भवेन तन्निवर्तनं तिरोधानमिति स्यात्। ततश्चाविद्याया अनादित्वात् तस्याः कादाचित्कसहकारिणमनपेक्ष्य निवर्तकत्वाम्भवात् तादृशसहकारिणश्चानिरूपणात् न तत्म्भवः। इदं पूर्वत्रापि समानम्। ब्रह्मस्वरूपनिवृत्तिप्रसङ्गोऽधिकः। अविद्यायास्सादित्वे ततः प्राक् संसाराभावात् संसारमोक्षयोः व्युत्क्रमप्रसङ्गः। स्वप्रकाशत्वेन तत्प्रसञ्जनास्म्भवश्च।

अपि च कं प्रतीदमावरणं कल्प्यते। न तावत् ब्रह्म प्रति। तस्याज्ञत्वप्रसङ्गात्। तस्याज्ञत्वे मानाभावात्। 'अस्ति', 'प्रकाशत' इति व्यवहारस्य, 'नास्ति', 'न प्रकाशत' इति व्यवहारस्य च सहकारिवैकल्यादेवासिद्ध्या 'अस्ति', 'प्रकाशत' इति व्यवहारयोग्यताविरहस्य 'नास्ति', 'न प्रकाशत' इति व्यवहारयोग्यताया वा अज्ञानाधीनावरणत्वकल्पनासम्भवात्। 'अहमज्ञ' इत्यत्र अहमर्थाश्रयतयाऽज्ञानप्रतीतेश्च। नाप्यब्रह्म प्रति। प्रकाशाप्रसक्तेः। अन्तःकरणावच्छिन्नचैतन्यं प्रति अशनाद्यतीतस्वरूपाप्रतिपत्त्यर्थमावरणं कल्प्यत इति चेत्, ब्रह्मणस्तत्स्वरूपप्रकाशाभावे तत्राप्यावरणं कल्प्यम्। तत्सत्त्वे तु तस्यैवान्तःकरणावच्छिन्नतया निरुक्तप्रकाशसत्त्वात् किमर्थमावरणम्।

किञ्च किं स्वरूप एव प्रकाशप्रसक्तिः उत तदतिरिक्ते? नाद्यः, तत्प्रकाशविघटने अध्यासानुपपत्त्या अविद्यायाः संसारोच्छेदकत्वप्रसङ्गात्। न द्वितीयः, तत्प्रसक्तेः स्वप्रकाशप्रयोज्यत्वाभावेन कारणान्तराधीनत्वात् तद्विघटनं तिरोधानमिति स्यात्।

किञ्च तिरोधानतया विवक्षितस्य वस्तुनः प्रकाशविरोधित्वे अध्यासानुपपत्तिः। अधिष्ठानप्रकाशेन विना अध्यासानुपपत्तेः। स्वरूपनाशप्रसङ्गश्च। प्रकाशाविरोधित्वे न तत्तिरोधानम्। तत्कल्पने प्रयोजनाभावश्च। उक्तसकलदोषग्रासादेव न वैशद्यविघटनं तिरोधानम्। नाप्यनवधारणत्वापादनम्। तस्य स्वरूपानतिरेके अविद्याधीनत्वसम्भवात्। स्वरूपातिरेके स्वरूपस्य अध्यासविरोधित्वाभावे तत्कल्पनं व्यर्थम्। विरोधित्वेऽपि तथा। न हि मिथ्याभूतेन गुञ्जापुञ्जत्वेन वह्नेर्दाहकत्वापगमः। तस्मात् मिथ्याभूतानवधारणत्वेन न स्वाभाविकाध्यासविरोधित्वापगमः।

अवधारणत्वनिवर्तकं तिरोधानमित्यपि न। निवृत्तेस्सत्यत्वे अद्वैतहानेः। मिथ्यात्वे स्वरूपस्य अवधारणात्मकत्वेन निवृत्तिकल्पनं व्यर्थम्, स्वरूपस्यानपायात्। स्वरूपस्यानवधारणात्मकत्वेऽपि तथेति स्पष्टमेव। तस्मात् न कथञ्चिदपि ब्रह्मस्वरूपावरणसम्भवः। जडावरणं तु अनङ्गीकारपराहतमनुपपन्नं च। कारणतद्व्यतिरेकाभ्यामेव प्रकाशतदभावयोरुपपत्तेः। ब्रह्मस्वरूपातिरेकेण प्रकाशाभावात्, तदध्यस्तत्वातिरेकेण घटादेः प्रकाशविषयत्वासिद्धेश्च। घटादिप्रकाशस्य कादाचित्कत्वसिद्धये तिरोधानमित्यपि न। चैतन्याध्यस्तत्वरूपप्रकाशविषयत्वस्य वैकल्यासिद्धेः। प्रत्युताविद्यैव हि अध्यस्तताहेतुः। न च घटावच्छिन्नानावृतचैतन्यस्य देवदत्तचैतन्येनाभेदस्य कादाचित्कत्वसिद्धये तत्कल्पनम्। वृत्तिव्याप्तिप्रयुक्ताभेदादेव प्रकाशोपपत्तेः। सिद्धे ह्यावरणे अनावृतचैतन्याभेदः प्रकाशत इति स्यात्। न त्वनावृतचैतन्याभेद एव प्रकाशत इति वाच्यम्। अन्यथा घटप्रकाशदशायां रसभानप्रसङ्गात्। घटचैतन्यमेव हि रसचैतन्यमिति चेन्न। रसनेन्द्रियजन्यवृत्तिकृताभेदस्यैव रसप्रकाशत्वोपगमोपपत्तेः। तत्त्वतस्तु इदमेव युक्तम्। घटावच्छिन्नचैतन्यस्यैव रसावच्छिन्नतया आवृत्तानावृतविभागानुपपत्तेः।

ननु घटावच्छिन्नमावरणं निवृत्तम्, रसावच्छिन्नमावरणमनिवृत्तमित्येवमेकत्रैव आवरणानावरणयोरुपपत्तिरिति चेन्न। समानदेशावच्छेदकभेदस्य भावाभावयोरेकत्र वृत्त्युपपादकत्वासिद्धेः। तत्सिद्धावपि घटरसयोः व्यवहारस्यैव वा तयोरव्यवहारस्यैव वा तयोर्व्यत्यासस्यैव वा कथं न प्रसङ्गः। न हि सम्भवति अवच्छेदकत्वतदभावयोरुक्तातिप्रसङ्गवारण-सामर्थ्यम्। प्रकाशे आवरणतदभावावच्छेदकयोः तत्रैव हि व्यवहारतदभावावच्छेदकत्वम्, न तु तस्मिन्नवच्छेदकत्वं विहाय। विशिष्टावरणमङ्गीकृत्य किञ्चिद्विशिष्टावरणं निवृत्तं किञ्चिद्विशिष्टावरणमनिवृत्तम् इत्युक्तौ जडावरण प्रसङ्गः इति।

यच्चासाधारणं 'नास्ति', 'न प्रकाशत' इति व्यवहार इति। तत्र व्यवहारो नाभिज्ञा। भ्रान्तेरावरणसाध्यत्वात् तदर्थमेव तत्कल्पनात्। नाप्यभिलपनम्। तस्य भ्रमसाध्यतया तद्धेत्वावरणत्वासम्भवात्। मूकस्यानावरणापाताच्च।

यच्चावरणम् 'अस्ति', 'प्रकाशत' इति व्यवहाराभाव इति। तत्र व्यवहारस्य अभिज्ञात्वे स्वरूपाभिज्ञा सर्वदा अस्त्येवेत्यसम्भवः। वृत्तिरूपाभिज्ञाया मोक्षेऽप्यभावात् तदानीमावरणप्रसङ्गः। इदानीमपि कारणाभावादेव वृत्त्यभावोपपत्तेः, न तस्य अज्ञानाधीनता। एतेनैव व्यवहारोऽनभिलपनमित्यपि निरस्तम्। नापि नास्तीत्यादिव्यवहारयोग्यत्वम् अस्तीत्यादिव्यवहारयोग्य-त्वं वा। उभयोरप्यारोपितत्वेनावरणाधीनत्वात्। आवरणानधीनत्वेन प्रपञ्चस्याध्यासोऽपि तथैव स्यादिति आवरणकथोत्सादः। अखण्डानन्दोऽहमित्य-नुभवाभावश्च।तस्य वृत्तिरूपतया वा कुदृष्टिपरिकल्पितकुतर्कानुसन्धानरूपकारणाभावाद्वेति न तत्प्रतिबन्धः आवरणमिति सुवचम्।

यदाह नवीनः – 'अस्ति', 'प्रकाशत' इति व्यवहारोग्यताविरहः 'नास्ति', 'न प्रकाशत' इति व्यवहारयोग्यता वाऽऽवरणम्। न चास्याप्यावरणसापेक्षता, अविद्यावत् अनादित्वात्। ननु आत्मनः स्वप्रकाशतया 'अस्ती'ति व्यवहारयोग्यतायास्सर्वदा सत्त्वेन कथं तदभावः तद्विपरीतयोग्यता चेति चेत्, न, चैतन्यावेद्यत्वस्यैव स्वप्रकाशतारूपत्वात् तस्याश्च तदविरोधित्वात्।

अस्तु वा अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वं स्वप्रकाशत्वम्। तथापि न दोषः। कल्पितयोग्यत्वायोग्यत्वयोः वास्तवापरोक्षव्यवहारयोग्यत्वाविरोधित्वात्। न चानादित्वे कल्पितत्वाविद्याधीनत्वयोरनुपपत्तिः। अविद्यातत्सम्बन्धवदुपपत्तेः। ननु यदि ब्रह्मस्वरूपमावृतं तर्हि साक्ष्यप्यविद्यया आव्रियेतेति आयातमान्ध्यमशेषस्य जगतः। जगतस्तद्रूपप्रकाशवत्त्वात्। न चेत्, ब्रह्मणोऽप्यावरणं न स्यात्, अनावृत्ताभिन्नत्वादिति चेत्, न। अस्ति तावच्चैतन्य-व्यवहारादानन्दव्यवहारस्य भेदः, प्रवृत्तिनिमित्तभेदात्। आनन्दपदे वृत्तिगतानन्दत्वमेव प्रवृत्तिनिमित्तम्। ज्ञानपदेऽपि वृत्तिगतं ज्ञानत्वमेव प्रवृत्तिनिमित्तम्। तदात्मतयाऽभिव्यक्तब्रह्मस्वरूपे ज्ञानत्वानन्दत्व-वैशिष्ट्यप्रतीतिः। ततश्च 'आनन्दो नास्ति न प्रकाशत' इति व्यवहारानुभवात् तद्योग्यत्वमस्तीति आनन्दरूपेण आवृतत्वम्। 'चैतन्यं नास्ति न प्रकाशत' इति व्यवहारानुभवाभावेन न तद्योग्यतेति चैतन्यरूपेण अनावृतत्वम्। तस्मादेकमेव निरंशं निरतिशयानन्दैकरसं चैतन्यमावृतमनावृतम् चेत्युपपद्यते। अथवा चिन्मात्राश्रयादज्ञानात् अनादिचिदानन्दभेदाध्यासज्ञानमानन्दमावृणोति न चैतन्यमिति व्यवस्था।

नन्वेवमपि गुञ्जापुञ्जारोपाधिष्ठानदहनवत् स्वप्रकाशे आनन्दात्मनि ब्रह्मणि अनवभासारोपेऽपि तदुचितं कार्यं स्यादिति चेत्, किं तदुचितं कार्यम् ? अविद्या निवृत्तिर्वा, नास्तीति व्यवहारविच्छेदो वा, अहमनतिशयानन्द इति व्यवहारो वा, सुखेच्छया पुत्रादिक्षुद्रविषयानन्वेषणं वा, आत्मनि प्रेम वा, तृप्तिर्वा, नाद्यद्वितीयौ। स्वरूपस्फुरणस्य अविद्यासाधकस्य अविद्यातत्कार्याविरोधित्वात्। न तृतीयः। अविद्यावरणेन प्रतिबद्धत्वात्। न चतुर्थः। स्वरूपस्य नास्तीत्यादिव्यवहारयोग्यता-प्रतियोगित्वेन पुत्रादेश्च सुखजनकत्वभ्रमेण तदुपपत्तेः। पञ्चमस्त्विष्यते। नापि षष्ठः। इदानीं स्फुरतोऽपि आनन्दस्य 'नास्ति', 'न प्रकाशत' इति व्यवहारयोग्यताप्रतियोगितया 'अस्ति', 'प्रकाशत' इति व्यवहारयोग्यताया अभावेन वा नष्टस्वीयसुखवदाविद्यकभेदप्रतियोगितया वा पुरुषान्तरवदिच्छाविरोधितालक्षणतृप्तिलक्षणरूपताया अभावात्। तस्मात् ब्रह्मणोऽनाद्यविद्यावरणे न काप्यनुपपत्तिरिति।

प्रयोगश्च - अहं ब्रह्मेति व्यवहारसामग्रीसम्पन्नः प्रत्यगात्मा अहं ब्रह्मास्मीतिव्यवहार-प्रतिकूलधर्मवान् तत्सामग्र्यां च सत्यां तदभाववत्त्वात्, तद्विपरीतव्यवहारवत्त्वाद्वा, यथा भ्रमगृहीतशुक्तिकेति।

**नवीनमतखण्डनम्**

उच्यते - ब्रह्मणः स्वप्रकाशत्वादेव 'अस्ति', 'प्रकाशत' इति व्यवहारयोग्यतायाः सर्वदा विद्यमानत्वेन तदभावः कथं भवेत्? यदुक्तम् - चैतन्यावेद्यत्वमेव स्वप्रकाशत्वं न त्वपरोक्षव्यवहारयोग्यत्वमपि स्वप्रकाशत्वघटकमिति, तन्न, तथा सत्यावरणकल्पनावैयर्थ्यात्। चैतन्यावेद्यत्वं च न स्वपदार्थः, नापि प्रकाशपदार्थः, नापि वाक्यार्थः। अतः स्वविषयत्वं स्वाधीनव्यवहारयोग्यता वा स्वप्रकाशता स्यात्। तत्सत्त्वे च कथं व्यवहारयोग्यताविरहः। अस्तुवेत्यादिपक्षान्तरमप्यनुपपन्नम्। विरोधिस्वरूपप्रकाशावरणेन विना आवरणाध्यासानुपपत्तेः। अनादित्वोक्तिः अविद्यातत्सम्बन्धावरणानाम् अनुपपत्तिमेव सर्वकालेऽपि दृढीकरोति। कादाचित्कत्वे हि कारणमाहात्म्यादुत्तेजकत्वेन वा कथञ्चिदुपपद्येत। तदनङ्गीकारे च विरोधिनोऽनादित्वात् सर्वस्मिन्नपि काले अविद्यादेरसिद्धिरेव स्यात्। अन्यथा भावाभावयोरपि अनादिभूतयोः सहावस्थानमेकत्र प्रसजेत्। विरोधाभावे च नावरणकल्पनोपपत्तिः।

किञ्च ज्ञानं ह्यज्ञाननिवर्तकमितीष्यते। तथाच ज्ञाने सति कथं निवृत्त्यभावः सङ्गच्छते। न चावरणेन प्रतिबन्धात् अविद्यानिवृत्त्यभावात् अविद्यावरणयोरुपपत्तिः। तस्य ज्ञानेन निवृत्तेः वाच्यतया उक्तदोषानिवृत्तेः।

किञ्च एवमनादित्वेन परिहारे घटाद्यध्यासेऽपि नावरणापेक्षा, प्रवाहानादित्वेन परिहारात्। पूर्वपूर्वाध्यासस्य उत्तरोत्तराध्याससिद्धये उत्तेजकत्वकल्पनसम्भवात्। युक्तं चैतत्। पूर्वाध्यासस्य सिद्धत्वात् अध्यासस्य भेदवासनासापेक्षत्वाङ्गीकाराच्च। न त्वावरणं कल्पनीयम्, गौरवात्।

किञ्च ब्रह्मण आवरणे साक्षिणोऽप्यावृतत्वात् जगदान्ध्यप्रसङ्गः।

यच्च – 'अस्ति तावदि'त्यादिना आनन्दप्रकाशयोरावरणानावरणोपपादनम्, तदनुपपन्नम्। प्रकाशोऽस्ति, प्रकाशते, आनन्दो नास्ति, न प्रकाशत इति व्यवहारवैषम्यं तावदसिद्धम्। तत्तद्वृत्तिदशायां तदस्तिताव्यवहारात् ।

किञ्च आनन्दवृत्तिदशायां नावरणम्। तदभाववृत्तिदशायाम् अस्फुरणेन व्यवहाराप्रसङ्गादेव नावरणम्। आनन्दत्वज्ञानत्वयोः वृत्तिगतत्वे ज्ञानानन्दादिपदानामपि तत्रैव व्युत्पत्तौ 'सत्यं ज्ञानम्'[1], 'विज्ञानमानन्दम्'[2], 'आकाश आनन्दः'[3] इत्यादिपदानामयोग्यार्थता स्यात्। ब्रह्मणः प्राकाशानन्दरूपतायाः असिद्धेः मोक्षस्यापुरुषार्थता। आनन्दादिवृत्त्यभेदबोधने भ्रमजनकता, अयोग्यत्वात् बाधार्थता वा सामानाधिकरण्यस्य स्यात् ।

---

1. तै.उ.1.25
2. बृ.उ.3.9.28
3. तै.उ.1.31

किञ्च एवमानन्दावरणे ब्रह्मावरणसिद्धान्तभङ्गः। तस्मात् 'एकमेव' इत्युपसंहारे आनन्दैकरसं चैतन्यमित्युपसंहारो व्याहतः। वृत्त्योर्भिन्नत्वात्। वृत्तेः निरतिशयानन्दत्वकीर्तनमपि व्याहतम्। कस्याञ्चित् तादृशत्वसम्भवे संसारस्यैव परमपुरुषार्थता स्यात्। एतेन आनन्दवृत्तिविशिष्टरूपेणावरण-मित्यपि दत्तोत्तरम्। तत्त्वज्ञानेनाविद्यानिवृत्तौ निरतिशयसुखवृत्तेरेवासम्भवात् तादृशपुरुषार्थस्यासिद्धिः (द्धेः?)।

ननु प्रेमास्पदत्वेनात्मनः सुखत्वसिद्धिरवर्जनीया। तथाहि – चन्दनादिजन्यसुखवृत्तौ आत्मनि च प्रेम तावदविशेषेणैव दृश्यते। तत्र च नोभयं प्रयोजकम्, गौरवात्। न च वृत्तिः प्रयोजिका, आत्मनि प्रेमविरहप्रसङ्गात्। तस्मादात्मसुखमेव प्रेमप्रयोजकम्। चन्दनादिजन्यसुखमपि तदभेदाध्यासात् प्रेमगोचरः। अतः सुखपदस्य विशिष्टशक्तत्वेऽपि स्वरूपानन्दसिद्धेर्न वैकल्यमिति चेत्, न। आनन्दाभेदाध्यासात् वृत्तेः प्रेमप्रयोजकत्वे विश्वस्यैव प्रेमास्पदत्वप्रसङ्गात्। अन्ततह् सुखदुःखयोरप्यविशेषः प्रसज्यते। कृत्स्नस्यापि सदभेदाध्यास एवानन्दाभेदाध्यासः। कस्यचित् वृत्तिविशेषस्य तदभेदाध्यासः, कस्यचित् ज्ञानाभेदाध्यासः इत्यादि दुर्भाषणं जडानां पुरत एव शोभते। सदानन्दज्ञानभेदानङ्गीकारात्।

किञ्च सुखाभेदस्य प्रेमप्रयोजकत्वे प्रेमतारतम्यं न स्यात्, स्वरूपसुखे तारतम्यासिद्धेः। अतो वृत्तीनामेव तरतमभावात् तत्प्रयुक्तप्रेमतारतम्यं वाच्यम्। अतो वृत्तीनां सुखत्वावश्यम्भावात् स्वत एव प्रेमास्पदत्वं न त्वन्यप्रयुक्तम्। अतो वृत्त्यभेदादात्मनि प्रेमेति वैपरीत्यमेव स्यात्। सुखाभावदशायामात्मनि प्रेम 'जीवन् भद्राणि पश्यती'ति न्यायेन कादाचित्कभाविसुखाभेदात् स्यात्। तस्मान्न प्रेमबलादात्मन आनन्दरूपतासिद्धिः। एवं च शब्देनैवानन्दरूपतासिद्धिर्वाच्या। तत्र वृत्तेः, वृत्तिविशिष्टस्य, वृत्त्युपहितस्य वा सुखपदमुख्यार्थत्वे स्वरूपस्य सुखात्मता कुतस्सिध्येत्।

एतेन विशिष्टशक्तस्य पदस्य समानाधिकरणपदानामेकार्थत्वानुसारेण विशेष्यलक्षणायामपि स्वरूपसुखसिद्धिर्भवत्येव, 'विज्ञानमानन्दमि'त्यादिभिरिति निरस्तम्। प्रवृत्तिनिमित्तविशिष्टशक्तस्य प्रवृत्तिनिमित्ताश्रयस्वरूपलक्षकत्वे स्वरूपसुखलाभे युक्तेऽपि प्रवृत्तिनिमित्तस्य वृत्तिगतत्वे तल्लाभायोगात्।

वस्तुतस्तु प्रवृत्तिनिमित्तस्य स्वरूपगतत्वाङ्गीकारेऽपि न स्वरूपस्यानन्दरूपतासिद्धिः। प्रमाणान्तरेण प्रवृत्तिनिमित्तवैशिष्टये सिद्धे हि तद्विशेष्यलक्षणायामपि यथामानं तत्स्वरूपसिद्धिः स्यात्। इह त्वानन्दस्वरूपलाभे न मानान्तरमस्ति। अतो 'विज्ञानमानन्दमि'त्यादिवाक्यमेव तत्र मानं वाच्यम्। न च तत् प्रवृत्तिनिमित्तवैशिष्ट्यबोधकमितीष्यते, किं तु स्वरूपलक्षकमिति। न च प्रवृत्तिनिमित्तवैशिष्ट्यमन्येन प्रतीयते, येन तद्विशेष्यलक्षणया स्वरूपमानन्दरूपं स्यात्। तस्मात् चन्दनादिजन्यवृत्तौ आत्मनि च यावदेकं सुखपदप्रवृत्तिनिमित्तमनुगतं नेष्यते न तावदात्मन आनन्दरूपतासिद्धिरिति।

यच्च चिदानन्दभेदाध्यासात् आवरणव्यवस्थोपपादनम्, तदपि न। आनन्दावरणे हि प्रेम न स्यात्। ततश्च त्वया परमप्रेमास्पदत्वेन आनन्दरूपतासाधनं व्याहन्यते।

किञ्च यदि भेदः कल्प्यते तर्हि तस्य आवरणं किमर्थम्? तत एवाप्रतीत्युपपत्तेः। ननु भेदे सिद्धे तदधीननिरुक्तयोग्यत्वायोग्यत्वयोरपि सिद्धेर्न तन्निवारयितुं शक्यम्। अतस्तस्यावरणशब्दार्थत्वकल्पने को दोष इति चेत्, अवश्यकल्पनीयोपजीव्यातिक्रम एव दोषः। न हि आवरणकार्यतयाऽभिमतस्य भेदादेवोपपत्तौ आवरणकार्यत्वकल्पनं त्वदभिमतस्यावरणत्वकल्पनं च युक्तम्।

किञ्च पक्षद्वयेऽपि स्वाभाविकापरोक्षव्यवहारयोग्यतया स्वाभाविकाभेदेन च तत्कार्यमवर्जनीयम्। किं तत् कार्यम्, अविद्यानिवृत्तिस्तावत् तथा तदा नास्तीति व्यवहारविच्छेदश्च। न चाविद्यासाधकत्वादनिवर्तकता, तत्त्वज्ञानादनिवृत्तिप्रसङ्गात्। स्वरूपस्यैव तत्त्वात्। न च चरमवृत्तिर्निवर्तिका, जडत्वात्। वृत्तेरेवाज्ञानविरोधित्वे आवरणकल्पनं व्यर्थम्।

किञ्च प्रकाशस्याविद्यातत्कार्यविरोधित्वाभावे अध्यासार्थावरणकल्पनानुपपत्तिः। एवम् 'अहं निरतिशयानन्द' इति व्यवहारोऽपि कार्यः। निरतिशयत्वस्याज्ञानादव्यवहारे तस्य स्वरूपातिरेके सत्यत्वे अद्वैतहानिः। मिथ्यात्वेऽनावरणापेक्षा। आनन्दस्वरूपावरणे च दोष उक्तः। क्षुद्रविषयानन्वेषणमपि कार्यम्। नास्तीति व्यवहारयोग्यत्वाभावस्य भ्रमाभावस्यापि कार्यतया तद्योग्यत्वस्य भ्रमस्याप्यसम्भवेन ताभ्यामेतत्कार्याभावोपपादनासम्भवात्।

किञ्च सुखजनकत्वभ्रमः कथं निरतिशयानन्दानुभवे जाग्रति पुत्राद्यन्वेषणं प्रयोजयेत्। प्रेमापि कार्य एव। यदत्र इष्यत एवेत्युक्तम् – तद्व्याघातमौढ्यात्। आनन्दावरणं ह्युपपाद्यते। अतः कथं तत्प्रकाशाधीनप्रेमेष्टिः। तदिष्टौ च तद्वदेव सर्वमपि कार्यं दुर्निर्वारम्। तृप्तिरपि कार्यैव। अस्तीति व्यवहारयोग्यताया नास्तीति व्यवहारयोग्यताभावस्य च कार्यतया तदभावाभ्यां तृप्त्यभावोपपादनासम्भवात्। आविद्यकभेदस्य स्वाभाविकाभेदकार्याविरोधस्य प्रेमाङ्गीकुर्वताऽङ्गीकारेण स्वाभाविकाभेदकार्यनिवृत्त्यसम्भवात्। यदि काल्पनिकभेदान्न तृप्तिकार्यं तर्हि तत एव प्रेमापि त स्यात्।

ननु अपरिच्छिन्नानन्दस्यैवावरणम्, नतु परिच्छिन्नस्य जीवानन्दस्येति चेन्न। अनवच्छिन्नत्वपदेन निरतिशयत्वविवक्षायां सत्यमिथ्याविकल्पेन दोष उक्त एव। तत्पुरुषीयान्तःकरणावच्छिन्नप्रदेशविवक्षायां तत्प्रकाशोऽपि भिन्न एवेत्यानन्दे को विशेषः।

किञ्च प्रकाशानन्दभेदकल्पने किं मानम्? आवरणान्यथानुपपत्तिरेवेति चेत्, आवरणस्यैवेदानीं सन्देहात्। 'अज्ञानेनावृतं ज्ञानमि'ति तु ज्ञानस्यैवावरणमाह, नानन्दस्य। अस्तु वा भेदाध्यासः। अथापि नावरणानावरणव्यवस्था। चन्द्रभेदाध्यासेऽपि प्रकृष्टप्रकाशत्ववर्तुलत्वादेः व्यवस्थायाः अदर्शनात्। चन्द्रे द्वित्वारोपे तत्र सव्यदक्षिणव्यवस्था दृश्यत इति चेन्न। असिद्धेः। एकस्मिन्नेव चन्द्रे द्वित्वचन्द्रप्रतियोगिकसव्यदक्षिणत्वानामारोपात्।

ननु 'अयं चन्द्रो दक्षिण एव, न वामः', 'अयं चन्द्रो वाम एव, न दक्षिण' इति प्रतीतेः व्यवस्थाऽस्त्येवेति चेन्न। उपाधिमाहात्म्यात् चन्द्रनिरूपितसव्यदक्षिणत्वाभ्यां तत्र विद्यमानाभ्यां सह चन्द्रनिरूपितसव्यदक्षिणत्वयोर्ग्रहे सव्यत्वाभावेन दक्षिणत्वस्य, दक्षिणत्वाभावेन सव्यत्वस्य, सामानाधिकरण्यरूपस्य वा अवच्छेद्यावच्छेदकभावस्य वा सम्बन्धस्य ग्रहणात् व्यवस्थायाः असिद्धेः। यद्यपि सव्यदक्षिणत्वतदभावानां परस्परसामानाधिकरण्यमविशिष्टम्, तथाऽपि उक्तरीत्या प्रतीतिवैचित्र्योपपत्तिरूपोपाधिमाहात्म्यात् उक्तप्रकारातिरेकेण च नोक्ता प्रतीतिः निर्वहति।

ननु अस्तु अर्थव्यवस्थयैव तत्प्रतीतिनिर्वाहः। अनिर्वचनीयव्यवस्थायाः सम्भवादिति चेन्न। व्यवस्था हि नाम एकस्य चन्द्रस्य सव्यत्वदक्षिणत्वाभावाश्रयत्वम्, अपरस्य दक्षिणत्वसव्यत्वाभावाश्रयत्वं च। न चेयं व्यवस्था सम्भवति। एकस्यैव चन्द्रस्य प्रातिभासिकभेदसव्यत्वदक्षिणत्वाश्रयत्वात्। यद्येवमपि भेदसामानाधिकरण्यमात्रात् व्यवस्थेत्युच्यते, तर्हि स्वाभाविकाभेदसामानाधिकरण्यादव्यवस्था किं न स्यात्।

किञ्च एवं सति सव्यत्वाश्रयात् दक्षिणत्वाभावाश्रयस्य भिन्नत्वात् विपरीतव्यवस्था प्रसज्यते।

ननु चन्द्रे एकत्वद्वयं प्रातिभासिकमुत्पद्यते। तत्र एकेनैकत्वेन समानाधिकरणतया दक्षिणत्वमनिर्वचनीयमुत्पद्यते, अपरेणैकत्वेन समानाधिकरणतया सव्यत्वमिति व्यवस्थोपपत्तिरिति चेन्न। अप्रातिभासिकेन क्लृप्तेन चन्द्रगतेन एकेनैवैकत्वेन प्रकृतप्रतीत्युपपत्तौ तदतिरिक्तप्रातिभासिकैकत्वद्वयोत्पत्तौ कल्पकाभावात्।

किञ्च एकत्वद्वयोत्पत्तावपि नेष्टसिद्धिः। सामानाधिकरण्यं हि अयमेकश्चन्द्रो दक्षिणः, अयमेकश्चन्द्रस्सव्य इति प्रतीतिसिद्धम्। तच्च एकत्वाश्रयचन्द्राधिकरणत्वमेव। तादृशं च सामानाधिकरण्यमुभाभ्यामप्येकत्वाभ्यां सव्यत्वदक्षिणत्वयोरविशिष्टमिति कुतो व्यवस्था।

किञ्च एवं सति कल्पितभेदेन व्यवस्थासिद्ध्या स्वाभाविकाभेदस्य कार्यकरत्वाभावे जीवब्रह्मणोः कल्पितभेदसत्त्वेन तत एव जीवस्य ब्रह्माभेदप्रतिसन्धानाभावोपपत्तौ किमावरणकल्पनेन। न चावरणकृत एव भेदः। तथा सति घटावच्छिन्नचैतन्यस्य रसावच्छिन्नचैतन्याद्भेदे गुणगुणिनोस्तादात्म्यभङ्गः। अस्तु वा सव्यत्वदक्षिणत्वयोः कल्पितयोः यथाप्रतीति भिन्नाधिकरणयोः व्यवस्था। अस्तु च ब्रह्मणि भेदकल्पने कल्पितावरणस्य एकब्रह्मगतत्वमेव, न त्वितरब्रह्मगतत्वमिति व्यवस्था, चन्द्रगतसव्यत्ववत्। तथाऽपि अकल्पितमनावरणं कथं व्यवस्थास्यते। अनावरणमपि कल्पितमिति व्यवस्थोपपत्तिरिति चेत्, न। किं स्वरूपस्यावरणे स्वाभाविके सत्येवावरणं कल्प्यते। उत तादृशे अनावरणे? आद्ये आविद्यकावरणकल्पनं व्यर्थम्। अत एव न द्वितीयोऽपि। स्वाभाविकानावरणसत्त्वे तत्कार्यव्यवहारादेरावश्यकत्वात्। स्वाभाविकानावरणस्य न व्यवहारादिप्रयोजकत्वं किन्तु कल्पितानावरणस्यैव इत्युक्तौ तदेव कल्पनीयम्, न त्वावरणम्।

किञ्च स्वाभाविकानावरणसत्त्वे तत्रानावरणकल्पनमनुपपन्नम्। अनावरणप्रतीतेः

सिद्धविषयत्वोपपत्त्या कल्पकत्वासिद्धेः। अस्तु वा कल्पनम, अस्तु च भेदकल्पनया सव्यदक्षिणत्वयोश्चन्द्रद्वय इव इहापि ब्रह्मभेदकल्पनया ब्रह्मद्वये कल्पितावरणानावरणव्यवस्था। तथापि अकल्पितचन्द्रवर्तुलप्रकृष्टप्रकाशस्वरूपवत् इहापि अकल्पितब्रह्मप्रकाशानन्दस्वरूपाणां ब्रह्मद्वयसाधारण्यात् कथं च प्रकाशानन्दयोरावरणानावरणव्यवस्था, सव्यदक्षिणत्वयोः चन्द्रद्वये व्यवस्थायामपि चन्द्रप्रकृष्टप्रकाशस्वरूपयोः व्यवस्थाया अदर्शनात्।

अथ चन्द्रे प्रकृष्टप्रकाशप्रतियोगिकभेदस्य अकल्पनात् स्वरूपद्वयमपि चन्द्रद्वयसाधारणमिति युज्यते, इह त्वानन्दप्रतियोगिकभेदस्य प्रकाशेऽकल्पनान्न तयोस्साधारण्यमिति चेत्, हन्त तर्हि उत्सन्नमद्वैतम्। प्रकाशानन्दयोः स्वाभाविकभेदाभावे एवं कल्पनानुपपत्तेः। प्रकाशानन्दयोरभेदे आनन्दप्रतियोगिक एव प्रकाशप्रतियोगिकोऽपि। चन्द्रस्य चन्द्रात् प्रकृष्टप्रकाशस्य प्रकृष्टप्रकाशादिव प्रकाशात् प्रकाशस्य, आनन्दादानन्दस्य भेदसिद्धेः। ननु आनन्दत्वं प्रतियोगितावच्छेदकम्, प्रकाशत्वमधिकरणतावच्छेदकम्। एवं च आनन्दभेदवान् प्रकाश इति व्यवस्थेति चेन्न। आनन्दत्वस्य प्रतियोगितावच्छेदकत्वेऽपि तदभिन्नस्य प्रकाशस्य प्रतियोगित्वानपायात्। आनन्दस्याधिकरण-त्वानपायाच्च। अतो न कथञ्चिदपि व्यवस्थासम्भवः।

किञ्च किमियं व्यवहारयोग्यता? दण्डादेरिव स्वरूपयोग्यता, उत फलोपधानमेव, उत सहकारिसम्पत्तिः, उत त्रितयबहिर्भूता काचित्। नाद्यः, पूर्णानन्दे 'अस्ति', 'प्रकाशत' इति व्यवहारस्य यदाकदाचित् सत्त्वे स्वरूपयोग्यतायास्सत्त्वेन तद्विरहस्य कदाप्यसम्भवात्। तादृशव्यवहारस्य कदाप्यसत्त्वे स्वत एव तद्योग्यताविरहात् न तस्याविद्याधीनता, स्वरूपानुबन्धित्वात्। 'नास्ति', 'न प्रकाशत' इति व्यवहारस्य कदाचित् सत्त्वे तद्योग्यतायाः स्वरूपानुबन्धितया नाविद्याधीनता। तादृशव्यवहास्य कदाप्यसत्त्वे तद्योग्यतायाः तुच्छतया न कदाचिदपि तत्सम्भवः।

न द्वितीयः, तत्राविद्यया 'नास्ति', 'न प्रकाशत' इति व्यवहारो भवति, 'अस्ति', 'प्रकाशत' इति व्यवहारः प्रतिबध्यत इति ह्यर्थः। तथाच पूर्णानन्दप्रकाशे निष्परिपन्थिनि जाग्रत्येव विप्रलिप्सयेव अविद्यया 'नास्ति', 'न प्रकाशत' इति व्यवहारः आमवातजडीकृतदेहस्येव 'अस्ति', 'प्रकाशत' इति व्यवहाराभावश्च भवति। किमेताभ्यां प्रयोजनम्। पूर्णानन्दप्रकाशे लेशतोऽपि वैकल्प्यासिद्धेः। बालस्य अम्बातातमातुलादिशब्दवत् पूर्णानन्दोऽस्ति प्रकाशते चेति वदेति केनचिद्राजादिना नियमितः तथा वदति, तदा आवरणाभावप्रसङ्गः।

एतेनोक्तरीत्या 'अस्ति', 'प्रकाशत' इति व्यवहारस्य सत्त्वेन तद्योग्यताविरहो न सम्भवति इति 'अस्ति', 'प्रकाशत' इति व्यवहारयोग्यताविरह आवरणमिति पक्षेऽपि दोष उद्भावितो भवति। 'नास्ति', 'न प्रकाशत' इति व्यवहाराभावदशायां आवरणाभावप्रसङ्गादेव नावरणात् तद्व्यवहारः।

नापि तृतीयः, पूर्णानन्दाभावस्य तत्प्रकाशाभावस्य च ज्ञानम्, व्यवजिहीर्षा, वागिन्द्रियमित्यादिकं

हि व्यवहारकारणम्। इदं किमपि नाविद्याधीनम्, सर्वमपि कार्यं तदधीनमित्युक्तौ विशिष्य पूर्णानन्दस्यावरणोपवर्णनं च व्यर्थम्। 'अस्ति', 'प्रकाशत' इति व्यवहारसामग्र्यपि पूर्वोक्तैवेति न तद्विरहः अविद्याधीनः।

नापि चतुर्थः, त्रितयबहिर्भूतस्योक्तिबहिर्भावात्। अपि च प्रकाशानुगुणव्यवहाराभावार्थं निरुक्तयोग्यतारूपमावरणं कल्प्यते, प्रकाशानुगुणव्यवहारे जाग्रति कथं तदयोग्यता कल्प्येत। विद्यते खलु 'आनन्दविषयोऽहमि'ति व्यवहारः। अध्यासानुगुण एव व्यवहारः, न तु स्वप्रकाशानुगुण इति चेन्न। स्वव्यवहारस्यापि स्वप्रकाशाधीनतया स्वरूपगोचरतया च तदनुगुणत्वात्। 'अहमि'ति व्यवहारोऽपि स्वरूपगोचर एवाहमर्थाध्यासाधिष्ठानत्वात्। स्वरूपस्य अखण्डानन्दव्यवहाराभावाय आवरणकल्पनमिति चेत्, तत् किमखण्डप्रकाश इति व्यवहारः सुप्रसिद्धः, येन प्रकाशावरणं नाङ्गीकरोषि ।

ननु प्रकाशानन्दयोः न तात्पर्यम्, किन्तु अखण्ड एवेति चेत्, किमखण्डत्वं स्वरूपमेव, उत अतिरिक्तम्? आद्ये व्यवह्रियत एव। अखण्डपदप्रयोगः स्यादिति चेन्न। सर्वैः पर्यायैः भाषापदैश्च सर्वैः व्यवहर्तव्यमिति नियमाभावात्। न द्वितीयः, स्वप्रकाशात् तद्व्यवहारासम्भवेन आवरणस्यावक्तव्यत्वात्।

यश्च प्रयोगः, तत्र पक्षे 'अहं ब्रह्मे'ति व्यवहारसामग्रीसम्पन्न इति विशेषणं व्यर्थम्। न च मुक्तव्यावृत्यर्थं तत्, तदानीमपि स्वप्रकाशतारूपसामग्र्याः सत्त्वात्। न च तदानीं वागादसहकार्यन्तरविरहात् सामग्रीवैधुर्यम्, तर्हि कुमतिपरिकल्पितदुस्तर्कदुर्नयोपेततत्त्वमस्यादि-वाक्यार्थभ्रमदशायामेव तादृशज्ञानसामग्रीति तद्दशायां हेतोरसिद्धिः।

किञ्च अद्वैतचरमसाक्षात्कारपर्यन्तम् अविद्यावरणयोः वृत्तिरिष्यते व्यवहारश्च श्रवणमारभ्यास्तीति तद्दशायामेव अविद्यावरणनिवृत्तिर्वाच्या। आवरणस्य व्यवहारप्रतिकूलत्वोक्तेः। दृष्टान्ते च शुक्तिपदेन तत्स्वरूपविवक्षायां साधनवैकल्यम्। शुक्तिस्वरूपस्य इदमिति व्यवहारात् स्वरूपव्य-वहारप्रतिबन्धासिद्धेश्च। शुक्तित्वविवक्षायामपि तथैव। शुक्तित्वज्ञानाभावेन तद्व्यवहारसामग्रीवैकल्यात् तत एव व्यवहाराभावोपपत्त्या व्यवहारप्रतिबन्धकस्याकल्पनीयत्वाच्च।

**॥ इति सद्विद्याविजये तिरोधानभङ्गः॥**

## सद्विद्याविजये अविद्याश्रयभङ्गः

**किञ्च कोऽयमज्ञानाश्रयः। अत्रापि मुष्टामुष्ट्याचरन्ति**

केचिदाहुः - घटाद्यज्ञानं घटादिचैतन्यनिष्ठमेव। अन्यथा तत्र विक्षेपायोगात्। दृश्यते च घटशुक्तिकादौ वल्मीकरजतादिविक्षेपः। न चैवं तस्य साक्ष्यसम्बन्धात् 'अहमिदं न जानामी'ति

कथं प्रतीतिरिति वाच्यम्। अवस्थावस्थावतोरभेदात् मूलाज्ञानस्य अवस्थावतः अहङ्कार-समानाधिकरणत्वात् अवस्थाज्ञानमपि तदनुरक्ततया भाति इति।

अपरे तु – अज्ञानानुभवे अधिष्ठानचैतन्यप्रमातृचैतन्ययोः वास्तवाभेद एव प्रयोजकः। विषयचैतन्याश्रितस्यापि अज्ञानस्य प्रमातरि स्वरूपसम्बन्धविशेषेण 'शाखाग्रे चन्द्रमा' इति प्रतीतिवत् 'मय्यज्ञानमि'ति प्रतीतिरिति।

एके तु - शुक्त्याद्यज्ञानस्य अहमर्थचैतन्यमाश्रयः। शुक्त्यवच्छिन्नचैतन्यं विषयः। रजतादिकं च अज्ञानचैतन्यविवर्तः, नाज्ञानविवर्त इति।

केचित्तु - शुक्त्याद्यज्ञानं शुक्त्याद्यवच्छिन्नचैतन्यनिष्ठम् अहङ्कारावच्छिन्नचैतन्यनिष्ठं च। शुक्त्याद्यवच्छिन्नचैतन्यनिष्ठत्वात् तत्राध्यास उपपद्यते। अहङ्कारावच्छिन्नचैतन्यनिष्ठत्वात् 'अहं न जानामी'ति प्रतीतिश्चोपपद्यत इति।

इतरे तु – 'शुक्तिमहं न जानामी'त्यनुभवो मूलाज्ञानविषयः। शुक्त्यनवच्छिन्नचैतन्यस्यैव अज्ञानविषयत्वेऽपि शुक्त्यवच्छिन्नचैतन्यस्य तदभिन्नतया शुक्तेरप्यज्ञानविषयताप्रतीतिरुपपद्यते। रजताद्युपादानमज्ञानं तु कार्यानुपपत्तिगम्यम्। कार्यं तु रजताद्यध्यासः, 'ज्ञानेनाज्ञानं निवृत्तमि'त्यनुभवो वेति।

तत्र न तावदाद्यः, सर्वप्रपञ्चविवर्तोपादानस्याज्ञानस्यैव रजतोपादानत्वसम्भवे शुक्त्याद्यज्ञानस्य तदुपादानत्वकल्पनायोगात्। शुक्त्यज्ञानस्यैवोपादानत्वेऽपि प्रमातृगतस्यैवाज्ञानस्य वृत्त्या सह निर्गतस्य रजतोपादानत्वं कल्प्यताम् ।

किञ्च शुक्त्याद्यज्ञानानामनादित्वाङ्गीकारात् अवस्थात्वासिद्धेः कथं प्रतीत्युपपादनम्। ननु अवस्थात्वमेवेष्यत इति चेत्, न। तर्हि अवस्था उपादानम्। रजतस्य देवदत्तासाधारण्यसिद्धये हि देवदत्तासाधारणमवस्थाज्ञानमिष्यते। अज्ञानस्य सविषयत्वनियमात्। शुक्तिज्ञाने सति रजताध्यासादर्शनाच्च शुक्त्यज्ञानं रजताध्यासोपादानमिति कल्प्यते। तन्मूलाज्ञानस्य साधारणत्वात् कथं तज्जन्यावस्थाज्ञानस्यासाधारणत्वम्। तद्धि न देवदत्तगतम्, किन्तु विषयगतमित्युच्यते। व्यधिकरणस्य कथमेतदसाधारणत्वम्। तादृशासाधारणाज्ञानोत्पादनसामर्थ्यं यदि मूलाज्ञानस्येष्यते, तर्हि तस्यैवासाधारणरजतोत्पादनसामर्थ्यं कल्प्यताम्। ततश्च शुक्त्यज्ञानस्यानादित्व एव रजतोत्पादकत्वसिद्धिः, न त्ववस्थात्वे।

नापि द्वितीयः, शुक्त्याद्यज्ञानप्रकाशासम्भवात्, तच्चैतन्यप्रमातृचैतन्ययोर्भेदात्। स्वाभाविकाभेदात्तु विश्वप्रकाशोऽवर्जनीयः।

किञ्च चैतन्यस्वरूपयोरभेदात् अज्ञानप्रकाशेऽपि कथम् 'अहमज्ञ' इति स्वगततया प्रतीतिः। यदि च चैतन्ययोः स्वरूपाभेदादेव तस्याप्युपपादनम्, तदा यज्ञदत्तस्य शुक्त्यज्ञानेऽपि देवदत्तस्य शुक्तिज्ञानात् यज्ञदत्तस्य 'शुक्तिं जानामी'ति प्रतीतिप्रसङ्गः, देवदत्तस्य च 'शुक्तिं न जानामी'ति।

ननु ज्ञानाज्ञानयोरसाधारण्यात् नान्येन ग्रहणप्रसङ्गः इति चेन्न। प्रमातृचैतन्याभेदातिरिक्त-ग्रहणानिर्वचनात्। 'शाखाग्रे चन्द्र' इति वाक्यमेव न प्रतीतिः। तत्र च शाखापदं देशविशेषं लक्षयति। ततश्च उच्छ्रायविशेषवति देशे 'चन्द्र' इति प्रतीतिर्भवति, न तु शाखायामेव 'चन्द्र' इति प्रतीतिः। 'अहमज्ञ' इति तु प्रतीतिरेव, न तु व्यवहारमात्रम्। अतो न तन्न्यायेन प्रकृतार्थसिद्धिः। ननु मा भूत् तन्न्यायः स्वरूपसम्बन्धविशेषात् तथा प्रतीतिः स्यात्। अस्ति हि तादृशसम्बन्धस्तं प्रत्यावारकत्वलक्षणः इति चेन्न। 'मय्यज्ञानमि'त्यज्ञानाश्रयत्वप्रतीत्यनुसारेण स्वनिष्ठस्यैव मूलाज्ञानस्य विषयवारकत्वस्य अध्यासोपादानत्वस्य असाधारणार्थोत्पादनसामर्थ्यस्य च स्वप्नार्थानुसारेण सम्भवे विषयावच्छिन्नचैतन्यगतत्वकल्पनायोगात् ।

नापि तृतीयः, चैतन्यस्याधिष्ठानत्वेऽपि परिणामित्वासम्भवात्। परिणाम्यनपेक्षायां मिथ्यार्थान्यथानुपपत्त्या अज्ञानकल्पनं न स्यात्। परिणामिनमनपेक्ष्यापि अनिर्वचनीयोत्पत्तिकल्पनायां सन्निकर्षमनपेक्ष्य भ्रमोत्पादः कुतो न स्यात्। तथाच अनिर्वचनीयस्योत्सादः।

नापि चतुर्थः, प्रपञ्चोपादानाज्ञानेनैव रजतोत्पत्तिः इत्युक्ततया शुक्त्यज्ञानस्य तद्वृत्तित्वकल्पकासिद्धेः।

नापि पञ्चमः, मूलाज्ञानस्यैव 'अहमज्ञ' इति प्रतीतिविषयत्वे विषयगताज्ञानान्तरासिद्धिप्रसङ्गात्। तस्यैव रजताध्यासहेतुत्वं प्रागेवोक्तम्। न च 'ज्ञानेनैवाज्ञानं निवृत्तमि'त्यनुभवबवलात्तत्सिद्धिः। अस्याः प्रतीतेः परोक्षसाधारणतया ज्ञानाभावविषयत्वावश्यम्भावात्। ज्ञानप्रागभावो न ज्ञाननिवर्त्य इति चेत्, प्रतियोगिन एव प्रागभावनिवृत्तिरूपत्वेऽपि घटेन घटाभावो निवृत्त इति तत्प्रागभावस्य निवृत्ततायाः तादधीन्यात् तथा प्रतीत्युपपत्तेः।

'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः'[1] इत्यत्र अज्ञानशब्दो भ्रमपरः।

किञ्च 'एतावन्तं कालम् अहं घटं नावेदिषम्, इदानीं घटज्ञानेन घटाज्ञानं नष्टम्' इत्यनुभवेन अज्ञाननिवृत्त्यनुभवस्य 'अहं न जानामी'ति प्रतीताज्ञानविषयत्वमेवावगम्यते, विषयाज्ञानस्य कार्यानुमेयतया अप्रत्यक्षत्वाच्च तन्निवृत्तेः प्रत्यक्षत्वमनुपपन्नम्।

किञ्च किं मूलाज्ञानं विषयावच्छिन्नचैतन्यावारकम्, उत न? आद्ये तत एव विक्षेपोपपत्तौ विषयगताज्ञानकल्पने मानाभावः। द्वितीये तु तद्विषयत्वानुभवविरोधः।

ननु नानुभवविरोधः। घटावच्छिन्नचैतन्यस्य मूलाज्ञानविषयब्रह्माभिन्नतया मूलाज्ञानस्यावच्छिन्न-विषयताप्रतीत्युपपत्तेरिति चेन्न। घटज्ञानदशायामपि 'घटं न जानामी'त्यनुभवप्रसङ्गात्। न च घटानुभवः प्रतिबन्धक इति वक्तुं शक्यम्। अज्ञानानुभवात्मकस्य चैतन्यस्य अज्ञानविषयावच्छिन्न-चैतन्ययोरभेदस्य च तदानीमप्यविकलत्वात्।

1. भ.गी.5.16

किञ्च 'न जानामी'ति प्रतीयमानस्य मूलाज्ञानस्य अन्तःकरणमाश्रयः उत चैतन्यम्? नाद्यः, जडत्वात्। न द्वितीयः, स्वयं प्रकाशमानस्य चैतन्यस्य स्वगोचराज्ञानवत्त्वायोगात्।

ननु न ब्रह्मण्यज्ञानं कल्प्यते, किन्तु अन्तःकरणावच्छिन्ने। तत्र च तदवश्यं कल्पनीयम्। अशनायाद्यतीताखण्डानन्दाभेदेऽपि तदस्फुरणादिति चेन्न। न ह्यनुपपन्नार्थोपपत्तये अनुपपन्नमनुपपादकं च किञ्चिदर्थान्तरं कल्पनीयम् । उपपादकत्वेन अभिमतानुपपन्नार्थाभ्युपगमाय प्रवर्तमानराजाज्ञाया उपपाद्यत्वेन अभिमतानुपपन्नार्थ एव प्रवृत्तिसम्भवात्। तस्मात् स्वप्रकाशस्य ब्रह्माभेदानुपपत्तौ स्वप्रकाशत्वोपपादक उपपन्नश्च जीवब्रह्मभेद एवाङ्गीकार्यः, न त्वनुपपादकमनुपपन्नं च अज्ञानाश्रयत्वम्। अनुपन्नत्वानुपपादकत्वे प्रागेवाभिहिते।

**अत्र नवीनाद्वैतिमतानुवादः**

यदाह नवीनः - भासमानेऽप्यात्मनि अज्ञानं सर्वैरेवाभ्युपगन्तव्यम्। अन्यथा शरीराद्यभेदभ्रमानुपपत्तेः।

किञ्च घटादौ प्रमेयवदिति ज्ञानेन घटत्वाद्यवैशिष्ट्यप्रतीतावपि तदज्ञानं दृश्यते। अन्यथा तत्संशयाद्ययोगात्। न च अन्वयव्यतिरेकाभ्यां तत्प्रकारकज्ञानमेव अज्ञानविरोधीति वाच्यम्। अनभ्यासदशापन्ने जलादिज्ञाने सत्यपि तत्संशयानुरोधेन तत्राज्ञानस्य स्वीकर्तव्यत्वात्। सत्तानिश्चयरूपज्ञानमज्ञानविरोधीति चेत्, तर्हि ज्ञानमात्रस्य सत्तानिश्चयरूपत्वाभावेन पूर्वं सत्तानिश्चयरूपं न भवतीति न तस्याज्ञानाश्रयत्वं विरुद्धमिति, तन्न, आवरणकल्पनवैयर्थ्यात्।

ननु आनन्दप्रकाशार्थमावरणं कल्पनीयम्। अन्यथा अनवधारणेनापि व्यवहारप्रसङ्गादिति चेन्न। यद्यावरणे सत्यनवधारणं न व्यवहारकारणं तदा अनभ्यासदशायां जलानवधारणेन जलव्यवहारो न स्यात्। आवरणाधीनमेवानवधारणमिति चेन्न। आवरणस्य 'अस्ति', 'प्रकाशत' इति व्यवहारयोग्यत्वाभावरूपतया तस्यैव तदधीनत्वात्। अनवधारणत्वमेवावरणमिति चेत्, न। अखण्डब्रह्मानन्दाभेदव्यवहारस्य आवरणेन उपपाद्यत्वात् तत्रैवानवधारणत्वस्य वाच्यत्वात्। अस्य च स्वरूपप्रकाशानतिरेकात्। तत्राप्यावरणप्रसङ्गात्। तदनवधारणेऽपि भाविप्रामाण्य-संशयगोचरज्ञानस्थल इव व्यवहारस्य दुर्वारत्वाच्च।

किञ्च स्वरूपमवधारणात्मकम् उतानवधारणात्मकम्? नाद्यः, अज्ञानतत्कार्यासम्भवात्। अवधारणस्य अज्ञानविरोधित्वात्। न द्वितीयः, पुनरवधारणत्वकल्पनवैयर्थ्यात्। कदाप्यज्ञानानिवृत्तिप्रसङ्गाच्च। न हि ज्ञानादन्यत् अज्ञाननिवर्तकम्।

ननु इदानीमनवधारणमेव वृत्त्यापादितावधारणताकम् अविद्यां निवर्तयति इति चेन्न। तथा सति आवरणकल्पनावैयर्थ्यात्। ननु स्वरूपमनवधारणात्मकमेव। तेन विरोधात् अज्ञानासम्भवपरिहाराय अनादिभूतं कल्पितमनवधारणत्वमिष्यते। वृत्त्या चावधारणत्वापादने

कृते कल्पितानवधारणत्वस्य निवृत्तेरविद्यानिवृत्तिरिति चेत्, न। तथा सति स्वरूपस्यावधारणत्वमेव न सिद्ध्येत्। कल्पितावधारणत्वस्यैव अज्ञाननिवर्तकत्वेन स्वरूपस्य तदभावादवधारणत्व-कल्पकासिद्धेः। तथा चावरणत्वकल्पनं व्यर्थमेव।

किञ्च एवमनवधारणत्वकल्पनायां प्रकाशेऽनवधारणत्वप्रसङ्गः। आनन्दांश एवानवधारणत्वमिति चेन्न। निरंशत्वात्। न च प्रकाशानन्दयोर्भेदारोपात् तत्सम्भव इति वाच्यम्। भेदारोपेऽपि व्यवस्थाविरहस्य प्रागुपपादितत्वादिति।

अथ स्यात् प्रकाशमानेऽपि चैतन्ये अज्ञानं स्यादेव। अनुपपत्तिपरिष्कारत्वादविद्याया इति चेन्न। न हि अविद्यात्वादेवानुपपत्तिपरिष्कारता। तथा सति अनुपपन्नार्थानां सर्वेषामपि तत्स्वभावादेवानुपपत्तिपरिष्कारत्वप्रसङ्गात्। किन्तु मिथ्यात्वादेव। ततश्च 'अहमज्ञ' इति प्रतीतेः कथं ज्ञानाभावविषयत्वासम्भवः। तस्य मिथ्यात्वादेव अज्ञानवत् विरोधस्यालङ्कारत्वात्। किन्निमित्तं च मिथ्यार्थानुपपत्त्या तदुपपादनायाज्ञानकल्पनम्, कुतश्चानुपपत्त्या अज्ञानस्यान्तःकरणा-श्रयत्वनिरासः। किं बहुना, एवं सति कृतं तव परस्परव्याहतस्वमतसामञ्जस्यप्रत्याशया श्रमैकफलकुतर्कचिन्ताव्यसनेन।

किञ्च अनुपपत्तेर्मिथ्यालङ्कारत्वमेव, न सत्यालङ्कारत्वमिति क्व दृष्टं पण्डितम्मन्येन। प्रातिभासिकव्यावहारिकयोः दृष्टमिति चेत्, तर्हि प्रातिभासिकस्याध्यासार्थम् अज्ञानकल्पन-मावरणकल्पनं च व्यर्थं स्यात्। व्यावहारिकस्यानुपपत्त्यलङ्कारत्वाभावेन व्यावहारिकोपादानस्य वाच्यत्वात्। ब्रह्मणि परमार्थसती उपपत्त्यपेक्षा, नान्यत्रेति चेन्न। कुमतिपरिकल्पित-कुतर्कापादितानुपपत्त्याभासानां प्रपञ्च इव ब्रह्मण्यपि प्रवृत्तेः। सम्भवति हि तत्राप्यभेदाद्वितीयत्वादि-स्वरूपतदतिरेकयोः भेदवदनुपपत्तिः। एवं प्रमाणसम्बन्धोऽपि प्रपञ्च इव अनुपपन्नः। वेदान्तानां मिथ्यात्वाच्च तत्प्रतिपाद्यब्रह्मणः सत्यत्वं दुर्घटम्। न हि आध्यासिकधूमेन वाताभिघातादिमूला-ध्यासिकवाक्येन वाऽर्थसिद्धिः। स्वाप्नवाक्येऽपि यावन्मानान्तरमनाश्वास एवेति वैदिकेऽर्थे मानान्तरासिद्धेः नित्यमेवानाश्वासः प्रसज्यते।

वस्तुतस्तु सत्य एव स्वप्नार्थः, सृष्टिश्रवणात्। अतः सत्यस्यैव स्वप्नवाक्यस्य लौकिकवाक्यानामिव मानान्तरसंवादात् प्रामाण्यम्। न च प्रमाणमिथ्यात्वस्वरूपयौक्तिकबाधे जाग्रति बाधाभावात् प्रामाण्यं सूपपादम्।

ननु नास्त्यत्र यौक्तिकबाधः। प्रमाणसत्यत्वमिथ्यात्वयोः अर्थसत्यत्वमिथ्यात्वयोरप्रयोजकत्वात्। सत्यादपि हि भ्रान्तविप्रलम्भकवाक्यात् न सत्यार्थसिद्धिः। क्वचित् स्वाप्नवाक्यादपि नासत्यार्थसिद्धिः। तस्मात् प्रमाणस्य सत्यत्वे मिथ्यात्वे च बाधाबाधयोरेव अर्थमिथ्यात्वसत्यत्वप्रयोजकता। ब्रह्मणि च न बाधो दृश्यते। न च सर्वशून्यवादिवाक्येन बाधः। तस्य भ्रमविप्रलिप्सामूलत्वात्। वेदस्यातथात्वात् इति चेन्न। भ्रमविप्रलिप्सामूलत्वाभावेऽपि धर्मादिप्रतिपादकवाक्यानां

बाधितार्थत्वाङ्गीकारेण तव मते वैदिकवाक्यानां शून्यवादिवाक्याद्वैषम्यासिद्धेः। ततश्च तद्विरोधेन शून्यवादिवाक्यानां भ्रममूलकत्वकल्पनमसम्भवि।

किञ्च अज्ञानस्य चैतन्यमात्राश्रयत्वे जीवे संसारहेतुता न स्यात्, वैयधिकरण्यात्, चैतन्यस्यैव जीवेशविभागात्। सामानाधिकरण्ये ईश्वरस्यापि संसारप्रसङ्गः।

अत्रापि विप्रतिपद्यन्ते – केचिदाहुः - अन्तःकरण एव सुखदुःखानुभवरूपो बन्धः। न चैवं भोक्तृत्वकर्तृत्वादिसम्बन्धस्य चैतन्यसामानाधिकरण्यानुभवविरोधः। अन्तःकरणस्य चेतनतादात्म्येनाध्यस्ततया तद्धर्माणां चैतन्यसामानाधिकरण्येनानुभवोपपत्तेः। न चैवं चेतनः संसारी न स्यादिति वाच्यम्। अहङ्काराध्यासाधिष्ठानत्वस्यैव आत्मनि बन्धरूपत्वात् कर्तृत्वाद्यनर्थाश्रयान्तःकरणतादात्म्यादेव आत्मनः अनर्थाश्रयत्वाभिमानोपपत्तेरिति।

अन्ये तु – अन्तःकरणगतः चैतन्यप्रतिबिम्बरूपो बिम्बाद्भिन्नः असत्यश्चिदाभासःबन्धाश्रयः। न च बन्धमोक्षयोः वैयधिकरण्यम्। अन्तःकरणावच्छिन्ने स्वरूपतः सत्यतया मुक्त्यन्वयिनि परमार्थजीवे अध्यस्ततया तदधिष्ठानभावस्यैव सत्यजीवे संसारत्वादिति।

परे तु – अन्तःकरणविशिष्टो जीवः। तत्रैव संसारः। न च विशिष्टस्य संसारः, शुद्धस्य मोक्ष इति बन्धमोक्षयोर्वैयधिकरण्यम्, विशिष्टगतस्य बन्धस्य विशेष्येऽन्वयाभावात्, विशिष्टस्यानतिरेकादिति।

अपरे तु - केवलश्चेतन एव कर्तृत्वादिबन्धाश्रयः कर्तृत्वाद्याश्रयान्तःकरणसन्निधानात् कर्तृत्वान्तराध्यासोपपत्तिरिति। न च चेतनस्यैकत्वात् व्यवस्थानुपपत्तिः। उपाधिभेदेन तदुपपत्तेः। न च अन्यभेदादन्यत्र विरुद्धधर्मव्यवस्था नोपपद्यत इति वाच्यम्। मूलाग्रोपाधिभेदमात्रेण वृक्षे संयोगतदभावव्यवस्थादर्शनादिति।

इतरे तु - चेतन एव उपाधिवशात् भेदकल्पना। तत एव च व्यवस्था, मणिकृपाणाद्यु-पाधिकल्पितेन भेदेन मुखे श्यामावदात्तवर्तुलदीर्घभावादिधर्माणाम् अङ्गुल्यवष्टम्भोपाधिकल्पितेन भेदेन औत्तरत्वदाक्षिणात्यभावादिधर्माणां च व्यवस्थादर्शनादिति।

उच्यते - न तावदन्तःकरणगतो बन्धः। चेतनस्य संसारित्वानुपपत्तेः। अन्तःकरणता-दात्म्याध्यासेन स्वस्मिन्नर्थाश्रयत्वाभिमानात् तस्यैवाभिमानस्य दोषत्वे किमर्थोऽन्तःकरणे संसाराङ्गीकारः। 'ह्रीर्धीर्भीरित्येतत्सर्वं मन एवे'[1]त्यस्य मनःकार्यपरत्वात् न तद्वाक्यमन्तःकरणस्य संसारित्वे मानम्।

एतेन चिदाभासे संसार इति पक्षो निरस्तः। अस्मिन्नपि पक्षे तत्तादात्म्याध्यासेन अनर्थाश्रयत्वाभिमानस्योक्तेः।

1. बृ.उ.3.5.3

नापि तृतीयः, विशेष्ये संसाराङ्गीकारे विशेषणे तदङ्गीकारस्य व्यर्थत्वात्। न च 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः'[1] इति विशिष्टसंसारे मानम्। तेन भोगसहकारिप्रतिपादनात्। अन्यथा इन्द्रियविशिष्टस्य भोक्तृत्वापत्तेः।

नापि चतुर्थः, अहमित्यन्तःकरणतादात्म्याध्यासस्य आवश्यकतया तत एव कर्तृत्वाभिमानोपपत्तौ कर्तृत्वान्तराध्यासकल्पनाया व्यर्थत्वात्।

अस्य च प्रथमं जडस्य कर्तृत्वात् बन्धाश्रयत्वानुपपत्तेः, 'कर्ता शास्त्रार्थवत्त्वात'[2] इति चैतन्यस्यैव तदाश्रयत्वसूत्रणाच्च, अन्तःकरणस्य बन्धोऽनुपपन्नः इति द्वितीयो दूषयति।द्वितीयम् 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः'[3] इति श्रवणात् विशिष्टस्यैव बन्ध इति तृतीयो दूषयति। तृतीयं केवल एव कर्तृत्वाध्यासोपपत्तेः न विशिष्टे संसार इति चतुर्थो दूषयति। चतुर्थमाश्रयभेदादेव विरुद्धधर्मव्यवस्थाया उपपादनीयत्वात् कर्तृत्वान्तराध्यासस्य व्यवस्थानुपपादकत्वात् तत्कल्पनं व्यर्थमिति पञ्चमो दूषयति।

**नापि पञ्चमः, भेदाध्यासेऽपि धर्मैक्येन व्यवस्थानुपपत्तेः**

एतेन अज्ञानं यं प्रति वाक्यार्थब्रह्मस्वरूपमावृणोति तत्रैव भ्रमं जनयति। न च धर्मिद्वये सति एवं व्यवस्था युज्यते नैकधर्मिणीति वाच्यम्। दर्पणवदज्ञानोपाधिना चैतन्य एव जीवेशविभागापादनात्। न चैवम् ईश्वरं प्रत्यावरणं तत्र भ्रान्त्यादिकं च स्यादिति वाच्यम्। उपाधेः प्रतिबिम्बपक्षपातित्वात्। दृश्यते हि दर्पणाद्युपाधिभिः प्रतिबिम्बे मालिन्याद्यध्यासः, उपाधेः प्रतिबिम्बपक्षपातित्वं च। दर्पणाद्युपाधिना तन्निष्ठमालिन्यादेः नियमतः प्रतिबिम्ब एव भानात्। भ्रमविशेषस्य प्रतिबिम्बनैयत्यम्। अथवा स्वधर्मासञ्जकत्वमेव प्रतिबिम्बपक्षपातित्वम्। तत्राविद्यया भेद आसज्यते। कर्तृत्वादिकं बुद्ध्याऽऽसज्यते। न चोपाधिप्रयुक्तस्य भेदरूपधर्मस्य बिम्बेऽपि मुखे प्रतीतेः नायं नियम इति वाच्यम्। दर्पणे हि प्राग्ग्रीवास्थमुखमात्रप्रतियोगिको भेदो वर्तते। न च तं भेदं बिम्ब आसञ्जयति। बिम्बं च मुखं, ग्रीवास्थमुखं न भवतीत्यप्रतीतेः। यस्तु बिम्बमुखे प्रतिबिम्बमुखप्रतियोगिको भेदोऽनुभूयते स दर्पणधर्मः सन् बिम्बेनासज्यते। दर्पणबिम्बयोर्युगपदेव प्रतिबिम्बभेदानुभवात्। प्रतिबिम्बे तु स्वनिष्ठमेव ग्रीवास्थमुखभेदमासञ्जयति। एवमज्ञानमपि नित्यज्ञानमपि नित्यमुक्तवाक्यार्थब्रह्मभेदं स्वनिष्ठं सर्वज्ञे नासञ्जयति, किन्तु जीव एवेति नैतन्नियमबाध इति निरस्तम्।

---

1. क.उ.1.3.4
2. शा.मी.सू.2.3.33
3. क.उ.1.3.4

ननु कथं तर्हि लोके बिम्बप्रतिबिम्बयोः प्राङ्मुखत्वप्रत्यङ्मुखत्वव्यवस्था। कस्यचिद्धर्मस्य बिम्बवृत्तित्वे सति प्रतिबिम्बवृत्तित्वाभावः। तद्विरुद्धधर्मस्य प्रतिबिम्बवृत्तित्वे सति बिम्बवृत्तित्वाभावश्च हि व्यवस्था। सा च प्राङ्मुखत्वावदातत्वादौ बिम्बवृत्तित्वप्रतिबिम्बवृत्तित्वाभावयोः प्रत्यङ्मुखत्वमालिन्यादौ प्रतिबिम्बगतत्वबिम्बगतत्वाभावयोश्च अध्यासादस्त्येवेति चेत्, उच्यते- श्यामत्वादीनां सन्निकर्षसत्त्वेन अन्यथाख्यातिस्तावदवर्जनीया। न च संयुक्तविशेष्यसमवायः प्रत्यासत्तिः, गौरवात्। न च विरोध्यज्ञानत्वेन अर्थकारणताग्रहादुपाधिरूपदोषसहकाराच्च अनिर्वचनीयोत्पत्तिरवर्जनीया इति वाच्यम्। श्यामत्वविरोध्यवदातत्वस्य अज्ञानासिद्धेः। तस्मात् परोक्षस्थल इवात्रापि बाधकाभावादनिर्वचनीयानुत्पत्तेश्च अन्यथाख्यातिरेव। अतः नार्थव्यवस्था। किन्तु उपाधिमाहात्म्यात् विरुद्धधर्मप्रतियोगितावच्छेदकावच्छिन्नभेदविषयिणी विद्यमानप्रतियोगितावच्छेदकधर्मसामानाधिकरण्येन विद्यमानधर्मविषयिणी अविद्यमानप्रतियोगितावच्छेदकीय-सामानाधिकरण्येन अविद्यमानधर्मविषयिणी विचित्रा प्रतीतिः भ्रमरूपा उत्पद्यते। विरुद्धधर्माणामेकत्र ग्रहश्च प्रतीतेः भेदविषयत्वनिबन्धनः। तत्प्रतियोगिकभेदस्य तत्र विषयीकरणं च विरुद्धप्रतियोगितावच्छेदकविषयत्वनिबन्धनम्। दार्ष्टान्तिकेऽपि अज्ञानगतनित्यमुक्तवाक्यार्थब्रह्मभेदस्य बुद्धिगतकर्तृत्वादेश्च अन्यथाख्यात्या प्रतीतिसम्भवान्नार्थव्यवस्था।

यच्चोक्तम् - दर्पणेन प्रतिबिम्ब एव स्वनिष्ठो भेद आसज्यते न तु बिम्ब इति, तन्न। स्वगतस्य मुखप्रतियोगिकभेदस्यैव मुखे दर्पणेन आजञ्जनात्। न चैवं बिम्बमुखं ग्रीवात्थमुखात् भिन्नमिति प्रतीत्यापत्तिः। यथाप्रतीति 'ग्रीवास्थादवदातान्मुखात् दर्पणस्थं श्यामं मुखं भिन्नमि'ति प्रतीतिजनन एव उपाधेस्सामर्थ्यात्। अहो नु खलु व्याहतभाषणकुशलता यत् बिम्बप्रतिबिम्बाभेदमपि वदन् उपाधिः स्वगतभेदं प्रतिबिम्ब एवासञ्जयति; न तु बिम्ब इति ब्रूषे।

यदुक्तम्-वाक्यार्थब्रह्माभेदः जीवे आसज्यते न त्वीश्वर इति, तन्न। निर्विशेषचिन्मात्रमेव हि वाक्यार्थः। न च तस्मात् भेदो जीवस्यास्ति। यदि किञ्चिज्ज्ञत्वविशिष्टस्य शुद्धाद्भेदः, तदा सर्वज्ञत्वविशिष्टस्यापि शुद्धाद्भेदः स्यादेव।

वस्तुतस्तु बिम्बे प्रतिबिम्बभेदासञ्जनं नोपाधेः प्रतिबिम्बपक्षपातित्वविरोधि। सिद्धे हि भेदे पक्षपातित्वप्रसङ्गः। अतो भेदोपजीवनेनासञ्जनीयान् धर्मान् प्रतिबिम्ब एव आपादयति इति इदमेव उपाधेः प्रतिबिम्बपक्षपातित्वम्। एवं च परेण भेदविषयेऽपि प्रतिबिम्बपक्षपातित्वोपपादनात् तदनुरोधेन दूषणमुक्तमिति मन्तव्यम्। प्रागुक्तव्यवस्थानुपपत्तिरेव दोषः।

यदाह सुरेश्वरः - 'न वयं जीवब्रह्मविभागेन बन्धमोक्षयोः व्यवस्थां ब्रूमः। किं तु अविद्यया ब्रह्मण एव जीवत्वम्,

**राजसूनोः स्मृतिप्राप्तौ व्याधभावो निवर्तते।**
**यथैवमात्मनोऽज्ञस्य तत्त्वमस्यादिवाक्यतः॥**

इति ब्रह्मैव स्वाविद्यया संसरति। स्वविद्यया मुच्यत इति। एवं सति जीवस्य दुष्टत्वं ब्रह्मणोऽदुष्टत्वं वदन्त्यः – 'तयोरन्यः पिप्पलं स्वाद्वति'[1] इत्यादिश्रुतयः व्याकुप्येयुः। तस्मात् त्वदभिमतम् अज्ञानं न चिदाश्रयं नाचिदाश्रयं चेति।

**॥ इति सद्विद्याविजये अविद्याश्रयभङ्गः॥**

## अविद्यालक्षणभङ्गः

अपि चेयमविद्या न पारमार्थिकी, अद्वैतहानेः। नापि व्यावहारिकी, प्रातिभासिकोपादानत्वानुपपत्तेः। अन्यथा ब्रह्मण एवोपादानत्वसम्भवे कथं कार्यान्यथानुपपत्त्या तदुपादानत्वेन अविद्याकल्पनम्। नापि प्रातिभासिकी, व्यावहारिकोपादानत्वानुपपत्तेः।

ननु असत्यादपि सत्योत्पत्तिं पश्यामः। तथाहि - असत्यादेव रजताद्धर्षो दृश्यते, रज्जुसर्पाद्भीतिः, शङ्काविषान्मरणम्, भावितगरुडाद्गरलहरणम् इति चेन्न। सर्वत्र ज्ञानस्यैव हेतुत्वात्। न च केवलज्ञानस्य हेतुत्वे अतिप्रसङ्गात् विषयावच्छिन्नस्यैव हेतुतया विषयस्यापि हेतुता। एवं कारणतावच्छेदकस्य हेतुत्वे दण्डत्वस्यापि हेतुत्वप्रसङ्गात्।

किञ्च अविद्ययाः परिणामित्वाङ्गीकारात् कार्यपरिणामिनोरभेदाच्च अविद्याया असत्यत्वे तत्कार्यस्यासत्यत्वं दुर्वारम्।

किञ्च गरुडध्याने कृते तत्र प्रातिभासिकगरुडोत्पत्तेरनङ्गीकारात् ज्ञानादेव गरलनिवृत्तिर्वाच्या। तत्र ध्यानमात्रस्य हेतुत्वे अतिप्रसङ्गात् विषयावच्छिन्नस्यैव हेतुता वाच्या। तत्र च न विषयो हेतुः। किन्तु गरुडाभेदविषयत्वं कारणतावच्छेदकम्। अतो रजतादिविषयत्वमपि कारणतावच्छेदकमेव, न तु रजतादि कारणमिति।

ननु विषयस्यासत्यत्वात् तज्ज्ञानमप्यसत्यमेवेति चेत्, तर्हि ब्रह्मण एव अविद्यातत्कार्यज्ञानत्वात् तस्यैवासत्यत्वप्रसङ्गः।

अथ सत्तात्रैविध्यमेवासिद्धम्। ब्रह्मसत्तैव घटादौ शुक्तिरजतादौ च भासते। एवं चाविद्यायाः घटाद्युपादानत्वं रजतोपादानत्वं च युज्यत एव। सत्ताभेदश्चानुपपन्नः। ब्रह्मसत्तयैव सर्वत्र सत्ताप्रतीत्युपपत्तौ तद्भेदकल्पने गौरवात्।

किञ्च ब्रह्मज्ञानेतरज्ञानाबाध्यत्वे सति जडत्वं व्यावहारिकत्वम्, ब्रह्मज्ञानेतर ज्ञानबाध्यत्वसहचरितं प्रतीतिदशायां बाध्यत्वं प्रातिभासिकत्वमिति हि वाच्यम्। तत्र च स्वाप्नाध्यासे अतिव्याप्त्यव्याप्ती। प्राचां प्रातिभासिकव्यावहारिकसत्त्वभेदव्यवहारस्तु अविद्यातिरिक्तदोषजन्यत्वावच्छिन्नसत्त्व-तदजन्यत्वावच्छिन्नसत्त्वाभ्यामिति द्रष्टव्यमिति।

---

1. मु.उ.3.1.1

उच्यते अन्तःकरणस्य चैतन्यभेदेन प्रतीयमानत्वात्, अज्ञानस्य च चैतन्याश्रयत्वेन प्रतीतेः, 'अहं न जानामी'ति अन्तःकरणाश्रयतयाऽज्ञानस्य प्रतीतिरुपपद्यत इति वाच्यम्। तथाच सदाश्रयतया प्रतीयमानस्याज्ञानस्य कथं सदभेदेन प्रतीत्युपपत्तिः। अतः सत्ताभेद एवाङ्गीकार्यः। तत्र च उक्त एव दोषः।

किञ्च अध्यासमात्रस्य दोषजन्यत्वव्याप्तेः अविद्याध्यासस्यापि दोषजन्यता वाच्या। तत्रार्थस्यैव दोषजन्यत्वाङ्गीकारात् अनवस्था। जन्यत्वप्रवेशेन व्याप्तिसङ्कोचे गौरवम्। उक्तव्याप्तेरपि परित्यागे प्रपञ्चाध्यासदोषतया अविद्याकल्पनं न स्यात्। शुक्तिरजताध्यासादिषु दोषो दृश्यते इति चेत्, किं ततः? तद्बलात् घटाध्यासे दोषकल्पनायाम् अविद्याध्यासेऽपि तथा कल्पनाप्रसङ्गः।

किञ्च अज्ञानस्य लक्षणं तव दुर्भणम्। ननु अनाद्युपादानत्वे सति मिथ्यात्वमज्ञानत्वम्। मृदादौ अविद्यासम्बन्धादौ आत्मनि च अतिव्याप्तिवारणाय विशेषणत्रयम्। अनाद्युपादानत्वे सति ज्ञाननिवर्त्यत्वं वा, अनादित्वे सति स्वजन्यानपेक्षज्ञाननिवर्त्यत्वं वा। स्वशब्दो ज्ञानपरः। स्मृत्यादिनिवर्त्ये संस्कारे रजतज्ञाने चातिव्याप्तिवारणाय अनादीति। आत्मन्यतिव्याप्तिवारणाय ज्ञाननिवर्त्यत्वमिति। अविद्यासम्बन्धादावतिव्याप्तिवारणाय स्वजन्यानपेक्षेति। ज्ञानं स्वजन्यामविद्यानिवृत्तिमपेक्ष्यैव हि अविद्यासम्बन्धादिकं निवर्तयति। यदि च प्रागभावोऽङ्गीक्रियते तदा इच्छामात्रप्रागभावादावतिव्याप्तिवारणाय भावत्वमपि विशेषणम्। अनादिभावत्वे सतीति वक्तव्यम्। ज्ञानत्वेन ज्ञाननिवर्त्यत्वं वा। संस्कारादावतिव्याप्तिवारणाय ज्ञानत्वेनेति। अविद्यासम्बन्धस्तु अज्ञाननिवृत्त्यैव निवर्तते, न तु ज्ञानेन। स्वसमानविषयज्ञानप्राक्कालव्यापिसत्ताकत्वे सति तन्निवर्त्यत्वं वा। द्वितीयज्ञाननिवर्त्यप्रथमज्ञाने अतिव्याप्तिवारणार्थं सत्यन्तम्। स्वसमानविषयज्ञानासहकृतसामग्र्ययोग्यध्वंसप्रतियोगित्वं वा। द्वितीयज्ञाननिवर्त्य-प्रथमज्ञानेऽतिव्याप्तिवारणार्थम् अयोग्येत्यन्तम्। ज्ञानातिरिक्तागन्तुकदृष्टकारणायोग्यध्वंसप्रतियोगित्वं वा। ध्वंसप्रतियोगित्वमतिव्यापकम्। ज्ञानेश्वरादृष्टसाध्यत्वादसम्भववारणाय इतरपदानि।

न च समानविषयेत्यादीनां त्रयाणां लक्षणानां अविद्यासम्बन्धे अतिव्याप्तिः। तस्य निर्विषयत्वात्। अविद्यानिवृत्तिरूपदृष्टकारणयोग्यध्वंसप्रतियोगित्वाच्चेति।

जन्यज्ञानाजन्यध्वंसप्रतियोगिवृत्तिबाह्यावृत्तिजातिमदन्यत्वे सति स्वसमानविषयज्ञाननिवर्त्यत्वं वा। उत्तरज्ञाननिवर्त्यपूर्वज्ञाने अतिव्याप्तिवारणाय सत्ताजातिमादाय असम्भववारणाय च सत्यन्तम्। ब्रह्मण्यतिव्याप्तिवारणाय उत्तरविशेषणम्। अविद्यासम्बन्धे अतिव्याप्तावारणाय स्वसमानविषयेति। भ्रान्तिपरिणामित्वं वेति।

तत्र तावदाद्यं लक्षणमनुपपन्नम्, अनुत्पादितभ्रमाज्ञाने अव्याप्तेः। न च लाघवात् निखिलप्रपञ्चोपादानब्रह्मगोचरमेकमेव अज्ञानमिति नाव्याप्तिरिति वाच्यम्। शुक्तिज्ञानेन शुक्त्यज्ञाननिवृत्तौ संसारनिवृत्त्यापत्तेः। अज्ञानस्यैकत्वात्। न च शुक्तिज्ञानेनावरणनिवृत्तिरेव, न तु अज्ञाननिवृत्तिरिति वाच्यम्। 'ज्ञानेनाज्ञानं निवृत्तमि'त्यनुभवस्यावरणमात्रविषयत्वकल्पनायोगात्,

अज्ञाननानात्वस्यैव वाच्यत्वात्। अन्यथा शुक्त्याद्यधिष्ठानज्ञानानामावरणनिवर्तकत्वे चरमसाक्षात्कारस्यापि तथात्वप्रसङ्गात् अज्ञाननिवृत्त्यसिद्ध्या अनिर्मोक्षप्रसङ्गात्।

'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।' इत्यादिना मोक्षात्प्रागवस्थायामेव अज्ञाननाश-प्रतिपादनेन मूलाज्ञानातिरिक्तस्यैव निवृत्तेर्वाच्यतया एकाज्ञानपक्षे तदयोगेन तस्य कथञ्चिन्निर्वाह्यतया मूलाज्ञानस्य ज्ञाननिवर्त्यत्वश्रुतेरपि तथात्वप्रसङ्गेन श्रुतिबलान्मूलाज्ञानस्य ज्ञाननिवर्त्यत्वसाधना-सम्भवात्। अज्ञाननिवृत्तेर्ज्ञानकार्यतया अज्ञानोपादानकत्वेन तदनुवृत्त्यर्थं तस्यापि निवर्त्यत्वे निवर्त्यपरम्परानुवृत्त्यर्थम् अज्ञानानुवृत्तेरावश्यकतया अज्ञानाविरोधिकार्यस्य तन्निवृत्तित्वानुपपत्तेः। सजातीयवाक्यान्तरदृष्टनिर्वाहस्यैवौचित्यात्।

किञ्च लोकसिद्ध्यनुपजीवनेन श्रुतिबलादेव ज्ञाननिवर्त्यत्वाङ्गीकारे सति अस्यैव श्रुत्या तत्प्रतिपादनसम्भवात् ज्ञाननिवर्त्यत्वान्यथानुपपत्त्या मिथ्यात्वकल्पनं बाध्येत।

एतेन द्वितीयमपि निरस्तम्। ज्ञानपदवैयर्थ्यं च।

नापि तृतीयम्, ब्रह्मण एवाज्ञाननिवृत्तित्वात्, तस्य च ज्ञानजन्यत्वाभावात्, ज्ञानजन्यनिवृत्तिप्रतियोगित्वलक्षणज्ञाननिवर्त्यत्वासम्भवात्। ज्ञानसाध्यनिवृत्तिप्रतियोगित्वं विवक्षितम्, अनादेरपि साध्यत्वं सम्भवतीति चेन्न। अविद्यासम्बन्धादावतिव्याप्तेः। अविद्यानिवृत्तेः ज्ञानसाध्यत्वेऽपि ज्ञानजन्यत्वाभावेन स्वजन्यानपेक्षत्वस्य सत्त्वात्। न च स्वजन्यत्वमपि स्वसाध्यत्वमेव विवक्षितमिति वाच्यम्। एवमप्यविद्यासम्बन्धादावतिव्याप्तितादवस्थ्यात्। न हि ब्रह्मस्वरूपाविद्यासम्बन्धनिवृत्तिः ब्रह्मरूपामविद्यानिवृत्तिमपेक्षते। आत्माश्रयात्। न चाविद्यानिवृत्तित्वेनापेक्ष्यत्वं तत्सम्बन्धनिवर्तकत्वेनापेक्षकत्वं चेति वाच्यम्। एवं सति तादृशनिवृत्तिं प्रति सम्बन्धवदविद्याया अपि प्रतियोगित्वात् असम्भवापत्तेः। अविद्यानिवृत्तेः असाध्यत्वं च वक्ष्यते।

किञ्च ज्ञानशब्देन किं चैतन्यमुच्यते उत वृत्तिः? नाद्यः, संसारस्य वृत्तिनिवर्त्यतया चैतन्यनिवर्त्यत्वाभावेन लक्षणे अनादिपदवैयर्थ्यात्। संसारनिवृत्तेरपि मिथ्यात्वेन चैतन्याधिष्ठानतया तज्जन्यत्वमिति चेन्न। तथाच सति संसारस्यापि मिथ्यात्वेन चैतन्याधिष्ठानतया तज्जन्यत्वात् स्वजन्यानपेक्षेतिविशेषणेनैव तद्व्यावृत्तिसिद्ध्या अनादिपदवैयर्थ्यात्।

न द्वितीयः, वृत्तिः अविद्यानिवृत्तिप्रतिबन्धकारणनिवर्तिका चैतन्यमज्ञाननिवर्तकमिति मते असम्भवात्। आवरणेऽतिव्याप्तेश्च। मतान्तरेऽपि किमेकाज्ञानपक्षे इदं लक्षणम्, उत नानाज्ञानपक्षे? नाद्यः, घटादिज्ञानानाम् अज्ञाननिवर्तकत्वाभावेन आवरणनिवर्तकत्वात्। आवरणनिवृत्तेरज्ञान-निवृत्त्यनपेक्षत्वात्। अज्ञानावरणयोः सहैव निवृत्तिः स्यादिति आवरणेऽतिव्याप्तेः। द्वितीये तु यदज्ञानं स्वसमानविषयज्ञानानुदयादनिवृत्तम्, अखण्डसाक्षात्कारेण अखण्डाज्ञाने निवृत्ते तन्निवृत्त्यैव तन्निवर्तते, तत्राव्याप्तिः। न च तस्याप्यनादितयाऽखण्डाज्ञानानुपादानकतया तन्निवृत्तिमनपेक्ष्य अखण्डज्ञानेन सहैव निवृत्तिरिति वाच्यम्। तथा सत्यावरणस्यापि अजन्यतया अखण्डज्ञानानि-

वृत्त्यनपेक्षनिवृत्तित्वेन तत्रातिव्याप्तेः। यदि च तस्य तादधीन्यात् तन्निवृत्त्यधीननिवृत्तिकत्त्वम्, तदा कृत्स्नस्याप्यखण्डाज्ञानाधीनत्वात् तन्निवृत्त्यधीननिवृत्तिकत्वमेवेत्यव्याप्तिरेव। अखण्डाज्ञानेन ब्रह्मस्वरूपावरणाभावे अध्यासस्यैव असम्भवेन कृत्स्नस्याप्यखण्डाज्ञानाधीनत्वात्।

नापि चतुर्थम्, परोक्षज्ञानस्यानिवर्तकतया ज्ञानत्वस्य निवर्तकतावच्छेदकत्वासिद्धेरसम्भवात्।

यच्चेदमुच्यते - ज्ञानत्वेन ज्ञाननिवर्त्यत्वमज्ञानत्वम्। ज्ञानत्वेन चित्सामान्यरूपेण यत् स्वजन्यं तदनपेक्षं सत् तेनैव रूपेण ज्ञानं यन्निवर्तयति तदज्ञानमित्यर्थः। आवरणनिवर्तक-साक्षात्काररूपवृत्त्यपेक्षणेन असम्भवपरिहाराय ज्ञानत्वेन जनकत्वं विवक्षितम्। 'तथा विद्वान् नामरूपाद्विमुक्तः'[1] इत्यादिशास्त्रात् अज्ञानकार्यस्यापि ज्ञाननिवर्त्यत्वसिद्धेः, तत्रातिव्याप्तिवारणाय स्वजन्यानपेक्षेति। ज्ञानम् अविद्यानिवृत्तिसहकृतमेव तत्कार्यं निवर्तयति, न तु साक्षात्। स्मृतिनिवर्त्यसंस्कारे अतिव्यापितिवारणाय ज्ञानत्वेन निवर्तकता विवक्षितेति।

तन्न 'तथा विद्वानि'ति श्रुत्या कार्यस्यापि साक्षादेव ज्ञाननिवर्त्यत्वावगमेन कार्यातिव्या-प्तेर्दुष्परिहारत्वात्।

नापि पञ्चमम्, पूर्वज्ञानसत्ताया ब्रह्मरूपत्वात् तस्याश्चोत्तरज्ञानप्राक्कालव्यापकत्वात् उत्तरज्ञाननिवर्त्यपूर्वज्ञानेऽतिव्याप्तेः ब्रह्मावरणेऽतिव्याप्तेश्च। उभयत्र ज्ञानपदवैयर्थ्यं च। अपि च ज्ञानपदेन चैतन्यविवक्षायाम् असम्भवः। अविद्याविषयो हि ब्रह्मैव। न च ब्रह्म स्वविषयम्। न च तत्प्राक्कालव्यापिसत्ताकत्वमविद्यायाः सम्भवतीति। वृत्तिविवक्षायामपि स एव दोषः। वृत्तेरज्ञानत्वेनानिवर्तकत्वात्। तदवच्छिन्नचैतन्यविवक्षायां घटावच्छिन्नचैतन्यस्यैवाविद्याविषयत्वात् तस्यैव चैतन्यस्य घटाकारवृत्त्यवच्छिन्नचैतन्यत्वात् तस्य तद्विषयत्वासम्भवेन स्वसमानविषयज्ञान-प्राक्कालव्यापित्वतन्निवर्त्यत्वयोः अभावात् घटाद्यज्ञानेष्वपि अव्याप्तिः। घटावच्छिन्नस्यैव वृत्तौ प्रतिबिम्बाङ्गीकारात् आरोपितभेदेन विषयत्वोपपत्तिरित्यपि दुर्वचम्। प्रमातृसम्बन्धाभावप्रसङ्गात्। न हि घटावच्छिन्नचैतन्यप्रतिबिम्बस्य प्रमातृतासम्भवः। ननु घटावच्छिन्नचैतन्यस्य वृत्तिव्याप्त्या तदवच्छिन्नचैतन्येनाभेदात् प्रमात्रभेदः प्रतिबिम्बस्य तद्विषयत्वमपि युज्यत इति चेन्न। प्रतिबिम्बस्य प्रमातृसम्बन्धघटकत्वाभावेन तदङ्गीकारवैयर्थ्यात्।

नापि षष्ठम्, असम्भवात्। अविद्यासम्बन्धनिवृत्तिरेव हि अविद्यानिवृत्तिवृत्तिः। अविद्यासम्बन्धनिवृत्तिः न ज्ञानसाध्या, किन्तु अविद्यानिवृत्तिसाध्येति ह्युच्यते। प्रतियोगिनो ध्वंसहेतुत्वेन सर्वस्यापि ज्ञानस्य ध्वंसहेतुत्वात् तत्रातिव्याप्तिः।

नापि सप्तमम्, अविद्यानिवृत्तेर्ब्रह्मस्वरूपत्वेन आगन्तुकत्वाभावात् अविद्यासम्बन्धे अतिव्याप्तिः(प्तेः?)। आगन्तुकपदेन क्षेमसाधारणसाध्यत्वविवक्षायामपि अविद्यानिवृत्तित्वसम्बन्ध-

1. मु.उ.3.2.8

निवृत्तित्वाकारभेदेन अपेक्ष्यत्वापेक्षकत्वोपपादनेऽपि अविद्यानिवृत्तेर्ब्रह्मस्वरूपाया ज्ञानातिरिक्तत्वाभावात् तत्रैव अतिव्याप्तिः। ज्ञानपदेन निवृत्तिविवक्षायामपि तादृशसामग्रीयोग्यब्रह्मात्मकध्वंसप्रतियोगित्वम् अविद्यासम्बन्धवत् अविद्यायामस्तीत्यसम्भवः।

किञ्च त्रैवर्णिकस्य भाषाप्रबन्धजन्यज्ञानेन तज्जन्यदुरितापूर्वेण प्रतिबन्धादेव अज्ञानं निवर्तत इति त्वयैवाभिधानात् भाषाजन्यदुरितापूर्वनिवृत्तिरूपदृष्टकारणसाध्यत्वं मूलाज्ञाननिवृत्तेरस्तीति तत्रासम्भवः।

न चाष्टमम्, ज्ञानमात्रे अतिव्याप्तेः। सर्वज्ञानस्यापि जन्यज्ञानजन्यध्वंसप्रतियोगित्वात् स्वसमानविषयस्वनिवर्त्यत्वाच्च।

नापि नवमम्, वृत्तेर्भ्रान्तित्वासिद्धेः तदवच्छिन्नचैतन्यस्य परिणामित्वासिद्धेरिति।

**॥ इति सद्विद्याविजये अविद्यालक्षणभङ्गः॥**

## सद्विद्याविजये अविद्याप्रकाशभङ्गः

किञ्च कोऽयमविद्याप्रकाशः - न तावत् स्वयमेव। अजडत्वसत्यत्वप्रसङ्गात्। ततोऽन्यत्वे ब्रह्मणोऽन्यस्य स एव दोषः। ब्रह्मैवाविद्या प्रकाशश्चेत् तस्य नित्यतया अविद्यापि नित्या स्यात्। मिथ्यार्थस्य प्रतिभासकालसत्त्वनियमात्।

ननु अविद्यायाः प्रकाशः प्रकाशाभेद एव, तत्त्वज्ञानेन अविद्यानिवृत्तौ प्रकाशाभेदस्य निवृत्तावपि प्रकाशानिवृत्तेः तस्य नित्यत्वम् अविद्याया विनाशित्वं चोपपद्यत इति चेन्न। प्रकाशाविद्ययोरप्यभेदे प्रकाशमिथ्यात्वस्य अविद्यासत्यत्वस्य वा प्रसङ्गात्। भिन्नत्वे सत्यभिन्नसत्ताकत्वविवक्षायां घटप्रकाशस्य रसप्रकाशत्वप्रसङ्गः। अभिन्नसत्ताकत्वमिति बहुव्रीह्यर्थो यदि सत्ताया अभेदः तर्ह्यसिद्धिः। तत्र भिन्नत्वे सति अभिन्नसत्ताकत्वविवक्षायामात्माश्रयः। यदि तदभेदेन प्रतीयमानत्वं तत्सत्ताकत्वं तदा प्रतीतेः ब्रह्मतदन्यत्वयोः पूर्वोक्तदोषानतिवृत्तिः। न चाविद्यावच्छिन्नब्रह्मस्वरूपमविद्याप्रकाशः, तस्याविद्याब्रह्मस्वरूपानतिरिक्ततया उक्तदोषानतिवृत्तेः।

किञ्च अविद्यावच्छेदो ह्यविद्यासम्बन्धः। तस्य तादात्म्यरूपत्वे दोष उक्त एव। ततोऽन्यत्वेऽपि तत्प्रकाशस्य स्वरूपतदतिरेकयोरुक्त एव दोषः। अविद्योपाध्यधीनब्रह्मप्रतिबिम्बस्य अविद्याप्रकाशत्वे बिम्बप्रतिबिम्बयोरभेदादुक्त एव दोषः। प्रतिबिम्बत्वं च उपाधिनिष्ठतया भासमानत्वम्। तत्र च भाने पूर्ववद्विकल्पदूषणयोः प्रसङ्गः। तन्निष्ठतया भासमात्वं च ब्रह्मणोऽसिद्धम्। न हि अविद्यागतत्वेन ब्रह्म प्रतीयते। अविद्याकारवृत्त्यवच्छिन्नमविद्याप्रकाश इत्युक्तावपि उक्तदोषोऽनुसन्धेयः।

**॥ इति सद्विद्याविजये अविद्याप्रकाशभङ्गः॥**

## सद्विद्याविजये अविद्यानिवर्तकभङ्गः

किञ्च अस्याज्ञानस्य निवर्तकासम्भवात् अनिर्मोक्षप्रसङ्गः। तथाहि - किं चैतन्यमात्रं निवर्तकम्, उत वृत्तिप्रतिबिम्बितम्, किं वा वृत्त्युपहितम्, किं वा वृत्त्यवच्छिन्नकारणताकम्, उताहो वृत्तिविशिष्टम्, अहोस्वित् वृत्तिरेव निवर्तिकेति। नाद्यः, अविद्यायाः कदाप्यसम्भवप्रसङ्गात्, श्रवणादिवैयर्थ्याच्च।

न द्वितीयः, चैतन्यादधिकविषयत्वाभावे तद्वदेव निवर्तकत्वासम्भवात्। श्वैत्यानुमित्यनधिक-विषयत्वेऽपि श्वैत्यप्रत्यक्षस्य शङ्खपीतभ्रमविरोधित्वं दृश्यत इति चेन्न। अन्वयव्यतिरेकाभ्यां तत्रापरोक्षत्ववैषम्यस्यैव निवृत्त्यनिवृत्त्योः प्रयोजकत्वकल्पनात्।

एतेनैव तृतीयचतुर्थौ निरस्तौ।

नापि पञ्चमः, अन्वयव्यतिरेकाभ्यां वृत्तावेव पर्यवसानात्।

नापि षष्ठः, जडत्वात्। अन्वयव्यतिरेकाभ्यां वृत्तेरेव निवर्तकत्वम्। अज्ञानस्य ज्ञाननिवर्त्यताबुद्धिस्तु चैतन्यवृत्त्योरभेदाभिव्यक्तिनिबन्धनेति चेन्न। वृत्तेः चैतन्यादनधिकविषयत्वे दत्तोत्तरत्वात्। अधिकविषयत्वे मिथ्याज्ञानमोक्षसाधनत्वाद्वैतहान्योरन्यतरप्रसङ्गात्।

ननु अज्ञानसाध्यभ्रमविषयविरोधिविषयज्ञानमेव निवर्तकताप्रयोजकम्, न तु तत्त्वसाक्षात्कारत्वमिति चेत्, किं तद्विरोधि? अद्वितीयमिति चेन्न। तस्य स्वरूपानतिरेके दत्तोत्तरत्वात्। अतिरेके तज्ज्ञानस्यैव अविद्यानिवर्तकतया ब्रह्मज्ञानस्य अविद्यानिवर्तकत्वभङ्गः।

किञ्च तत्प्रकाशस्य स्वप्रकाशत्वाप्रयोज्यतया तत्रावरणस्याकल्पनीयतया ज्ञानस्य तद्विषयत्वाभावेन निवृत्तिरनुपपन्ना।

किञ्च अद्वितीयत्वं न द्वितीयाभाववत्त्वम्। अन्यत्र तत्सिद्ध्यविरोधेन द्वितीयनिवृत्तेरसम्भवात्। ननु तत्रैव आरोपितस्य अन्यत्रासिद्धेः निवृत्तिः सम्भवतीति चेन्न। 'सन् घट' इत्यभेदेन आरोपात् द्वितीयाभाववत्त्वस्य अभेदाविरोधितया तज्ज्ञानस्य निवर्तकत्वासम्भवात्।

किञ्च अज्ञानस्य कृत्स्नप्रपञ्चविरोधिविषयतया कृत्स्नमेव निवर्ततेति कथं ज्ञानेन अज्ञानस्यैव निवृत्तिः तन्निवृत्त्या इतरनिवृत्तिरिति मतोन्मेषः।

एतेनाद्वितीयत्वं द्वितीयभिन्नत्वमित्यपि दत्तोत्तरम्।

किञ्च द्वितीयाभेदे 'सन् घट' इति प्रतीतिसिद्धे व्यावहारिके विद्यमाने कथं तद्भेदो व्यावहारिकः तत्र स्यात्। भेद एव व्यावहारिकः। 'सन् घट' इति नाभेदः प्रतीयते , किन्तु तादात्म्यम्। तच्च भिन्नत्वे सत्यभिन्नसत्ताकत्वमिति तु प्रतीतिव्याघातपराहतम्। भिन्नत्वस्य वा अभिन्नसत्ताकत्वस्य वा 'सन् घट' इत्यत्राप्रतीतेः।

अथ स्यात् - अद्वितीयत्वप्रकारकज्ञानं निवर्तकम्, अद्वितीयत्वं च स्वरूपमेवेति, तन्न-अज्ञानेन तदावरणे स्वरूपावरणप्रसङ्गेन जगदान्ध्यापातः। अनावरणे च तद्विषयत्वाभावेन तज्ज्ञानेन निवृत्त्यभावप्रसङ्गः। स्वरूपात्मकाद्वितीयत्वप्रकारकज्ञानाभावेऽपि प्रतिबन्धाधीनः एतज्ज्ञानप्रतिबन्ध एव ब्रह्मावरणमित्युच्यते इति चेन्न। तस्य ज्ञानस्य ब्रह्माद्वितीयमिति वाक्यसाध्यतया स्वप्रकाशाप्रयोज्यतया प्रतिबन्धकल्पनावैयर्थ्यात्।

किञ्च अज्ञानं यद्यद्वितीयत्वज्ञानप्रतिबन्धकं तदा तस्मिन् जाग्रति कथमद्वितीयत्वज्ञानोदयः। कुतस्तरां तेनाज्ञाननिवृत्तिः।

ननु शास्त्रबलात् शास्त्राधीनमेव ज्ञानम् अज्ञानसहचरितज्ञानसमानविषयमपि अज्ञाननिवर्तकमिति चेन्न। मिथ्यार्थनिवृत्तित्वेन भ्रमविषयविरोधिप्रत्यक्षत्वेन च लोकसिद्धकार्यकारणभावमुल्लङ्घ्य कार्यकारणभावाङ्गीकारे ज्ञाननिवर्त्यत्वान्यथानुपपत्त्या मिथ्यात्वकल्पनानुपपत्तेः।

किञ्च ब्रह्मज्ञानस्य मूलाज्ञाननिवर्तकत्वे घटादिज्ञानानामपि तन्निवर्तकत्वप्रसङ्गः। ब्रह्मविषयत्वाविशेषात्।

अत्राहुः - चैतन्यं न चक्षुरादिजन्यवृत्तिगोचरः। 'तं त्वौपनिषदम्'[1] इत्युक्तत्वात्। न च मानान्तरगम्यत्वे उपनिषत्प्रमाणकत्वसम्भवः।

'न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्।'[2]

'पराञ्चि स्वानि व्यतृणत् स्वयम्भूः'[3]

'तस्मात् परं पश्यति नान्तरात्मन'[4] इत्यादि च बहुलमुपलभ्यते।

न च 'सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते।' इत्यादिवार्तिकविरोधः। तस्य घटाद्याकारवृत्त्युदये सत्यावरणाभिभवात् स्वप्रभं सद्रूपं ब्रह्म घटस्सन्निति घटवद्व्यवहार्यं भवतीति औपचारिकघटादिवृत्तिवेद्यत्वपरत्वात्। आवरणाभिभावकत्वं च घटादिज्ञानस्य घटादिविषयत्वादेवोपपन्नम्, घटादेरप्यज्ञानविषयत्वात्। 'घटं न जानामि', 'घटज्ञानेन घटाज्ञानं नष्टमि'त्यवस्थाज्ञानानां घटादिविषयत्वानुभवात्। न च तत्रावरणकृत्याभावात् अज्ञानाङ्गीकारो न युक्तः। तद्भासकस्य तदवच्छिन्नचैतन्यस्याप्यावरणादेव तदप्रकाशोपपत्तेरिति वाच्यम्। उक्तभङ्ग्या जडस्य साक्षादज्ञानविषयस्य प्रतिक्षेपेऽपि जडावच्छिन्नचैतन्यप्रकाशस्याज्ञानेनावरणं ततो नित्यचैतन्यप्रकाशसंसर्गेऽपि जडस्य 'अस्ति', 'प्रकाशत' इति व्यवहारयोग्यत्वमिति परम्परया

1. क.उ.1.3.11
2. श्वे.उ.4.20
3. क.उ.2.4.1
4. क.उ.2.4.1

ज्ञानविषयत्वाभ्युपगमात् साक्षात्परम्परया वा यदज्ञानावरणीयं तद्विषयस्यैव ज्ञाने तदज्ञाननिवर्तकप्रयोजकशरीरनिवेशात्। न चैवं घटादीनामुक्तरीत्या मूलाज्ञानविषयत्वमपि स्यादिति घटादिसाक्षात्कारे सति मूलाज्ञाननिवृत्त्यापातः। फलबलात् तदज्ञानकार्यातिरिक्त-द्विषयविषयकत्वस्यैव तन्निवर्तकत्वे तन्त्रत्वात्। अथवा मूलाज्ञानस्यैव जडं न विषयः। अवस्थाज्ञानानाम-वच्छिन्नचैतन्याश्रितानां तत्तजडमेव विषयः। अन्यथा चाक्षुषवृत्त्या चन्दनखण्डे चैतन्याभिव्यक्तौ तत्संसर्गिणो गन्धस्याप्यापरोक्ष्यापत्तेः। तदनभिव्यक्तौ चन्दनतद्रूपयोरप्यप्रकाशापत्तेः।

ननु चाक्षुषवृत्त्या चन्दनतद्रूपावच्छिन्नचैतन्ययोरभिव्यक्त्या तयोः प्रकाशः, गन्धाकारवृत्त्यभावेन गन्धावच्छिन्नचैतन्यस्यानभिव्यक्त्या तस्याप्रकाशश्चेति वाच्यम्। चैतन्यस्य द्विगुणीकृत्य वृत्त्यभावात्। एकद्रव्यगुणानां स्वाश्रये सर्वत्र व्याप्य वर्तमानानां पृथक् पृथक् गगनावच्छेदकत्वस्येव चैतन्यावच्छेदकत्वस्यैवासम्भवाच्च। तेषां स्वाश्रयद्रव्यावच्छिन्नचैतन्येनैव शुक्तीदमंशावच्छिन्नचैतन्येन शुक्तिरजतवत् प्रकाश्यतया तस्याभिव्यक्तौ गन्धस्यापि प्रकाशः स्यात्। अनभव्यक्तौ रूपादेरप्यप्रकाशतापत्तेः।

न च गन्धाकारवृत्त्युपरक्त एव चैतन्ये गन्धः प्रकाशत इति नियमः। प्रकाशसंसर्गस्यैव प्रकाशमानशब्दार्थत्वेन असत्यामपि तदाकारवृत्तौ अनावृतप्रकाशसंसर्गे अप्रकाशमानत्वकल्पनस्य विरुद्धत्वात् अभिव्यक्तस्य च गन्धोपादानचैतन्यस्य गन्धासंसर्गोक्त्यसम्भवात्। तस्मात् यथा चैत्रस्य घटवृत्तौ तं प्रत्यवारकस्यैवाज्ञानस्य निवृत्तिरिति तस्यैव विषयप्रकाशो नान्यस्य, तथा तत्तद्विषयाकारवृत्त्या तत्तदावारकाज्ञानस्यैव निवृत्तेः न विषयान्तरस्यापरोक्ष्यम्। अनावृतार्थस्यैव संविदभेद आपरोक्ष्यमिति अभ्युपगमादिति प्रमातृभेदेन विषयभेदेनाप्येकत्र चैतन्ये अवस्थाज्ञानभेदस्य वक्तव्यतया अवस्थाज्ञानानां तत्तज्जडविषयत्वमिति घटादिवृत्तीनां नावस्थाज्ञाननिवर्तकत्वे काचिदनुपपत्तिः, न वा मूलाज्ञाननिवर्तकत्वापत्तिः।

न चैवमपि जीवविषयाया अहङ्कारवृत्तेः मूलाज्ञाननिवर्तकत्वापत्तिः। तस्याः स्वयम्प्रकाशमानचित्संवलिताचिदंशमात्रविषयत्वात् सोऽहमिति प्रत्यभिज्ञाया अपि स्वयम्प्रकाशचैतन्ये अन्तःकरणवैशिष्ट्येन सह पूर्वापरकालवैशिष्ट्यमात्रविषयत्वेन चैतन्यविषयत्वाभावादिति।

केचित्तु - घटादिवृत्तीनां तदवच्छिन्नचैतन्यविषयत्वमभ्युपगम्य—

**'सर्वमानप्रसक्तौ च सर्वं मानफलाश्रयात्।**
**श्रोतव्येति वचः प्राह वेदान्तावरुरुत्सया॥'**

इति वार्तिकोक्तश्रोतव्यवाक्यार्थवेदान्तनियमविध्यनुसारेण वेदान्तजन्यमेव नियमादृष्टसहितं ब्रह्मज्ञानमप्रतिबद्धं ब्रह्माज्ञाननिवर्तकमिति न घटादिज्ञानात् तन्निवृत्तिप्रसङ्ग इत्याहुः।

अन्ये तु - तत्त्वमस्यादिवाक्यजन्यं जीवब्रह्माभेदगोचरमेव ज्ञानं मूलाज्ञाननिवर्तकम्।

मूलाज्ञानस्य तदभेदगोचरत्वादिति न चैतन्यस्वरूपमात्रगोचरात् घटादिज्ञानात् तन्निवृत्तिप्रसङ्गः। न चाभेदस्य तत्त्वावेदकप्रमाणबोध्यस्य चैतन्यातिरेके द्वैतापत्तेः चैतन्यमात्रमभेद इति तद्गोचरं घटादिज्ञानमप्यभेदगोचरमिति वाच्यम्। न हि अभेदज्ञानमिति विषयतो विशेषं ब्रूमः। किन्तु तत्त्वम्पदवाच्यार्थधर्मिद्वयपरामर्शादिरूपकारणविशेषाधीनेन स्वरूपसम्बन्धविशेषेण चैतन्यविषयत्वमेव तदभेदज्ञानत्वम्।यथा हि विशेषणविशेष्यतत्सम्बन्धगोचरत्वाविशेषेऽपि विशिष्टज्ञानस्य विशेषणज्ञानादिकारणविशेषाधीनस्वरूपसम्बन्धविशेषेण तत्त्रितयगोचरत्वमेव समूहालम्बनव्यवृत्तं विशिष्टज्ञानत्वम्, यथा च 'स्थाणुत्वपुरुषत्ववान्' इत्याहार्यवृत्तिव्यावृत्तं संशयत्वं विषयतो विशेषानिरूपणात्, तथा घटादावपि 'सोऽयं घट' इत्यादिज्ञानस्य स्वरूपसम्बन्धविशेषेण घटादिविषयत्वमेव केवलघटशब्दादिज्ञानव्यावृत्तं तदभेदज्ञानत्वम्, अतिरिक्ताभेदानिरूपणात्। अभावसादृश्यादीनाम् अधिकरणप्रतियोग्यादिस्वरूपसम्बन्धयुक्तानाम् अधिकरणेनाधाराधेयभावरूपसम्बन्धविशेषः प्रतियोग्यनुयोगिभाव इत्यादिप्रकारेण स्वरूपसम्बन्धेऽवान्तरविशेषकल्पनवत् वृत्तीनां विषयेऽपि संयोगतादात्म्ययोरतिप्रसक्त्या विषयैः विषयिभावरूपसम्बन्धवतीनां विषयविशेषनिरूपणासम्भवे कलृप्ते स्वरूपसम्बन्ध एवावान्तरविशेषकल्पनेनाभेदज्ञानत्वादिपरस्परवैलक्षण्यनिर्वाहाच्च। एवं च ब्रह्मज्ञानस्याभेदाख्यकिञ्चित्संसर्गगोचरत्वानभ्युपगमात् न वेदान्तानामखण्डार्थत्वहानिरपीत्याहुः।

अत्र न काचिदप्युत्प्रेक्षा चोद्यनिराकरणक्षमा। तथाहि - प्रथमद्वितीयतृतीयचतुर्थपक्षेषु घटादिज्ञानानाम् अखण्डाज्ञानसमानविषयत्वात् तन्निवर्तकत्वमपरिहार्यम्।

अत्र यदुक्तम् - प्रथमक्षणे फलबलात् तदज्ञानकार्यातिरिक्तविषयत्वमेव तन्निवर्तकत्वे प्रयोजकम्। अतो घटत्वस्य मूलज्ञानकार्यत्वाभावात् तज्ज्ञाने न मूलाज्ञाननिवृत्तिः, मूलाज्ञानकार्यत्वात् न तज्ज्ञानेन मूलाज्ञाननिवृत्तिरिति, तन्न। सोऽयमजागलस्तनात् क्षीराभिलाषः। अज्ञानविषयतत्त्वसाक्षात्कारस्यैवाज्ञाननिवर्तकतया दृष्टत्वेन कार्यगोचरत्वतदगोचरत्वयोः अप्रयोजकत्वात्। फलबलात्कल्पने तु मूलाज्ञानस्य निवृत्तिरेव कल्पनीया। अन्यथा घटप्रकाशासम्भवात्। न हि क्षुद्रमहापटाभ्यामावृतस्य क्षुद्रपटनाशमात्रेण प्रकाशो दृश्यते, किन्तु उभयनाशादेव। अखण्डावारकाज्ञानस्य चावच्छिन्नावारकत्वमनिवार्यम्। अन्यथा अखण्डावरणासम्भवात्। इष्टं च मूलाज्ञानेन घटावच्छिन्नचैतन्यावरणं 'फलबलादि'त्यादि वदतः।

एतेन द्वितीयोऽपि पक्षो निरस्तः। मूलाज्ञानानां जडावारकत्वेऽपि तन्निवृत्तिमात्रेण प्रकाशासम्भवात्। न हि अखण्डाज्ञानेनावृतं घटावच्छिन्नचैतन्यं स्वयमप्रकाशमानं घटप्रकाशनसमर्थम्।

किञ्च जडावरणकल्पने न मानमस्ति। न च चक्षुषा चन्दनखण्डज्ञाने गन्धाभानार्थं जडावरणकल्पनम्। अनावृतस्य प्रकाशसंसर्गः प्रकाशमानशब्दार्थ इति कल्पनवत्

तदाकारवृत्त्युपहितसंसर्गः प्रकाशमानशब्दार्थ इति कल्पनात् प्रकाशसंसर्गाविरोधिनः कस्यचिदावरणपरिभाषामात्रेणासिद्धौ प्रकारान्तरेणापि इष्टसिद्धेः सूपपादत्वात्।

यश्च तृतीयपक्षे नियम उक्तः सोऽनुपपन्नः। नियमादृष्टस्यैवासम्भवात्। नियमादृष्टं हि अन्वयव्यतिरेकानवगतकार्यसिद्धय एव कल्प्यते। अवहननादिनियमादृष्टं सातिशयतण्डुलादिमुखेन परमापूर्वजनन एवोपयुज्यते। इह चाविद्यानिवृत्तिरन्वयव्यतिरेकसिद्धकार्यमेवेति तादर्थ्येन कुतो नियमादृष्टसिद्धिः। अन्वयव्यतिरेकसिद्ध्यभावे तु कुतस्तराम्। तस्मात् वाक्यजन्यज्ञानादेव मूलादिज्ञाननिवृत्तिमङ्गीकुर्वता ज्ञानेनाज्ञाननिवृत्तिः नान्वयव्यतिरेकसिद्धा, किन्तु श्रुतिसिद्धैवेत्यङ्गीकार्यम्। ततश्च न ज्ञाननिवर्त्यत्वानुपपत्त्या मिथ्यात्वसिद्धिः।

यच्च चतुर्थपक्षे विषयविषयिभावविशेषकल्पनम्, तदनुपपन्नम्। प्रतीतिवैचित्र्यस्य विषयविशेषाभावस्य चानुभवसिद्धतया संशयादौ विषयविषयिभावरूपसम्बन्धकल्पनेऽपि प्रकृते तादृशवैलक्षण्याननुभवेन तत्कल्पनायोगात्। न हि निर्विशेषस्वरूपमात्रगोचरज्ञाने संशयापन्ने तत्र सम्बन्धविशेषोऽनुभवसिद्ध इति युज्यते। नापि तादृशसम्बन्धविशेषप्रयोजकत्वं समानाधिकरणवाक्यस्य युक्तम्। अभिज्ञानाविशषयीकृतस्य तत्त्वेदन्त्वसमानाधिकरणवाक्येन भानात्।

अपि च यद्येवं सम्बन्धविशेषवत एव ज्ञानस्य निवर्तकता तर्हि 'घटस्सन्' इत्यादौ कथं सत्प्रतीतिः। यदि सतो नावरणमिष्यते तर्हि कथमभेदस्यावरणम्। तस्य स्वरूपत्वात्। यदि चैवमपि आवरणानावरणव्यवस्था सदनावृतम्, अभेद आवृत इति; तदा घटज्ञानेन सदेव ज्ञातम्, न त्वभेद इति व्यवस्थासम्भवात् किमर्था सम्बन्धविशेषकथा।

किञ्चैवं व्यवस्थायाम् अनवच्छिन्नानन्दाप्रकाशेन तदावरणस्यावश्यकत्वात् अभेदज्ञानेन तन्निवृत्त्यसम्भवाच्च नाभेदज्ञानेन मोक्षसिद्धिः।

ननु अखण्डानन्दावारकस्य अभेदावारकस्य च एकत्वात् अभेदज्ञानेन अज्ञाननिवृत्तौ नानन्दाज्ञानसम्भव इति चेन्न। एकाज्ञानपक्षे तत्तज्ज्ञानैः तत्तदावरणनिवृत्त्यभिधानात् तन्न्यायस्यात्राप्रसरात्। अपि च प्रकाशानन्दाभेदानां स्वरूपेऽपि यथा प्रकाशोऽनावृतः आनन्द आवृत इत्युच्यते तदा अभेदाज्ञानस्यैव आनन्दाज्ञानत्वेपि अभेदज्ञानेन अभेदाज्ञानस्यैव निवृत्तिः, न त्वानन्दज्ञानस्येति कथं न स्यादिति।

**॥ इति सद्विद्याविजये अविद्यानिवर्तकभङ्गः॥**

## सद्विद्याविजये अविद्यानिवृत्तिभङ्गः

अपि च अज्ञानस्य निवृत्तिरपि दुर्निरूपा। तथाहि – सा किं मिथ्या किं वा सत्या? आद्ये अनिर्मोक्षप्रसङ्गः। निवृत्त्युपादानभूताज्ञानस्य निवृत्त्या सहावस्थानस्यावश्यकत्वात्।

किञ्च अविद्योपादानकस्य अविद्याविरोधाभावेन तत्राविद्यानिवृत्तिव्यपदेशः परिभाषामात्रमेवेति तत्त्वज्ञाने सत्यपि नाविद्यासाम्राज्यहानिः।

द्वितीयेऽपि किं सा निवृत्तिः ब्रह्मस्वरूपादन्या, उत तदेव? आद्ये अद्वैतहानिः। भिन्नसत्ताकतया विरोधाभावादनिर्मोक्षप्रसङ्गश्च।

एतेन पञ्चमप्रकारपक्षोऽपि निरस्तः। द्वितीयमप्यनेनैव निरस्तम्। अनादेर्ब्रह्मस्वरूपस्य साध्यत्वमप्यसम्भवि।

यच्चेदमुच्यते - 'यस्मिन्सति उत्तरक्षणे यस्य सत्त्वं यदभावे यदभावः' इति क्षेमसाधारणं साध्यत्वं ब्रह्मणि सम्भवत्येव। तत्त्वज्ञाने सति उत्तरक्षणे अविद्यानिवृत्तिः। तदभावे निवृत्तिरूपब्रह्माभावात्मिका अविद्येति, तन्न-ब्रह्मस्वरूपाविरोधिन्या अपि अविद्यायाः तदभावत्वासम्भवात्।

ननु अधिष्ठानस्य अध्यस्यमानाभावत्वात् अभावप्रतियोगिनोः भावाभावत्वाच्च अविद्याब्रह्मणोः परस्पराभावत्वं वाच्यमिति चेन्न। अधिष्ठानस्य अध्यस्यमानाभावत्वे मानाभावात्। ननु शुक्तौ रजताभावो न व्यावहारिकः। प्रातिभासिकप्रतियोगित्वात्। नापि प्रातिभासिकः। नासीदस्ति भविष्यतीति प्रतियोगिसमानकालीनत्वप्रतीतेः। अतोऽधिष्ठानमेवाभाव इति वाच्यम्। तच्च नाभावत्वेनैव कल्पय्ते। किन्तु स्वतन्त्र्येणैव शुक्त्यादिरूपेण सिद्धम् अभावव्यवहारालम्बनतया कल्प्यत इति न प्रातिभासिकप्रतियोगित्वविरोधः। तस्मादधिष्ठानमेव अध्यस्यमानाभाव इति चेन्न। भावान्तराभाववाद इव तत्र क्लृप्तानामर्थानामेव प्रातिभासिकाभावत्वकल्पनस्य उचितत्वात्। कथमन्यथा भूतलादौ न प्रातिभासिकाभावव्यवहारः।

किञ्च शुक्तौ रजताभावो न शुक्तिः। तत्र तदप्रवृत्तेः। अतस्तत्र विद्यमानरूपादिरेव रजताभावः स्यात्। अतो नाधिष्ठानमध्यस्यमानाभावः। अस्तु वा तथा। तथापि नाध्यस्यमानम् अधिष्ठानाभावः। अभावप्रतियोगिनोःपरस्पराभावत्वनियमोऽसिद्ध एव। अप्रयोजकत्वात्। घटाभावाभावव्यवहारस्य सम्प्रतिपन्नत्वात्, तस्यातिरिक्तविषयत्वकल्पने गौरवात्, अनतिप्रसक्तप्रतियोगिविषयत्वं कल्प्यते।न च अत्र तादृशव्यवहारं पश्यामः, येनाध्यस्यमानस्य अधिष्ठानाभावत्वं कल्पयेम। तस्मात् नोक्तसाध्यतासम्भवः। अस्तु वा अध्यस्यमानमधिष्ठानाभावः। तथापि प्रतियोगिसमानकालीनस्य निवृत्तित्वकल्पनमुपहास्यमेव। अतो न ब्रह्मस्वरूपमविद्यानिवृत्तिः।

किञ्च एवं सति ब्रह्मणो घटसाध्यत्वप्रसङ्गः। ननु - यदभावे यदभाव इत्यसिद्धमेव। संसारदशायां ब्रह्माभावरूपाविद्यासत्त्वेऽपि मोक्षे तदसिद्धेरिति चेत्, तत एवाविद्यानिवृत्तेर-साध्यत्वप्रसङ्गात्। यत्कालापेक्षया पूर्वकाले यस्मिन् सति तत्काले यस्य सत्त्वम्, तत्पूर्वकाले तस्याभावे तत्काले यस्याभावः स एव तत्साध्य इत्यपि न। ब्रह्मणो घटसाध्यत्वप्रसङ्गादेव। पूर्वकालीनेनोत्तरकालीनस्य प्रयोज्यत्वं विवक्षितमिति चेन्न। जन्यत्वातिरेकेण प्रयोज्यत्वासम्भवात्।

साध्यत्वाभिमताभावस्य साधकत्वेन अभिमताभावप्रयोज्यत्वं विवक्षितमिति चेन्न। ब्रह्मज्ञानाभावस्य अविद्याप्रयोजकत्वासिद्धेः। अविद्यानिवृत्तेः ज्ञानजन्यत्वे सति हि ज्ञानाभावे निवृत्तेरनुत्पत्तेरविद्यायाः सुखजीवनात् ज्ञानाभावस्य अविद्याप्रयोजकता वा स्यात्। प्रायश्चित्तस्य दुरितध्वंसहेतुत्वादेव हि प्रायश्चित्ताभावे दुःखसामग्रीसत्त्वात् प्रायश्चित्ताभावस्य दुःखप्रयोजकत्वम्, दुःखाभावस्य प्रायश्चित्तसाध्यत्वं च।

किञ्च अविद्या प्रकृतिरेव, ततोऽतिरिक्ता वा। अन्त्ये 'मायां तु प्रकृतिं विद्यात्' इति श्रुतिविरोधः। आद्ये 'गौरनाद्यन्तवती सा जनित्री भूतभाविनी' इत्यविनाशित्वावगमान्न निवृत्तिसम्भवः।

एतेन यदुक्तम् - उत्पत्तिक्रियाकर्तुः उत्पत्तिर्यथा प्रथमसमयसम्बन्धमात्रसम्बन्धी भावविकारः, तथा निवृत्तिरपि चरमसमयमात्रसंसर्गी भावविकारः। अत एव यथा पूर्वं पश्चाच्च 'उत्पत्स्यते', 'उत्पन्न' इति भाविभूतभावेन व्यवह्रियमाणाया उत्पत्तेः प्रथमसमयमात्रे उत्पद्यत इति वर्तमानत्वव्यवहारः, तथा पूर्वं पश्चाच्च 'निवर्तिष्यते', 'निवृत्त' इति भाविभूतभावेन व्यवह्रियमाणाया निवृत्तेः चरमसमयमात्रे 'निवर्तते', 'नश्यति', 'ध्वंसत' इति वर्तमानत्वव्यवहार उपलभ्यते। निवृत्तेरनुवृत्तौ तु चिरशकलितेऽपि घटे 'इदानीं घटो निवर्तत' इत्यादिव्यवहारः स्यात्। आख्यातानां प्रकृत्यर्थवर्तमानत्वाद्यर्थाभिधायकत्वात्।

ननु आख्यातानां स्वस्वाभिहितसङ्ख्याश्रयप्रकृत्यर्थकर्मकर्तृगतवर्तमानत्वाद्यर्थाभिधायकत्वम्, स्वाभिहितप्रकृत्यर्थानुकूलव्यापारगतवर्तमानत्वाद्यर्थाभिधायकत्वं वाऽस्तु। तथाच निवृत्तिर्न नित्या चिरचूर्णितस्य घटस्य तद्गततन्निवृत्त्यनुकूलव्यापारस्य चावर्तमानत्वात् नोक्तातिप्रसङ्ग इति चेन्न। आद्ये उत्पन्नेऽपि घटे 'उत्पद्यत' इति व्यवहारापत्तेः। उत्पत्तिक्रियाकर्तुः घटस्य वर्तमानत्वात्। द्वितीये आमवातजडीकृतकलेबरे उत्थानानुकूलयत्नवति उत्थानानुदयेऽप्युत्तिष्ठतीति व्यवहारापत्तेः। आख्यातार्थस्य प्रकृत्यर्थभूतोत्थानानुकूलस्य यत्नरूपव्यापारस्य वर्तमानत्वात्। तस्मात् प्रकृत्यर्थगतमेव वर्तमानत्वाद्याख्यातार्थ इति। ध्वंसस्य स्थायित्वे चिरनिवृत्तेऽपि घटे 'निवर्तत' इति व्यवहारो दुर्वारः।

यदि च मुद्गरादिशकलिते घटे ध्वंसो नाम कश्चिदभावः तत्प्रतियोगिकः स्थायी भूतलाद्याश्रित उपेयते, तदा कपालमालापसरणे तदनपसरणेऽपि मणिकशरावादिकपालव्यावृत्तकपाल-संस्थानविशेषादर्शने च किमिति स ध्वंसः प्रत्यक्षो न स्यात्। कपालसंस्थानादिविशेषादिना अनुमेयो घटादिध्वंसः, न प्रत्यक्ष इति चेत्, तर्हि तेन मुद्गरपातकालीनस्य उत्पत्तिवत् भावविकाररूपतया प्रतियोग्याश्रितस्य ध्वंसस्य अनुमानं सम्भवतीति न ततः पश्चात् अनुवर्तमानप्रतियोग्यधिकरणानाश्रिताभावरूपध्वंससिद्धिः। 'इह भूतले घटो ध्वस्त' इति भूतले अधिकरणत्वव्यवहारस्य 'इह भूतले घट उत्पन्न' इतिवत् भावविकारयुक्तप्रतियोग्यधिकरण-त्वविषयत्वोपपत्तेः। घटध्वंसानन्तरं भूतले घटाभावव्यवहारस्य घटापसरणानन्तरं तदभावव्यवहारवत्

समयविशेषसंसर्ग्यत्यन्ताभावविषयत्वोपपत्त्या ध्वंसविषयत्वस्याकल्पनीयत्वाच्च। एवं सति घटोत्पत्तेः पूर्वं तदभावव्यवहारस्यापि अत्यन्ताभावेन चारितार्थ्यात्। प्रागभावो हि नास्त्येव। नन्वेवं प्रागभावाधारकालः किमालम्बनः स्यात्। घटादिषु प्रतियोगित्वादिव्यवहारवत् अखण्डकिञ्चिद्धर्मगोचरोऽस्तु। तस्मात् न पूर्वं प्रागभावः। न तत्र प्रध्वंसाभावः। मध्ये परं कियन्तञ्चित्कालं अनिर्वचनीयोत्पत्तिस्थितिध्वंसरूपभावरूपविकारवान् घटाध्यासः। एवं च अविद्यानिवृत्तिरपि ब्रह्मसाक्षात्कारोदयानन्तरक्षणवर्ती कश्चित् भावविकार इति, तस्य मुक्तावनुवृत्त्यभावान्न तदनिर्वाच्यत्वे कश्चिद्दोष इति।

तदपि निरस्तम्। प्रकृतेः नित्यत्वश्रुतेः, मायाया एव प्रकृतित्वश्रुतेश्च। अपि च अविद्यानिवृत्त्यनन्तरम् अविद्याऽस्ति न वा? आद्ये अनिर्मोक्षप्रसङ्गः। अन्त्ये नेत्यस्य कोऽर्थः। अभाव इति चेत् कोऽयमभावः? ब्रह्मेति चेन्न। तस्य समयविशेषसंसर्गाभावत्वासिद्धेः। समयविशेषसंसर्गाभावे च नाभावत्वासिद्धिः, अविरोधात्।

ननु सत्ताभेदप्रयुक्त एवायमविरोधः। स च नाभावत्वविरोधीति चेन्न। अनन्तरमपि विरोध्यभावासिद्ध्या अविद्यानुवृत्तिप्रसङ्गात्। ननु न ब्रह्म अविद्याभावः, अविरोधात्। नाप्यविद्यानिवृत्तौ सत्यामविद्याभावः, नाप्यविद्याकालस्य भावाभावान्यतरत्वनियमेऽपि अविद्यानिवृत्तौ कालोऽपि निवृत्त एवेति न तन्नियमभङ्गोऽपीति चेन्न। शुकादिमुक्तेः पूर्वमेव वृत्ततया इदानीं कालाभावप्रसङ्गात्। तत्सत्त्वे च कालस्य भावाभावान्यतरत्वनियमभङ्गः।

किञ्च अनादित एव मिथ्यापरिणामानामनन्तानां सुखतत्साधनानाम् अनन्तानां निवृत्तीनां चायत्नेनैव अनवरतोत्पत्तेः अपुरुषार्थक्षणिकैकव्यक्त्यात्मकनिवृत्त्यर्था महती बहुकालभृशदुःखसाध्ये श्रवणादौ प्रवृत्तिः किमर्था। निवृत्त्युत्तरकालं निवृत्त्यभावसिद्धेः निवृत्त्यर्था प्रवृत्तिरुपपद्यत इति चेत्, तर्हि सिद्धो निवृत्त्यनन्तरकालः।

अपिच —

**'क्षेत्रज्ञः करणी ज्ञानं करणं तस्य चेत् द्विज (तेन तत्?)।**
**उत्पाद्य (निष्पाद्य) मुक्तिकार्यं वै कृतकृत्यं निवर्तते॥'[1]**

इति तत्त्वज्ञानस्य मुक्त्युत्पादकत्वावगमात् मुक्त्यतिरिक्ताध्यासहेतुत्वकल्पनं न विदुषां हृदयङ्गमम्।

किञ्च अविद्याया इवानेनैव वचनेन तत्त्वज्ञानस्यापि निवृत्त्यवगमात् मुक्तेः प्रागेवाविद्यानिवृत्तौ मुक्त्यनन्तरश्रूयमाणा तत्त्वज्ञाननिवृत्तिः कथं स्यात्। कथं च अविद्यानिवृत्त्या प्रपञ्चनिवृत्तिः। तस्या अपि भावविकारत्वेनाविद्यासाध्यत्वात्।

किञ्च मुक्तिः साध्या न वा? साध्यत्वे अतिरिक्तनिवृत्तेः साध्यत्वोपादानं व्यर्थम्।

1. वि.पु.6.7.94

परमपुरुषार्थसाधनतया सुप्रसिद्धस्य तत्त्वज्ञानस्य अपुरुषार्थसाधनत्वापातश्च। असाध्यत्वे तत्त्वज्ञाननैष्फल्यम्।

ननु असाध्य एवानवच्छिन्नानन्दाभेदरूपः परमपुरुषार्थः, तस्यानादित्वात्। तथापि तत्त्वज्ञानस्य न पुरुषार्थपर्यवसानहानिः। कण्ठचामीकरन्यानेन पुरुषार्थाप्राप्तिं मन्यमानस्य तत्र सुहृदुपदेशेन कण्ठासत्तयवगमे सति प्राप्तताबुद्धेरप्राप्तताबुद्धिनिवृत्तेश्च भावात्। तावन्मात्रेण पुरुषार्थपर्यवसानादिति चेन्न, कण्ठचामीकरसम्बन्धाज्ञानवदिहाभेदानुभवासिद्धेः।

किञ्च प्राप्तताज्ञानं न मोक्षदशायाम्, किन्तु तत्त्वज्ञानदशायामेवेति मोक्षस्य कथं पुरुषार्थता, स्वरूपप्रकाशस्यैव प्राप्तताबुद्धिरूपत्वे मुक्तिसंसारयोरविशेषः। अप्राप्तताबुद्धिनिवृत्त्याऽपि न मोक्षस्य पुरुषार्थता। निवृत्तेस्त्वदुक्तरीत्या संसारकालीनत्वात्। मोक्षदशायामप्राप्तबुद्ध्यभावात् मोक्षस्य पुरुषार्थतेति चेत्, न। किमभावपदेन प्रतियोगिविरोधी कश्चित् बोध्यते, उत न? आद्ये अद्वैतहानिः। मिथ्यार्थानुवृत्तिप्रसङ्गो वा। न च ब्रह्मस्वरूपमनादितः संस्काराविनाभूतं कस्यापि विरोधीति वक्तुं शक्यम्। अन्त्ये कथं चोद्यस्य परिहार इति।

यदुक्तम् - निवृत्तेरतिरिक्ताभावविकारत्वाभावे चिरनिवृत्तेऽपि घटे 'निवर्तत' इति व्यवहारप्रसङ्ग इति, तन्न। धात्वर्थविशिष्टकर्तरि धात्वर्थरूपफलोपहिते व्यापारे वा वर्तमानत्वाद्यन्वयादिति?

**॥ इति सद्विद्याविजये अविद्यानिवृत्तिभङ्गः॥**

**श्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये सद्विद्याविजयः तृतीयः समाप्तः॥**

**वाधूलश्रीनिवासार्यतनयं विनयाधिकम्। प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम्॥**
**चण्डमारुतवेदान्तविजयादिस्वसूक्तिभिः। वेदान्तरक्षकायास्तु महाचार्याय मङ्गलम्॥**

## श्रीदोड्डयाचार्यापरनामधेयश्रीमहाचार्यविरचिते वेदान्तविजये

### 4

# अद्वैतविद्याविजयः

द्वैतश्रुतिभिश्चिदचिदीश्वरभेदप्रतिपादनेन विशेषणविशेष्यभेदः प्रतिपाद्यते। घटकश्रुतिभिः विशेषणविशेष्यवैशिष्ट्यम्, अद्वैतश्रुतिभिश्च 'ऐतदात्म्यमिदं सर्वम्' इति कृत्स्नस्यापि भगवदात्मकत्वप्रतिपादनेन सिद्धं विशिष्टाद्वैतं प्रतिपाद्यते। तथाहि —

द्वैतश्रुतयस्तावत्प्रश्नोपनिषदि पञ्चमे खण्डे 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत, स तेजसि सूर्ये सम्पन्नः - यथा पादोदरस्त्वचा विनिर्मुच्यते एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरून्नीयते ब्रह्मलोकम्। स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते'[1] इति जीव एवाचितः परः, तस्मात्परः पुरुषः, स सामभिरुन्नीयत इति मोक्षे भेदः प्रतिपाद्यते; नेतॄणां नयनस्य साम्नां ब्रह्मलोकस्य च स्वरसतो भेदावगमात्। कठवल्ल्यां तृतीयखण्डे 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति' ज्ञानेन इदानीं प्राप्यस्य पूर्वसिद्धप्राप्तुश्च भेदः स्फुटः। चतुर्थे 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति। एवं मुनेर्विजानतः आत्मा भवति गौतम'[2] इति भगवन्तं प्राप्य तत्साम्यमुपैतीत्यर्थः।

पञ्चमखण्डे '**नित्यो नित्यानां चेतनश्चेतनानाम्**
**एको बहूनां यो विदधाति कामान्।**
**तमात्मस्थं येऽनुपश्यन्ति धीराः**
**तेषां शान्तिः शाश्वती नेतराषाम्॥**[3] इति।

मुण्डकोपनिषदि द्वितीयखण्डे 'सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः सपुरुषो ह्यव्ययात्मा'[4] इति। पञ्चमखण्डे—

**'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः।**
**जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥**[5]

---

1. प्र.उ.5.5
2. क.उ.4.15
3. क.उ.5.13
4. मुं.उ.1.2.11
5. मुं.उ.3.1.2

**यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्।**
**तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति।।'**[1] इति,

**'तस्मादात्मस्थं ह्यर्चयेत् भूतिकामः'**[2] इति च। षष्ठे -

**'यथा नद्यस्यन्दमानास्समुद्रे अस्तङ्गच्छन्ति नाम रुपे विहाय।**
**तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैतिदिव्यम्।।**[3]

स यो ह वै तत् परमं ब्रह्मवेद ब्रह्मैव भवति'[4] इति। अत्र एव शब्दो इवार्थः, 'परमं साम्यमुपैति' इति पूर्वानुसाराद्वाक्यशेषानुसाराच्च। तत्र हि नदीसमुद्रष्टान्तः प्रतिपादितः। न हि तत्राभेदोऽस्ति। किन्तु नामरूपकृतभेदाभाव एव। 'स्पर्द्धमानो विष्णुरेव भूत्वेमान् लोकानभिजयति', 'विष्णु क्रमान् क्रमते। विष्णुरेव भुत्वेमान् लोकानभिजयति' इत्यादिवत्। न हि तत्र पश्वालम्भनादिमात्राद्विष्णुतादात्म्यमुपपद्यते। इववद्द्वैतमुपैति नैघण्टुकाश्च पठन्ति। अन्यथा नैरर्थक्यात्।

वस्तुतस्त्ववधारणार्थ एवायमेवकारः। स्वारस्यात्, परमसाम्यश्रुत्यनुग्रहाच्च। सौसादृश्यविवक्षया हि सेनान्यां 'राजैवायमि'ति त्वरिता वक्तारो भवन्ति। तत्र ह्यवधारणार्थ एवकारः सौसादृश्यं द्योतयति।

ननु 'ब्रह्मैव भवति' इत्यत्र ब्रह्म भवति नत्वब्रह्म भवतीत्यवधारणार्थः। ततश्च काल्पनिकब्रह्मभेदनिवृत्तौ अवधारणस्य तात्पर्यमिति चेत्, तथा सति ब्रह्मभावः पुरुषार्थो न स्यात्।

ननु भेददशायां सिद्धोऽप्यनवच्छिन्नानन्दब्रह्मभावः प्रयोजनकल्पो भवति, काल्पनिकभेदनिवृत्तौ सम्यक् प्रयोजनत्व(जन?)लाभ इति, भेदनिवृत्तेरपि तादर्थ्यात् ब्रह्मभाव एव पुरुषार्थ इति चेत्, तत्र केयं प्रयोजनकल्पता ? किं लब्धेऽपि तत्प्रयोजने ततोऽप्युत्कृष्टप्रयोजनेच्छासहत्वम्, अथाप्रयोजनत्वबुद्धिः, उत प्रयोजनत्वबुद्ध्यभावः। नाद्यः, भेदबुद्धेरेव तादृशप्रयोजनहेतुतया तन्निवृत्तौ तदसिद्धेः कथं भेदनिवृत्तये तत्त्वज्ञाने प्रवृत्तिः। परमपुरुषार्थोत्सादकत्वात्। स्वरूपमात्रात्स्वतस्सिद्धादानन्दात् वैषयिकसुखमत्यल्पमपि हि परमपुरुषार्थः। न चोत्कृष्टसुखत्वेऽप्य-नित्यतया तस्य अपुरुषार्थता। अनित्यताया अपुरुषार्थताप्रयोजकत्वाभावात्। नित्यसुखविरोधि तु स्यादपि। न च सोऽस्ति नित्यत्वादेव। न च दुःखमिश्रत्वादपुरुषार्थता, तथासति दुःखाभावार्थं

---

1. मुं.उ.3.1.3
2. मुं.उ.3.1.10
3. मुं.उ.3.2.8
4. मुं.उ.3.2.9

प्रवृत्तिरित्यापत्त्या दुःखाभावस्यैव पुरुषार्थतापत्तेः नेतरस्य, स्वरूपात्मके सरूपानन्दानुभवे जाग्रति तयोरसम्भवात्। उक्तं च - त्वयैव 'स्वरूपानन्दानुभवेन सरूपस्य परमप्रेमास्पदत्वमि'ति।

मन्त्रोपनिषदि प्रथमखण्डे—

**पिबन्त्येनामविषमामविज्ञाताः कुमारकाः।**
**एकस्तु पिबते देवः स्वच्छन्दोऽत्र वशानुगाम्॥**[1]

द्वितीयखण्डे - 'ये विदुर्ब्राह्मणास्तथा। अत्रैव ते लयं यान्ति'[2] इति। अत्र तस्मिन्नेव लयं यान्ति इति 'स्रवन्त्यः सागरे यथो'[3]ति पूर्ववाक्योक्तलयस्यैव प्रत्यभिज्ञानात् जीवब्रह्मणोः भेदः सिद्धः। दहरविद्यायां 'परञ्ज्योतिरुपसम्पद्य स्वेन रुपेणाभिनिष्पद्यत'[4] इति। सुबालोपनिषदि द्वितीयखण्डे 'ब्रह्मैव सन् ब्रह्माप्येति' इत्येवकारः इवार्थः पूर्ववत्। स्वाभाविकब्रह्मभावे सत्येव इदानीं ब्रह्मप्राप्तिः प्रतिपाद्यत इति तु व्याख्यानमसङ्गतम्, ब्रह्मभावस्य स्वाभाविकत्वे साध्यत्वायोगात्।

नन्वप्येतीति लयो हि प्रतिपाद्यते। ततश्च मृद एव सतो घटद्रव्यस्य घटत्वावस्थाप्रहाणेन मृदिलयवत् ब्रह्मण एव सतो जीवस्य जीवत्वावस्थाप्रहाणेन ब्रह्मणि लयः प्रतिपाद्यते इति चेन्न, यद्यप्ययमर्थो यादवमते सम्भवति तथापि ब्रह्मैव सन्नित्यस्य प्रयोजनाभावान्नायमर्थो युक्तः। ततश्च ब्रह्मसादृश्यं ब्रह्मप्राप्तिश्चेत्युभयमपि साध्यत्वेन प्रतिपाद्यते।

श्वेताश्वतरे प्रथमखण्डे - 'पृथगात्मानं प्रेरितारं च मत्वा। जुष्टस्ततस्तेनामृतत्वमेति?[5], 'ज्ञाज्ञौ द्वावजावीशनीशौ'[6], क्षरं प्रधानममृताक्षरं हरः। क्षरात्मानावीशते देव एकः'[7] इति, 'भोक्ता भोग्यं प्रेरितारं च मत्वा। सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्?'[8] इति च।

चतुर्थे —

**'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति॥**
**समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः।**
**जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥'**[9] इति।

1. मन्त्रिक.उ.1.6
2. मन्त्रिक,2.9
3. मन्त्रिक.उ.2.7
4. छां.उ.8.12
5. श्वे.उ.1.6
6. श्वे.उ.1.9
7. श्वे.उ.1.10
8. श्वे.उ.1.12
9. श्वे.उ.4.6,7

**'अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः॥'**[1]इति च।

पञ्चमे - **'क्षरं त्वविद्या ह्यमृतं तु विद्या। विद्याविद्ये ईशते यस्तु सोऽन्यः॥'**[12] इति।

षष्ठे - **'तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम्।**
**पतिं पतीनां परमं परस्तात् विदाम देवं भुवनेशमीड्यम्॥'**[3] इति,

'सकारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः'[4], 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्'[5], 'प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः'[6] इति च।

बृहदारण्यके चतुर्थेध्याये चतुर्थेब्राह्मणे - 'स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत न हास्योद्ग्रहणायैव स्यात्; यतो यतस्त्वाददीत लवणमेव - एवं वा अर इदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति; न प्रेत्य संज्ञास्ति'[7] इति अनेन वाक्येन मुक्त्यवस्था प्रतिपाद्यते। विज्ञानघनो जीवः पञ्चभूतमयं देहं विसृज्य तद्विशरणानन्तरक्षण एव महद्भूतम् - महति भूते परमात्मनि, नश्यति - लीनो भवति देवादि नामरूपप्रहाणादित्यर्थः। अविलम्बप्रतिपादनाय तान्यन्वित्युक्तिः। जिववियोगोत्तरक्षण एव शशीरविशरणं भवति। तदुत्तरक्षण एव ब्रह्मप्राप्तिर्भवतीति न विलम्ब इति भावः। देवादिवैजात्यप्रहाणात्परमसाम्यापत्तेश्च अत्यन्तवैधर्म्याग्रहणं शेषत्वादिकतिपयवैधर्म्यग्रहणं च अभिप्रेत्य तदनुगुणं दृष्टान्तमाह - स यथा सैन्धव खिल्य इति। सैन्धवखिल्यः - सैन्धवघटः लवणपिण्डः। अन्यत्र असितः अत्र लयप्रतिपादनेन रूपतो वैधर्म्यग्रहणाभावः प्रतिपादितः। यतो यत इति - आदिमध्यान्ताचामेषु रसतो वैधर्म्यं गृह्यत इति भावः। उद्ग्रहणायोग्यत्वप्रतिपादनेन पुनरावृत्तिः व्यज्यते। अस्येति संयोजकस्यापि न पृथग्भावकरणसामर्थ्यमिति प्रतिपादनेन स्वप्राप्तिप्रदस्यापि भगवतः पुनरावृत्तौ न सामर्थ्यमिति गम्यते। अस्य वाक्यस्याभेदपरत्वे दृष्टान्तवैघट्यं न प्रेत्येत्यादि वाक्यवैयर्थ्यञ्च।

षष्ठे अध्याये चतुर्थे ब्राह्मणे - 'ब्रह्मैव सन् ब्रह्माप्येति' इति, अष्टमेऽध्याये द्वितीयब्राह्मणे 'तेषु ब्रह्मलोकेषु परः परावतो वसन्ति तेषां न पुरावृत्तिः' इति। परावतः - परवन्तः भगवत्परतन्त्राः इत्यर्थः।

---

1. श्वे.उ.4.9
2. श्वे.उ.5.1
3. श्वे.उ.6.7
4. श्वे.उ.6.9
5. श्वे.उ.6.13
6. श्वे.उ.6.16
7. बृ.उ.4.4.12

तापनीये - 'देहान्ते तमसः परन्धाम प्राप्नुयात्, यत्र विराण्णृसिंहोऽवभासते, तत्र खलूपासते। तत्सरूपास्सदृशाः मुनयः आकल्पान्ते तस्मिन्नेवात्मनि लीयन्ते। न च पुनरावर्तन्त' इति श्रुतिप्रतिपन्नं परमसाम्यमुक्तम्। यत्र नृसिंहोऽवभासते तद्धाम प्राप्नुयादित्यन्वयः। तत्र हेतुमाह - तत्र खल्वित्यादि। परमे व्योम्नि द्योतमानतयोपास्यत इति अर्थः। यथोपासनं फलमिति भावः। सरूपास्सदृशाः - 'परमं साम्यमुपैती'ति श्रुतिप्रतिपन्नं परमसाम्यमुक्तम्। आकल्पान्तं सर्वदैवेत्यर्थः। आकल्पं कार्यलोकविशेष एव नृसिंहाधिष्ठिते चिरं तमुपास्य कालान्तरे परमां मुक्तिं प्राप्नुवन्तीत्येवं तात्पर्यवर्णनेऽपि नृसिंह एव लयश्रवणान्मुक्तभेदसिद्धिरनिवार्या। अपिच सर्वत्र मुक्तिगोचरलयपदानां 'स यथा सैन्धवखिल्य' इत्यादिवाक्यप्रतिपन्नार्थपरत्वाच्च भेदसिद्धिः। तापनीये पञ्चमोपनिषदि 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते। विष्णोर्यत्परमं पदम्' इति।

मैत्रायणीयोपनिषदि 'तस्मिन्नेव यजमानाः सैन्धवघन इव लीयन्ते, एषा वै ब्रह्मैकतानाम, अत्र हि सर्वे कामाः समाहिताः' इति। सैन्धवघन इति - यथा सैन्धवघन उदके प्रास्तः तत्र लयं प्राप्नोति तत्समानरूपतया दुर्ग्रहविवेको भवति रसविशेषेण विवेक्तुं च योग्यः, तद्वत् ब्रह्मणि लीनो भवतीति भावः। अत्र च ब्रह्मैकतानुवादेन लयरूपताविधिः प्रतीयते।

तदयं भावः - सर्वेषु मोक्ष प्रकरणेषु 'ब्रह्मवेद ब्रह्मैवभवति' इत्यादिरूपेणाभेदप्रतिपादकत्वेन प्रतीयमानानां वाक्यानामयमेवार्थ इति। भूमविद्यायां प्रथमतो भूमानमुपदिश्य अनन्तरं विधीयमानमहङ्ग्रहणोपासनं जिज्ञास्यतया भूम्न एव प्रकृतत्वात् तद्गोचरमेव। ततश्चाहमर्थाभेदादेव भूम्नोऽहङ्ग्रहणोपासनं विधीयत इति जीवब्रह्माभेदशङ्कोन्मेषनिवृत्तये उपदेशभेदेन जीवब्रह्मभेदं स्पष्टयितुं जीवोपदेशः कृतः। तदुपदेशेन च भेदेऽवधारिते अहम्प्रकारतयैवाहङ्ग्रहणोपासनमिति सिद्ध्यतीति। तथाहि - 'सुखन्त्वेव विजिज्ञासितव्यम्'[1] इति जिज्ञास्यतयोक्तस्य 'सुखं भगवो विजिज्ञास'[2] इति पृष्टस्य सुखविशेषस्य लक्षणमाह - 'यो वै भूमा तत्सुखम्। नाल्पे सुखमस्ति। भूमैव सुखम्। भूमात्वेव विजिज्ञासितव्य'[3] इति। भूमशब्दः धर्मिपर्यन्तः, अल्पप्रतिसम्बन्धिनिर्देशात्। 'नाल्पे सुखमस्ती'ति - अल्पे सुखत्वं नास्तीत्यर्थः। 'अज्ञानमतान्यदुक्तम्' इति। यत्किञ्चिदपेक्षया बृहत्त्वस्य इतरसाधारण्यात् पृच्छति - 'भूमानं भगवो विजिज्ञास' इति। उत्तरमाह - 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्'[4]

1. छा.उ.7.22.1
2. छा.उ.7.22.1
3. छा.उ.7.23.1
4. छा.उ.7.24.1

इति। यत्रेति विषयसप्तमी। यद्विषये सदृशं बृहदन्तरं न जानाति स भूमेत्यर्थः। राजादिमहिमाधीनस्थितिकत्वस्य प्रजासु दर्शनात् पृच्छति - 'स भगवः कस्मिन् प्रतिष्ठित'[1] इति। स्वेच्छेधीनस्थितिरित्याह - 'स्वे महिम्नि'[2] इति। किञ्चिद्धि वस्तु कुत्रचित् विद्यमानं दृश्यते, कुत्रायं विद्यत इत्यभिप्रायेण पृच्छति - 'अन्यो ह्यन्यस्मिन् प्रतिष्ठित'[3] इति। उत्तरस्य उवाचेत्येतदन्तत्वस्य स्वरसतः प्रतीतेः प्रश्न एवायं युक्तः। अत्र प्रतिष्ठितशब्दः सम्बन्धमात्रपरः। सर्वत्रेत्युत्तरमाह - 'स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरत'[4] इति।

यद्वा अन्य इत्यादिः स्वे महिम्नीत्युपपादकः सन् प्रतिवचनशेष एवास्तु। 'अन्योऽन्यस्मिन् प्रतिष्ठित इत्युवाचे'त्यन्वयः। अस्मिन् पक्षे अयं प्रतिष्ठितशब्दः पूर्वप्रतिष्ठितशब्दसमानार्थः। भूम्नोऽन्यः खलु स्वस्मादन्यत्र प्रतिष्ठितः, न तु भूमापीत्यर्थः। एवं 'यत्र नान्यत्', 'स्वे महिम्नि' इति च 'न तत्समश्चाभ्यधिकश्च दृश्यते' इत्ययमर्थ उक्तः। द्वितीयायां योजनायां 'स एवाधस्तात्' इत्यादिना गुणान्तरमुच्यते। वक्ष्यमाणाहङ्ग्रहणोपयोगितया सार्व्यात्म्यमुपक्षिपति 'स एवेदं सर्वम्'[5] इति। एवं भूमानमुपदिश्य शोकपारतरणहेतुभूतं भूमगोचराहङ्ग्रहणोपासनम् उपदिशति - 'अथातोऽहङ्कारादेश एवाहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतोऽहमुत्तरतोऽहमेवेदं सर्वम्'[6] इति। कारः कृतिः, अहमिति कृतिः अहङ्कारः। अहमित्युपासनमित्यर्थः। एतदुत्थाप्यजीवब्रह्माभेदभ्रमं वारयितुमाह - 'अथात आत्मादेश एवात्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदं सर्वमिति'[7] इति। 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि'[8] इति नामरूपव्याकरणस्य जीवानुप्रवेशनिबन्धनत्वोपदेशेन जीवप्रचुरत्वात् प्रपञ्चस्य आत्मैवाधस्तादित्याद्युपदेशः। एवञ्च 'अथातोऽहङ्कारादेश' इत्यनेन सर्वात्मकत्वाहङ्कारभूमोपासनं विहितम्।

यदाह कश्चिद् 'यत्र नान्यादि'त्यादिना निरस्तनिखिलभेदं वस्तु लक्ष्यते। यत्र - यास्मिन् वस्तुनि, अन्यत् - भिन्नं कार्यजातम्, न पश्यतीत्यादिना नामरूपात्मकभेदप्रपञ्चप्रमाणस्य

---

1. छा.उ.7.24.1
2. छा.उ.7.24.1
3. छा.उ.7.24.2
4. छा.उ.7.25.1
5. छा.उ.7.25.1
6. छा.उ.7.25.1
7. छा.उ.7.25.2
8. छा.उ.6.3.2

निषिद्धत्वात्। 'अथ यत्रान्यत् पश्यत्यन्यत् शृणोति अन्यत् विजानाति तदल्पमि'ति वस्त्वन्तरपरिच्छिन्नस्याल्पत्वं सङ्कीर्त्य 'अथ यदल्पं तन्मर्त्यम्' इति मर्त्यत्वेन, 'नाल्पे सुखमस्ती'ति असुखत्वेन वस्त्वन्तरपरिच्छिन्नस्य निन्दितत्वाच्च।

किञ्च 'स भगवः कस्मिन् प्रतिष्ठित' इत्यादिना ब्रह्मणोऽप्यधिकरणमस्ति न वेत्याशङ्क्याह - 'नाहमेवं ब्रवीमिति होवाच अन्योऽह्यन्यस्मिन् प्रतिष्ठित' इति भेदनिषेधेन आत्मनः प्रतिष्ठितत्वं निषिध्यते। स एवाधस्तादित्युत्तरवाक्ये च सार्वात्म्यं प्रतिपाद्यते। अतो 'यत्र नान्यदि'ति अद्वितीयत्वेन लक्षिततत्वात् 'अथ यत्रान्यदि'ति भेदस्य निन्दितत्वात् 'अन्यो ह्यन्यस्मिन्नि'ति भेदनिषेधात् सार्वात्म्यप्रतिपादनाच्च अद्वितीयपरमिदं प्रकरणम्। जडस्य ब्रह्मकार्यत्वेन आरम्भणाधिकरणन्यायेन ब्रह्मणस्तदात्मकत्वेऽपि जीवस्य तदकार्यस्य तद्भेदे आत्यन्तिक एव भेदस्स्यादिति ब्रह्मणः सार्वात्म्यश्रुतिरुन्मत्तप्रलापा स्यात् इति जीवस्य ब्रह्मभेदं सार्वात्म्यश्रुतिरुपेक्षते। स एव तुल्यलक्षणतया अहङ्कारादेश इत्यत्र प्रतिपाद्यते।

नन्वात्मादेश इत्यनेनैव आत्मोपदेशसिद्धौ किमहङ्कारादेशेन(देश इत्यनेन?) इति चेन्न। आत्मा हि अहम्प्रत्ययविषयः कर्ता भोक्तेति लौकिकैर्निश्चीयत इति तत्रैव प्रथममात्मशब्दात् बुद्धिः स्यात्। न अभेदमवगमयितुं शक्नोति। शक्नोति त्वहम्पदार्थं पृथङ्निर्दिश्य ततोऽन्य एवात्मेति प्रतिपादिते जीवपराभेदं प्रतिपादयितुमिति सार्वात्म्यश्रुत्यपेक्षयैवाहमात्मानमादौ निर्दिशति।

नन्वहङ्कारस्य तदवच्छिन्नचैतन्यस्य च भिन्नत्वात् असर्वगतत्वाच्च कथं सर्वात्मत्वं सर्वगतत्वं चेति चेन्न। असौ ह्यहङ्कारशब्दः अहमिति कृतिः करणं यस्मिन्निति व्युत्पत्त्या अन्तःकरणावच्छिन्नचैतन्यमभिधत्ते।

**शोकहर्षभयक्रोधलोभमोहस्पृहादयः।**
**अहङ्कारस्य दृश्यन्ते जन्म मृत्युश्च नात्मनः॥**

इति स्मृतावपि तत्रैव प्रयोगात्। तथा च उपाधिपरिच्छेदात् परिच्छिन्ने तद्भेदाद्भिन्ने च तस्मिन् सर्वात्मब्रह्मभावप्रतीतिर्न सम्भवति। दहरपुण्डरीकवेष्टितस्य परमात्मनो 'यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश' इत्युपाधिकृताल्पत्वनिवृत्तिपराकाशोपदेशवत् अहमर्थस्याप्युपाधिकृतपरिच्छेदव्यावृत्त्या वास्तवसार्वात्म्यपराहङ्कारदेशश्रुतिर्न विरुध्यते। उत्तरवाक्ये तु ब्रह्मसमानस्वभावतया तदैक्यमुच्यते। न चास्मिन्वाक्ये ब्रह्मणस्सार्वात्म्यं न प्रतिपिपादयिषितम्। किन्तु स एवाधस्ता दित्युपक्रमानुरोधेन सर्वगतत्वमेव। तच्च भेदेऽपि न विरुध्यत इति वाच्यम्। अत्र हि कञ्चन पदार्थमवधिङ्कृत्वा तस्याधश्चोर्ध्वं च चतुर्दिक्षु च यत्किञ्चिदस्ति तत्सर्वं स एवेति षड्भिर्वाक्यैः प्रतीयते। 'स एवेदं सर्वमि'त्यवधिभूतपदार्थात्मकत्वमिति सर्वात्मकत्वमेवोच्यते, न तु सर्वगतत्वम्। सर्वगतत्वमात्रपरत्वेऽपि 'स एवाधस्तादहमेवाधस्तादात्मैवाधस्तादि'ति प्रतिपर्यायमवधारणान्न जीवेशभेदः प्रत्येतुं शक्यते इति।

अत्रोच्यते यदुक्तं प्रकरणमद्वैतविषयमिति, तत्र नातावत् 'यत्र नान्यदि'ति वाक्यबलादद्वैतविषयता, अस्य ब्रह्मातिरिक्तनिषेधपरत्वाभावात्। न हि 'यत्र नान्यत्पश्यती'ति अन्यनिषेधः प्रतीयते। (ननु?) प्रमाणनिषेधेन अर्थात्प्रमेयनिषेधस्सिद्ध इति चेन्न। अत्र प्रमाणनिषेधेन प्रमेयनिषेधसिद्धावपि अन्यत्रानिषेधेन अद्वैतासिद्धेः।

प्रमाणनिषेधोऽप्यनुपपन्नः। त्वन्मते ब्रह्मणोऽधिष्ठानतया तत्रैव सर्वेषां पदार्थानां प्रतीतेः। यत्र तत्समानसत्ताकं न पश्यतीति विवक्षायामपि चरमधर्मे व्यावहारिके प्रतिभासिके चातिव्याप्तेः, लक्षणत्वानुपपत्तेः।

किञ्च यत्रेत्यादेर्भूमशब्दार्थोपपादकत्वं हि स्वरसम्। न च भूयस्त्वमनेनोपपाद्यते। नापि 'यत्रान्यादि'त्यादिना अल्पत्वम्। नहीतरमिथ्यात्वं भूयस्त्वोपपादकम्। नापि तदधिकरणवस्तुसत्त्वं तस्याल्पत्वोपपादकम्। प्रत्युत विपरीतमेव। लोके हि विद्यागुणादिशालिनं भूयानिति वदन्ति, तच्छून्यञ्चाल्प इति।

न च यतोऽन्यत्वेन किञ्चिद्वस्तु न पश्यति स भूमा, यतोऽन्यत्वेन किञ्चिद्वस्तु पश्यति तदल्पमित्यर्थः। भवति च वस्तुपरिच्छेदतदभावाभ्यामल्पत्वभूमत्वोपपादनमिति वाच्यम्।

सर्वज्ञब्रह्मान्यत्वेनैव किञ्चिज्ज्ञजडयोः प्रतिपत्तेः, वस्तुपरिच्छेदतदभावाभ्यामल्पत्वभूयस्त्वोपपादनासम्भवाच्च। महत्त्वं हि भूमा अल्पत्वप्रतियोगित्वात्। तच्च वस्त्वन्तरपरिच्छेदेऽपि गगनादौ दृश्यते। दृश्यते च 'स न साधुना कर्मणा भूयानि'[1]ति कर्माधीनतया तस्यानुवादः। न च वस्त्वन्तरापरिच्छेदः कर्माधीनः तत्परिच्छेदो वेति युक्तम्।

'अन्यो ह्यन्यस्मिन् प्रतिष्ठिते'ति भेदनिषेधेनात्मनः प्रतिष्ठितत्वनिषेधादपि नाद्वैतपरता। स होवाचेत्युत्तरपरिसमाप्तिप्रतीत्या अन्यो ह्यन्यास्मिन्नित्यस्य पूर्वशेषत्वस्यास्वरसत्वेन तस्य भिन्नवाक्यत्वात्। एकवाक्यत्वेऽपि प्रथमश्रुतान्यत्वं प्रति पूर्वोपस्थितभूम्न एव प्रतियोगितयान्वयस्वारस्यात् द्वितीयान्यपदोपस्थापितस्य चरमश्रुततया प्रतिपोगितयान्वयोऽस्वरस एव।

'स एवेदं सर्वमि'ति वाक्यबलादपि नाद्वितीयपरता। स्वप्रकाशस्य भूम्नः जडस्वरूपत्वासम्भवात्। बाधार्थसामानाधिकरण्ये 'स एवास्ति इदं सर्वं नास्ति' इत्यस्तिनास्तिपदाध्याहारप्रसङ्गः।

किञ्च स एवाधस्तादित्युपक्रमे षड्भिर्वाक्यैः भेदस्यैव प्रतीतेः 'स एवेदं सर्वमि'ति न सर्वतादात्म्यपरम्। अधस्तादुपरिष्टादित्याधेयप्रधानत्वाभावेन कृत्स्नवस्त्वैक्यप्रतिपादकत्वासम्भवात्। अधस्ताद्वर्तत इत्येव हि स्वरसतः प्रतीयते। एवकारः 'स एवायं देवदत्तः' इत्यादाविव प्रत्यभिज्ञार्थः सन् उपरिष्टादित्यादावन्वेति। तस्मान्नाद्वैतपरं प्रकरणम्।

---

1. कौ.उ.3.63

किञ्च अवधिसापेक्षेण बृहत्ववाचिना भूमशब्देनोपक्रमात् तस्य जिज्ञास्यत्वाभिधानात् अधस्तादित्यादिना अन्यो ह्यन्यस्मिन् प्रतिष्ठित इति च भेदप्रतीतेश्च द्वैतपरमेवेदं प्रकरणम्।

यदुक्तं सार्वात्म्यश्रुतेरुन्मत्तप्रलापताशङ्काव्यावृत्तये अभेदोपदेशाय आत्मोपदेशः इति,

तन्न। तादृशशङ्कायास्तत्रापि सुलभत्वेन सार्वात्म्योपदेशासम्भवेन अभेदबोधनासम्भवात्। कथञ्चाभेदं बोधयन्ती श्रुतिः स्वार्थे प्रामाण्यमलभमाना स्वसमानशीलश्रुतेः स्वस्याश्चार्थमुपजीव्य प्रामाण्यं लभते।

ननु सार्वात्म्यश्रुत्या जडवन्मिथ्यात्वप्रतीतिव्यावृत्तये अभेदोपदेशः कार्यः इति चेन्न। 'श्रुतं ह्येव मे भगवद्दृशेभ्यः, तरति शोकमात्मविदि'ति वाक्यपर्यालोचनया श्रोतुः नारदस्यात्मनि सत्यत्वबुद्धेः स्फुटतरं प्रतीतेः। न हि शोकतरितुः मिथ्यात्वं कस्यापि शङ्काविषयः। आत्मनित्यत्वप्रतीतिबलादेव च त्वयोन्मत्तप्रलापतोक्ता। तथाच कुतो मिथ्यात्वशङ्कावकाशः।

किञ्चैवमात्मोपदश एवास्तु किमहङ्कारोपदेशेन। न च अहम्पदार्थात्मनोः भेदेन प्रतिपादनं प्रयोजनमिति युक्तम्। भेदप्रतिपादकपदाभावात्। न चोभयोपदेशादेव उभयोर्भेदसिद्धिः। अहम्पदादपि सार्वात्म्यानुरोधेन स्वरूपोपस्थितेरेव त्वया वाच्यतया सरूप एव भेदप्रसङ्गात्। न चाहम्पदं स्वरूपे व्युत्पन्नम्। ततश्चानित्यो घट इत्यत्र अनित्यत्वस्य घटांशे इव स्वरूपे सार्वात्म्यान्वयः उपदेशभेदादहमर्थभेदसिद्धिश्चेति वाच्यम्। चैतन्याहङ्कारोभयविशेष्यकत्वे उभयत्र सर्वगतत्वान्वयप्रसङ्गात्। अहङ्कारप्रवृत्तिनिमित्तकत्वे च परस्पराध्यासाभावप्रसङ्गः अहंशब्दसमान-विषयत्वादहम्प्रतीतेः।

ननु भूम्नस्सार्वात्म्यमुपदिश्य जीवस्य तदभेदसिद्धये तस्यापि सार्वात्म्यमुपदिदिक्षुस्तस्य सार्वात्म्योपदेशे लोकतः परिच्छिन्नतया प्रतीतस्य जीवस्य तद्बुध्यनारोहात् तदारोहाय मध्ये अहङ्कार उपदिश्यते। तदुपदेशे चाहमर्थस्य उपदेशभेदात् भेदस्य वाच्यत्वात् तस्यापि सार्वात्म्योपदेयेन स्वरूपपरत्वस्य वाच्यत्वादहमर्थोपधिक एव जीवः। न त्वहमर्थ एवेति परीक्षकाणां बुद्धिरुन्मिषतीति अहङ्कारोपदेशस्सार्थक इति चेन्न। आत्मा अहङ्कारोपाधिवशात् परिच्छिन्नतया प्रतीयते, वस्तुतः स्वरूपतो परिच्छिन्न एवेत्युपदेशे हि अभिलषितार्थलाभः स्यात्। न च तथोपदिश्यते। किन्तु त्रयाणां सार्वात्म्यमुपदिश्यते। ततश्च त्रयाणामभेदप्रसङ्गः, उपदेशभेदाद्भेदश्च त्रयाणामपि प्रसज्यते। परिच्छिन्नस्य सार्वात्म्योपदेशात् द्व्यात्मकत्वकल्पनम् आत्मोपदेशमात्रात् सम्भवतीति किमर्थोऽहङ्कारोपदेशः।

यदुक्तमुपाधिकृतपरिच्छेदव्यावृत्त्या वास्तवतादात्म्यपराहङ्कारश्रुतिः दहराकाशमहत्त्वश्रुतिवदिति, तन्न। तद्वाक्यवदिहापरिच्छेदतात्पर्यस्य अनवगमात्। सार्वात्म्योपदेशात् तदवगमस्तु आत्मोपदेशमात्रादपि सिद्ध्यति। तस्मात् भूमात्मनोः पृथगुपदेशः तयोर्भेदार्थ एव। अहमुपदेशस्तु अहङ्ग्रहणोपासनार्थः इति यथोक्त एवार्थः।

यदुक्तमहमितिकृतिः - करणं यस्मिन्निति व्युत्पत्त्या अहङ्कारशब्दो अहमर्थवाचक इति, तन्न। बहुव्रीहेरत्रासम्भवात्। अयं हि अहंशब्दोऽनुकरणं चीनितपरिमिति संज्ञितः। अतो 'गतिकारकोपपदानां कृद्भिस्सह समासवचनं प्राक्सुबुत्पत्तेरि'ति प्रागोव सुबुत्पत्तिर्भवतीत्युत्तरपदेन तत्पुरुषः। बहुव्रीहिस्तु सुबुत्पत्त्यपेक्षाविलम्बितः। किञ्च बहुव्रीहिर्जघन्यः। व्यधिकरणस्तु सुतराम्। एवमहमुपदेशस्य अहमात्मनोर्भेदतात्पर्यनिरासेन अहमर्थस्यानात्मत्वं निरस्तम्।

यदाहुः - तैत्तिरीयके 'ब्रह्मविदाप्नोति परमि'त्युपक्रम्य 'यो वेद निहितं गुहायां परमे व्योमन्नि'ति तस्य बुद्ध्यनुप्रवेशेन अहम्प्रत्यये प्रकाशमानत्वं प्रत्यक्त्वमुक्त्वा तस्य देहादिसाधारण्यात् तद्व्यावृत्त्यर्थं प्रत्यगात्मानं स्थूलसूक्ष्मसूक्ष्मतरसूक्ष्मतमोपाधिविवेकेन पञ्चकोशानवतार्य दर्शयन्ती श्रुतिः 'विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपिचे'ति श्लोकेन विज्ञानमयस्याहम्बुद्धिविषयस्याहङ्कारस्य निखिलकर्मकतृत्वमुक्त्वा तस्याविद्योपाधिमद्रूपान्तराभिप्रायेणाह - 'अन्योन्तर आत्मानन्दमय' इति। अतो न कर्ता अहमनुभवगोचर एव जीवः।

नन्वानन्दमयो न जीवः, किन्तु ब्रह्मैव, अन्नमयादिवत् आनन्दमयादन्यस्यानिर्देशात्, आनन्दमयस्यैव प्राकरणिकत्वादिति चेन्न। न हीदं प्रकारणमानन्दमये पर्यवसितम्। उपक्रमोपसंहारेषु(रयोः?) आनन्दमयाप्रतीतेः। न च 'रसं ह्येवायं लब्ध्वानन्दी भवति' इति, 'यदेष आकाश आनन्दो न स्यात्' इति च। 'अन्योन्तर आत्मानन्दमयः' इत्युपक्रान्तस्य परामर्शोऽस्तीति वाच्यम्। आनन्दप्रकृत्यर्थस्यैवाभ्यासाल्लक्षणायाश्चान्याय्यत्वात्। मम तु निर्विशेषलक्षणायामपि भागात्यागलक्षणास्वीकारेण रेवतीवाक्यगतप्रकृतधर्मिवाच्येतच्छब्दस्य धर्ममात्रपरत्व इव श्रुतित्वाहानिः। उपक्रमेऽपि आनन्दमयशब्दस्यान्नमयादिविकारप्रायपाठप्राप्त-विकारार्थस्य ब्रह्मणि वक्तुमनर्हत्वात्, आनन्दैकरसे ब्रह्मणि तत्प्राचुर्यवाचिनोऽपि मयटः प्रयोगानुपपत्तेः, प्रकृत्यर्थविरोधिनो लोकतोऽनुवृत्तावेव प्राचुर्यवाचिमयटः प्रयोगात्। यथा ब्राह्मणमयो ग्राम इति। न चाल्पत्वनिवृत्तिलक्षणया आनन्दमयशब्दः परमात्मनि भूमशब्दवदिति वाच्यम्। मनुष्यानन्दादरुत्तरोत्तरशतगुणाधिक्यप्रतिपादनेनैव ब्रह्मानन्दे तत्सिद्धेः। जीवे मुख्यार्थसम्भवे लक्षणायोगाच्च।

ननु जीवोऽपि दुःखप्रचुरः अनादिश्चेति नानन्दमय इति चेन्न, अविद्यायामानन्दात्मक-ब्रह्मप्रतिविम्बस्य जीवस्य ब्रह्माधीनाग्रिमक्षणसत्ताकतया तद्विकारत्वात्।

किञ्चानन्दमयस्य ब्रह्मत्वे ब्रह्मपुच्छं प्रतिष्ठेति निर्दिष्टं ब्रह्मपुच्छत्वं तस्यानुपपन्नम्। न ह्येकमेव पुच्छं पुच्छवच्च भवति। तस्मात् पुच्छपदेन आधारलक्षणया सर्वाधारो ब्रह्मैव वाक्यार्थः। तथाच सर्वाधारभूतं ब्रह्म अस्यानन्दमयस्य प्रतिष्ठा पर्यवसितं रूपमिति ब्रह्मैवोच्यते। तदेव ब्रह्म प्रकरणि 'ब्रह्मविदाप्नोति परमि'त्युपक्रमे। 'असन्नेवे'त्यादौ तस्यैव प्रतीतेः। अत आनन्दमयः कर्तुरहमनुभवगोचरात् अन्यो जीव एव। तथा 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः' इति

अन्तःकरणाख्याहङ्कारातिरिक्तज्योतिरात्मकजीवसरूपं दर्शयति। सूत्रकारोऽप्यहमनुभवविषयातिरिक्तजीवस्य ब्रह्माख्यरूपं न षष्ठप्रपाठकप्रतिपाद्यम्, 'स वा अयं पुरुषो जायमानः'[1] इत्यादिना जन्मजरामरणव्यवस्थावतः अहमनुभवगोचरस्यैव उपन्यास्यात् इत्याशङ्क्य, सुषुप्त्युत्क्रान्तिकालयोः 'प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद'[2], 'प्राज्ञेनात्मनान्वारूढ उत्सर्जन्याति'[3] इत्यादिना संसारिणः प्राज्ञशब्दनिर्दिष्टब्रह्माख्यस्वरूपान्तरनिर्देशात् 'योऽयं विज्ञानमय' इत्याद्यसङ्गोदासीनजीवस्वरूपम् इत्याह 'सुषुप्त्युत्क्रान्त्योर्भेदेने'[4]ति।

एवं 'तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति' इत्यत्र भोक्तारं जीवं दर्शयति।

नन्वयं मन्त्रः परमात्मन एवानशनं दर्शयति। जीवस्य तु पिप्पलं स्वाद्वत्तीति भोक्तृत्वमेव दर्शयति इति चेन्न, एवं सति 'ब्रह्म वेद ब्रह्मैव भवति' इति वाक्यशेषावगतस्य विदुषो ब्रह्मभावस्य उपक्रमगतस्य एकविज्ञानात्सर्वविज्ञानप्रतिज्ञानस्य बाधप्रसङ्गात्। भोक्तृभोक्तृभेदायोगात्। किंविषया तर्हि स्वाद्वत्तीति श्रुतिरिति चेत्, सा हि ब्रह्मस्वरूपस्य सतः जीवस्य बुद्ध्युपाधिकृतं भोक्तृत्वमनुभवसिद्धमनुवदति, स्वरूपेण एतस्यैव अभोक्तृत्वं दर्शयितुम्। अत एवायं मन्त्रः पैङ्गिरहस्यब्राह्मणे एवमेव व्याख्यातः। 'तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वमनश्नन्नन्योऽभिचाकशीतीत्यनश्नन्नन्योऽभिपश्यति ज्ञस्तावेतौ सत्त्वक्षेत्रज्ञौ' इति। ननु तत्रापि सत्त्वशब्दः जीवं क्षेत्रज्ञशब्दः परमात्मानमभिदधातीति चेन्न, 'तदेतत्सत्त्वं येन स्वप्नं पश्यति, अथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञस्तावेतौ सत्त्वक्षेत्रज्ञौ' इति सत्त्वक्षेत्रज्ञपदयोरन्तःकरणशारीरपरतया व्याख्याततत्वात्।

नन्वत्रापि स्वप्नद्रष्टृत्वतदुपद्रष्टृत्वाभ्यां जीवोशावेवोक्ताविति चेन्,। येनेति करणतृतीयान्तयच्छब्दोक्तस्य तदेतदिति परामर्शात्, जीवस्यैव स्वप्नोपद्रष्टृत्वात्। शारीर आत्मेत्यत्र जीवे प्रसिद्धे शारीरशब्देन तस्यैवाभिधेयत्वाच्चेति।

अत्रोच्यते। आसामपि श्रुतीनां न जीवाहमर्थभेदे तात्पर्यम्। तथाहि - आनन्दमयस्यैव ब्रह्मत्वेन विज्ञानमयातिरेकेण जीवस्याप्रतिपादनान्नान्तःकरणमहमर्थः। अन्नमयादिपर्यायेषु पक्षाद्यवयववतः प्राधान्यस्य अवयवानामप्राधान्यस्य च प्रतीतेः आनन्दमयस्यात्मतया प्रधानप्रतिपाद्यत्वं स्वरसतः प्रतीयमानं पुच्छब्रह्मणः प्राधान्यं प्रतिक्षिपति। अतः पुच्छब्रह्मणः प्राधान्यमवान्तरप्रकरणविरुद्धम्। 'ब्रह्मविदाप्नोति परम्' इति प्रक्रान्तस्य 'सत्यं ज्ञानमि'ति

---

1. बृ.उ.4.3.8
2. बृ.उ.4.3.21
3. बृ.उ.4.3.35
4. ब्र.सू.1.3.42

लक्षितस्य ब्रह्मणः 'आत्मन आकाशस्सम्भूतः इति कारणत्वमभिधाय तमेवात्मानं जीववैलक्षण्येन सुखेन बोधयितुं प्राणमयाद्यन्तरात्मपरम्पराम् उपदिश्यानन्दमयादनन्तरमन्योन्तर आत्मेत्यनुपदेशादन्तरात्मपरम्परामुखेन प्रतिपिपादयिषितं ब्रह्म आनन्दमय इति स्वरसतः प्रतीयते। अतो महाप्रकरणविरोधश्च।

नचैवं भूमविद्यायायामप्यात्मोपदेशस्य प्राणपर्यन्तत्वप्रसङ्गः। वागादिष्विवास्ति भगवः प्राणात् भूय इति प्रश्नस्य अदोवाव प्राणात् भूय इति प्रतिवचनस्य चादर्शनात् इति वाच्यम्। 'एष तु वातिवदति यस्सत्येनातिवदती'ति तुशब्देन प्राणातिवादिनोऽपि सत्यातिवादिनः प्रकर्षावगमात् अनुक्रान्तस्योपास्यवस्तुवादित्वलक्षणस्य वागादिष्वनुक्तस्यातिवादित्वस्य 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति'[1] इत्यनेन प्राणे प्रतिपादनात् आत्मोपदेशस्य तत्पर्यन्तत्वं मन्यमानश्शिष्योभूयो न पप्रच्छ। आचार्यस्तु प्राणमपि सातिशयं जानन् एष तु वातीवदतीत्याद्युपदिदेश। न चेह तादृश उपदेशोऽस्ति। सर्वपर्यायसाधारणपुच्छोपदेश एवान्तरात्मान्तरोपदेश इति श्रोतुमप्यपत्रपामहे। न च पुच्छपुच्छवतोरभेदायोगः। त्वन्मतेऽपि जीवब्रह्मणोरत्यन्तभेदाभावात्। कथञ्चित् भेदस्तु सिद्धान्तेऽपि समानः। आनन्दप्राचुर्यविशिष्टं प्रति धर्मस्वरूपस्य ब्रह्मत्वविशिष्टस्य वा पुच्छत्वसम्भवात्।

एतेन सर्वपर्यायसाधारणत्वेन पूर्वतनानन्दमयोपदेशशेषत्वात् 'तस्यैष एव शारीर आत्मे'त्यस्य आत्मान्तरोपदेशपरत्वं निरस्तम्।

ननु 'तस्यैष एव शारीर आत्मे'त्यत्र षष्ठ्या भेदप्रतीतेः स एव अन्तरात्मान्तरोपदेश इति चेन्न। परैरुत्तरोत्तरस्य पूर्वपूर्वशरीरत्वाभिधानात्। सिद्धान्ते यद्यपि ब्रह्मण एव सर्वत्र शारीरत्वम् इत्यपि योजनास्ति। तथापि न तेनान्तरात्मान्तरोपदेशसिद्धिः। शिरःपक्षादिमत्तया शरीरत्वेन प्रतिपादितस्य शरीराधिष्ठात्राकाङ्क्षायां 'तस्माद्वा एतस्मादात्मन' इत्यत्र तस्माद्व एतस्मादित्येतावता प्रकृतस्य ब्रह्मणः परमार्शसिद्धेः आत्मशब्दस्य सम्बन्धिशब्दत्वेन समभिव्याहृताकाशप्रभृत्यन्नमयपर्यन्ताधिष्ठातृत्वलाभार्थतया अन्नमये प्रकृतस्य तस्यैवाधिष्ठात्रात्मतया सिद्धत्वात्स एव 'यः पूर्वस्ये'त्यनूद्य प्राणमयादिशरीरेषु अधिष्ठातृत्वेन विधीयते। स एवाधिष्ठात्रधिष्ठेयभावः षष्ठ्यर्थः। शारीर इत्यत्राधिष्ठातर्येव शैषिकोऽण्। स च सम्बन्धोऽभेदेऽपि। तदधिष्ठातृत्वं हि स्वेच्छाधीनतत्प्रवृत्तिकत्वम्। अतः शारीरोपदेशेन न भेदसिद्धिः। भेदाभावे अधिष्ठातृत्वोपदेशस्य ईषत्स्वारस्येऽपि एवमेवार्थो युक्तः। शारीरोपदेशस्योपसर्जनताया अन्तरात्मोपदेशस्य प्राधान्यस्य च प्रतीतेः ।

किञ्चानन्दमयपर्यायशेषभूतस्य श्लोकस्य ब्रह्मपरत्वात् तदप्यानन्दमयस्य ब्रह्मत्वं साधयति।

---

1. छा.उ.7.15.4

तत्तत्पर्यायस्थश्लोकानान्तत्तत्पर्यायावयविपरत्वात्। (ननु?) मनोमयपर्यायश्लोके मनोमयपर्यायत्वं न दृष्टमिति चेन्न। मनसि भयनिवृत्तेः प्रतिपादनात्। प्रकारान्तरमप्युक्तमेव। न च पुच्छवाक्यश्लोकयोः ब्रह्मश्रुत्या श्लोकस्य पुच्छपरत्वम्। तदप्येष इति वाक्येन तदिति पर्यायप्रधानावयविपरामार्शिना श्लेकस्यानन्दमयविषयत्वप्रतिपादनात्। किञ्चास्मिन्नानन्दमये तस्मादनतिरिक्तानां प्रियादीनां शिरःप्रभृतित्वेन रूपणात् पुच्छेऽपि तथैव युक्तम्। 'सोऽकामयते'त्यनन्तरवाक्ये तच्छब्देन प्रकृतत्वात् ब्रह्मैव परामृश्यते। तस्य च पुल्लिङ्गान्तेन निर्देश आनन्दमयनिर्देशमपेक्ष्यैव। एवं श्रुतिस्वारस्यसिद्धमानन्दमयस्य ब्रह्मत्वं सूत्रकारोप्याह - आनन्दमयोऽभ्यासादिति[1]। आनन्दमय इत्यत्र विकारार्थे मयडिति प्रलपतो जिह्वां सूत्रकार एव लुनाति - विकारशब्दान्नेति चेन्न प्राचुर्यादि[2]ति। असम्भवि च अनादेर्जीवस्य विकारित्वम्। कथञ्चिद्विकारिसादृश्यवर्णनं वर्णनमात्रमेव। ब्रह्मणोऽप्युत्तरक्षणसत्तायाः पूर्वक्षणसत्ताधीनतया आनन्दविकारित्वं सुलभमेव। न च लेशतो दुःखान्वयप्रसङ्गः। मयटः प्रकृत्यर्थातिशयमात्रवाचित्वात्। न चातिशयः, क्वचित् समानाधिकरणविजातीयापेक्षया, यथा ब्राह्मणमयो ग्राम इति। क्वचिच्चाश्रयान्तरगतसजातीयापेक्षया, यथा तेजःप्रचुरो गभस्तिमानिति। इह दुःखसम्बन्धस्य ब्रह्मणो बाधितत्वाज्जीवगतसुखमेव प्रतियोगि। अत एव मयडभिप्रेतो जीवानन्दादुत्कर्षः आनन्दवल्ल्यां व्याख्यायते। हेत्वन्तरमप्याह सूत्रकारः - तद्धेतुव्यपदेशाच्चेति। 'को ह्येवान्यात्कः प्राणात्। यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति' इति प्रकृतमानन्दमयं पुल्लिङ्गान्तेनैतच्छब्देन परामृश्य जीवानामयमानन्दहेतुरिति व्यपदिश्यते। अतश्चानानन्दमयात् जीवादन्य एवानन्दमयः परमात्मेति विज्ञायेत इति।

एवं श्रुतिन्यायैरानन्दमयस्य ब्रह्मत्वावश्यम्भावे सत्यानन्दमयाधिकरणं दूषयतां शङ्करादिनां ब्रह्मविदाचार्यद्रोहादन्यत्किमपि प्रयोजनं न वीक्षामहे। अहो नु खलु भ्रान्तेरपर्यनुयोज्यता यल्लेशतोऽप्यहमर्थभेदगमकत्वाप्रतीतावपि तदर्थं 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिरि'ति श्रुतिमुदाहरन्ति। जीवस्य हृदयात् भेदसिद्ध्यर्थं तदुदाहरणं निष्प्रयोजनम्। तत्र कस्यापि विप्रतिपत्त्यभावात्। जीवे विज्ञानमयशब्दप्रयोगात् स्वाभिमतार्थविपरीतसाधिका चेयं श्रुतिः।

ननु विज्ञानमयशब्दोपस्थितादन्य एव अन्तर्ज्योतिशब्देन स्वप्रकाशत्वपरेणोपस्थाप्यते, विज्ञानमयस्य स्वप्रकाशत्वासम्भावात् इति चेत्, हन्त ! सम्यगुपपादितं सामानाधिकरण्यम्। विज्ञायतेऽनेनेति विज्ञानमित्यन्तःकरणार्थकेन विज्ञानपदेन तदुपहितस्वरूपलक्षणया सामानाधिकरण्यमिति चेत्, विज्ञानशब्दार्थेऽपि प्रतिपद्यमानाहमर्थात्मवादिनं प्रत्येतच्छ्रुतेरनुदा-हर्तव्यत्वात्।

1. ब्र.सू.1.1.13
2. ब्र.सू.1.1.14

वस्तुतस्तु इयं श्रुतिः ज्ञानगुणकत्वं ज्ञानात्मकत्वं चाह। 'सुषुप्त्युत्क्रान्त्योर्भेदेने'त्यत्रापि कर्तृजीवावैलक्षण्यं न प्रतिपाद्यते। जीवविलक्षणपरमात्मपरत्वमेव षष्ठप्रपाठकस्योच्यते। एतच्च पाराशर्यविजये स्पष्टमभिहितमस्माभिस्तत्रैव द्रष्टव्यम्।

'द्वा सुपर्णे'ति श्रुतिरपि न जीवस्य भोक्तृभावे प्रमाणम् आत्मपरमात्मपरत्वात् । न च तयोर्भेदे 'ब्रह्मवेद ब्रह्मैव भवती'ति श्रुतिविरोधः। न ह्यभेदो वेदनसाध्य इत्यनुन्मत्तो ब्रवीति। एवकारबलात्तत्र सादृश्यं विवक्षितमिति उक्तमेव। अतो 'निरञ्जनः परमं साम्यमुपैती'ति श्रुतिसमानमर्थतया सम्यगेव शिक्ष्यते। न चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञाऽसम्भवः। सिद्धान्त एव तत्सम्भवस्य मतान्तरे तदसम्भवस्य सद्विद्याविजये उपपादितत्वात् । पिप्पलादान्यस्य नान्तःकरणस्य (भोक्तृत्वम्, ?) तस्यैव संसारप्रसङ्गात्, किन्तु तदविच्छिन्नात्मन एव जीवस्य भोक्तृत्वमनुभवसिद्धम् इति हि त्वयाप्युच्यते। ततश्च ततोऽन्यत्वेन प्रतिपाद्यमानं ब्रह्मैव स्यात्, न तु जीवः। पैङ्गिरहस्ये सत्त्वशब्दो जीवपर एव। 'सत्त्वमस्त्री तु जन्तुषु' इत्यभिधानात्। जन्तुश्चेतनः। 'प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः' इति पाठात्। क्षेत्रज्ञोऽपीश्वर एव 'योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षत' इति मानववचनात्। शारीरोऽपि ईश्वर एव जगच्छरीरकतया तस्य श्रुतिप्रसिद्धत्वात्। अत एव ब्रह्ममीमांसायाः शारीरकत्वप्रसिद्धिरपि। उपद्रष्टृत्वमपीश्वरस्यैव जीवस्य द्रष्टृमात्रत्वात्। तदध्यक्षत्वरूपोपद्रष्टृत्वस्य ब्रह्मण्येव सम्भावात्।

यदुक्तं 'येने'ति तृतीया नोपपद्यत इति, तत्र किं 'तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वमि'त्युक्तत्वात् तत्सत्त्वात् सत्त्वान्तरमेव 'तदेतत्सत्त्वं येने'त्यत्रोपदिश्यते, उत तदेव। नाद्यः द्वा सुपर्णेत्यत्र जीवपरमात्मप्रतिपादनविरोधात्। अस्तु तर्हि द्वितीयपक्ष इत चेत्, सम्यगभ्यस्तस्त्वया वृषळोद्वाहमन्त्रः येन पिप्पलक्त एव स्वप्नदर्शनरूपे भोगे करणत्वात् न कर्तेति ब्रूषे। मनसश्च कारणत्वं तवानिष्टमेव।

यच्चेदमुच्यते। अहमर्थो नात्मा सुषुप्तिमोक्षयोरननुवर्तमानत्वात्, आत्मनश्च नित्यत्वादिति, तन्न। अहमर्थस्य सुषुप्तिमोक्षयोरनुवर्तमानत्वात्। न च सुषुप्तावनुवृत्तौ तदानीमहमर्थानुभवप्रसङ्गः, इष्टत्वात्। अत एव 'नाह खल्वयमेवं सम्प्रत्यात्मानं जानाति अयमहमस्मीति' इत्युच्यते। यदि चाहमहमर्थस्याप्रकाश एव स्यात् तदा अहमस्मीत्येव निर्दिशेत्, न 'त्वयमहमस्मी'ति। अयमिति मनुष्यत्वादिपरम्। मनुष्यत्वादिरूपेण स्वात्मानं न जानातीत्यर्थः। यथा 'कश्चिद्ध वा अस्माल्लोकात्प्रेत्य। आत्मनं वेद। अयमहमस्मीति', 'अथ यो हैवैतमग्निं सावित्रं वेद। स एवास्माल्लोकात्प्रेत्य। आत्मानं वेद। अयमहमस्मीति' इत्यादौ।

न च 'किमपि नावेदिषं मामप्यहं नावेदिषम्' इति सुप्तोत्थितपरामर्शदर्शनात् तदा अहमनुभवाभावश्शङ्कनीयः। तथा सति संविदज्ञानयोरपि प्रकाशाभावप्रसङ्गात्।

एतेन 'प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमि'[1]ति श्रुत्या सुषुप्तौ अहमर्थप्रकाश इति निरस्तम्।

न च मोक्षे अहमर्थानुवृत्तौ अज्ञानदुःखादेरनुवृत्तिप्रसङ्गः। संविदनुवृत्तावपि तथा प्रसङ्गात्।

यच्च अहंशब्दप्रत्यभिज्ञानात् अहङ्कार एवाहमर्थः इति निश्चीयते। न च क्षेत्रान्तर्भूतो भगवता परिगणितः, 'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव चे'[2]त्यारभ्य 'एतत्क्षेत्रमि'[3]ति वचनात्। 'निर्ममो निरहङ्कार'[4] इत्यादिषु च हेयतयाहमुद्दिश्यते। अतो नात्मा भवितुमर्हतीति, तन्न। बुद्धिशब्दप्रत्यभिज्ञानेन त्वदभिमतसंविदोऽपि बुद्धिपर्यायवाच्यमहत्तत्वानातिरेकप्रसङ्गात्। अध्यवसायाख्यकार्योपकरणत्वमात्रेण तत्र बुद्धिशब्द इति चेत्, तर्ह्यनात्मनि देहे अहमभिमानाख्य-कार्यकरितया तत्राप्यहङ्कारशब्द इति भाव्यम्। अभूततद्भावार्थच्वित्प्रत्यमुत्पाद्याहङ्कारपद-व्युत्पादनसम्भवात्।

यच्चेदमुच्यते - अहमनुभवविषयस्यात्मत्वे प्रतिशरीरं दुःखादिधर्मिणस्तस्य भेद आवश्यक इति गौरवम्। तदतिरिक्तस्य तु भेदे प्रमाणाभावाल्लाघवम्। न चाहमर्थस्य कल्पनागौरवम्, त्वयाप्यन्तःकरणात्मभेदस्वीकारात् । अहमनुभवगोचरस्यात्मत्वे हि विवादः। नचैवमहमनुभव-गोचरस्य ज्ञानाश्रयत्वानुभवविरोधः, ज्ञानाश्रयस्यात्मत्वनियमग्राहकप्रमाणाभावात्, आत्मग्राह्यत्वेन बुद्ध्यादीनां रूपादिवत् नात्मधर्मत्वात्। किञ्च 'मामहज्ञानामी'ति ज्ञानविषयत्वमहमर्थस्यानुभूयते। तच्च न स्वसमवेतजन्यज्ञानविषयत्वेन, निरवयवात्मनि अव्याप्यवृत्तिसंयोगासम्भवेन ज्ञानसामग्र्यभावात्। नाप्यहमर्थधर्मो नित्यज्ञानमस्ति, आत्मातिरिक्त नित्यज्ञाने प्रमाणाभावात्। न च विषयस्य स्वप्रकाशत्वं सम्भवति। किञ्च 'स्वमपीतो भवती'[5]ति सुषप्तौ लयः श्रूयते। न च ज्ञानस्यैव लयः, 'यत्रैतत्पुरुषः स्वपिति नामे'[6]ति प्रक्रान्तपुरुषप्रतियोगिकत्वात्। न च जीवस्य स्वरूपेण लयो नास्ति, प्रत्यभिज्ञाविरोधात्, कृतहानादिप्रसङ्गात्। सत्सम्पत्तिविरोधाच्च उपाधिलये जीवस्य तदभिमानिनोऽपि लयो भवति। सत्सम्पत्तिवाक्यानुसारेण पुरुषलयवाक्यस्य तथैवार्थवर्णनात् इति वाच्यम्। तटस्थोपाधेर्विलयेऽप्युपहिते लयबुद्ध्यदर्शनात् । स उपाधिर्जीवतादात्म्यापन्नो अहमनुभवगोचरः। तस्यैव लयः। अन्यथा जागर इव सुषुप्तावप्यहमाकारा धीः स्यात्। तथात्वे च अहमत्यभिमन्यमान एव 'अस्वाप्समि'ति परमर्शप्रसङ्गः तस्यानुभवनियमात्।

---

1. बृ.उ.4.4.21
2. भ.गी.13.5
3. भ.गी.13.6
4. भ.गी.2.71
5. छा.उ.6.7.1
6. छा.उ.6.7.1

जाग्रति तदनुभवतया निर्णीतचैतन्यस्य तदापि सत्त्वात्। न चानुभवस्मरणयोर्वैयधिकरण्यम्, कृतहानाकृतागमो वा। तदापि सूक्ष्मरूपान्तःकरणावच्छिन्नचैतन्यस्य सत्त्वात्। तावतैवातिप्रसङ्ग-परिहारात्।

ननु किं सूक्ष्मत्वम्? कारणात्मतापत्तिरिति चेत्, किं कारणमेव वर्तते उत कार्यमपि? आद्ये नान्तःकरणसत्त्वम्। द्वितीये न जाग्रदवस्थाविशेष इति चेन्न। सूक्ष्मतायाः अनीर्वचनीयत्वात्। न च तत्र प्रमाणाभावः। सतोऽसतो वा उत्पत्त्यनुपपत्त्या 'असद्वा इदमग्र आसीदि'[1]ति श्रुत्या च कार्यमात्रे तस्य अवश्याभ्युपेयत्वात्। अनभिव्यक्तरूपस्यैव असच्छब्दार्थत्वात् तुच्छत्वे 'आसीदि'ति विरोधादिति।

अत्रोच्यते - न तावत् भेदकल्पनागौरवम्, प्रामाणिकत्वेनादोषत्वात्। न च भेदे प्रमाणाभावः, तथा सत्यौपाधिकभेदस्याप्युत्सादप्रसङ्गात्। ततश्च कस्यचिद्वस्तुविशेषस्य प्रतिबिम्बोद्ग्राहित्वकल्पनं भेदस्य तादधीन्यकल्पनं तत्प्रतीतेर्भ्रमत्वकल्पनं द्वयोरहम्प्रतीतिविषयत्वकल्पनम् अप्रतिपन्नभेदकल्पनं चेति महदिदं गौरवम्।

यच्च ज्ञानविषयत्वात् अहमर्थस्यात्मभेदसमर्थनम्, तदपि न। अप्रयोजकत्वात्। न च ज्ञानविषयत्वासम्भवः, स्वप्रकाशमात्रात् स्वसमवेतज्ञानविषयत्वा'दहञ्ज्ञानामी'ति प्रतीत्युपपत्तेः अभेदेऽपि विषयत्वसमर्थनात्। न च ज्ञानसामग्रीविरहः। मनस्सन्निकर्षसत्त्वात्। न च संयोगात्सम्भवः। स्वरूपसम्बन्धविशेषस्य सामग्रीत्वोपपतेः। तत्संयोगस्य अव्याप्यवृत्तित्वं वा त्यज्यताम्, शाब्दप्रत्यक्षवत् सन्निकर्षाजन्यं मनोजन्यमिति वा कल्प्यताम्, नित्यमेव ज्ञानं किञ्चिदात्मगोचरम् आत्मसमवेतमिति वा कल्प्यताम्। सर्वमपि त्वत्कुसृत्यपेक्षया श्रेय एव। अहमर्थगोचरज्ञानाश्रयत्वमहमर्थस्य हि प्रतीयते। न चान्तःकरणस्य स्वगोचरवृत्त्याश्रयत्वमिष्यते। चैतन्यविषयत्वाङ्गीकारेऽपि न तस्याहमर्थाश्रयत्वसम्भवः। ततश्च अहमाकारां वृत्तिमङ्गीकृत्य तद्विषयत्वमेव प्रतीयत इति वाच्यम्। तत्र चत्वदुक्त एव दोषः सन्निकर्षाभावः।

यच्च जीवस्य सुषुप्तौ श्रूयमाणो लयः अहमभिमानगोचरोपाधिलयादेव वाच्य इति, तन्न। अहमभिमानगोचरशरीरनाशेऽपि जीवनाशाव्यपदेशात्। अतो 'नाह खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति'[2] इत्युक्तमनुष्यत्वाद्यभिमानाभावरूपज्ञानसङ्कोचावस्थाया एव लयश्रुतिविषयत्वसम्भवे अन्तःकरणस्याहमर्थत्वकल्पनासम्भवात् ।

न च 'अहमित्याभिमतिरासमि'ति परामर्शप्रसङ्गः, ज्ञानत्वस्याहन्त्वप्रकारकत्वस्य च

---

1. तै.उ.2.6.1
2. छा.उ.8.11.1

स्वरूपाप्रकाश्यत्वात् । कथमन्यथा 'ज्ञानमनुभवन्नेव अहमस्वाप्समि'ति परामर्शप्रसङ्गस्त्वया परिहार्यः । अहमर्थस्तु परामृश्यते 'अहमस्वाप्समि'ति। अतस्तत्सत्त्वमावश्यकम्।

किञ्चानुभवस्मरणयोर्वैयधिकरण्यं कृतहानाकृताभ्यागमप्रसङ्गश्च। न च सूक्ष्मरूपेण(सूक्षत्वेन?) परिहारः। तस्य सुषुप्तौ प्रकाशमानत्वे तत्स्मृतिप्रसङ्गात्, अप्रकाशमानत्वे च तदध्यासस्यैवासिद्धेः। सूक्ष्मरूपं(सूक्षत्वं?) च दुर्निरूपम्।

यदुक्तं तत् भूषणमेवेति, तत्किम् उत्पत्तिर्नानिर्वचनीया, यदुपपादनाय सूक्ष्मरूपं कल्पयसि। अनुपपादकञ्च तत्, कार्यस्यैव एतत्त्वे सत्त्वादेवोत्पत्त्यनुपपत्तिः। कार्यस्य च ततो भेदे च असत उत्पत्त्यसम्भवात् 'असद्वा इदमग्र आसीदि'ति श्रुतिः न सूक्ष्मरूपे मानम्। तस्य कार्यावस्थाप्रहाणपरत्वोपपत्तेः। अनभिव्यक्तस्वरूपमसच्छब्दार्थ इति ह्युक्तम्। तच्चोक्तार्थ एवोपपद्यते। कारणस्यावस्थाविशिष्टरूपेणाभिव्यक्त्यभावात्। तस्मात् 'स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबन्धनं हि सोम्य मन'[1] इति मनसो व्यापारोपरममात्रश्रवणात् न मनसो लयः। अतो ज्ञानसङ्कोच एव विवक्षित इति।

किञ्चाहमर्थस्यात्मभेद ईश्वरस्याहम्बुद्ध्यभावप्रसङ्गः। श्रूयते हि 'हन्ताहमिमास्तिस्रो देवता'[2] इति। स्म यते च 'अहं कृत्स्नस्य जगत'[3] इत्यादि।

किञ्च 'आत्मनञ्चेद्विजानीयादयमस्मीति पुरुषः। किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेदि'[4]ति निष्कृष्टात्मविषयं ज्ञानमहन्त्वप्रकारकतया अभिलपन्ती श्रुतिः अहमर्थस्यानात्मत्वे विरुद्ध्यते। 'आत्मन्येव न दोषाय शब्दोऽहमिति यो द्विजः। अनात्मन्यात्मविज्ञानं शब्दो वा श्रुतिलक्षण'[5] इति स्मृतिश्च। तत्र हि - दोषत्वं भ्रान्ततापादकत्वम्, उत्तरत्र भ्रान्तिलक्षण इत्युक्तत्वात्। शब्दोऽहमित्यत्र बुद्धिरपि विवक्षिता, उत्तरत्रात्मविज्ञानमित्युक्तत्वात्। न च बुद्धिरहमिति शब्दसमानविषया। अहमितिबुद्धिरेव। सैवोत्तरत्रात्मविज्ञानमिति उच्यत - इति स्वरसतः प्रतीयते।

किञ्च 'विरजा विपाम्पा भूयासम्', 'ब्रह्मलोकमभिसम्भवानी'त्यहमर्थसम्बन्धितया मुक्तिरभिलप्यते। तस्मादहमर्थ एवात्मा। अत एव द्वितीयेंशे त्रयोदशाध्याये 'शब्दोऽहमिति दोषाय नात्मन्येष तथैव तत्। अनात्मन्यात्मविज्ञानं शब्दो वा भ्रान्तिलक्षणः'[6] इति अहमिति शब्दो न दोषाय इत्युक्त्या शब्दो वा भ्रान्ति लक्षण इत्यत्रापि स एव विवक्षितः।

1. छा.उ.6.8.2
2. छा.उ.6.3.2
3. भ.गी.7.6
4. बृ.उ.4.4.12
5. ना.पु.48.76-77
6. वि.पु.2.13.86

'यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थिवसत्तम। तदैषोऽहमयञ्चान्यो वक्तुमेवमपीष्यते[1] ?' इत्यत्र परशब्दोऽन्यपरः। अन्यशब्दो वैजात्यपरः। यदि वस्तुतो मदन्यः - ज्ञानस्वरूपान्मत्तो विलक्षणः स्यात् तदानीं हि एषोऽहम् - अहं ज्ञानाकारः, अन्यः - तद्विलक्षणः अज्ञानाकार इत्यात्मा निर्देष्टुं शक्यते इत्यर्थः। ब्राह्मणत्वक्षत्रियत्वादि न आत्मवैलक्षण्यनिर्देशनिमित्तम्, ब्राह्मण्यादीनां शरीरगतत्वादिति भावः। देहात्मवैलक्षण्यस्येह प्रतिपिपादयिषितत्वात्। अत्रात्मनां स्वरूपतो वैलक्षण्ये सति 'एषोऽहम्, एतादृशोऽहम्, अयञ्चान्यः, अयमन्यादृश इति वक्तुं शक्यत इत्युक्त्या आत्मैवाहमर्थ इत्युक्तम्।

'यदा समस्तभूतेषु(देहेषु?) पुमानेको व्यवस्थितः। तदा हि को भवान् सोऽहमित्येतद्विफलं वचः?[2] एकः - एकरूपः, समस्तभूतेषु(देहेषु?) आत्मन एकरूपस्यैव विद्यमानत्वात् देवादिभेदस्य तत्रासिद्धेः, को भवान्, देवो वा ब्राह्मणो वा क्षत्रियो वा? इति वचः; सोऽहं देवोऽहं मनुष्योऽहं ब्राह्मणोऽहं क्षत्रियोऽहमिति वचः विफलमित्यर्थः। सोऽहमिति विशिष्टनिर्देशस्य विफलत्वोक्त्या अहमिति वचः सफलमिति सिद्धम्। साफल्यञ्चात्र यथार्थत्वम्। अतस्सिद्धमहमर्थस्य आत्मत्वम्।

यदप्याहुः - 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः'[3] इति श्रुतेः मनस्तादात्म्यस्यैवेह मनोयोगत्वात् 'समानः सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीवे'[4]ति श्रुतिरपि अत्र मानम्। इव शब्दस्य मिथ्यात्वद्योतकत्वात्। भगवानपि केवलात्मनि कर्तृत्वं निषेधति। 'तत्रैवं सति कर्तारमात्मानं केवलं तु यः। पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः।'[5] इति। तथा श्रीभागवते भगवद्वचनम् - 'शोकहर्षभयक्रोधलोभमोहस्पृहादयः। अहङ्कारस्य दृश्यन्ते जन्म मृत्युश्च नात्मनः?' इति।

उच्यते - शरीरेन्द्रियसाधारणयोगस्यैव मनसा सम्भवात्, न 'आत्मान्द्रिये'ति श्रुतिरत्र प्रमाणम्। 'ध्यायतीवे'त्यत्र इवशब्दोऽल्पार्थः। भुक्तिमेवेति तत् स्वहितश्चिन्तयन् न कार्त्स्न्येन चिन्तयितुं शक्नोति, स्वहितञ्चरन् न कार्त्स्न्येन चरितुं शक्नोतीत्यर्थः। 'कर्ता बोद्धा विज्ञानात्मा पुरुष'[6] इति इममेव पुरुषं प्रत्यभिज्ञाप्य कर्तृत्वादिकथनात्।

यद्वा 'तस्मादेवं विद्वान्। वीव नृत्येत्। प्रेव चरेत्'[7] इत्यत्र यथा विपृथक्तत्वे प्रचलनत्वे

---

1. वि.पु.2.13.90
2. वि.पु.2.13.91
3. क.उ.1.3.4
4. बृ.उ.4.3.7
5. भ.गी.18.16
6. प्र.उ.4.9
7. तै.ब्रा.2.5.8

सत्यपि तत्प्रयोजकत्वेनोन्मत्ते सिद्धस्योन्मादस्याभावात् इवशब्दप्रयोगः, एवमिहापि भवति। सङ्कल्पप्रयोजकस्य सत्यसङ्कल्पत्वस्य प्रवृत्तिप्रयोजकस्य अप्रतिहतशक्तित्वस्य च जिवे अभावात् इवशब्दप्रयोगः।

यद्वा 'तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपशृणोति'[1] इत्यत्र यथा प्रसिद्धवैधर्म्यात् इवप्रयोगः, एवमिहापि। वैधर्म्यं च प्रागुक्तम् अन्यप्रेर्यत्वादि। किञ्च (?) उपक्रमे 'उभौ लोकावनुसञ्चरति' इत्यभिधानेन कर्तृत्वनिषेधासम्भवात् एवमेवार्थस्य वाच्यत्वात्। 'स समानस्सन्नि'[2]ति बुद्धिवैशिष्ट्याभिधानात् सोपाधिकत्वमेव कृर्तृत्वस्य उच्यत इति चेन्न। तस्य तत्प्रतिपादकत्वासम्भवात्।

यदाह शङ्करः - समानः - सदृशः सन्, केन सन्निहितत्वात् हृदयेन, हृदीति च पुण्डरीकाकारो मांसपिण्डः, तादवस्थ्यात् बुद्धिः हृत्। किं पुनस्सामान्यम् - अश्वमहिषवद्विवेकतोऽ-नुपलब्धिः अवभास्यावभासकयोः। विवेकतोऽनुपलब्धः अप्रसिद्धः आलोको हि अवभास्येन सदृशो भवति। यथा रक्तमवभासयन् रक्तसदृशो रक्ताकारो भवति, तथापि तेन भास्यः आलोकः तत्सदृशो भवतीति (तथा बुद्धिमवभासयन् बुद्धिद्वारेण कृत्स्नं क्षेत्रमवभासयति?),

तन्न। हृच्छब्देन मांसपिण्डस्योपस्थापनात् मुख्यार्थे बाधकाभावेन लक्षणानुपपत्तेः। ततश्च न बुद्धेः सन्निधिः। तस्मात् समानः साभिमान इत्यर्थः।

यत्तु भगवानपि केवलात्मनि कर्तृत्वं निषेधतीति, तत्र अन्तःकरणतादात्म्याध्यासनिबन्धनमात्मनः कर्तृत्वमिति केवलशब्दतात्पर्यमिति न भ्रमितव्यम्। प्रकरणेनैव तद्भ्रमनिरोधात्। 'त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः'[3] इति फलसङ्गकर्तृत्वत्यागमुक्त्वा एतदेव 'यज्ञदानतपःकर्म'[4]त्यारभ्य 'यस्तु कर्मफलत्यागी'[5]त्यन्तेनोपपाद्य कृतिपरित्यागे कर्मण एवानिष्पत्तिः; नापि तद्बुद्धिपरित्यागः, विषयाधीनत्वात् बुद्धेः, तस्मिन् सति तत्त्यागायोगात् इत्याशङ्क्य स्वतन्त्रकर्तृत्वपरित्याग एवात्र विवक्षित इत्यभिप्रायेण —

**'पञ्चैतानि महाबाहो कारणानि निबोध मे।**
**साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्॥**
**अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।**
**विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्॥**

---

1. छा.उ.3.13.8
2. बृ.उ.4.3.7
3. भ.गी.18.4
4. भ.गी.18.5
5. भ.गी.18.11

**शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः।**
**न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः'॥[1]**

इति परमात्माधीनत्वमुक्तम्। साङ्ख्ये - सङ्ख्या बुद्धिः यथावस्थिततत्त्वविषया, वैदिक्या बुद्ध्या अनुसंहिते निर्णये (इत्यर्थः?)। अधिष्ठानम् - शरीरम्, अधिष्ठीयत इति 'कृत्यलुटो बहुलमि'[2]ति कर्मणि व्युत्पत्तेः। 'मघवन्मर्त्यं वा इदं शरीरमात्तं मृत्युना। तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठान'[3]मिति च वैदिक प्रयोगः। कर्ता - जीवः। करणम् - इन्द्रियाणि। विविधाश्च पृथक् चेष्टा इति पञ्चात्मा वायुरभिधीयते । एवं चतुर्णामुपादानं दृष्टान्तार्थम्, लोकसिद्धतया विधानासम्भवात्। दैवमिति विधिः। दैवं परमात्मा । 'अन्तः प्रविष्टश्शस्ता जनानाम्'[4] 'य आत्मनमन्तरो यमयति'[5] इत्युक्तं नियन्तृत्वं विवक्षितम्। एतद्विपरीतदर्शनं निषेधति 'तत्रैवं सति कर्तारमात्मानं केवलं तु यः। पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः?'[6] इति। एवं सति - परमात्माधीने कर्तृत्वे सति तत्र - कर्मणि, आत्मनम् - जीवात्मानम्, केवलं कर्तारम् - अनन्याधीनं कर्तारम् यः पश्यति स दुर्मतिः - विपरीतमतिः, अकृतबुद्धित्वात् - अनिष्पन्नयथावस्थितबुद्धित्वात्, न पश्यति - न यथावस्थितं कर्तारं पश्यतीत्यर्थः। अयं प्रकरणपर्यालेचनसिद्धोऽर्थः। तदपर्यालेचनेऽपि एवं सति - केवलमिति पदाभ्यां(पदैः?) पञ्चानां कारणत्वे सति चतुष्टयनिरप्रेक्षं जीवात्मानं कर्तारं यः पश्यतीति प्रतीयते। एवं च तात्त्विकार्थे आपातार्थे च कर्तृत्वस्य नाहङ्कारोपाधिकत्वगन्धोऽपि।

यच्च भागवतवचनम्, तत्र जन्ममृत्यू शरीरसम्बन्धवियोगावेव। न चात्मनि तन्निषेधश्शक्यः। दृश्यन्त इति च लोकसिद्धानुवादता प्रतीयते। न चाहङ्कारसम्बन्धितया लोकसिद्धोऽयमर्थः। अतः अहमिति कृतिरहङ्कारः - देहात्मभिमानः। तत्सम्बन्धित्वञ्च लोकसिद्धमेव । तत एव शोकादिदर्शनात् । एवं च 'कामोऽकार्षीन्नमो नम' इतिवत् तादधीन्यनिबन्धनोऽयं व्यपदेशः।

एवं भूमविद्यायां जीवेशभेदः प्रतिपन्नः। तैत्तिरीये 'सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चिता'[7]। 'तस्माद्वा एतस्माद्विज्ञानमयात् अन्योन्तर आत्माऽऽनन्दमयः'[8], 'रसो वै सः।

---

1. भ.गी.18.13-15
2. पा.सू.3.3.113
3. छा.उ.8.12.1
4. तै.आ.3.11.2
5. बृ.उ.माध्यन्दिनपाठः.3.7.22
6. भ.गी.18.16
7. तै.उ.1.25
8. तै.उ.1.26

रसं ह्येवायं लब्ध्वानन्दी भवति।'[1], 'एष ह्येवानन्दयाति'[2] इति। ब्रह्माभेदस्यैव मोक्षत्वे रसं लब्ध्वाऽऽनन्दी भवतीति साध्यद्वयकीर्तनम्, पौर्वापर्यम्, आनन्दाश्रयत्वं च नोपपद्येत।

यदाह नवीनः 'सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणे'त्यत्र सह श्रुतिः ब्रह्मणा सहत्वं दर्शयन्ती न भेदन्दर्शयति, ब्रह्मणः सहार्थत्वायोगात्। सहत्वं हि ब्रह्मणा 'पुत्रेण सहागतः पिते'त्यत्रेव प्रधानक्रियानुकूलतज्जातीयक्रियाकर्तृत्वेन किं वा पत्न्या इव अनुज्ञामात्रेण? नाद्यः। ब्रह्मणोऽपि भोगप्रसङ्गात् । न च द्वितीयः, ईश्वरस्य प्रणिमात्रभोगे अनुज्ञादातृत्वेन मुक्तात्तस्य विशेष्यनिर्देशवैयर्थ्यात्। ब्रह्मणस्सहत्वे 'भृत्येन सह भुङ्क्ते राजे'त्यत्र भृत्यस्येवाप्राधान्यमावश्यकमिति तस्य सर्वशेषित्वमपि भज्येत। तस्मात् ब्रह्मणस्सहत्वायोगात् न सहप्रयोगे तृतीया। नापि सर्वान् कामानिति सर्वशब्दबहुवचनाभ्यां मुक्तावात्मभेदसिद्धिः। तयोरल्पत्वनिवृत्तिमात्रपरत्वात्। तव मतेऽपि सर्वशब्दस्यासङ्कुचितवृत्तेरसम्भवात्। जगत्सर्जनादीनां जीवेषु बाधितत्वात्। पृथक् जनानां तत्र क्रमेण सर्वैः कामैः वधूपरिरम्भणादिभिर्व्यङ्ग्यं यत्सुखं तदभिप्रायेण वा सर्वान् कामानिति। तृतीया च इत्थंभावे। ब्रह्मरूपेण मुक्तः सह - युगपत् परमात्मानमनुभवतीत्यर्थः। तथाच सम्प्रति 'सोऽश्नुते सर्वान् कामानक्रमेण सुरर्षभाः। विदितब्रह्मरूपेण जीवन्मुक्तो न संशयः?'[3] इति।

अत्रोच्यते - अत्र हि भोग्यसाहित्यमेव विवक्षितम् । गुणानां मोक्षे अनुभाव्यत्वध्रौव्यार्थं प्राधान्येन निर्देशः। सहशब्दस्य यौगपद्यार्थत्वमनुपपन्नम्, तदानीं तस्य बाधितत्वात्। बहुत्वे सत्येव हि यौगपद्यसम्भवः। सहप्रयोगे जाग्रति नेत्थम्भावे तृतीया। इत्थम्भावानुपपत्तिश्च ब्रह्मविद्याविजये एवोक्ता। सर्वशब्दबहुवचनाभ्यामपि भेदस्सिध्यति। सर्वशब्दबहुवचनयोरनन्वयादेव त्वदुक्तपरहारासम्भवः।

किञ्च कामानिति काम्यमानत्वं ह्यवगम्यते। काम्यमानत्वं च नानन्दाभिव्यक्तिमात्रस्य, घटज्ञानस्यापि स्वतः काम्यत्वप्रसङ्गात् । किन्तु प्राप्ताप्राप्तविवेकेन सुखरूपवृत्तेरेव तद्विशिष्टानन्दस्य वा काम्यमानता स्यात्। ततश्च मुक्तावृत्तिप्रसङ्गेन संसारस्तदवस्थः।

सुखरूपवृत्तावानन्दाभिव्यक्तिर्भवति। घटाकारवृत्तौ चैतन्याभिव्यक्तिमात्रम्। अतः आनन्दाभिव्यक्तेरेव काम्यमानता। न चाद्वैतहानिः। स्वरूपभेदानङ्गीकारादित्यादिव्याहतभाषणानां व्याहतिरेवोत्तरम्।

सिद्धान्ते तु सर्वान्कामानिति भगवद्गुणा गृह्यन्ते, ब्रह्मणेति समभिव्याहारात्।

---

1. तै.उ.1.31
2. तै.उ.1.31
3. स्कां.पु.4.3.32(ब्रह्मगीता)

समस्तवस्तुपरिग्रहेऽपि न दोषः, कृत्स्नस्यापि वस्तुजातस्य तदीयतया मुक्तभोग्यत्वात् । सर्वश्रुतिरल्पत्वनिवृत्तिपरेत्यपि न, लक्षणाप्रसङ्गात्। किञ्च वैषयिकसुखे सुखरूपवृत्तेरपि काम्यमानत्वात् तस्येह लाभात् अल्पमेवेह प्राप्यते। किञ्च लोके यदल्पत्वकाष्ठाभूतं सुखं तत्र यत्सुखरूपमभिव्याहारात् व्यज्यते तदेवात्रेति प्रभूतवैषयिकसुखान्मोक्षसुखमल्पमेव स्यात्। प्रभूतसुखाभिव्यक्तिस्वरूपमपीहेति कथमल्पत्वमिति चेत्, स्वरूपतारतम्यासम्भवेन अल्पसुखात्प्रभूत-सुखस्यकाम्यत्वं सुखस्याल्पत्वेऽपि सुखरूपवृत्तेरुत्कर्षादेवेति। तदभावात् मुक्तौ पुरुषार्थाल्पत्वकाष्ठैव स्यादिति। एवं च स्वरूपानन्दस्यैव पुरुषार्थत्वं वदतः आनन्दवल्लीद्रोहात् अन्यत् न किञ्चित् प्रयोजनं पश्यामः। तत्र हि 'श्रोत्रियस्य चाकामहतस्ये'[1]ति निरतिशयानन्दस्य मुक्तप्राप्यत्वमुच्यते। एवं भेदश्रुतिभिर्भेदः प्रतिपन्नः।

घटकश्रुतयश्च अन्तर्यामिब्राह्मणसौबालाद्याः। तत्र हि कृत्स्नस्यापि वस्तुनः स्वरूपस्थित्यादेर्भगवदधीनत्वमवगतम्। आसां च घटकत्वं भेदाभेदश्रुत्योरविरोधेन तात्पर्यव्यञ्जनात्। आभिः खलु श्रुतिभिः वैशिष्ट्यं प्रतिपादयन्तीभिः भेदश्रुतीनां स्वरूपभेदे तात्पर्यम्, अद्वैतश्रुतीनां विशिष्टाद्वैते तात्पर्यमित्यवगम्यते। एवमाभिः श्रुतिभिरन्याभिश्च सजातीयविजातीयभेदः प्रतिपन्नः। स्वगतभेदश्च 'सत्यं ज्ञानमनन्तं ब्रह्म'[2], 'विज्ञानमानन्दं ब्रह्म'[3], 'अन्तः प्रविष्टश्शास्ता जनानाम्'[4], 'यस्सर्वज्ञस्स सर्ववित्'[5], 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे'[6]त्यादिभिः प्रतिपाद्यते। मुक्तिदशायामपि भेदश्रवणात् भेदश्रुतयो व्यावहारिकभेदविषया इति निरस्तम्। घटकश्रुतयश्च 'यस्य पृथिवी शरीरमि'[7]त्याद्याः। एवं चिदचिदीश्वरभेदे भगवतश्चिदचिद्वैशिष्ट्ये च अवगते अन्यस्यापि कस्यचित् तादृशत्वबुद्धिनिवृत्तये विशिष्टाद्वैतं प्रतिपादयन्ति अद्वैतश्रुतयः। तथाहि कठवल्ल्यां चतुर्थे खण्डे - 'यदेवेह तदमुत्र यदमुत्र तदन्विह। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति? मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन। मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति?'[8] इति। अत्र खण्डादौ 'पराञ्चि खानि व्यतृणत्स्वयम्भूस्तस्मात्पराङ् पश्यति नान्तरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृत-त्वमिच्छन्?'[9] इति जीवात्मस्वरूपं

1. तै.उ.1.32
2. तै.उ.1.25
3. बृ.उ.3.7.9
4. तै.आ.3.11.1
5. मुं.उ.1.1.9
6. श्वे.उ.6.1.8
7. बृ.उ.3.7.7
8. क.उ.2.4.10-11
9. क.उ.2.4.1

प्रतिपाद्य तमेवार्थं 'पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम्। अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते?'[1] इति विवृत्य उत्तरग्रन्थेन ब्रह्मस्वरूपं प्रतिपाद्यते। प्रतीचो ज्ञानोपायः क इत्यत्राह - 'येन रूपं रसं गन्धं शब्दान्स्पर्शांश्च मैथुनान्। एतेनैव विजानाति किमत्र परिशिष्यते। एतद्वै तदि'[2]ति। एवं विभागः प्रत्यक्पदानुसारात् कृतः। स्वयमेव हि प्रत्यक् आत्मान्तरमपि स्वापेक्षया परागेव। कृत्स्नमपि भगवत्परमेव वा, अन्तरात्मपदानुसारात् । प्रत्यक्-शब्दस्तदन्तर्यामिपरः। येन एतेनैवानन्तो जीवलोकः रूपादीन् जानाति - तदधीनो जानाति। अत्र रूपादिसकलदर्शनहेतुभूतेऽस्मिन् विद्यमाने किं परिशिष्यते - तत्प्रसादेन दुर्विज्ञेयमपि ज्ञास्यत एवेत्यर्थः। किन्तादृशं वस्त्वित्यत्राह - एतद्वैतदिति। रूपादिसकलदर्शनहेतुभूतं वस्तु तत् - 'तद्विष्णोः परमं पदमि'[3]ति पूर्वोक्तमित्यर्थः। शङ्करेणाप्येवमेव व्याख्यातम्।

'स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति। महान्तं विभुमात्मानं मत्वा धीरो न शोचति? य इदं मध्वदं वेद आत्मानं दैवमञ्जसा(जीवमन्तिकात् ?))। ईशानं भूतभव्यस्य न ततो विजुगुप्सते। एतद्वै तदि'[4]ति स्वप्नान्तं स्वप्नमध्यगतं पदार्थं जागरितान्तं जागरितमध्यगतं पदार्थमेवं पूर्वोक्तरूपादिकमेव द्वेधा विभज्य दर्शितम्। तं महान्तमित्यन्वयः। अनेन 'किमत्र परिशिष्यत' इत्येतद्विवृतम्। यो मध्वदम् - कर्मफलभोक्ता जीवः। लिङ्गव्यत्ययश्छान्दसः। इदमात्मानम् - इदंशब्देऽपि लिङ्गव्यत्ययश्छान्दसः। यद्वा मध्वदम् - निरतिशयानन्दप्रदम्। यः एवम्भूतं भूतभव्येशानं परमात्मानं वेद स ततो भूतभव्यात् न विजुगुप्सते। भगवदात्मकतया सर्वं तस्योपादेयमेवेति भावः। एतद्वैतत् - पूर्ववदेव। 'यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत। गुहां प्रविश्य तिष्ठन्तं यद्भूतेभिर्व्यपश्यत। एतद्वै तदि'[5]ति। यः - परमात्मा पूर्वम् - सर्गाद्यकाले तपसः - सङ्कल्पात् जातं चतुर्मुखम् अद्भ्यः - अबुपलक्षितभुवनेभ्यः पूर्वम् अजीजनत्। कर्णकळेबरयोगेन हृदयगुहां प्रविश्य भूतैः सह तिष्ठन्तं चतुर्मुखम् अपश्यत - भगवानेव पूर्वं चतुर्मुखं सृष्ट्वा लब्धस्वानुग्रहलब्धशक्तिविशेषेण भूतैः स्वकार्यभूतभुवनादिभिः सह तिष्ठन्तं तमपश्यदित्यर्थः। एतद्वैतत् - पूर्ववत्। 'या प्राणेन सम्भवति अदितिर्देवतामयी। गुहां प्रविश्य तिष्ठन्तीं या भूतेभिर्व्यजायत। एतद्वै तदि'[6]ति। परदेवतारूपा अदितिः - दितिर्नाशः। 'दो

---

1. क.उ.2.4.2
2. क.उ.2.4.3
3. क.उ.1.3.9
4. क.उ.2.4.4-5
5. क.उ.2.4.4-6
6. क.उ.2.4.7

अवखण्डने' इति धातोः क्तिन्। 'द्यतिस्यती'[1]त्यादिना इकारादेशः । प्राणेन जीवेन हृदयगुहां प्रविश्य तिष्ठन्ती सम्भवति। तद्द्वारा स्थूलावस्थाभाक् भवति। भूतेभिः - भूतैश्च स्थूलावस्था भाग्भवतीति विशिष्टोपादानत्वमुक्तम्। एतद्वैतदिति पूर्ववत्। 'अरण्योर्निर्हितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः। दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः। एतद्वै तदि'[2]ति। अनेन गुहां प्रविश्य स्थितौ दृष्टान्त उच्यते। अग्न्यन्तर्यामित्वं वा। गर्भिणीभिस्सुभृतो गर्भ इव अरण्योर्निहितो जातवेदश्शब्दवाच्योऽग्निः जागृवद्भिहविष्मद्भिः उपहितैः प्रशस्तसोमादिहविर्युक्तैः मनुष्येभिः - मनुष्यैः, दिवेदिवे - तत्स्वर्गादिकमुदिश्य ईड्यः। दिने दिने इत्यपरे। एतद्वैतदिति पूर्ववत्।

'यतश्चोदेति सूर्यः अस्तं यत्र च गच्छति। तं देवाः सर्वे अर्पितास्तदु नात्येति कश्चन। एतद्वै तदि'[3]ति। तद्वस्तु ब्रह्म इन्द्रादिः कोऽपि नात्येति। तदर्पिततया तन्नियाम्यत्वात्। एतद्वै तत् - पूर्ववत्।

'यदेवेह तदमुत्र यदमुत्र तदन्विह। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति? मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन। मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति? अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। ईशानं भूतभव्यस्य न ततो विजुगुप्सते। एतद्वै तदि'[4]ति। एवं सर्वप्रपञ्चाधिष्ठातृतया वर्तमानं वस्त्विदमत्र मुक्तप्राप्यम् च। यदमुत्रेति तात्पर्यातिरेकख्यापनाय। यस्त्वस्मात्प्राप्यस्य भेदं पश्यति स पुनस्संसार्येव भवति। मनसैव - ज्ञानेनैव इदं वस्त्वाप्तव्यम्। इह - प्रपञ्चे नानाभूतम् - तेन विनाभूतं किमपि स्वतन्त्रं वस्तु नास्तीत्यर्थः। यस्मिन् सूर्य उदेति यत्र चास्तङ्गच्छति तं देवाः अर्पितास्सर्वे तदु नात्येति कश्चनेत्यपृथक्सिद्धत्वावगमात्। अतो नान्यत्र कुत्रचित् तादृशत्वशङ्कावकाशः इति भावः।

यद्वा मनसैवेदमाप्तव्यमिति भगवत्प्राप्तिसाधनस्य प्रस्तुतत्वात् मोक्षसाधने ये नानात्वं पश्यन्ति कर्मणोऽन्यस्य वा साधनत्वं पश्यन्ति इति भावः। एतद्वै तत् - पूर्ववत्। एतद्वैतदित्येतदभ्यासः देवतान्तरपरत्वशङ्कानिरासाय। बृहदारण्यकेऽपि 'नेह नानास्ति किञ्चने'[5]ति वाक्यमप्युक्तार्थकम्। तत्रैव 'यस्मिन् पञ्च पञ्चजना अकाशश्च प्रतिष्ठित'[6] इत्यपृथक्सिद्धत्वावगमात्।

ईशावास्ये 'यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति। सर्वभूतेषु चात्मानं ततो न

1. पा.सू.7.4.40
2. क.उ.2.4.8
3. क.उ.2.4.9
4. क.उ.2.4.10-12
5. बृ.उ.4.4.19
6. बृ.उ.4.4.17

विजुगुप्सते? यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः?'[1] इति। यस्मिन् - यदा, तत्र - तदा, एकत्वमनुपश्यतः - सर्वव्यापकैकत्वमनुपश्यतः। सर्वव्यापकं वस्त्वन्तरं नास्तीति पश्यत इत्यर्थः।

बृहदारण्यके चतुर्थेऽध्याये चतुर्थे ब्राह्मणे 'इदं ब्रह्मेदं क्षत्रं इमे लोकाः इमे देवा इमानि भूतानि इदं सर्वं यदयमात्मे'[2]ति सर्वदेवतानाम् एतद्विभूतित्वात् नाप्यत्रैतत्तुल्यत्वशङ्कावकाश इति भावः।

तत्रैव 'यत्र हि द्वैतमिव भवति, तदितर इतरं जिघ्रति, तदितर इतरं पश्यति, तदितर इतरं शृणोति, तदितर इतरमभिवदति, तदितर इतरं मनुते, तदितर इतरं विजानाति। यत्र वा अस्य सर्वमात्मैवाभूत्, तत्केन कं जिघ्रेत्, तत्केन कं पश्येत्, तत्केन कं शृणुयात्, तत्केन कमभिवदेत्, तत्केन कं मन्वीत, तत्केन कं विजानीयात्। येनेदं सर्वं विजानाति, तं केन विजानीयात्। विज्ञातारमरे केन विजानीयादि'[3]ति। यत्र - यदा, द्वैतं भवति - द्वैतबुद्धिर्भवति - स्वतन्त्रद्वैतबुद्धिर्भवति, तत् - तदा, इतरः - स्वतन्त्रः, इतरेण - स्वतन्त्रकारणेन (करणेन ?), इतरम् - स्वतन्त्रं जिघ्रति। केनेति उत्तरत्र वक्ष्यमाणत्वादत्रेतरेणेत्यध्याहार्यम्। स्वतन्त्रोऽहं स्वतन्त्रकारणेन (करणेन?) स्वतन्त्रं वस्तु जिघ्रामीति बुद्धिर्भवतीति तात्पर्यम्। एवमुत्तरत्रापि योज्यम्। यत्र - यदा, अस्य - ज्ञातुः, सर्वमात्मैवाभूत् - तत्परतन्त्रत्वेन ज्ञातमभूत्।

इदं वाक्यमितरमिथ्यात्वपरमिति पक्षे यदा द्वैतबुद्धिर्भवति तदा इतर इतरं जिघ्रति, यदा सर्वमात्मैवेत्यद्वैतबुद्धिर्भवति तदा सर्वस्य निवृत्तेः केन कं जिघ्रेत्, करणाभावात् ज्ञेयाभावाच्चेति नार्थः, सर्वमात्मैवाभूदित्यभेदपरत्वे चिदंशे बाधात्। यदा द्वैतबुद्धिर्भवति तदा इतरोऽहमितरेणेतरं जिघ्रामीति बुद्धिर्भवति। यदा त्वद्वैतबुद्धिर्भवति तदा इतरोऽहमितरेणेतरं जिघ्रामीति बुद्धिर्न भवतीत्यपि नार्थः। 'यत्र त्वस्य सर्वमि'ति दोषतादवस्थ्यात्। अद्वैतज्ञानिनोऽपि मिथ्यात्वेन ब्रह्मणोऽन्यमेव गन्धं तथाभूतेनैव घ्राणेन जिघ्रामीति ज्ञानाच्च।

पञ्चमेऽध्याये सप्तमे ब्राह्मणे 'अदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञाते'[4]ति। अत्र 'अदृष्टो द्रष्टा' इति नान्योऽस्तीति एवं योज्यम्। अनेनान्यस्य परस्य नेषेधसिद्धेश्चिद-चिद्वैशिष्ट्यमपि नान्यस्येति फलितम्।

---

1. ई.उ.6-7
2. बृ.उ.2.4.6
3. बृ.उ.2.4.14
4. बृ.उ.3.7.27

नारायणोपनिषदि द्वितीये खण्डे 'ब्रह्मा नारायणः। शिवश्च नारायणः। शक्रश्च नारायणः। कालश्च नारायणः। दिशश्च नारायणः। विदिशश्च नारायणः। ऊर्ध्वञ्च नारायणः। अधश्च नारायणः। अन्तर्बहिश्च नारायणः। नारायण एवेदं सर्वम्। यद्भूतं यच्च भव्यम्। निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः। न द्वितीयोऽस्ति कश्चित्' इति। न द्वितीयः - एतादृशो द्वितीयो नास्तीत्यर्थः। तत्रैव 'ब्रह्मा नारायणः। शिवश्च नारायणः। शक्रश्च नारायणः। कालश्च नारायणः। दिशश्च नारायणः। विदिशश्च नारायणः। ऊर्ध्वञ्च नारायणः। मूर्तामूर्तञ्च नारायणः। अधश्च नारायणः। सर्वे मुनयो नारायणः। नारायण एवेदं सर्वम्। यच्च भूतं यच्च भव्यम्। नित्यो निर्विकल्पो निरञ्जनो निराख्यो निर्विकल्पो निरञ्जनः शुद्धो देव एको नारायणः। न द्वितीयोऽस्ति कश्चित्' इति। 'न द्वितीय' इति पूर्ववत्।

उत्तरतापनीये अष्टमेऽध्याये 'अद्वयो ह्ययमात्मा एक एवे'त्यादि। अद्वयः - स्वतुल्यद्वितीयरहितः। नवमे 'न ह्यस्ति द्वैतसिद्धिरात्मैव सिद्धोऽद्वितीय' इति। अद्वितीयशब्दश्च सदृशद्वितीयराहित्य एव स्वरसः, तत्रैव भूरिप्रयोगात्; न द्वितीयनिषेधमात्रे। तद्विवक्षायां हि द्वितीयं नेत्युच्येत। न त्वद्वितीय (अद्वयः?) इति। अन्योपसर्जनतया प्रतिपादने प्रयोजनाभावात्। तस्मान्निस्समत्वप्रतिपादनार्थमेव अद्वितीयपदप्रयोगः। एवमद्वैतश्रुतयो विशिष्टाद्वैतं प्रतिपादयन्ति।

**॥अद्वैतविद्याविजयस्य अवशिष्टो भागः स्वस्थशुद्धाक्षरमातृकायाः अनुपलम्भात् न मुद्र्यते॥**

**श्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये अद्वैतविद्याविजयः चर्तुथ समाप्तः॥**

**वाधूलश्रीनिवासार्यतनयं विनयाधिकम्। प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम्॥**
**चण्डमारुतवेदान्तविजयादिस्वसूक्तिभिः। वेदान्तरक्षकायास्तु महाचार्याय मङ्गलम्॥**

## श्रीदोड्डयाचार्यापरनामधेयश्रीमहाचार्यविरचिते वेदान्तविजये

**5**

# परिकरविजयः

**अथ क एते सन्तः**

> **'धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुं परं ध्यायति यो महात्मा।**
> **स्वरेण मन्त्रेण सदा हृदि स्थितं परात्परं यन्महतो महान्तम्।।'**

इति श्रुतिप्रतिपन्नभगवच्चिह्नलक्षिता इति ब्रूमः। तच्च भगवल्लाञ्छनधारणं श्रुतिस्मृतीतिहास-पुराणपञ्चरात्राचारेषु प्रसिद्धम्। तथाहि - शतपथे, 'अथ कात्यायनः पप्रच्छ। याज्ञवल्क्य इति होवाच – परं ब्रह्मेत्येको देवो विश्वतश्चक्षुरुत विश्वात्मा विश्वतोबाहुरुत एष पुरुषोऽन्तर्यामोऽन्तर्यामस्स विश्वतोमुखस्सर्वात्मा विश्वतस्पादिति। नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते इति। सं बाहुभ्यां नमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः। पुरुषोऽन्तर्यामोऽन्तर्यामः। स आदित्यतेजो भवति, स आदित्यलोको भवति, स विष्णुरेव भवति, स विष्णुलोको भवति। तप्तं चक्रं द्विभुजे धार्यमित्यग्निहोत्रमेव लोको भवत्यूर्ध्वपुण्ड्रमालिखेत्तस्माद्द्विरेखं भवति। भूःस्वयंभूर्ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद।।'

'अथ कात्यायनः पप्रच्छ। याज्ञवल्क्य इति होवाच – ज्ञानं वै पुरुषो ब्रह्मणो जायते ब्राह्मणो भवति, वसिष्ठः कश्यपोऽत्रिर्जमदग्निर्विश्वामित्रोऽयं व्यासः पाराशर्यस्सनकादयो देवास्स ब्रह्मलोको भवति, तप्तं चक्रं द्विभुजे धार्यमिति स विष्णुलोको भवति सोऽनन्तलोको भवति स पुण्यलोको भवति स वै पुण्यो भवति य एवं वेद।।'

'अथ कात्यायनः पप्रच्छ। याज्ञवल्क्य इति होवाच – आदित्यः पुरुषस्स आदित्यः कस्मिन् प्रतिष्ठितश्चाध्यात्मं च प्रतिष्ठितं वेद प्रति तिष्ठति, प्रजया पशुभिरस्मिन् लोकेऽमृतत्वमेति पापं हरति, सुदर्शनं धार्यमित्यूर्ध्वपुण्ड्रं द्विरेखं भवति, ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद।।'

'अथ कात्यायनः पप्रच्छ। याज्ञवल्क्य इति होवाच – आप एव यस्यायतनं हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात् सर्वस्यात्मनः परायणं नारायणं पुरुषं सर्वस्यात्मनः परायणं विष्णुरेव भवति, तप्तं चक्रं द्विभुजे धार्यमिति ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद।।'

'अथ कात्यायनः पप्रच्छ। याज्ञवल्क्य इति होवाच – इदं वै तत्पुरुषस्य परायणो भवति तप्तं चक्रं द्विभुजे धार्यमिति, इमामेव गौतमभरद्वाजावयमेव गौतमोऽयं वै भरद्वाजः, इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं जमदग्निः। इमावेव वसिष्ठकाश्यपावयमेव वसिष्ठोऽयं काश्यपो वामदेवोऽत्रिर्वाचा ह्यन्नमद्यते तद्यदत्ति तस्यैतस्य सर्वस्यात्ता भवति सर्वमस्यान्नं भवति स विष्णुरेव भवति य एवं वेद।।'

'अथ कात्यायनः पप्रच्छ। याज्ञवल्क्य इति होवाच – पृच्छामि त्वा परमं तं पृथिव्याः पृच्छामि यत्र पुरुषस्य नाभिः, ब्रह्मणो जायत इति। देवासः पितरो येन विधृतेन बाहुना सुदर्शनेन प्रयतास्स्वर्गं लोकमायन्। येनाङ्किता मनवो लोकसृष्टिं वितन्वन्ति ब्राह्मणास्तद्वहन्त्यग्निना वै होत्रा तप्तं चक्रं द्विभुजे धार्यमित्यूर्ध्वपुण्ड्रमालिखेत्तस्मात् द्विरेखं भवति पुनरागमनं न याति ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद'।।

'अथ कात्यायनेति होवाच – विष्णुरिन्द्रो वै देवा इन्द्रो वै नारायणान्नु जायते, किंदैवतोऽस्यां विष्णुदैवत इति, स विष्णुः कस्मिन् प्रतिष्ठित इतिष्ठ.रूपाणि पश्यति, कस्मिन् रूपाणि प्रतिष्ठितानीति, हृदय इति होवाच, तप्तं चक्रं द्विभुजे धार्यमिति, ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद।।'

'अथ कात्यायनेति होवाच – परमपुरुषो वै देवा मनो वै ब्रह्म मनोऽनन्तानन्तलोके निवसति तप्तं चक्रं द्विभुजे धार्यमिति ब्राह्मणास्तद्वहन्त्यग्निना वै होत्रा तप्तं तनुरित्यापोऽन्तरिक्षं समुद्रं गच्छन्त्यथापो देवास्समुद्रं गच्छन्ति यथाह वै देवा ब्राह्मणाः केशवं प्रति गच्छन्ति।।

'अथ कात्यायनेति होवाच – पुरुषश्चन्द्रमस्यादित्यः कस्मिन् प्रतिष्ठित इत्यादित्यान्तःपुरुषस्य देवस्य देवनादिगुणयुक्तस्य हिरण्यगर्भोपाध्यवच्छिन्नेति ब्राह्मणा भगवन्तो यो वः कामयते मनो वै कामं मनोऽनन्ता मनो वै ब्रह्म मनो वै विष्णुरिति ब्राह्मणा धारयन्त्यूर्ध्वपुण्ड्रं द्विरेखं भवति ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद।।'

'अथ कात्यायनेति होवाच – सर्वं तदिदं सर्वात्मनः परायणं नारायणं महाज्ञेयं विश्वात्मानं परायणमिति देवो भूत्वा देवासः पितरो विदुरित्यात्मा गुहायां निहितोऽस्य इत्यन्तर्यामो मघवन् मादयस्व स्वाहोर्वन्तरिक्षमन्वेमि स्वांकृतोऽसीति ब्रह्मणेति होवाच, तप्तं चक्रं द्विभुजे धार्यमिति, ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद।।'-इति।

तत्रैवोत्तरत्र(तथैवान्यत्र) – 'दिवस्पतेः सुविततं पवित्रं यस्य दक्षिणे न तप्यते भुजे सम्यक् तस्य शोचन्ति वै क्रियाः'(?), 'चक्रं बिभर्ति वपुषाऽभितप्तं(पुरुषो विततं?) बलं देवानाममृतस्य विष्णोः। स याति नाकं दुरिता विधूय विशन्ति यद्यतयो वीतरागा' इति।

त्रिष्वपि वेदेषु – 'पवित्रन्ते विततं ब्रह्मणस्पते। प्रभुर्गात्राणि पर्येषि विश्वतः। अतप्ततनूर्नतदामो अश्नुते। शृतास इद्वहन्तस्तत्समाशत' इति। ब्रह्मणस्पते - चतुर्मुखस्यापि नायक प्रभुस्त्वमिति

श्रुतः। विश्वतः – विश्वस्य, सार्वविभक्तिकस्तसिः। सर्वेषां गात्राणि पर्येषि। व्यापकस्य तव विततं पवित्रं चक्रमस्ति। 'पुनाति च त्रायते चेत्यतः पवित्रमि'ति एकायनब्राह्मणे निरुक्तत्वात्,'सुदर्शने च दर्भे च पवित्रं चणसूत्रके 'इति वेदनिघण्टुवचनात्—

**'सुदर्शनं सहस्त्रारं पवित्रं चरणं पविः।**
**सुदर्शनं हरेश्चक्रं पवित्रं चरणं पविः॥'** इति निघण्टुवचनाच्च।

पाद्मे च—

**'पवित्रं चरणं नेमी रथचक्रं सुदर्शनम्।**
**सहस्त्रारं प्राकृतघ्नं लोकद्वारं महौजसम्।**
**नामानि विष्णुचक्रस्य पर्यायेण निबोध मे॥'** इति।

श्रीशास्त्रेऽपि—

**'पवित्रं चरणं चक्रं लोकद्वारं सुदर्शनम्।**
**पर्यायवाचका ह्येते चक्रस्य परमात्मनः॥'** इति।

तेनातप्ततनूः - तापस्य करणसाकाङ्क्षत्वात् पवित्रपदस्य प्रथमान्ततया क्रियासाकाङ्क्षत्वाच्च तेनेत्यध्याहारेण योजना। पवित्रेण सुदर्शनेन अदग्धगात्रः अत एव आमः - अपक्वकषायः, अदग्धपाप इति यावत्; तत् - ब्रह्म, 'तदिति वा एतस्य महतो भूतस्य नाम भवति' इत्यैतरेयश्रुतेः; नाश्नुते, तत्पवित्रं वहन्तः, इत् वहन्त एव श्रृतासः - परिपक्वपापाः—

**'कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः।**
**कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते॥'**

इत्यादिवचनात्। तत् ब्रह्म समाशत - अलभन्त। अत्रातप्ततनूरित्यस्य प्रतिसम्बन्धितया वहन्त इत्युक्तेः तप्तचक्रधारणमेव गम्यते।

ननु हे ब्रह्मणस्पते ! त्वं विश्वतः सर्वाणि गात्राणि पर्येषि - समष्टिरूपतया व्यष्टिशरीराणि व्याप्नोषि। ते पवित्रम् - त्वत्सृष्टतया त्वत्सम्बन्धिपवित्रं श्रौते सोमसिद्धिहेतुभूतं वासोरूपं स्मार्ते देवतारूपं वा प्रतिष्ठारूपं वा तत्साधनहिरण्यादिरूपं वा यजमानशुद्धिहेतुभूतं विततम् - विस्तृतं व्याप्तं वा वर्तते। एतत्पवित्रनिर्वर्त्यप्रकृतकर्मसम्बन्धिना तपसा अतप्ततनूः - असंतप्तशरीरः, अत एव आमः- अपरिपक्वः असम्पादिताधिकारः प्रकृतकर्मफलं (नाश्नुते – न लभते, श्रृतासः – परिपक्वाः) सम्पादिताधिकाराः एव वहन्तः; वह प्रापण इति धातुः, प्रकृतकर्म निर्वर्तयन्तः तत् - कर्मफलं प्राप्नुवन्तीत्यर्थः।। अयञ्चार्थः - श्रौतपाञ्चरात्रविनियोगद्वयानुगुणः। 'तस्मिन् उदीचीनदिशं पवित्रं वितन्वन्ति पवित्रन्ते विततं ब्रह्मणस्पत इति वितन्यमानमभिमन्त्रयते यजमान' इति वितन्यमानदशापवित्रानुमन्त्रणे विनियोगो दृश्यते। पञ्चरात्रे चक्रप्रतिष्ठायां 'पवित्रन्ते

विततमित्येतत् मन्त्रं यजुर्मयानि'ति जपे विनियोगो दृश्यते। तत्र ब्रह्मणस्पतिशब्दः ब्राह्मणश्रेष्ठपरः। अतः पूर्वोक्तार्थोऽनुपपन्न इति चेन्न, अभिमन्त्रणविनियोगो न प्रकृतार्थप्रकाशकत्वनिबन्धनः, अभिमन्त्रणस्य प्रतिष्ठाकालीनजपवददृष्टार्थत्वात्। अतश्शब्दस्स्वरससिद्धार्थ एव ...मादयः(आदेयः?)। तत्रास्मिन्नर्थे प्रथमोपात्तः पवित्रशब्दस्तावदस्वरसः, संज्ञात्वाभावेन 'पुवस्संज्ञायामि'[1]त्यनेन प्रत्ययालाभात्, अनृषिदेवतात्वेन 'कर्तरि चर्षिदेवतयोरि'[2]त्यनेनापि तदलाभात्। ततश्च शुद्धिगुणयोगाद्दशापवित्रादौ लक्षणेति वाच्यम्। अतः प्रथमोपात्तपदे लक्षणादोषः। चतुर्मुखसृष्टत्वस्य साधारणत्वापत्तेः पवित्रमिति विशेषोक्त्यनाञ्जस्यम्। ब्रह्मणस्पते इति च 'ब्रह्मणोऽधिपतिर्यो यजुर्वेदवाच्य' इति तापनीयार्थप्रत्यभिज्ञानात् परब्रह्मातिरिक्तपरस्य ब्रह्मशब्दस्य चतुर्मुखे स्वरसत्वाच्च भगवत्येव स्वरसम्। न च 'ब्राह्मणस्पत्यां बभ्रुकर्णीमालभेत', 'ब्राह्मणस्पत्यमेकादशकपालम्' इत्यादिप्रयोगात् ब्रह्मणस्पतिशब्दो देवताविशेषे रूढ इति शक्यम्। छान्दसालुङ्मात्रेण तथा निर्देशात्। अत एव 'ब्रह्मणस्पतिमेव स्वेन भागधेयेनोपधावती' त्यत्र ब्रह्मण इति पदविभागमधीयते। किञ्च पदद्वयत्वे एव द्वैस्वर्योपपत्तिः। एकपदत्वे हि एतत्समुदायस्य वर्ज्यमानस्वरेणान्तोदात्तत्वमेव स्यात्। ब्रह्मशब्दे 'वृषादीनाञ्चे'[3]त्याद्युदात्तता न स्याद्वा। 'अस्मिन् पदे(पक्षे?) ब्रह्मशब्दो नपुंसकः। .... प्रभुरिति च सर्वाधिक एव स्वरसम्। सर्वगात्रव्याप्तिश्च सर्वव्यापिन्येव। 'अतप्ततनूरि'त्यत्र करणाकाङ्क्षायां प्रकृतस्य करणतयान्वयं विहाय तन्निर्वर्त्यप्रकृत-सम्बद्धतपःकरणकत्वकल्पनं क्लिष्टम्। तापशब्दश्चास्वरसः। तच्छब्देन ब्रह्मोपस्थापनसम्भवेऽ-प्यनुपस्थितप्रकृतकर्मफलपरामर्शोऽस्वरसः। आमशब्दस्यासम्पादिताधिकारपर-त्वञ्चासिद्धम्। 'शृतास' इत्यत्र करणाकाङ्क्षायां प्रकृतस्य पवित्रस्यैव करणत्वेनान्वयसम्भवेऽपि तन्निर्वर्त्यप्रकृतकर्मसम्बन्धितपसः करणत्वकल्पनमधिकारपरत्वञ्चास्वरसम्। 'वहन्त' इत्यत्र निरुपसर्गकस्य वहेर्निर्वर्तनपरत्वं चास्वरसम्। तत्पदस्य फलपरत्वास्वारस्यं पूर्ववत्। तस्माद्यथोक्त एवार्थः। अयमेव चार्थः 'पवित्रन्ते विततमिति मुद्रयेद्दक्षिणे भुजे' इति सनकस्मृतिविनियोगानुगुणः। अमुमेवार्थं सामवेदे मैत्रायणीयशाखायां 'पवित्रमित्यग्निः, अग्निर्वै सहस्रारः, सहस्रारो नेमिः, नेमिना तप्ततनूः ब्रह्मणस्सायुज्यं सलोकतामेति' इति श्रुतिरेव विशदीकरोति। 'पवित्रमित्यग्निरि'ति – 'पवित्रं त' इत्यत्र यत्पवित्रपदं तदनूद्य तस्याग्निसुंयुक्तपवित्रपरत्वमुच्यते। अग्निसंयुक्तस्य तदभेदेन प्रतीयमानपवित्र-सामानाधिकरण्यनिर्देशः अयो दहतीत्यादिवदिति। अनेन 'पवित्रं त' इत्यत्र तापहेतुत्वे अपेक्षितो योऽयमग्निसंयोगस्स उक्त इति मन्तव्यम्। 'अग्निर्वै सहस्रार' इति। 'अग्निरि'ति तदेकतापन्नञ्चक्रमुच्यते। 'सहस्रार' इति सहस्रारपदवाच्यत्वं 'सहस्रारो नेमिरि'ति नेमिपदवाच्यत्वम्। अत एव 'सुदर्शनं सहस्रारं चक्रं च श्रीःपविर्नेमि'' इति च निघण्टुः।

---

1. पा.सू.3.2.185
2. पा.सू.3.2.186
3. पा.सू.6.1.203

अथवा पवित्रशब्दमस्पष्टार्थं मत्वा अग्निशब्देन पवित्रशब्दार्थं 'अग्निर्वै सहस्रार' इति तद्व्याख्यायते। सहस्रारत्वस्यान्यत्रासंभव मत्वा यं प्रति पुनर्व्याख्यायते 'सहस्रारो नेमि' रिति। ननु पवित्रमित्यग्निरिति अग्न्युद्देश्येन पवित्रत्वं विधीयते सहस्रारमिति सहस्रज्वालमुच्यते 'सहस्रारो नेमिरिति नेमिवद्वचनत्वात् गार्हपत्याग्निरुच्यते नेमिना तप्ततनूर्गार्ह्यपत्याग्निना तप्ततनुः ब्रह्मणस्सायुज्यं गच्छतीत्यर्थः, किन्नस्यादिति चेन्न, अग्न्युद्देशेन पवित्रत्वविधाने इतिपदानन्वयात् इतिपदकशिरस्कतया प्रथमोपात्ततया च पवित्रपदस्यैवोद्देश्यसमर्पकत्वप्रतीतेः, सहस्रारनेमिपदयोरसामञ्स्यात्, अग्निहोत्रस्य स्वर्गसाधनत्वेऽपि तापस्य तदहेतुत्वाच्च। न हि तापोऽग्निहोत्राङ्गमिति याज्ञिकाः प्रवदन्तीति।

अथर्वणे, 'चक्रं बिभर्ति वपुषाऽभितप्तं बलं देवानाममितस्य विष्णोः स एति नाकं दुरिता विधूय विशन्ति यद्यतयो वीतरागा' इति। अमितस्य - अपरिमितस्य सर्वव्याप्तस्य, विष्णोस्सम्बन्धि देवानां वित्तभूतं अभितप्तं चक्रं यो वपुषा बिभर्ति स दुरितानि विधूय वीतरागा यतयो यत्पदं विशन्ति तन्नित्यं परमं पदं प्राप्नोतीत्यर्थः। न चात्र वपुषा स्वरूपेण तप्तं प्रकाशमानं चक्रं यो बिभर्ति पुष्णाति 'दध धारणपोषणयो' 'रिति पोषणार्थत्वस्याधीतत्वादित्यर्थो युक्तः। वपुषाऽभितप्तं बिभर्तीति पदानामन्यपरत्वात्। बृहदारण्यकभेदे 'निचिक्षेप सुषणं भिद्यमानं मध्येबाहुमदधत्सुदर्शनम्। विष्णोरिदं भूरिदं भूरितेजः प्रधर्षति दिवा नक्तं बिभृयुस्तज्जनासः।। इति। इदं सुदर्शनन्तत्सुषणं प्रधर्षतीत्यर्थः। बह्वृचे बाष्कलसंहितायाम् -

**'प्रते विष्णो अब्जचक्रे पवित्रे जनाम्भोधिं तर्तवे चर्षणीन्द्राः।**
**मूले बाह्वोर्दधतेऽन्ये पुराणाः लिङ्गान्यङ्गे तावकान्यर्पयन्ति॥'**

हे विष्णो! ते पवित्रे शङ्खचक्रे जन्माम्भोधिं तर्तवे तरितुं केचिच्चर्षणीन्द्राः - ज्ञानपरिपूर्णाः, बाह्वोर्मूले दधते। अन्ये पुराणा - ऋषयः तावकानि लिङ्गानि पञ्चायुधानि अङ्गे शरीरे अर्पयन्तीत्यर्थः। ...... न चात्र दधत इत्यस्य प्रक्षिपन्तीत्यर्थः, ततश्च भगवद्विग्रह एवायुधानि प्रक्षिपन्तीत्यर्थो युक्तः; निपूर्वत्वाभावेन प्रक्षेपार्थत्वासिद्धेः।

ऋक्सामयोः - 'चमूषच्छ्येनश्शकुनो बिभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत्। अपामूर्मिं सचमानस्समुद्रं तुरीयं धाम महिषो विवक्ती'ति। द्रप्सवत् सूक्ष्मभूतः चमूषत् - कर्मवशेन द्यावापृथिव्योः पर्यायवृत्त्या निषीदन् सञ्चरन् श्येनः – 'शंसनीयस्य गन्ता, शंसनीयं गच्छती'ति निरुक्तात्। शकुनः - आत्मोन्नयनसमर्थः, 'शक्नोत्युन्नेतुमात्मानमि'ति निरुक्तात्। गोविन्दुः - गोविन्दस्यायुधानि बिभ्रत् - बिभृयादित्यर्थः। बिभृत्वा - एवमायुधभरणं कृत्वा, छान्दसत्वात् ल्यबभावः। अपामूर्मिम् – अब्विकारभूतं समुद्रम् – समुद्रवदनन्तम्, सचमानः....... महिषः – महिष्ठः, तुरीयं धाम – उत्कृष्टं स्थानं परमपदं बिभर्ति - स्वतः प्राप्नोतीत्यर्थः।

अन्ये त्वेवं व्याचक्षते – अपामूर्मिम् - अब्विकारभूतं समुद्रम् – समुद्रवदनन्तम्, अल्पसुखञ्चेदं जगत् सचमानः - सेवमानः यो द्रप्सः- परमात्मैकदेशभूतो जीवः, गोविन्दस्यायुधानि बिभ्रद्भवति। स श्येनः शकुनं बिभृत्वा - स्वसम्बन्धिनामपि भरणसमर्थः, चमूषत् – द्यावापृथिव्योस्सुखं निषीदन् भृत्वा, महिषो – महनीयः, तुरीयं धाम - उत्कृष्टं स्थानम्, विवक्ति - सेवत इति। सचमानः - 'षच समवाय' इत्यस्माद्धातोश्शानच्। बिभृत्वा - भरणार्थात् 'डुभृञ् धारणपोषणयोरि'त्यस्माद्धातोः 'अन्येभ्योऽपि दृश्यन्त' इति क्वनिपि तुकि च रूपम्। चमूषत् - 'चम्वौ रोदसी' इति वेदनिघण्टुः। गोविन्दुः 'अनुपसर्गाल्लिम्पविन्दे'त्यादिना शप्रत्ययः। 'शेमुचादीनामि'ति नुमागमः। तृज्वद्भावःछान्दसः। महिषः – 'अविमुह्योष्टिषच्' इति टिषच्। विवक्ति - जुषत इति सेवार्थ इति नामानुक्रमणिकेयम्।

आथर्वणि 'एभिर्वयमुरुक्रमस्य चिह्नैरङ्किता लोके सुभगा भवाम (भवेम?)। तद्विष्णोः परमं पदं ये गच्छन्तीह लाञ्छिता' इति। 'य इति' तृतीयार्थे व्यत्ययेन प्रथमा। ये चिह्निताः तद्विष्णोः परमं पदं स्थानं गच्छन्ति, एभिरुरुक्रमस्य चिह्नैरङ्किता वयं तस्मिन् लोके सुभगा भवेम (इत्यर्थः?)।

यजुर्वेदे तृतीये काठके 'चरणं पवित्रं विततं पुराणम्। येन पूतस्तरति दुष्कृतानि। तेन पवित्रेण शुद्धेन पूताः। अतिपाप्मानमरातिन्तरेम। लोकस्य द्वारमर्चिमत्पवित्रम्। ज्योतिष्मद्भ्राजमानं महस्वत्। अमृतस्य धारा बहुधा दोहमानम्। चरणन्नो लोके सुधितां दधातु' इति। कथमनयोर्मन्त्रयोस्सुदर्शनपरत्वम् - चरणशब्दात्। तथाहि - अस्मिन् प्रकरणे 'तञ्चरणमब्रवीत्। प्रजापते चरणेन वैश्राम्यसी'त्यादौ चरणेनोच्यमाने वाक्ये वक्तृत्वं चरणशब्दवाच्यस्य वस्तुनः चेतनत्वम्, 'अहमु वै चरणमस्मी'त्युक्तचरणशब्दस्य तन्नामधेयत्वम्, 'मान्नुयजस्वे'ति नियोगात्तस्य देवतात्वञ्च स्पष्टमवगम्यते। तथा भट्टभास्करमिश्रेण ज्ञानयज्ञाख्ये भाष्ये एतत्प्रकरणव्याख्यानसमये 'चरणमिति देवताविशेष' इति तदनुगुणमेव व्याख्यातम्। त्रिवेदीभाष्यकारेण धानुष्कयज्वना तु 'चरणशब्दः सुदर्शनाभिधायी'ति व्याख्यातम्। पूर्वोदाहृतनैघण्टुकवचनात्, 'चरणं प्राङ्कणे चक्रे'इति निघण्टुवचनाच्च चरणशब्दस्सुदर्शनाभिधायी।

**'विष्णोर्नुकेन मन्त्रेण तापयित्वा सुदर्शनम्।**
**चरणं पवित्रमिति द्वाभ्यां तदभिमन्त्रयेत्॥**
**पवित्रन्ते विततमिति मुद्रयेद्दक्षिणे भुजे।**
**ज्ञानं वैराग्यमास्तिक्यं श्रद्धा चास्याभिवर्धते॥'**

इति महर्षिणा सनकेनापि सुदर्शनधारणे देवतासान्निध्यार्थाभिमन्त्रणे विनियुक्तत्वादनयो-स्सुदर्शनपरत्वम्।

मन्त्रार्थस्तु - चरत्यनेनेति चरणम्, सर्वेषामात्मनां यथास्थानं स्वानुरूपसञ्चरणसाधनमित्यर्थः। पवित्रम् - कर्तरिचर्षिदेवतयो'रिति पवतेः इत्रप्रत्ययः। धारयतां सकलपापनिरासकमित्यर्थः। पुराणम् – पुरातनम्। एतादृशवैभवमनादीत्यर्थः। द्वयोर्देवतावाचकत्वेऽप्यत्र पवित्रशब्दः विशेषकः, 'चरणाय चरुमि'ति चरणशब्देन देवताभिधानात्। .......... पवित्रत्वमेव विशदयति येनेति। 'येन पूत' इत्यनयोः स्वारस्यान्मन्त्रान्तरार्थानुगुण्याच्च धृतेनेत्यध्याह्रियते। पूतः - शुद्धः। दुष्कृतानि - भोगमोक्षनिरोधीनि पापानि। तरति - अतिक्रामति तैरसंस्पृष्टो भवतीत्यर्थः। एवं सुदर्शनस्य स्वाभाविकं वैभवं प्रतिपाद्य तत्फलं स्वस्मिन्नाशास्ते - तेनेति। तेन - एवं भूतेन पवित्रेण - धारयतां पापशोधकेन, शुद्धेन - स्वतश्शुद्धेन।

अनेनाग्नितीर्थजलपवनान्तरव्यावृत्तिः। पूताः - तद्धारणात्मकः सम्बन्धोऽत्राप्यभिप्रेतः। पाप्मानम् – दुष्कृतम्, अरातिम् – अभिमतविरोधिभूतम् अतितरेमेत्यन्वयः। प्रार्थने लिङ्। एवमभिमतविरोधिपापनिरासकत्वमुक्त्वा स्वाभीष्टफलप्रापकत्वमुच्यते लोकस्येति। लोकस्य - लोकवर्तिनां प्राणिनामित्यर्थः। तेषां स्वाभीष्टफलप्राप्तिद्वारा प्रापकम्, लोकस्य - परलोकस्येति वा। अर्चिमत् – अर्चिष्मत्सहस्रज्वालमित्यर्थः। ज्योतिष्मत् – ज्योतिश्शब्देनाग्निरुच्यते, संसर्गे मतुप्। अनेन पूर्वोक्तधारणकालापेक्षितो वह्निसम्बन्धः प्रतिपाद्यते। भ्राजमानम् - अत एव तत्काले भृशतरं दीप्यमानं, महस्वत् - दीप्यमानकाले परितः प्रसृतं तेजः। यद्वा महस्वत् - अरवत्। एवं, धन्वयज्वना व्याख्यातम्। अमृतस्य धाराः - पूर्वं तापत्रयतप्तं पुरुषमाप्याययितुमङ्कनसमये अमृतस्य धारा बहुधा दोहमानम्। दोहनस्य बहुविधतापत्रयशालिहेतुत्वात् बहुधात्वम्। यद्वा मोक्षस्य मार्गान् बहुधा ददद्विद्या(ददत्याः विद्यायाः)वैविध्यप्रायेण बहुवचनम्। कर्मज्ञानपरिकरभेदात् बहुविधत्वम्। चक्रं चरणम्, तस्मिन् लोके - इह लोके सुधितान् – अरातिरूपतरणात्सुधितान्, दधातु - स्थापयतु। यद्वा - लोके – परे लोके 'वैकुण्ठे तु परे लोक' इति दर्शनात्। सुधितान् – आविर्भूतनिरतिशयानन्दान्, 'सुधितवसुधितनेमधितधिष्वधिषीय च' इति निपातनात्[1]। दधातु – पूर्ववत्।

अथर्वणि 'चक्रमादायाग्नौ ताप्य ब्राह्मणस्य दक्षिणे बाहौ धारयेत्। चक्रमुपविशति। पाञ्चजन्यमादायाग्नौ ताप्य ब्राह्मणस्योत्तरबाहौ धारयेत्। ब्रह्मवादिनो वदन्ती'ति। तत्रैव 'अग्निना होत्रा चक्रं पाञ्चजन्यं प्रतप्तं द्वयोर्भुजयोर्धारयेत्। आत्मकृतमाचरेत्। आचार्यस्य सम्मुखं प्रपद्येत। तस्माद्वैकुण्ठं भवति। न पुनरागमनं सायुज्यं सलोकतामाप्नोती'ति। एतानि च वाक्यानि पञ्चरात्रे तत्तद्वेदपदेनोपादाय विनियोगात् ......(नान्यथा नेयानि?) तथाहि - पञ्चरात्रे पारमेश्वरसंहितायां प्रतिष्ठाध्याये चक्रप्रतिष्ठायाम् –

1. पा.सू. 7-4-45

**'चमूषच्छ्येन इति च प्रते विष्णो इति तृचौ ( त्वृचौ? )।**
**पाठयेत् बह्वृचान् पश्चात् सूक्तं शाकुनमेव च॥**15.980।।
**धृतोर्ध्वपुण्ड्रः कृतचक्रेति मन्त्रं ततः परम्।**
**पवित्रन्ते विततमित्येतन्मन्त्रं यजुर्मयान्॥15.981॥**
**क्षुरो हरेतिसामज्ञान् पवित्रमित्यग्निरित्यपि।**
**एभिर्वयमुरुक्रमस्येत्याथर्वणविदो जनान्** (इत्याथर्वणान् द्विजान्?)।।15.982।।ल इति।

तत्रैव स्नपनकलशविनियोगावसरे—

**धृतोर्ध्वपुण्ड्र इति च यातुधानगतेन वै।**
**दक्षिणे तु भुजे विप्र इति पश्चिमगेन वै।**
**विष्णुनात्त( क्त? )मश्नन्तीति वायुदिक्संस्थितेन तु॥15.986।**।इति।
**तत्रैवोत्सवाध्याये दमनकोत्सवस्नपने,**
**धृतोर्ध्वपुण्ड्रः परमेति याम्यदिक्संस्थितेन तु॥17.577॥**
**दक्षिणे तु भुजे विप्र इति यातुगतेन वै।**
**विष्णुनात्त( क्त? )मश्नन्तीति वारुणीदिक्संस्थितेन तु।।17.578॥**
**पुंप्रधानेश्वरो विष्णुरिति वायुगतेन वै।**
**य इमां महोपनिषदमिति सोमगतेन तु॥17.579॥**
**ओमिति प्रथमं नाम इतीशानगतेन तु।**
**पुरुषोऽहं वै वासुदेव इति मध्यगतेन तु॥17.580॥**

तत्रैव रक्षार्थे चूर्णस्नपने—

**दक्षिणे तु भुजे विप्र इति प्राक्संस्थितेन तु॥17.585॥**
**निचिक्षेप( निचिकिद्वा? ) सुषणमिति वह्निगतेन तु।**
**प्रते विष्णो अब्जचक्रे इति याम्यगतेन तु॥586॥**
**एभिर्वयमुरुक्रमस्येति यातुगतेन तु।**
**धृतोर्ध्वपुण्ड्रः कृतचक्रेति पश्चिमाशागतेन तु॥587॥**
**पवित्रमित्यग्निरिति ( ततो ) वायुगतेन तु।**
**चरणं पवित्रं विततमिति सोमगतेन तु॥588॥**
**लोकस्य द्वारमर्चिमदिति रुद्रगतेन तु।**
**मन्त्रैरेतैस्तु चाष्टाभिरन्यैस्सौदर्शनैस्तथा॥589॥**
**संस्नाप्य मध्यकुम्भेन शुद्धोदैरभिषिच्य च॥590॥ इति।**

तथा पाद्मोत्तरे सुदर्शनसमाराधनाध्याये—

**एवं प्रासादशिखरे चक्रं संस्थापयेत् बुधः।**
**द्वादशारमथाष्टारं षडरं वा महामते॥**
**संस्थाप्य विधिवत् पश्चात् कुम्भैर्द्वादशभिः क्रमात्।**
**दक्षिणे तु भुजे विप्र इति क्षीरेण सेचयेत्॥**
**निचिक्षेप सुषणमिति दध्ना स्नापयेत् ततः।**
**प्रते विष्णो इत्यनेन घृतेन ह्यभिषेचयेत्॥**
**एभिर्वयमुरुक्रमस्येति मधुना स्नापयेत् बुधः।**
**धृतोर्ध्वपुण्ड्रः कृतचक्रेत्यैक्षवेण रसेन तु।**
**पवित्रमित्यग्निरिति पञ्चगव्येन सेचयेत्। इति।**

(एवं?) सूक्तस्यान्यत्राप्युपादानं दृष्टम्। यथा श्रीविष्णुतत्त्वे —

**दिव्यान्तरिक्षभौमानामुत्पातानां प्रशान्तये।**
**प्रत्यृचं जुहुयादाज्यं पुंसूक्तेन शतं शतम्॥**
**सर्वस्य वशिनेत्याद्यैः चतुर्भिश्च शतं दधि।**
**दक्षिणे तु भुजेत्याद्यैश्चतुर्भिश्चापि तण्डुलैः।** इति।

तथान्यत्र

**प्रत्यङ्गिरं शिखाशीर्षं ब्रह्मसूक्तं तथैव च।**
**वैष्णवं पौरुषश्चैवमन्यान् मङ्गलवाचकान्॥ इति।**

ब्रह्मसूक्तमिति 'सर्वस्य वशिने'त्यादिकमष्टर्चमुच्यते। अतो नानाप्रदेशेषूपात्तानां येषां मन्त्राणां प्रसुग्मन्तादिमन्त्रवत् श्रुतित्वमसन्दिग्धमखिलानामप्येतेषां मन्त्राणां घृतायुष्यादिसूक्तवत् तत्तत्सम्प्रदायात्पूर्वपाठसिद्धिः।।

पाद्मोत्तरखण्डे त्रिंशेऽध्याये—

**सर्वाश्रमेषु वसतां ब्राह्मणानां विशेषतः।**
**विधिना वैष्णवं चक्रं धार्यं हि श्रुतिचोदनात्॥**
**दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम्।**
**सव्ये तु शङ्खं बिभृयात् इति ब्रह्मविदो विदुः॥**
**एवं महोपनिषदि प्रोक्तश्चक्रादिधारणम्।**
**तथैव साम्नि यजुषि ऋचि चोक्तं शुभानने॥**
**प्रते विष्णो अब्जचक्रे पवित्रे जन्माम्भोधिन्तर्तवे चर्षणीन्द्राः।**
**मूले बाह्वोर्दधतेऽन्ये पुराणाः लिङ्गान्यङ्गे तावकान्यर्पयन्ति॥**

चरणं पवित्रं विततं पुराणं वाङ्मयं शुभम्।
तेन चक्रेण सन्तप्तास्तरेयुः पातकाम्बुधिम्॥
पवित्रं ब्राह्मणस्पत्यं जगद्व्याप्तं हरेस्सदा।
तेनातप्ता तनूर्येषां ते न यान्ति हरेः पदम्॥
पवित्रं चरणं नेमिरिति चक्रं सुदर्शनम्।
सहस्त्रारं प्राकृतघ्नं लोकद्वारं महौजसम्।
नामानि विष्णुचक्रस्य पर्यायेण निबोध मे॥
शुद्धेन तेन तप्तेन ब्रह्म तेन पुनीहि नः।
यत्ते पवित्रमर्चिषि अग्ने तेन पुनीहि नः॥
तस्माद्वै विधिवद्धार्याश्शङ्खचक्रादिहेतयः।
ब्राह्मणानां विशेषेण वैष्णवानां विशेषतः॥
ऊर्ध्वपुण्ड्रन्तथा चक्रन्नित्यं धारयते नरः।
उपवीतं शिखाबन्धं चक्रं लाञ्छनसंयुतम्॥ इत्यादि।

शङ्खस्मृतौ—

उपवीतादिवद्धार्याः शङ्खचक्रादयस्सदा।
ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः॥

वृद्धपराशरस्मृतौ—

अग्निनैव तु संयुक्तं चक्रमादाय वैष्णवम्।
दाहयित्वा स्ववर्णानां हरिसालोक्यसिद्धये॥

हारीतस्मृतौ च—

प्रतप्तशङ्खचक्रादिहेतिभिर्मन्त्रमुच्चरन्।
( प्रतपेत् चक्रशङ्खौ द्वौ हेतिभिर्मन्त्रमुच्चरन्? )॥
दक्षिणे तु भुजे चक्रं वामांसे शङ्खमेव च।
गदाञ्च भालमध्ये तु हृदये नन्दकं तथा॥
मस्तके तु तथा शार्ङ्गमङ्कयेद्विमलं तदा।
एवं तापक्रिया कार्या वैष्णवी कलुषापहा॥
प्रधानं वैष्णवं तत्र तापसंस्कारमुत्तमम्।
तापसंस्कारमात्रेण परां सिद्धिमवाप्नुयात्॥

केचित्तु शङ्खचक्रे द्वे प्रतप्ते बाहुमूलयोः।
धारयन्ति महात्मानः चक्रमेकं तु चापरे॥
वैष्णवानान्तु हेतीनां प्रधानञ्चक्रमुच्यते।
तेनैव बाहुमूले तु प्रतप्तेनाङ्कयेत् बुधः॥
अनङ्कयित्वा चक्रेण यत्किञ्चित्कर्म सञ्चरेत्।
तत्सर्वं याति वैकल्यमिष्टापूर्तादिकं नृप॥
अचक्रधारी विप्रस्तु सर्वकर्मसु गर्हितः।
अवैष्णवत्वमापन्नो नरकं चैव गच्छति॥
चक्रादिचिह्नरहितं प्राकृतं कलुषान्वितम्।
अवैष्णवं तु तं दूरात् श्वपाकमिव सन्त्यजेत्॥
तस्माच्चक्रं विधानेन तप्तं वै धारयेत् द्विजः।
सर्वाश्रमेषु वसतां नृणाञ्च श्रुतिचोदनात्॥
अनायुधासो असुरा अदेवा इति वै श्रुतिः।
चक्रेण तामपवप इत्यृचा समुदाहृतम्॥
अपेत्थमङ्कमित्युक्तं वपेति श्रवणं तदा।
तस्माद्वै तप्तचक्रस्य चाङ्कनं मुनिभिस्स्मृतम् (श्रुतम्?॥
पवित्रं विततं ब्राह्मं प्रभोर्गात्रे तु धारितम्।
श्रुत्यैव चाङ्कयेत् गात्रे तद्ब्रह्मसमवाप्तये॥
यत्ते पवित्रमर्चिष्यमग्नेर्वीतमनन्तरा।
ब्रह्मेति निहतं नैव ब्रह्मणः श्रुतिबृंहितम्॥
पवित्रमिति चैवाग्निरग्निर्वै चक्रमुच्यते।
अग्निरेव सहस्रारः सहस्रा नेमिरुच्यते॥
नेमितप्ततनुस्सूर्यो ब्रह्मणा समतां व्रजन्।
'ब्रह्मणस्सायुज्यं सलोकतामाप्नोती'ति श्रुतिः।
यत्ते पवित्रमर्चिष्यमग्ने तेन पुनीमहि।
दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम्॥
वामे तु शङ्खं बिभृयादिति ब्रह्मविदो विदुः।
इत्यादिश्रुतिभिः प्रोक्तं विष्णोश्चक्रस्य धारणम्॥

**पुराणेष्वितिहासेषु सात्त्विकेषु स्मृतिष्वपि।**

**ललाटे तु गदा धार्या मूर्ध्नि चापस्ततःपरम्॥**

**नन्दकश्चैव हृन्मध्ये शङ्खचक्रे भुजद्वये।**

विष्णुधर्मे यमकिङ्करसंवादे—

**भवतां भ्रमतामत्र विष्णुसंश्रयमुद्रया।**

**विनाऽऽज्ञाभङ्गकृन्नैव भविष्यति नरः क्वचित्॥** इति।

विष्णुस्मृतौ—

**यथा श्मशानगं काष्ठमनर्हं सर्वकर्मसु।**

**तथाऽचक्राङ्कितो विप्रस्सर्वकर्मबहिष्कृतः॥** इति।

अत्र अचक्राङ्कित इतिच्छेदः।

श्रीमहाभारते—

**ब्राह्मणैः क्षत्रियैर्वैश्यैश्शूद्रैश्च कृतलक्षणैः।**

**अर्चनीयश्च सेव्यश्च नित्ययुक्तैस्स्वकर्मभिः॥**

**सात्वतं विधिमास्थाय गीतस्सङ्कर्षणेन यः।**

अत्र सात्वतं विधिमास्थायेत्युक्त्वा तत्र भगवल्लाञ्छनधारणस्य भूरिशः प्रतिपादनात् कृतलक्षणशब्दश्चक्रादिधारणपर इति अवगन्तव्यम्। अनेन 'ब्राह्मणाः क्षत्रियाः वैश्याश्शूद्राश्च कृतलक्षणाः। कृते युगे समभवन्नि'ति आरण्यपर्ववचनं विवृतम्।

भारत एव—

**नान्यदेवं नमस्कुर्यात् नान्यं देवं निरीक्षयेत्।**

**चक्राङ्कितस्सदा तिष्ठेत् मद्भक्तः पाण्डुनन्दन॥** इति।

पाद्मे नारदः—

**एवमुक्त्वा विधातारं देवदेवो हरिः पिता।**

**स्वचक्रेणाङ्कयित्वा तं तस्य मन्त्रमदात्स्वयम्॥**

**सर्वलोकेश्वरो देवो ब्रह्मा मम पिता प्रभुः।**

**ममापि विधिवन्मन्त्रं प्रददौ मुनिसत्तमाः।**

**तस्माद्यूयं मुनिश्रेष्ठाः धारयध्वं सुदर्शनम्॥** इति।

तत्रैव—

**शङ्खं वा शङ्खचक्रे वा तथा पञ्चायुधानि वा।**
**धारयित्वैव विधिवत् ब्रह्मकर्म समारभेत्।।** इति।
**सुदर्शनं धारयित्वा वह्नितप्तं द्विजोत्तमाः।**
**उपनीय विधानेन पश्चात्कर्मसु योजयेत्।**
**दद्याद्गोभूहिरण्यादि चक्राङ्कितभुजाय वै।।** इति।

**वैष्णवत्वस्य सिद्ध्यर्थं ज्ञानसिद्ध्यै विशेषतः।**
**प्रतपेच्छङ्खचक्राभ्यां हुत्वा होमं विधानतः।**
**अन्यैर्न दाहयेद्गात्रं ब्राह्मणो हरिलाञ्छनात्।**
**शङ्खचक्रगदाखड्गशार्ङ्गादन्यैर्हरेरपि।**
**न लक्षणैर्दहेदङ्गं नान्यदग्धैर्हतिक्रियाम्।**
**अचक्रधारिणं विप्रं दूरतः परिवर्जयेत्।**इति।

तत्रैव—

**धारयेद्विष्णुभक्तस्तु चक्रं बाहौ तु दक्षिणे।**
**वामे तु शङ्खं राजानं धारयेद्विष्णुमाप्नुयात्।**
**चक्रेणैवाङ्कितो विद्वान् वासुदेवं समाश्रयेत्।**
**भावभक्तिं समास्थाय ब्रह्मलोकं प्रयास्यति।** इति।

आग्नेये—

**पञ्चायुधानि धार्याणि भक्तिश्रद्धोपबृंहितैः।**
**ललाटे मूर्ध्नि हृद्बाह्वोरेकैकञ्च पृथक् पृथक्।।**
**ललाटे तु गदा धार्या मूर्ध्नि चापस्ततः परम्।**
**नन्दकञ्चैव हृन्मध्ये शङ्खचक्रे भुजद्वये।।**
**यथा च विधिवत्कृत्वा पञ्चायुधविधानतः।**
**तत्तन्मन्त्रेण मन्त्रज्ञः प्रतिष्ठाप्य पृथक् पृथक्।।**
**अग्निमध्ये समारोप्य विधिवत्पूजयेत्ततः।**
**अङ्कयेद्विधिवत्सर्वानप्रमत्तस्समाहितः।।**
**वर्णाश्रमेषु निष्ठानामन्येषाञ्च विशेषतः।**
**कर्तव्यं भगवद्भक्तैर्नित्यैर्मुक्तैश्च योगिभिः।।**

श्रीवाराहे—

मच्चक्राङ्कितदेहो यो मद्भक्तो भुवि दुर्लभः।
मामुपेष्यति धर्मात्मा मदेकान्तेन चेतसा॥
चक्राङ्कितभुजाः केचित् यत्र कुत्र वसन्ति वै।
योजनानि तथा त्रीणि मम क्षेत्रं वसुन्धरे॥
ये केचिदत्र पुरुषाः विष्णुचक्राङ्कमुद्रिताः।
तेषां दर्शनमात्रेण महापातकनाशनम्॥
भूतप्रेतपिशाचाश्च डाकिन्यश्च वसुन्धरे।
सर्वं तत्र शमं याति यत्र चक्राङ्कितो वसेत्॥

तत्रैव—

वासुदेवाङ्कनं कुर्यादात्मनो बाहुमूलयोः।
सोऽश्वमेधफलं प्राप्य विष्णुलोके महीयते।

लैङ्गे—

अष्टाक्षरविदस्सर्वे विष्णुचक्राङ्किताास्तदा।
श्रावका वासुदेवस्य तथैव नटनर्तकाः।
अन्ये च वैष्णवास्तत्र सर्वे चक्रेण लाञ्छिताः।

तत्रैव—

निर्मलाङ्गा दयायुक्ताश्शुक्लदन्ता धृतव्रताः।
अङ्किताश्चैव चक्रेण देवदेवस्य चक्रिणः॥ इति।

वामने—

लीलयापि लिखेद्यस्तु बाहुमूले सुदर्शनम्।
कुलकोटिं समुद्धृत्य स गच्छेत्परमं पदम्॥

स्कान्दे—

येषां चक्राङ्कितं गात्रं लोकेषु परिदृश्यते।
ते वै स्वर्गस्य नेतारो ब्राह्मणा भुवि देवताः॥

स्कान्दे काशीखण्डे—

शङ्खचक्राङ्किततनु........मञ्जरीधरः।
गोपीचन्दनलिप्ताङ्गस्सुदृष्टश्चेदघं कुतः।

मात्स्ये -

**शङ्खचक्राङ्कनं कुर्यादात्मनो बाहमूलयोः**
**कलत्रापत्यभृत्येषु पश्वादिषु विमुक्तये॥**
**मच्चक्राङ्कितदेहो यो मद्भक्तो भुवि दुर्लभः।**
**नैवाप्नोति वशं मृत्योरप्याज्ञाभङ्गकृन्नरः।**

तत्रैव—

**विष्णुचक्राङ्कितं देहं पवित्रमिति वै श्रुतिः।**
**धारयेद्विष्णुभक्तस्तु चक्रं बाहौ तु दक्षिणे।**
**वामे तु शङ्खराजानं वैष्णवं पदमाप्नुयात्॥** इति

गारुडे—

**विष्वक्सेनः स्वयं चक्रमादायात्मविभूषणम्।**
**प्रयच्छति महातेजा हरिभक्तानुकम्पया॥**
**विष्णुचक्राङ्कितं गात्रं पवित्रमिति वै श्रुतिः।**
**चक्राङ्किताय दातव्यं हव्यं कव्यं द्विजोत्तमैः॥**

तत्रैव—

**अग्निनैव तु सन्तप्तं चक्रमादाय वैष्णवः।**
**दाहयेत्सद्य एवाङ्गं हरिसालोक्यसिद्धये॥**

कौर्मे—

**चक्रादिधारणं पुंसां परसम्बन्धभे( वे? )दनम्।**
**पातिव्रत्यनिमित्तं हि वलयादिविभूषणम्॥**
**चक्राङ्कितधराः केचित्केचिच्छङ्खधरास्तथा।**
**शङ्खचक्रधराः केचित् कुले विष्णुपरिग्रहाः॥इति**

वायव्ये—

**उपवीतादिवद्धार्याश्शङ्खचक्रादयस्तथा।**
**ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः॥**

आदित्यपुराणे—

**चक्रादि धारयेद्विप्रो ललाटे मस्तके भुजे।**
**पातकादिविशुद्ध्यर्थं भवक्लेशविनाशनम्॥**

विहगेशेशनामाङ्काःशङ्खचक्राङ्किता नराः।
निश्शङ्काश्च निरातङ्कास्ते सङ्कर्षणकिङ्कराः।

ब्रह्मवैवर्ते—

चक्राङ्कितभुजं विप्रं यो निन्दयति सर्वदा।
स याति नरकं घोरं यावदाभूतसंप्लवम्॥

भविष्यत्पुराणे—

चक्राङ्कितभुजं दृष्ट्वा यस्तु तन्नाभिवादयेत्।
तिर्यग्योनिशतं प्राप्य विष्ठायां जायते क्रिमिः॥

मार्कण्डेये—

शङ्खचक्राङ्कनं कुर्यादात्मनो बाहुमूलयोः।
सोऽश्वमेधशतं प्राप्य परं निर्वाणमृच्छति।
तद्धारणान्महापापैः मुच्यते नात्रसंशयः॥

ब्राह्मे—

शरीरं दृश्यते यस्य कृष्णचक्रेण लाञ्छितम्।
गङ्गाजलमहं मन्ये देहन्तत्पापवर्जितम्॥ इति।

तत्रैव—

ऊर्ध्वपुण्ड्रं शिखाबन्धञ्चक्रलाञ्छनसंयुतम्।
चक्रलाञ्छनहीनस्य विप्रस्य विफलं भवेत्।
यो नरो मम भक्तस्तु दिव्यं चिह्नन्तु धारयेत्।
श्वपाको वा विमानस्थो मम लोकमवाप्नुयात्॥

श्रीभागवते—

चक्राङ्कितस्य सान्निध्ये तपःकुर्यात्प्रयत्नतः।
स्नानं दानं जपो होमस्तत्सर्वञ्चाक्षयं भवेत्॥
संवत्सरेण यत्पापं मनसा कर्मणा कृतम्।
तत्सर्वं नश्यते तेषां सकृच्छक्राङ्कदर्शनात्॥
ज्वरदाहभयञ्चैव चोरादिजभयं तथा।
सर्वं तत्प्रशमं याति यत्र चक्राङ्कितो वसेत्।

शिवपुराणे—

**श्रावकं वासुदेवस्य तथैव नटनर्तकाः।**
**अन्ये च वैष्णवस्तत्र सर्वे चक्रेण लाञ्छिताः॥**
**बृह्मितेत्यनेकत्र( ? ) प्रतिपादितम्।**

तत्रैव विष्णुरहस्ये प्रथमाध्याये—

**वैष्णवा मुनयस्सर्वे विष्णुचक्रेण लाञ्छिताः।**
**ध्यानिनो योगनिरताः सदा विष्णुपरायणाः॥**

तस्मिन्नेव ब्रह्मनारदसंवादे—

**सुदर्शनेन यस्याङ्गं लाञ्छितन्तु भवेत्सदा।**
**देहे तस्य वसेन्नित्यं श्रिया युक्तस्स्वयं हरिः॥**
**कृष्णायुधाङ्कितं दृष्ट्वा यमोऽपि हृदि शङ्कितः।**

तथैव ब्रह्माण्डे—

**नारायणायुधैर्नित्यं चिह्नितो यस्य विग्रहः।**
**पापकोटिशतं दग्धं तस्मिन्दृष्टे भवेत्सदा॥**

तथैव मोक्षधर्मे—

**सगोत्रमपि यः श्राद्धे चक्राङ्कितभुजं वरेत्।**
**स साक्षाद्विष्णुसामीप्यं मृतःप्रपितृको लभेत्॥**
**अष्टमे मासिके वापि चक्राङ्कितभुजं वरेत्।**
**रौरवात्कुलमुद्धत्य ब्रह्मलोके महीयते॥**
**चक्राङ्किताय विप्राय स्वभक्त्यान्नं ददाति यः।**
**अन्नसङ्ख्यानि वर्षाणि ब्रह्मलोके महीयते॥**
**अभ्यञ्जनादिभुक्त्यन्तं यः करोति समाहितः।**
**चक्राङ्किताय विप्राय विष्णुसायुज्यमाप्नुयात्।**
**विष्णुभक्ताय विप्राय चक्रचिह्नाय मानवः।**
**गोचर्ममात्रां भूमिञ्च दत्वा राज्यमवाप्नुयात्॥**
**चक्राङ्किताय विप्राय कन्यादानङ्करोति यः।**
**परमानन्दमाप्नोति तद्विष्णोः परमं पदम्॥**

चक्राङ्किताय विप्राय विष्णुभक्ताय धीमते।
भिक्षामात्रप्रदानेन वैष्णवीं गतिमाप्नुयात्॥
चक्राङ्किताय विप्राय महादेव..............।
चक्रमात्रप्रदानेन मुक्तिं यान्ति हि सूरयः॥
यज्ञो दानं जपो होमः भोजनं पितृतर्पणम्।
चक्रलाञ्छनहीनस्य विप्रस्य विफलं भवेत्॥
शङ्खचक्राङ्कितान् विप्रान् यः पूजयति मानवः।
स साक्षाद्विष्णुसामीप्यं लभते नात्र संशयः॥
विष्णुचक्राङ्कितं विप्रं यो यो भूम्याऽभिवादयेत्।
ललाटपांसुसङ्ख्यानि ब्रह्मलोके महीयते॥
विष्णुचक्राङ्कितं दृष्ट्वा योऽभ्युत्थाय कृताञ्जलिः।
स्वकीयं कुलमुद्धृत्य ब्रह्मलोके महीयते॥
चक्राङ्कितभुजा यस्मिन् पङ्क्तिमध्ये तु भुञ्जते।
सा पङ्क्तिस्स्वर्गलोकेषु देवपङ्क्तिषु युज्यते॥
शङ्खचक्राङ्कितं विप्रं दृष्ट्वा यो ह्युद्यतो भवेत्।
परमानन्दमाप्नोति किम्पुनस्त्वैहिकं फलम्॥
ये केचिद्यत्र पुरुषाः विष्णुचक्रेण मुद्रिताः।
तेषां दर्शनमात्रेण महापातकनाशनम्॥
चक्राङ्कितस्य नामानि यो वदेद्भक्तिमान्नरः।
सर्वपातकनिर्मुक्तस्स याति परमं पदम्॥
अग्नितप्तेन चक्रेण बाहुमूले तु लाञ्छिताः।
सर्वपापानि सन्तीर्य भविष्यन्तीश्वरोपमाः॥
वह्नितप्तेन चक्रेण बाहुमूले तु लाञ्छिताः।
रौरवाद्वंशमुद्धृत्य यान्ति विष्णोः परं पदम्॥
विष्णुचक्राङ्किता यत्र वसन्ति नरपुङ्गवाः।
तद्देशोत्पन्नमात्राश्च वैष्णवत्वं व्रजन्ति ते॥
विष्णुचक्राङ्कितं विप्रमेकरात्रन्तु वासयेत्।
विष्णुलोकनिवासैस्तु पूज्य एव न संशयः॥

**विष्णुधर्मयुता मुख्याः शङ्खचक्राङ्किता द्विजाः।**
**क्रीडार्थमपि यत् ब्रूयुस्स धर्मः परिकीर्तितः॥**
**यस्मिन् तीर्थे कृतस्नानाः वैष्णवाश्चक्रलाञ्छिताः।**
**तस्मिन् स्नानं प्रकुर्वीत विष्णुलोकमवाप्नुयात्॥**
**अतिपापप्रसक्तोऽपि विष्णुचक्राङ्कितस्य तु।**
**पादोदकं पिबेद्यस्तु सर्वपापैः प्रमुच्यते॥**
**शङ्खचक्राङ्कितान् विप्रान् यः पूजयति मानवः।**
**स साक्षाद्विष्णुसालोक्यं लभते नात्र संशयः॥**
**इत्यादीनि बहूनि वचनानि द्रष्टव्यानि।**

एवमनेकश्रुतिस्मृतीतिहासपुराणप्रसिद्धं तप्तचक्रादिधारणं भगवच्छास्त्रे विस्तरेण प्रतिपादितम्। तथाहि—

श्रीविष्णुतत्त्वे नरकप्रस्तावे—

**चक्राङ्कितेभ्यो बिभ्यन्ति देवनारकराक्षसाः।**
**अवमानक्रिया तेषां संहरत्यखिलं जगत्॥ इति।**

तत्रैव तृतीयपादे—

**विज्ञापितास्तदाशिष्याश्चक्रलिङ्गसमन्विताः।**
**देवा एव भवन्त्येते नान्येषां कर्मकारकाः।**

द्वितीये पद इति तेनाभ्यनुज्ञातश्चक्रलिङ्गसमो(?) भवेदिति अन्तिमे पटले —

**चक्रादिधारणं पुंसां परसम्बन्धभे( वे? )दनम्।**
**पातिव्रत्यनिमित्तं हि वलयादिविभूषणम्।**

तत्रोपरितनपटले(?)—

**ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः।**
**एते ह्याश्रमिणः प्रोक्ताश्चत्वारः क्रमयोगतः।**
**शङ्खचक्रधरास्सर्वे ते च यत्र प्रतिष्ठिताः॥ इति।**

भवेयुरिति शेषः।

श्रीविष्णुमन्दिरप्रतिष्ठाध्याये—

**एकान्तिमुनिमुख्यैश्च कृतचक्रादिलक्षणैः॥ इति।**

पराशरसंहितायाम्—

**श्रोत्रियो विष्णुभक्तस्तु गृहस्थश्शस्त्रवित्तमः।**
**चक्रलिङ्गधरो विप्रः प्रतिष्ठां कर्तुमर्हति॥** इति।

नारदीयपद्धतौ—

**गृहस्थः श्रोत्रियो विप्रो नित्यकर्मरतश्शुचिः।**
**शङ्खचक्रधरो दान्तो मद्भक्तो विजितेन्द्रियः।**
**शास्त्रज्ञः कर्मदक्षश्च प्रतिष्ठां कर्तुमर्हति॥** इति।

पारमेश्वरसंहितायाम्—

**लोहैरनलसन्तप्तैः तत्तन्मन्त्राधिवासितैः।**
**पूजितैरर्घ्यगन्धाद्यैरङ्कितव्याः क्षणेन तु॥ इति। ॥15-963॥**

क्षणेन – सावधानेन।

सनत्कुमारसंहितायाम्—

**सर्वपापविमोक्षं वा रथाङ्गस्य तु धारणम्।**
**सर्वकल्याणदमहः? पश्चात्संसारनाशनम्॥** इत्यादि।

विहगेन्द्रसंहितायाम्—

**अग्निनैव तु सन्तप्तं चक्रमादाय मामकम्।**
**दक्षिणं बाहुमूलं स दहेद्विगतसाध्वसः॥**
**एवमन्यत्रापि बहूनि वचनानि द्रष्टव्यानि।**

आचारश्च भवति। यथा तापनीये - 'तं प्रजापतिस्सौवर्णैः कलशैरमृतपूर्णैरानुष्टुभाभिमन्त्रितैरभ्यषिञ्चन् तं सुदर्शनेन दक्षिणतोऽरक्षत्, पाञ्चजन्येन वामतः, द्वयेनैव सुरक्षितो भवति' (इति?)।

अत एवोक्तं ब्रह्माण्डे—

**ततः प्रभृति शक्राद्यास्सर्वे देवा मुनीश्वराः।**
**चिह्नं कृष्णायुधादीनां नित्यं कुर्वन्ति तन्त्रतः।**

तन्त्रतः - पञ्चरात्रत इत्यर्थः।

**ऋषयस्सिद्धगन्धर्वाः पाताले पन्नगेश्वराः।**
**देहे कुर्वन्ति नियतं शङ्खचक्रादिलाञ्छनम्॥**
**तस्मात्त्वमपि देवर्षे कुरु कृष्णायुधाङ्कितम्।**
**स्वदेहं तव सर्वत्र सर्वसिद्धिर्भविष्यति॥ इति।**

स्कान्दे च पृथुसनत्कुमारसंवादे पृथुः—

**सुदर्शनस्य माहात्म्यं वैष्णवानां महामुने।**
**वक्तुमर्हसि सर्वज्ञ परं कौतूहलं हि मे॥**

सनत्कुमारः—

**शङ्खचक्राङ्कितं दृष्ट्वा देवताः पितरो नृप( ग्रहाः? )।**
**गच्छन्ति मङ्गलं नित्यं तुष्टास्तस्य परा भुवि॥**
**कृष्णायुधैर्लाञ्छितानां मृत्युर्नाभिभवेत्क्वचित्।**
**विदेशेऽपि भवेन्मुक्तिः पातकैर्वेष्टिता अपि॥**
**उपसर्गाः क्षयं यान्ति रोगा नश्यन्ति दूरतः।**
**दृष्ट्वा चक्राङ्कितं देहं विमुखा यान्ति शत्रवः॥**
**वृत्रेण निर्जितास्सर्वे पुरा देवास्सवासवाः।**
**ब्रह्मादयो गता भूप शङ्करप्रमुखास्तदा॥**
**त्राहि त्राहि जगन्नाथ वृत्रेण विजिता वयम्।**

भगवानुवाच—

**मदायुधांस्तु देहेषु लाञ्छयित्वा सुरोत्तमाः।**
**उद्यतान् समरे दैत्यान् मत्प्रसादेन भूयसा॥**
**मदायुधाङ्कितान् दृष्ट्वा..........सुरशत्रवः।**
**क्षयं यास्यन्ति समरे मत्प्रसादात्सुरेश्वराः॥**
**प्रणम्य दण्डवद्भूमौ ब्रह्मरुद्रपुरोगमाः।**
**हत्वा वृत्रं गता देवास्स्वस्थानन्तु मुदान्विताः॥**
**तदा प्रभृति ब्रह्माद्याः देवास्सर्वे सवासवाः।**
**ऋषयस्सिद्धगन्धर्वाः पाताले पन्नगेश्वराः॥**
**बाहौ तप्तं हरेश्चक्रं शङ्खञ्चैव विधानतः।**
**धारयन्ति मुदा युक्ता वृत्रस्य जयकाङ्क्षिणः॥**
**तन्नित्यमपि राजेन्द्र कुरु कृष्णायुधाङ्कितम्।**
**स्वदेहं निजसङ्ग्रामे नृते( ? ) यस्मिन् भविष्यति॥**
**कृष्णचक्राङ्कितो भूत्वा सङ्ग्रामं प्रविशेद्यदि।**
**विजितरिपून् सर्वान्स्वदेशं प्राप्नुयान्नृपः।।इति।**

शतपथे - 'इमावेव गौतमभरद्वाजौ, अयमेव गौतमोऽयं भरद्वाजः। इमावेव विश्वामित्रजमदग्नी, अयमेव विश्वामित्रोऽयं जमदग्निः। इमावेव वसिष्ठकश्यपौ, अयमेव वसिष्ठोऽयं कश्यपः'। इति।

येनाङ्किता मुनयो लोकसृष्टिं वितन्वन्ति ब्राह्मणास्तद्वहन्तीति प्रतिपादितः गौतमादीनां दृष्टान्तः(?)। ये दासाः तैस्सुदर्शनं धृतमिति हि तात्पर्यम्। अत्र सदाचारप्रदर्शनार्थं गौतमादीनुदाहृत्य स एवायमिति तत्तुल्यत्वमन्यस्यापि चक्राङ्कितस्य प्रतिपाद्यत इति अन्वयतोऽवगम्यते।

**बृहदारण्यकभेदे**

निचिक्षेप सुषणं' इत्यादिः। अयञ्च 'दिवानक्तं बिभृयुस्तज्जनास' इति विधिशेषार्थवादः।

इतिहाससमुच्चये च—

**केचिच्चक्राङ्कितास्तत्र प्राणिनः पुण्यदायिनः।**
**विचरन्ति यथाकामं पुण्यतीर्थप्रशंसिनः।।**इति।

अरण्यपर्वणि च—

**ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च कृतलक्षणाः।।** इति।

काशीखण्डे द्व्यशीतितमे अध्याये[1]—

**आसीदमित्रजिन्नाम राजा परपुरञ्जयः।**
**धार्मिकस्सत्त्वसम्पन्नः प्रजारञ्जनतत्परः।।4।।**
**यशोधनो वदान्यश्च सुधीर्ब्राह्मणदैवतः।**
**सदैवावभृथस्नातः परिक्लिन्नशिरोरुहः।।5।।**
**विनीतो नीतिसम्पन्नः कुशलस्सर्वकर्मसु।**
**विद्याब्धिपारदृश्वा च (विद्याविशारदश्चाथ) गुणवान् गुणिवत्सलः।।6।।**
**कृतज्ञो मधुरालापः पापकर्मपराङ्मुखः।**
**सत्यवान् शौचनिलयः सत्यवाग्विजितेन्द्रियः।।7।।**
**रणाङ्गणे कृतान्ताभः सङ्ख्यावांश्च सदाजिरे।**
**कामिनीकामकेलिज्ञः युवापि स्थविरप्रियः।।8।।**
**धर्मार्थैर्धितकोशश्च समृद्धबलवाहनः।**
**सुभगश्च सुरूपश्च सुमेधास्सुप्रजाश्रयः।।9।।**
**स्थैर्यधैर्यसमापन्नो देशकालविचक्षणः।**
**मान्यमानप्रदो नित्यं सर्वदूषणवर्जितः।।10।।**
**वासुदेवाङ्घ्रियुगले चेतोवृत्तिं निधाय सः।**
**चकार राज्यं निर्द्वन्द्वं विष्वगीतिविवर्जितम्।।11।।**

---
1. स्का.पु.4.2.82

अलङ्घ्यशासनः श्रीमान् विष्णुभक्तिपरायणः।
अभुनक् प्रचुरान् भोगान् समन्ताद्विष्णुसात्कृतान्॥12॥
हरेरायतनान्युच्चैः प्रतिसौधं पदे पदे।
तस्य राज्ये समभवन् महाभाग्यनिधेः शिवे॥13॥
गोविन्द गोपगोपाल गोपीजनमनोहर।
गदापाणे गुणातीत गुणाढ्य गरुडध्वज॥14॥
कैटभारातिकंसारे( केशिहृत् कैटभाराते? ) देवेश( कंसारे? ) कमलापते।
कृष्ण केशव कञ्जाक्ष कीनाशभयनाशन॥15॥
पुरुषोत्तम पापारे पुण्डरीकविलोचन।
पीतकौशेयवसन पद्मनाभ परात्पर॥16॥
जनार्दन जगन्नाथ जाह्नवीजलजन्मभूः।
जन्मिनां जन्महरण जञ्जपूगाघनाशन॥17॥
श्रीवत्सवक्षः श्रीकान्त श्रीकर श्रेयसां निधे।
श्रीरङ्ग शार्ङ्गकोदण्ड शौरे शीतांशुलोचन॥18॥
दैत्यारे दानवाराते दामोदर दुरन्तक।
देवकीहृदयानन्द दन्दशूकेश्वरेशय॥19॥
विष्णो वैकुण्ठनिलय बाणारे विष्टरश्रवः।
विष्वक्सेन विराधारे वनमालिन् वनप्रिय॥20॥
त्रिविक्रम त्रिलोकीश चक्रपाणे चतुर्भुज।
इत्यादीनि पवित्राणि नामानि प्रतिमन्दिरम्॥21॥
स्त्रीवृद्धबालगोपालवदनोदीरितानि तु।
श्रूयन्ते यत्र कुत्रापि रम्याणि मधुविद्विषः॥22॥।
....ऋते हरिकथायास्तु नान्या वार्ता निशम्यते॥24॥
हरिणा नैव विध्यन्ते हरिनामांशधारिणः।
तस्य राज्ञो भयाद्व्याधैररण्यसुखचारिणः॥25॥
न मत्स्या नैव कमठा न वराहाश्च केनचित्।
हन्यन्ते क्वापि तद्भीत्या मत्स्या मांसाशिनापि वै॥ 26॥

अप्युत्तानशयास्तस्य राष्ट्रेऽमित्रजितः क्वचित्।
स्तनपानं न कुर्वन्ति सम्प्राप्य हरिवासरम्॥27॥
पशवोऽपि तृणाहारं परित्यज्य हरेर्दिने।
उपोषणपरा जाता अन्येषां का कथा नृणाम्॥28॥
महामहोत्सवस्सर्वैः पुरौकोभिर्वितन्यते।
तस्मिन् प्रशासति भुवं सम्प्राप्ते हरिवासरे॥29॥
स एव दण्ड्योऽभूत्तस्य राज्ञोऽमित्रजितः क्षितौ।
यो विष्णुभक्तिरहितः प्राणैरपि धनैरपि॥30॥
अन्त्यजा अपि तद्राष्ट्रे शङ्खचक्राङ्कधारिणः।
सम्प्राप्य वैष्णवीं दीक्षां दीक्षिता इव संभभुः॥31॥
शुभानि यानि कर्माणि क्रियन्तेऽनुदिनञ्जनैः।
वासुदेवे समर्प्यन्ते तानि तैरफलेप्सुभिः॥32॥
विना मुकुन्दं गोविन्दं परमानन्दमच्युत्तम्।
नान्यो जप्येत मन्येत न भज्येत जनैः क्वचित्॥33॥
कृष्ण एव परो देवः कृष्ण एवं परागतिः।
कृष्ण एव परो बन्धुः तस्यासीदवनीपतेः॥34॥

इति रुद्रेण—

धन्योऽसि कृतकृत्योऽसि मान्योऽप्यसि दिवौकसाम्।
सर्वभूतेषु गोविन्दं परिपश्यन् विशांपते॥37॥
यो वेदपुरुषो विष्णुर्यो यज्ञपुरुषो हरिः।
योऽन्तरात्माऽस्य जगतः कर्ता हर्ताऽविता विभुः॥38॥
तन्मयं पश्यतो विश्वं तव भूपालसत्तम।
दर्शनं प्राप्यशुभदं शुचित्वमगमं परम्॥39॥
एक एव हि सारोऽत्र संसारे क्षणभङ्गुरे।
कमलाकान्तपादाब्जभक्तिभावोऽखिलप्रदः॥40॥
परित्यज्य हि यस्सर्वं विष्णुमेकं सदा भजेत्।
सुमेधसं भजन्ते तं पदार्थास्सर्व एव हि॥41॥
हृषीकेशे हृषीकानि यस्य स्थैर्यगतान्यहो।
स एव स्थैर्यमाप्नोति ब्रह्माण्डेऽतीव चञ्चले॥42॥

**यौवनं धनमायुष्यं पद्मिनीजलबिन्दुवत्।**
**अतीव चपलं ज्ञात्वाऽच्युतमेकं समाश्रयेत्॥43॥**
**वाचि चेतसि सर्वत्र यस्य देवो जनार्दनः।**
**स एव सर्वदा वन्द्यो नररूपी जनार्दनः॥44॥**
**निर्व्याजप्रणिधानेन शीलयित्वा श्रियःपतिम्।**
**पुरुषोत्तमतां को न प्राप्तवानिह भूतले॥45॥ इति**

नारदेन च सुबहुमान्यः सकलदेवपूजनीयः अमित्रजिन्नाम राजा—

**विशालोरस्स्थलतलप्रालम्बितुलसीस्त्रजम्।**
**शङ्खचक्राङ्कसुभगभुजद्वयविराजितम्॥**
**हरिनामाक्षरसुधाकरदानावलम्बिनम्।** (इति?)

गौरीं प्रति रुद्रेण वर्णितः। अत्र नियमवचनान्यपि भवन्ति।

विष्णुस्मृतौ—

**शङ्खचक्राद्यङ्कनञ्च नृत्तगीतादिकं तथा।**
**एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः॥**
**शङ्खचक्रं मृदा यस्तु कुर्यात्तप्तायसेन वा।**
**स शूद्रवत् बहिष्कार्यः सर्वस्माद्द्विजकर्मणः॥** इति।।
**भगवन्मन्दिरे वृत्त्यर्थं नृत्तगीतादिकं कुर्वन्तः॥**
**लाञ्छितव्या यथायोगं शङ्खचक्रादिलक्षणैः।**
**आराधकाद्याः कर्मण्या एवञ्चक्रादिलाञ्छिताः॥**

इत्यादिवचनानुसारादङ्किताः कुर्वन्ति तं द्विजम्। द्विजातेर्निषिद्ध्यते देवालये वृत्त्यर्थं नृत्तगीतादिकरणम्। तदर्थञ्च एकजातेर्धर्मः, न द्विजातेरिति। 'न जात्विति - न कदाचिदित्यर्थः। अनेन वृत्त्यर्थस्यैव निषेध इति लभ्यते। आपदि उत्तरोत्तरवर्णवृत्तेर्ग्राह्यत्वाभिधानादिहापि तथा प्रसक्तौ आपद्यप्यनेन वृत्तिर्नास्थेयेत्युच्यते। कुतोऽयमर्थोऽधिगतः, शब्दसामर्थ्यादर्थसामर्थ्याच्च।

तत्र शङ्खचक्राद्यङ्कनमेकजातेर्धर्मः नृत्तगीतादिकञ्चैकजातेर्धर्म इति नान्वयः, अयमिति पदानाञ्जस्यात्। न हि शङ्खचक्राद्यङ्कनमयमेकजातेर्धर्मः, नृत्तगीतादिकमयमेकजातेर्धर्म इत्यन्वयस्समञ्जसो भवर्ता। कथञ्चिदन्वयेऽपि वैयर्थ्यमपरिहार्यम्। तस्मात् तथा प्रसिद्धेन जीविकारूपेण शङ्खचक्राद्यङ्कनं नृत्तगीतादिकञ्चेति यदस्ति, अयमेकजातेर्धर्म इत्यन्वयः। अयमित्येकधर्मतया निर्देशात् चक्रादिधारणस्य नृत्तादिशेषत्वं गम्यते। बहुप्रमाणप्रतिपन्नस्य निषेधासम्भवः नारदाद्यनुष्ठितस्य गीतादेर्निषेधासम्भवश्चार्थसामर्थ्यम्।

द्वितीयवचनस्यायमर्थः – कस्य कुर्यादित्याकाङ्क्षायां कर्तुरेव लाभेन स्वस्य स्वयं न कर्तव्यं किन्तु गुरूपसदनमेवेति केचित्। वस्तुतस्तु तापभीत्या अतप्ताङ्कनरेखया चित्रवत् यश्चक्राद्याकृतिं कुर्यात्, यश्च तप्तायसेन तावुभौ बहिष्कार्यौ; कनकरजतकांस्यताम्रादिभिरेव तप्तैश्चक्रादिधारणस्य कर्तव्यत्वादिति भावः।

अत एवोक्तं पाद्मे—

**सुदर्शनं पाञ्चजन्यं सौवर्णेन प्रकारयेत्।**
**रौप्येण वापि ताम्रेण कांस्येनापि प्रकारयेत्॥**
**आचार्यादनभिप्राप्तः प्राप्तो वा भूरिदक्षिणः।**
**अङ्गोपाङ्गैश्च संयुक्तः कृतोऽपि न कृतो भवेत्॥** इति।

हारीतस्मृतौ—

**रागसन्दग्धगात्राणां न स्यात्पारत्रिकं शुभम्।**।इति।

बौधायने—

**नाङ्कयेन्न दहेद्गात्रं दहेच्चेत्कामकारतः।**
**नाधिकुर्वन्ति दग्धाङ्गाः श्रौतस्मार्तेषु कर्मसु॥** इति।
**इदं 'कामकारत' इत्युक्तेः रागप्राप्तविषयमेवेति स्पष्टम्।**

गोभिलस्मृतौ—

**श्रौतस्मार्तक्रियो विप्रो नाङ्कयेदङ्गमङ्कनैः।**
**अपि विष्णवादिसम्बन्धैस्तप्तैर्वा पतितो भवेत्॥**
**अज्ञानादथवा लोभाद्रागतो वा सुदर्शनम्।**
**धत्ते कुलघ्नं तं दृष्ट्वा सवासा जलमाविशेत्॥**
**भुजाग्रे सलिलेनैव विलिखेद्यस्सुदर्शनम्।**
**वेदाग्निज्ञानवान् सोऽपि दहत्यासप्तमं कुलम्॥**
**शङ्खं चक्रञ्च लिङ्गञ्च यो मूढो धारयेत्तनौ।**
**पाषण्डस्स हि विज्ञेयस्सर्वकर्मबहिष्कृतः॥** इति।

अत्र प्रथमश्लोके 'श्रौतस्मार्तक्रियः', 'अङ्कनैर्नाङ्कयेदि'ति समभिव्याहारात् श्रौतस्मार्तक्रियानिष्ठाद्योतकचिह्नानि डम्भार्थं न धारयेत्। भगवच्चिह्नान्यपि श्रौतस्मार्तक्रिया-निष्ठाद्योतनार्थं न धारयेदित्यर्थः।

द्वितीयश्लोके अज्ञानशब्दो हि हिततमत्वज्ञानाभावपरः। खलाः खलु केचित् हितबुद्ध्यभावेऽपि शिष्टगोष्ठीप्रवेशार्थमङ्कनादि कुर्वन्ति। लोभादिति - वैष्णवधनं चोरा नापहरेयुरिति श्रुत्वा धनरक्षणार्थं भगवच्चिह्नं न धार्यमित्यर्थः। रागत इति जीविकां निषेधति।

**तृतीयश्लोके एवकारेण तप्तधारणं विधीयते ( व्यावर्त्यते? )।**

चतुर्थे लिङ्गसमुच्चयो निषिद्ध्यते। अत एव'स्वदेहे अन्यदेहे वा भवेदत्रिकिणी द्विज' इति स्मर्यते। त्रिकिणवान् पुरुषस्त्रिकिणी। तदन्योऽत्रिकिणीति। एवं किणत्रयवत्त्वोक्त्या किणत्रयसमुच्चयनिषेधतात्पर्यं गम्यते। किणत्रयशब्देन त्रिमूर्त्यायुधानां चिह्नानि गृह्यन्ते। अङ्गुलिविच्छेदः, उरसि शस्त्रेण नामाक्षरविन्यासः, तप्तायस्स्वर्णमुद्रया नामाक्षरन्यास इत्येतेषां त्रयाणां निषेध इति केचित्। त्रिशूलाङ्कननिषेध इत्यपरे।

तद्व्याख्यातारस्त्वेवं व्याचक्षते। अत्र द्विजशब्दो ब्राह्मणपरः। किणत्रयञ्च ज्याघातयुद्धार्थनिरन्तरासिकनिमित्तमिति न ब्रह्मविष्णुरुद्राणां चिह्नमेकस्य धारयेत्। स्वयमेव श्रुतिः प्राह 'सर्वमयो द्विज' इतीति केनचिल्लिखितवचनं मूलस्मृतिषु क्वापि न दृश्यते। दृश्यते चेत्, एकस्य शरीरे समुदितन्न धार्यमिति व्याख्येयम्। एतानि वचनानि 'यथा श्मशानगं काष्ठमि'ति वचनञ्च औत्तरेषु कोशेषु न क्वापि दृश्यन्ते। इहापि दक्षिणे देशे क्वचिदेव दृश्यन्त इति प्राचीनाः। पुराणेष्वपि कानिचिद्विरुद्धवचनानि प्रक्षिपन्ति पापिष्ठाः। तुष्यतु इति न्यायेन तेषामप्यर्थ उच्यते।

तथाहि बृहन्नारदीये—

**यस्तु सन्तप्तशङ्खादिलिङ्गचिह्नतनुर्द्विजः।**
**स सर्वयातनाभोगी चण्डालः कोटिजन्मसु॥**
**चक्राङ्किततनुर्वापि राजन् लिङ्गाङ्कितोऽपि वा।**
**नाधिकारी स विज्ञेयः श्रौतस्मार्तेषु कर्मसु॥**

स्कान्दे सूतसंहितायाम्—

**स्वदेहे परदेहे वा न कुर्यादङ्कनं नरः।**
**यदि कुर्याच्च चक्राद्यैः पतत्येव न संशयः॥**

मानवे पुराणे—

**आयुधैः शङ्खचक्राद्यैर्न दहेच्च कदाचन।**
**मनुष्याणान्तु नाम्ना च न लिखेच्चोरसि भ्रमात्॥**
**केनचिल्लाञ्छितो मर्त्यो न साक्षी सर्वदा भवेत्।**
**श्रौतस्मार्तसदाचारे नाधिकारी च लाञ्छितः॥**
**लाञ्छिताश्च न सम्भाष्याः न स्पृश्याश्च तथैव च।**
**न दर्शनीयास्तान् राजा देशाच्छीघ्रं प्रवासयेत्॥**
**इत्येवञ्जातीयकानि जीविकाविषयाणि मन्तव्यानि।**

किञ्चात्रैवर्णिकानां भगवच्चिह्नधारणस्य परेणाङ्गीकारात् 'स्वदेह' इत्यादिस्कान्दवचनं त्रैवर्णिकविषयं वाच्यम्। तच्च न सम्भवति, स्कान्द एव 'येषां चक्राङ्कितं गात्रमि'ति श्लोकेन ब्राह्मणानामेव तद्धारणोक्तेः। अतो नरशब्दः सामान्यशब्दत्वात् ब्राह्मणातिरिक्तविषयस्सन् तेषामङ्कनकर्तृत्वं निषेधति। कालिकाखण्डे दधीचिशापे—

**अङ्गेषु चाङ्किता यूयं शङ्खचक्राङ्कनादिभिः।**
**भवेयुः श्रद्धया सार्धं वेदबाह्या द्विजोत्तमाः।**

यज्ञवैभवखण्डे—

**शङ्खचक्रगदापाशचापदण्डाङ्कुशादिभिः।**
**अङ्किताः श्रद्धया यूयं भवेत ब्राह्मणाधमाः॥**
**वर्तुलाश्वत्थपत्रार्धचक्रदीपादिलिङ्गिनः।**
**भवेयुः श्रद्धया सार्धं वेदबाह्या द्विजाधामाः॥** इति।

अत्र 'अङ्गेष्वङ्किता' इत्यादिना तदानीन्तनदोषानुवादः। देवताचिह्नैरङ्कितानां कथं शापो भवेदिति न भ्रमितव्यमिति भावः।

### अथ ऊर्ध्वपुण्ड्रधारणम्ल

ऊर्ध्वपुण्ड्रधारणञ्च श्रुत्यादिसिद्धम्। ऋग्वेदे तावत् 'ऊर्ध्वरेखां प्रदधतं न विष्णुरिय(म?)मिन्द्राग्नी अवतं धियं वां मरीयं दधानमुतदीर्घमायुः....' इति। 'ऊर्ध्वरेखाम् – ऊर्ध्वपुण्ड्रम्, प्रदधतम् – दधानम्, न विष्णुः – विष्णुरिव, इवार्थे नञ्। यथा निरुक्तकारेण 'अश्वन्न त्वा पारवन्तम्' – अश्वमिव त्वा पारवन्तम्, 'मृगो न' - मृग इव भीमः इत्येवमादिषु नञ् इवार्थे व्याख्यातः; तद्वदत्रापि। मरीयम् –मरणस्वभावम्, दधानमपि इमम् - प्रकृतं क्षयरोगिणम्, इन्द्राग्नी अवतम् – रक्षतम्, धियन्धीः? – इयं धीः रक्षणधीर्वामस्ति।

### महोपनिषदि

**धृतोर्ध्वपुण्ड्रः परमेशितारं नारायणं साङ्ख्यंयोगाधिगम्यम्।**
**ज्ञात्वा विमुच्येत नरस्समस्तैः संसारपाशैरिह चैव विष्णुम्॥** इति।

भल्लशाखायाम्—

'अर्चनादौ यज्ञमूर्तेरूर्ध्वपुण्ड्र'मित्यारभ्य 'कुलन्तारयते सप्त स गच्छेद्वैष्णवं पदमि'ति।

आथर्वणे—

'हरेः पादाकृतिमात्मनो हिताय मध्येच्छिद्रमूर्ध्वपुण्ड्रं यो धारयति स परस्य प्रियो भवति स पुण्यवान् भवति स मुक्तिभाग्भवती'ति।

स्मृतयश्च—

यथाग्निवेश्यगृह्ये—

**त्रिपुण्ड्रं ब्राह्मणो विद्वान् लीलयापि न धारयेत्।**
**धारयेत्प्रयतस्सम्यगूर्ध्वपुण्ड्रं प्रयत्नतः॥** इति।

उक्तञ्च बोधायनेन—

**होमपूजादिसमये सायम्प्रातस्समाहितः।**
**ऊर्ध्वपुण्डधरो विप्रो भवेच्छुद्धो न चान्यथा॥** इति।

शातातपश्च—

**यच्छरीरं मनुष्याणामूर्ध्वपुण्ड्रं विना भवेत्।**
**द्रष्टव्यो नैव तद्देहश्श्मशानसदृशो हि सः॥** इति।

विष्णुस्मृतौ च—

**उपवीतं शिखाबन्धमूर्ध्वपुण्ड्रं विना कृतम्।**
**अपवित्रकरं कर्म विप्रस्य विफलं भवेत्॥**

स्मृत्यन्तरेषु च—

**स्वाध्याये भोजने चैव होमे मङ्गलकर्मणि।**
**ऊर्ध्वपुण्ड्रधरो नित्यं रक्षसाञ्चापनुत्तये॥**इति।

भार्गवश्च—

**यज्ञो दानन्तपो होमो भोजनं पितृतर्पणम्।**
**सर्वे भवन्ति विफलाः ऊर्ध्वपुण्ड्रं विना कृताः॥** इति।

पराशरस्मृतौ—

**निरूर्ध्वपुण्ड्रस्तु भवेन्न कदाचिदपि द्विजः।**
**वैष्णवश्चेद्विशेषेण सर्वकर्माणि सोऽर्हति॥** इति।

स्मृतिसारे—

**स्वाध्याये भोजने चैव होमे मङ्गलकर्मणि।**
**ऊर्ध्वपुण्ड्रधरो भूयाद्रक्षसाञ्चापनुत्तये॥**

वामने—

**रक्षार्थमघनाशार्थं मङ्गलार्थञ्च भामिनि।**
**धारयेदूर्ध्वपुण्ड्रन्तु शिरसाहर्निशं सदा॥** इत्यादि।

मरीचिश्च—

चतुरङ्गुलमूर्ध्वाग्रं द्व्यङ्गुलं विस्तृतं मृदा।
द्विजः पुण्ड्रमृजुस्सौम्यं सान्तराळन्तु कारयेत्॥
निरन्तरालं यः कुर्यादूर्ध्वपुण्ड्रं द्विजाधमः।
स हि तत्र स्थितं विष्णुं श्रियञ्चैव व्यपोहति॥
अच्छिद्रमूर्ध्वपुण्ड्रन्तु यः करोति विमूढधीः।
स पर्यायेण तान् याति नरकानेकविंशतिम्॥ इति।

वृद्धमनुश्च—

ऊर्ध्वपुण्ड्रं मृदा धार्यं यतीनान्तु विशेषतः।
भस्मचन्दनगन्धादीन् वर्जयेद्यावदायुषम्॥इति।

पुराणेषु च मात्स्ये—

त्रिपुण्ड्रं ब्राह्मणो विद्वान् लीलयापि न धारयेत्।
धारये( द्यदि मोहेन )त्प्रयतस्सम्यगूर्ध्वपुण्ड्रन्तु नित्यशः॥ इति।

नारदीये—

सर्वजातिषु यो मर्त्यो विष्णुभक्तो भवेन्मुने।
तस्योर्ध्वपुण्ड्रकरणे ह्यधिकारो बुधैस्स्मृतः॥

ब्रह्माण्डे—

सर्ववर्णेषु मद्भक्ताः कुर्वीरन्नूर्ध्वपुण्ड्रकम्।
ब्राह्मणाश्च विशेषेण जपहोमपरायणाः॥

तत्रैव—

यः करोत्यूर्ध्वपुण्ड्रन्तु सन्ध्यावन्दनकर्मसु।
तेनाहं सुलभो ब्रह्मन्नेकस्मिन्नेव जन्मनि।

तत्रैव—

तदाराधनकाले च सदा यज्ञादिकर्मणि।
अवश्यं धारयेदेतदूर्ध्वपुण्ड्रं द्विजोत्तमः।

तत्रैवान्यत्र—

पाषण्डदर्शनस्पर्शसम्भाषणपरोऽपि यः।
सोऽपि पूतो भवेत् ब्रह्मन्नूर्ध्वपुण्ड्रस्य धारणात्।

ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथवा यतिः।
अवश्यं धारयेत्पुण्ड्रमूर्ध्वसंज्ञं सुशोभनम्॥ इति।

तथैवान्यत्र[1] –

ऊर्ध्वपुण्ड्रप्रमाणानि दिव्यान्यङ्गुलिभेदतः॥78॥
वर्णाभिमन्त्रदेवांश्च प्रवक्ष्यामि फलानि च।
पर्वताग्रे नदीतीरे शिवक्षेत्रे विशेषतः॥79॥
सिन्धुतीरे च वल्मीके तुलसीमूलमाश्रिते।
मृद एतास्तु सङ्ग्राह्या वर्जयेदन्यमृत्तिकाः॥80॥
(श्यामं शान्तिकरं प्रोक्तं रक्तं वश्यकरं भवेत्।
श्रीकरं पीतमित्याहुः धर्मदं श्वेतमुच्यते॥81॥
अङ्गुष्ठः पुष्टिदः प्रोक्तो मध्यमाऽऽयुष्करी भवेत्।)
अनामिकान्नदा नित्यं मुक्तिदा च प्रदेशिनी॥82॥
एतैरङ्गुलिभेदैस्तु धारेयत(कारयेत्) न नखैः स्पृशेत्।
विष्णुपादाकृतिश्चापि वेणुपत्राकृतिं तथा॥83॥
पद्मस्य मुकुलाकारं तथैव कुमुदस्य च(तथा कुर्यात् प्रयत्नतः?)।
मत्स्यकूर्माकृतिं वापि शङ्खाकारमथापि वा(ततः परम्?॥84॥
दशाङ्गुलिप्रमाणन्तत(तु?) उत्तमोत्तममुच्यते।
नवाङ्गुलं मध्यमं स्यादष्टाङ्गुलमतः परम्॥85॥
सप्तषट्पञ्चभिः पुण्ड्रं मध्यमं त्रिविधं स्मृतम्।
चतुस्त्रिद्व्यङ्गुलैः पुण्ड्रं कनिष्ठं त्रिविधं भवेत्॥86॥

पाद्मे[2]—

ऊर्ध्वपुण्ड्रस्य माहात्म्यं वक्ष्यामि शुभदर्शने।
धारणादेव मुच्येत भवबन्धाद्विजोत्तमः॥
स स्नातस्सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः।
धारयेदूर्ध्वपुण्ड्रं यो मृदा शुभ्रेण वैष्णवः॥4॥
ऊर्ध्वपुण्ड्रधरो विप्रस्सर्वलोकेषु पूजितः।
विमानवरमारुह्य याति विष्णोः परं पदम्॥5॥

1. दे.भा.11.15
2. उत्तरखण्डः 6-225

**ऊर्ध्वपुण्ड्रधरं दृष्ट्वा सर्वपापैः प्रमुच्यते।**
**नमस्कृत्वाथवा भक्त्या सर्वदानफलं लभेत्॥7॥**
**ऊर्ध्वपुण्ड्रधरं विप्रं यः श्राद्धे भोजयिष्यति।**
**आकल्पकोटि पितरः तस्य तृप्ता न संशयः॥8॥**
**ऊर्ध्वपुण्ड्रधरो यस्तु कुर्याच्छ्राद्धं वरानने।**
**कल्पकोटिसहस्राणि गयाश्राद्धफलं लभेत्॥**

तथैवान्यत्र[1] –

**मत्प्रियार्थं शुभार्थं वा रक्षार्थञ्चतुरानन।**
**मद्भक्तो धारयेन्नित्यमूर्ध्वपुण्ड्रमतन्द्रितः** (पुण्ड्रं भवापहम्?)।।15।।

तथैव[2] –

**विमलान्यूर्ध्वपुण्ड्राणि सान्तरालानि यो द्विजः ( नरः )।**
**करोति विपुलं तत्र हरिसद्म( मन्दिरं मे? ) करोति सः॥100॥**

**ऊर्ध्वपुण्ड्रस्य मध्ये तु विशालेऽतिमनोहरे।**
**लक्ष्म्या सार्धं समासीनो रमते विष्णुरव्ययः॥101॥**

मार्कण्डेये —

**ऊर्ध्वपुण्ड्रं मृदा धार्यं विप्रेण ब्रह्मवादिना।**
**उद्धृतासीतिमन्त्रेण वैष्णवेन विशेषतः॥**

नारदीये—

**ऊर्ध्वगत्यान्तु यस्येच्छा तस्योर्ध्वं पुण्ड्रमुच्यते।**
**ऊर्ध्वं गत्वा तु देवत्वं सम्प्राप्नोति न संशयः॥**
**ऊर्ध्वं नयति यत्पुण्ड्र प्राणिनः पापकारिणः।**
**तस्याख्या ह्यूर्ध्वपुण्ड्रेति तस्मात्तद्धारयेद्बुधः॥ इति।**

भगवच्छास्त्रे च पारमेष्ठ्यसंहितायाम्—

**श्वेतमृत्तिकया वापि श्यामया पीतयापि वा।**
**ऊर्ध्वपुण्ड्रं द्विजैः कार्यं वैष्णवैश्च विशेषतः॥** इति।

---

1. स्क.पु 2-5-3
2. ददूहदू/देवी.भा 11-15

तत्रैव—

**धृतोर्ध्वपुण्ड्रो विधिवद्यस्य( तस्य ) नामानि द्वादश।**
**नमोऽन्तान्यञ्जलिं कुर्यान्नामान्युक्त्वा यथाक्रमम्॥** इति।

ब्रह्मरात्रे—

**ब्राह्मणस्योर्ध्वपुण्ड्रं स्यात् क्षत्रियस्यार्धचन्द्रकम्।**
**वैश्यस्य वर्तुलाकारं शूद्रस्यैव त्रिपुण्ड्रकम्॥**
**त्रिपुण्ड्रं ब्राह्मणो विद्वान् लीलयापि न धारयेत्।**
**धारयेत्प्रयतस्सम्यगूर्ध्वपुण्ड्रं प्रयत्नतः॥**

तत्रैव—

**पूजाकाले च होमे च सायम्प्रातस्समाहितः।**
**सावित्रीजपकाले च वेदाध्ययन एव च॥**
**याने च भोजने चैव शयने च विशेषतः।**
**मन्त्रानुच्चार्य विधिना धारयेदूर्ध्वपुण्ड्रकान्॥**
**रक्षार्थं वंशवृद्ध्यर्थं मङ्गलार्थञ्च पद्मज।**
**आभिरङ्गुलिभिः पुण्ड्रं धारयेन्न नखैर्लिखेत्॥** इति।

पराशरसंहितायाम्—

**निरूर्ध्वपुण्ड्रस्तु भवेन्न कदाचिदपि द्विजः।**
**वैष्णवश्चेद्विशेषेण सर्वकर्मणि सोऽर्हति॥** इति।

श्रीमदष्टाक्षरब्रह्मविद्यायाम्—

**असङ्ख्याताच्च सङ्ख्यातस्सहस्रगुण उच्यते।**
**सङ्ख्यातादपि साहस्रस्सोर्ध्वपुण्ड्रतनोर्जपः॥इति।**

यानि च वचनानि आपाततः ऊर्ध्वपुण्ड्रविरोधीनिव दृश्यन्ते तानि न तत्पराणि।

तथाहि पाराशरे—

**ऊर्ध्वपुण्ड्रं त्रिशूलञ्च वर्तुलञ्चतुरश्रकम्।**
**अर्धचन्द्रादिकं लिङ्गं वेदनिष्ठो न धारयेत्॥ इति॥**

त्रिशूलमिति तदाकृतिसमर्पकमूर्ध्वपुण्ड्रविशेषणम्।

**ऊर्ध्वपुण्ड्रे तथा शूले वर्तुले चतुरश्रके।**
**चिह्ने वेदविरुद्धे च भवेयुर्ब्राह्मणाधमाः॥**

इत्यत्रापि शूलपदं पूर्ववत्पुण्ड्रविशेषणम्। पूर्वश्लोकोक्तवेदबाह्यत्वापेक्षया तथेति निर्देशः।

पराशरपुराणे—

**ऊर्ध्वपुण्ड्रन्त्रिशूलञ्च वर्तुलं चतुरश्रकम्।**
**ललाटे धारयिष्यन्ति मनुष्याः पापकर्मिणः॥**

मानवे—

**ऊर्ध्वपुण्ड्रं त्रिशूलञ्च वर्तुलञ्चार्धचन्द्रकम्।**
**तन्त्रनिष्ठेन धार्यं स्यान्न धार्यं वैदिकैर्जनैः॥**

इत्यत्रापि त्रिशूलपदम् ऊर्ध्वपुण्ड्रविशेषणम्।

स्कान्दे—

**ऊर्ध्वपुण्ड्रं द्विजः कुर्यात् लीलयापि कदाचन।**
**तदाकारेण शस्त्रेण पीड्यते यमकिङ्करैः॥**

साम्बपुराणे—

**अशुद्धन्तु तथा प्रोक्तं वर्तुलञ्चोर्ध्वपुण्ड्रकम्।**
**अशुद्धञ्चार्धचन्द्रञ्च कीर्तितञ्चाङ्कुशादिकम्॥**

सूतसंहितायाम्—

**अश्रौतमूर्ध्वपुण्ड्रादि ललाटे श्रद्धया सह।**
**धारयिष्यन्ति मोहेन पाषण्डोपहता जनाः॥**

वासिष्ठलैङ्गे—

**अश्रौतमूर्ध्वपुण्ड्रादि ललाटे श्रद्धया सह।**
**धारयिष्यन्ति मोहेन युगान्ते समुपस्थिते॥** इति।

एवंविधान्यपि वचनानि त्रिशूलाकारोर्ध्वपुण्ड्रविषयाणि मन्तव्यानि। अथवा अश्रौतमित्यभिधानात् 'उद्धृतासी'त्यादिश्रौतमन्त्रविधुरोर्ध्वपुण्ड्रधारणस्य त्रैवर्णिकानर्हत्वपराणीति।

भगवच्छास्त्रञ्च भारतादिषु प्रसिद्धवैभवम्। भारतन्तु वक्ष्यते।

श्रीवाराहे षट्षष्टितमे अध्याये—

**पौरुषं सूक्तमास्थाय ये यजन्ति द्विजाशु माम्।**
**ते मां प्राप्स्यन्ति सततं संहिताध्ययनेन च॥10॥**
**अलाभे वेदशास्त्राणां पञ्चरात्रोदितेन हि।**
**मार्गेण मां यजन्ते ये ते मां प्राप्स्यन्ति मानवाः।**
**ब्राह्मणक्षत्रियविशां पञ्चरात्रं विधीयते॥11॥**

**शूद्रादीनान्तु मे क्षेत्रपदवीगमनं द्विज।**
**मन्नाम विहितं तेषां नान्यत् पूजादिकं चरेत्॥12॥**
**एवं मयोक्तं विप्रेन्द्र पुराकल्पे पुरातनम्।**
**पञ्चरात्रं सहस्राणां यदि कश्चित् ग्रहीष्यति॥13॥**
**कर्मक्षये च मां कश्चित् यदि भक्तो भविष्यति।**
**तस्य चेदं पञ्चरात्रं नित्यं हृदि वसिष्यति॥14॥**
**अन्यच्च ते वरं दद्मि शृणु नारद साम्प्रतम्।**
**यदिदं पञ्चरात्रं मे शास्त्रं परमदुर्लभम्।**
**तद्भवान् वेत्स्यते सर्वं मत्प्रसादान्न संशयः॥17॥**
**वेदेन पञ्चरात्रेण भक्त्या यज्ञेन च द्विज।**
**प्राप्योऽहं नान्यथा वत्स वर्षकोट्ययुतैरपि॥18॥**

देशकालवैषम्येणोपदेष्ट्रभावेन वैदिकमन्त्राणामलाभे पञ्चरात्रोदितमन्त्रेणानुष्ठानेऽपि तेन वैदिकमन्त्रानुष्ठानफलं लभत इति तात्पर्यम्।

उत्तररामायणे—

**सुरासुरैर्नतो नित्यं हरिः नारायणः प्रभुः।**
**यस्य नाभ्युद्भवो ब्रह्मा विश्वस्य जगतः प्रभुः॥**
**पुराणैश्चैव देवैश्च पञ्चरात्रैस्तथैव च।**
**ध्यायन्ति योगिनो नित्यं क्रतुभिश्च यजन्ति तम्॥ इति।**

भागवते एकादशस्कन्धे तृतीयेऽध्याये—

**य आशु हृदयग्रन्थिं निर्जिहीर्षुः परात्मनः।**
**विधिनोपचरेद्देवं तन्त्रोक्तेन च केशवम्॥**

तन्त्रम् - पञ्चरात्रम्।

तत्रैव पञ्चमे अध्याये—

तं तदा पुरुषं मर्त्याः सर्वदेवमयं हरिम् (महाराजोपलक्षणम्?)।
**यजन्ति वेदतन्त्राभ्यां परं जिज्ञासवो नृप॥[1]इति।**

प्रथमस्कन्धे—

**तृतीयमृषिसर्गं च देवर्षित्वमुपेत्य सः।**
**तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः॥ इति।**

1. श्री.भा.11.3.28

ब्रह्माण्डे च—

**ऋगाद्या भारतञ्चैव पञ्चरात्रमथाखिलम्।**
**मूलरामायणश्चैवं पुराणञ्चैतदात्मकम्।।**
**ये चानुयायिनस्तेषां सर्वे ते च सदागमाः।**
**दुरागमास्तदन्ये तैर्न ज्ञेयो जनार्दनः।।** इति।

कौर्मे एकादशे अध्याये—

**वेदेने पञ्चरात्रेण भक्त्या यज्ञेन च द्विज।**
**प्राप्योऽहं नान्यथा प्राप्यो वर्षलक्षशतैरपि।।**
**पञ्चरात्रसहस्राणां यदि कश्चित् ग्रहीष्यति।**
**कर्मक्षये च मद्भक्तो यदि कश्चिद्भविष्यति।**
**तस्य वेदाः पञ्चरात्रं नित्यं हृदि वसिष्यति।।** इति।

यत्तु कौर्मे—

**अथांशोः सात्वतो नाम विष्णुभक्तः प्रतापवान्।**
**महात्मा दाननिरतो धनुर्वेदविदां वरः।।**
**स नारदस्य वचनाद्वासुदेवार्चने रतः।**
**शास्त्रं प्रवर्तयामास कुण्डगोलादिभिः श्रितम्।।**
**तस्य नाम्ना तु विख्यातं सात्वतं नाम शोभनम्।**
**प्रवर्तते महाशास्त्रं कुण्डादीनां हितावहम्।।**
**तेनोक्तं सात्वतं तन्त्रं यज्ज्ञात्वा मुक्तिभाग्भवेत्।**
**यत्र स्त्रीशूद्रदासानां संस्कारो वैष्णवस्स्मृतः।।** इति,

तत् - पञ्चरात्रस्याविशेषेण सकलजगद्धितानुशासनतया प्रवर्तितत्वज्ञापनाय, न तु तेषामेवाधिकार इति प्रदर्शनाय। कथमन्यथा भारतादिवचनानि युधिष्ठिरवसिष्ठश्वेतद्वीपवृत्तान्तादीनि न कुप्येयुः। युधिष्ठिरस्य पञ्चरात्रार्थनिष्ठा ढॆंब्रह्मविद्याविजयेल प्रदर्शिता। वसिष्ठनिष्ठा च श्वेतद्वीपवृत्तान्तश्च प्रदर्शयिष्यते।

अपि चानुष्ठेये ह्यर्थे अनुष्ठेयाधिकारापेक्षा तत्त्वेऽपि। अतस्तत्त्वांशे प्रामाण्यात् तद्विरोधिनः पाशुपतस्याप्रामाण्यस्यावर्जनीयत्वात्। एवमधिकारिविशेषोक्तेः पूर्वपक्षिणो न किञ्चित्प्रयोजनम्। न च भगवच्चिह्नधारणस्य सर्वाधिकारिकर्तव्यत्वाभावसिद्धिरेव फलम्, श्रुत्यादिभिरेव सर्वाधिकारसिद्ध्या तस्याप्याशामोदकत्वात्। मीमांसितञ्चेदं पञ्चरात्रप्रामाण्यं वेदाचार्येण भगवता

महर्षिणैव 'उत्पत्त्यसम्भवात्[1], न च कर्तुः करणम्[2], विज्ञानादिभावे वा तदप्रतिषेधः[3], विप्रतिषेधाच्च'[4] इति। तत्र पूर्वद्विकं पूर्वपक्षः। उत्तरद्विकं राद्धान्तः। तत्र कपिलादितन्त्रसामान्यात् भगवदभिमतपरमनिःश्रेयससाधनावबोधिनि पञ्चरात्रतन्त्रेऽप्यप्रामाण्यमाशङ्क्य निराक्रियते। तत्रायं पूर्वः पक्षः, उत्पत्त्यसंभवात् - 'परमकारणात् परब्रह्मभूताद्वासुदेवात् सङ्कर्षणो नाम जीवो जायते, सङ्कर्षणात् प्रद्युम्नसंज्ञं मनो जायते, तस्मादनिरुद्धसंज्ञोऽहङ्कारो जायते'[5] इति भागवतप्रक्रिया। अत्र जीवस्योत्पत्तिः श्रुतिविरुद्धा प्रतीयते। श्रुतयो हि जीवस्यानादित्वं वदन्ति, 'न जायते म्रियते वा विपश्चिदि'[6]त्याद्याः। न च कर्तुः करणम् - सङ्कर्षणात् प्रद्युम्नसंज्ञं मनो जायत इति कर्तुर्जीवात्मनः करणस्य मनस उत्पत्तिर्न सम्भवति, 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च'[7]इति परस्मादेव ब्रह्मणो मनसोऽप्युत्पत्तिश्रुतेः।

राद्धान्तस्तु, विज्ञानादिभावे वा तदप्रतिषेधः - वाशब्दात् पक्षो विपरिवर्तते। विज्ञानञ्चादि चेति परं ब्रह्म विज्ञानादि। सङ्कर्षणप्रद्युम्नानिरुद्धानामपि जीवमनोऽहङ्कारशब्दाभिलप्तानामपि परब्रह्मभावे सति तत्प्रतिपादनपरस्य शास्त्रस्य प्रामाण्यं न प्रतिषिद्ध्यते। मनोऽहङ्कारशब्दाभ्यां न प्रसिद्धयोः चितोर्ग्रहणमिति द्योतनार्थः विज्ञानपदप्रयोगः। जीवपदेन विज्ञानरूपस्यापि प्रसिद्धजीवस्य ग्रहणमिति द्योतनार्थमादिपदप्रयोगः। अतस्सङ्कर्षणादीनामपि परस्य ब्रह्मणः स्वेच्छाविग्रहरूपत्वात् 'अजायमानो बहुधा विजायत'[8] इति श्रुतिप्रसिद्धस्यैवाश्रितवात्सल्यादिनिमित्तस्वेच्छा-विग्रहसङ्ग्रहरूपजन्मनोऽभिधानात् तदभिधायिशास्त्रप्रामाण्यस्याप्रतिषेध इति। तत्र जीवमनोऽहङ्कार-तत्त्वानामधिष्ठातारस्सङ्कर्षणप्रद्युम्नानिरुद्धा इति तेषामेव जीवादिशब्दैरभिधानमविरुद्धम्, यथा आकाशप्राणादिशब्दैः ब्रह्मणोऽभिधानम्। विप्रतिषेधाच्च - विप्रतिषिद्धा हि जीवस्योत्पत्तिस्तस्मिन्नपि तन्त्रे। यथोक्तं परमसंहितायाम्—

**अचेतना परार्था च नित्या सततविक्रिया।**
**त्रिगुणा कर्मणां क्षेत्रं प्रकृते रूपमुच्यते।**
**व्याप्तिरूपेण सम्बन्धस्तस्याश्च पुरुषस्य च।**
**स ह्यनादिरनन्तश्च परमार्थेन निश्चितः।। इति।**

1. शा.मीं.2.2.39
2. शा.मीं.2.2.40
3. शा.मीं.2.2.41
4. शा.मीं.2.2.42
5. परमसंहिता
6. क.उ.1.2.18
7. मुं.उ.2.1.3
8. उ.नारा., तै.आ.3.13

एवं सर्वास्वपि संहितासु जीवस्य नित्यत्ववचनात् जीवस्वरूपोत्पत्तिः पञ्चरात्रतन्त्रेऽपि प्रतिषिद्धैवेति न जीवोत्पत्तिवादनिमित्ताप्रामाण्यशङ्कावकाशः।

एषां सूत्राणामर्थान्तरं वर्णयतां ब्रह्मविदाचार्यद्रोह एव फलम्। तथाहि त एवमाहुः - तस्मिन्नधिकरणे पञ्चरात्राप्रामाण्यमेव समर्थ्यते। तत्र सूत्रद्वयस्य पूर्ववदेवार्थः। विज्ञानादिभावे वा तदप्रतिषेधः - अथ स्यान्न चैते सङ्कर्षणादयो जीवादिभावेनाभिप्रेयन्ते। किन्तर्हि? ईश्वर एव। एके सर्वज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिरैश्वरधर्मैरन्विताः अभ्युपगम्यन्ते। तस्मान्नायमुत्पत्त्यसम्भवो दोषः प्राप्नोतीत्यत्रोच्यते - एवमपि तदप्रतिषेधः - उत्पत्त्यसम्भवस्याप्रतिषेधः प्राप्नोत्येवायमुत्पत्त्यसम्भवो दोषः प्रकारान्तरेण। कथं परस्परं भिन्ना एवैते वासुदेवादयश्चत्वारः ईश्वरास्तुल्यधर्माणः। नैषामेकात्मत्वमस्तीति अत एकस्य भगवतः एते चत्वारो व्यूहास्तुल्यधर्माण इति नान्यः। अनेकेश्वरकल्पनावैयर्थ्यात् सिद्धान्तहानेश्च न द्वितीयः। वासुदेवादेः सङ्कर्षणाद्युत्पत्त्यसम्भवात् इति अतिशयाभावात्। भवितव्यं हि कार्यकारणयोरतिशयेन। न च पञ्चरात्रसिद्धान्तिभिर्वासुदेवाधिष्ठिते एकस्मिन् सर्वेषु वा विज्ञानैश्वर्यादितारतम्यकृतः कश्चिद्विशेषोऽभ्युपगम्यते। विप्रतिषेधाच्च - विप्रतिषेधश्चास्मिन् शास्त्रे बहुविध उपलभ्यते गणगुणित्वकल्पनादिलक्षणः, ज्ञानैश्वर्यशक्तिबलवीर्यतेजांसि गुणाः, 'आत्मान एवैते भगवन्तो वासुदेवा' इत्यादिदर्शनात्। वेदप्रतिषेधश्च भवति, 'वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधीतवानि'त्यादिवेदनिन्दादर्शनादिति।

अन्ये तु विज्ञानादिभावे वा तदप्रतिषेधः - विज्ञानशब्दो जीववाचकः। अत्र जीवादीनामुत्पत्तिर्नाभिधीयते किन्तु सङ्कर्षणादीनां जीवादिभाव उच्यते। जीवाद्यधिष्ठातृत्वं जीवादिभावः। ततस्तच्छास्त्रप्रामाण्यप्रतिषेधो माभूदिति शङ्कार्थः। विप्रतिषेधाच्च - एवं जीवोत्पत्त्यभिधाने परिहृतेऽपि पाञ्चरात्रमतस्य नाभ्युपगमः। श्रुतिविरुद्धेश्वरकारणवादमुक्तिहेतुत्वतप्त-मुद्राधारणादिधर्मपरत्वादिना विप्रतिषेधात्। अतः पञ्चरात्रमसमञ्जसमिति। तत्र श्रीपञ्चरात्रशास्त्रे वासुदेवसङ्कर्षणादिचतुर्व्यूहप्रतिपादनप्रपञ्चस्य बहुलमुपलब्धेः, सङ्कर्षणो नाम जीवो जायत इत्यत्र सामानाधिकरण्येन विशेषणवैयर्थ्यप्रसङ्गेन च जीवादिपदानामपि यया कयाचित् वृत्त्या व्यूहपरत्वस्यैव विस्पष्टमवगमात् आचार्यस्याविमृश्यकारित्वारोपव्यञ्जनात्तदारोप एको द्रोहः। पञ्चरात्रे चतुर्व्यूहप्रतिपादनस्य वेदाचार्यैरेव भारते प्रतिपादनात् इहापि विज्ञानादिभाव इति तस्योपपादितत्वात् स्वकीयं पञ्चरात्रार्थविमर्शं प्रकटीकुर्वतोऽप्याचार्यस्याविमर्शव्यञ्जनेनाचार्ये द्वेषावगमात् स एव द्वितीयो द्रोहः।

नारायणीये[1]—

**उत्पन्न एव भवति शरीरं चेष्टयन् प्रभुः॥34॥**

---

1. म.भार.शां.प.347

**न विना धातुसङ्घातं शरीरं भवति क्वचित्।**
**न च जीवं विना ब्रह्मन् वायवश्चेष्टयन्त्युत॥35॥**
**स जीवः परिसङ्ख्यातश्शेषस्सङ्कर्षणःप्रभुः।**
**तस्मात्सनत्कुमार त्वं योऽलभत् स्वेन कर्मणा॥36॥**
**यस्मिंश्च सर्वभूतानि प्रद्युम्नः परिपठ्यते।**
**तस्मात्प्रसूतो यः कर्ता कारणं कार्यमेव च॥37॥**
**तस्मात् सर्वं सम्भवति जगत् स्थावरजङ्गमम्।**
**सोऽनिरुद्धस्स ईशानो व्यक्तिस्सा सर्वकर्मसु॥38॥**
**यो वासुदेवो भगवान् क्षेत्रज्ञो निर्गुणात्मकः।**
**ज्ञेयस्स एव राजेन्द्र जीवः सङ्कर्षणः प्रभुः॥39॥**
**सङ्कर्षणाच्च प्रद्युम्नो महाभूतस्स उच्यते।**
**प्रद्युम्नाद्योऽनिरुद्धस्तु सोऽहङ्कारः स ईश्वरः॥40॥**
**मत्तः सर्वं सम्भवति जगत् स्थावरजङ्गमम्॥41॥ इति।**

तत्रैव—

अस्मिन् मूर्तिश्चतुर्थी या साऽसृजच्छेषमव्ययम्।।73।।

**स हि सङ्कर्षणः प्रोक्तः प्रद्युम्नः (म्नं?) सोऽप्यजीजनत्।**
**प्रद्युम्नादनिरुद्धोऽहं सर्गो मम पुनः पुनः॥74॥**
**अनिरुद्धात् तथा ब्रह्मा तन्नाभिकमलोद्भवः॥75॥ इति।**

व्यूहाः, तेषां जीवादिपदवाच्यता, तेषामुत्पत्तिश्च प्रतिपादिताः। ऐकान्त्यादिपञ्चरात्रार्थस्येह प्रकरणे प्रतिपादनादयमपि पञ्चरात्रार्थ इत्यभिप्रायो गम्यते। 'कथं वैखानसाः ब्रूयुः, कथं वै पाश्चरात्रिका' इति प्रश्नोत्तरे पञ्चरात्रप्रतिपाद्यत्वं स्पष्टमेवाह। भारते पञ्चरात्रप्रामाण्यस्य बहुधोपपादनात् आचार्यस्य व्याहतवचनत्वापादनं तृतीयो द्रोहः।

तथाहि - भीष्मपर्वणि—

**ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः।**
**अर्चनीयश्च सेव्यश्च पूजनीयश्च माधवः॥**
**सात्वतं विधिमास्थाय गीतस्सङ्कर्षणेन यः॥ इति।**

नारायणीये द्विचत्वारिंशदुत्तरत्रिशततमे[1] -

1. म.भार.शां.प.342

गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः।
य इच्छेत्सिद्धिमास्थातुं देवतां कां यजेत सः॥1॥
कुतो ह्यस्य ध्रुवस्स्वर्गः कुतो नैःश्रेयसं परम्।
विधिना केन जुहुयात् दैवं पित्र्यं तथैव च॥2॥
मुक्तश्च कां गतिं गच्छेत् मोक्षश्चैव किमात्मकः।
स्वर्गतश्चैव किं कुर्याद्येन न च्यवते दिवः॥3॥
दैवतानाञ्च को देवः पितृणाञ्च पिता तथा।
तस्मात् परतरं यच्च तन्मे ब्रूहि पितामह॥4॥

इति यौधिष्ठिरप्रश्नमुपक्षिप्य भीष्मस्योत्तरं बहुग्रन्थेन प्रतिपादितम्। तत्रादौ- 'गृहस्थस्य वक्ष्यमाणस्यार्थस्याभ्यर्हितत्वम्।

गूढं मां प्रश्नवित् प्रश्नं पृच्छसे त्वमिहानघ।
न ह्येतत् तर्कया शक्यो वक्तुं वर्षशतैरपि॥5॥

ख्यापितमनन्तरम्—

अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
नारदस्य च संवादमृषेर्नारायणस्य च॥7॥
नारायणो हि विश्वात्मा चतुर्मूर्तिस्सनातनः।
धर्मात्मजस्सम्बभूव पितैवं मेऽभ्यभाषत॥8॥
कृते युगे महाराज पुरा स्वायम्भुवेऽन्तरे।
नरो नारायणश्चैव हरिः कृष्णस्तथैव च॥9॥
तेशां नारायणनरौ तपस्तेपतुरव्ययौ।
बदर्याश्रममासाद्य शकटे कनकामये॥10॥
अष्टचक्रं हि तद्ध्यानं भूतयुक्तं मनोरमम्।
तत्राद्यौ लोकनाथौ कृशौ धमनिसन्ततौ॥11॥
तपसा तेजसा चैव दुर्निरीक्ष्यौ सुरैरपि।
यस्य प्रसादं कुर्वाते स देवौ द्रष्टुमर्हति॥12॥

इति नरनारायणयोस्तपः प्रस्तुत्य—

वेदेषु सपुराणेषु साङ्गोपाङ्गेषु गीयसे।
त्वमजश्शाश्वतो धाता माताऽमृतमनुत्तमम्॥25॥

प्रतिष्ठितं भूतभव्यं त्वयि सर्वमिदं जगत्।
चत्वारो ह्याश्रमा देव सर्वे गार्हस्थ्यमूलकाः॥26॥
यजन्ते त्वामहरहर्नानामूर्तिसमास्थितम्।
पिता माता च सर्वस्य दैवतत्त्वञ्च शाश्वतम्।
कं त्वद्य यजसे देवं पितरं कन्न विद्महे॥27॥
कमर्चसि महाभाग तन्मे प्रब्रूहि पृच्छतः॥28॥
इति नारदस्य नारायणं प्रति प्रश्नेन,
यत्तत्सूक्ष्ममविज्ञेयमव्यक्तमचलं ध्रुवम्।
इन्द्रियैरिन्द्रियार्थैश्च सर्वभूतैश्च वर्जितम्॥30॥
स ह्यन्तरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यते।
त्रिगुणव्यतिरिक्तो वै पुरुषश्चेति कल्पितः॥31॥
तस्मादब्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम।
अव्यक्ताव्यक्तभावस्था या सा प्रकृतिरव्यया॥32॥
तां योनिमावयोर्विद्धि योऽसौ सदसदात्मकः।
आवाभ्यां पूज्यते यो हि दैवे पित्र्ये च कल्प्यते॥33॥
नास्ति तस्मात्परोऽन्यो हि पिता देवोऽथवा।
आत्मा हि नौ स विज्ञेयस्ततस्तं पूजयावहे॥34॥
तेनैव स्थापिता ब्रह्मन् मर्यादा लोकभाविनी।
दैवं पित्र्यञ्च कर्तव्यमिति तस्यानुशासनम्॥35॥
ब्रह्मा स्थाणुर्मनुर्दक्षो भृगुर्धर्मस्तथा यमः।
मरीचिरङ्गिराश्चात्रिः पुलस्त्यः पुलहः क्रतुः॥36॥
वसिष्ठः परमेष्ठी च विवस्वान् सोम एव च।
कर्दमश्चापि यः प्रोक्तः क्रोधो विक्रीत एव च॥37॥
एकविंशतिरुत्पन्नास्ते प्रजापतयस्स्मृताः।
तस्य देवस्य मर्यादां पूजयन्तः सनातनीम्॥38॥
दैवं पित्र्यञ्च सततं तस्य विज्ञाय तत्त्वतः।
आत्मप्राप्तानि च ततो जानन्ति द्विजसत्तमाः॥39॥
स्वर्गस्था अपि ये केचित् तान्नमस्यन्ति देहिनः।
ते तत्प्रसादात् गच्छन्ति तदादिष्टफलां गतिम्॥40॥

**ये हीनास्सप्तदशभिः गुणैः कर्मभिरेव च।**
**कलाः पञ्चदश त्यक्त्वा ते मुक्ता इति निश्चयः॥41॥**
**मुक्तानान्तु गतिर्ब्रह्मन् क्षेत्रज्ञ इति कल्पिता।**
**स हि सर्वगतिश्चैव निर्गुणश्चैव कथ्यते॥42॥**
**दृश्यते ज्ञानयोगेन आवाञ्च प्रसृतौ ततः।**
**एवं ज्ञात्वा तमात्मानं पूजयावः सनातनम्॥43॥**
**ते वेदाश्चाश्रमाश्चैव नानातनुसमाश्रितम्।**
**भक्तया सम्पूजयन्त्यद्य गतिञ्चैषां ददाति सः॥44॥**
**ये तु तद्भाविता लोके ह्येकान्तित्वं समास्थिताः।**
**एतदभ्यधिकं तेषां तत्तेजः प्रविशन्त्युत॥45॥**
**इति गुह्यसमुद्देशः तव नारद कीर्तितः।**
**भक्त्या प्रेम्णा च विप्रर्षे अस्मद्भक्त्या च ते श्रुतः॥46॥**

इति नारायणस्योत्तरेण च यौधिष्ठिरप्रश्नस्योत्तरमुक्तम्। तत्र 'देवतां कां यजेते'ति प्रश्नस्य 'चत्वारो ह्याश्रमा' इत्यादिनोत्तरमुक्तम्। 'स हि सर्वगतिरि'त्यनेन 'कुतो ह्यस्य ध्रुवस्स्वर्गः', 'कुतो नैःश्रेयसं परमि'ति प्रश्नयोरुत्तरमुक्तम्। गतिशब्द उपायपरः। 'मुक्तानान्तु गति'रित्यनेन 'मुक्तश्च कां गतिं गच्छेदि'त्यस्योत्तरमुक्तम्। अत्र गतिशब्दः प्राप्यपरः। 'तत्तेजः प्रविशन्त्युते'त्यनेन 'मोक्षश्चैव किमात्मक' इत्यस्योत्तरमुक्तम्। 'स्वर्गस्था अपी'त्यनेन 'स्वर्गस्थश्चैव किं कुर्यादि'त्यस्योत्तरमुक्तम्। 'पिता माता चे'त्यादिना 'दैवतानाञ्च को देवः पित?णाञ्च पिता तथे'त्यस्योत्तरमुक्तम्। 'शाश्वतं तत्त्वमि'त्यनेन 'सृष्टेः परतरमि'त्यस्योत्तरमुक्तम्। यष्टव्यत्वादिनोक्तश्च भगवानेवेति उत्तरग्रन्थे स्पष्टम्। 'ये तु तद्भाविता' इति श्लोके ऐकान्त्यस्य निःश्रेयहेतुत्वाभिधानात् 'तमेव विदित्वाऽतिमृत्युमेती'त्यत्र तमेवेत्यभिप्रेतस्य पञ्चरात्रे प्रधानप्रतिपादितस्यार्थस्याभ्यर्हितत्वमुक्तम्। अथ 'विधिना केन जुहुयादि'ति प्रश्नस्य 'पाञ्चरात्रेण विधिने'त्युत्तरं पर्यवसाययितुमुत्तरो ग्रन्थसन्दर्भः। अष्टपञ्चाशच्छततमे(?) आकाङ्क्षामुखेन वसुवृत्तान्तमवतारयितुम्

**स एवमुक्तो द्विपदां वरिष्ठो नारायणेनोत्तमपूरुषेण।**
जगाद वाक्यं वदतां (द्विपदां?) वरिष्ठं नारायणं लोकहिताधिवासम्?[1]

इत्यादिना, कारणदिदृक्षां प्रतिपाद्य

**तिपारमेष्ठ्यस्य वचो निशम्य नारायणः शाश्वतधर्मगोप्ता॥5॥**[2]

1. म.भार.12.343.1
2. म.भार.12.343

**गच्छेति तन्नारदमुक्तवान् सः सम्पूजयित्वा विधिवत्क्रियाभिः॥6॥**

इति स्वमूलकारणदर्शनानुमतिदानमुक्त्वा 'देवतां कां यजेत स' इत्यस्य विस्तरेण वक्ष्यमाणमुत्तरं 'सात्वतधर्मगोप्ते'ति सङ्ग्रहेणोपक्षिप्य मेरुशिखरमारुढस्य नारदस्य तत्र स्थितस्यैव भगवत्कृपयातिदूरे श्वेतद्वीपे महाप्रभवानां भागवतानां दर्शनमुक्त्वा एकोनषष्टिशततमे(?) —

**अनिन्द्रिया निराहारा अनिष्पन्दास्सुगन्धिनः।**
**कथं ते पुरुषा जाताः का तेषां गतिरुच्यते॥13॥**
**ये च(हि?) मुक्ता भवन्तीह नरा भरतसत्तम।**
**तेषां लक्षणमेतद्धि तच्छ्वेतद्वीपवासिनाम्॥14॥**
**तस्मान्मे संशयं छिन्धि परं कौतूहलं हि मे।**
**त्वं हि सर्वकथारामः त्वाञ्चैवोपाश्रिता वयम्॥15॥**

इति जिज्ञासा प्रतिपादिता।

अथोपरिचरवृत्तान्तं प्रतिपादयितुं तत्कथायाः कथासारत्वेनात्यन्तमभ्यर्हितत्वं तस्य सत्संप्रदायसिद्धत्वञ्चाह—

**विस्तीर्णैषा कथा राजन् श्रुता मे पितृसन्निधौ।**
**सैषा नृपतिवर्यस्य कथासारो हि नः श्रुतः॥16॥**
**(यैषा तव हि वक्तव्या कथासारो हि सा स्मृता?)**
**शन्तनोः कथयामास नारदो मुनिसत्तमः।**
**राज्ञा पृष्टः पराः प्राह तत्राहे श्रुतवान् पुरा॥17॥** इति

अथोपरिचरवृत्तान्तमाह—

**राजोपरिचरो नाम बभूवाधिपतिर्भुवः।**
**आखण्डलसखःख्यातो भक्तो नारायणे हरौ॥18॥**
**धार्मिको नित्ययुक्तश्च सदाचारसमन्वितः।**
**साम्राज्यन्तेन सम्प्राप्तं नारायणवरात्पुरा॥19॥**
**सात्वतं विधिमास्थाय प्राक्सूरिमुखनिस्सृतम्।**
**पूजयामास देवेशं तच्छेषेण पितामहान्॥20॥**
**पित्राद्यृषींश्च (पितृशेषेण?) विप्रांश्च संविभज्याश्रितांश्च सः।**
**शेषान्नभुक् सत्यपरः सर्वभूतेष्वहिंसकः॥21॥**
**सर्वभावेन भक्तस्स देवदेवं जनार्दनम्।**
**अनादिमध्यनिधनं लोककर्तारमव्ययम्॥22॥**

तस्य नारायणे भक्तिं वहतोऽमित्रकर्शिनः।
एकशय्यासनं शक्रो दत्तवान् देवराट् स्वयम्॥23॥
आत्मराज्यं धनञ्चैव कलत्रं वाहनादि च ( वाहनं तथा? )।
यत्तद्भागवतं सर्वमिति तत्प्रेषितं सदा॥24॥
काम्यनैमित्तिका राजन् यज्ञियाः परमक्रियाः।
सर्वाः सात्वतमास्थाय विधिञ्चक्रे समाहितः॥25॥
पञ्चरात्रविदो मुख्यास्तस्य गेहे महात्मनः।
वरान्नं भगवत्प्रोक्तं भुञ्जते वाग्र्यभोयजनम्॥26॥
तस्य प्रशासतो राज्यं धर्मेणामित्रघातिनः।
नानृता वाक् समभवत् मनो दुष्टं न चाभवत्।
न च कायेन कृतवान् स पापं परमाण्वपि॥27॥
ये हि ते ऋषयःख्यातास्सप्तचित्रशिखण्डिनः।
तैरेकमतिभिर्भूत्वा यत्प्रोक्तं शास्त्रमुत्तमम्॥28॥
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः।
वसिष्ठस्स महातेजाः एते चित्रशिखण्डिनः॥30॥
सप्तप्रकृतयो ह्येतास्तथा स्वायम्भुवोऽष्टमः।
एताभिर्धार्यते लोकस्ताभ्यश्शास्त्रं विनिस्सृतम्॥31॥
एकाग्रमनसो दान्ताः मुनयस्संयमे रताः।
भूतभव्यभविष्यज्ञाः सत्यधर्मपरायणाः॥32॥
इदं श्रेय इदं ब्रह्म इदं हितमनुत्तमम्।
लोकान् सञ्चित्य मनसा ततश्शास्त्रं प्रचक्रिरे॥33॥
तत्र धर्मार्थकामा हि मोक्षः पश्चाच्च कीर्तितः।
मर्यादा विविधाश्चैव दिवि भूमौ च संस्थिताः॥34॥
आराध्य तपसा देवं हरिं नारायणं प्रभुम्।
दिव्यं वर्षसहस्रं वै सर्वे ते ऋषिभिः सह॥35॥
नारायणानुशिष्टा हि तदा देवी सरस्वती।
विवेशि तानृषीन् सर्वान् लोकानां हितकाम्यया॥36॥
ततः प्रवर्तिता सम्यक् तपोवद्भिर्द्विजातिभिः।
शब्दे चार्थे च हेतौ च एषा प्रथमसर्गजा॥37॥

आदावेव हि तच्छास्त्रमोङ्कारस्वरपूजितम्।
ऋषिभिः श्रावितन्तत्र यत्र कारुणिको ह्यसौ॥38॥
ततः प्रसन्नो भगवाननिर्दिष्टशरीरगः।
ऋषीनुवाच तान् सर्वानदृश्यः पुरुषोत्तमः॥39॥
कृतं शतसहस्त्रं हि श्लोकानां हितमुत्तमम्।
लोकतन्त्रस्य कृत्स्नस्य यस्माद्धर्मः प्रवर्तते॥40॥
प्रवृत्तौ च निवृत्तौ च यस्मादेतद्भविष्यति।
यजुरृक्सामभिर्जुष्टमथर्वाङ्गिरसैस्तथा॥41॥
यथाप्रमाणं हि मया कृतो ब्रह्मप्रसादजः।
रुद्रश्च क्रोधजो विप्राः यूयं प्रकृतयस्तथा॥42॥
सूर्याचन्द्रमसौ चात्र भूमिरापोऽग्निरेव च।
सर्वे च नक्षत्रगणाः यच्चभूतादिशब्दितम्॥43॥
अधिकारेषु वर्तन्ते यथास्वं ब्रह्मवादिनः।
सर्वे प्रमाणं हि यथा तथा तच्छास्त्रमुत्तमम्॥44॥
भविष्यति प्रमाणं वै एतन्मदनुशासनम्।
तस्मात्प्रवक्ष्यते धर्मान् मनुस्स्वायम्भुवस्स्वयम्॥45॥
उशना बृहस्पतिश्चैव यदोत्पन्ना भविष्यतः।
तथा प्रवक्ष्यतःशास्त्रं युष्मन्मतिभिरुद्धृतम्॥46॥
स्वायम्भुवेषु धर्मेषु शास्त्रे चोशनसा कृते।
बृहस्पतिमते चैव लोकेषु प्रतिचारिते॥47॥
युष्मत्कृतमिदं शास्त्रं प्रजापालो वसुस्ततः।
बृहस्पतिसकाशाद्वै प्राप्स्यते द्विजसत्तमाः॥48॥
स हि मद्भावनिरतो मद्भक्तश्च भविष्यति।
तेन शास्त्रेण लोकेषु क्रियास्सर्वाः करिष्यति॥49॥
एतद्धि युष्मच्छास्त्राणां शास्त्रमुत्तमसंज्ञितम्।
एतदर्थ्यञ्च धर्म्यञ्च रहस्यञ्चैतदुत्तमम्॥50॥
अस्य प्रवर्तनाच्चैव प्रजावन्तो भविष्यथ।
न च राजश्रिया युक्तो भविष्यति महान्वसुः॥51॥
संस्थिते नृपतौ तस्मिन् शास्त्रमेतत्सनातनम्।
अन्तर्धास्यति तत्सर्वमेतद्वः कथितं मया॥52॥

एतावदुक्त्वा वचनमदृश्यः पुरुषोत्तमः।
विसृज्य तानृषीन् सर्वान्कामपि प्रसृतो दिशम्॥53॥
ततस्ते लोकपितरस्सर्वलोकार्थचिन्तकाः।
प्रावर्तयन्त तच्छास्त्रं धर्मयोनिं सनातनम्॥54॥
उत्पन्नेऽङ्गिरसे चैव युगे प्रथमकल्पिते।
साङ्गोपनिषदं शास्त्रं स्थापयित्वा बृहस्पतौ॥55॥
जग्मुर्यथेप्सितं देशं तपसे कृतनिश्चयाः।
धारणाः सर्वलोकानां सर्वधर्मप्रवर्तकाः॥56॥
( जग्मुर्यथेप्सितं सर्वलोकानां सर्वधर्मप्रवर्तकाः? )

चतुश्चत्वारिंशदुत्तरत्रिशततमे[1]—

ततोऽतीते महाकल्पे उत्पन्नेऽङ्गिरसस्सुते।
बभूवुर्निर्वृता देवा जाते देवपुरोहिते॥1॥
बृहत् ब्रह्मा महच्चेति शब्दाः पर्यायवाचकाः।
एभिस्समन्वितो राजन् गुणैर्विद्वान् बृहस्पतिः॥2॥
तस्य शिष्यो बभूवाग्र्यो राजोपरिचरो वसुः।
अधीतवांस्तदा शास्त्रं सम्यक् चित्रशिखण्डिजम्॥3॥
न राजा भावितः पूर्वं देवेन विधिना वसुः।
पालयामास पृथिवीं दिवमाखण्डलो यथा॥4॥
तस्य यज्ञो महानासीदश्वमेधो महात्मनः।
बृहस्पतिरुपाध्यायस्तस्य होता बभूव ह॥5॥
प्रजापतिसुताश्चात्र सदस्या श्चाभवन् त्रयः।
एकतश्चद्वितश्चेति त्रितश्चैव महर्षयः॥6॥
धनुषाख्योऽथ रैभ्यश्चार्वावसुश्च परावसुः( अर्वावसुपरावसू? )।
ऋषिर्मेधातिथिश्चैव ताण्ड्यश्चैव महानृषिः॥7॥
ऋषिः शान्तिर्महाभागस्तथा वेदशिराश्च यः।
ऋषिश्रेष्ठश्च कपिलः शालिहोत्रपिता स्मृतः॥8॥
कण्वोऽथ देवहोत्रश्च एते षोडश कीर्तिताः।
सम्भूतास्सर्वसम्भाराः तस्मिन् राजमहाक्रतौ॥9॥

1. म.भार.12.344

आद्यः कठः तैत्तिरिश्च वैशम्पायनपूर्वजः।
न तत्र पशुघातोऽभूत् स राजैवं स्थितोऽभवत्॥10॥
अहिंस्रः शुचिरक्षुद्रो निराशीः कर्मसंस्तुतः।
आरण्यकपदोद्भूता भागास्तत्रोपकल्पिताः॥11॥
प्रीतस्ततोस्यऽभगवान् देवदेवः पुरातनः।
साक्षात्तं दर्शयामास सोऽदृश्योऽन्येन केनचित्॥12॥
स्वयं भागमुपाघ्राय पुरोडाशं गृहीतवान्।
अदृश्येन हृतो भागो देवेन हरिमेधसा॥13॥
बृहस्पतिस्ततः क्रुद्धः स्रुचमुद्यम्य वेगतः।
आकाशं घ्नन् स्रुचः पातैः रोषादश्रूण्यवर्तयत्॥14॥
उवाच चोपरिचरं महाभागोयऽमुद्यतः।
ग्राह्यस्स्वयं हि देवेन मत्प्रत्यक्षं न संशयः॥15॥
उद्यता यज्ञभागा हि साक्षात्प्राप्ताः सुरैरिह।
किमर्थमिह न प्राप्तो दर्शनं मे हरिर्नृप॥16॥
ततस्स तं समुद्भूतं भूमिपालो महान्वसुः।
प्रसादयामास मुनिं सदस्यास्ते च सर्वशः॥17॥
हुतस्त्वया वदानीह पुरोडाशस्य यावती।
गृहीता देवदेवेन मत्प्रत्यक्षं न संशयः॥18॥
इत्येवमुक्ते वसुना सरोषश्चाब्रवीद्गुरुः।
न यजेयमहञ्चात्र परिभूतस्त्वया नृप॥19॥
त्वया पशुर्वारितश्च कृतः पिष्टमयः पशुः।
त्वं देवं पश्यसे नित्यं न पश्येयमहं कथम्॥20॥

वसुरुवाच—

पशुहिंसा वारिता च यजुर्वेदादिमन्त्रतः।
अहं न वारये हिंसां द्रक्ष्याम्येकान्तिको हरिम्।
तस्मात्कोपो न कर्तव्यो भवता गुरुणा मयि॥21॥
वसुमेवं ब्रुवाणन्तु कृद्ध एवं बृहस्पतिः।
उवाच ऋत्विजश्चैव किं नः कर्मेति वारयन्॥22॥
अथैकतो द्वितश्चैव त्रितश्चैव महर्षयः।
ऊचुश्चैनमसम्भ्रान्ताः न रोषं कर्तुमर्हसि॥23॥

श‍ृणु त्वं वचनं पुत्र अस्माभिस्समुदाहृतम्।
नैष धर्मः कृतयुगे यत्त्वं रोषमिहाहिथाः॥24॥
अरोषणो ह्यसौ देवे यस्य भागोऽयमुद्यतः।
न स शक्यस्त्वया द्रष्टुमस्माभिर्वा बृहस्पते।
यस्य प्रसादं कुरुते स वै तं द्रष्टुमर्हति॥25॥
वयं हि ब्रह्मणः पुत्राः मानसाः परिकीर्तिताः।
वयं निःश्रेयसार्थं हि कदाचिद्दिशमुत्तराम्॥26॥
तप्त्वा वर्षसहस्राणि चत्वारि तप उत्तमम्।
एकपादाः स्थितास्सम्यक् काष्ठभूतास्समाहिताः॥27॥
मेरोरुत्तरभागे तु क्षीरोदस्यानुकूलतः।
स देशो यत्रे नस्तप्तं तपः परमदारुणम्॥28॥
वरेण्यं वरदं तं वै देवदेवं सनातनम्।
कथं पश्येमहि वयं देवं नारायणन्त्विति॥29॥
अथ व्रतस्यावभृथे वागुवाचाशरीरिणी।
स्निग्धगम्भीरया वाचा प्रहर्षणकरी विभो॥30॥
सुतप्तं वस्तपो विप्राः प्रसन्नेनान्तरात्मना।
यूयं जिज्ञासवो भक्ताः कथं द्रक्ष्यथ तं प्रभुम्॥31॥
क्षीरोदधेरुत्तरतः श्वेतद्वीपो महाप्रभः।
अत्र नारायणपराः मानवाश्चन्द्रवर्चसः॥32॥
एकान्तभावोपगताः ते भक्ताः पुरुषोत्तमम्।
ते सहस्रार्चिषं देवं प्रविशन्ति सनातनम्॥33॥
अनिन्द्रिया अनाहारा अनिष्पन्दास्सुगन्धिनः।
एकान्तिनस्ते पुरुषाः श्वेतद्वीपनिवासिनः॥34॥
गच्छध्वं तत्र मुनयः तत्रात्मा मे प्रकाशितः।
अथ श्रुत्वा वयं सर्वे वाचं नामाशरीरिणीम्॥35॥
यथाख्यातेन मार्गेण देशं तं प्रविशेमहि।
प्राप्य श्वेतं महाद्वीपं तच्चित्तास्तद्दिदृक्षवः॥36॥
सहसा हि गताः सर्वे तेजसा तस्य मोहिताः।
ततोऽस्मद्दृदृष्टिविषयास्तदा प्रतिहतोऽभवत्॥37॥

न च पश्याम पुरुषं तत्तेजोहत दर्शनाः।
ततो नः प्रादुरभवद्विज्ञानं देवयोगजम्॥38॥
न किलातप्ततपसा शक्यते द्रष्टुमञ्जसा।
ततः पुनर्वर्षशतं तप्त्वा तात्कालिकं महत्॥39॥
व्रतावसाने च शुभान्नरान् ददृशिमो वयम्।
श्वेतांश्चन्द्रप्रतीकाशान् सर्वलक्षणलक्षितान्॥40॥
नित्याञ्जलिकृतान् ब्रह्म जगतः प्रागुदङ्मुखान्।
मानसो नाम स जपो जप्यते तैर्महात्मभिः॥41॥
तेनैकाग्रमनस्त्वेन प्रीतो भवति वै हरिः।
याऽभवन्मुनिशार्दूल भाः सूर्यस्य युगक्षये।
एकैकस्य प्रभा तादृक् साऽभवन्मानवस्य ह॥42॥
तेजोनिवासस्स द्वीप इति वै मेनिरे वयम्।
न तत्राभ्यधिकः कश्चित् सर्वे ते समतेजसः॥43॥
अथ सूर्यसहस्रस्य प्रभां युगपदुत्थिताम्।
सहसा दृष्टवन्तश्च पुनरेव बृहस्पते॥44॥
सहिताश्चाप्यधावन्तः ततस्ते मानवा द्रुतम्।
कृताञ्जलिपुटा हृष्टाः नम इत्येव वादिनः॥45॥
ततो हि वदतां तेषामश्रौष्म विपुलं ध्वनिम्।
बलिः किलोपह्रियते तस्य देवस्य तैर्नरैः॥46॥
वयन्तु तेजसा तस्य सहसा हृतचेतसः।
न किञ्चिदपि पश्यामो हतदृष्टि ( चक्षुर्? ) बलेन्द्रियाः॥47॥
एकस्तु शब्दो विततः श्रुतोऽस्माभिरुदीरितः।
आकाशं पूरयन् सर्वं शीक्षाक्षरसमन्वितः॥48॥
जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन।
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज॥49॥
इति शब्दः श्रुतोऽस्माभिश्शिक्षाक्षरसमन्वितः।
एतस्मिन्नन्तरे वायुस्सर्वगन्धवहश्शुचिः॥50॥
दिव्यान्युवाह पुष्पाणि कर्मण्याश्चौषधीस्तथा।

तैरिष्टः पञ्चकालज्ञैर्हरिरेकान्तिभिर्नरैः।
भक्त्या परमया युक्तैः मनोवाक्कर्मभिस्तदा॥51॥
नूनं तत्रागतो देवो यथा तैर्वागुदीरिता।
वयन्त्वेनं न पश्यामो मोहितास्तस्य मायया॥52॥
मारुते सन्निवृत्ते च बलौ च प्रतिपादिते।
चिन्ताव्याकुलितात्मानो जाताः स्मोऽङ्गिरसां वर॥53॥
मानवानां सहस्रेषु तेषु वै शुद्धयोनिषु।
अस्मान्न कश्चिन्मनसा चक्षुषा वाऽप्यपूजयत्॥54॥
तेऽपि स्वस्था मुनिगणाः एकभावमनुव्रताः।
नास्मासु दधिरे भावं ब्रह्मभावमनुष्ठिताः॥55॥
ततोऽस्मान् सुपरिश्रान्तान् तापसा चापि कर्शितान्।
उवाच स्वस्थं किमपि भूतं तत्राशरीरकम्॥56॥

देव उवाच—

दृष्टा वः पुरुषाः श्वेताः सर्वेन्द्रियविवर्जिताः।
दृष्टो भवति देवेश एभिर्दृष्टैः द्विजोत्तमैः॥57॥
गच्छध्वं मुनयस्सर्वे यथागतमितोऽचिरात्।
न स शक्यस्त्वभक्तेन द्रष्टुं देवः कथञ्चन॥58॥
कामं कालेन महता एकान्तित्वमुपागतैः।
शक्यो द्रष्टुं स भगवान् प्रभामण्डलदुर्दृशः॥59॥
ततस्तदद्भुतं वाक्यं निशम्यैवामृतोपमम्।
तस्य प्रसादात्प्राप्ताः स्मो देशमीप्सितमञ्जसा॥62॥
एवं सुतपसा चैव हव्यकव्यैस्तथैव च।
देशोस्माभिर्न दृष्टः स कथन्त्वन्द्रष्टुमर्हसि॥63॥
नारायणो महद्भूतं विश्वस्त्रग्घव्यकव्यभुक्।
अनादिनिधनोऽव्यक्तो देवदानवपूजितः॥64॥
एवमेकतवाक्येन द्वितत्रितमतेन च।
अनुनीतस्सदस्यैश्च बृहस्पतिरुदारधीः।
समापयत् ततो यज्ञं दैवतं समपूजयत्॥65॥
समाप्तयज्ञो राजाऽपि प्रजाः पालितवान् वसुः॥66॥ इति।

'यथाप्रमाणं हि मया कृतो ब्रह्मप्रसादजः' इति - यथाप्रमाणमिति प्रकृतं पञ्चरात्रं विवक्षितम्। 'सर्वं प्रमाणं हि यथा तथा तच्छास्त्रमुत्तमम्' इति - सर्वप्रमाणमिति - सर्वप्रमाणं वेदः। वेदतुल्यमिदं शास्त्रमित्यर्थः। अतो वक्ष्यमाणं मानवमूलत्वमुपपन्नमेवेति भावः। 'आरण्यकपदोद्गीता' इति - वेदान्तेषु 'तदेवाग्निरि'त्यादिभिर्भगवदर्थतयोपदिष्टा इत्यर्थः। 'तैरिष्टं पञ्चकालज्ञैरि'ति - पञ्चकालज्ञपदेन पञ्चरात्रनिष्ठता सूच्यते। तत्रैवाभिगमनोपादानेज्यास्वाध्याययोगयोग्यपञ्चविभागक-प्रतिपादनात्। एवं वसुवृत्तान्तप्रदर्शनेन 'जुहुयात्केन विधिने'ति प्रश्नस्य पञ्चरात्रविधिनेत्युत्तरमुक्तं भवति।

सप्तचत्वारिंशदुत्तरत्रिशततमे[1]—

**तमुवाच नतं मूर्ध्ना देवानामादिरव्ययः॥11॥**

श्रीभगवानुवाच—

**एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः।**
**इमन्देशमनुप्राप्ताः मम दर्शनलालसाः॥12॥**
**न च मां ते ददृशिरे न च दृश्यति कश्चन।**
**ऋते ह्यैकान्तिकश्रेष्ठात् त्वञ्चैवैकान्तिकोत्तम॥13॥**

इत्यादिना ऐकान्त्यप्रभावः उक्तः।

अष्टचत्वारिंशदुत्तरत्रिशततमे[2]—

**इदं महोपनिषदं चतुर्वेदसमन्वितम्।**
**साङ्ख्ययोगकृतं तेन पञ्चरात्रानुशब्दितम्॥62॥**
**नारायणमुखोदीतं नारदोऽश्रावयत्पुनः।**
**ब्रह्मणस्सदने तात यथादृष्टं यथाश्रुतम्॥63॥**
**श्रुत्वा ब्रह्ममुखाद्रुद्रः स देव्यै कथयेत्पुनः।**

युधिष्ठिर उवाच—

**एतदाश्चर्यभूतं हि माहात्म्यं तस्य धीमतः।**
**किं वै ब्रह्मा न जानीते यतः शुश्राव नारदात्॥64॥**
**पितामहोऽपि भगवान् तस्यार्थे हितचिन्तकः (तस्माद्देवादनन्तरः?)।**
**कथं स न विजानीयात् प्रभावममितौजसः॥65॥**

---

1. म.भार.12.347
2. म.भार.12.348

भीष्म उवाच—

सर्गस्यादौ स्मृतो ब्रह्मा प्रजासर्गकरः प्रभुः।
जानाति देवप्रवरं भूयश्चातोऽधिकं नृप।
परमात्मानमीशानमात्मनः प्रभवं तथा॥67॥
ये त्वन्ये ब्रह्मसदने सिद्धसङ्घास्समागताः।
तेभ्यस्तच्छ्रावयामास पुराणं वेदसम्मितम्॥68॥
आत्मानुगामिनां ब्रह्मा श्रावयामास तत्त्वतः।
एवं पुरा प्राप्तमिदं भानुना मुनिभाषितम्॥69॥
वर्षषष्टिसहस्राणि षष्टिवर्षशतानि च।
सूर्यस्य तपतो लोकान् निर्मिता ये पुरस्सराः।
तेषामकथयत्सूर्यः सर्वेषां भावितात्मनाम्॥70॥
सूर्यानुगामिभिस्तात ऋषिभिस्तैर्महात्मभिः।
मेरौ समागता देवाः श्राविताश्चेदमुत्तमम्॥71॥
देवानान्तु सकाशाद्वै ततः श्रुत्वाऽसितो द्विजः।
श्रावयामास राजेन्द्र पितॄन्वै मुनिसत्तमः॥72॥
इदं परावराख्यातमदिशन्मनुना श्रुतम्।
ममापि च पिता तात कथयामास शन्तनुः।
ततो मयापि श्रुत्वा च कीर्तितन्तव भारत॥73॥
सुरैर्वा मुनिभिर्वापि पुराणं यैरिदं श्रुतम्।
सर्वे ते परमात्मानं पूजयन्ते समन्ततः॥74॥
इदमाख्यानमार्षेयं पारम्पर्यागतं नृप।
नावासुदेवभक्ताय त्वया देयं कथञ्चन॥75॥
आख्यानमुत्तमञ्चेदं श्रावयेद्यस्सदा नृप।
तदैव मनुजो भक्तः शुचिर्भूत्वा समाहितः।
प्राप्नुयादचिराद्राजन् विष्णुलोकं च शाश्वतम्॥76॥
मत्तोऽन्यानि च ते राजन्नुपाख्यानशतानि च।
यानि श्रुतानि सर्माणि तेषां सारोऽयमुद्धतः॥77॥
सुरासुरैर्यथा राजन् निर्मथ्यामृतमुद्धतम्।
एवमेतत्पुरा विप्रैः कथामृतमिहोद्धतम्॥78॥

**यश्चेदं पठते नित्यं यश्चेदं शृणुयान्नरः।**
**एकान्तभावोपगतः एकान्ते सुसमाहितः॥79॥**
**प्राप्य श्वेतं महाद्वीपं भूत्वा चन्द्रप्रभो नरः।**
**सहस्रार्चिषन्देवं प्रविशेन्नात्र संशयः॥80॥**

(वैशम्पायन उवाच?)

**श्रुत्वैतदाख्यानवरं धर्मराट् जनमेजय।**
**भ्रातरश्चास्य ते सर्वे नारायणपराभवन्॥84॥**
**जितं भगवता तेन पुरुषेणेति भारत।**
**नित्यं जप्यपराभूत्वा सारस्वतमुदैरयन्॥85॥**
**यो ह्यस्माकं गुरुः श्रेष्ठः कृष्णद्वैपायनो मुनिः।**
**जगौ परमकं जप्यं नारायणमुदीरयन्॥86॥**
**गत्वान्तरिक्षात्सततं क्षीरोदममृताशयम्।**
**पूजयित्वा च देवेशं पुनरायात्स्वमाश्रयमम्॥87॥**
**एतत्ते सर्वमाख्यातं नारदोक्तं मया तव (मयेरितम्?)।**
**पारम्पर्यागतं ह्येतत् पित्रा मे कथितं पुरा॥88॥** इति।

अत्र वसुवृत्तान्ते पञ्चरात्रस्य प्रस्तुतत्वात् तत्प्रधानार्थस्यैकान्त्यस्य व्यूहजगत्कारणत्वादेश्चैतावत्पर्यन्तमनुवृत्तत्वाच्च 'इदं महोपनिषदमि'त्यत्रेदमिति पञ्चरात्रस्य परामर्शः। ऐकान्त्यस्य श्वेतद्वीपवासिषु दर्शनात् व्यूहभेदतत्कारणत्वादेः भगवतोपदिष्टत्वाच्च। अर्थमुखतो दर्शनश्रवणे अभिप्रेत्य 'यथादृष्टं यथाश्रुतमि'त्युक्तम्।

त्रिपञ्चाशदुत्तरत्रिशततमे[1]—

**इदं शतसहस्राद्धि भारताख्यानविस्तरात्।**
**आमथ्य मतिन्थेन ज्ञानोदधिमनुत्तमम्॥11॥**
**(आविध्य मतिमन्थानं दध्नो घृतमिवोद्धृतम्?)**
**नवनीतं यथादध्नो मलयाच्चन्दनं यथा।**
**आरण्यकं च वेदेभ्यो ओषधीभ्योऽमृतं यथा।**
**समुद्धृतमिदं ब्रह्मन् कथाऽमृतमिदं तथा॥12॥**
**तपोनिधे त्वयैवोक्तं(त्वयोक्तं हि?) नारायणकथाश्रयम्॥13॥** इति।

---

1. म.भार.12.353

भगवान् वेदाचार्यो भारताख्यानविस्तरप्रोक्तेष्वर्थेषु मध्ये पञ्चरात्रप्रतिपाद्यपरमैकान्त्यार्थसञ्जातमेव सारभूतमिति निष्कृष्टवानिति यावत्।

**ब्रह्माद्या ऋषयश्चैव ( यद्ब्रह्म ऋषयश्चैव? ) स्वयं पशुपतिश्च यत्॥61॥**
**शेषाश्च विबुधश्रेष्ठा दैत्यदानवराक्षसाः।**
**नागास्सुपर्णा गन्धर्वास्सिद्धा राजर्षयश्च ते॥62॥**
**हव्यं कव्यञ्च सततं विधिपूर्वं ( विधियुक्तं? ) प्रयुञ्जते।**
**कृत्स्नं ति तस्य देवस्य चरणावुपतिष्ठतः॥63॥**
**याः क्रियास्सम्प्रयुक्ताश्च ऐकान्तगतबुद्धिभिः।**
**तास्सर्वाश्शिरसा देवः प्रतिगृह्णाति वै स्वयम्॥64॥**
**न तस्यान्यः प्रियतरः प्रतिबुद्धैर्महात्मभिः।**
**विद्यते त्रिषु लोकेषु ततेऽस्यैकान्तिकङ्गतः॥65॥**

इति ब्रह्मरुद्रादिभ्योऽपि पञ्चरात्रप्रतिपाद्यैकान्त्यनिष्ठा अभ्यर्हिता इत्युक्तम्।

चतुःपञ्चाशदुत्तरत्रिशततमे[1]—

**समाहितमनस्काश्च निश्चितास्संयतेन्द्रियाः।**
**एकान्तभावोपगताः वासुदेवं विशन्ति ते॥19॥**

इति पुनरेकान्तभाव उक्तः।

पञ्चपञ्चाशदुत्तरत्रिशततमे[2]—

**कस्यचित्त्वथ कालस्य नारदः परमेष्ठिजः।**
**दैवं कृत्वा यथान्यायं पित्र्यं चक्रे ततः परम्॥1॥**
**ततस्तं वचनं प्राह ज्येष्ठो धर्मात्मजः प्रभुः।**
**क इज्यते द्विजश्रेष्ठ दैवे पित्र्ये च कल्पिते॥2॥**
**त्वया मतिमतां श्रेष्ठ तन्मे शंस यथातथम्॥3॥** इति प्रश्नमुपक्षिप्य,
**त्वयैतत्कथितं पूर्वं दैवं कर्तव्यमित्यपि।**
**दैवतञ्च परो ज्ञेयः परमात्मा सनातनः॥4॥**
**ततस्तद्भावितो नित्यं यजे वैकुम्ठमव्ययम्॥5॥**

इति प्रश्नस्योत्तरं पुनः स्मारितम्। अनन्तरं परीवाहवृत्तान्तेन तदेव स्मारितम्।

---

1. म.भार.12.354
2. म.भार.12.355

**ये यजन्ति पितृन् देवान् गुरुंश्चैवातिथींस्तथा।**
**गाश्चैव द्विज मुख्यांश्च पितरं मातरं तथा॥25॥**
**कर्मणा मनसा वाचा विष्णुमेव यजन्ति ते।**
**अन्तर्गतस्स भगवान् सर्वसत्त्वशरीरगः॥26॥**
**समस्सर्वेषु भूतेषु ईश्वरस्सुखदुःखयोः।**
**महान्महात्मा सर्वात्मा नारायण इति श्रुतिः॥27॥**

इति भगवत एव करणत्रयेज्यत्वे श्रुतीनां तात्पर्यमित्युक्तम्।

षट्पञ्चाशदुत्तरत्रिशततमे[1]—

**श्रुत्वैतन्नारदो वाक्यं नरनारायणेरितम्।**
**अत्यन्तं भक्तिमान्देवे एकान्तित्वमुपेयिवान्॥1॥**

इति 'पञ्चरात्रमुपेयिवानि'ति पञ्चरात्रार्थनिष्ठा(+)दमुक्तम्।

अष्टपञ्चाशदुत्तरत्रिशततमे[2]—

**अहो ह्येकान्तिनस्सर्वान् प्रीणाति भगवान् हरिः।**
**विधिप्रयुक्तां पूजाञ्च गृह्णाति शिरसा स्वयम्॥1॥**
**एकान्तिनस्तु पुरुषाः गच्छन्ति परमं पदम्॥3॥**
**नूनमेकान्तिधर्मोऽयं श्रेष्ठो नारायणप्रियः।**
**अगत्वा गतयस्तिस्रो यद्गच्छत्यव्ययं हरिम्॥4॥**
**सर्वोपनिषदान् वेदान् ये विप्रास्सम्यगास्थिताः।**
**पठन्ति विधिमास्थाय ये चापि यतिधर्मिणः॥5॥**
**तेभ्यो विशिष्टां जानामि गतिमेकान्तिनां नृणाम्॥6॥**
**इति पुनरैकान्त्यप्रभाव उक्तः। अनन्तरञ्च,**
**केनैष धर्मः कथितो देवेन ऋषिणाऽपि वा॥7॥**
**एकान्तिनाञ्च का चर्या कदा चोत्पादिता विभो।**
**एतन्मे संशयं छिन्धि परं कौतूहलं हि मे॥8॥**

इति जनमेजयप्रश्नमुपक्षिप्य,

**एतदर्थं महाराज पृष्टः पार्थेन नारदः।**
**ऋषिमध्ये महाभागः शृण्वतोः कृष्णभीष्मयोः॥11॥**

---

1. म.भार.12.356
2. म.भार.12.358

गुरुणा च मयाऽप्येषः कथितो नृपसत्तम।
यथा तत्कथितं तत्र नारदेन तथा श्रुणु॥12॥
यदाऽऽसीन्मानसं जन्म नारायणमुखोद्गतम्।
ब्रह्मणः पृथिवीपाल तथा नारायणः स्वयम्॥13॥
तेन धर्मेण कृतवान् दैवं पित्र्यञ्च भारत।
फेनपा ऋषयश्चैव तं धर्मं प्रतिप्रेदिरे॥14॥
वैखानसाः फेनपेभ्यो धर्ममेतदवाप्नुवन् ( धर्मं तं प्रतिपेदिरे? )।
वैखानसेभ्यो सोमस्तु ततस्सोऽन्तर्दधे पुनः॥15॥
यदाऽऽसीच्चाक्षुषं जन्म द्वितीयं ब्रह्मणो नृप।
यदा ( तदा? ) पितामहेनैव सोमाद्धर्मः परिश्रुतः॥16॥
नारायणात्मको राजन् रुद्राय प्रददौ च तम्।
ततो योगस्थितो रुद्रः पुरा कृतयुगे नृप॥17॥
वालखिल्यान् ऋषीन् सर्वान् धर्ममेनमपाठयत्।
अन्तर्दधे ततो भूयस्तस्य देवस्य मायया॥18॥
तृतीयं ब्रह्मणो जन्म यदासीद्वाचिकं महत्।
तत्रैव धर्मस्सम्भूतस्स्वयं नारायणात् नृप॥19॥
सुपर्णो नाम तमृषिः प्राप्तवान्पुरुषोत्तमात्।
तपसा वै सुतप्तेन दमेन नियमेन च॥20॥
त्रिः परिक्रान्तवानेवं ( एतत्? ) सुपर्णो धर्ममुत्तमम्।
यस्मात्तस्माद्व्रतं ह्येतत् त्रिसौपर्णमिहोच्यते॥21॥
ऋग्वेदवादपठितं व्रतमेतत्सुदुश्चरम् ( एतद्धि दुश्चरम्? )।
सुपर्णच्चाप्यधिगतः धर्म एष सनातनः॥22॥
वायुना द्विपदां श्रेष्ठः प्रथितो जगदायुषा।
वायोस्सकाशात्प्राप्तश्च ऋषिभिर्विघसाशिभिः॥23॥
तेभ्यो महोदधिश्चैव प्राप्तवान् धर्ममुत्तमम्।
ततस्सोऽन्तर्दधे भूयो नारायणसमाहृतः॥24॥
यदा भूयः श्रवणजा सृष्टिरासीन्महात्मनः।
ब्रह्मणः पुरुषव्याघ्र तत्र कीर्तयतः शृणु॥25॥
जगत्स्त्रष्टुमना देवो हरिर्नारायणस्स्वयम्।
चिन्तयामास पुरुषं जगत्सर्गकरं प्रभुम्॥26॥

अथ चिन्तयतस्तस्य कर्णाभ्यां पुरुषस्स्मृतः।
प्रजासर्गकरो ब्रह्मा तमुवाच जगत्पतिः॥27॥
सृज प्रजाः पुत्र सर्वाः मुखतः पादतस्तथा।
श्रेयस्तव विधास्यामि बलं तेजश्च सुव्रत॥28॥
धर्मञ्च मत्तो गृह्णीष्व सात्वतन्नाम नामतः।
तेन सृष्टं कृतयुगं स्थापयस्व यथाविधि॥29॥
ततो ब्रह्मा नमश्चक्रे देवाय हरिमेधसे।
धर्म्यञ्चाग्र्यं स जग्राह सरहस्यं ससंग्रहम्॥30॥
आरण्यकेन सहितं नारायणमुखोद्गतम्।
उपदिश्य ततो धर्मं ब्रह्मणेऽमिततेजसे॥31॥
तं कार्तयुगधर्माणं निराशीः कर्मसंज्ञितम्।
जगाम तपसः पारं यत्राव्यक्तं व्यवस्थितम्॥32॥
ततोऽथ वरदो देवो ब्रह्मा लोकपितामहः।
असृजत्स ततो लोकान् कृत्स्नान् स्थावरजङ्गमान्॥33॥
ततः प्रावर्तत तदा पूर्वं ( आदौ? ) कृतयुगं शुभम्।
ततो हि सात्वतो धर्मो व्याप्य लोकानवस्थितः॥34॥
तेनैवाद्येन धर्मेण ब्रह्मलोकविसर्गकृत्।
पूजयामास देवेशं हरिं नारायणं प्रभुम्॥35॥
धर्मप्रतिष्ठाहेतोश्च मनुं स्वारोचिषं ततः।
अध्यापयामास तदा लोकानां हितकाम्यया॥36॥
ततः स्वारोचिषः पुत्रं स्वयं शङ्खपदं नृप।
अध्यापयत्पुराऽव्यग्रः सर्वलोकपतिः विभुः॥37॥
ततश्शङ्खपदश्चापि पुत्रमात्मजमौरसम्।
दिशापालं सुधर्माणमध्यापयत भारत।
ततस्सोऽन्तर्दधे ( सोऽन्तर्दधे ततो ) भूयः प्राप्ते त्रेतायुगे पुनः॥38॥
नासत्ये जन्मनि पुरा ब्रह्मणः पार्थिवोत्तम।
धर्ममेतं स्वयं देवो हरिर्नारायणः प्रभुः॥39॥
व्याजहारारविन्दाक्षो ब्रह्मणः पश्यतस्तदा।
सनत्कुमारो भगवान् ततः प्राधीतवान्नृप॥40॥

सनत्कुमारादपि च वीरणो वै प्रजापतिः।
कृतादौ कुरुशार्दूल धर्ममेतमधीतवान्॥41॥
वीरणश्चाप्यधीत्यैनं रैभ्याय मनये ददौ।
रैभ्यः पुत्राय शुद्धाय सुव्रताय सुमेधसे॥42॥
कुक्षिपालाय च प्रददौ विशालाय च धर्मिणे।
ततोऽप्यन्तर्दधे भूयो नारायणमुखोद्गतः॥43॥
अण्डजे जन्मनि पुनः ब्रह्मणे हरियोनये।
एष धर्मस्समुद्भूतो नरायणमुखात् पुनः॥44॥
गृहीतो ब्रह्मणा राजन् प्रयुक्तश्च यथाविधि।
अध्यापिताश्च मुनयो नाम्ना बर्हिषदो नृप॥45॥
बर्हिषद्भ्यश्च सम्प्राप्तः सामवेदान्तगं द्विजम्।
ज्येष्ठं नामाभिविख्यातं ज्येष्ठसामव्रतो हरिः॥46॥
ज्येष्ठाच्चाप्यनुसङ्क्रान्तो राजानमविकम्पनम्।
अन्तर्दधे ततो राजन् एष धर्मः प्रभोर्हरेः॥47॥
यदिदं सप्तमं जन्यं पद्मजं ब्रह्मणो नृप।
तत्रैष धर्मः कथितस्स्वयं नारायणेन ह॥48॥
पितामहाय शुद्धाय युगादौ लोकधारिणे।
पितामहश्च दक्षाय धर्ममेतं पुरा ददौ॥49॥
ततो ज्येष्ठे तु दौहित्रे प्रादादृक्षो नृपोत्तम।
आदित्ये सवितुर्ज्येष्ठे विवस्वान् जगृहे ततः॥50॥
त्रेतायुगादौ च ततो विवस्वान् मनवे ददौ।
मनुश्च लोकभूत्यर्थं सुतायेक्ष्वाकवे ददौ॥51॥
इक्ष्वाकुणा च कथितो व्याप्य लोकानवस्थितः।
गमिष्यति क्षयान्ते च पुनर्नारायणं नृपः॥52॥
यतीनां चापि यो धर्मः स ते पूर्वं नृपोत्तम।
कथितो हरिगीतासु समासविधिकल्पितः॥53॥
नारदेन च सम्प्रोक्तस्सरहस्यस्ससङ्ग्रहः।
एष धर्मो जगन्नाथात् साक्षान्नारायणान्नृप॥54॥
एवमेष महाधर्मः आर्यो राजन् सनातनः।
दुर्विज्ञेयो दुष्करश्च सात्वतैर्धार्यते सदा॥55॥

**धर्मज्ञानेन चानेन ( चैतेन? ) सम्प्रयुक्तेन कर्मणा।**
**अहिंसाधर्मयुक्तेन प्रीयते हरिरीश्वरः॥56॥**
**एकव्यूहविभागो वा क्वचिद्दिव्यूहसंज्ञितः।**
**त्रिव्यूहश्चापि सङ्ख्यातश्चतुर्व्यूहश्च दृश्यते॥57॥**
**हरिरेव हि क्षेत्रज्ञो निर्गुणस्सगुणस्तथा ( निर्ममो निष्कलस्तथा? )।**
**जीवश्च सर्वभूतेषु सर्वभूतगुणातिगः॥58॥**
**मनश्च प्रथितं राजन् पञ्चेन्द्रियसमीरणम्।**
**एष लोकनिधिः श्रीमानेष लोकविसर्गकृत्॥59॥**
**अकर्ता चैव कर्ता च कार्यं कारणमेव च।**
**यथच्छति तथा राजन् क्रीडते पुरुषोऽव्ययः॥60॥**
**एष एकान्तिधर्मस्ते कीर्तितो नृपसत्तम।**
**मया गुरुप्रसादेन दुर्विज्ञेयोऽकृतात्मभिः॥61॥**
**एकान्तिनो हि पुरुषाः दुर्लभा बहवो नृप।**
**यद्येकान्तिभिराकीर्णं जगत्स्यात्कुरुनन्दन॥62॥**
**अहिंसकैरात्मविद्भिस्सर्वभूतहितेरतैः।**
**भवेत्कृतयुगप्राप्तिराशीः कर्मवर्जिता॥63॥**
**( मुक्तानाञ्चैव यो धर्मः सत्यसन्ध नृपोत्तम। )**
**एवं स भगवान् व्यासो गुरुर्मम विशाम्पते।**
**कथयामास धर्मज्ञः धर्मराजे द्विजोत्तमः॥64॥**
**ऋषीणां सन्निधौ राजन् शृण्वतोः कृष्णभीष्मयोः॥65॥**

इत्युत्तरेण 'पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयमि'त्येतद्विवृतम्। 'कथितो हरिगीतास्वि'त्यनेन पञ्चरात्रप्रतिपाद्यैकान्त्यपरत्वम् गीतायां सूचितम्। एवञ्च चित्रशिखण्डप्रभृतीनां भगवत्प्रसादेन प्रवर्तकत्वमात्रमेवेति बोध्यम्।

अनन्तरञ्च —

**एवं बहुविधं धर्मं प्रतिबुद्धैर्निषेवितम्।**
**न कुर्वन्ति कथां विप्राः ह्यन्ये नानाव्रते स्थिताः॥67॥**

इति जनमेजयस्य प्रश्नमुपक्षिप्य,

**तिस्रः प्रकृतयो राजन् देहबन्धेषु निर्मिताः।**
**सात्त्विकी राजसी चैव तामसी चैव भारत॥68॥**

देहबन्धेषु पुरुषः श्रेष्ठः कुरुकुलोद्वह।
सात्त्विकः पुरुषव्याघ्र भवेन्मोक्षार्थचिन्तकः ( मोक्षाय निश्चितः? )॥69॥
अत्रापि न विजानाति पुरुषं ब्रह्मवित्तमम्।
नारायणपरो भूत्वा ( नारायणं परं मोक्षे ) ततो वै सात्त्विकस्स्मृतः॥70॥
मनीषितञ्च प्राप्नोति चिन्तयन् पुरुषोत्तमम्।
एकान्तभक्तस्सततं नारायणपरायणः॥71॥
मनीषिणो हि ये केचिद्यतयो मोक्षधर्मिणः।
तेषां विच्छिन्नतृष्णानां योगक्षेमवहो हरिः॥72॥
जायमानं हि पुरुषं यं पश्येन्मधुसूदनः।
सात्त्विकस्स तु विज्ञेयस्स वै मोक्षार्थचिन्तकः॥73॥
साङ्ख्ययोगेन तुल्यो हि धर्म एकान्तिसवितः।
नारायणात्मके मोक्षे ततो यान्ति पराङ्गतिम्॥74॥
नारायणो न दृष्टश्च प्रतिबुद्धो नरो भवेत्।
एकमात्मेच्छया राजन् प्रतिबुद्धो न जायते॥75॥
राजसी तामसी चैव व्यामिश्रे प्रकृती स्मृते।
तदात्मकं हि पुरुषं जायमानं विशाम्पते।
प्रवृत्तिलक्षणैर्युक्तं नावेक्षति हरिस्स्वयम्॥76॥
पश्यत्येनं जायमानं ब्रह्मा लोकपितामहः।
रजसा तमसा चैव मानसं समभिप्लुतम्॥77॥
कामं देवाश्च ऋषयस्सत्त्वस्था नृपसत्तम।
हीनः सत्त्वेन सूक्ष्मेण ततो वैकारिकास्स्मृताः॥78॥

जनमेजय उवाच—

कथं वैकारिको गच्छेत् पुरुषः पुरुषोत्तमम्।
वद सर्वं यथादृष्टं प्रवृत्तिं च यथाक्रमम्॥79॥

वैशम्पायन उवाच—

सुसूक्ष्मं तत्त्वसंयुक्तं संयुक्तं त्रिभिरक्षरैः।
पुरुषः पुरुषं गच्छेत् निष्क्रियं पञ्चविंशकम्॥80॥
एवमेकं साङ्ख्ययोगं वेदारण्यकमेव च।
परस्पराङ्गान्येतानि पञ्चरात्रन्तु कथ्यते॥81॥

**एष एकान्तिनां धर्मो नारायणपरात्मकः॥82॥**

**यथा समुद्रात्प्रसृता जलौघाः तमेव राजन् पुनराविशन्ति।**
**इमे तथा ज्ञानमहाजलौघाः नारायणं वै पुनराविशन्ति॥83॥**

**एष ते कथितो धर्मः सात्वतो यदुबान्धव।**
**कुरुष्वैनं यथान्यायं यदि शक्तोऽसि भारत॥84॥**
**एवं हि स महाभागो नारदो गुरवे मम।**
**श्वेतानां यमिनां चाऽऽह गतिमेकान्तिनां मुनिः॥85॥**
**व्यासश्चाकथयत्प्रीत्या धर्मपुत्राय धीमते।**
**स एवायं मया तुभ्यमाख्यातः प्रसृतो गुरोः॥86॥**
**इत्थं हि दुश्चरो धर्मः एष पार्थिवसत्तम।**
**यथैव त्वं तथैवान्ये न भजन्ति च मोहिताः॥87॥**
**कृष्ण एव हि लोकानां भावनो मोहनस्तथा।**
**संहारकारकश्चैव कारणञ्च विशाम्पते॥88॥**

इत्यस्यधर्मस्य दौर्बल्यमुक्तम्।

एकोनषष्ट्युत्तरत्रिशततमे(?)[1]—

**साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा।**
**आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः॥**

इति पञ्चरात्रप्रामाण्यमुक्तम्।

अनन्तरं च—

**साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा।**
**ज्ञानान्येतानि ब्रह्मर्षे लोकेषु प्रचरन्ति ह॥1॥**

**किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा मुने।**
**प्रब्रूहि (वद सर्वं?) वै मया पृष्टः प्रवृत्तिञ्च यथाक्रमम्॥2॥**

इति जनमेजयप्रश्नमुपक्षिप्य वक्ष्यमाणार्थस्य गौरविततारख्यापनाय,

**जज्ञे बहुज्ञं परमत्युदारं यं द्वीपमध्ये सुतमात्मवन्तम्।**
**पराशरात्सत्यवती महर्षिं तस्मै नमोऽज्ञानतमोनुदाय॥4॥**

इति स्वगुरुं प्रणम्य मध्ये प्रसङ्गात् भगवतो व्यासस्य जन्मोपदेशेन स्वगुरुवैभवं प्रख्याप्य,

---

1. म.भार.12.359

सांख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा।
ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै॥64॥
सांख्यस्य वक्ता कपिलः परमर्षिस्स उच्यते।
हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः॥65॥
अवान्तरतपा नाम वेदाचार्यः स उच्यते।
प्राचीनगर्भन्तमृषिं प्रवदन्तीह ( न्ति हि? ) केचन॥66॥
उमापतिः पशुपतिः श्रीकण्ठो ब्रह्मणस्सुतः।
उक्तवानिदमव्यग्रो ज्ञानं पाशुपतं शिवः॥67॥
पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्।
सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते॥68॥
यथागमं यथान्यायं निष्ठा नारायणः प्रभुः।
न चैवमभिजानन्ति तमोभूता विशाम्पते॥69॥
तमेव शास्त्रकर्तारः प्रवदन्ति मनीषिणः।
निष्ठां नारायणमृषिं नान्योऽस्तीति च वादिनः॥70॥

इति निष्ठां प्रदर्श्य,

निस्संशयेषु सर्वेषु नित्यं वसति वै हरिः।
ससंशयान् हेतुबलान्नाध्यावसति माधवः॥71॥
पञ्चरात्रविदो ये तु यथाक्रमपरा नृप।
एकान्तभावोपगताः ते हरिं प्रविशन्ति वै॥72॥

**इति पञ्चरात्रनिष्ठाविधुराणामनर्थं तन्निष्ठानां पुरुषार्थलाभञ्च प्रदर्श्य,**
**सांख्यञ्च योगश्च सनातने द्वे। वेदाश्च सर्वे निखिलेन राजन्।**
**सर्वैस्समस्तैर्ऋषिभिर्निरुक्तो। नारायणो विश्वमिदं पुराणम्॥73॥**

इति पञ्चरात्रप्रतिपाद्य एव सकलस्मृतीतिहासपुराणपाशुपतादीनां निष्ठाप्रदर्शनेन न केवलं पृष्टानां सांख्यादीनामेव भगवति निष्ठा, किन्तु स्मृतीतिहासपुराणादीनामपीति प्रख्याप्य,

शुभाशुभं कर्म समीरितं यत्। प्रवर्तते सर्वजनेषु मध्ये ( किञ्चित्? )।
तस्मादृषेस्तद्भवतीति विद्यात् दिव्यन्तरिक्षे भुवि चाप्सु चेति॥74॥

इति प्रश्नस्योत्तरमुक्तम्। एवं नारायणीये एकोनषष्ट्युत्तरत्रिशततमे अध्याये महता संरम्भेण परमर्षिणा पञ्चरात्रप्रामाण्यं समर्थितम्।

'एवमेकमि'ति श्लोके वेदा एव पञ्चरात्रमित्युक्तम्। 'इदं महोपनिषदमि'ति चोक्तम्। आश्वमेधिके सप्तनवतितमे[1]—

**भगवन् वैष्णवा धर्माः किम्फलाः किम्परायणाः।**
**किं धर्ममधिकृत्याथ भवतोत्पादिताः पुरा॥3॥**
**यदि तेऽहमनुग्राह्यः प्रियो वा मधुसूदन।**
**श्रोतव्या यदि वा कृष्ण तन्मे कथय सुव्रत॥4॥**
**पवित्राः किल ते धर्मास्सर्वपापप्रणाशनाः।**
**सर्वधर्मोत्तमाः पुण्याः भगवन् त्वन्मुखोद्गताः॥5॥**
**यच्छ्रुत्वा ब्रह्महा गोघ्नो मातृहा गुरुतल्पगः।**
**पाकभेदी कृतघ्नश्च सुरापो ब्रह्मविक्रयी॥6॥**
**मित्रविश्वासघाती च भ्रूणहा वीरहा तथा।**
**तपोविक्रयिणश्चैव दानविक्रयिणस्तथा॥7॥**
**आत्मविक्रयिणो मूढाः जीवेयुश्च विकर्मभिः।**
**पापाचारा नैकृतिकाः डम्भिका दूषकास्तथा॥8॥**
**रसभेदकरा ये च ये च स्युर्ब्रह्मदूषकाः।**
**शूद्रप्रेष्यकराश्चोरा विप्रा ये च पुरोहिताः॥9॥**
**निक्षेपहारिणस्त्रीघ्नाः तथा ये पारदारिकाः।**
**एते चान्ये च बहवो मुच्यन्ते तेऽपि किल्बिषात्॥10॥**
**तानाचक्ष्व सुरश्रेष्ठ त्वद्भक्तस्य मयाच्युत॥11॥**

वैशम्पायन उवाच—

**इत्येवं कथिते देवे धर्मपुत्रेण संसदि।**
**वसिष्ठाद्यास्तपोयुक्ता मुनयस्तत्त्वदर्शिनः॥12॥**
**श्रोतुकामाः परं गुह्यं भक्तिमन्तो निरत्ययाः।**
**तथा भागवताश्चैव ततस्तं पर्यवारयन्॥13॥**

युधिष्ठिर उवाच—

**तत्त्वतस्तव भावेन पादमूलमुपागतम्।**
**यदि जानासि मां स्निग्धं भक्तं वा भक्तवत्सल॥**

1. म.भार.14.97

धर्मगुह्यानि सर्वाणि वेत्तुमिच्छामि तत्त्वतः।
धर्मान् कथय देवेश यद्यनुग्रहभागहम्॥
श्रुता मे मानवा धर्माः वासिष्ठाः काश्यपास्तथा।
गार्गीया गौतमीयाश्च तथा गोपालकस्य च॥
पराशरकृताः पूर्वमात्रेयस्य च धीमतः।
ओमामहेश्वराश्चैव नन्दिधर्माश्च पावनाः॥
ब्रह्मणा कथिता ये च कौमाराश्च श्रुता मया।
धूमायनकृता धर्माः काण्डवैश्वानरा अपि॥
भार्गवा याज्ञवल्क्याश्च मार्कण्डेयकृता अपि।
भारद्वाजकृता ये च बृहस्पतिकृताश्च ये॥
कुणेश्च कुणिबाहोश्च विश्वामित्रकृताश्च ये।
सुमन्तुजैमिनिकृताः शाकुनेयास्तथैव च॥
पुलस्त्यपुलहोद्गीताः पावकीयास्तथैव च।
अगस्त्यगीता मौद्गल्याश्शाण्डिल्याः शलभायनाः॥
वालखिल्यकृता ये च ये च सप्तर्षिभिस्तथा।
आपस्तम्बकृता धर्माः शङ्खस्य लिखितस्य च॥
प्राजापत्यास्तथा याम्या माहेन्द्राश्च श्रुता मया।
वैयाघ्रव्यासकीयाश्च विभाण्डककृताश्च ये॥
नारदीयाः श्रुता धर्माः कापोताश्च श्रुता मया।
तथा विदुरवाक्यानि भृगोरङ्गिरसस्तथा॥
क्रौञ्चा मृदङ्गगीताश्च सौर्या हारीतकाश्च ये।
ये पिशङ्गकृताश्चापि कपोतीयाः सुबालकाः॥
उद्दालककृता धर्मा औशनस्यास्तथैव च।
वैशम्पायनगीताश्च ये चान्येऽप्येवमादयः ( प्येवमादितः? )॥
एतेभ्यस्सर्वधर्मेभ्यो देव त्वन्मुखनिस्सृताः।
पावनत्वाद्यथार्थत्वाद्विशिष्टा इति मे मतिः॥
तस्माद्धि त्वां प्रपन्नस्य त्वद्भक्तस्य च केशव।
युष्मदीयान् वरान् धर्मान् पुण्यान् कथय मेऽच्युत॥

इति यौधिष्ठिरप्रश्नोत्तरोपाख्यानमुखेन वक्ष्यमाणार्थस्य श्रैष्ठ्यमुपन्यस्तम्। अथ (अत्र?) 'यथार्थत्वादि'त्यनेन स्मृत्यादिवत् क्वापि वेदविरोधो नास्तीति कात्स्न्र्येन याथार्थ्यं द्योतितम्। 'वैष्णवा धर्मा भवतोत्पादिताः पुरे'त्युक्तेः पञ्चरात्रसंहितायामिति गम्यते। वक्ष्यमाणधर्माणां वैष्णवत्वसूचनात् भगवत्प्रीत्युद्देशेन वक्ष्यमाणधर्माः अनुष्ठेया इति सूचितम्। अस्य चार्थस्य पञ्चरात्रे प्रतिपादनात् वक्ष्यमाणपञ्चरात्रप्रतिपाद्यतासिद्धिः। अनन्तरे उत्तरे 'एवं ते यस्य कौन्तेये'त्यारभ्य—

**इदं रहस्यं कौन्तेय शृणुधर्ममनुत्तमम्।**
**कथयिष्ये परं धर्मं तव भक्तस्य पाण्डव॥**
**इष्टस्त्वमसि मेऽत्यर्थं प्रपन्नश्चापि मां सदा।**
**परमार्थमपि ब्रूयाम् किं पुनर्धर्मसंहिताम्॥**
**इदं मे मानुषं जन्म कृतमात्मनि मायया।**
**धर्मसंस्थापनार्थाय दुष्टानां नाशनाय च॥**

**इत्यनेन वक्ष्माणभगवत्कर्मणोऽभ्यर्हितत्वं पुनः ख्यापितम्।**

एकोनशततमे[1] -

**द्वादशाक्षरतत्त्वज्ञश्चतुर्व्यूहविभागवित्।**
**अच्छिद्रपञ्चकालज्ञः स विप्रस्तारयिष्यति॥**

इति पञ्चरात्रं स्पष्टमभिहितम्।

एकशततमे[2]—

**कथं त्वमर्चनीयोऽसि मूर्तयः कीदृशास्तु ते।**
**वैखानसाः कथं ब्रूयुः कथं वा पाञ्चरात्रिकाः॥**

इति यौधिष्ठिरप्रश्नमुपक्षिप्य,

**शृणु पाण्डव तत्सर्वमर्चनाक्रममात्मनः।**
**स्थण्डिले पद्मकं कृत्वा चाष्टपत्रं सकर्णिकम्॥**
**अष्टाक्षरविधानेन ह्यथवा द्वादशाक्षरैः।**
**वैदिकैरथवा मन्त्रैः (अथ मन्त्रैश्च?) मम सूक्तेन वा पुनः॥**
**स्थापितं मां ततस्तस्मिन् अर्चयित्वा विचक्षणः।**
**पुरुषं च ततस्सत्यमच्युतञ्च युधिष्ठिर॥**

---

1. म.भार.14.99
2. म.भार.14.101

**अनिरुद्धञ्च मां प्राहुर्वैखानसविदो जनाः।**
**अन्ये त्वेवं विजानन्ति मां राजन् पाञ्चरात्रिकाः॥**
**वासुदेवश्च राजेन्द्र सङ्कर्षणमथापि च।**
**प्रद्युम्नञ्चानिरुद्धञ्च चतुर्मूर्तिं प्रचक्षते॥**
**एताश्चान्याश्च राजेन्द्र संज्ञाभेदेन मूर्तयः।**
**विद्ध्यनर्थान्तरा एव मामेवञ्चार्चयेद्बुधः॥**

**इति कण्ठरवेण पञ्चरात्रमुपादाय तद्विधानेनैवार्चयेदिति विहितम्।**

अनन्तरञ्च—

**त्वद्भक्ताः कीदृशा देव कानि तेषां व्रतानि च।**
**एतत्कथय देवेश त्वद्भक्तस्य ममाच्युत॥**

इति यौधिष्ठिरप्रश्नमुपक्षिप्य,

**अनन्यदेवता भक्ताः ये मद्भक्तजनप्रियाः।**
**मामेव शरणं प्राप्ता मद्भक्तास्ते प्रकीर्तिताः॥**

इति पञ्चरात्रार्थः स्पष्टमभिहितः।

पञ्चोत्तरशततमे[1]—

**द्वादशाक्षरतत्त्वज्ञः चतुर्व्यूहविभागवित्।**
**अच्छिद्रपञ्चकालज्ञः स वै भागवतस्स्मृतः॥**

इति तदर्थ एवोक्तः।

अनन्तरञ्च—

**तदा ( तथा? ) प्रणम्य गोविन्दं तदा प्रभृति पाण्डवाः।**
**कपिलाद्यानि दानानि ददुर्धर्मपरायणाः॥**
**मधुसूदनवाक्यानि स्मृत्वा स्मृत्वा पुनः पुनः।**
**मनसा पूजयामासुः हृदयस्थानि पाण्डवाः॥**
**युधिष्ठिरस्तु धर्मात्मा हृदि कृत्वा जनार्दनम्।**
**तद्भक्तस्तन्मना युक्तस्तद्याजी तत्परोऽभवत्॥**

इति युधिष्ठिरस्य तदर्थनिष्ठोक्ता।

**एवं द्वाविंशत्यध्याये( ? ) पञ्चरात्रप्रामाण्यं प्रख्यापितम्।**

---

1. म.भार.14.105

आनुशासनिके च त्रिंशच्छततमे (?) अध्याये—

**षष्टिं काणश्शतं षण्ढः श्वित्री यावत्प्रपश्यति।**
**पङ्क्त्यां समुपविष्टायां तावद्दूषयते नृप॥ इति।**
**इमे परे महाराज विज्ञेयाः पङ्क्तिपावनाः।**
**यतयो मोक्षधर्मज्ञाः योगिनश्चारितव्रताः।**
**पञ्चरात्रविदो मुख्यास्तथा भागवताः परे॥ इति।**

यद्यपि पाशुपतादेः प्रामाण्यमिह निरस्तम्, महाभारते च प्रामाण्यसमर्थनं प्रतीयते तथापि न विरोधः, भारत एव विरोधपरिहारात्। 'किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा मुने' इति प्रश्ने—

**साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा।**
**ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै।**।इति,
**सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते।**
**यथाऽऽगमं यथान्यायं निष्ठा नारायणः प्रभुः।**। इति,

नानामतत्वोक्त्या निष्ठा नारायण इत्युक्त्या च वेदविरुद्धस्वातन्त्र्यांशेऽप्रामाण्यं....। तदभिप्रायेणैव,

**साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा।**
**आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः।**। इत्युक्तम्।

हेतुग्रहणेन श्रुत्यनुरोधेन स्वातन्त्र्यहननं कर्तव्यमेवेति सूच्यते। अत्र 'नानामतानी'ति साङ्ख्यमेकं मतम्, योगोऽपरम्, वेदाः पञ्चरात्रञ्चेति समुदितमेकम्, पाशुपतमपरमिति विवक्षितम्।

**एवमेकं सांख्ययोगं वेदारण्यकमेव च।**
**परस्पराङ्गान्येतानि पञ्चरात्रन्तु कथ्यते।**। इति

साङ्ख्ययोगोपकृतपूर्वोत्तरभागात्मकवेदस्यैव पञ्चरात्रत्वाभिधानात् परस्पराङ्गान्येतानीत्यत्राङ्गशब्देनान्योन्याकाङ्क्षितार्थप्रतिपादकत्वं विवक्षितम्। तत्र साङ्ख्ये प्रकृतिपुरुषविवेके कृते प्रकृतिविविक्तपुरुषस्वरूपानुगुणः पुरुषार्थः। किञ्च तत् साधनमित्यस्त्यपेक्षा। पूर्वभागस्य चामुष्मिकपुरुषार्थप्रतिपादकस्य विद्यामुखेन मोक्षपर्यवसायियज्ञप्रतिपादकस्यास्त्येव प्रकृतिपुरुषविवेकापेक्षा।..... योगस्यापि यमनियमादिनिरूपणा(यमनियमादिरूपस्या?)पेक्षा साङ्ख्ययोगवेदास्समुदिता एकं पञ्चरात्रमित्यर्थः। नानामतानीत्युक्तविरोधपरिहाराय परस्पराङ्गानीत्युक्तम्। ततश्च साङ्ख्ययोगयोः विरुद्धांशं विहाय ताभ्यामपेक्षितांशविवरणेनोपकृतांशः पूर्वोत्तरभागात्मको वेद एव पञ्चरात्रमित्युक्तं भवति। एवञ्चापेक्षितांशविवरणमुखेनोपकारकयोः तयोः श्रुतिविरुद्धस्वातन्त्र्यादिप्रतिपादकतया नानामतत्वमविरुद्धमिति हृदयम्।

अत्र वेदव्यतिरेकेण पञ्चरात्राभावव्यञ्जनेन कृत्स्नस्यापि पञ्चरात्रस्य वेदार्थप्रतिपादकत्वं तत एव कृत्स्नस्यापि पञ्चरात्रस्य प्रामाण्यञ्च सिद्धम्। एतदेवाभिप्रेत्य 'साङ्ख्यस्य वक्ते'त्यनुक्रम्य 'पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयमि'ति कृत्स्नग्रहणं स्वयङ्ग्रहणञ्च कृतम्।

पाशुपतस्य तु वेदापेक्षया न्यूनत्वोक्तेः स्वरसप्रतिपन्नस्य वेदापेक्षया भिन्नमतत्वस्य पञ्चरात्रस्येव भारते एवमपवादाप्रतीतेश्च वेदपञ्चरात्राविरुद्धांशे प्रामाण्यम्, तद्विरुद्धे अप्रामाण्यमेवेति सिद्धम्। नारायणस्य पाशुपतनिष्ठात्वोक्तिस्तु अथर्वशिरःप्रतिपन्नरुद्रशरीरकपरमात्मोपासने शरीरभूतरुद्रस्वरूपप्रतिपादनेन कथञ्चिदुपकारकत्वात्। तत्रापि पाशुपतपदेन निश्वाससंहितैव विवक्षिता।

**निश्वाससंहितायां हि लक्षमात्रं प्रमाणतः।**
**सैव पाशुपती दीक्षा योगः पाशुपतश्च सः॥71-53॥**
**एतस्माद्वेदमार्गाद्धि यदन्यदिह जायते।**
**तच्छूद्रक्रम ( क्षुद्रकर्म? ) विज्ञेयं रौद्रं शौचविवर्जितम्॥71-53॥**

इति वराहपुराणवचनात्।

कूर्मपुराणे च—

**एष पाशुपतो योगस्सेवनीयो मुमुक्षुभिः।**
**भस्मच्छन्नैर्हि सततं निष्कामैरिति हि श्रुतिः॥**
**अन्यानि चैव शास्त्राणि लोकेऽस्मिन्मोहनाय वै।**
**वेदवादविरुद्धानि मयैव कथितानि तु॥**
**वामं पाशुपतं सोमं लागुडञ्चैव भैरवम्।**
**न सेव्यमेतत्कथितं वेदबाह्यं तथेतरत्॥**इति।

तत्र श्रुतिपदेन रुद्रशरीरकपरमात्मोपासनपराथर्वशिरउपनिषद्विवक्षिता। तस्याश्च तत्परत्वं ब्रह्मविद्याविजये वर्णितम्। अत एव भागवते अक्रूरस्तोत्रे - 'त्रय्या च विद्यया केचिदि'ति प्रक्रम्य,

**त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम्।**
**बह्वाचार्यविभेदेन भगवन् समुपासते॥**इति।

यत्तु वाराहे—

**ये वेदमार्गनिर्मुक्ताः तेषां मोहार्थमेव च।**
**नयसिद्धान्तमार्गेण मया शास्त्रं प्रदर्शितम्॥** इति,
**एवमभ्यर्थितस्तैस्तु पुराऽहं द्विजसत्तम।**
**वेदक्रियासमायुक्तां कृतवानस्मि संहिताम्॥**

**निश्वासाख्यां ततस्तस्यां लीना बाभ्रव्यशाण्डिलाः।**

इति च,

तत्प्रणेतृरुद्रस्य भगवत्पर्यन्तत्वविवक्षायामपि शब्दतस्तदप्रतिपादननिबन्धनं संहितान्तरञ्च बहुधा निषिद्धम्।

भविष्यत्पुराणे चत्वारिंशे अध्याये—

महेश्वरः—

**दृष्टप्रत्ययसूत्राणि शास्त्राणि कृतवानहम्।**
**यस्मात्पशुपतिश्चाहं मत्कृताश्शास्त्रविस्तराः॥**
**सर्वे पाशुपता ज्ञेयाः वेदमार्गविरोधिनः।**
**शिवश्चाहं यतस्तस्माच्छैवशास्त्राणि कानिचित्॥**
**मया कृताश्च विज्ञेयाः ते च वैदिकनिन्दकाः।** इति।

तत्रैव—

**प्रत्यक्षफलसंयोगदर्शनाच्छास्त्रविस्तरैः।**
**मोहयित्वा च तान् पापान् नाशयिष्याम्यहं पुनः॥**
**तेषामनेकशास्त्राणि कृत्वा प्रत्यक्षसूचकान्।**
**अवैदिकानां मार्गांश्चितस्यात्तान्मोहयाम्यहम॥ इति।**

श्रीवाराहे एकसप्ततितमाध्याये[1]—

**त्वञ्च रुद्र महाबाहो मोहशास्त्राणि कारय।**
**अल्पायासं दर्शयित्वा फलं शीघ्रं प्रदर्शय॥३६॥**
**कुहकञ्चेन्द्रजालानि विरुद्धाचरणानि च।**
**दर्शयित्वा जनं सर्वं मोहयाशु महेश्वर॥३७॥**
**एवमुक्तस्तदा तेन देवेन परमेष्ठिना।**
**आत्मा तु गोपितस्सद्यः प्रकाश्योऽहं कृतस्तदा ( प्रकाशं गमितस्त्वहम्? )॥३८॥**
**तस्मादारभ्य कालात्तु मत्प्रणीतेषु सत्तम।**
**शास्त्रेष्वभिरतो लोको तदेव बहु मन्यते ( बाहुल्येन भवेदतः )॥३९॥**
**ये वेदमार्गनिर्मुक्ताः तेषां मोहार्थमेव च।**
**नयसिद्धान्तमार्गेण मया शास्त्रं प्रदर्शितम्॥४२॥**

1. व.पु.71(70?)

**नयसिद्धान्तसंज्ञाभिः मया शास्त्रं तु दर्शितम्? )**
**पाशोऽयं पशुभावस्तु यदा प्रपतितो भवेत्।**
**तदा पाशुपतं शास्त्रं जायते वेदसंज्ञितम॥43॥**
**वेदमूर्तिरहं विप्र नान्यशास्त्रार्थवेदिभिः।**
**दृश्यते ( ज्ञायते? ) मत्स्वरूपं तु मुक्त्वा वेदमनादिमत्॥44॥** इति।

तत्रैव द्विसप्ततितमाध्याये[1]—

**एवमुक्त्वाऽथ मुनयो ययुः कैलासपर्वतम्।**
**यत्राहमुमया सार्धं सदा तिष्ठामि सत्तमाः॥47॥**
**ऊचुर्मां ते च मुनयो भवितारो द्विजोत्तमाः।**
**कलौ त्वद्रूपिणस्सर्वे जटामकुटधारिणः।**
**स्वेच्छया प्रेतवेषाश्च मिथ्यालिङ्गधराः प्रभो॥48॥**
**तेषामनुग्रहार्थाय किञ्चिच्छास्त्रं प्रदीयताम्।**
**येनास्मद्वंशजाः सर्वे वर्तेयुः कलिपीडिताः॥49॥**
**एवमभ्यर्थितस्तैस्तु पुराऽहं द्विजसत्तमाः।**
**वेदक्रियासमायुक्तां कृतवानस्मि संहिताम्॥50॥**
**निःश्वासाख्यां ततस्तस्यां लीना बाभ्रव्यशाण्डिलाः।**
**अल्पापराधात् श्रुत्वैव गता बैडालिका भवन्।**
**मयैव मोहितास्ते हि भविष्यन्ति हता द्विजाः ( भविष्यं जानता द्विजाः? )॥51॥**
इति।

आदित्यपुराणे —

**ततश्शशाप तान् सर्वानृषीन् परमकोपिनः।**
**गौतमस्तपसां श्रेष्ठस्सामगानां परस्तथा॥**
**निर्दोषाय यथा मह्यं मायां गोरूपधारिणीम्।**
**कृतवन्तस्तथा सर्वे त्रयीं त्वक्षयपापिनः॥**
**त्रिपुण्ड्रधारिणो भूत्वा भस्मोद्धूलनतत्पराः।**
**जटाधारपरिक्लान्ता मिथ्याज्ञानप्रलापिनः॥**
**भविष्यथ कलौ सर्वे मिथ्यालिङ्गोपजीवकाः॥** इति।

---

1. व.पु.72(71?)

कौर्मे च[1]—

ये चान्ये शापनिर्दग्धा गौतमस्य महात्मनः॥29॥
सर्वे ते च भविष्यन्ति ब्राह्मणाद्याः स्वजातिषु।
निन्दन्ति च हृषीकेशं ब्राह्मणा ब्रह्मवादिनः॥30॥
वेदबाह्यव्रताचाराः दुराचारा वृथाश्रमाः।
मोहयन्ति जनान् सर्वान्दर्शयित्वा फलानि च॥31॥
तमसाविष्टमनसो बैडालव्रतिकाधमाः। इति।

पाद्मे रुद्रः[2]—

देवतानां हितार्थाय वृत्तिं पाषण्डिनां शुभे।
कपालचर्मभस्मास्थिधारणं तत्कृतं मया॥52॥
तामसानि पुराणानि यथोक्तं विष्णुना शुभे।
पाषण्डशैवशास्त्राणि यथोक्तं कृतवानहम्॥53॥
मच्छक्त्यापि समाविश्य गौतमादिद्विजानपि।
वेदबाह्यानि शास्त्राणि सम्यगुक्तं मयानघे॥54॥
इमं( दं? ) मतमवष्टभ्य दुष्टाः सर्वे च राक्षसाः।
भगवद्विमुखास्सर्वे बभूवुस्तमसाऽऽवृताः॥55॥
भस्मादिधारणं कृत्वा महोग्रतपसाऽऽवृताः।
मामेव पूजयाञ्चक्रुः मांसासृक्चन्दनादिभिः॥56॥
मत्तो वरप्रदानानि लब्ध्वा मदबलोद्धताः।
अत्यन्तविषयासक्ताः कामक्रोधसमन्विताः॥57॥
सत्त्वहीनास्तु निर्वीर्याः जिता देवगणैस्तदा।
सर्वधर्मपरिभ्रष्टाः काले यान्त्यधमां गतिम्॥58॥
एवं देवहितार्थाय वृत्तिर्मे देवि गर्हिता।
विष्णोराज्ञां पुरस्कृत्य कृतं भस्मास्थिधारणम्॥60॥
बाह्यचिह्नमिदं देवि मोहनार्थाय विद्विषाम्॥61॥ इति।

ननु कौर्मे[3]—

1. पूर्वार्धम् - 30
2. उत्तरखण्डः(6).235
3. पूर्वभागः.16

**स तेषां मायया जातां गोवध्यां गौतमो मुनिः।**
**केनापि हेतुना ज्ञात्वा शशापातीव कोपितः॥109॥**
**भविष्यन्ति त्रयीबाह्या माहापातकिभिस्समाः।**

इत्यादिना शिवकेशवसन्निधौ तेषां वैदिकमन्त्रैः स्तोत्रेऽनधिकारात् भाषाप्रबन्धैः स्तुतिपूर्वकं गतिप्रार्थनामुपन्यस्य,

**तस्माद्वै वेदबाह्यानां रक्षणार्थाय पापिनाम्।**
**विमोहनाय शास्त्राणि करिष्यावो वृषध्वज॥117॥**
**एवं सञ्चोदितो रुद्रो माधवेन मुरारिणा।**
**चकार मोहशास्त्राणि केशवोऽपि शिवेरितः॥118॥**
**कापालं लागुडं शाक्तं( नाकुलं वामं ) भैरवं पूर्वपश्चिमम्।**
**पञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः॥119॥**

इति पञ्चरात्रस्य वेदबाह्याधिकारिकत्वमोहनार्थत्वकीर्तनं कथमिति चेत्, (न ह्यत्र?) वेदबाह्याधिकारिकत्वमुच्यते, किन्तु तद्रक्षणमप्यस्य प्रयोजनं प्रतीयते। मोहनार्थत्वञ्च वेदाधिकारिणामपि, मलिनचिन्तानां कलिकाले व्यामोहहेतुत्वात्। दृश्यन्ते चेदानीं[1] ब्राह्मणा अपि 'वेदो नाध्येयः, स ह्यसारः, तदर्थश्च नादेयः' इत्यादि जल्पन्तः वैदिकभगवल्लञ्छनधारणेन पृथक्जनान् भ्रामयन्त मूढा कलिपुरुषाः अत एव -

**बुद्धश्रावकनिर्गन्धाः पञ्चरात्रविदो जनाः।**
**कापालिकाः पाशुपताः पाषण्डा ये च तद्विधाः॥32॥[2]**
**यस्याश्नन्ति हवींष्येते दुरात्मानस्तु तामसाः।**
**न तस्य तद्भवेच्छ्राद्धं प्रेत्य चेह फलप्रदम्॥33॥**

इत्यादिवचनमपि निर्व्यूढम्। पञ्चरात्रविदः - पञ्चरात्रमात्रविदः वेदविद्वेषिण इति हृदयम्। वेदानधिकारिरक्षणार्थत्वञ्च—

**श्रुतिशिष्टस्मृतिप्रोक्तप्रायश्चित्ते भयङ्गताः।**
**क्रमेण श्रुतिसिद्ध्यर्थं मनुष्यस्तन्त्रमाश्रयेत्॥**
**धर्मशास्त्रे पुराणे च प्रोक्तं हि मरणान्तिकम्।**
**प्रायश्चित्तं मनुष्याणां पापिष्ठानां सुदारुणम्॥**

---

1. विजृम्भणे
2. कु.पू.उत्तरभागः.21

**पञ्चरात्रं पाशुपतं तन्त्रं वैखानसाभिधम्।**
**वेदभ्रष्टान् समुद्दिश्य कमलापतिरुक्तवान्॥**

इति साम्बपुराणे विवृतम्। अत एव वासिष्ठलैङ्गे शाण्डिल्यं प्रति भगवद्वचनम्—

**मत्तन्त्राश्रयणेनैव मत्पूजा च कृता त्वया।**
**तपसा प्रीतवानस्मि तव शाण्डिल्य मे प्रिय॥**
**कुमार्गेणापि शाण्डिल्य कृता पूजा मम त्वया।**
**अतः कालेन महता देवमार्गं गमिष्यसि॥ इति।**

अत्रावधारणेन वैदिकमार्गपरित्यागो विवक्षितः। शाण्डिल्यस्य भगवद्भक्तेरत्यन्तमुद्रेकादाज्ञा-सिद्धवैदिकाराधानपरित्यागमपि सोढ्वा तान्त्रिकमन्त्रैस्सम्यगाराधनाच्च प्रसन्नो भगवान् कथञ्चित्तमनुजग्राह। अमीषां तु पूर्वोक्तानां दुरध्वनान्निरय एव।

स्कान्दे[1]—

**पञ्चरात्रादिमार्गाणां वेदमूलत्वमास्तिके।**
**न ह्यन्यतन्त्राः( हि स्वतन्त्राः? ) ते तेन भ्रान्तिमूला निरूपणे॥**

इति। पञ्चरात्रमूलो योऽयमवैदिकरक्षणार्थमाचारपथस्तत्र वैदिकानामपि तावन्मात्रनिष्ठायाः वेदमूलत्वाभावादिति यावत्। अथवायं तद्गुणसंविज्ञानो बहुव्रीहिः। पञ्चरात्रग्रहणं तस्य भ्रान्तिमूलत्वाभावख्यापनाय।

पराशरपुराणे —

**धर्माधर्मादिविज्ञाने त्वागताः पुरुषोदिताः।**
**पञ्चरात्रादयस्सर्वे न प्रमाणमिति स्थितिः॥** इति।

प्रायेणावैदिकाधिकारिकतया शाण्डिल्यादिप्रणीतपञ्चरात्रैकदेशभूताः ग्रन्थाः वैदिकधर्माधर्मज्ञाने न प्रमाणमिति यावत्।

अत एवोक्तं वासिष्ठलैङ्गे—

**ततो विष्णोः प्रसादेन वेदमार्गातिवर्तिनीम्।**
**शाण्डिल्यस्संहिताञ्चक्रे वैष्णवीं महतीं मुने।**
**तस्याञ्चक्रुर्मुने दीक्षा पाषण्डाः पापयोनयः॥** इति।
**इदमवैदिकानुजिघृक्षानिबन्धनभागाभिप्रायम्।**

स्कान्दे च—

---

1. सूतसंहिता.मुक्तिखण्डः.4

**अत्यन्तस्खलितानान्तु प्राणिनां वेदमार्गतः।**
**पञ्चरात्रादयो मार्गाः कालेनैवोपकारकाः॥** इति।

अत्र च पञ्चरात्रपदमेकदेशपरम्।

पराशरपुराणे च—

**तन्त्राणि तन्त्रनिष्ठानां रक्षकाण्यपि च क्रमात्।**
**वेदमार्गैकनिष्ठानां साधकानि विशेषतः॥** इति।

तन्त्रनिष्ठानामिति - तन्त्रमात्राधिकारिणां वेदानधिकारिणामिति यावत्। वेदमार्गेति - तत्तद्दुष्कृतानुसारेण वेदमार्गप्रच्यावनमुखेन तन्त्रमार्गप्रवृत्तिहेतुत्वात् इति भावः।

कौर्मे[1]—

**यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन्विविधानि तु।**
**श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां हि तामसी॥261॥**
**कापालं पञ्चरात्रञ्च यामलं वाममार्हतम्।**
**एवंविधानि चान्यानि मोहनार्थानि तानि तु॥262॥**

अत्र पूर्वश्लोके पञ्चरात्रं न विवक्षितम्, श्रुतिस्मृतिविरोधाभावात्। उत्तरश्लोके तु पूर्वोक्तरीत्या मोहकत्वसाम्यात् कापालादिभिस्सह परिगणनम्।

तत्रैव —

**कामपाशुपताचाराः पञ्चरात्राश्रयाः परे।**
**भविष्यन्ति कलौ तस्मिन् ब्राह्मणाः क्षत्रियास्तथा॥** इति।

इदमपि वैदिकानां तान्त्रिकावैदिकमन्त्रमात्रपरिग्रहविषयम्, आश्रयपदेन तन्मात्रप्रतीतेः।

वासिष्ठलैङ्गे कलिधर्मे—

**पञ्चरात्रं प्रशंसन्ति केचिद्भागवतं मुने।**
**केचिद्बौद्धं प्रशंसन्ति केचिद्दैगम्बरं तथा॥**
**केचिल्लोकायतं ब्रह्मन् केचित्सौमं महामुने।**
**लाङ्कुलं( लागुडं? ) केचिदिच्छन्ति यामलं भुवि केचन॥**
**अन्यानि यानि शास्त्राणि विरुद्धानि महामुने।**
**स्वतः प्रकाशभूतानि वेदेन मुनिसत्तम॥**

---

1. पूर्वभागः.12

**तान्येव श्रोत्रिया युक्ताः परिगृह्य द्विजादयः।**
**आचरन्ति मुदा धीराः युगान्ते समुपस्थिते॥** इति।

अत्र 'पञ्चरात्रं प्रशंसन्ती'ति वेदनिन्दापूर्वकं प्रशंसाविषयम्। कथमर्थः, 'तान्येवे'त्येवकारो व्यत्यस्तः। तानि चैवेति चकाराध्याहारेण हि योजना। अन्यानीति परिगणितबौद्घान्यत्वप्रतीतेः।

पाराशरे—

**पञ्चरात्रे च कापाले पाषण्डेष्वपरेषु च।**
**दीक्षिताश्च भवन्त्येव मनुष्याः पापकर्मणः( कर्मिणः? )॥** इति।

इदं वैदिकानां वैदिकपरित्यागेन तन्त्रदीक्षाविषयम्। अपरशब्दस्य प्रतिसम्बन्धि कापालम्।

स्कान्दे गौतमशापः—

**शब्दे चाहं मते चैव पञ्चरात्रेऽप्यवैदिके।**
**शाक्ते च दीक्षिता यूयं भवेत ब्राह्मणाधमाः॥** इति।

अवैदिके पञ्चरात्र इत्यन्वयः। अवैदिकादिकर्मके पञ्चरात्रैकदेश इत्यर्थः। कालिकाखण्डे दधीचिशापः—

**वेदबाह्येषु तन्त्रेषु पञ्चरात्रादिषु द्विजाः।**
**भवेयुर्दीक्षिता यूयं युष्माकं पञ्चधा तथा॥** इति

वेदबाह्येषु पञ्चरात्रादिष्विति व्यधिकरणसप्तम्यौ, पाञ्चरात्रस्य वेदसमानार्थतया वेदबाह्यत्वासिद्धेः। न च वेदानधिकृतशूद्रादिकर्मप्रतिपादनादेव बाह्यत्वमिति वाच्यम्। तस्य तदहेतुत्वात्, तथा सति तद्धर्मप्रतिपादकस्मृत्यादीनामपि तथात्वापत्तेः।

तत्त्वतस्तु भगवच्चिह्नोर्ध्वपुण्ड्रधारणपञ्चरात्रप्रामाण्यविरोधीनि वचनानि प्राक्षेपिकत्वप्रसिद्धेः, तामसपुराणकोशेष्वलिखितत्वात्, बहुषु कोशेष्वदर्शनाच्चानादरणीयानि। स्वयमुद्भावितशङ्कायाः परिहारानभिधानात्, अचातुर्यात् अदानमिति(अनभिधानमिति?) चतुर्थो द्रोहः।

प्रामाण्यसमर्थनतात्पर्ये सूत्राक्षरपर्यालोचनया स्वरसतः प्रतीयमानेऽपि अतिजुगुप्सित......... ख्याने (अतिजुगुप्सितप्रामाण्यप्रत्याख्याने?) प्रवृत्तिरुपालम्भार्थैव केवलमिति स्पष्टमेवावगमादाचार्योपालम्भः पञ्चमो द्रोहः।

'विज्ञानादिभाव' इति पूर्वपक्षिणश्शङ्कानुवाद इति हि परैरुच्यते। तच्छङ्कायाः परिहारानुक्तिः स्पष्टा। ननु कृत एव परिहारः 'तदप्रतिषेध' इतीति चेन्न।

हेत्वनभिधानेनापरिहारात्। अहेतोरेव हेतुत्वतात्पर्यविषयत्वकल्पने तस्यैव द्रोहत्वात्। अहेतुत्वञ्च स्पष्टमेव। भगवत एव व्यूहचतुष्टयप्रतिपादनस्य स्पष्टत्वादीश्वरचतुष्टयकोटेरनुत्थानमेव। अतः क्षीराब्धिशायिनोऽनिरुद्धस्य शुक्लकृष्णकेशाभ्यां रामकृष्णावतारवद्व्यूहाद्व्यूहान्तरावतारे न कञ्चन विरोधं पश्यामः।

अत्र शङ्करेण जीवता यत्किञ्चिद्वक्तव्यमिति यत् किञ्चिदुच्यते तद्यत्किञ्चिदेव। किञ्चास्मिन् पक्षे 'विज्ञानादिभावे वा सम्भव' इति वक्तव्ये तदप्रतिषेध इत्युक्तेर्न किञ्चित्प्रयोजनम्। अस्मन्मते तु तथा निर्देशः सूत्रद्वयेन पाशुपतादिषु यत्प्रामाण्यं प्रतिषिद्धं तदभावख्यापनाय।

नन्वेवमपि वाशब्देनैव पूर्वपक्षव्यावृत्तिसिद्धौ तदप्रतिषेध इति किमर्थमिति चेन्न, पूर्वाधिकरणेषु तत्तच्छास्त्राणां प्रामाण्यं प्रतिषिद्धम्, इह तदपवादः क्रियत इति ख्यापनार्थत्वात्। तदप्रतिषेध इति पूर्वाधिकरणेषु प्रतिषिद्धस्य प्रामाण्यस्याप्रतिषेध इत्यर्थः। 'विप्रतिषेधाच्चे'ति शास्त्रस्य तृतीयचोद्यपरिहारपरत्वपक्षे चशब्दोऽस्वरसः। विप्रतिषेधादिति हेतोः परमसाध्येनैवान्वयः। चशब्दस्तृतीयासूत्रोक्तशङ्कापरिहारसमुच्चयपर इति त्वसङ्गतम्। परमसाध्यहेत्वन्वितेन चशब्देन तादृशसाध्यहेतुत्वेन वर्णितस्योत्पत्त्यसम्भवस्यैव समुच्चेतुं युक्तत्वात्। किञ्च चशब्दाभिप्रेतः परिहारः ....(पूर्व?)मुपन्यस्तः।

(यत्तु?) जीवादिशब्दानां प्रसिद्धार्थमपहायाप्रसिद्धजीवाद्यधिष्ठातृत्वरूपार्थान्तरकल्पनायां किम्प्रमाणम्? उदाहृतानां तेषां सङ्कर्षणादिविशेषणत्वमिति चेन्न। सङ्कर्षणादिशब्दाः खल्वत्र संज्ञात्वेन जीवादिविशेषणतया निर्दिष्टाः। तेन प्रसिद्धानामेव जीवमनोहङ्काराणां पाञ्चरात्रपरिभाषया सङ्कर्षणप्रद्युम्नानिरुद्धनामानि भवन्ति। सङ्कर्षणादिनामभिरनूद्य तस्मिन् शास्त्रे विग्रहायुधादिविधानं तेषामेव ध्यानार्थं भवति। एवकारा.....क्षराणां वर्णविशेषविधानवत् सङ्कर्षणाद्यर्चनविधानञ्च जीवादिविषयमेव भवतु। यत्र शास्त्रे यश्शब्दो यत्रार्थे परिभाषितस्तत्र तस्य शब्दस्य स एव खल्वर्थो ग्राह्यः, शब्दशास्त्रगतनदीवृद्ध्यादिसंज्ञादिवदिति।

तत्र 'यत्र शास्त्र' इत्यादिना स्वयमेव परिहारान्नास्माभिः परिहर्तव्यं किञ्चिदिह शिष्यते। तत्रैव शास्त्रे सङ्कर्षणादिशब्दानां जीवादिविलक्षणभगवत्परत्वस्य स्पष्टत्वात्, पञ्चरात्रशास्त्रे सङ्कर्षणादिशब्दैः भगवानेव प्रतिपाद्यत इति भारतेऽपि स्पष्टत्वाच्च।

विप्रतिषेधादित्यत्र पूर्ववादिना यद्विप्रतिषेधत्वमुक्तम्, तत्र नाद्यः – 'तत्तेज ईक्षते'त्यादिना अचेतने ईक्षणोक्त्यादिभिः वेदस्याप्रामाण्यप्रसङ्गात्। यदि प्रसिद्धमात्रापर्यवसानेन भगवत्पर्यन्तत्वमीक्ष्यते(मिष्यते?) वेदप्रामाण्यबलात्, तदा भारतादिना सिद्धप्रमाणाभावस्यापि प्रामाण्याविरोधेनैव निर्वहणीयत्वात्। 'आत्मान एवैत' इत्यादिकस्य ज्ञानादीनां स्वाभाविकत्वे तात्पर्यात्। न द्वितीयः – साङ्गेषु वेदेषु निष्ठामलभमानश्शाण्डिल्यः पञ्चरात्रशास्त्रमधीतवानिति वाक्यस्य भूमविद्यावाक्यवत् निन्दितेतरप्रशंसार्थत्वात्। तत्र हि भूमविद्योपक्रमे नारदेन 'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणञ्चतुर्थमितिहासपुराणं पञ्चममि'त्यारभ्य सर्वविद्यास्थानमभिधाय 'सोऽहं भगवो मन्त्रविदेवास्मि नात्मविदि'ति भूमविद्यातिरिक्तासु सर्वासु विद्यासु आत्मवेदनालाभवचनं वक्ष्यमाणभूमविद्याप्रसंशार्थं कृतम्। यदि तत्र ऋग्वेदादिभिः आत्माप्रतिपत्तिनिमित्तो नारदस्य प्रश्नः तदेहापि वेदैरात्मापरिज्ञानिमित्त एवायं वादोऽस्तु।

यश्च विप्रतिषेधोऽन्यवादिनोक्तः सोऽपि नास्त्येव। भगवल्लाञ्छनधारणस्य बहुश्रुतीतिहासपुराणादिसिद्धत्वस्य प्रागेवोपपादनात्। परत्वादिकञ्च भगवत एवेति 'ब्रह्मविद्याविजये' उपपादितम्।

यश्च सकलवैदिकदेवतापरित्यागो विप्रतिषेधशब्दार्थ उक्तः, तत्र किमर्वाचीनप्रयोजनसिद्धये देवतान्तरोपासनस्य परित्यागो विवक्षितः, उत पुरुषार्थसिद्धये। नाद्यः, मुमुक्षोः फलान्तरस्यापुरुषार्थतया तदर्थमुपासनस्याकर्तव्यत्वात्। न द्वितीयः, देवतान्तराणां तत्र सामन्यात् नित्यनैमित्तिकादिषु 'तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमा' इत्यादिना देवतान्तरकञ्चुकितस्य भगवत एवोपास्यत्वस्य श्रुत्यैवोपपादानेन प्राधान्येनोपासनपरित्यागस्य श्रुतिसिद्धत्वात्।

अत एवोक्तं नारायणीये[1]–

**चतुर्विधा मम जना भक्ता एव हि ते मताः॥33॥**
**तेषामेकान्तिनः श्रेष्ठाः ते चैवानन्यदेवताः।**
**अहमेव गतिस्तेषां निराशीः कर्मकारिणाम्॥34॥**
**ये च शिष्टास्त्रयो भक्ताः फलकामा हि ते( मे? ) मताः।**
**सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक्॥35॥**
**ब्रह्माणं शितिकण्ठञ्च याश्चान्या देवतास्स्मृताः।**
**प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम्॥36॥**
**भक्तं प्रति विशेषस्ते एष पार्थानुकीर्तितः॥37॥**

इति। सकलत्रयीधर्मपरित्यागः तत्र नास्त्येव, तत्फलस्यैव त्यागात्।

यत्तु 'त्रयीधर्मेण संयुक्तमिमं धर्ममजानता' इत्येकायनशाखानुसारेण तदसाधारणसूत्रविशेषनिष्ठानां धर्मविशेषोपदेशः पञ्चरात्रे क्रियते, तदविरुद्धम्, अधिकारिविशेषे त्रयीधर्मातिरिक्तवैदिकधर्माणामेव विधानात्। त्रयी योगाधिकारिणः कृतयुगे सम्भवन्ति।

अत एवोक्तं नारायणीये[2]—

**ततस्ते विबुधास्सर्वे ब्रह्मा ते च महर्षयः॥53॥**
**वेददृष्टेन विधिना वैष्णवं क्रतुमाहरन्।**
**तस्मिन् सत्रे तदा( सदा? ) ब्रह्मा स्वयं भागमकल्पयत्॥54॥**
**देवदेवर्षयश्चैव स्वयं भागानकल्पयन्।**
**ते कार्तयुगधर्माणो भागाः परमसत्कृताः॥55॥**

---

1. दूहदूा – 12-350
2. म.भार.12.359

**प्राहुरादित्यवर्णं तं पुरुषं तमसः परम्।56।** इति।

तस्मादेवं श्रुतिस्मृतीतिहासपुराणसर्वप्रमाणमूर्धन्यपञ्चरात्राचारसिद्धं भगवच्चिह्नधारणं सतां लक्षणम्। एकायनशाखायाः सद्भावे च भौमविद्याभारतादिना सिद्धप्रमाणभावं पञ्चरात्रञ्च प्रमाणम्। अतः पञ्चमो द्रोहः दुरपह्नवः।

अस्याधिकरणस्य पञ्चरात्रप्रामाण्यनिषेधपरत्वे 'विप्रतिषेधादि'त्येव पर्याप्ते इतरसूत्रद्वये चकारवैयर्थ्यत्वजनं षष्ठो द्रोहः।

प्रमाणमूर्धन्यता च 'यद्वै किञ्च मनुरवदत् तद्भेषजमि'[1]ति श्रुतिप्रशस्तस्य मानवशास्त्रस्यापि 'अस्मात्प्रवक्ष्यते धर्मं मनुः स्वायम्भुवः स्वयमि'ति पञ्चमवेदेन पञ्चरात्रमूलत्वप्रतिपादनात्, 'एवमेकमि'ति श्लोके वेदात्मत्वप्रतिपादनात्, 'एतद्धि सर्वशास्त्राणां शास्त्रमुत्तमसंज्ञितम्। एतदर्थ्यञ्च धर्म्यञ्च यशस्यञ्चैतदुत्तमम्?' इति कण्ठोक्तेः, उत्तरसमाख्याकरणाच्चावगम्यते। सर्वप्रमाणजघन्यत्वञ्च 'साङ्ख्यं योग' इति श्लोके वेदसिद्धान्तबहिर्भावावगमात्, 'ये वेदमार्गनिर्मुक्ताः', 'एवमभ्यर्थितस्तैस्तु' इति वचनाभ्यां भगवत्पर्यन्ततात्पर्ये सत्यपि कुमतिव्यामोहनाय विवक्षितार्थस्य स्पष्टमप्रतिपादनेन हैन्योपपादनात्, 'पत्युरसामञ्जस्यादि'ति प्रामाण्यनिषेधाच्च निश्वाससंहिताख्यपाशुपतस्य सिद्धम्। न चेदं सूत्रं निश्वाससंहितातिरिक्तविषयम्, सङ्कोचकाभावात्, निश्वाससंहिताया अपि विप्रलम्भार्थत्वोक्तेश्च। तथा सङ्कोचोऽपि विरुद्ध एव, अधिकारिभेदेन तस्यापि प्रमाणत्वाङ्गीकारात्। पतिशब्दस्वारस्यात् पाशुपतपरमेवेदम्। पतिशब्दो हि पाशुपतसमाख्यां शीघ्रं बुद्धौ सन्निधापयति, न तु योगशास्त्रम् अन्यद्वा किञ्चित्। 'यस्मात् पशुपतिश्चाहं शिवश्चाहमि'ति श्लोकद्वयेन वेदमार्गविरोधित्ववैदिकनिन्दितत्वाभ्यां रुद्रेणैव विभागकरणाच्च नान्यथा विभागसम्भवः।

त्रिपुण्ड्रधारणञ्चासतां लक्षणम्। तथाहि तैत्तिरीयश्रुतौ(?)—

**त्रिपुण्ड्रधारिणो ब्राह्मणाश्शूद्रधर्मिणो भवेयुरिति।**

हारीतस्मृतौ -

**यत्र रुद्रार्चनं भस्मधारणं चोच्यते बुधैः।**
**तदब्राह्मणविषयं विप्राणां तत्तु गर्हितम्।।** इति।

शातातपे—

**त्रिपुण्ड्रं ब्राह्मणो विद्वान् लीलयापि न धारयेत्।**
**त्रिपुण्ड्रधारणाद्विप्रः पतत्येव न संशयः।।** इति।

हारीते द्वितीये अध्याये—

---

1. तै.सं.2.2.9

**न तिर्यक् धारयेत्पुण्ड्रम् ( धारयेन्न तिर्यक्पुण्ड्रम्? ) आपद्यपि कदाचन।**
**तिर्यक्पुण्ड्रधरं विप्रं चण्डालमिव सन्त्यजेत्।। इति।**

वृद्धजाबालिः—

**शस्त्रधार्यस्त्रधारी च धनुर्धारी धनापहा।**
**त्रिपुण्ड्रधारी यो विप्रस्स चण्डालसमो भवेत्।।** इति।

पाद्मोत्तरखण्डे एकत्रिंशे अध्याये—

**ऊर्ध्वपुण्ड्रधरो विप्रो मृदा शुभ्रेण वैदिकः।**
**न तिर्यग्धारयेद्विद्वान् आपद्यपि कदाचन।।**
**त्रिपुण्ड्रं शूद्रतुल्यानां शूद्राणाञ्च विधिस्तदा।**
**त्रिपुण्ड्रधारणाद्विप्रः पतितस्स्यान्न संशयः।।**
**त्रिपुण्ड्रं ब्राह्मणो विद्वान् लीलयापि न धारयेत्।** इति।

तत्रैव—

त्रिपुण्ड्रं....................

श्रीवाराहे—

**कुलीनो ब्राह्मणो विद्वान् भस्मग्राही भवेद्यदि।**
**वर्जयेत्तादृशं देवि मद्योच्छिष्टघटं यथा।।**

भागवते चतुर्थे स्कन्धे भृगुशापे[1] -

**नष्टशौचाः मूढधियो जटाभस्मास्थिधारिणः।**
**विशन्तु शिवदीक्षायां यत्र दैवं सुरासवम्।।** इति।

आदित्यपुराणे ब्राह्मणान् प्रति गौतमशापे—

**त्रिपुण्ड्रधारिणो नित्यं भस्मोद्धूलनतत्पराः।**
**भविष्यथ त्रयीबाह्याः ब्रह्माज्ञानप्रलापिनः।।** इति।

श्रीविष्णुपुराणे[2]—

**कलौ जगत्पतिं विष्णुं सर्वस्त्रष्टारमीश्वरम्।**
**नार्चयिष्यन्ति मैत्रेय पाषण्डोपहता जनाः।।** इति।

हारीतस्मृतौ पञ्चमेऽध्याये—

---

1. वि.पु. 4.2.29
2. वि.पु.6.1.50

**यः कर्म कुरुते विप्रो विना विष्णवर्चनं क्वचित्।**
**ब्राह्मण्यात् भ्रश्यते सद्यः चण्डालत्वं स गच्छति॥21॥**
**तस्माच्च विधिवत्पूज्यो नारायण अनामयः।**
**तदाऽऽवरणरूपेण अन्यानभ्यर्चयेत्सुरान्॥**
**विधिं शिवं वा सूर्यं वा हरेराराधनं विना।**
**यस्तु सम्पूजयेद्विद्वान् स पाषण्डी भवेद्भुवि॥** इत्यादि।

पाद्मे[1]—

**येऽन्यदेवं परत्वेन वदन्त्यज्ञानमोहिताः।**
**नारायणात् जगन्नाथात् ते वै पाषण्डिनः स्मृताः॥2॥**
**कपालभस्मास्थिधराः ये ह्यवैदिकलिङ्गिनः।**
**ऋते वनस्थाश्रमाच्च जटावल्कलधारिणः॥3॥**
**अवैदिकक्रियोपेताः ते वै पाषण्डिनः स्मृताः( तथा? )।**
**शङ्खचक्रोर्ध्वपुण्ड्रादिचिह्नैः प्रियतमैर्हरेः॥5॥**
**रहिता ये द्विजा देवि ते वै पाषण्डिनः स्मृताः।**
**किमत्र बहुनोक्तेन ब्राह्मणा ये ह्य( प्य? )वैष्णवाः॥**
**यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः।**
**सममन्यैर्निरीक्षेत स पाषण्डी भवेत्सदा॥**
**ते वै पाषण्डिनो ज्ञेयाः सर्वलोकेषु गर्हिताः।**
**( न स्प्रष्टव्या न वक्तव्या न द्रष्टव्याः कदाचन? )**
**द्वेष्टारो विष्णुभक्तानां ये चावैष्णवसंश्रयाः।**
**पाषण्डिभिश्च संयुक्ताः ते वै पाषण्डिनः स्मृताः॥**

इत्यादि।

भविष्यत्पुराणे—

**ये तु सामान्यभावेन मन्यन्ते पुरुषोत्तमम्।**
**ते वै पाषण्डिनो ज्ञेयाः नरकान्ता नराधमाः॥**

महाभारते—

**ये योगिनं महात्मानं श्रीवत्साङ्कं सुवर्चसम्।**
**पद्मनाभं न जानन्ति तानाहुस्तामसान् बुधाः॥**

---

1. प.पु.उत्तरखण्डः(6).235

**योगिनं तं महात्मानं प्रविष्टं मानुषीं तनूम्।**
**अवमन्येत् वासुदेवं तमाहुः तामसं जनाः॥20॥**[1]
**देवं चराचरात्मानं श्रीवत्साङ्कं सुवर्चसम्।**
**पद्मनाभं न जानाति तमाहुः तामसं बुधाः॥21॥**

तत्रैव[2]—

**शृणु राजन् न ते विद्या मम विद्या न हीयते।**
**विद्याहीनस्तमोध्वस्तो नाभिजानासि? केशवम्॥2॥**
**मायां न सेवे भद्रं ते न वथा धर्ममाचरे।**
**शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम्॥5॥**

तत्रैवान्यत्र[3]—

**मन्ये त्वां राक्षसं क्रूरकर्माणं तामसात्मकम्।**
**यस्मात् द्विषसि गोविन्दं पाण्डवञ्च धनञ्जयम्॥** इति,
**रजस्तमोभ्यामाविष्टा येषां बुद्धिरनिश्चिता।**
**ते न पश्यन्ति मे तत्त्वं तपसा महता ह्यपि॥43.43॥**
**नोपवासैर्न नियमैर्न व्रतैर्विविधैरपि।**
**द्रष्टुं वा वेदितुं वापि न शक्या परमा गतिः॥44॥**
**महामोहार्थपङ्के तु निमग्नानां गतिर्हरिः।**
**एकान्तिनो ध्यानपरा यतिभावाद्व्रजन्ति माम्॥45॥**
**सत्त्वयुक्ता मतिर्येषां केवलाऽऽत्मविनिश्चिता।**
**ते पश्यन्ति स्वमात्मानं परमात्मानमव्ययम्॥46॥** इत्यादि।

एवं तत्र तत्र बहूनि प्रमाणानि द्रष्टव्यानि। तामसपुराणेषु क्वचित् क्वचित् त्रिपुण्ड्रविधानञ्च विद्याविशेषनिष्ठविषयं प्रायश्चित्तविषयञ्चेति।

'धृतोर्ध्वपुण्ड्रः' इत्युदाहृतश्रुतौ 'विष्णुं परं ध्यायति यो महात्मा' इत्यभिप्रेतार्थ उपबृंहितः।

यथा भरद्वाजस्मृतौ—

**य ऐकान्त्यं गता विष्णौ भगवत्यात्मभावने।**
**ते वैष्णवा भागवताः सन्त इत्यपि ते स्मृताः॥** इति।

---

1. म.भार.6.66
2. म.भार.5.67
3. म.भार.13

पराशरस्मृतौ—

**अर्थपञ्चकतत्त्वज्ञाः पञ्चसंस्कारसंस्कृताः।**
**आकारत्रयसम्पन्ना महाभागवताः स्मृताः॥** इति।

बृहन्नारदीये—

**सर्वेषां हितवाक्यानि ये वदन्ति नरोत्तमाः।**
**ये गुणग्राहिणो लोके ते वै भागवतोत्तमाः॥**
**अन्येषामुदयं दृष्ट्वा ये हि निन्दन्ति मानवाः।**
**हरिनामपरा ये च ते वै भागवातोत्तमाः॥**
**येऽभिनन्दन्ति नामानि हरेः श्रुत्वाऽतिहर्षिताः।**
**रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः॥**
**क्षमां करोति क्रुद्धेषु दयां मूढेषु यः सदा।**
**मुदञ्च पुण्यशीलेषु स वै भागवतोत्तमः॥**
**पुत्रदारगृहक्षेत्रद्रव्यादौ ममतां तु यः।**
**विसृज्य सेवते धर्मं स वै भागवतोत्तमः॥**
**सुवर्णं रत्नमथवा पारक्यं विजने वने।**
**विलोक्य मोहं नायान्ति ते वै भागवतोत्तमाः॥**
**ज्ञानार्थन्तु श्रुतं यस्य धर्मार्थं यस्तु जीवति।**
**अपत्यार्थं विवाहश्च तं विद्धि भगवत्प्रियम्॥**
**कलिकल्मषदोषेऽपि येषान्नोपहता मतिः।**
**दानार्थं सञ्चयन्त्यर्थं ते वै भागवतोत्तमाः॥** इति।

भागवते एकादशस्कन्धे–11/2।।

**सर्वभूतेषु यः पश्येत् भगवद्भावमात्मनः।**
**भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥55॥**

**विसृजति हृदयं न यस्य साक्षात् हरिरवशाभिहितोऽप्यघौघनाशः।**
**प्रणयरशनया धृताङ्घ्रिपद्मः स भवति भागवतप्रधान उक्तः॥56॥** इति।

विश्वामित्रसंहितायाम्—

**दीक्षामेवन्तु यः कुर्याच्चक्रमण्डलसन्निधौ।**
**स एव ब्राह्मणो विद्वान् स एवाश्रमिणां वरः॥9.89॥**
**स एतैर्नामभिर्वाच्यः एकान्ती पाञ्चरात्रिकः।**
**सूरिर्भागवतश्चैव सात्वतः पाञ्चकालिकः॥90॥**

**अन्याख्याभिर्न वाच्योऽयं यथैव प्राकृतो जनः।**
**समयोऽथ समाचारः स्वाध्यायद्रव्यसङ्ग्रहौ॥91॥**
**शुद्धिः प्रजा स्तुतिर्ध्यानं विधिरित्यभिधायतः।**
**विधिनानेन यस्तिष्ठेत् स भागवतनामभाक् ( भागवत इष्यते? )॥92॥**
**ज्ञानादिषड्गुणगणो भग इत्युच्यते द्विज।**
**यस्मिन् स वसते नित्यं स एव भगवान् हरिः॥93॥**
**तदीये यः सुनिरतः स भागवतनामभाक्॥94॥ इति।**

श्रीविष्णुपुराणे—

**तत् ब्रह्म तत्परं धाम तद्ध्येयं मोक्षकाङ्क्षिणाम्।**
**श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्॥6-5-68॥**
**तदेव भगवद्वाच्यं स्वरूपं परमात्मनः।**
**वाचको भगवच्छब्दः तस्याद्यस्याक्षयात्मनः॥6-5-69॥** इति।

भगवच्छब्दं प्रकृत्योक्तम्—

**एवं निगदितार्थस्य तत्तत्त्वं तस्य तत्त्वतः।**
**ज्ञायते येन तज्ज्ञानं परमन्यत्त्रयीमयम्॥70॥**
**अशब्दगोचरस्यापि तस्य वै ब्रह्मणो द्विज।**
**पूजायां भगवच्छब्दः क्रियते ह्युपचारतः॥71॥**
**शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते।**
**मैत्रेय भगवच्छब्दः सर्वकारणकारणे॥72॥**
**सम्भर्तेति तथा भर्ता भकारोऽर्थद्वयान्वितः।**
**नेता गमयिता स्रष्टा गकारार्थस्तथा मुने॥73॥**
**ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।**
**ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणात्॥74॥**
**वसन्ति तत्र भूतानि भूतात्मन्यखिलात्मनि।**
**स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः॥75॥**
**एवमेष महान् शब्दो मैत्रेय भगवानिति।**
**परमब्रह्मभूतस्य वासुदेवस्य नान्यगः॥76॥**
**तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः।**
**शब्दोऽयं नोपचारेण त्वन्यत्र ह्युपचारतः॥77॥**

**उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम्।**
**वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति॥78॥**
**ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः।**
**भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः॥79॥ इति।**

तत्रैवं भगवच्छब्देनाभिहितस्य भूतयोनित्वाद्यर्थस्य तस्य ब्रह्मणः तत्त्वम् - स्वरूपं येन विवेकज्ञानेन तत्त्वतो ज्ञायते - दृश्यते तत् पुष्कलसाक्षात्काररूपं परम्, अन्यच्छास्त्रजं परोक्षरूपम् अपरमित्युपसंहृतम् 'एवमि'त्यादिना। सर्वकारणे परे ब्रह्मणि भगवच्छब्दो मुख्यः, 'अन्यत्रोपचारत' इति वक्ष्यन् मुक्ते तावदुपचारत इत्याह - अशब्देति। मुक्तो ह्यशब्दगोचरः, देवादिनामागोचरः, 'नामरूपाद्विमुक्त'[1] इति श्रुतेः। उपनिषत्प्रसिद्ध्या 'तस्ये'ति मुक्तः परामृश्यते। ब्रह्मत्वञ्च ब्रह्मसाधर्म्यात्। पूजायां निमित्तभूतायां तस्योपचारतो भगवच्छब्दः क्रियते। यद्वा 'अशब्दगोचरस्यापी'ति भगवच्छब्दवाच्यत्वं विवक्षितम्। तस्येत्यत्र तस्य तस्येति वीप्सा विवक्षिता। ब्रह्मणो भगवच्छब्द इत्यन्वयः। ब्रह्मवाचक इत्यर्थः। 'तस्ये'ति ब्रह्मविशेषणं वा। ब्रह्मणि मुख्योऽयं भगवच्छब्दः अवाच्येऽप्युपचारतः प्रयुज्यत इति तत्प्रयोगविषये सर्वत्र तद्वाच्यत्वबुद्धिर्न कार्येत्यर्थः। अस्य श्लोकस्य भगद्विषयत्वे

'तदेव भगवद्वाच्यं स्वरूपं परमात्मनः', 'शुद्धो यन्नोपचारेण ह्यन्यत्र ह्युपचारतः'

इति पूर्वोत्तरविरोधात्। परमकारणे परे ब्रह्मणि शब्दोऽयमनुपचारतश्शब्द्यत इत्याह - 'शुद्ध' इति। शुद्धिर्मलप्रत्यनीकत्वम्। महाविभूत्याख्ये - महाविभूतिसंज्ञे। महती हि विभूतिः ब्रह्मणः। उत्तरनिर्वचनानुसारेण अत्र भगवच्छब्द इत्यत्र भगवत्पदं दण्डिवत्(?) लक्षणया भगवच्छब्दं भगवाञ्छब्दञ्चाह। भगवच्छब्दनिर्वृत्तिः सम्भवतीति भगवच्छब्दवच्चलन् चेति विभज्यार्थः पृच्छयते भृङ्गमिव सतीनाम्ल 'अन्येष्वपि दृश्यते'[2] इति डप्रत्यये टिलोपे च कृते एवं रूपं भवति। अन्निति 'कश्यपः पश्यको भवती'[3]ति न्यायात् व्यत्यासेन नञ्निर्देशः। भगवच्छब्दे(भगवाञ्छब्दे) नलोपाभावश्छान्दसः। तेन हेयगुणनिषेधविषयत्वं विवक्षितम्। ततश्च 'विना हेयैर्गुणादिभिरि'ति वक्ष्यमाणहेयगुणाभाववैशिष्ट्यं विवक्षितम्। भगवच्छब्दार्थमाह – 'सम्भर्ते'त्यनेन। सम्भरणम् - उपकरणसंविधानम्। प्रकृतिपुरुषकालादीन् कार्योत्पत्तियोग्यान् करोतीत्यर्थः। महदादिसृष्टिरण्डरूपकार्योत्पत्त्युपयुक्ता सम्भरणम् इति वा विवक्षा। सम्भर्ता - स्वामी। धारणस्य वकारवाच्यत्वात् पोषकत्वस्य गकारवाच्यनेतृत्वान्तर्भावात्, अपेक्षितविधानात् दौर्बल्यञ्च स्वाभिमतमिह विवक्षितम्।

1. मु.उ.3.2.8
2. पा.सू.3.2.101
3. तै.आ.1.8.8

यद्यपि प्रत्ययविशेषयुक्तस्य भरतेः स्वामिनि (न?) रूढत्वम्, तथापि पूर्वोक्तयुक्तिसचिवार्षवचनबलात् धातुमात्रस्य स्वामिवाचित्वं निश्चीयते। इतिकरणेन संहर्तृत्वहर्तृत्वे प्रवृत्तिनिमित्ते निष्कृष्योच्येते। अत एवार्थद्वयान्वित इत्युक्तम्। उत्तरत्र तु प्रवृत्तिनिमित्तत्रये सत्यपि इतिकरणेन तेषामनिष्कृष्टत्वात् प्रवृत्तिनिमित्तत्रयविशिष्टो धर्म्येक एवार्थ उक्तः।

गकारार्थमाह - 'नेते'ति। उपसर्गस्तु कार्याणां धातुलीनत्वात् उद्गमयिता गमयिता सङ्गमयिता इत्येवंरूपं पदानामर्थमाह - 'नेते'ति। स्रष्टा इत्यनेनोद्गमयितृत्वमुक्तम्। नेतेति गमयितृत्वम्। तच्च स्थितिकर्तृत्वम्। गमयितेति सङ्गमयितृत्वम्। स च संहारः, यथा 'यस्मिन्निदं सञ्च विचैति सर्वमि'[1]त्यत्र 'व्येति', 'समेती'ति सर्गसंहारावुच्येते तद्वत्।

यद्वा कारणभूतस्वात्मानं गमयित्वाऽस्मिन् कार्यवर्गस्य लयकर्तेत्यर्थः।

अथ वकारव्याख्यानात् पूर्वमेव भगशब्दमात्रघटितप्रातिपदिकत्वात् भगवच्छब्दं निर्वक्ति - ऐश्वर्यस्येति। मतुबर्थस्य उक्तत्वादनुक्तिः। भगवाञ्छब्दे वकारार्थमाह - 'वसन्ती'ति। प्रत्ययस्यानेकार्थत्वात् अधिकरणे कर्तरि च व्युत्पत्तिः। भूतात्मनि - भूतानामात्मनि, अखिलात्मनि - भूतेतरेषामात्मनि। 'एवमेष' इति। भगवानित्यनेन भगवच्छब्दे भगवशब्दश्च सङ्ग्रहीतः। 'तत्रे'ति। पूज्यपदार्थोक्तिः - पूज्यानामवयवार्थानामुक्तिः, 'परिभाषा' - रूढिः, 'ताभ्यामन्वितः' - योगरूढिभ्यां विशिष्टः, 'अन्यत्र' - प्रयोगे। उपाचारनिमित्तमाह - 'उत्पत्तिमि'ति। 'वाच्य' इति। मतुबन्तस्यैव भगवच्छब्दस्य रूढ्यर्थमाह - 'ज्ञाशक्ती'ति। हेयगुणाभावविशिष्टो ज्ञानादिसमुदायः समुदायशक्तिप्रवृत्तिनिमित्तम्।

यद्वा भगवानिति शब्दे भगवसमुदायशक्तिविषयमर्थं नकारार्थञ्चाह - 'ज्ञानशक्ती'ति। अत्र भगवच्छब्द इत्यत्र भगवत्पदं गङ्गावत्(गङ्गापदवत्?) लक्षणया भगवाञ्छब्दमाह।

ज्ञानादिशब्दार्थश्चाहिर्बुध्न्यसंहितायामुक्तः—

**श्रृणु नारद षाड्गुण्यं कथ्यमानं मयानघ॥2.55॥**
**अजडं स्वात्मसम्बोधि नित्यं सर्वावगाहनम्।**
**ज्ञानं नाम गुणं प्राहुः प्रथमं गुणचिन्तकाः॥56॥**
**स्वरूपं ब्रह्मणस्तच्च गुणश्च परिगीयते।**
**कर्तृत्वं नाम यत् तस्य स्वातन्त्र्यपरिबृंहितम्।**
**ऐश्वर्यं नाम तत्प्रोक्तं गुणतत्त्वार्थचिन्तकैः॥58॥**
**श्रमहानिस्तु या तस्य सततं कुर्वतो जगत्।**
**बलं नाम गुणस्तस्य कथितो गुणचिन्तकैः॥59॥**

---

1. तै.उ.2.1.1

**तस्योपादानभावेऽपि विकारविरहो हि यः।**
**वीर्यं नाम गुणस्सोऽयमच्युतत्वापराह्वयम्॥60॥**
**सहकार्यनपेक्षा या तत्तेजः समुदाहृतम्।**
**एते शक्त्यादयः पञ्च गुणा ज्ञानस्य कीर्तिताः॥61॥** इति।

अथ भागवतमाहात्म्यम्

पराशरस्मृतौ—

**सहस्रवार्षिकी पूजा विष्णोर्भगवतो हरेः।**
**सकृद्भागवतार्चायाः कलां नार्हति षोडशीम्॥**
**यथा तुष्यति देवेशो महाभागवतार्चनात्।**
**तथा न तुष्यति हरिः विधिवत्स्वार्चनादपि॥**
**सकृत्सम्पूजिते पुण्ये महाभागवते गृहे।**
**आकल्पकोटि पितरः परितृप्ता न संशयः॥**

तत्रैव -

**यत्पश्यन्ति महाभागाः कृपया पातकानपि।**
**शुद्धिशुद्धाः प्रयान्त्येव शाश्वतं पदमव्ययम्॥ इति।**

पुनस्तत्रैव—

**प्रायश्चित्तमिदं गुह्यं महापातकिनामपि।**
**वैष्णवाङ्घ्रिजलं शुद्धं भक्त्या सम्प्राश्यते यदि॥**
**एतत्समस्तपापानां प्रायश्चित्तं मनीषिभिः।**
**निर्णीतं भगवद्भक्तपादोदकनिषेवणम्॥**

तत्रैव पराशरं प्रति मुनयः—

**त्वमेव भगवान् ब्रह्मन् साक्षाद्भागवतोत्तमः।**
**नास्त्यन्यद्भवरोगघ्नं त्वत्पादाश्रयणं विना॥**

तत्रैव—

**यस्य मूर्ध्नि स्थितं यावत् वैष्णवाङ्घ्रिरजश्शुभम्।**
**गङ्गादिसप्ततीर्थानि तावत्तिष्ठन्त्यसंशयः॥**
**महाभागवता यत्र वसन्ति विमलाश्शुभाः।**
**तद्देशं मङ्गलं प्रोक्तं यथा विष्णुपदं शिवम्॥ इत्यादि।**

शाण्डिल्यस्मृतौ—

**तथा स्वाराधनेनापि न प्रीतो भगवान् हरिः।**
**यथा भागवतश्रेष्ठपादाम्बुरुहसेवनात्॥**
**सुवर्णां गां गुणवतीं भूमिं वृद्धिकरीमपि।**
**दद्याद्भागवताग्र्येभ्यो भोगमोक्षाप्तये सुधीः॥**

तत्रैव—

**यत्र भागवता नित्यं पञ्चरात्रपरायणाः।**
**निवसन्ति सदा युक्ताः तत्क्षेत्रं नैमिशाद्वरम्॥**

भरद्वाजः—

**पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः।**
**तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदम्॥** इति।

तत्रैव—

**यत्र क्वाप्यथवा देशे वैष्णवो म्रियते यदा।**
**तदा तत्राशु सान्निध्यं करोति गरुडध्वजः॥**
**पादोदकं भगवतो लब्ध्वा भागवतस्य वा।**
**तिष्ठन्नेवाथवासीनः पिबेच्छुद्धश्च नारद॥** इति।

महाभारते—

**नम इत्येव यो ब्रूयात् मद्भक्तः श्रद्धयान्वितः।**
**तस्याक्षयो भवेल्लोकः श्वपाकस्यापि नारद॥** इति।।

आश्वमेधिके सप्तशततमे(110?)

**मद्भक्ता ये द्विजश्रेष्ठा मद्भक्ता मत्परायणाः।**
**तान् पङ्क्तिपावनान् विद्धि पूज्यांश्चैव विशेषतः॥13॥**

तत्रैव—

**मम मद्भक्तभक्तेषु प्रीतिरभ्यधिका नृप।**
**तस्मात् भक्तभक्ताश्च पूजनीया विशेषतः॥**
**कीटपक्षिमृगाणाञ्च मयि सन्न्यस्तचेतसाम्।**
**ऊर्ध्वमेव गतिं विद्धि किं पुनर्ज्ञनिनां नृणाम्॥**
**पत्रं वाप्यथवा पुष्पं फलं वाप्यन्यदेव वा।**
**ददाति मम शूद्रोऽपि शिरसा धारयामि तम्।** इति।

तत्रैव—

**अन्त्यजो वापि यः कश्चित्सर्वपापसमन्वितः।**
**यावन्मां सततं ध्यायेत्सर्वपापैः प्रमुच्यते॥ इति।**

श्रीगीतायाम्—

**बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।**
**वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः॥[1]इति।**

भारत एवान्यत्र—

**मद्भक्तजनवात्सल्यं पूजायाञ्चानुमोदनम्।**
**स्वयमभ्यर्चनञ्चैव मदर्थे चाङ्गचेष्टितम्॥**
**मत्कथाश्रवणे भक्तिः स्वरनेत्राङ्गविक्रिया।**
**ममानुस्मरणं नित्यं यश्च मां नोपजीवति॥**
**भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्तते।**
**स विप्रेन्द्रो मुनिः श्रीमान् स यतिस्स च पण्डितः॥**
**न मे पूज्यश्चतुर्वेदी पूजयन् भक्तिवर्जितः।**
**स वै( मे? ) पूज्यस्सदा चासौ मद्भक्तः श्वपचोऽपि यः॥**
**तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम्।** इति।

तत्रैव—

**.....................................................एव ते स्मृताः॥**
**रुद्रादीन्यजमानास्तु शूद्रा एव प्रकीर्तिताः।**
**न शूद्रा भगवद्भक्ता विप्रा भागवताः स्मृताः॥**
**सर्ववर्णेषु ते शूद्रा ये ह्यभक्ता जनार्दने।**
**अपार्थं न प्रभाषन्ते शूद्रा भागवताः स्मृताः॥** इति।

इतिहाससमुच्चये—

**यत्र भागवताः स्नानं कुर्वन्ति विमलाशयाः।**
**न शूद्रा भगवद्भक्ता विप्रा भागवताः स्मृताः ( एव हि ते स्मृताः? )॥** इति।

तत्रैव—

**जातिर्न कारणं तात गुणाः कल्याणहेतवः।**
**आस्तिकोऽपि हि चण्डालः सोऽपि स्वर्गे महीयते॥ इति॥**

---

1. भ.गी.7.19

**न जातिर्न कुलं तात न स्वाध्यायो न च श्रुतम्।**
**कारणानि द्विजत्वस्य वृत्तमेवात्र कारणम्।।** इति।

मद्भक्तजनवात्सल्यमित्यादीनि वचनानि भागवतमाहात्म्यपराणि, न त्वाचारविक्लवपराणि। प्रत्यक्षितात्मनाधानां केषाञ्चिद्विमलादिकमिति वचनविवक्षितानामिदानीमुक्तानां महद्भिरिदानीं क्षयमाणसत्क (+++) शाचारविक्लवः।

इतिहाससमुच्चय एवान्यत्र—

**ये तु भागवतानङ्गैस्स्पृशन्त्युपविशन्ति च।**
**पश्यन्त्यपि च शृण्वन्ति दासस्तेषां महामुने।**
**प्रपन्नार्तिहरे विष्णौ भक्तिर्येषां प्रजायते।**
**तेषां दासस्य दासोऽहमिति मे निश्चिता मतिः।।** इत्यादि।

ब्रह्माण्डे—

**संवत्सरेण यत्पापं मनसा कर्मणा कृतम्।**
**नश्यते तदशेषाणि विष्णुचक्राङ्कदर्शनात्।**

गारुडपुराणे—

**एकं भागवतं विप्रं योऽर्चयेदन्नदानतः।**
**तस्य स्यात्सफलं जन्म तच्छृणुष्व महामते।**
**त्रिंशत्कुलान्यतीतानि नरके पतितान्यपि।**
**आगामिन्यपि तावन्ति स्वर्गे स्थाप्य हरिं व्रजेत्। इति।।**

बृहन्नारदीये—

**महापातकयुक्तो वा युक्तो वा सर्वपातकैः।**
**काङ्क्षितो भगवद्भक्तैर्लभते परमां गतिम्।। इति।।**

श्रीभागवते प्रथमस्कन्धे—

**नष्टप्रायेष्वभद्रेषु नित्यं भागवतार्चया।**
**भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी।1.2.18** इत्यादि।।

द्वितीयस्कन्धे—

**किरातहूणान्ध्रपुलिन्दपुल्कसा आभीरकङ्का यवनाः खसादयः।**
**येऽन्ये च पापा यदुपाश्रयाश्रयाः। शुद्ध्यन्ति तस्मै प्रभविष्णवे नमः।।2.4.**18 इत्यादि।

**एवं तृतीयस्कन्धादौ बहु द्रष्टव्यम्।**

लैङ्गे—

**यः पश्यति शुभाचारं वैष्णवं वीतकल्मषम्।**
**यस्मिन् कस्मिन् मते जातं प्रणमेद्दण्डवद्भुवि।** इत्यादि।

भारद्वाजः—

**सर्वैश्च लक्षणैर्युक्तो नियतश्च स्वकर्मसु।**
**यस्तु भागवतद्वेषी सुदूरं प्रच्युतो हि सः।**

शाण्डिल्यः—

**गृहे भागवतं प्रोक्त( प्राप्त )मज्ञानाद्योऽवमन्यते।**
**नष्टश्रीको भवेत्सद्यः क्षीणायुः पुण्यसञ्चयः॥** इत्यादि।

आश्वमेधिके त्रयोदशशततमे (116?)—

**मद्भक्तान् शूद्रसामान्यादवमन्यन्ति ये नराः।**
**नरकेष्वेव तिष्ठन्ति वर्षकोटिं नराधमाः॥**
**चण्डालमपि मद्भक्तं नावमन्येत बुद्धिमान्।**
**अवमत्य( अवमानात्? ) पतन्त्येव रौरवे नरके हि सः॥**

पञ्चशततमे (118?)—

**विद्याविनयसम्पन्ना ब्राह्मणा वेदपारगाः।**
**मयि भक्तिन्न कुर्वन्ति चण्डालसदृशा हि ते॥23॥**
**वृथा दानं वृथा तप्तं वृथा चेष्टं वृथा हुतम्।**
**वृथाऽऽतिथ्यञ्च तत्तस्य यो न भक्तो मम द्विजः॥24॥**
**यत्कृतञ्च हुतञ्चापि यदिष्टन्दत्तमेव च।**
**अभक्तिमत्कृतं सर्वं राक्षसा एव भुञ्जते॥25॥**
**वृथा ध्यानं वृथा ज्ञानं वृथा योगपरिग्रहः।**
**ब्रह्मचर्यं वृथा तस्य यो न भक्तो मयि द्विजः॥26॥**
**सभायान्तु न पूज्यन्ते न स्थाप्यन्ते कदाचन।**
**तेनाग्नयोऽग्निहोत्रेण ये न भक्ता मयि दिजाः॥ 27॥ इति॥**

श्रीभागवते—

**निन्दन्ति ये भगवतश्चरणारविन्दं चिन्ताविधूतसकलाशुभकल्मषौघम्।**
**तेषां यशोधनसुखायुरपत्यबन्धु-क्षेत्रादयस्थिरतरा अपि यान्ति नाशम्॥** इत्यादि।

श्रीपञ्चरात्रे—

**वासुदेवरतं नित्यं ये निन्दन्ति द्विजाधमाः।**
**विवासयन् खरारोहं कृत्वा भूपो न पापभाक्॥**

**इत्यादि बहु द्रष्टव्यम्॥इति।**

**इति श्रीरामानुजपदपङ्कजश्रीमद्वेदान्तगुरुसिद्धान्तनिर्वाहकश्रीदोड्डयाचार्यकृते श्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये परिकरविजयः समाप्तः॥**

**वाधूलश्रीनिवासार्यतनयं विनयाधिकम्। प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम्॥**
**चण्डमारुतवेदान्तविजयादिस्वसूक्तिभिः। वेदान्तरक्षकायास्तु महाचार्याय मङ्गलम्॥**

# वेदान्तविजयः सम्पूर्णः।